# सामवेदसंहिता

तत्र

## छन्दआर्चिचकः

## तत्रापि आग्नेयैन्द्रेति पर्वद्वयात्मकः

### अध्यायचतुष्कः प्रथमोभागः

भगवत्सायणाचार्य्य-विरचित-भाष्य-सहितः

अधीतवेद-"प्रत्नकम्रनन्दिनी"-सम्पादकेन

**श्रीसत्यव्रतसामश्रमिभट्टाचार्य्येण**

वङ्गसामगेन

टीकितो यथावसरं शोधितश्च।

मुन्शीराम मनोहरलाल

पब्लिशर्स प्रा.लि.

SĀMAVEDA SAṀHITĀ
with the commentary of Sāyaṇa Āchārya

*Edited by*
Satyavrata Sāmaśramī Bhattacharyya

VOLUME I

Price MUNSHIRAM MANOHARLAL 2000.0 for 5 volumes

Originally Published in Bibliotheca Indica, Calcutta, 1871-78
New Series nos. 218, 224, 235, 244, 251, 270, 280 285, 286 and 293

Reprinted 1983

Printed and published by Munshiram Manoharlal Publishers Pvt. Ltd.,
Post Box 5715, 54 Rani Jhansi Road, New Delhi-110055.

# ॥ छन्दआर्चिकस्य परिच्छेद-सूची ॥

## ॥ गेयगानस्य परिच्छेद-सूची ॥



तत्र प्रथमार्द्धीयान्येव ४२ऐन्द्रपर्वान्तर्गतानि ।

[ इति ऐन्द्रम् पर्व ]

---

## अथ सायणभाष्यस्य परिच्छेद—सूची ।

* ग्रन्थमध्ये इह यद् (५४) एवमङ्कं दृश्यते तद् भ्रममूलकम्, एवमुत्तरत्रापि।

---

## ॥ छन्दः-सूची ॥

* ग्रन्थमध्ये इह यद् (५४) एवमङ्कं दृश्यते तद् भ्रममूलकम्, एवमुत्तरत्रापि।

---

# ॥ छन्दः-सूची ॥

---

* अत्र पृष्ठस्य-तृतीय-पङ्क्ति-टीप्पन्यां किञ्चिद् भ्रमोविद्यते—पुरुत्वेति खण्डस्य द्वितीया ऋक्, प्रमंहिष्ठायेत्यादि खण्डस्य आदिमाः सप्त ऋचः, इमा अष्टौ ऋचः ककुभः, अन्याः दश उष्णिहः इति वक्तव्येऽन्यथाभिलपितत्वात्।

---

# ॥ छन्दआर्चिकस्य देवता-सूची ॥



---

*, * आग्नेये पर्वणि इमाः समस्ताः, अग्निमाश्रित्यैन्द्रे पर्वणीति विवेकः।

---

† आग्नेये पर्वणि इमास्तिस्रः ऐन्द्र्यः ।

‡ अष्टाशीत्युत्तरद्विशतपृष्ठात ऐन्द्रपर्वारम्भः, तत्र विशेषतोऽनिर्दिष्टदैवताः सर्वा एव ऐन्द्रा इति सुगमम् ।



—०—

# ॥ छन्दआर्चिकस्य ऋषि-सूची ॥

वसुश्रुतः (आत्रेयः) ८५४, ८६४।

वसूयवः (आत्रेयः) २४१।

वामदेवः (गौतमः) ११२, १२०, १२८, १६७वि०, १९६अ०, २०९, २२६, २४७?, २४९वि०, २५१, २५२, २५४?, ३८४, ३८९, ३९६वि०, ४०३, ४१६, ४२४, ४२५, ४४३, ४४७ ४६५, ४६८वि०, ४७४ वि०, ४८३वि०, ५८८, ५९८, ६०४सा० ६०५सा० ६०७वि०, ६६२, ६७८, ६८०, ६८१, ६८८, ७१२, ७२७, ७३०, ७३७, ७५१ ७६२, ८८०, ८८१।

विरूपः (आङ्गिरसः) १११, १७५, १६२वि०, ४३६वि०, ७८५, ७८८।

विश्वमनाः (वैयश्वः) २६९, २७१, २७२ सा०, ७९२, ७९३, ७९५, ८००, ८१२।

विश्वामित्रः (गाथी) १८०, १९४, २२४, २३०, २६१, २६५, २७५, ४२३, ४४५, ४५६, ४६८, ४७४, ५०८, ५९९?, ६६७, ६८४, ७१४?, ७३७।

वेनः (भार्गवः) ६४५।

बृहस्पतिः (भारतः) २७२अ०, ६४७।

शक्तिः (वाशिष्ठः) ५२५वि०।

शाकपूतः (गौतमः) ७२२?।

शुनःशेपः शुनःशेफो वा (सत्रिमः) ११६।

शुनःशेपः [फ] (आजीगर्तिः) १२०, १२६, १६३वि० अन्यत्र काण्वस्य ऋषि-सम्वादो नास्ति, ३५३, ३५४?, ३७१ ४०६, ४५०।

शुष्टिगुः (काण्वः) ६०७अ०।

शौनकः ( ? ) ४५५।

श्यावाश्वः (आत्रेयः) १९६, ३२२, ७२७।

संयुः, शंयुर्वा (भारद्वाजः—वार्हस्पत्यः) १४७, १५३, १६०, २८८, ३१०, ४३२ वि०, ४८१, ५४२, ५४९, ५८५, ७१७, ७९९।

सत्यश्रवाः (आत्रेयः) ८५८।

सप्तगुः [सद्गुः वि०] (आङ्गिरसः) ६२७।

सप्तवध्रिः (आत्रेयः) २४३।

सम्पातः (आङ्गिरसः) ८९२, ८९३, ८९४, ८९५, ८९६सा०।

सम्वर्त्तः (आङ्गिरसः) ९०२।

सत्यधृतिः (वारुणिः) ४१९।

सव्यः [सत्यः वि०] (आङ्गिरसः) ७६५, ७७१, ७७३।

सिन्धुद्वीपः (आम्बरीषः) १४२।

सुदीतिः (आङ्गिरसः) १०२?, १७४?।

सुभकक्षः, सुकक्षः, श्रुतकक्षः, सूतकक्षो वा (आङ्गिरसः) २९१, २९५, २९६, ३००, ३०९, ३१२, ३२१, ३४०, ३४९, ३५१, ३५५, ३६२, ३८६, ३९०, ४१३, ४२६, ४२९, ४४२, ४४८, ४५१, ४६९वि०, ४७५।

सुमित्रः (कौत्सः) ४७०? वि०।

सुवेदाः [सुमेधा वि०] (शैलूषिः) ७५६।

सुहोत्रः (भारद्वाजः) ६५०।

सोमाहुतिः (भार्गवः) २५३।

सौभरिः (काण्वः) १६५, १७१, १७७, १८८, २७४, २७६, २७८, २८०, २८२, २८३, २८४, २८५, ८१६, ८१७, ८१८, ८२०, ८२१, ८२३, ८२८, ८३०।

हर्यतः (प्रागाथः) २९१।

हिरण्यस्तूपः ( ? ) ४६०वि०।

ऋग्वेदीयानुक्रमणिका = ऋ०
सामवेदीय-नैगेयी = नै०
सायणभाष्यः = सा०
माधवाचार्य्यकृतं विवरणम् = वि०

—— एतद्ग्रन्थ-चतुष्टयानुसारत इह ऋष्यादयः सङ्कलिताः; मतभेदे तु यथाधिकसाम्मत्यं तदेव स्वीकार्य्यापरं मतम् ऋ०, नै०, सा०, वि०, इत्यन्यतरसङ्केतेन ज्ञापितम्, समे च पद्यान्तरं चिह्नितम्, अथ यत्रासीत् तेषामेव संशयस्तत्र तथैवाङ्कितम् (?), क्वचिदक्षरतोऽपि विशेषो बोधितः, प्रकृतग्रन्थ-सम्पादनावसरे यत्र क्वचित् पाठ-भेद उररीकृतं, साम्प्रतं तयोरन्यतरो विचारसङ्गनाशुद्ध एवेति भासिते सचाश्रय उपेक्षितः; क्वचित् क्वचित् मतभेद इति ग्रन्थ-मध्यनिर्दिष्टोऽप्यत्र पाठभेदत्वेनाङ्गीकृत इति विवेचनीयम् ॥ सं० ।

---

# ॥ मन्त्राणामकारादिक्रमेण सूची ॥

# [ त ]

[ म ]

पृष्ठ

# [ व ]

नमः सामवेदाय।

# सामवेदसंहिता।

तत्र

भाष्यावतरणिका।

——०ः०——

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्॥ १॥
यस्य निश्वसितं वेदायोवेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥ २॥
तत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः।
आदिशत् सायणाचार्य्यं वेदार्थस्य प्रकाशने॥ ३॥
ये पूर्वोत्तरमीमांसे (१) ते व्याख्यायातिसङ्ग्रहात् (२)।
कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः॥ ४॥
सामवेदार्थमेषोऽत्र प्रकाशयति सादरम्।

---

(१) अनेन हि जैमिनि-कृत-पूर्व-मीमांसा-सूत्रानुसारेण वैयासिक-शारीरिक-नामोत्तरमीमांसा-सूत्रानुसारेण च (विषय-संशय-पूर्वपक्षोत्तरपक्ष-सङ्गत्यात्मक-पञ्चावयवका[illegible]न [illegible]यमपरतया[illegible]धिकरणानि निर्मितानि, स्वयमेव व्याख्यानेन विस्तृतानि च [illegible] त[illegible] द्वयोरेव [illegible]ोरभिधानमधिकरणमाला न्यायमाला न्यायविस्तरो वा।

(२) अतएवोक्तं तत्र तत्र, 'मीमांसा-सागर[illegible] क्रीड़ा-पुष्करिणी भवेत्'। अति-संक्षिप्तत्वादिति भावः।

उद्गातुस्तत्त्वजिज्ञासोरपि तेन कृतार्थता (१) ॥ ५ ॥
यज्ञोब्रह्म च वेदेषु द्वावर्थौ काण्डयोर्द्वयोः (२) ।
अध्वर्युमुख्यैर्ऋत्विग्भिश्चतुर्भिर्यज्ञ-सम्पदः ॥ ६ ॥
निर्मिमीते क्रिया-सङ्घैरध्वर्युर्यज्ञियं वपुः ।
तदलंकुर्वते होता ब्रह्मोद्गातेत्यमी त्रयः ॥ ७ ॥
शस्त्र-याज्यानुवाक्याभिर्होतालङ्कुरुतेऽध्वरम् ।
आज्य-पृष्ठादिभिः स्तोत्रैरुद्गातालङ्करोत्यमुम् ॥ ८ ॥
त्रयाणामपराधन्तु ब्रह्मा परिहरेत् सदा ।
ऋचान्त्वइति मन्त्रेऽसावर्थः सर्वोऽभिधीयते ॥ ९ ॥
यज्ञं यजुर्भिरध्वर्युर्निर्मिमीते ततो यजुः ।
व्याख्यातं प्रथमं, पश्चादृचां व्याख्यानमीरितम् ॥ १० ॥
साम्नामृगाश्रितत्वेन साम-व्याख्या ऽथ वर्ण्यते ।
अनुतिष्ठासु-जिज्ञासा-वशाद् व्याख्या-क्रमो ह्ययम् ॥ ११ ॥
जाते देहे भवत्यस्य कटकादि-विभूषणम् ।
आश्रितम् मणिमुक्तादि कटकादौ यथा तथा ॥ १२ ॥
यजुर्जाते यज्ञ-देहे स्यादृग्भिस्तद्विभूषणम् ।
सामाख्यामणिमुक्ताद्याऋक्षु तासु समाश्रिताः ॥ १३ ॥

---

(१) उद्गातृ-नामकः ऋत्विग्विशेषः; तस्य सामवेदार्थ-ज्ञानमत्यावश्यकम्, यज्ञे बाहुल्येन तस्यैव सामवेदीय-कार्य-कलापाधिकारित्वात्, तथाच लाट्यायन-सूत्रम् 'उद्गाता सामवेदेन (४ प्र १० ख)'-इति। 'मन्त्रान् कर्माणि चोद्गातैव कुर्यादनादेशे (१ प्र १ ख)'-इतिच।

(२) तत्र अधिकांशः कर्मकाण्डः, किञ्चिदंशः उपनिषद्भागात्मकः ज्ञानकाण्डः। प्राभाकरादि-मते ज्ञानकाण्डो नास्त्येव।

नन्वध्वर्यु-होतुद्गातृ-ब्रह्म-कर्त्तव्य-प्रतिपादको यो मन्त्रस्तस्यार्थो योजनीयः-इतिचेत्, योज्यते— "ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्करीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः"-इत्येष मन्त्रः(१) । तस्यायमर्थः—त्व-शब्दः सर्वनामसु पठितः एक-शब्द-पर्यायः, एकोहोतृ-नामकः ऋत्विक् तत्र तत्र विप्रकीर्णत्वेनाधीतानामृचां यज्ञानुष्ठान-काले सङ्घीभाव मापाद्य पुष्टिं कुर्वन्नास्ते ; एकउद्गातृ-नामकः शक्वर्युपलक्षित-च्छन्दोविशेषयुक्तास्वृक्षु गायत्रादि-नामकं साम गायति ; एको ब्रह्म-नामको होत्रादीनां वेद-त्रय-विषये यस्मिन्कस्मिंश्चिदपराधे जाते तत्प्रतीकाररूपां विद्यां वदति(२)। अतएव च्छन्दोगा आमनन्ति "यज्ञस्य हैषभिषग् यद् ब्रह्मा यज्ञायैव तद् भेषजं कृत्वा हरति"-इति*, "यदि यज्ञऋक्तआर्त्तिर्भवति भूरिति ब्रह्मा गार्हपत्ये जुहुयात्"-इत्यादि च ; एकस्त्वध्वर्युर्यज्ञस्य मात्रामियत्तां विमिमीते विशेषेण परिच्छिनत्ति इति ।

* यज्ञस्य विरिष्टं सन्दधाति भेषजकृतोह वा एष यज्ञो यत्रैवं विद् ब्रह्मा भवति (४प्र०१७ख०)"-इति कौथुम-शाखी-यछान्दोग्य पाठः ।

† "यद्युक्तोरिष्येद् भूःस्वाहेति गार्हपत्ये जुहुयात् (४प्र०१७-ख०)"—इति कौ० शा० छा० पाठः ।

अत्र ब्रह्मेति "ब्रह्मा यजमानं सर्वांश्चर्त्विजोऽभि रक्षति"-इति प्रकरणोपसंहरण-वचनाल्लभ्यते

(१) ऋग्वेदस्य दशम-मण्डलाष्टमाष्टक-द्वितीयाध्यायीयान्तिमाष्टक् ।

(२) विशेषतो व्याख्यानं निरुक्त-प्रथमाध्याय-द्वितीय-पाद-द्वादशखण्डे तद्भाष्ये च द्रष्टव्यम् ।

ननु वेदार्थ-प्रकाशकेऽस्मिन् ग्रन्थे वेदानां व्याख्येयत्वे सति तत्परित्यज्य यजुरादिकं व्याख्येयत्वेनोपन्यसितुमयुक्तम्-इतिचेत्—नायंदोषः, मन्त्र-विशेष-वाचकैर्यजुरादि-शब्दैस्तत्तन्मन्त्रोपेतानां वेदानामुपलक्षितत्वात् ॥

ननु मन्त्र-वेदयोः को विशेषः ? इति चेत्, उच्यते—मन्त्र-ब्राह्मण-समष्टिर्वेदः। तथाचापस्तम्बः स्मरति "मन्त्र-ब्राह्मणयो र्वेद-नामधेयम्"-इति (१)। वेदैकदेशयोर्मन्त्र-ब्राह्मणयोः पृथक् स्वरूपं जैमिनिर्न्यायेन निर्णीतवान्, (२) तत्र मन्त्र-स्वरूप-निर्णयं द्वितीयाध्यायस्य प्रथमपादे सप्तमाधिकरणे न्याय-विस्तर-कार (३) इत्थमुदाजहार—[१]"अहेबुध्निय मन्त्रं मे-इति मन्त्रस्य लक्षणम्।

(१) उपनिषद्-भागस्त्वनयोरन्तर्गतः,तथाच काचिदुपनिषत् मन्त्रात्मिका ईषेत्येवमादिः काचिद् ब्राह्मणात्मिका केनेत्यादिः। मीमांसक-मत-विशेषे तु "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् (१।२।१)" इति जैमिनि-सूत्रात् क्रियापरातिरिक्तानामुपनिषदिति प्रसिद्धानां वेदत्वमेव नास्ति। तत एव 'अपरा ऋग्वेदोयजुर्वेदः सामवेद' इत्यादि-कथन-पूर्वकम् 'अथ परा यया तदक्षरमधिगम्यते'-इति मुण्डकोपनिषद् (१-१-५) वाक्यम्, 'वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना'-इति मनु-वाक्ये सरहस्य-पदम्, 'दृष्टवदानुश्रविकः' इति सांख्य-शास्त्रोत्थितिश्च सङ्गच्छते। तदेतत् स्पष्टमेवाभ्यधायि प्राभाकरैः 'प्रवृत्ति-निवृत्ति विधि-तच्छेष-व्यतिरेकेण केवल-वस्तु-वादी वेदभागो नास्ति'। एतन्मये मन्त्रभागान्तःश्रुतानामीशेत्यादीनां क्रियापर एवार्थोग्राह्यः, अर्थान्तरः काल्पनिकः, केनेत्यादौ तु ब्राह्मण-ग्रन्थानामिवादरात् ब्राह्मणत्व-भ्रमः, तथादरश्च वेदवेत्तृभिः शिष्यानुपदेष्टुं तत्प्रणीतत्वात्, ब्राह्मण-ग्रन्थ-वाङ्मयाद्रचना-साम्यात् तत्पाठित्याच्च तथा भ्रमः, यथा गेयारण्य-गानवदूहोह्य-गानयोरप्यपौरुषेयत्व-भ्रमः।

(२) तथाच द्वितीयाध्याय-प्रथम-पादे अष्टाविंशत्युनत्रिंशत्तमे सूत्रे 'तच्चोदकेषु मन्त्राख्या'-इति 'शेषे ब्राह्मण-शब्दः' इति च। तच तेषां मन्त्राणां चोदकेषु अध्यापकेषु मन्त्र इति आख्या प्रसिद्धा, तत मन्त्र-लक्षणं ज्ञेयमित्याद्य-सूत्रार्थः शेष-सूत्रन्तु स्फुटम्।

(३) स्वयं न्याय-विस्तर-कारः, अन्यपुरुष-निर्देशो लेख शैलौ।

नास्त्यस्ति वाऽस्य नास्त्येतदव्याप्त्यादेरवारणात्॥ याज्ञिकानां समाख्यानं लक्षणं दोष-वर्जितम्। तेऽनुष्ठान-स्मारकादौ मन्त्र-शब्दं प्रयुञ्जते॥ आधाने इदमाम्नायते—'अहेबुध्निय मन्त्रं मे गोपाय'-इति; तत्र मन्त्रस्य लक्षणं नास्ति, अव्याप्त्यतिव्याप्त्यो-र्वारयितुमशक्यत्वात्—'विहितार्थाभिधायकोमन्त्रः'-इत्युक्ते 'वस-न्ताय कपिञ्जलानालभते' इत्यस्य मन्त्रस्य विधिरूपत्वादव्याप्तिः, मनन-हेतुर्मन्त्रः-इत्युक्ते ब्राह्मणेऽतिव्याप्तिः, एवम् 'असि-पदान्तो मन्त्रः' 'उत्तमपुरुषान्तो मन्त्रः' इत्यादि-लक्षणानां परस्परमव्याप्तिः; इतिचेत्— मैवम्, याज्ञिक-समाख्यानस्य निर्दोष-लक्षणत्वात् * तच्च समाख्यानमनुष्ठान-स्मारकादीनाम् मन्त्रत्वं गमयति—उरुप्रथ स्वेत्यादयोऽनुष्टान-स्मारकाः [१] अग्निमीले पुरोहितमित्यादयः स्तुतिरूपाः [२] ईषेत्वेत्यादयस्त्वन्ताः [३] अग्नआयाहि वीतये-इत्यादयआमन्त्रणोपेताः [४] अग्नीदग्नीन् विहरेत्यादयः प्रैषरूपाः [५]अधःस्विदासीदुपरिस्विदासीदित्यादयो विचाररूपाः[६]अम्बे-ऽम्बिकेऽम्बालिके न मानयति कश्चनेत्यादयः परिदेवनरूपाः [७] पृच्छामि त्वा परमन्तं पृथिव्याइत्यादयः प्रश्नरूपाः [८] वेदिमाहुः परमन्तं पृथिव्याइत्यादय उत्तररूपाः [९] एवमन्यदप्युदाहार्यम्। ईदृशेष्वत्यन्त-विजातीयेषु समाख्यानमन्तरेण नान्यः कश्चिदनुगतो धर्मोऽस्ति, यस्य लक्षणत्वमुच्येत; लक्षणस्योपयोगश्च पूर्वाचार्यै-र्दर्शितः—'ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वतः †। लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः'-इति; तस्मादभि-

* निर्द्दोषत्वात्-इति गौडस्वामि-पुस्तक-पाठः।

† पृथगदृशः-इति गौ० पुस्तक-पाठः।

युक्तानां मन्त्रोऽयमिति समाख्यानं लक्षणम्" १॥ ब्राह्मण-स्वरूप-मपि तत्रैवाष्टमाधिकरणे इत्थं निर्णीतम्—२"नास्त्येतद् ब्राह्मणे-त्यत्र लक्षणं विद्यतेऽथवा। नास्तीयन्तो वेदभागाइति क्लृप्तेर-भावतः॥ मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः। अन्यद् ब्राह्मणमित्येतद् भवेद् ब्राह्मण-लक्षणम्॥ चातुर्मास्येष्विद-माम्नायते—'एतद् ब्राह्मणान्येव पञ्च हवींषि'-इति, तत्र ब्राह्मणस्य लक्षणं नास्ति, कुतः? वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितु मशक्यत्वात्; पूर्वोक्तोमन्त्रभागएकः, भागान्तराणि च कानि-चित् पूर्वैरुदाहर्त्तुं सङ्गृहीतानि 'हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः। परकृतिः * पुराकल्पोव्यवधारण-कल्पना'-इति— तेन ह्यन्नं क्रियतइति हेतुः [१] एतद्दध्नोदधित्व-मिति निर्वचनम्[२] अमेध्या वै माषा इति निन्दा [३] वायु र्वै क्षेपिष्ठेति प्रशंसा [४] तद्व्यचिकित्सन् जुहवानी माहौषा-मिति संशयः [५] यजमानेन सम्मितौदुम्बरी भवतीति विधिः [६] माषानेव मह्यं पचते-इति परकृतिः [७] पुरा ब्राह्मणा अभैषु रिति पुराकल्पः [८] यावतोश्वान् प्रतिगृह्णीयात् तावतोवारुणां श्चतुष्कपालान्निर्वपेदिति विशेषावधारणकल्पना [९] एवमन्यदप्यु-दाहार्य्यम्। न च 'हेत्वादीनामन्यतमद्ब्राह्मणम्'—इति लक्ष-णम्, मन्त्रेष्वपि हेत्वादि-सद्भावात् †। तथाहि— इन्द्रवोवाम-शन्ति होति हेतुः—उदानिषुर्महीरिति तस्मादुदकमुच्यतइति

* परक्रिया-इति रामशास्त्रि-पुस्तक-पाठः।

† सम्भवादिति गौ० पुस्तक-पाठः।

निर्वचनम्—मोघमन्नं विन्दते अप्रचेताइति निन्दा—अग्निर्मूर्द्धा-दिवः ककुदिति प्रशंसा—अधःस्विदासीदुपरिस्विदासीदिति संशयः—कपिञ्जलानालभतइति विधिः—सहस्रमयुताददददिति परकृतिः—यज्ञेन यज्ञमयजन्त देवाइति पुराकल्पः। 'इति-करण बहुलं ब्राह्मणम्'-इति चेत् न, इत्यददा इत्ययजथा ※ इत्यपच-इति ब्राह्मणो गायेदित्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेऽति-व्याप्तेः। 'इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमिति चेत्— न, 'राजा चिद्यं भगं भक्षीत्याह'—'यौवा रक्षाः शुचिरस्मीत्याह' इत्यनयोर्मन्त्रयोरतिव्याप्तेः। 'आख्यायिकारूपं ब्राह्मणम्'—इति चेत् — न, यमयमी-संवाद-सूक्तादावतिव्याप्तेः। तस्मान्नास्ति ब्राह्मण-लक्षणम्-इति प्राप्ते, ब्रूमः— मन्त्रब्राह्मणरूपौ द्वावेव वेदभागावित्यङ्गीकारात् मन्त्र-लक्षणस्य पूर्वमभिहितत्वात् 'अव-शिष्टो वेदभागो ब्राह्मणम्'-इत्येतल्लक्षणं भवतीति"[२] ॥

मन्त्रविशेषाणामृग्यजुःसामरूपाणां लक्षणानि तस्मिन्नेवाधि-कारे त्रिष्वधिकरणेषु (१) जैमिनिः सूत्रयामास—"तेषामृग् यत्रार्थवशेन पाद-व्यवस्था" [३१] "गीतिषु सामाख्या" [३४] "शेषे यजुःशब्दः" [३३]-इति(२)। तदेतन्न्यायविस्तरे स्पष्टीकृतम्—

※ इत्यपचथा-इति सामश्रमि-पुस्तकेऽधिकः पाठः।

(१) दशमैकादशद्वादशेष्विति बोध्यम्।

(२) अत्रेदं चिन्त्यम्—अथर्व-लक्षणं कथं न कृतमिति, दृश्यते ह्येवमनेकत्राथर्वमा-माम्नानम्। तथाच षड्विंश-ब्राह्मण-चतुर्थ-प्रपाठकीय-प्रथमखण्डे-"ऋग्वेदः पृथिव्या यजु-र्वेदोऽन्तरिक्षात् सामवेदो द्युमात्" इति, मन्त्र-ब्राह्मण-षष्ठ-प्रपाठकीय-सप्तदशखण्डे 'अग्ने ऋचो वायोर्यजूंषि सामान्यादित्यात्" इति, मनौ प्रथमेऽध्याये अग्नि-वायु-रविभ्यस्तु त्रय

२-४-५"नर्क्-साम-यजुषां लक्ष्म सांकर्यादिति शङ्क्यते। पादश्च गीतिः प्रश्लिष्ट-पाठइत्यस्त्यसङ्करः॥ इदमाम्नायते—'अहेबुध्निय मन्त्रं मे गोपाय य मृषयस्त्रैविदा विदुः। ऋचः सामानि यजूंषि"(१)-इति; त्रीन् वेदान् विदन्तीति त्रिविदः, त्रिविदां सम्बन्धिनोऽध्येतारस्त्रैविदा स्ते च यं मन्त्रभागमृगादि-रूपेण त्रिविधमाहुः तं गोपायेति योजना। तत्र त्रिविधानामृक्-साम-यजुषां व्यवस्थितं लक्षणं नास्ति, कुतः? साङ्कर्य्यस्य दुष्परिहरत्वात्; 'अध्यापक-प्रसिद्धेष्वृग्वेदादिषु पठितो मन्त्रः'-इति हि लक्षणं * वक्तव्यम्, तच्च सङ्कीर्णम्—"देवोवः सवितोत्पुनात्वच्छिद्रेण वसोः सूर्यस्य रश्मिभिः"-इत्ययं मन्त्रो यजुर्वेदे सम्प्रतिपन्नो यजुषां मध्ये पठितः, नच तस्य यजुष्ट्वमस्ति, तद् ब्राह्मणे सावित्रयर्चैं त्यृक्त्वेन व्यवहृतत्वात्; एतत् साम गायन्नास्ते-इति प्रतिज्ञाय किञ्चित् साम यजुर्वेदे ङ्गीकृतम्;"अक्षितमसि"(२)"अच्युतमसि"प्राणसंशितमसि"-इति त्रीणि यजूंषि सामवेदे समाम्नातानि, (३) तथा गीयमानस्य साम्न

* तल्लक्षणमिति गौ॰ सा॰ पुस्तकयोः पाठः।

ब्रह्म सनातनम्। दुदोह यज्ञ-सिद्ध्यर्थमृग्-यजुः-साम-लक्षणम्" इति; अमरोऽपि"इतिवेदास्त्रयस्त्रयी" इति। अथवा नायं चिन्ता-विषयः--एभ्यएवहि वेदेभ्य आङ्गिरसेनाथर्वणा पुरा संगृहीतः प्रथितश्चतुर्थोवेद इति, अतएवोपपन्नं यन्तन्नामानुरूपमभिधानमथर्वेति "अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा" इति तैत्तिरीयादि-श्रुताङ्गिरसेति विशेषणञ्च।

(१) कृष्णयजुर्वेदस्य ब्राह्मणभागीय-प्रथमाष्टक-द्वितीयाध्यायस्य षड्विंशतितमं मन्त्रम्।

(२) कृष्णयजुःसंहितायाः प्रथमाष्टक-षष्ठाध्याय-पञ्चमानुवाकारम्भे।

(३) तानीमानि छान्दोग्य-ब्राह्मणस्य तृतीय प्रपाठके-सप्तदशखण्डे द्रष्टव्यानि।

आश्रयभूता ऋचः सामवेदे समाम्नायन्ते; तस्मान्नास्ति लक्षण मिति चेत्— न, पादादीनामसंकीर्ण-लक्षणत्वात्; 'पादबन्धेनार्थेन चोपेताः वृत्तबद्धाः मन्त्राः ऋचः' 'गीतिरूपाः मन्त्राः सामानि' 'वृत्त-गीति-वर्जितत्वेन प्रश्लिष्टपठिताः मन्त्राः यजूंषि'-इत्युक्ते न क्वापि सङ्करः"-२.४.५-इति(१)॥

यदुक्तं गीतिषु सामाख्येति तदेव विशदीकर्त्तुं सप्तमाध्यायस्य द्वितीयपादे रथन्तरशब्दो निरूपितः—१"अतिदेश्यं विनिश्चेतुं कवतीषु रथन्तरम्। गायतीत्यृग् गानयुक्ता शब्दार्थोगानमेव वा॥ इति चिन्ता गानयुक्ता त्वभित्वेत्यृक् प्रसिद्धितः। लाघवा दतिदेशस्य योग्यत्वाच्चान्तिमोभवेत् (१अ०)॥ इदमाम्नायते— 'कवतीषु रथन्तरं गायति'-इति, 'कया नश्चित्रआभुवदित्याद्या- स्तिस्रऋचः कवत्यः (२), तासु वामदेव्यं सामाध्ययनतः प्राप्तम् (३)तद्बाधितुं रथन्तरं साम तास्वतिदिश्यते, तत्रातिदेशस्य स्वरूपं निश्चेतुं रथन्तर-शब्दार्थश्चिन्त्यते। गानविशेषयुक्ताभित्वाशूरनो- नुमइतीयमृग् (४) रथन्तरमित्युच्यते, कुतः? अभ्यर्हित-प्रसिद्धि-

---

(१) इत्यत्र गद्य-पद्य-गीति-रचना-त्रय-भेदात् वेदत्रयित्वम्।

(२) तथाहि— "कयानश्चित्रआभुवदिति कवत्यः"-इति ताण्ड्यब्राह्मण-पञ्चदश- प्रपाठक-दशम-खण्डारम्भः। अत्र 'तृचसूक्तानामादि-ग्रहणेन विधिरनादेशे'-इति (६।२) लाट्यायन-स्मरणात् तृच-लाभः। सच उत्तरार्च्चिकस्य प्रथमप्रपाठकीय-द्वादश- सूक्तरूपः; तत्र कयानश्चित्रेति प्रथमा ऋक्, कस्त्वा सत्योमदानामिति द्वितीया, अभीषुणः सखीनामिति तृतीया।

(३) ऊह-गान-ग्रन्थे तथैव पाठात्। तत्र तत्र प्रथमप्रपाठक- प्रथमार्द्धीय-पञ्चमं साम।

(४) सा च छन्दस्यार्च्चिकस्य तृतीयाध्याय-प्रथम-दशत्यां प्रथमा।

तः(१) रथन्तरं गीयतामिति केनचिदुक्ताः अध्येतारः स्वर-स्तोभ-विशेष युक्ता* मभिवेत्यृचं पठन्ति, न तु स्वरस्तोभमात्रम्; तस्माद् गान-विशिष्टायाकृचो रथन्तर-शब्दार्थत्वमिति प्राप्ते, ब्रूमः—स्वरादि-विशेषानुपूर्वीमात्रस्वरूपमृगक्षर-व्यतिरिक्तं यद् गानं तदेव रथन्तरशब्दार्थः, कुतः? लाघवात्, किञ्च कवतीष्वृक्षु गानमतिदेष्टुं योग्यं नत्वृचस्तद्योग्यतास्ति, कयानोऽभिवेत्यनयोर्ऋचोर्युगपदाधाराधेयभावेन पठितुमशक्यत्वात्; तस्माद् गानविशेषएव रथन्तरशब्दार्थः(२)"६-इति ॥

पुनरपि नवमाध्यायस्य द्वितीयपादे प्रथमाधिकरणस्य प्रथमवर्णके सामशब्दस्य गान-मात्र-वाचित्वं स्मारितम्—७"सामोक्ति-वृहदाद्युक्ती गीताया ऋचि केवले । गाने वा गान-एवेति स्मार्यते सप्तमोदितम् ॥ सामान्यवाची सामशब्दो विशेष-वाचिनो वृहद्रथन्तरादि-शब्दाश्च गानमात्रे वर्त्तन्ते, न तु गान-विशिष्टायामृचि-इत्ययं नियमः सप्तमस्य द्वितीयपादे सिद्धः, सोऽत्र वक्ष्यमाण-विचारोपयोगितया स्मार्यते"७-इति ॥

साम-शब्द-वाच्यस्य गानस्य स्वरूपमृगक्षरेषु क्रुष्टादिभिः सप्तभिः स्वरैः अक्षरविकारादिभिश्च निष्पाद्यते । क्रुष्टः प्रथमो द्वितीय

---

* स्वर-स्तोभ-युक्तेत्येव पाठः वा० सा० पुस्तकयोः ।

---

(१) आरण्य-ग्रन्थे तथैव पाठात् । तत्र तत्र द्वितीयप्रपाठकीयैकविंशतितमं साम ।

(२) कवतीषु रथन्तरम्, ऊह्य गाने संवत्सर-पर्वस्थान्तिमं साम; विदितञ्चैतत् प्रायणीयेऽह्नि माध्यन्दिने ।

स्तृतीय श्चतुर्थः पञ्चमः षष्ठ श्चेत्येते सप्त-स्वराः(१), ते चावान्तर भेदैर्बहुधा भिन्नाः। स्वरस्य साम-निष्पादकत्वं छान्दोग्योपनिषदः प्रथमे प्रपाठके(८ख०) प्रश्नोत्तराभ्यामामनन्ति—"स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच— हन्त ! त्वा पृच्छानीति, पृच्छेति होवाच— का साम्नो गति रिति, स्वरइति हो वाच"-इति । काण्वा उद्गीथविद्यायां स्वरस्य साम-सम्बन्धि-सर्वस्व-स्थानीयत्वं शोभन-वर्ण-स्थानीयत्वं चामनन्ति(२)—"तस्य हैतस्य साम्नो यः स्वं वेद, भवति हास्य स्वं, तस्य स्वर एव स्वम्,-इति, "तस्य हैतस्य साम्नो यः सुवर्णं वेद, भवति हास्य सुवर्णं, तस्य वै स्वर एवसुवर्णम्"-इति च ।

अक्षर-विकारादीनान्तु साम-निष्पादकत्वं नवमाध्यायस्य द्वितीयपादे एव 'अर्थैकत्वाद् विकल्पः स्यात्' (२७ सू०)-इत्येतस्य सप्तमाधिकरणगतस्य सूत्रस्य व्याख्यानावसरे शवरस्वामिना स्पष्ट-मुक्तम्—"सामवेदे सहस्रं गीत्युपायाः, आह कइमे गीत्युपाया नाम ? उच्यते— गीतिर्नाम क्रिया ह्याभ्यन्तर-प्रयत्न-जन्या, स्वर

(१) "तद् योऽसौ क्रुष्टतमइव साम्नः स्वर स्तं देवा उपजीवन्ति, योऽवरेषां प्रथमस्तं मनुष्याः, योद्वितीयस्तं गन्धर्वाप्सरसो, यस्तृतीयस्तं पशवो, यश्चतुर्थस्तं पितरोये चाण्डेषु शेरते, यः पञ्चमस्तमसुर-रक्षांसि, योऽन्त्यस्तमौषधयो वनस्पतयो यच्चान्यज्जगत्"-इति सामविधान-ब्राह्मण-प्रथमप्रपाठकाद्यखण्डे । नारद-शिक्षादावेतद्-विशेषो द्रष्टव्यः।

(२) कौथुमाश्चाप्येवमेव, तथाहि-'सामविधान'-ब्राह्मणस्य प्रथमप्रपाठकाद्यखण्डे-"यो ह वै साम्नः स्वं यः सुवर्णं वेद, स्वं च ह वै साम्नः सुवर्णं च भवति, स्वरो वाव साम्नः स्वं तदेव सुवर्णम्"-इति ।

विशेषाणामभिव्यञ्जिका, साम-शब्दाभिलप्या, सा नियत-प्रमाणा, ऋचि गीयते (१), तस्मात्‌तदनार्थोऽयमृगक्षर-विकारोविश्लेषो विकर्षणमभ्यासोविरामःस्तोभइत्येवमादयः सर्वे सामवेदे (२) समाम्नायन्ते"-इति। तद्विषये विचारो न्यायविस्तरेऽभिहितः— "समुच्चेया विकल्प्या वा विभिन्ना गीति-हेतवः। आद्यः प्रयोगग्रहणादर्थैकत्वाद् विकल्पनम्॥ छान्दोग्ये तवल्का-

---

(१) तथाहि श्रूयते—'एतस्य साम्न ऋगेवास्थीनि, स्वरोमांसानि, स्तोभा लोमानि'-इति 'सामविधान'-ब्राह्मणाद्यप्रपाठकाद्यखण्डे।

(२२) गेयारण्योहोह्याभिधेयेषु चतुर्षु गानग्रन्थेषु, माहानाम्न्यादि-सामसु च। तद्यथा।

"अग्न आ याहि वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषि"। (सा० छ० १प्र० १ ख० १ऋ०)

अत्र गानानि त्रीणि, तत्राद्यं गेयगानस्य प्रथमं साम। तदेव पश्यतु यावत्—

"ओग्नायि। आयाहीऽ३ वोयितोया२यि। तोया२यि। गृणानोह। व्यदातो या२यि। तोया२यि। नायिहो तासा२३। त्वा२यि। वा २३४औ होवा। हो२३षी। १"

अत्र आद्याक्षरादयोविकृताः, 'वीतये'-इति बीजकात् 'वोयि'-इत्याद्यस्मात् 'तोया-'इत्यादिर्विश्लिष्टः, 'या२यि'-इत्याद्यंशो विकर्षणः, 'तो या२यि'-इत्येतस्योभयत्र पाठोऽभ्यासः, 'हव्यदातये'-इति बीजके 'ह। व्यदा तो या-२यि'-इत्यंशे हकारानन्तरं यतिर्विरामः, 'ता'-इति मूलकः 'त्वा२यि'-इत्यंशः स्तोभः, अधिकत्वे सति ऋग्विलक्षण वर्णः स्तोभः-इति तल्लक्षणत्वात्। स्तोभादयइत्यादिपदात् लोपागमादयो ग्राह्याः, तथाहि— 'बर्हिषि'-इत्यंशस्य रेफाश्रवणं, मध्ये 'औहोवा'-इत्यागमश्च। एवं यथासम्भवमिलितो विकृतादिः सर्वत्र ध्येयः।

रादि *-शाखा-भेदेषु विलक्षणागीति-हेतवोऽक्षर-विकारादय आम्नायन्ते, ते सर्वे कर्मानुष्ठाने समुच्चेतव्याः; कुतः ? प्रयोगवचने सर्वेषां परिगृहीतत्वात्— मैवम्, एकैक-शाखोक्तैरेवाक्षर-विकारादिभिरध्ययन-कालएव गीति-स्वरूप-निष्पत्तेस्तन्निष्पत्ति-लक्षणस्य प्रयोजनस्यैकत्वात्, प्रयोग-वचन-परिगृहीताअपि व्रीहि-यववद् बृहद्रथन्तरवच्च विकल्पन्ते"८-इति ॥ गीतिहेतुषु स्तोभस्यात्यन्तमप्रसिद्धत्वात्तल्लक्षणं तस्मिन्नेवपादे एकादशाधिकरणे चिन्तितम्— ९"स्तोभस्य लक्षणं नास्ति किं वास्ति न विवर्णता। आधिक्यमप्यतिव्याप्तं विशिष्टं लक्षणं भवेत् ॥ न तावद् विवर्णत्वं लक्षणम्, वर्ण-विकारस्य विपरीत-वर्णत्वेन स्तोभत्व-प्रसङ्गात् ; अग्नआयाही (छ.प्र१.द१.१) त्यस्यामृचि अकारस्य स्थाने ओकारं कृत्वा गायन्ति "ओग्नायि" इति(गे०प्र१.सा१)। अधिको वर्णः स्तोभ इत्युक्ते सति, अभ्यासेऽतिव्याप्तिः; पिबासोममिन्द्रमन्दतुत्वे त्येतस्यामृचि (१) इतुत्वेत्यक्षर-त्रयं गानकाले त्रिरभ्यस्तम् (२)। अतोविकाराभ्यासयोरतिव्याप्तेर्नास्तिलक्षणम्-इति चेत्— मैवम्, "अधिकत्वे सत्यृग्विलक्षण-वर्णः स्तोभः"(३)-

---

* तलवकारादि-इति गौ० सा० पाठः ।

---

(१) छन्दोनामार्च्चिकस्य चतुर्थ-प्रपाठकीय-पञ्चम-खण्डाष्टम्यामिति यावत्।

(२) गेयगानस्य दशमप्रपाठकैकत्रिंशत्तमे सामनि द्रष्टव्यम् ।

(३) तदेतल्लक्षणं वर्णस्तोभमात्रस्याभिप्रेतम्, तेन आशास्त्यादि-नवविध-वाक्यस्तोभे, हाउकारादि-पञ्चदश-पदस्तोभेषु च नाव्याप्तिः। तदुक्तम् "आशास्तिः स्तुतिः संख्यानं प्रलयः परिदेवनं प्रैषमन्वेषणञ्चैव सृष्टिराख्यानमेव च"-इति वाक्यस्तोभ-भेदाः। तत्र "आग

इति विशिष्टस्य तल्लक्षणत्वात्; लोकेऽपि सभायां विप्रलम्भकेनोच्यमानं प्रकृतार्थानन्वितं काल-क्षेप-मात्र-हेतुं शब्दराशिं स्तोभ इत्याचक्षते, तस्मादस्ति लक्षणम्"[९]-इति॥ अक्षर-विकार-स्तोभादिवत् वर्ण-लोपोऽपि क्वचिद् गीति-हेतुर्भवति, तल्लोप-विषयश्च विचारो नवमाध्याये प्रथमपादस्याष्टादशाधिकरणेऽभिहितः— [१०]"इरा गिरा विकल्पः स्यादुतेरैवा विशेषतः। आद्योमैवं बाध-पूर्वमिरायाविहितत्वतः॥ ज्योतिष्टोमे श्रूयते "यज्ञायज्ञीयेन स्तुवीत"-इति (१)। 'यज्ञायज्ञा'-इत्यनेन शब्देन युक्तायामृच्युत्पन्नं साम यज्ञायज्ञीयम् (२), तस्यामृचि गिरा शब्दः पठ्यते 'यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे'-इति (३)। तत्र सामगा योनिगान(४)

---

न्मज्योतिरमृता अभूम"-इति, "नमोऽन्नाय नमोऽन्नपतये"--इत्यादिः, "ये देवा देवाः दिविषदः, अन्तरिक्षसदः, पृथिवीषदः"—इत्यादिः, "एतत् संख्यानं विप्रासइन्द्रः"—इति, "यदिन्द्राहं यथालम्"-इति, "समविणं दह"—इति, "विश्वेषां देवानां समिद्जल ज्योतिराततनम्"—इति, "प्रजाभूतमजीजने"-इति, "द्यौरक्रान् भूमिराततनत् समुद्र समचुकुपत"—इति—इत्येवमादयः क्रमेणोदाहार्याः। पद-स्तोभ-विवरणन्तु मन्त्र-ब्राह्मण-तृतीय-प्रपाठक-त्रयोदश-खण्डे; तदुदाहरणानि तु स्तोभग्रन्थेऽन्वेषणमन्तरापि प्राप्तव्यानि बहूनि। इमे नव वाक्यस्तोभाः पञ्चदश पदस्तोभाश्च गानग्रन्थेषु श्रुताः सामसु, तत्राचरणे बहु।

(१) ताण्ड्यब्राह्मणाष्टमप्रपाठकीयषष्ठखण्डे श्रुतमेतत्।

(२) एतच्च गेयगान-प्रथम-प्रपाठकीय-द्वाविंशतितमं साम।

(३) छन्दोनामार्चिक-ग्रन्थे प्रथम-प्रपाठक-प्रथमखण्डे प्रथमा।

(४) साम्नां योनिभूताः ऋचः छन्दसि आर्चिके पठ्यन्ते, तासां गानानि सामापर-पर्यायाणि यत्र विद्यन्ते, तद्योनिगानमित्याचक्षते, वेदसाम,-वेयगानं, गेयगानमित्यपि

मधीयानाः सहैव गकारेण गायन्ति 'गायिरा गिरा'-इति; ब्राह्मणे (१) तु गकार-लोप-पूर्वकमाकार-यकारादिकं गानं विधीयते 'ऐरं कृत्वोद्गेयम्'-इति, गिरा-शब्दे गकार-लोपा दिराशब्दो भवति, इरायाः सम्बन्धि गानम् ऐरम्, तादृशं कृत्वा प्रयोग-काले तद्गानं कर्त्तव्यमित्यर्थः; तत्र योनिगान-ब्राह्मणयोः समान-बलत्वेन विशेषाभावात् विकल्पेन प्रयोक्तव्यम्-इति प्राप्ते, ब्रूमः—'न गिरागिरेति ब्रूयाद्, यद् गिरा गिरेति ब्रूयाद् आत्मानमेव तदुद्गाता गिरेत्' (२)-इति गकार-सहित-गाने बाधकमुक्त्वा गकार-रहितमिरा-पदं गेयत्वेन विधीयते, तत्पदादेरिकारस्य गानार्थमाकारोयकारइकार श्चेति त्रीन् वर्णान् प्रयुङ्क्ते, तत 'आयिरा'-इत्येव गातव्यम्" (३)१० इति॥ तत्रैवोपरितनाधिकारे कश्चिद् विशेषश्चिन्तितः— ११" इरा-पदं न गेयं स्याद् गेयं वा गीत्यनुक्तितः। न गेयं गीयमानस्य स्थाने पातात् प्रगीयते॥ ब्राह्मणेन विहितइराशब्दो न गातव्यः, कुतः? ऐरमिति शब्देन गीतेरनुक्तत्वात्; पाणिनीयेन

---

तस्यापरमपरं नामधेयम्। तत्र वेदसामेत्यभिधानमधिकरणमालायामेवावलोक्यते। वेयगानमित्येतदभिधानं तु गेयमित्यस्यैवापभ्रंशोऽनुमीयते। बहु गेय-गान-पुस्तके गेयगानमित्येव लिखितं दृश्यते, क्वचित् वेयमित्यपि। इदानीन्तन-वैदिकास्तु 'वे' इत्येव व्यवहरन्ति।

(१) ताण्ड्ये अष्टम-प्रपाठकीय-षष्ठ-खण्डे।

(२) तत्रैव खण्डे।

(३) गानमेतदभिजिति अग्निष्टोम-साम, ऊह्यगानस्य द्वितीय-प्रपाठकीय पञ्चदशम्।

'विमुक्तादिभ्योऽण्[५,२,६१]-इति सूत्रेणेरा-शब्दादण्-प्रत्ययोमत्व-र्थीयो विहितः, तथासतीरापदोपेतं क्वचित्येतावानेवार्थो भवति; यदि प्रगीतेरा-पद-सम्बन्धः तद्धितेन विवच्येत, तदानीमाकारो यकारईकारोरेफआकारश्चैतैः पञ्चभिवर्णैर्निष्पन्नमायीरा-रूपं गीय-मानेरा-शब्द-प्रातिपादिकं भवति, तादृशात् प्रातिपदिकात् पाणिनीयेन 'वृद्धाच्छः[४,२,११४]'-इति सूत्रेण प्रत्ययान्तरे सति, आयिरीयं क्वचेति ब्राह्मणपाठो भवेत्; तस्मान्न गेयम्-इति प्राप्ते, ब्रूमः— गीयमानस्य गिरा-पदस्य स्थाने इरा पदं विधीयते-इति पदमात्रस्य बाधः, गानन्तु न बाध्यते; किञ्च विमुक्तादि [५,२,६१]-सूत्रेणाण्-प्रत्ययेऽपि, पूर्वस्मात् 'मतौ छः सूक्त-साम्नोः[५,२,५९]-इति सूत्रात् सामानुवृत्तेरैरं सामेत्यर्थो भवति, सामत्वं च गीति-साध्यम्, यदा तु 'तस्य विकारः [४,३,१३४]'-इत्यस्मिन्नर्थे अण् प्रत्ययः, तदानीमिरायाविकार इति विग्रहे यथोक्तं गानं लभ्यते; तस्माद् गातव्यम्"[११]-इति॥

बहुभिः प्रकारैर्गानात्मकं यत् साम-स्वरूपं निरूपितम् तस्यैव देवता-स्तुति-हेतुत्वं नवमाध्यायस्य द्वितीय-पादेऽष्टमाधि-करणस्य प्रथम-वर्णके निर्णीतम्— [१२]"ऋक्सामाभ्यां विकल्पेन स्तुतिः साम्नैव वायिमः। पुरेव मैवमृङ्निन्दा-साम-प्राशस्त्य-दर्शनात्॥ क्वचित् कर्म-विशेषे श्रूयते—'ऋचा स्तुवते, साम्ना स्तुवते'-इति। तत्र, पूर्वन्यायेन विकल्पः-इति चेत्—मैवम्, ऋङ्-निन्दा-साम-प्रशंसयोर्वाक्यशेषेऽवगमात्, 'यदृचा स्तुवते तदसुरा अन्ववायन्, यत्साम्ना स्तुवते तदसुरानान्ववायन्, यएवं विद्वान् साम्ना स्तुवीत-इत्यृचं निन्दित्वा साम प्रशस्य लिङ्प्रत्ययेन साम

विहितम्, तस्मात् साम्नैव स्तोतव्यम्"[११]-इति (१) ॥ तस्य च साम्नः ऋचं प्रति संस्कारकत्वं तस्मिन्नेव पादे द्वितीयाधिकरणे निर्णीतम्— [१२]"सामर्चं प्रति मुख्यं स्याद् गुणो वा बाह्य-पाठतः । मुख्यमभ्यसितुं पाठो गुणो गीताक्षरैः स्तुतेः ॥ रथन्तरं गायतीत्यादौ यद्गानं विहितम् तदेव साम-शब्दार्थइति प्रतिपादितं स्मारितञ्च, तदेतद् गानमृचं प्रति प्रधान-कर्म स्यात्, कुतः ? याग-प्रयोगाद् बहिरध्ययन-कालेऽपि पठ्यमानत्वात्, गुणकर्मत्वे तु व्रीहि-प्रोक्षणादिवद् याग-मध्ये एव गानमनुष्ठीयेत, ततो बहिर्गानस्य विश्वजिदादिवत् फलं कल्पनीयम् (२) मध्यकालीन-गानं तु प्रयाजादिवदारादुपकारकम् (३); तस्मान्मुख्यमेतन्न तु गुण-कर्म-इति प्राप्ते, ब्रूमः— न तावद् बहिः पाठः प्रधानकर्मत्वं कल्पयितुं शक्नोति 'भूमिरथिक-शुष्केष्टि-न्यायेन

---

(१) प्रायणीयातिरात्रानन्तरमनुष्ठेये तु ऋक्-साम्नोरुभयोरेवास्ति विधानम्, परं तत्रापि महती निन्दा गम्यते, तथाहि ताण्ड्य-चतुर्थ-तृतीये—"साम्नेतोयन्ति, ऋचा-पुनरायन्ति"—इति, साम्ना प्रयुज्यमाने इतः अस्माल्लोकात् यन्ति स्वर्गम्, ऋचा तु-स्वर्गं गच्छन्तोऽपि यजमानाः पुनरागच्छन्ति-इति तदर्थः ।

(२) यत्र फलविशेषो न श्रूयते न दृश्यते वा, तत्र स्वर्गः फलं कल्प्यते, 'स स्वर्गः सर्वान् प्रत्यविशिष्टः'-इति मीमांसा-सिद्धान्तात् । अतः "विश्वजिता यजेत"-इत्यत्र स्वर्गः फलं युक्त्या निरणायि; तद्वदत्रापि । तदुक्तम्— "विनापि विधिना दृष्टलाभान्न हि तदर्थता । कल्प्यस्तु विधि-सामर्थ्यात् स्वर्गो विश्वजिदादिवत्" ।

(३) तथाचावधेयम्— यागस्य कर्मरूपत्वात् कर्मणश्च क्षयित्वात् कालान्तर-भावि-स्वर्गादि-फल-साधनत्वं नोत्पद्यते, अतः याग-क्रिया-सद्भाविनी काचिच्छक्तिरपूर्वमिति मीमांसकैः स्वीक्रियते, सा च यथा अङ्गार-जन्यमौष्ण्यं शान्तेष्वङ्गारेषु जलेऽनुवर्त्तते, तथैव नष्टेऽपि यागे कर्त्तुरात्मानमाश्रयते । तच्च फलापूर्वम्, समुदायापूर्वम्, उत्पत्त्यपूर्वम्, अङ्गापूर्वञ्चेति नानाविधम्, तत्र सन्निपत्याराद्-इति-भेदात् अङ्गापूर्वं द्विविधम्,

प्रयोग-पाटवाय गानाध्ययनोपपत्तेः (भूमिरथिको भूमौ रथमालिख्याभ्यासं करोति, यथा वा छात्रः शुष्केष्ट्या प्रयोग-पाटवं सम्पादयति, तद्वत्)। नापि गुणकर्मत्वे प्रयोजनाभावात् प्रधानकर्मत्वमिति वाच्यम्, गानेन संस्कृतैर्ऋगक्षरैः स्तुति-सम्भवात्; 'आज्यैः स्तुवते'-'पृष्ठैः स्तुवते'-इति स्तुति-विधानात्, तस्मादृगक्षराणां स्वरविशिष्टत्वाकाराभिव्यक्तिर्दृष्टं प्रयोजनमित्यदृष्टस्याकल्पनीयत्वाद् गानं संस्कारकर्म"[१२]-इति ॥

यथोक्तमृगक्षराणां संस्कारकं गीत्यात्मकं यत् साम तदेतदेकैकं छन्दोगा एकैकस्यामृचि 'वेदसाम'-नामके ग्रन्थेऽधीयन्ते, ऊहनामके तु ग्रन्थे एकैकं साम तृचेऽधीयते सोऽयमूहग्रन्थः तस्मिन्नेव पादे प्रथमाधिकरणस्य द्वितीयवर्णके विचारितः— [१४]"ऊहग्रन्थोऽपौरुषेयः पौरुषेयोऽथवाग्रिमः। वेदसाम-समानत्वाद् विधि-सार्थत्वतोऽन्तिमः॥ यस्मिन् ग्रन्थे सामगास्तृचे तृचे सामैकैकं गायन्ति सोऽयमूहग्रन्थो नित्यो न तु पुरुषेण निर्मितः, कुतः? अनध्यायवर्जनेन कर्त्तुरस्मरणेनाध्यापकानां वेदत्व-प्रसिद्ध्या च वेदसाम-नामक-योनि-ग्रन्थ-सदृशत्वात्; इति चेत्— मैवम्, अपौरुषेयत्वे विधि-वैयर्थ्य-प्रसङ्गात्— 'यद्योन्यां तदुत्तरयोर्गायति'-इति विधीयते।

---

यानि द्रव्य-देवता-संस्कार-द्वारेण यागस्वरूपस्यातिमयाधानेन तदुत्पत्त्यपूर्व-निष्पत्तौ व्याप्रियन्ते तद्द्वारेण फलापूर्वं, तानि सन्निपत्योपकारकाणि, अवघातादीनि, यानि तु उत्पत्त्यपूर्वेभ्यः फलापूर्व-निष्पत्तौ साक्षादेव व्याप्रियन्ते, तानि आरादुपकारकाणि, प्रयाजादीनि-इति। एतत् समस्तं जैमिनीय-द्वितीयाध्याय-द्वितीयाधिकरणादौ स्फुटम्॥

अयमर्थः— अपौरुषेयत्वेन सम्प्रतिपन्ने वेदसाम-नामके ग्रन्थे 'कया नश्चित्र आ भुवत्'(१)इत्येतस्यां योन्यामेकस्यामृचि यद्वामदेव्य-नामकं(२) सामोपदिष्टं तदेवोत्तरयोर्ऋचोः 'कस्त्वा-सत्योमदानाम्' 'अभी षु णः सखीनाम्' (३)-इत्यनयोः द्वितीय-तृतीययोर्गातव्यम्-इत्ययं विधिरूहग्रन्थस्य वेदत्वे व्यर्थः स्यात्, 'वेदसाम'-वदध्ययनादेव तत्सिद्धेः। उपरितनऋग्द्वये सामोहस्य पौरुषेयत्वेऽपि साम-स्वरूपस्य तदाधारभूतानां तिसृणामृचां च वेदत्वादनध्यायाः वर्जनीयाः, कर्त्तुरस्मरणं जीर्णकूपारामादिष्विव चिरकाल-व्यवधानादुपपन्नम्, अ-स्मरण-मूलैवाध्यापकानां वेदत्व-प्रसिद्धिः (४)— यथावह्वृचामध्यापकामहाव्रत-प्रयोग-प्रतिपादक माश्वलायन-निर्मितं कल्प-सूत्रमारण्येऽधीयमानाः पञ्चममारण्यक

---

(१) छन्दोनामार्चिकस्य २प्र० ६ख० ५ऋक्। उत्तरार्चिकस्य च १प्र० १२सू० १ऋक्।

(२)—गेयगानस्य पञ्चम-प्रपाठके कयान-इत्यस्यामृचि त्रीणि सामान्याम्नातानि; तत्र तृतीयं वामदेव्यम् महावामदेव्यं चोच्यते, आर्षेयब्राह्मणे तथैवाम्नानात्; तथाहि तदीय-प्रथम-प्रपाठकोनविंशखण्डे— "वाचः सामनी द्वे वामदेव्यं महावामदेव्यं वा" -इति।

(३) उत्तरार्चिकस्य १प्र० १२सू० २,३ ऋचौ। अनयोर्गानमूहग्रन्थस्य प्रथम-प्रपाठके पञ्चमं साम।

(४)—अत्रास्योत्तरमनुसन्धेयम्— यदेतत् प्रथमाध्याय-प्रथमपादाष्टमाधिकरणम् "समाख्याध्यापकत्वेन वाक्यत्वन्तु पराहृतम्। तत्कर्त्रनुपलम्भेन स्यात् ततोऽपौरुषेयता" इति—"अध्ययन-सम्प्रदाय-प्रवर्त्तकत्वेन समाख्योपपद्यते, कालिदासादि-ग्रन्थेषु तत्सर्गा-वसाने कर्त्तार उपलभ्यन्ते, तथा वेदस्यापि पौरुषेयत्वे तत्कर्त्तोपलभ्येत, नचोपल-भ्यते, अतोवाक्यत्व-हेतुः प्रतिकूल-तर्क-पराहतः, तस्मादपौरुषेयोवेदः"-इति तद्-व्याख्यानम्— वेदोपौरुषेयः कर्त्रनुपलम्भात् आत्मवत्-इत्यनुमानञ्च— अहग्रन्थस्यापौरु-षेयत्व-साधकैतन्न्यायेन जल-मध्यस्थ-मसी-चोद्यवत् कथं न विक्षिप्तम्? -इति।

मिति वेदत्वेन व्यवहरन्ति, तद्वत्; न च तस्यापि वेदत्वमस्त्विति वाच्यम्, प्रथमारण्यकेन पुनरुक्तत्वात्, अर्थवाद-राहित्येन ब्राह्मण-सादृश्याभावाच्च; तस्मात् पञ्चमारण्यकवदूहः (१) पौरुषेयः; पौरुषेयस्य च न्याय-मूलत्वात् यत्र वक्ष्यमाण-न्याय-विरोध-स्तदप्रमाणम्”[१४]-इति ॥

तत्रैव केचिद् विशेषा-स्तृतीय-चतुर्थ-पञ्चम-षष्ठाधिकरणैर्बहु-वर्णकोपेतैर्विचारिताः; तत्र, तृतीयाधिकरणम्— [१५] “अंशैः सामर्चं कृत्स्नं वा प्रत्यृचं तिसृभिः श्रुतेः । अंशैर्मैवं स्तुतेरंशै-रसिद्धेः प्रत्यृचं भवेत् ॥ ‘एकं साम तृचे (२) क्रियते स्तोत्रियम्’-इति, श्रूयते, तत्र त्रेधा विभक्तेषु सामांशेषु एकैकोंऽशः एकैकस्यामृचि गातव्यः, कुतः? एकस्य साम्नः तिसृभिर्ऋग्भिर्निष्पादनस्य श्रवणात्; इति प्राप्ते, ब्रूमः— स्तोत्रियमिति स्तुतिनिष्पादकत्वं कृत्स्नस्य साम्नोविधीयते, न तु सामांशानाम्; स्तुतिर्नाम गुण-कथन-परमेकं वाक्यम्, तच्च वाक्यमेकस्यामृचि सम्पूर्णम्, ततः कृत्स्नेन साम्ना तद् वाक्यं संस्कार्यमिति प्रत्यृचं सामाभ्यसनीयम् (३), तथासति द्वितीय-तृतीययोर्ऋचोस्तस्यैव साम्न आवर्त्तमानतया सामान्तरत्वाभावाद् ऋक्-त्रय-निष्पाद्यत्वमविरु-

(१)—ऊह्यगानेऽप्ययं न्यायः, अविशेषात्, अत्र तन्नामास्मरण-हेतुस्तु आचार्य्य एव वेत्ति स्वयम् ।

(२)—तृचमिति “ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसि”-इति षाष्ठ-वचनात् सिद्धम् ।

(३)—सामशब्देनात्र स्वरस्तोभादयएव ग्राह्याः, तदाधाराणां तिसृणामृचां परस्पर-पार्थक्यात् । ऊहगानस्य ऊह्यगानस्य च सर्वाण्येव सामानि एतदुदाहरणानि ।

इम्; तस्मात् प्रत्यृचं कृत्स्नं साम समापनीयम्"[१५]-इति (१)॥
चतुर्थाधिकरणम्—[१६]"तिसृष्वृचूदितं साम विषमासु समासु वा। यथेच्छानियमादन्यः शर-लेशापनुत्तये॥ विषम-च्छन्दस्कासु सम-च्छन्दस्कासु वा तिसृष्वृक्षु स्वेच्छया साम गातव्यम्, इत्थमेवेतिनियामकस्य कस्यचिदभावात्; इति चेत्—मैवम्, शर-लेश-प्रसङ्गस्य नियामकत्वात्। शरोहिंसा, लेशोऽल्पत्वम्, 'शॄ'-हिंसायाम् 'लिश्'-अल्पीभावे इत्येतद्धातु-द्वय-दर्शनात्—यद्यधिक-च्छन्दस्कायां योनौ

---

(१)—एतदधिकरणस्याभिप्रायं हृदयङ्गमयितुं लेखनी न शक्यते, अतस्तथाविधं सामैकं यथावत् प्रदर्श्यते। अस्युत्तरार्चिकग्रन्थे उच्चेति, स्वनेति, एनेति च तिसृणामृचां समुदायः प्रथम-प्रपाठक-प्रथमार्द्धाष्टम-सूक्तात्मकस्तृचः, तत्र आमहीयवं नामकं साम गीयते तच्च ऊहगानस्यादिमम्, तदेतत्—

५र २ र४ ५ २ १ २ १
"उच्चाता३इजातमन्धसाः। दिवाइसाऽ१इ्म२। मिया
२ १ २१ २
२३ददा३। उग्र॑ शर्मा। महा२३ इ अवाउ। वा३
५ २ र ४ ४५ २ १ २
(इति प्रथमांशः)॥ सन आ ३ इ न्द्रायययज्यवाइ। वरुणा-
१ २ १ २ र १
ऽ१या२। मरु२३द्भियाः। वरिवो वाइत्। परा२३इ-
२ ५रर र ४
सवाउ। वा३ (इतिद्वितीयांशः)॥ एनावा२३ श्वानि
२ १ २ २ १
अर्यआ। द्युम्ना ना ऽ१इमा२। नृषा२३णाम्। सिषा
२ २
सन्ताः। वना२३ महाउ। वा३ (इति तृतीयांशः)
२र १ १ १ १ १
स्तौषे २ म्ह ३ ४ ५ (इति साम-शेष-सूचकोनिधनांशः)
अत्र आधाराणां भेदेऽपि स्वर-स्तोभादीनामभेदः स्फुटम्॥

उत्पन्नं साम, न्यून-च्छन्दस्कयोर्गीयेत, तदा साम-भागेनैव तत्पूर्त्तेरवशिष्ट-सामभागाश्रयाभावाद्विंस्येत; यदि योनिरप्यधिकच्छन्दस्कयोर्गीयेत, तदा साम्नोऽल्पत्वादवशिष्टर्क्भागः साम-रहितः स्यात्; तस्मात् समान-च्छन्दस्कास्वेव गातव्यम्"[१६]-इति (१)। पञ्चमाधिकरणे प्रथम-वर्णकम्— [१७]"छन्दस्यथो-रुत्तराख्ययोर्वा गीतेर्विहोहनम्। अविशेषाद् विकल्पः स्यादन्त्यः संज्ञा-बलित्वतः। सामगानामृक्पाठाय द्वौ ग्रन्थौ विद्येते, 'छन्दः' 'उत्तरा' चेति (२)। तत्र, छन्दो नामके ग्रन्थे नानाविधानां साम्नां योनिभूता एवर्चः* पठिताः; उत्तरा-ग्रन्थे तृचात्मकानि (३) सूक्तानि पठितानि (४); एकस्मिंस्तृचे छन्दोगता योन्यृक् प्रथमा, इतरे द्वे उत्तरे।

---

* नानैवर्चः-इति गौ०पु० पाठः।

---

(१)—आधारभूतेषु तिसृष्वृक्षु यद्येका गायत्रीच्छन्दस्का, द्वितीया बृहतीच्छन्दस्का, तृतीया जगतीच्छन्दस्का बृहतीच्छन्दस्कैव वा स्यात्, तर्हि सर्वत्रैकरूप-गाने व्याघातः समुपद्येत, अतः एकच्छन्दस्का एव तिस्रः आधारत्वेन ग्राह्याः-इत्याशयः अधीयन्ते च प्रायस्तथैव उत्तरार्च्चिक-ग्रन्थे समस्तास्तृचाः।

(२)—आरण्यकस्तु छन्दोग्रन्थ-मध्ये एवान्तर्भूतः। योहि माधवः सामवेदस्य विवरण-कारः पूर्वतनः, तस्य नये वैदिक-व्यवहारे च आरण्यकस्तृतीयः। एषां त्रयाणामेव साधारणमभिधानमार्च्चिकइति।

(३)—यद्यपि तृचमिति रूपं न लौकिकं लोकेषु त्र्यृचमित्येव व्यवहर्त्तुं युक्तम्, परं सूक्ते तस्य योगरूढितया तदभिप्रायेण तथाव्यवहारेऽपि नदोषः, सञ्ज्ञा-शब्दत्वेन सुग्रहात्।

(४)—तत्र तृचानि सूक्तानीति प्रायोवादः, क्वचित् क्वचित् सूक्ते द्वे, चतस्रः, पञ्च, षट्, सप्त, अष्टौ, नव, दश, एकादश, द्वादश च। तथाहि प्रथम प्रपाठक-द्वितीयार्द्धस्य त्रयोदशादि-सूक्तत्रये द्वे द्वे एव, चतुर्थ-प्रपाठक-द्वितीयार्द्धस्य प्रथमसूक्ते द्वादश च।

एवं स्थिते सति रथन्तरमुत्तरयो र्गायति, यद्योन्यां तदुत्तरयो र्गायतीत्यत्र द्विविधे उत्तरे सम्भाविते, रथन्तरस्य— छन्दोग्रन्थे ऽभित्वाशूरेतीयमृग् योनित्वेन पठिता, तस्याउपरि त्वामिद्धिहवा-महइत्यादयः बृहदादि-साम्नां योनयः पठिताः [३प्र०१ख०१ऋ०], उत्तरा-ग्रन्थे अभित्वाशूरेति सूक्ते (१) तस्यामृचऊर्द्धं नत्वावाँ अन्यइत्येषा [१,११,२] साम्नः (२) कस्याप्ययोनिभूता पठिता ; तत्र छन्दोग्रन्थापेक्षया सामान्तरयोर्योनी द्वे रथन्तरस्य स्व-योन्युत्तरे भवतः, उत्तरा-ग्रन्थापेक्षया तृच-गते द्वितीय-तृतीये स्वयोन्युत्तरे भवतः, तत्र विशेष-नियामकाभावात् ययोः कयोश्चि-दुत्तरयोर्गानमिति चेत्— मैवम्, उत्तरेति संज्ञा सहसा बुद्धिस्था भवति प्रतियोगि-निरपेक्षत्वात्, पूर्व-पठितां योनिमृचमपेक्ष्य यदु-त्तरात्वं तद्विलम्बेन प्रतीयमानत्वाद् दुर्बलम्, ईदृशमेवोत्तरात्वं छन्दसि पठितयोः स्व-योन्युत्तर-भाविन्योः सामान्तर-योन्योर्द्वयो-र्ऋचोः, तृच-गतयोस्तु द्वितीय-तृतीययोरुत्तरात्वं संज्ञया वर्त्तते, अतस्तयोरेव गानम् ; एवं सति पूर्वाधिकरणे निर्णीतं समास्वेव गानमनुगृहीतं भवति ; किञ्च (३) तृचात्मकेषु सूक्तेषु या प्रथमा

---

(१)—प्रथम-प्रपाठकैकादशतमम् ।

(२)—कस्यापि साम्न-इत्यन्वयः ; न त्वेत्यस्य गानं गेयग्रन्थे कचिदुपलभ्यते, नास्ति च तस्य छन्दोग्रन्थे पाठः-इत्याशयः ।

(३)—किञ्चेत्यादीतीत्यन्तेन गानग्रन्थयोर्द्वयोस्तदाधारभूतयोश्च द्वयोर्ग्रन्थयोर्नाम-हेतुं निर्दिशति ; तत्रेदमपि वक्तव्यम्— संहिताग्रन्थयोः ऋङ्मयत्वात् छन्दोमयत्वाच्च आर्चिकइति छन्दइति च साधारणं नाम, तत्रापि एकस्य उत्तरेति-विशेषाख्या अपरस्य तदभावइति ।

योनिभूता तन्नाम्ना छन्दोग्रन्थस्य 'योनि-ग्रन्थः'-इति अध्यापकानां समाख्या, इतरस्यतु तृच-सङ्घ-रूपस्य ग्रन्थस्योपरितनयोर्ऋचो र्नामधेयेन 'उत्तरा'-इति समाख्या ; स एव ग्रन्थः कर्माङ्गसमर्पकं प्रकरणं, पञ्चदश-सप्तदशादि-स्तोमानां तृचेष्वेवोत्पत्तेः ; तस्मा-दुत्तरा-ग्रन्थस्थयोस्तृचगतयोर्द्वितीय-तृतीययोरयमूहः"[१७]-इति ॥ द्वितीयवर्णकम्— [१८]"त्रैशोकेऽतिजगत्यौ द्वे आनेये गीतये ऽथवा। बृहत्या वादिमः साम्यान्नोत्तरात्वंश्रुतेर्बलात्॥ द्वाद-शाहे चतुर्थेऽहनि त्रैशोक-नामकं साम [ऊ[१]प्र[१]ग्र[११]] विहितम् (१), तच्च विश्वाः पृतना [५प्र०१४सू०१ऋ०] इत्येतस्यामतिज-गत्यामुत्पन्नम्, तस्मिंश्च तृचे तस्याश्चोनिरुत्तरे द्वे बृहत्यौ 'नेमिं न यन्तीत्यादिके [५प्र०१४सू०२,३ऋ०]आम्नाते, तत्र बृहत्यावुपेक्ष्य तयोः स्थाने द्वे उत्पत्तिसिद्धे अतिजगत्यौ आनीय तासु तिसृषु गेयम्; तथा सति समासु गानं पूर्वत्र निर्णीतमनुगृह्येत, 'अति-जगतीषु स्तुवन्ति'-इति(२) श्रूयमाणम् अतिजगती-बहुलम् अन्यथा नोपपद्येतेति चेत्— मैवम्, उत्तरयोर्गायतीत्युक्तस्य संज्ञा-रूप स्योत्तरा-शब्दस्याधीयमानयोर्बृहत्योर्मुख्यत्वात्, श्रुतिश्च बहुत्व-लिङ्गात् 'समासु गानम्'-इति न्यायाच्च बलीयसी; यदेतदतिजगती-बहुत्वं तद्बृहत्योः स्तोकारेऽप्युपपद्यते, एकविंश-स्तोमस्यात्र विहि-

---

(१)—"त्रैशोकं ब्रह्म-साम भवति"-इति ताण्ड्ये द्वादशे दशम-खण्डे। 'त्रिशोकेन दृष्टं साम त्रैशोकं, तद् ब्रह्म-साम ब्रह्मणः स्तोत्रं पृष्ठत्वेन कार्यम्' इति तद्भाष्यम्।

(२)—ताण्ड्य द्वादशे दशम-खण्डे। "अतिजगतीषु द्विपञ्चाशदक्षरासु जगती-मतीत्य वर्त्तमानासु ऋक्षु 'विश्वाः पृतना' इत्यादिषु स्तुवन्ति"-इति तद्भाष्यम्।

त्वेन तत्-सिद्धये प्रथमायाः अतिजगत्याः समस्तत्वश्चावर्त्तनी-यत्वात्; तस्मात् तैयोक्तं साम बृहत्योरूहनीयम्”[१८]-इति। षष्टाधिकरणे प्रथम-वर्णकम्— [१९] “रथन्तरे ककुब् ग्राह्या ग्रथ्या वाच्योऽर्थवत्त्वतः। पुनःपदा-प्रसिद्धादे* रन्त्योर्थोऽन्यत्र वीक्ष्यताम्॥ इदमाम्नायते (१) ‘न वै बृहद्रथन्तरमेकच्छन्दः यत्तयोः पूर्वा बृहती ककुभावुत्तरे’-इति, अयमर्थः— बृहद्रथन्तरं तदेतत् सामद्वयमितर-सामवदेकच्छन्दस्कं न भवति, यस्मात् कारणात् तयोर्बृहद्रथन्तर-साम्नोराश्रय-भूतास्तृचु पूर्वा बृहती (२) च्छन्दस्का [३प्र०१२सू०१ऋ०] उत्तरे तु द्वे ऋचौ[३प्र०१२सू० १ऋ०] ककुब् (३) छन्दस्के, इतरेषां वामदेव्यादि-साम्नामाश्रये तृचे अव-स्थिताः तिस्रऋचः एकच्छन्दस्काः उत्तरा-ग्रन्थे आम्नाताः (४) संशय-विलेश-परिहाराय ‘समासु गायेत्’-इति न्यायेन निर्णीताएव (५)

---

* पुनः पदात् प्रसिद्धादेः-इति गौ० पु० पाठः।

---

(१)—ताण्ड्यस्य सप्तम-प्रपाठकीय-सप्तम-खण्डे, परं तत्र किञ्चित् पाठ-भेदः।

(२)—षट्त्रिंशदक्षरा, एकाक्षर-न्यूनातिरेकौ वैदिक-छन्दःसु न दोषमावहति, तथाच ताण्ड्य-पञ्चदश-द्वादशे—“न ह्येकस्मादक्षराद्विराधयन्ति”-इति।

(३)—अष्टादशाक्षरा, आर्षादिभेदात् न्यूनातिरिक्ताक्षरा च।

(४)—प्रथमप्रपाठके द्वादशसूक्तादयः।

(५)—जैमिनीय-नवमाध्याय-द्वितीयपाद-चतुर्थाधिकरणे।

इह तु वाचनिकं (१) विषमच्छन्दस्कासु गानमिति तत्र * रथन्तरस्याश्रयतया त्वचीनोत्तरा-ग्रन्थे समाम्नातः, किन्तर्हि? प्रगाथस्तदाश्रयत्वेनाम्नातः (२); स च द्वाभ्यामृग्भ्यां निष्पन्नत्वात् द्व्यृचो भवति, तयोश्च द्वयोर्ऋचोः 'अभित्वाशूरे'त्येषा [१ प्र० ११ सू० १ ऋ०] प्रथमा, सा च बृहती; 'न त्वा वाँ अन्यो दिव्य'इत्येषा [१ प्र० ११ सू० २ ऋ०] द्वितीया, सा च पंक्ति(३) च्छन्दस्का; तथाच सति तां पंक्तिच्छन्दस्कामपनीय तस्याः स्थाने दाशतयी-गते (४) द्वे उत्पत्ति-ककुभौ (५) ऋचौ गृहीतव्ये, कुतः? अर्थवत्वात्,(६) उदाहृतेन 'ककुभावुत्तरे' इति वाक्येन रथन्तर-साम्नः आश्रयत्वेन ककुभोर्विनियुज्यमानयोः ककुबुत्पत्तिरर्थवती भवति, अन्यथा वैयर्थ्यं स्यात्, किञ्च आम्नातायाः एकस्याः पंक्तेः स्वीकारे सति ऋचोर्द्वयोरेव लाभात् एकं साम

---

* तत्र-इति सा० रा० पुस्तकयोर्नास्ति।

---

(१)—'पूर्वा बृहती ककुभावुत्तरे'-इति प्रदर्शित-ताण्ड्यादि-श्रुत-वचनेन निष्पन्नमिति यावत्।

(२)—प्रग्रथनं प्रगाथः, अनुपदमेवैतत्तात्पर्यं स्फुटी भविष्यति।

(३)—चत्वारिंशदक्षरा, विष्टारादिभेदात् न्यूनातिरिक्ता च।

(४)—दशाक्षरचरणका दाशतयी पंक्तिः, तत्र गता कर्त्तव्यत्वेन उपस्थिता, ते। दशतयीति पाठो निरुक्त-सम्मतः, स च तत्र सप्तम-पञ्चमान्त्ये द्रष्टव्यः।

(५)—अत्र एकां पंक्तिं विभज्य द्वे ककुभौ उत्पाद्ये, अत इमे उत्पत्ति-ककुभा वित्युच्यते। एवमग्रेऽग्रे ऽपि उत्पत्ति-बृहतीत्यादौ।

(६)—अन्यथा प्रदर्शिता श्रुतिरनर्थिकास्यात्

तृचे क्रियते स्तोत्रियम्'-इति वचनं विरुद्ध्येत, तस्माद्रथन्तर-साम्नि द्वे ककुभावुत्तरे गृहीतव्ये (१); अयमेव न्यायो बृहत्साम्न्यपि योजनीयः-इति प्राप्ते, ब्रूमः— आम्नातयोर्बृहती-पंक्त्योरेव ककुब् ग्रथनीया, तथाहि- 'अभित्वाशूरे'त्येषा बृहती प्रथमा स्तोत्रिया, तस्यामविकृतायामेव रथन्तरं गातव्यम्, ततस्तस्यामृचि चतुर्थं पादं पुनरुपादायोत्तरस्याः पंक्तेः पूर्वार्द्धेन सह योजनीयम्, सेय मष्टाविंशत्यक्षरा त्रिपदा द्वितीया स्तोत्रिया, सा चैका ककुप् सम्पद्यते; तस्यां ककुभि चरमं पादं पंक्तेरुत्तरार्द्धेन सह प्रग्रथ्य तृतीया स्तोत्रिया कर्त्तव्या, सा च द्वितीया ककुप् सम्पद्यते; प्रग्रथन-प्रकारेण द्वयोर्ऋचोराम्नातयोः तृच-निष्पत्तेर्नास्त्युक्तो-वचन-विरोधः। अस्मिंश्च ग्रथने 'पुनःपदा'-इति श्रौतोक्तिर्लिङ्गम्, तथाच श्रूयते— 'एषा वै प्रतिष्ठिता बृहती या पुनःपदा तद् यत् पदं पुनरारभते तस्माद् वत्सोमातरमभिहिंकरोति' - इति, अयमर्थः— या बृहती पुनःपदा भवति, सैषा प्रतिष्ठिता स्थिरा भवति; पदं चतुर्थः पादः, सोऽप्यृ-गन्तर-सम्पादनाय पुनःपठ्यते, ततः सा बृहती पुनःपदा, सेयमृङ्माता, तस्याः पादोवत्सः; तथासति यस्माद्‌च्च चतुर्थं पादम् उद्गाता पुनरारभते तस्माद्

(१)—एवञ्चैवं भवति—"अभि त्वा शूर नोनुमोदुग्धाइव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः"-इति प्रथमा ऋक् बृहतीछन्दस्का, "नत्वा वाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यं तस्त्वा हवामहे"-इति द्वितीया ऋक् पंक्तिच्छन्दस्का, [अस्याएव ऋचोर्द्विभागः कर्त्तव्यः, तथाच ककुप्-छन्दस्के द्वे ऋचे सम्पद्येते, तत्राद्या द्वितीया, अपरा तृतीया।

वत्सोमातरमभिवीक्ष्य हिमिति शब्दं करोतीति। न केवलं लिङ्ग-मात्रेण प्रग्रथनं, किन्तु छन्दोगानां प्रसिद्ध्यापि; ते ह्येवं स्मरन्ति 'काकुभः प्रगाथः'-इति। किञ्च प्रगाथ-शब्दार्थ-पर्य्यालोचनेनापि ग्रथनं गम्यते— प्रकर्षेण ग्रथनं यत्र स प्रगाथः, प्रकर्षो नाम आम्नातादृक्पाठादाधिक्यम्, तच्च पूर्वोक्त-रीत्या पादाभ्यास-पुरःसरक्गन्तर-सम्पादनेनोपजायते। तस्मान्नोत्पत्ति-ककुभौ ग्रहीतव्ये, किन्तर्हि? प्रग्रथनेन द्वे उत्तरे ककुभौ सम्पाद्य तासु तिसृषु रथन्तरं गातव्यम् (१), तथा बृहदपि (२), एवं सति पंक्तेः

(१)—तथाच पश्यन्तु तावत्, जह्यगानस्यादिमं साम।

२ ऽ र र र १ २ र र र र
"आभित्वाशूरनोनुमोवा। आ दुग्धाइव धेनव ईशान

१ २ र
मस्य जगतः। सुवार२३ ई शाम्। आयिशा नमार२३यि-

र र ५ ५
न्द्रा३। सूस्थु२३४षा। ओवा६। हा उवा (इति प्रथमांशः)।

र२ १ २ र र र र
ईशो वा। नामिन्द्र सुस्थुषो न त्वा वा२ अन्योदिवियः।

१ २ १ र रर १ ४ १ र
नपार२३र्थिवाः। नजातोनार२३जा३। नायिव्या२३४ता।

१ ५ ५ २ १ २
ओवा६। हाउवा (इति द्वितीयांशः)। नजोवा। तोनज-

र र १ २ १ २
निष्यते अश्वायन्तो मघवन्नि। द्रवा२३जिना। गव्यन्त-

१ ४ १ र र ५ ५
स्त्वा२३हा३। वामा२३४हा। ओवा६। हाउवा।

(इति तृतीयांशः)॥

(२)—जह्यगानस्य प्रथमप्रपाठके पञ्चमं साम।

पाठः सार्थीभवति; नचैवं ककुबुत्पत्ति-वैयर्थ्यमिति शङ्कनीयम्, वाच-स्तोमे तदुपयोगात्; तस्मान्न कापि प्रग्रथने अनुपपत्तिः" १९-इति॥ द्वितीयं वर्णकम्—"यौधाजये रौरवे च बृहत्योरागमोऽथवा। ग्रथनं पूर्ववत् पक्षो षष्टि-लिङ्गमिहोच्यते॥ इदमाम्नायते-'रौरव-यौधाजये बार्हते तृचे भवतः' इति (१) अयमर्थः—रौरव-नामकं किञ्चित् साम (२), तथा, यौधाजय-नामकम परम् (३); तयोः साम्नोर्बृहतीच्छन्दस्कस्तृचआश्रयइति; उत्तराग्रन्थे (४) तु तस्य साम-द्वयस्याश्रयएकः प्रगाथः आम्नातः (५), तस्मिंश्च प्रगाथे 'पुनानः सोमेत्यसावृक् प्रथमा, सा च बृहती; 'दुहानऊधर्दिव्यमिति द्वितीया, सा तु विष्टारपंक्तिः; तामेतं विष्टारपंक्तिमपनीय तस्याः स्थाने उत्पत्ति-बृहत्यौ द्वे ऋचौ आनितव्ये (६) इति पूर्वपक्षः। बृहती-विष्टारपंक्त्योः प्रग्रथन-विशेषेण द्वे बृहत्यावुत्तरे सम्पादनीये-इति राद्धान्तः। तत्ो-भयत्र युक्तिः पूर्वन्यायेन द्रष्टव्या। लिङ्गंत्वेवमाम्नायते-'षष्टि-

---

(१)—स्पष्टमेतत् ताण्ड्ये सप्तमप्रपाठकीय-तृतीयखण्डे, परं शाखाभेदात् पाठ-भेदः।

(२)—ऊहगानस्य प्रथमप्रपाठकीय-द्वितीयं साम।

(३)—ऊहगानस्य प्रथमप्रपाठकीय-तृतीयं साम।

(४)—द्वयोः साम्नएकएव तृचः आधारः, स्वरस्तोमादि-भेदात् नाम-भेदः, एतद्धि ताण्ड्य-सप्तम-तृतीय-विधानात् प्रमाणम्, ऊह-प्रथमे द्वितीय-तृतीय-साम-दर्शनाच स्फुटम्।

(५)—प्रथम-प्रपाठके अष्टम-खण्डादनन्तरम्।

(६)—एकर्चएव द्वृचत्वेन बुद्धौ ग्रहीतव्यइत्यर्थः, तथाच त्यृचः सम्पद्येत, साम्निरभ्यासोऽपि सुकरः।

त्रिष्टुभोमाध्यन्दिनं सवनम्'-इति, अयमर्थः — रौरव-यौधाजय-नामके सामनी माध्यन्दिने सवने गीयेते, तस्मिंश्च सवने त्रिष्टुप्-छन्दस्का ऋचः षष्टिर्भवन्तीति, सेयं षष्टि-संख्या प्रथयन-पक्षे उपपद्यते। तथाहि माध्यन्दिने सवने पवमान एकः (१), पृष्ठस्तोत्राणि चत्वारि (२)। पवमाने त्रीणि सूक्तानि (३)-'उच्चातिजातमित्येकं सूक्तम्, तत्र गायत्र्यस्तिस्र ऋचः (४); पुनानःसोमेति द्वितीयं सूक्तम्, तच्च प्रगाथरूपम्, तत्र पूर्वा (५) बृहती, उत्तरा (६) विष्टारपंक्तिः; 'प्रतुद्रवपरि-कोशमिति तृतीयं सूक्तम्, तत्र त्रिष्टुभस्तिस्रः (७)। पृष्ठ-स्तोत्रेषु 'अभित्वाशूरेति प्रगाथरूपं प्रथमं सूक्तम् तत्र पूर्वा (८) बृहती, उत्तरा (९) विष्टारपङ्क्तिः; 'कयानश्चित्रइति द्वितीयं, तत्र तिस्रः गायत्र्यः (१०); 'तंवोदस्ममृतीषहमिति तृतीयं प्रगाथरूपं, तत्र बृहती-पंक्त्यौ (११); 'तरोभिर्वो

---

(१)—स्तोमविशेषः, तत्स्वरूपादिकमनुपदं वक्ष्यति।

(२)—तानि च सूक्तरूपाणि, ताण्ड्य-प्रथम-प्रपाठके दशम-परस्तात् विहितानि।

(३)—उत्तरार्च्चिक-प्रथम-प्रपाठकस्याष्टम-नवम-दशम-रूपाणि।

(४)—"उच्चातेजा" १, "सनइन्द्रा"२, "एनाविश्वा"३-इति त्रि-प्रतीकाः।

(५)—"पुनानः सोमधारयेत्यादिः।

(६)—"दुहान ऊधर्दिव्यमित्यादिः।

(७) "प्रतुद्रव" १, "स्वायुधःपवते"२, "ऋषिर्विप्रः"३।

(८) "अभि त्वा शूर नोनुमः-इत्याद्या।

(९) "न त्वा वां अन्योदिव्यः"-इत्याद्या।

(१०) "कयानश्चित्रआ"१, "कस्त्वासत्योमदानाम्"२, "अभीषुणः" ३।

(११) "तंवोदस्ममृतो"-इति बृहती, "द्युक्षं सुदा"-इति पंक्तिः॥

विदद्वसुमिति प्रगाथरूपं चतुर्थं, तत्रापि बृहती-पंक्त्यौ (१)। एवमन्यस्मिन् सवने सप्त सूक्तानि (२)। तेषु (३) नव सामानि गेयानि; प्रथमे सूक्ते गायत्रसामह्रीयवं चेति द्वे सामनी (४), द्वितीये रौरवं यौधाजयं च, तृतीये औशनम्, चतुर्थे रथन्तरम्, पञ्चमे वामदेव्यम्, षष्ठे नौधसम्, सप्तमे कालेयम्(५)। तत्र, प्रथम-सूक्तस्य साम-द्वय-निष्पत्तये द्विरावृत्ताश्रयभूता ऋचः षड्गायत्री-भवन्ति, पञ्चम-सूक्त-गता वामदेव्य-सामाश्रय-भूताः तिस्रः ऋचः सप्तदश-स्तोम-सिद्ध्यर्थमावर्त्त्यमानाः सप्तदश गायत्र्यः-इत्येवं मिलित्वा त्रयोविंशतिर्गायत्र्यः, षष्ठे सूक्ते बृहती-पङ्क्त्यो प्रग्रथनेन बार्हतस्तृचो भवति, तथा सप्तमेऽपि, तत्रोभयत्र सप्तदश-स्तोमे सति चतुस्त्रिंशद्द्बृहत्योभवन्ति;

(१)—"तरोभिर्वो"-इति बृहती, "नयं दुआ"-इति पंक्तिः।

(२)—यथात्र मध्यन्दिन-सवने इमानि सप्त सूक्तानि, तथैव प्रातःसवनादावपि-अन्यान्य-सूक्तानि, ताण्ड्यादि-शासनादवगन्तव्यानि।

(३)—प्रदर्शितेषु सप्तसु सूक्तेषु।

(४)—अस्यैव तृचस्यैतन्नाम अस्मिन्नेव तृचे एतत्साम गातव्यमित्यादिकम् स्वरूपत एव ताण्ड्यादौ स्थितम्, तथाहि—"उच्चातेजातमन्धसइत्युद्धत्योगायत्र्योभवन्ति" (१५,९) इत्यादिकं प्रत्येकस्य विधायकम्।

(५)—आमह्रीयवादि-कालेयान्तान्यष्टौ सामानि ऊहगानारम्भे एव एकादिक्रमेण श्रुतानि; गायत्रं तु न क्वापि गान-ग्रन्थे सम्प्रति समुपलभ्यते, परम् "उच्चाते जातमन्धसोम्"-इत्यादिकं गुरु-मुखादनुश्रुतमस्त्यस्माकम्, ततस्तत् भारुण्डादिकमिव गानग्रन्थातिरिक्तमिति ज्ञायते। अपिच ऊहग्रन्थे क्वचिदेकं क्वचिद्द्वे इत्येवं 'उच्चेति-सूक्त-मूलकानि द्वाविंशति-सामानि दृश्यन्ते, परं तेषु गायत्र-लक्षणाभावः, गायत्रादि-लक्षणन्तु ताण्ड्यब्राह्मणादवगन्तव्यम्। तथाहि, तत्र षष्ठ-तृतीयखण्डे—"अष्टाक्षरा गायत्री नवमो हिङ्कारः"-इत्येवमादिः।

द्वितीय-सूक्तेऽपि प्रग्रथनेन बार्हतं तृचं सम्पाद्य साम-द्वयार्थमावृत्तौ षड् बृहत्योभवन्ति; चतुर्थ-सूक्ते रथन्तर-सामार्थं पूर्व-वर्णितोक्त-रीत्या प्रग्रथने सति ककुभावुत्तरे भवतः; प्रथमा तु स्वतःसिद्ध-बृहती, तत्र सप्तदशस्तोमे सति पञ्च बृहत्यो द्वादश ककुभश्च सम्पद्यन्ते; (तस्य च स्तोमस्य विधायकं ब्राह्मणमेवमाम्नायते (१)— 'पञ्चभ्योहिङ्करोति स तिसृभिः स एकया स एकया, पञ्चभ्योहिङ्करोति स एकया स तिसृभिः स एकया, सप्तभ्योहिङ्करोति स एकया स तिसृभिः स तिसृभिः इति (२), अयमर्थः— एका स्वतःसिद्धा बृहती, प्रग्रथिते द्वे ककुभावित्येवंविधस्तृचस्त्रिभिः पर्य्यायैरावर्त्तनीयः, प्रथमे पर्य्याये— त्रिर्बृहती गातव्या, सकृत् सकृत् ककुभौ; द्वितीये पर्य्याये —सकृद् बृहती, त्रिवारमनन्तरा ककुप् सकृदन्त्या; तृतीये पर्य्याये —सकृद् बृहती, त्रिस्त्रिः ककुभाविति; हिङ्करोति हिङ्कारोपलक्षितं गानं कुर्य्यादित्यर्थः।) तदेवं तृतीय-सूक्त-व्यतिरिक्तेषु षट्सु सूक्तेषु त्रयोविंशतिर्गायत्र्यः पञ्चचत्वारिंशद् बृहत्यो द्वादश ककुभः सम्पन्नाः; तत्र ककुप् अष्टाविंशत्यक्षरा, तस्यां षोड़शाक्षरे गायत्री-पाद-द्वये योजिते चतुश्चत्वारिंशत्यक्षरा त्रिष्टुप्

---

(१)—ताण्ड्यब्राह्मणस्य द्वितीय-प्रपाठक-सप्तम-खण्डे ।

(२)—सप्तदशस्तोमस्य सप्तविष्टुतयो भवन्ति, द्विधा दशसप्ता, द्विधा सप्तस्थिता, स्वयती, अन्ना, सर्वेविलक्षणा चेति; तत्रैषा चाद्या, यत्रोत्तरपर्य्याये सप्तेति दश च सप्त चेति यस्यामिति विग्रहात् दशसप्तेत्यभिधाना। स्पष्टश्चैतत् समस्तं तत्रैव सप्तसु खण्डेषु॥

(८९)—सर्वमेतत् स्फुटं विधीयते ताण्ड्ये, दृश्यते चोत्तरार्च्चिके गीयते चोहगाने।

सम्पद्यते ; अनया दिशा द्वादशानां ककुभां त्रिष्टुप्त्व-सम्पादनाय चतुर्विंशतिर्गायत्री-पादायोजनीयाः; तथासत्यष्टौ गायत्र्योगताः, पञ्चदश गायत्र्योऽवशिष्यन्ते; तासां पञ्चचत्वारिंशत् पादाः, तांश्च तावतीषु बृहतीषु संयोज्य त्रिष्टुभः सम्पादनीयाः, तत एताः पञ्चचत्वारिंशत्, ककुप्सु निष्पन्नाः द्वादश। तृतीये सूक्ते सतः सिद्धास्त्रिस्रः-इत्येवं प्रग्रथन-पक्षे षष्टि-स्त्रिष्टुभउत्तरा-ग्रन्थे समाम्नाताएव लभ्यन्ते। उत्पत्ति-बृहत्यानयने तु प्रकरणाम्नातानां तावतीनामलाभात् प्रकृत-हानाप्रकृत-कल्पने प्रसज्येयाताम्। तस्मात् त्रिष्टुभः षष्टिरित्येतद्बृहती-प्रग्रथनस्य लिङ्गम्। प्रग्रथन-प्रकारस्त्वभिधीयते—'पुनानःसोमेत्यस्याबृहत्याश्चतुर्थं पादं पुनरुपादाय द्विरभ्यस्य 'दुहानऊधर्दिव्यमित्यस्याविष्टारपङ्क्तेः पूर्वार्द्धेन संयोजयेत्, सा बृहती भवति; एतदीयं चतुर्थं पादं द्विरभ्यस्योत्तरार्द्धेन योजयेत्, सापि बृहती भवति; तस्माद् यौधाजयरौरवयोः बृहत्यौ उत्तरे प्रग्रथनीये। एवं नौधस-कालेययोरपि द्रष्टव्यम्"[२०] इति(१)॥ तृतीयवर्णकम्—[२१]"श्यावाश्वांधीगवेऽनुष्टुवानेये ग्रथ्यतेऽथवा। , पुरेव लिङ्गं जगती चतुर्विंशति-कीर्त्तनम्। इदमाम्नायते—'पञ्चछन्दाआवापः आर्भवः पवमानः सप्तसामा, गायत्र-संहिते गायत्रेत्र तृचे भवतः, श्यावाश्वांधीगवे आनुष्टुभे तृचे भवतः, उष्णिहि सफम्, ककुभि पौष्कलम्, काबमन्त्यं जगतीषु'-इति। अयमर्थः—अस्ति तृतीय-सवने पवमानः आर्भव-संज्ञकः, तस्मिन् पञ्च सूक्तानि, सप्त सामानि; 'स्वादिष्ठया मदिष्ठया'-इत्येकं सूक्तम्

---

(१) [illegible] (८८)—एतच्चिह्नोपेतैतत्-पूर्व-पृष्ठायां समाप्त, द्विना. सैवात्र विवेच्या।

(उ,१प्र,१५), तस्मिन् गायत्र्यास्तिस्र ऋचः(१) तासु 'गायत्रं'(२) 'संहितं' (उ,१प्र,८) चेति द्वे सामनी(३); 'पुरोजितो वो अन्धसः'-इति सूक्तान्तरम् (उ,१प्र,१८), तत्रैकानुष्टबुत्तरे द्वे गायत्र्यौ (४), तासु 'श्यावाश्वम्'(ऊ,१प्र,११) 'आन्धीगवं' (ऊ,१प्र,११) चेति द्वे सामनी; 'इन्द्रमच्छ सुता'-इत्यपरं सूक्तम् (ऊ,१प्र,१८), तस्मिन्नुष्णिहस्तिस्रः (५)तासु 'सफं' साम; 'पवस्व मधुमत्तम'-इति प्रगाथः (उ,१प्र,१६), तस्मिन् पूर्वा ककुप्, उत्तरा पंक्तिः (६), तत्र 'पौष्कलं' (ऊ,१प्र,९) साम; 'अभिप्रियाणि पवते च नोहित'-इत्यन्त्यं सूक्तम् (उ,१प्र,१९), तत्र तिस्रोजगत्यः (७) तासु 'कावं' (ऊ,१प्र,१३) साम। एतेषां पञ्चानां मध्ये 'पुरोजितोवः'-'पवस्व'-इत्यनयोः सूक्तयोः यद्यपि द्वे द्वे छन्दसी, तथापि समासु गानं निष्पादयितुं प्रग्रथने कृते सति एकमेव छन्दः सम्पद्यते, ततोगायत्र्यनुष्टुबुष्णिक्ककुब्जगतीभिः पञ्चच्छन्दा आर्भव-पवमानोऽस्मिन् सवने आवपनीयइति; तत्र 'पुरोजितोवः'-इत्यस्मिन् सूक्ते श्यावाश्वमान्धीगवं च समासु गातुमुत्तरे गायत्र्यावाम्नाते परित्यज्य द्वे उत्पत्यनुष्टुभा नेतव्ये—इति पूर्व पक्षः। चतुर्थं पादं पुनरुपादाय द्वे अनुष्टुभौ प्रग्रथनीये—इति राद्धान्तः। तत्रोभयत्र पूर्व-वर्णक-द्वय-न्यायेन युक्तिर्द्रष्टव्या। लिङ्गं त्वेवमाम्ना-

---

(१)—"स्वादिष्ठया" १, "रक्षोहा" २, "वरिवोधातमो" ३।

(२)—ताण्ड्य-ब्राह्मणस्याष्टम-प्रपाठके चतुर्थखण्डे विहितं साधारकं साडम्बरम्।

(३)—अत्र प्रमाणम् ताण्ड्य-पञ्चदशस्यैकादशतमम्, एवं पुरोजितीत्यादौ श्यावाश्वादेश।

(४)—"पुरोजितो" १, "योधारया" २, "तन्दुराय" ३।

(५)—"इन्द्रमच्छ" १, "अयं भरा" २ "अस्येदिन्द्रो" ३।

(६)—"पवस्व" १, "यस्य ते" २, "सनुप्रकेतो" ३।

(७)—'अभिप्रियाणि" १, "आ हर्यस्य" २, "ऋतस्य" ३।

यते—'चतुर्विंशतिर्जगत्यस्तृतीयसवनएका च ककुबिति' सेयं सङ्ख्या प्रग्रथन-पक्षे उपपद्यते। तथाहि—गायत्र-संहितयोः साम्नो राश्रये गायत्रे तृचे द्विरभ्यस्ते सति षट् गायत्र्यः भवन्ति, चतुर्विंशत्यक्षरा गायत्री, अष्टाचत्वारिंशदक्षरा जगती (१), ततः षड्भिः गायत्रीभिः तिस्रोजगत्यः भवन्ति, श्यावाश्वान्धीगवयो राश्रयभूताः प्रग्रथिता, द्विरभ्यस्ताः षडनुष्टुभोभवन्ति, ताभिश्च-तस्रोजगत्योभवन्ति, मिलित्वा सप्त जगत्यः सम्पन्नाः। सफस्य पौष्कलस्य च सामान्तरवत्तृचे गानं न कर्त्तव्यम्, किन्त्वेकैकस्या मृचि। तत् कुतोऽवगम्यते? उष्णिहि ककुभीति सप्तम्येकवचनान्ताभ्यां विशेष-विधानात् (२)। अष्टाविंशत्यक्षरयोरुष्णिक्-ककुभोरेका जगती गायत्री-पादश्च सम्पद्यते, ककुभि मध्यमः पादो द्वादशाक्षरः, उष्णिहि च परः पादः—इति तयोर्भेदः। कावस्याश्रयभूताः स्वतःसिद्धा तिस्रोजगत्यः— इति मिलित्वा पवमानेऽस्मिन्नेकादश जगत्योभवन्ति, गायत्री-पादश्चातिरिच्यते। आर्भवपवमानवत्तृतीयसवने यज्ञायज्ञीय-स्तोत्रमेकमस्ति (३), तस्य चाश्रयः 'यज्ञायज्ञावोअग्नये'-इत्यसौ प्रगाथः (उ,१प्र,२०), तत्र पूर्वा बृहती उत्तरा विष्टारपंक्तिः, तयोः प्रग्रथनेन ककुभावुत्तरे

(१)—इह मानं ताण्ड्य-षोडशस्यैकादशे— "जगत्योयद्द्वादशाक्षराणि पदानि"—इत्यादि; एवं सर्वत्र छन्दःसु।

(२)—ताण्ड्येऽष्टम-प्रपाठके 'उष्णिक्-ककुभावेतौ भवतः'—इत्यादि-पञ्चखण्डे तत् स्पष्टम्।

(३)—ताण्ड्य-सप्तमस्य सप्तमखण्डारम्भे एवास्ति विहितम्।

कर्त्तव्ये (१)। तत्रैकविंशस्तोमः तस्य विधायिका विष्टुतिरेवमाम्नायते— 'सप्तभ्यो हिं करोति स तिसृभिः स तिसृभिः स एकया, सप्तभ्यो हिं करोति स एकया स तिसृभिः स तिसृभिः सप्तभ्यो हिं करोति स तिसृभिः स एकया स तिसृभिः'-इति (२)। अयमर्थः— प्रथमायाः बृहत्यास्त्रिषु पर्यायेषु त्रिवारमेकवारं पुनस्त्रिवारमिति सप्त बृहत्यः, मध्यमायाः ककुभः प्रथम-द्वितीययोः पर्याययोस्त्रिस्त्रिः पाठः, अन्त्ये सकृत्, उत्तमायाः ककुभः आदौ सकृत्, द्वितीय-तृतीययोस्त्रिस्त्रिः, एवं चतुर्दश ककुभः। तासु ककुप्सु द्वादशाक्षराः मध्यम-पादाश्चतुर्दश, तेषु सप्त पादाः सप्तसु बृहतीषु योजनीयाः, ततः सप्त जगत्यो भवन्ति, अवशिष्टाः अष्टाक्षराः ककुभामाद्यपादा अन्त्यपादाश्च, मिलित्वाष्टाविंशतिः, तेषु षड्भिः पादैः एका जगतीत्यनेन क्रमेण चतुर्विंशतिपादैश्चतस्रो जगत्यो भवन्ति; ये तु द्वादशाक्षराः सप्तपादाः पूर्वमवशिष्टाः तेषु पवमान-शेषोऽष्टाक्षरः पादो योजनीयः, ककुभां शेषेष्वष्टाक्षरेषु चतुर्षु पादेषु चत्वार्यक्षराणि योजनीयानि, ते द्वे जगत्यौ भवतः; तदेवं यज्ञायज्ञीय-स्तोत्रे त्रयोदश जगत्यः पूर्वोक्ताः पवमान-गता एकादशेति चतुर्विंशतिर्जगत्यः, चतुरक्षर-वर्जिता चत्वारोऽष्टाक्षर-पादाः मिलित्वा ककुबेका भवति। अनेन लिङ्गेन श्यावाश्वमान्धीगवं च प्रग्रथित-तृचे गातव्यम्, न तु तत्रो-

---

(१)—एवमेव छन्दस्तद् गीतं दृश्यते छन्द-प्रथमस्य चतुर्दशं साम।

(२)—एकविंशस्तोमस्य सप्तदशिनी, उद्यती, प्रतिष्टुतिः, स्पर्ध्यांसेति चतस्रो विष्टुतयः सन्ति, तत्राद्यायाः विधायकं वचनमिदम्। सर्वमेतत् ताण्ड्यस्य द्वितीय-प्रपाठकीय-चतुर्दश-खण्डादि-खण्ड-चतुष्टये स्फुटम्।

त्यत्यनुष्टुवानयनमिति स्थितम् इति”[२१] (१) ॥ चतुर्थवर्णकम्— [२२]“चतुःशते प्रग्रथनमृचः पादस्य वाथिमः । तृचे मुख्यत्वतो नैवमृगन्यत्वस्य वर्णनात् ॥ गवामयने ‘ब्रह्म’ साम विहितम्— ‘अभिवर्त्तोब्रह्मसाम भवति’-इति(२), तत्प्रकृत्य श्रूयते(३) ‘चतुःशतमैन्द्राबार्हताः प्रगाथाः’-इति (४), चतुरुत्तर-शत-सङ्ख्याकाः इन्द्र-देवताकाः बृहतीच्छन्दस्काः ऋग्द्वयात्मकाः, तेष्वेक-प्रगाथ-गते द्वे ऋचौ द्वितीय-प्रगाथ-गतामेकामृचं च प्रग्रथ्य तृचे ‘अभिवर्त्त’-नामकं साम गातव्यम्, तथा सत्याम्नातानामविकृतानामेव तिसृणामृचां लाभात् तृचस्य मुख्यत्वं भवति, पूर्वोक्त-रीत्या पाद-प्रग्रथने तु विकृतत्वादमुख्यस्तृचः स्यात्-इति प्राप्ते, ब्रूमः— अन्याः * अन्याः ऋचोभवन्ति तदेव सामेत्यृचामन्यत्वमत्र

---

* ‘अन्याः’-इत्येकएव गौ० पुस्तके ।

---

(१)—स्फुटमेतत् ताण्ड्याष्टम-पञ्चमे “पुरोजिती वो अन्धस इति पर्य्यत्याद्युपक्रमके, ‘तासु श्यावाश्वमित्यादौ, ‘अथैतद्दाभ्र्यौगवमित्यादौ च ।

(२)—प्रायणीयेऽहनि माध्यन्दिन-सवने ब्राह्मणाच्छंसिनः पृष्ठ-स्तोत्र-निवर्त्तकमेतत् ‘त्वमिन्द्रमसृतीषहमिति योनौ ताण्ड्य-चतुर्थस्य तृतीये विहितम्, तच्च ऊहगानस्य षष्ठ-प्रपाठक-द्वितीयार्द्धीयं चतुर्द्दशतमं साम ।

(३)—तत्रैव चतुर्थखण्डे तद्भाष्ये च तदेतत् स्फुटं व्याख्यातम् ।

(४)—एषपाठस्तु लाट्यायन-सूत्रस्य दशम-प्रपाठक-तृतीय-खण्डे दृश्यते, ताण्ड्य-पाठस्तु “पञ्चसु माःसु बार्हताः प्रगाथा शस्यन्ते”-इति, तद्भाष्ये तु चतुःशतेत्याद्युक्तमुद्-तत्त्वेति लभ्यते ।

वर्ण्यते (१) तच्च पाद-प्रग्रथने सम्भवति, ऋक्-प्रग्रथने तु येयमृक् पूर्वस्य तृचस्यान्त्या सैवोत्तरस्य तृचस्याद्येत्यन्यत्वमृचः न स्यात्; तस्मात् पादस्य प्रग्रथनम्-इति"[२१] ॥

तत्रैव नवम-दशमयोरधिकरणयोः अपर-विशेषौ चिन्तितौ । नवमाधिकरणम्— [२२]"आइ*-भावोयोनि-वशादुत्तरा-वशतोऽथवा । गीत्यर्थत्वादादिमोऽन्त्योवर्णाभिव्यञ्जकत्वतः ॥ 'यद्-योन्यां तदुत्तरयोर्गायति'-इति श्रूयते, तत्र 'कयानश्चित्र आभुवत्'-इत्यसाविग्योनिः (२), तस्यामृचि 'कया'-इत्यक्षरद्वयमाद्यो भागः, 'नश्चित्रआभुवदित्यक्षरषट्कं द्वितीयोभागः, तस्मिन् भागे द्वितीयाक्षरे चकारस्योपरितनमिकारं विलोप्य तस्य स्थाने आई-भावमाम्नाय गीतिर्निष्पादिता; 'कस्त्वासत्योमदाना मित्यनन्तभा-

---

*अधिकरणमाला-पुस्तके प्रायः सर्वत्र 'आयी'-इत्येवं यकार-मध्यपाठः ।

मूले गानग्रन्थे क्वचित् तथा पाठदर्शनं तद्बीजम्; परं "आकारः पूर्वभागः ईकार-उत्तरभागः"-इत्यादि-विरोधादुपेक्ष्यः सइति मन्यते; गानग्रन्थेषु बहुषु 'आई'-इत्येव-मीकारान्तः पाठः परिलक्ष्यते, अध्ययन-सम्प्रदायाच्च तथैव, यत्र क्वचिद् गाने यकार-मध्योऽस्ति लिखितः, तच्छ्रुतलिखनानुयायि-गड्डलिका-प्रवाह-मूलकमिति सम्भाव्यते ।

---

(१)—तथाहि, ताण्ड्य-चतुर्थ-तृतीये—"समानं साम भवत्यन्योन्यः प्रगाथः"-इति, उक्तेष्वहःसु समानमेकमेवाभीवर्त्ताख्यं ब्रह्म-साम भवति, प्रगाथः प्रग्रथनीयस्तदाश्रय-स्तृचस्त्वन्योन्यः प्रत्यहं विलक्षणो भवति"-इति च तद्-भाष्यम् ।

(२)—छन्दोग्रन्थस्य द्वितीय-प्रपाठक-षष्ठ-खण्डे पञ्चमी । इयमेव पुनः उत्तरा-ग्रन्थस्य प्रथम-प्रपाठक-द्वादश-सूक्ते प्रथमा ।

विन्युत्तरा (१), तस्यां योनि-न्यायेन चतुर्थाक्षरे तकारस्यो-परितनं यकारमोकारं च लोपयित्वा तयोः स्थाने आइ-भावः कार्यः; 'अभीषुणः' असावपरोत्तरा (२), तस्यामपि चतुर्थाक्षरे णकारस्योपरितनं सकारं लोपयित्वा तस्य स्थाने आइ-भावः कर्त्तव्यः (३); अन्यथा गीति-नाश-प्रसङ्गात्—इति प्राप्ते, ब्रूमः—नात्र योनौ वर्णान्तरस्यागमः, किन्तर्हि? विद्यमान एव चकारस्योपरितनः इकारः साम-प्रसिद्धया प्रक्रियया वृद्धः सन्नैकारो भवति, तस्य सन्ध्यक्षरत्वात्, 'आकारः पूर्वभागः, ईकारः उत्तरभागः' (४), तावुभौ विश्लेषेण गीयमानौ आइ-भावं प्रतिपद्येते; तथाच सामगा आहुः 'वृद्धं तालव्यमाइ भवति'-इति (५) तथा सत्युत्तरयोश्चतुर्थाक्षरे नास्ति तालव्य

---

(१)—उत्तरा-ग्रन्थस्य १प्र० १२सू० २ऋक्।

(२)—उत्तरा-ग्रन्थस्य १प्र० १२सू० २ऋक्।

                    २  र          ४  २        ४र ५
(३) तथाच—"काऽ५या। नश्चा३इत्रा ३ आभुवात्"-
                                                              र
—इत्यादि प्रथमायारूपम्, एतन्मात्रमिष्टमेव। "का५स्त्वा।
४    २    ४ ५                                              १  र
सत्या३इमा३दानाम्"-इत्यादि द्वितीयाया रूपम्,—"आऽ५भी
४    २    ४ ५
षुणा३इसा३खीनाम्" इत्यादि तृतीयाया रूपं च निषन्नम् भवेत्, परं तन्नैवेष्टम्, ऊह-प्रथमस्य पञ्चम-साम-विरोधात्।

(४)—अष्टमे तत् व्याकरणस्य पातञ्जल-व्याख्याने महाभाष्ये।

(५)—पुष्पसूत्रादौ। अत इदं तत्त्वम्-पूर्वोत्तरयोर्द्वयोरेव पक्षयोः प्रथमायाः स्वरूपे सत्यप्यविरोधे लोप-वृद्धयोः प्रकरण-गत-विरोधः।

इकारः इत्याईभावः न कर्त्तव्यः (१) 'अभीषुणः सखीना मविता जरितृणाम्'-इत्येतस्यामुत्तरायां द्वादशाक्षर-गतस्य रेफ-स्योपरितनः इकारः पूर्ववदाई-भवति (२) तथा सोऽयमाई-भावः उक्त-रीत्या वर्णाभिव्यञ्जकत्वादुत्तरा-गत-वर्ण-वशेन कर्त्तव्यः, गीत्यर्थत्वाभावेन योनि-क्रमे तेन विनापि गीतिर्विनश्यति-इति"२३॥ दशमाधिकरणम्—२४"स्तोभानीतप्रदिश्यन्ते नागीतित्वेन वर्णवत्। स्वरादिवत् प्रदिश्यन्ते गीति-कालोपयोगतः वामदेव्य-साम्नः योनौ द्वयोरर्द्धयोर्मध्ये औकार-द्वयेन हो-शब्देन हायि-शब्देन च निष्पन्नः स्तोभः एवमाम्नातः 'औ३हो हायि' *(१)

---

* अधिकरणमालायाम् 'औहोहायि'-इति पाठः।

परं तन्न सम्यक्, औकारद्वयेनेति पूर्वोक्तेः; गान-ग्रन्थेषु च एक औकारः प्रथम-स्वरकः, अपरो द्वितीय-स्वरकः स्पष्टम्।

---

(१) एवञ्च— "का२ऽ२पू४त्वा। स२त्यो४३मा५३दानाम्"——

इत्यादिकमूह-प्रथमे चतुर्थानन्तरं श्रुतमविरुद्धम्।

(२) "आ३ऽ२पूभी। सु४णा२३:सा४५३खीनाम्। आ१। विता२र-

जरायि१तृ२र। णा१म्" इत्यादिकं रूपं, गीयते चैवमेवोह-गायकैः सामगैः (१,५)।

(२) तथाहि गेय-गानस्य पञ्चम-प्रपाठकस्य पञ्चविंशतितमं साम वामदेव्यम्, "कया नश्चित्र आभुवदूती सदावृधः सखा। कया शचिष्ठया वृता"-इति तस्य योनिभूता ऋक्, अस्याः पूर्वार्द्धं कयेत्यादि, परार्द्धं कयाशचिष्ठयेत्यादि, अनयोरन्तरे स्तोभोऽयं श्रूयते; सच वामदेव्य-गान-श्रवणेनोपलभ्यः, गेय-पञ्चमे च द्रष्टव्यः।

इति; सोऽयं स्तोभः नोत्तरयोः (१) अतिदिश्यते, कुतः? अगीतित्वात्; 'यद्योन्यां तदुत्तरयोर्गायति'-इति गीति-मात्र मतिदिश्यते; तत्र प्रथमायामृचः वर्णाः यथा नातिदिश्यन्ते तथा स्तोभा अपि-इति प्राप्ते, ब्रूमः— स्वरो वर्ण-विश्लेषोविरामः इत्येते गीत्युपयोगित्वात् यथातिदिश्यन्ते तथा स्तोभा अपि गीति-काल-परिच्छेदकत्वादतिदिश्यन्ते"[२४]-इति (२) ॥

अष्टमाधिकरण-द्वितीय-वर्णके क्वचिदुत्पन्ना गानाभाव-शङ्का निवारिता —[२५]"गानस्य नियमोनोत विद्यते वह्न्युपस्थितौ। नाम्नानहयतोस्त्येव प्रकृतत्वाच्छ्रुतेरपि॥ क्वचित् कर्मविशेषे श्रूयते 'अयं सहस्रमानवइत्येततया हवनीयमुपतिष्ठते'-इति (३) असावृग् संहिता-ग्रन्थे (४) समाम्नाता, प्रगीता गानग्रन्थे (५), ततो वह्न्युपस्थाने तस्यामृचि गानं न नियतं किन्तु विकल्पितम्-इति प्राप्ते, ब्रूमः— अस्त्येव नियमो गाने, कुतः? सामवेदे गानस्यैव प्रकृतत्वात्, ऋचां संहिता-पाठोऽच गानायैव नह्याधारमन्तरेण गातुं शक्यते। अथोच्येत— 'अयंसहस्रेत्यृक्-प्रतीक-पूर्वकेण वाक्येनोप-

(१)—कस्त्वेत्यभीषुणः सखीत्यनयोर्ऋचोः ।

(२)—तथाच—"कस्त्वासत्योमदानां मंहिष्ठोमत्सदन्धसः'-इत्यर्द्धर्च-मूलकस्य, "अभीषुणः सखिनामविता जरितॄणाम्"—इत्यर्द्धर्च-मूलकस्य च गानस्योपरिष्टात् "दृढाचिदा रुजे वसु"-इत्यर्द्धर्च-मूलकस्य "शतम्भवास्यूतये"-इत्यर्द्धर्च मूलकस्य च गानस्य पुरस्तात् "औऽहो हाइ"-इत्येवं श्रूयतएव ऊहगान-प्रथमस्य पञ्चमे सामनि ॥

(३)—ताण्ड्यपाठस्त्वेवम्—'अयं सहस्रमानवइत्यतिच्छन्दसा हवनीयमुपतिष्ठन्ते'-इति, 'अयं सहस्रमानवइति अतिच्छन्दसा अतिच्छन्दसि ऋचि गीतेन गोरिति-निधनवता उद्गातारः तथ आहवनीय उपतिष्ठन्ते'-इति तद्भाष्यम् (४प्र,९ख) ।

(४)—छन्दोनामके पञ्चम-द्वितीय-तृतीये-प्रथमानन्तरम् ।

(५)—गेयनामके द्वादश-प्रथम-सप्तविंशत्यनन्तरम् ।

स्थान-विधानाद् वाक्यस्य प्रकरणात् प्रबलत्वाद्दैवोपस्थानम्-इति, तन्न, प्रकृत-प्रगीत-मन्त्र-वाचिन्या एतयेति सर्वनाम-श्रुतेः प्रबलतरत्वात्। तस्मात् प्रगीतयोरुपस्थानम्"[२५]-इति (१) ॥

पञ्चदशाधिकरणादिषु त्रिषु धर्म-साङ्कर्यं चिन्तितम्। पञ्चदशाधिकरम्—[२६]"बृहद्रथन्तरैर्धर्मैः सङ्कीर्णे वा व्यवस्थिते। पृष्ठैक्यात् सङ्करो धर्मे निर्देशाद्व्यवस्थितिः। ज्योतिष्टोमे विकल्पनं पृष्ठस्तोत्रे * विहितम् 'बृहत् पृष्ठं भवति, रथन्तरं पृष्ठं भवति' इति। तत्रोभयत्र धर्माः श्रुताः—'बृहति प्रस्तूयमाने मनसा समुद्रं ध्यायेत् (२), रथन्तरे प्रस्तूयमाने सम्मीलयेत्'-इत्यादयः (३), ते उभयत्र सङ्कीर्येरन्, पृष्ठ-सिद्धि-लक्षणस्य (४) कार्यस्यैकत्वात्—इति चेत्—न, निर्देश-भेदात्, साङ्कर्ये त्ववैलक्षण्येन बृहदिति रथन्तरमिति च द्वौ निर्देशौ नोपपद्येयाताम्; किञ्चोभय-धर्म-साहित्यं विरुद्धम्—उच्चैर्गेयं बलवद्गेयमिति बृहद्धर्मः (५) —नोच्चैर्गेयं न बलवद्गेयमिति रथ-

* 'विकल्पितं पृष्ठस्तोत्रम्'-इति गौ० सा० पुस्तकयोःपाठः।

(१)—सुस्पष्टञ्चैतदाह सूत्रकारः—'अयं सहोहाउ'-इति त्रिरुद्गाता गाथेन्निधनमितरावनूपेयातामिति। अत्र 'अयं सहोहाउ-इति गेयगानस्य द्वादश-प्रपाठकीयाष्टाविंशतितम-साम्नः प्रतीकम्।

(२)—तथाच, ताण्ड्य-सप्तम-सप्तमे—"यद्रथन्तरं प्रस्तौति समुद्रमन्तर्द्धायोद्गायेद्" -इत्यादि।

(३)—तत्रैव रथन्तरधर्मादि व्यवस्थानन्तरम् "रथन्तरमुद्गातुश्चक्षुः प्रमथितोः प्रस्तूयमाने सम्मीलेत्"-इत्यादि च।

(४)—औदुम्बरी-स्पर्शन-रूपस्य।

(५)—"बलवद्गेयं वज्रमेव प्रहृत्य प्रत्युद्दृष्टक्राति"-इत्यादि (ताण्ड्य-७,७)।

न्तर-धर्मः (१); तस्मादुभयोर्धर्मा-व्यवतिष्ठन्ते”[२६]इति ॥ षोड़-शाधिकरणम्— [२७]“तयोर्धर्माः समुच्चेया न वा कण्वरथन्तरे। द्वि-स्थानत्वाद् भाष्यआद्योविरोधाद् वार्त्तिकेऽन्तिमः। वैश्य-स्तोमे ‘कण्वरथन्तरं पृष्ठं भवति’-इति (१) श्रूयते, तत्र कण्वरथन्तराख्य-साम्नः (२) पृष्ठ-स्तोत्र-साधनयोः प्राकृतयोः बृहद्रथन्तरयोरुभयोः स्थाने पतितत्वादुभय-संबन्धि-धर्माः समुच्चेतव्याः; ये तु विरुद्धाः धर्माः उच्चैर्गेयं नोच्चैर्गेयमित्यादयः ते विकल्प्यन्ताम्; समुद्र-ध्यान-निमीलनादीनां विरोधाभावात्, प्रकृताविव निर्द्देश-भेदस्यात्राभावाच्च समुच्चयः इति भाष्यकारस्य (४) मतम्; विकल्पितयोरिव द्वयोः स्थाने पतितत्वाद् विरुद्ध धर्म-स्वारस्याच्च विकल्पएव युक्तो न तु समुच्चयः इति वार्त्तिक-कारस्य (५) मतम्; तत्रोभयत्र तत्तन्मत-विपरीतः पूर्वपक्षः ऊन्नेयः”[२७] ॥ सप्तदशाधिकरणम्—[२८]“द्वि-सामके द्वयोर्धर्मसाङ्कर्यं वा व्यव-स्थितिः। पृष्ठैक्यात् सङ्करोमैवं धर्माणां सामगत्वतः। ‘गोसव उभे कुर्यात्’-इत्यादिना गोसवादौ बृहद्रथन्तर-साम-द्वय-साध्यं पृष्ठस्तोत्रं विहितम्। तत्र पृष्ठस्तोत्रस्यैकत्वेन धर्म-व्यवस्थायाः (६) असम्भवात् बृहत्युभयधर्माः कर्त्तव्याः, रथन्तरेऽप्युभय-

---

(१)—“क्षिप्रं गेयं स्वर्गस्य लोकस्य समष्ट्यै”-इत्यादि (ता-७,७,)।

(२)—ताण्ड्य-द्वादश-प्रपाठकीय-चतुर्थ-खण्डे।

(३)—ऊहगानस्य चतुर्थ-प्रथम-तृतीयानन्तर-भुक्तस्य।

(४)—(जैमिनि-सूत्रस्य विशेषेण व्याख्यातुः) शवर-स्वामिनः।

(५)—(जैमिनि-सूत्र-न्यूनता-पूरयितुः) भट्टकुमारिलस्य।

(६)—उच्चैस्त्व-नीचैस्त्वादेः।

धर्माः, इत्येवं साङ्कर्यमिति चेत्— मैवम्, नह्येते पृष्ठ-स्तोत्र-प्रयुक्ताः धर्माः किन्तु साम-प्रयुक्ताः, ततः साम्नोर्भेदात् धर्माः व्यवतिष्ठन्ते"-इति व्यवस्थित-धर्मोपेताभ्यां बृहद्रथन्तर-नामकाभ्यां सामभ्यां (१) निष्पन्न-स्तोत्रस्य पृष्ठमिति वैदिकं नामधेयम्; यथा त्रिवृच्छब्दस्यार्थौ वेद-प्रसिद्धौ गृहीतः तद्वत्"[२८]॥ स च त्रिवृच्छब्दः प्रथमाध्यायस्य तृतीयपादे पञ्चमाधिकरणस्यान्तिमे वर्णके विचारितः—[२९]"लौकिकीवाक्यगोवार्थस्त्रिवृदादेः समत्वतः। उभौ विध्यर्थवादैकवाक्यत्वादस्त्रिवृहान्तिमः॥ "त्रिवृद्-बहिष्पवमानम्" (२)-इति श्रुतौ त्रिवृच्छब्दस्य त्रैगुण्यं लोक-सिद्धोऽर्थः वाक्यशेषादृक्-त्रयात्मकेषु सूक्तेष्ववस्थितानां बहिष्पवमानात्मक-स्तोत्र-निष्पादन-क्षमाणाम् 'उपास्मै गायतानरः (उ १प्र० १२,३सू०)-इत्यादीनामृचां नवकमर्थः (३); तत्र धर्म-निर्णये वेदस्य प्रबलत्वेपि पद-पदार्थ-निर्णये लोक-वेदयोः समान-बलवत्त्वात् उभावर्थौ विकल्पेन गृहीतव्यौ, इतिचेत्— मैवम्, लौकिकार्थ-स्वीकार-पक्षे विधि-वाक्ये त्रैगुण्यमर्थः, अर्थवाद-वाक्ये स्तोत्रियाणामृचां नवकम्, इत्येवं विध्यर्थवादयोर्वैयधिकरण्या-देकवाक्यत्वं न स्यात्; अतः एकवाक्यत्वाय स्तोत्रियाणां नवकमेव विधिवाक्ये नियतोर्थः"[२९]॥ पृष्ठ-शब्दस्य नामधेयत्वं प्रथमाध्याये चतुर्थ-पादस्य तृतीयाधिकरणे-चित्रा शब्दवन्निर्णी-

---

(१)—ते च सामनी अह्न-गानस्य चुड़-पर्व-गत-पञ्चदश-षोडशात्मके, तत्र चाद्यं "रथन्तरवद्वत्" अपरं 'बृहद्रथन्तरम्'।

(२)—ताण्ड्य-द्वितीय-प्रपाठकस्य चतुर्दश-खण्डे।

(३)—वाक्यशेषश्चायं 'नवैता एकविंशस्तोत्रमा भवन्ति'-इति (ता-२, १५)।

तम्—[२०]"यच्चित्रया यजेतेति तद्गुणो नाम वा भवेत्। चित्र-स्त्रीत्व-गुणौ रूढेरग्नीषोमीयके पशौ। द्वयोर्विधौ वाक्य-भेदो वैशिष्ट्ये गौरवं ततः। स्यान्नाम पृष्टाज्य-वर्हिष्यवमानेषु तत् तथा। 'चित्रया यजेत पशुकाम इत्याम्नायते, तत्र चित्राशब्दोनो-द्भिच्छब्दवद्यौगिकः (१) किन्तु रूढ्या चित्रत्वं स्त्रीत्वं चाभि-धत्ते, ततो न पूर्वन्यायेन नामत्वम्, तथा सति अग्नीषो-मीयं पशुमालभेतेति-विहित-पशु-यागमत्र यजेतेत्यनेन पदे-नानूद्य तस्मिन् पशौ चित्रत्व-स्त्रीत्व-गुणौ विधीयेते, इति प्राप्ते, ब्रूमः— चित्रत्वं स्त्रीत्वं चेति द्वावेतौ गुणौ, तयोर्विधाने वाक्यं भिद्येत, तथाचोक्तम्—'प्राप्ते कर्मणि नानेको विधातुं-शक्यते गुणः। अप्राप्ते तु विधीयेरन् * बहवोऽप्येक-यत्नतः'-इति। अथ वाक्य-भेद-परिहाराय गुण-द्वय-विशिष्टं पशु-द्रव्य-रूपं कारकं विधीयेत, तदा गौरवं स्यात्; तस्माच्चित्रा-शब्दः पूर्व-वत् यजि-सामानाधिकरण्येन याग-नामधेयं भवति, चित्रत्वं च तस्य विलक्षण-द्रव्य-द्वारेणोपपद्यते—'दधि मधु घृतमापोधाना

* 'विधीयन्ते'-इति गौ० सा० पुस्तकयोः पाठः।

(१)—उद्भिच्छब्दस्य यौगिकत्वेनैव मत्वर्थ-लक्षणा-भयाद् याग-नामधेयत्वम्, तथाहि—"उद्भिदा यजेत पशुकामः"-इति वाक्येन फलं प्रति विधानं तं प्रति च गुण-विधानं न युज्यते, वाक्यभेदापत्तेः; तत उद्भिदेत्यस्य उद्भिद्वतेत्यर्थः कल्पनीयः गत्यन्तर-सत्त्वे स चासहनीयः, तस्मात् उद्भिन्नामकेन यागेन पशुं भावयेत्-इत्येव, तस्यार्थः साधुरित्ययं विचारो जैमिनि-ग्रन्थस्य न्यायमालायाश्च प्रथमाध्याय-चतुर्थ-पादे लौगाक्षि-प्रभृति-मीमांसा-प्रबन्धेच स्फुटः।

स्तण्डुलास्तत्संसृष्टं प्राजापत्यम्'-इति दध्यादीनि विचित्राणि प्रदेय-द्रव्याणि षडाम्नातानि' (१) तदेत च्चित्रा नामकस्य यागस्योत्पत्ति-वाक्यम्, याग-स्वरूप-भूतयोः दध्यादि-द्रव्य-प्रजापति-देवतयोः अत्रोपदिश्यमानत्वात्; उत्पन्नस्य तस्य यागस्य 'चित्रया यजेत पशुकामः'-इत्येतत् फलवाक्यम्। एवं सति प्रकृतार्थोलभ्येत, अग्नीषोमीय-पश्वनुवादेन गुणविधाने प्रकृत-हानाप्रकृत-प्रक्रिये प्रसज्येयाताम्, लिङ्-प्रत्ययस्य चानुवादकत्वाङ्गीकारान्मुख्योविध्यर्थोबाध्येत। तस्माच्चित्रा-पदं नामधेयम्(२) ॥ यथा चित्रा-शब्दे नामधेयत्वं तथा बहिष्पवमान-शब्दे आज्य-शब्दे पृष्ठ-शब्दे च तत्-कर्म-नामधेयत्वं योजनीयम्— एवं हि श्रूयते (३) 'त्रिवृद्-बहिष्पवमानम्, पञ्चदशान्याज्यानि, सप्तदशानि पृष्ठानि; इति। अस्य वाक्य-त्रयस्यार्थोविवियते—सामगानामुत्तरा-ग्रन्थे तृचात्मकानि सूक्तान्याम्नातानि, तत्र 'उपास्मै गायता नरः'-इत्याद्यं सूक्तम्, 'दविद्युतत्या रुचा'-इति द्वितीयम्, 'पवमानस्यते कव'-इति तृतीयम्, ज्योतिष्टोमस्य प्रातःसवनानुष्ठाने तेषु त्रिषु सूक्तेषु गायत्रं साम गातव्यम् (४) तदिदं सूक्त-त्रय-गान-साध्यं स्तोत्रं बहिष्पव

---

(१)—ताण्ड्य, षड्विंशे च ब्राह्मणे— लाट्यायने च कल्पसूत्रे।

(२)—चित्रा-शब्दस्य श्रुति-लिङ्गादनेक-द्रव्य-परकत्वेन-उद्भिदेति वाक्य-साम्यम्, यागस्य फलसम्बन्धे गुणसम्बन्धे च वाक्यं भिद्येत, तद्-भयान्नामधेयता चेति सारम्।

(३)—ताण्ड्य-विंशतितमे।

(४)—तथाहि—ताण्ड्य-षष्ठस्य नवम-दशम-खण्डयोः "उपास्मै गायतानर इति"-इत्यादिना फलस्वरूपं प्रदर्श्य, सप्तम-प्रथमे "इमे वै लोका गायत्रं त्याद्गेयम्"-इत्या-दिना गान सामादिकं व्यवस्थापितम्।

मानमित्युच्यते (१) तत्रावस्थितानामृचां पवमानार्थत्वाद्बहिः-सम्ब-न्धात्, न खल्विदं स्तोत्रम् इतर-स्तोत्रवत् सदोनामकस्य मण्डपस्य मध्ये औदुम्बर्य्याः (२) स्तम्भ-शाखायाः सन्निधौ प्रयुज्यते किन्तु सदसोबहिःप्रसर्पद्भिः प्रयुज्यते, (३) तस्य च बहिष्पवमानस्य त्रिवृन्नामकः स्तोमोभवति, तस्यच स्तोमस्य विधायकं ब्राह्मण-वाक्यमेवमाम्नायते (४) 'तिसृभ्यो हिं करोति स प्रथमया तिसृभ्यो हिं करोति स मध्यमया, तिसृभ्यो हिं करोति स उत्तमयोद्यती त्रिवृतो विष्टुतिरिति'। अयमर्थः—सूक्त-त्रय-पठितानां * नवानामृचां गानं त्रिभिः पर्य्यायैः कर्त्तव्यम् तत्र प्रथम पर्य्याये त्रिषु सूक्तेषु आद्यास्तिस्रऋचः, द्वितीये पर्य्याये मध्यमाः, तृतीये पर्य्याये चोत्तमाः; तिसृभ्यइति तृतीयार्थे पञ्चमी, हिं करोति गायतीत्यर्थः। एयं यथोक्त-प्रकारोपेता गीतिस्त्रि-वृत्-स्तोमस्य विष्टुतिः ( स्तुति-प्रकार-विशेषः), अस्याः† विष्टुतेरुद्यती नामेति, एवं परिवर्त्तिनी—कुलायिनीति द्वे विष्टुती ।

* 'सूक्त-त्रय-गतानाम्'-इति पाठः गौ० पुस्तके ।

† 'तस्याः'-इति पाठः गौ० पुस्तके ।

(१)—तदेतद् गानं न क्वचिद् गानग्रन्थेऽद्य प्रेक्ष्यते, उद्गातृ-प्रयोगाख्य-याज्ञिक-ग्रन्थे तु परिदृश्यते नियोग-मुखेन

(२)—औदुम्बरी-लक्षणादिकन्तु समासतस्ताण्ड्य-पञ्चम-पञ्चमे, षड्विंश-ब्राह्मणस्य चतुर्थ-प्रपाठकस्य तृतीय-खण्डे "प्रजापतिर्देवेभ्यऔदुम्बरीमुच्छ्रयति"-इत्यादिना पल्लवितम् ।

(३)—तथाहि ताण्ड्य-षष्ठस्य सप्तम-खण्डे—"बहिष्पवमानं सर्पन्ति"-इत्यादि, 'ये अध्वर्युमुखाः बहिष्पवमानार्थं सदः-सकाशाच्चात्वालं प्रतिसर्पन्ति'-इत्यादि तद् भाष्यम् । कात्यायन-नवम-नवमे सूत्रं चैतत्—"बहिर्बहिष्पमानैः स्तुवीरन्"-इति ।

(४)—ताण्ड्य-द्वितीय-प्रपाठकारम्भ-खण्ड-त्रये ।

तयोः परिवर्त्तिन्येवमाम्नायते(१)— 'तिसृभ्यो हिं करोति स पराचीभिः, तिसृभ्यो हिं करोति स पराचीभिः, तिसृभ्यो हिं करोति स पराचीभिः, परिवर्त्तिनी त्रिवृतो विष्टुतिः'-इति। पराचीभिः अनुक्रमेणाम्नाताभिरित्यर्थः। कुलायिन्येवमाम्नायते(२)— 'तिसृभ्यो हिं करोति स पराचीभिः; तिसृभ्यो हिं करोति या मध्यमा सा प्रथमा, या उत्तमा सा मध्यमा, या प्रथमा सोत्तमा; तिसृभ्यो हिं करोति योत्तमा सा प्रथमा, या प्रथमा सा मध्यमा, या मध्यमा सोत्तमा, कुलायिनी त्रिवृतो विष्टुतिः'-इति। अत्र प्रथम-सूक्ते पाठ-क्रम एव, द्वितीये मध्यमोत्तम-प्रथमाः, तृतीये तूत्तम-प्रथम-मध्यमाः-इत्येवं व्यत्ययेन मन्त्राः गातव्याः। तदिदं विष्टुति-त्रयं विकल्पितं। त्रिवृच्छब्दस्येदृशं स्तोम-स्वरूपमर्थः, न तु त्रैगुण्यमिति पूर्वपादे निर्णीतम्॥ उत्तरा-ग्रन्थे बहिष्पवमान-सूक्तेभ्यः निश्व्यजर्द्धं चत्वारि सूक्तान्याम्नातानि(३)— 'अग्न आयाहि वीतये' (उ,१प्र,४सू)-इत्याद्यं सूक्तम् — 'आनोमित्रावरुणा' (उ,१प्र५,सू)-इति द्वितीयम्— 'आयाहि सुषुमाहित' (उ,१प्र६,सू)-इति तृतीयम्— 'इन्द्राग्नी आगतं

(१)—परिवर्त्तिनी आवर्त्तिनीत्यर्थः, यथा प्रथमे पर्य्याये अनाहताभिर्गानं तयोत्तरयोरपि, आवृत्ति-मात्र-पर्यवसायित्वात्; ताण्ड्य-द्वितीय-द्वितीये स्पष्टम्।

(२)—कुलायो नीडं, पक्षिणां निवास-स्थानं, तद्यथा अस्त-तृणादि-निर्मितम्, एवं व्यत्यास-युक्तास्तृचः कुलायाः, तैस्तद्वती कुलायिनी। अस्याः विष्टुतेः परिवर्त्तिनी प्रथमः पर्यायः; द्वितीये पर्याये पराचीभिः प्रयुक्तस्य तृचस्य या मध्यमा सा प्राक् प्रयुज्य प्रथमा कार्या; या प्रथमा सोत्तमा कार्या; तृतीयस्तु पर्यायो निगद-सिद्ध एव यथावत् कार्यः। स्पष्टं चैतत् सकलं ताण्ड्य-द्वितीयस्य तृतीयखण्डे स-भाष्ये।

(३)—एषां विवरणं पूर्वोक्तमेवात्र स्मर्त्तव्यम्।

सुतम्' (उ,१प्र,३सू)-इति चतुर्थम्— तान्येतानि प्रातः-सवने गायत्र-साम्ना गीयमानानि चत्वार्य्याज्य-स्तोत्राणीत्युच्यन्ते। तन्निर्वचनं श्रूयते— 'यदाजिमीयुस्तदाज्यानामाज्यत्वम्'-इति (१)। तेष्वाज्य-स्तोत्रेषु पञ्चदश-नामकः स्तोमोभवति, तस्य स्तोमस्य विष्टुतिरेवमाम्नायते— 'पञ्चभ्यो हिं करोति स तिसृभिः स एकया स एकया, पञ्चभ्यो हिं करोति स एकया स तिसृभिः स एकया, पञ्चभ्यो हिं करोति स एकया स एकया स तिसृभिः'-इति (२) एकं सूक्तं त्रिरावर्त्तनीयं, तत्र-प्रथमावृत्तौ प्रथमाया ऋचस्त्रिरभ्यासः— द्वितीयावृत्तौ मध्यमायाः— तृतीयावृत्तावुत्तमायाः— सोऽयं पञ्चदश-स्तोमः (३)। उक्तेभ्यस्त्वर्भ्यः सूक्तेभ्यः ऊर्द्ध्वमुत्तराग्रन्थे त्रीणि माध्यन्दिन-पवमान-सूक्तान्याम्नाय तत ऊर्द्ध्वं चत्वारि सूक्तान्याम्नातानि, तेषु-'अभित्वाशूरनोनुमः-(उ,१प्र,१सू)' इत्याद्यम्-'कया नश्चित्र आ भुवत् (उ,१प्र,१२सू),' -इति द्वितीयम्— 'तं वो दस्ममृतीषहम् (उ,१प्र,१३)'-इति तृतीयम्— 'तरोभिर्वोविदद्वसुम् (उ१,प्र,१४)'-इति चतुर्थम्— एतानि क्रमेण 'रथन्तर'-(ऊ०१प्र-१सा) 'वामदेव्य'-(ऊ०१प्र ५सा) 'नौधस'-(ऊ०१प्र६सा) 'कालेय'(ऊ०१प्र७सा) सामभिर्माध्यन्दिन-सवने गीयमानानि पृष्ठ-स्तोत्राणीत्युच्यन्ते। स्पर्शनात् स्पृष्ठानीत्येवं निरुक्तिर्द्रष्टव्या। तेषु स्तोत्रेषु सप्तदशस्तोमोभवति, तस्य

(१)—"यदाजिमीयुस्तदाज्यानामाज्यत्वम्"-इति ताण्ड्यपाठः (ता-७,२)।

(२)—ताण्ड्य-ब्राह्मणस्य चतुर्थादि-खण्ड-त्रयेषु तिस्रोविष्टुतयः श्रूयन्ते, तासु इयमाद्या, अत्र एकैकस्मिन् पर्याये पञ्चर्चो भवन्तीति पञ्चपञ्चिनीत्याख्यायते।

(३)—पञ्चदश-स्तोमस्य विष्टुति-त्रयात्मकत्वात् त्रि-प्रकारः, तत्रायमाद्य-प्रकारः॥

स्तोमस्य विष्टुतिरेवमाम्नायते— 'पञ्चभ्यो हिं करोति स तिसृभिः स एकया स एकया, पञ्चभ्यो हिं करोति स एकया स तिसृभिः स तिसृभिः'-इति, अत्र प्रथमावृत्तौ प्रथमायाः ऋचः त्रिरभ्यासः —द्वितीयावृत्तौ मध्यमायाः— तृतीयावृत्तौ मध्यमोत्तमयोः— सोऽयं सप्तदश स्तोमः(१) ॥ अत्र त्रिष्वपि वाक्येषु त्रिवृत्-पञ्चदश-सप्तदश-शब्दाः गुण-विधायकत्वेन सम्मताः, यदि बहिष्पवमानाज्य-पृष्ठ-शब्दा अपि गुण-विधायकाः स्युः, तदा प्रत्युदाहरणम्, गुण-द्वय-विधानाद् वाक्य-भेदः स्यात् । तस्माद् बहिष्पवमानादि-शब्दाः स्तोत्र-नामधेयानि, तैर्नामभिः कर्माण्यनूद्य त्रिवृदादि-गुणाः विधीयन्ते"२०-इति ॥

उक्तस्य पृष्ठादि-स्तोत्रस्य प्रधान-कर्मत्वं द्वितीयाध्यायस्य प्रथम-पादे पञ्चमाधिकरणे निर्णीतम्—२१"प्रउगं शंसतीत्यादौ गुण-तोत प्रधानता । दृष्टादेव स्मृतिस्तेन गुणता स्तोत्र-शस्त्रयोः । स्मृत्यर्थत्वे स्तौति-शंस्योर्द्वात्वोः श्रौतार्थ-बाधनम् । तेनादृष्टमुपेत्यापि प्राधान्यं श्रुतये मतम् । ज्योतिष्टोमे श्रूयते—'प्रउगं शंसति', 'निष्केवल्यं शंसति', 'आज्यैः स्तुवते', 'पृष्ठैः स्तुवते'-इति । (प्रउग-निष्केवल्य-शब्दौ शस्त्र-विशेष-नामनी, आज्य-पृष्ठ-शब्दौ तु व्याख्यातौ) अप्रगीत-मन्त्र-साध्या स्तुतिः शस्त्रं, प्रगीत-मन्त्र-साध्या स्तुतिः स्तोत्रम् । तयोः स्तुत-शस्त्रयोर्गुणकर्मत्वं युक्तं; कुतः ? तुष-विमोकवद्दृष्टार्थ-लाभात् (२) पठ्यमानेषु मन्त्रेषु अनु-स्मरणेन देवता संस्क्रियते-इति प्राप्ते, ब्रूमः— तेषु अनुस्मरणेन

(१)—अत्र यद् वक्तव्यं तत् पूर्वमेवाभिहितम् ॥

(२)—"लभ्यमाने फले दृष्टे नादृष्ट-फल-कल्पना"-इति सिद्धान्तात् ॥

स्तोतव्यायाः देवतायाः स्तावकैर्गुणैः संबन्ध-कीर्त्तनं स्तौति-शंसति-धात्वोर्वाच्योऽर्थः, यदि मन्त्र-वाक्यानि गुण-सम्बन्धाभिधान-पराणि, तदा धात्वोः मुख्यार्थ-लाभात् श्रुतिरनुगृहीता भविष्यति ; यदा तु गुण-द्वारेणानुस्मरणीय-देवता-स्वरूप-प्रकाशन-पराणि मन्त्र-वाक्यानि स्युः, तदा धात्वोः मुख्यार्थो न स्यात्, लोके हि 'देवदत्त-श्चतुर्वेदाभिज्ञः'-इत्युक्ते स्तुतिः प्रतीयते, तस्य वाक्यस्य गुण-द्वारेण देवदत्त-स्वरूपोपलक्षण-परत्वेन गुण-सम्बन्ध-परत्वात् ; यदा तु देव-दत्त-स्वरूप-परता 'यश्चतुर्वेदी तमानय'-इत्यादौ, तत्र न स्तुति-प्रतीतिः, तस्य चतुर्वेद-सम्बन्ध-द्वारेण देवदत्त-स्वरूप-परत्वेन गुण-सम्बन्ध-परत्वाभावात् ; ततश्चाज्यैर्देवं प्रकाशयेत्, पृष्ठैर्देवं प्रकाश-येत्-इत्येवं विध्यर्थ-पर्य्यवसानाद् धात्वोर्मुख्यार्थोबाध्येत ; ततोधातु-श्रुतिमबाधितुं स्तोत्र-शस्त्रयोः प्रधान-कर्मत्वमभ्युपेतव्यम्। तत्र दृष्टं प्रयोजनं नास्तीतिचेत्—ततोऽपूर्वमस्तु[२१]-इति (१)॥

तत्रैव द्वितीय-पादे द्वादशाधिकरणे साम-विशेष-प्रयुक्तं कर्मा-न्तरत्वमभिहितम्— [२२]"उक्ताग्निष्टुतमेतस्यवारवन्तीय-साम हि। रेवतीष्वृक्षु कृत्वेति श्रुतं पशु-फलाशये। रेवत्यादिर्गुणः कर्म पृथग्वा पूर्ववद् गुणः। रेवती-वारवन्तीय-सम्बन्धाख्यः पशु-प्रदः। साम्नोऽत्र फल-कर्मभ्यां सम्बन्धे वाक्य-भिन्नता। तेनोक्त-गुण-संयुक्तमन्यत् कर्मोच्यते फले॥ 'त्रिवृदग्निष्टोमस्तस्य वायव्यासु (ऋक्षु एकविंशाग्निष्टोम-साम कृत्वा) ब्रह्मवर्चस-कामो

---

(१)—विश्वजिदादिवदित्याशयः।

यजेत'(१)-इत्यस्य सन्निधौ श्रूयते(२)—'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोम साम कृत्वा पशु-कामोह्येतेन यजेत'-इति । अस्यायमर्थः— अग्निष्टोमस्य विकृति-रूपः कश्चिदेकाहोऽग्निष्टुन्नामकः, स च पृष्ठ-स्तोत्रे त्रिवृत्-स्तोम-युक्ततया त्रिवृदित्युच्यते, अग्निष्टोमोक्थादीनां सप्तानां सोम-संस्थानां (३) मध्येऽग्निष्टोम-संस्था-रूपत्वादग्निष्टोमइत्यप्युच्यते । प्रकृतौ तृतीयसवने आर्भव-पवमानस्योपरि 'यज्ञायज्ञीयं' साम गीयते, तेन च साम्ना अग्निष्टोम-यागस्य समाप्यमानत्वादग्निष्टोम सामेत्युच्यते, तच्च प्रकृतौ 'यज्ञायज्ञावोअग्नये'-इत्याद्याग्नेयीष्वृचु (उ,१प्र,२०सू,१-२-३ऋ)गीयते; अस्मिंस्त्वग्निष्टुति ब्रह्मवर्चस-कामेन वायव्यास्वृचु तत् साम गातव्यम्, तच्च प्रकृताविवैकविंश-स्तोम-युक्तम्; पशुकामस्य तु 'रेवतीर्नः सधमादे'-इत्यादिषु रेवतीष्वृचु (उ,प्र४,सू ११,२-३ऋ) 'वारवन्तीयं' साम गायेदिति, तत्र रेवतीनामृचां वारवन्तीय-नामकेन साम्ना यः सम्बन्धः सोऽयं पशु-फलायाग्निष्टुति विधीयते, एतस्यैवेति प्रकृत-परामर्शकेनैतच्छब्देनान्य-व्यावर्त्तकेनैवकारेण-चाग्निष्टुतः समर्प्यमाणत्वात्; यथा पूर्वाधिकरणे इन्द्रिय-फलाय प्रकृतेऽग्निहोत्रे दधि-गुणोविहितः (४) तद्वत्, इति

(१)—ताण्ड्यस्य सप्तदश-सप्तमे श्रुतमेतत्, परम् ऋचवादि-कृत्वेत्यन्त-पाठोऽत्राधिको लक्ष्यते, ततस्तस्या एव श्रुतेरभिप्रेतोयोऽयं न तु साचाच्छ्रुतिरिति गम्यते ॥

(२)—ताण्ड्य-सप्तदशाष्टमे ।

(३)—तथाहि-"अथ सोमसंस्था, अग्निष्टोमो(१)ऽत्यग्निष्टोमो(२) उक्थः(३) षोडश्य(४) तिरात्रो(५) वाजपेया(६) प्तोर्यामः (७)"-इति लाट्यायन सूत्रम् (५प्र०४ख०)। अत्र उक्थस्यादित्वाभावेऽपि ताण्ड्ये तस्य पूर्व-विहितत्वात् उक्थादीनामिति कथनं नासङ्गतम् ।

(४)—"दध्नेन्द्रियकामस्य जुहुयात्"-इति वाक्यार्थेन, एवदेव विषयीकृत्य एकादशाधिकरणं रचितमस्ति ।

प्राप्ते, ब्रूमः— विषमोदृष्टान्तः, दृध्नोहोम-जनकत्वं न शास्त्रेण बोधनीयं तस्य लोकतोऽवगन्तुं शक्यत्वात्। फल-सम्बन्धः एक-एव शास्त्र-बोध्यः इति न तत्र वाक्यभेदः, इह तु रेवत्यृगाधारक-वारवन्तीय-साम्नोऽग्निष्टुत्-कर्म-साधनत्वं फल-साधनत्वं चेत्युभयस्य शास्त्रैक-बोध्यत्वाद् दुर्वारोवाक्य-भेदः; तेन पशु-फलकं यथोक्त-गुण-विशिष्ट-कर्मान्तरमत्र विधीयते। एतच्छब्दः एव-कारश्च विधीमान-कर्मान्तर-विषयतया योजनीयौ”[२२]-इति (१)।

उत्तरस्मिंस्त्वधिकरणे निधन-विशेषाः काम्याः विचारिताः —[२३]“वृष्टयन्न-स्वर्ग-कामानां सौभरं स्तोत्रमीरितं। निधनाद्यपि हीषुर्ग्-इति वृष्ट्यादि-कामिनां। फलान्तरं किं वृष्ट्यादि हीषा-दीनामुतोदिते। सौभरे फल-संभिन्ने निधनं विनियस्यते। फलान्तरं चतुर्थ्योक्तं वृष्टि-कामाय हीषिति। सौभरस्य फलं वृष्टिर्हीषित्युक्त्या विवर्द्धते। नोक्तं वृष्टयन्न-कामानामन्यत्वं प्रत्यभिज्ञया। नियमेऽपि चतुर्थ्येषा तादर्थ्यादुपपद्यते॥ ‘यो वृष्टिकामो योऽन्नाद्यकामो यःस्वर्गकामः स सौभरेण स्तुवीत, सर्वे वै कामाः सौभरम् *-इति (२) समाम्नायः † पुनः

* ‘सौभरे’-इति पाठोबहु-पुस्तके। परं सः सर्वोऽप्यसाधुरेव, ताण्ड्ये तथा दर्शनात्।

† ‘समाम्नाय’-इति ल्यवन्तपदं दृश्यते, प्रायः सर्वत्र इह। परं तन्न सम्यक्, ताण्ड्य-ब्राह्मण-पाठ-विरोधात्। तथाहि तत्र स्तुवीतेत्यनन्तरं सर्वे-इत्यस्यादौ हीषित्यादिकं पठितम्, न तु स्तुवीतेत्यनन्तरं सर्वे-इत्यादिकं पठित्वा हीषित्यादिकमस्ति। ताण्ड्य-भाष्ये च न्यायविस्तर-ग्रन्थोऽयमुद्धृतः तत्रचैवमेव प्रथमान्तः पाठः।

(१)—एतस्यैवेत्यादि-पूर्वदर्शित-वाक्ये।

(२)—ताण्ड्याष्टमाष्टमे।

समाम्नातं 'हीषिति वृष्टिकामाय निधनं कुर्यात्, ऊर्गित्यन्नाद्य-कामाय, ऊ-इति स्वर्गकामाय'-इति। 'सौभरं' नाम साम-विशेषं (१), निधनं नाम पञ्चभिः सप्तभि र्वा (२) भागैरुपेतस्य साम्नोऽन्तिमो भागः (३), तस्मिन्निधने हीषादयो विशेषाः सौभर-साम-साध्यास्तोत्र-फलेभ्योवृष्ट्यादिभ्योऽन्यानि वृष्ट्यादि-फलानि जनयितुं विधीयन्ते; कुतः? हीषादि-विधि-वाक्ये वृष्टि-कामायेत्यादिना चतुर्थी-श्रवणात्; सा च तादर्थ्ये (४) त्रयाणां हीषादीनां वृष्ट्यादि-काम-पुरुष-शेषत्वं गमयति, तच्छेषत्वं च पुरुषाभिलषित-फल-साधनत्वे सत्युपपद्यते (५); ततः सौभरस्य हीषिति निधन-विशेषस्य च फलभूते द्वे वृष्टी भवतः, तदुभय-

(१)—तच्च ऊह-गानस्य प्रथमप्रपाठकीय-षोडशतमम्।

(२)—साम्न आद्योभागः प्रस्तोत्रा गेयः प्रस्तावः, द्वितीयो भागः उद्गात्रा गेयः उद्गीथः तृतीयो भागः प्रतिहर्त्रा गेयः प्रतिहारः, चतुर्थो भागः पुनरुद्गात्रा गेयः उपद्रवः, पञ्चमः सर्वैर्युगपद् गेयः निधनाख्यः-इति सर्व-वादि-सम्मतम्। केषाञ्चिन्नये—गानारम्भ-काले सर्वै र्ऋत्विग्भिः "हुम्"-इत्येवमुच्चार्यो हिङ्कारः, तमारभ्य निधनगानान्तं यजमान-कृत्यम् "ओऽम्"इत्येवं प्रणवश्च-इत्येतद् द्वावपि सामाङ्गत्वेन गण्यः ततः पञ्च-भक्तिकं सप्त-भक्तिकं वा सामेत्युच्यते, मन्त्र-ब्राह्मणस्य चतुर्थप्रपाठके साम्नः पञ्चभक्तिकत्वं सप्त-भक्तिकत्वञ्च श्रूयते, यज्ञतत्त्वदीपिकायामुद्गातृप्रयोगे चास्योदाहरणं वक्ष्ये।

(३)—तदुक्तम् "प्रस्तावस्तत उद्गीथः प्रतिहारोपद्रवौ तथा। निधनं पञ्चमेत्याऽऽ-हिङ्कारः प्रणवएव च"-इति विवरण-कृता माधवेन।

(४)—"तादर्थ्ये चतुर्थी वाच्या"-इति कात्यायन-स्मरणात्।

(५)—बादरि-नामाचार्य्यमते क्रियायाः शेषत्वं नास्ति, द्रव्य-गुण-संस्कारेष्वेव शेषत्व-मिति नियमात्। जैमिनि-नये तु पारार्थ्यमेव शेषत्वमिति अस्यास्येवास्ति तद्धिति नियमाभावात् क्रियेत्यादेरपि शेषत्वे न बाधः; तथा च, तृतीयाध्यायस्य प्रथमपादे शेषाधिकारे चतुर्थ-पञ्चम-षष्ठ-सूत्राणि—"कर्माण्यपि जैमिनिः फलार्थत्वात्। फलञ्च पुरुषार्थत्वात्। पुरुषश्च कर्मार्थत्वात्"-इति।

मेलनान्महती बृहतिः। इति प्राप्ते, ब्रूमः— सौभर-विधौ यो वृष्ट्यादि-कामः सएव हीषादि-विधौ प्रत्यभिज्ञायते, ततः सौभरस्य फलभूता ये वृष्ट्यादयः तएव हीषादि-शास्त्रे ष्वनूद्यन्ते इति न फलान्तरम्। अथोच्येत नूतन-फलान्तराभावात् हीषादीनां च नानाशाखाध्ययनादेव सौभरे प्राप्तत्वादनर्थकोऽयं विधिः-इति — तन्न, फल-त्रय-कामानां त्रयाणामनियमेनैव हीषादिषु मध्ये यस्य कस्यचिन्निधनस्य प्राप्तौ विधेर्नियमार्थत्वात्, तादर्थ्यन्तु फलान्तराभावेऽपि सौभर-वाक्योक्त-वृष्ट्यादि-फल-साधने सौभरे हीषादीनां नियम्यमानत्वादुपपद्यते; तस्मादयं निधन-विशेष-नियमः न विधिः"[२३]-इति॥

तृतीयाध्यायस्य तृतीय-पादे प्रथम-द्वितीयाधिकरणयोः सामगाने उच्चत्व-नीचत्व-धर्मौ विचारितौ। तत्र प्रथमाधिकरणम् —[२४]"कर्त्तव्यमुच्चैः सामर्ग्भ्यामुपांशु यजुषेत्यमी। मन्त्राणां वाथ वेदानां धर्मामन्त्र-गतायतः। विध्युद्देशे मन्त्र-वाचि-शब्दाः प्रोक्ताः ऋगादयः। ऋग्वेदोग्नेः समुत्पन्नइत्युपक्रम-वेद-गीः। असंजात-विरोधीतस्तद्वशादुपसंहृतिः। नयने सति वाक्येन धर्माणां वेद-गामिता॥ ज्योतिष्टोमे श्रूयते— "उच्चैरृचा क्रियते, उपांशु यजुषा, उच्चैः साम्ना इति। तत्र विधि-वाक्ये मन्त्र-वाचिनामृगादि-शब्दानां प्रयोगान्मन्त्र-धर्माः उच्चैस्त्वादयः, तथासति यजुर्वेदोत्पन्नाः अध्वर्युणा प्रयुज्यमानाः अप्यृचः उच्चैरेव पठितव्याः; इति चेत्— मैवम्, असंजात-विरोधित्वेन प्रबलमुपक्रममनुसृत्य तद्वशेनोपसंहारस्य नेतव्यत्वात्। उपक्रमे हि वेद-शब्दः श्रुतः— 'त्रयोवेदाअसृज्यन्त, अग्नेरृग्वेदः,

वायोर्यजुर्वेदः, आदित्यात् सामवेदः'-इति (१) अतः उपक्रम-गत-वेदानुसारेण विध्युद्देश-गतानामप्यृगादि-शब्दानां वेद-परत्वे सत्यृचोऽपि यजुर्वेदोत्पन्नाः उपांशु पठनीयाः। ननूपक्रमोऽर्थवादत्वाद् दुर्बलः, उपसंहारो विध्युद्देशत्वात् प्रबलः, इति चेत्—वाढम् ! लब्धात्मनोहि विध्युद्देशस्य प्राबल्यम्, इह तु (२) प्रथमतोबुद्ध्युत्पादकः उपक्रमः, तदानीमलब्धात्मकत्वान्न तस्य बाधकत्वं, पश्चात्तु वाक्यैकत्वाय तदविरोधेनैवात्मानं लभ्यते; तदेव मुपक्रमोपसंहारैकवाक्यता-बलेन निर्णयाद् वाक्य-विनियोगोऽयम्"२४-इति ॥ द्वितीयाधिकरणम्—२५"यजुर्वेदमाधानं तदङ्गं साम तत्र किम्। उच्चैरुपांशु वा गानमुच्चैः शीघ्र-प्रवृत्तितः। उत्पत्तेर्विनियोगोऽत्र प्रबलोनुस्मृतिर्यतः। मुख्यस्याङ्गेन कर्त्तव्या तस्माद् गानमुपांशुतः। आधानस्यात्र मुख्यत्वं गानस्य गुणताथवा। विनियोगस्य मुख्यत्वमुत्पत्तेर्गुणतास्त्विह॥ आधाने वामदेव्यादि-सामान्यङ्गत्वेन विहितानि, तत्र यद्यप्येतानि यजुर्वेद-गतस्याधानस्याङ्गानि तथापि सामवेदे तेषामुत्पन्नत्वादुत्पत्तेश्च शीघ्रं बुद्धि-हेतुत्वात् सामवेद-धर्मेण गेयानीतिचेत्—न, विनियोगस्य प्रबलत्वात्। स च यजुर्वेदे श्रुतः—'यएवं विद्वान् वामदेव्यं गायति,-इति। गुणेन हि मुख्यस्यानुसरणं न्याय्यम्। कोगुणः? किं मुख्यम्? इति चेत् अत्राङ्गित्वादाधानं मुख्यम् साम-गानमंगत्वेन गुणः; तथा सति धर्माः शिरः-इत्यादयः

(१)—षड्विंश-ब्राह्मणस्य चतुर्थ-प्रथमेऽपीदं श्रूयते, परं तत् नत्वेवमक्षरशः; तथा छान्दोग्यस्य चतुर्थ-प्रपाठकीय-सप्तदश-खण्डे, तत्रापि पाठे भेदः।

(२)—पूर्वोक्तमसञ्जात-विरोधित्वेनेति यत्र स्फुटी भविष्यति।

आधानाङ्गभूताः मन्त्राः यथोपांशु पठ्यन्ते, तथा सामान्यप्याधानानुसारेणोपांशु गेयानि ; अथवा विनियोगोऽनुष्ठापक-विधित्वान्मुख्यः, उत्पत्तिविधिस्तथाविधत्वाद् गुणः। तस्मादत्र विनियोग-वेदानुसारेणोपांशु गेयानि"[२५]-इति॥

पञ्चमाध्यायस्य तृतीयपादे चतुर्थ-पञ्चमाधिकरणयोः स्तोम-विचारः। तत्र चतुर्थाधिकरणम्—[२६]"स्तोमवृद्धौ किमागन्तो र्मध्येऽन्ते वास्तु मध्यतः। द्वादशाहवदन्यत्र मध्यानुक्तेर्न मध्यमः। इदमाम्नायते—'एकविंशेनातिरात्रेण प्रजा-कामं याजयेत्, त्रिण-वेनौजस्कामं, त्रयस्त्रिंशेन प्रतिष्ठाकामम्'-(१) इति। तत्र प्रकृतौ बहिष्पवमान-स्तोत्रे त्रयस्तृचा भवन्ति—"उपास्मै गायतेत्यादिः (उ०१प्र०१सू०१।२।२ऋ) एकः—"दविद्युतत्यारुचेत्यादिः (उ०१प्र०२सू०१।२।३ऋ) द्वितीयः—"पवमानस्य ते कवइत्यादिः-(उ०१प्र०३सू०१।२।३ऋ) तृतीयः; तेषु त्रिषु तृचेषूर्ध्वं गानेन त्रिवृत्स्तोमो भवति (२) तत्वत्र पञ्चदश-सप्तदश-स्तोमादीना-मिवावृत्तगानमस्ति, स च बहिष्पवमानोविकृतावतिरात्रे चोद-केन प्राप्तः (३), तत्र त्रिवृत्-स्तोमं बाधितुमेकविंशादि-स्तोमाः विहिताः, बहिष्पवमाने आवृत्तगानाभावात त्रिषु तृचेष्ववस्थि-ताभिर्नवभिरृग्भिरेकविंश-स्तोम-पुरणाभावात् तत-पूरणाय चत्वारस्तृचाआगमयितव्याः, त्रिणव-स्तोम-पूरणाय षट् तृचाः,

(१)—एकविंशस्य स्वरूपभेदादिकन्तु ताण्ड्ये द्वितीय-प्रपाठके चतुर्दशादिषु चतुर्षु खण्डेषु, त्रिणवस्य तु तृतीय-प्रपाठकस्याद्य-खण्ड-द्वये, त्रयस्त्रिंशस्य च तत्परस्तात् खण्ड-चतुष्टये श्रुतम्।

(२)—ताण्ड्य-द्वितीय प्रपाठकाद्य-खण्डत्रये तत्-स्वरूपादिकं श्रुतम्।

(३)—'प्रकृतिवद् विकृतिः कर्त्तव्यः'-इति वचनेनेति यावत्। अतिरात्रश्च विकृति यागः।

त्रयस्त्रिंश-स्तोम-पूरणायाष्टौ तृचाः; ऋचागमनं (१) चोपरि-ष्टाद् वक्ष्यते (२)। तेषां चागन्तूनां मन्त्राणां प्राकृत-वहिष्पव-मान-मध्ये निवेशः कार्य्यः द्वादशाहे तद्दर्शनात्। इति प्राप्ते, ब्रूमः—द्वादशाहे हि वचनमेवमाम्नायते—'स्तोत्रियानुरूपौ तृचौ भवतः, वृषण्वन्तस्तृचाभवन्ति, तत्र उत्तमपर्य्यासः'-इति (३) अयमर्थः—प्राकृतानां वहिष्पवमान-गतानां त्रयाणां तृचानां स्तोत्रियोऽनुरूपः पर्य्यासश्चेति त्रीणि नामानि, तत्र चोदकागतयो-रनुरूप-पर्य्यासयोस्तृचयोर्मध्ये वृषण्-च्छन्दयुक्तास्तृचाः कर्त्तव्या इति, नचैवमतिरात्रे मध्ये निवेशनाय वचनमस्ति। तस्मात् क्रम-क्रममवाधितुमागन्तूनामन्ते निवेशः"२६॥ पञ्चमाधिकरणम् —२७"आर्भवे साम्नआगन्तोरन्ते मध्ये ऽथवाग्रिमः। पूर्ववत् त्रीणि यत्रस्येत्युक्त्या मध्ये निवेशनम्। पूर्वोदाहृतेऽतिरात्रे माध्यन्दिनार्भव-पवमानयोश्चोदक-प्राप्तौ पञ्चदश-सप्तदश-स्तोमौ (४) वाधितुमेकविंशादि-त्रिवृद्-स्तोमो वचनादनुष्ठीयते, तत्र वहिष्पवमानवद्दृगागमनं न भवति किन्तु सामागमेन स्तोम-पूरण मिति दशमे (५) वक्ष्यते, तस्य चागन्तोः साम्नः पूर्वोक्तानामृचा मिवान्ते निवेशनात् पठितानां तृचानां मध्ये तत्साम-चरमे तृचे

(१)—काश्चन ऋच आगमयितव्याः-इति।

(२)—अग्रिमाधिकरणे, 'ब्रूमः-त्रीणि ह वै'-इत्यादिना।

(३)—ताण्ड्यकादश-षष्ठे द्रष्टव्यम्।

(४)—तथाहि—"एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमौ सवने वहतः त्रिवृत्-पञ्चदशौ प्रातः सवनम्, पञ्चदश-सप्तदशौ माध्यन्दिनं सवनम्, सप्तदशैकविंशौ तृतीयं सवनम्"-इति ताण्ड्य-षोडशस्याद्यखण्डः।

(५)—अधिकरमालायाः।

गातव्यम्। इति प्राप्ते, ब्रूमः—'त्रीणि ह वै यज्ञस्योदराणि गायत्री, बृहती, अनुष्टुप् चात्रह्येवावपन्त्यतएवोद्वपन्ति-इति हि विशेषआम्नायते (१)। अयमर्थः स्तोमस्य विवृद्धये साम्न आवापः (२) क्रियते, ह्रासाय चोद्वापः (३), तावुभावावापोद्वापौ गायत्र्यादिष्वेव नान्यत्रेति। 'उच्चा ते जातमन्धसः'-इत्येष माध्यन्दिन-पवमानस्याद्यस्तृचः (उ.१प्र.८सू.१।२।३ ऋ), 'स्वादिष्ठया'-इत्येषः (उ.१प्र१४सू१।२।३ऋ) आर्भव-पवमानस्य, तावुभौ गायत्रीच्छन्दस्कौ तयोरावापः, न तु त्रिष्टुप्-जगती-छन्दस्कयोरन्ययोस्तृचयोः सामावपनीयम्[२७]"-इति॥ ॥ तत्रैव पञ्चदशाधिकरणे स्तोम-विचारः—[२८]"एकस्तोमेऽन्यशब्दः स्याद् बहुस्तोमेऽपि वाग्रिमः। त्रिवृदन्येत्यर्थवादान्नान्यमात्रस्य सम्भवात्॥ अत्र पूर्वोदाहृतोऽन्येनेत्ययमन्य-शब्दः (४) एक-स्तोमके क्रतौ वर्त्तते, कुतः। अर्थवादेन तदवगमात्। 'यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति, यः पञ्चदशः स तं, यः सप्तदशः स तं, य एकविंशः स तम्'-इत्यर्थवादः (५)। अस्यायमर्थः त्रिवृदादयश्चत्वारः स्तोमाः (६) अग्निष्टोमे वर्त्तन्ते, तेषु

(१)—ताण्ड्य-सप्तम-तृतीये द्रष्टव्यम्।

(२)—आवापः आक्षेपः।

(३)—उद्वापः उत्क्षेपः।

(४)—अत्र पूर्वोदाहृत-इत्यनेन मीमांसाग्रन्थस्य पञ्चमाध्याय-तृतीयपाद-चतुर्दशाधिकरणे बोध्यः। अन्य-शब्द-घटितं तद्विवाक्यम् ताण्ड्य-षोडश-प्रथमे, तथाहि—"एष वाव प्रथमो यज्ञानां य एतेनानिष्ट्वाथान्येन यजते गर्त्तपत्यमेव तज्जीयते"-इति।

(५)—ता०१६प्र०१ख०।

(६)—त्रिवृत्१—पञ्चदशः२—सप्तदशः३—एकविंशः४।

त्रिवृत् स्तोमोविकृतिरूपं यं यज्ञमाप्नोति स त्रिवृत्-स्तोमः तं यज्ञं दीपयति प्रकाशयति सर्वतोव्याप्नोतीति। स्तोमान्तरस्या प्रवेशाय त्रिवृतएव सर्वस्मिन् यज्ञ-स्वरूपे व्याप्तावयमेक-स्तोमकः क्रतुर्भवति। एवं पञ्चदशादि-स्तोमव्याप्तिर्योजनीया। तथा सत्यर्थवादादेक-स्तोमकानामेव बुद्धिस्थत्वात् तएवान्यशब्देनो च्यन्ते। एकस्तोमकाश्च षट् शाखादिष्वाम्नाताः त्रिवृदग्नि-ष्टोमोभवति पञ्चदशउक्थो भवतीत्यादयः। तस्मात् तद्विषयो ऽन्य-शब्दः। इति प्राप्ते, ब्रूमः—स तं दीपयतीत्यत्र प्रकाश-कत्वमात्रमुच्यते, तच्च व्याप्तिमन्तरेण सम्बन्धमात्रादप्युपपद्यते, तस्मात् अग्निष्टोम-प्रतियोगितया बहु-स्तोमैक-स्तोम-साधारण-त्वेन श्रूयमाणस्यान्य-शब्दस्य सङ्कोच-हेत्वभावात् सर्व-विषयोऽय-मन्य शब्दः"[१८]-इति॥

सप्तमाध्यायस्य तृतीयपादे तृतीयाधिकरणे सर्वपृष्ठातिदेश-श्चिन्तितः—[१९]"विश्वजित् सर्वपृष्ठः* किमनुवादोरथन्तरम्। बृहता वा समुच्चेयं यद्वा षाडहिकानि षट्। अतिदेश्यानि तत्राद्योमाहेन्द्रादि-चतुष्टये। पृष्ठ-शब्दाच्चोदकेन सर्वेषामिह सम्भवात्। समुच्चयो वा विधये सर्वत्वं बह्नपेक्षया। न तु द्वयो रतः षषां पृष्ठानामतिदेशनम्॥ 'विश्वजित् सर्वपृष्ठोभवति'-

---

* 'पृष्टः'-इति टकारोपधःपाठ० गो० सा० पुस्तकयोः।

इहैव स्पर्शनात्-इति प्रदर्शित-विषयादपि स एवोपलभ्यते, परं न तथापाठ-स्ताण्ड्यब्राह्मण-पुस्तकेषु क्वचिदपि, कम किञ्च तथापाठे जैमिनीयाधिकरणमालायाः षष्ठ-षष्ठपञ्चमे लिखिता 'पृष्ठशब्देन पृष्ठदेशे प्राप्ते'-इत्युक्तिर्विरुध्येत।

इति श्रूयते (१)। तत्र सर्व-पृष्ठ-शब्दोऽनुवादः, कुतः? प्राप्तत्वात्। तथाहि— ज्योतिष्टोमे माध्यन्दिन-पवमानानन्तर-भावीनि माहेन्द्रादीनि चत्वारि स्तोत्राणि सन्ति—"अभि त्वा शूर-नोनुमः"(१प्र,११सू)"कया नश्चित्र आ भुवत्" (१प्र,१२सू) 'तं वो दस्ममृतीषहम्'(१प्र,१३सू)—'तरोभिर्वोविदद्वसुम्' (१प्र,१४सू) इत्येतेषु चतुर्षु सूक्तेषु तानि स्तोत्राणि सप्तदश-स्तोमतामापाद्य गीयन्ते। एकस्मिन् सूक्ते विद्यमानानां तिसृणामृचां ब्राह्मणोक्त-विधानेन सप्तदशधाभ्यासः सप्तदश-स्तोमः, तादृशेषु स्तोत्रेषु पृष्ठ-शब्दः श्रूयते 'सप्तदशानि पृष्ठानि'-इति, तानि पृष्ठानि विश्वजिति चोदक-प्राप्तत्वात् सर्वपृष्ठ-शब्देनानूद्यन्ते-इत्येकः पक्षः। रथन्तरपृष्ठ-बृहत्पृष्ठयोर्ज्योतिष्टोमे विकल्पितयोरिहापि चोदकेन विकल्प-प्राप्तौ सर्व-शब्देन समुच्चयोविधीयते, तथासत्यनुवादकृतं वैयर्थ्यं न भविष्यति-इति द्वितीयः। सर्वत्वं बहुषु मुख्यं न तु द्वयोः, तस्मादनेन सर्वपृष्ठ-शब्देन षट-सङ्ख्याकानि पृष्ठान्यतिदिश्यन्ते, षडहे प्रतिदिनमेकैकं पृष्ठं विहितम्। तानि च पृष्ठानि षट्— रथन्तर-बृहद्-वैरूप-वैराज-शाक्वर-रैवत-सामभिः निष्पाद्यानि (२)। यद्यपि विश्वजितएकाहत्वाद् ज्योतिष्टोम-विकृतित्वमेव न तु षडह-विकृतित्वम्, तथापि सर्व-पृष्ठोक्ति-बलात् तानि षट् पृष्ठान्यतिदिश्यन्ते"[१९]-इति॥

(१)—ताण्ड्य-नवम-तृतीये, परं तत्र नैवं पाठः।

(२)—रथन्तरादय इमे षडेव उह्यगानगतानि।

तत्रैव दशमाधिकरणे स्वर-साम-विकार-चिन्ता— ४०"न विकारा विकारा वा स्वरसामादयो न हि। वैष्णव-न्यायतो मैवमनन्यगति-लिङ्गतः। गवामयने द्वयोर्मास-षट्कयोर्मध्ये (१) वर्त्तमानं (२) विषुवन्नामकं प्रधानभूतमेकमहर्विद्यते (३), तच्च 'दिवा-कीर्त्त्यम', (४) तस्मात् प्राचीनास्त्रयः स्वर-साम-नामकाः अहर्विशेषाः; तथोपरिष्टादपि त्रयः स्वर-सामानः तदेतदभिप्रेत्य श्रूयते 'अभितोदिवाकीर्त्त्यं त्रयः स्वर-सामानः'-इति (५) तेषु च ग्रह (६)-सान्तत्याय सप्तदश-स्तोमादयो धर्माः विहिताः (७), अन्यत्र

(१)—गवामयनं नाम सत्रमस्ति, तच्च द्विविधम्, "तासां दशसु मास्सु शृङ्गाण्यजायन्त (ता-४-१-१)"-इत्यादि-विहितम् दशमास-निष्पाद्यं; "इमौ द्वादशौ मासौ सम्वत्सरमापयामेति (ता-४-१-२)"-इत्यादि-विहितं द्वादश-मास-साध्यञ्च, तत्र शेषविधौ इयमुक्तिः।

(२)—अशीत्युत्तरशतदिनानन्तरम्।

(३)—तथाहि ताण्ड्य-चतुर्थस्य षष्ठ-प्रथमे—"विषुवानेष भवति"-इत्यादि।

(४)—दिवाकीर्त्य-नामक-सामकम्, तथाहि, ताण्ड्य-चतुर्थस्य षष्ठ-द्वादशे—"दिवाकीर्त्य-साम्ना भवति"-इत्यादि। तच्च साम 'भ्राजम्', 'आभ्राजम्' च तत्रैवाग्रे विहितम्— "भ्राजाभ्राजे पवमानमुखे"-इत्यादिना, तद ऊह्यगानस्य द्वितीय-प्रपाठकीय-द्वादशतममाद्यं, विंशतितमञ्चान्त्यम्।

(५)—तथाहि, ताण्ड्यस्य चतुर्थ-प्रपाठकीय-पञ्चम-खण्डे—"त्रयः पुरस्तात् त्रयः परस्ताद् भवन्ति'-इतिप्रकविशेष तत् स्फुटतरं, तथाहि तृतीय-द्वादशे—"त्रयः स्वरसामानः, दिवाकीर्त्त्यमहः, त्रयः स्वरसामानः"-इति। स्वर-नामक-सामानि विद्यन्ते येषु ते स्वरसामानः। तानि च स्वरसामानि आरण्यकार्च्चिकस्य द्वितीय सप्तम्यां 'यज्जायथा अपूर्व्य'-इत्यस्यामृचि उत्पन्नानि आरण्य-तृतीय-प्रपाठकीय-द्वितीयार्द्ध-नवमादीनि षट्।

(६)—ग्रहाः यज्ञीय-पात्र-विशेषाः।

(७)—ताण्ड्यस्य चतुर्थ-प्रपाठक-गत-तृतीय खण्डे—"सप्तदशाभवन्ति"-इत्यादिना।

त्विवं श्रूयते(१) 'पृष्ठः षडहो द्वौ स्वर-सामानौ'-इति। तावेतावह विशेषौ पूर्वोक्तानां स्वरसाम्नां न विकारौ, कुतः! वैष्णव-समानत्वात्,(२)यथावैष्णवशब्दो देवता-रूप-गुण-विधानेन मुख्यवृत्तित्वान्न लक्षणया धर्मानतिदिशति, तथा साम-विशेष-रूप-गुण-विधायकः स्वरसाम-शब्दः। इति प्राप्ते, ब्रूमः अनन्यगति-लिङ्ग-वशात् स्वरसामानौ विकारौ भवतः, तथाहि—षडहौ द्वौ स्वरसामानौ-इत्येवं योऽयमष्टाह उपन्यस्तः तत्र षट्स्वहःसु क्रमेण 'त्रिवृत्' 'पञ्चदशः' 'सप्तदशः' 'एकविंशः' 'त्रिणवः' 'त्रयस्त्रिंशः' इत्येवं स्तोमषट्कं चोदकेन प्राप्तम्, एवं स्थिते तृतीय-षष्ठ-दिवस-गतयोः सप्तदश-त्रयस्त्रिंशयोर्व्यत्यासं * विधाय, सप्तमाष्टमयोरह्नोः सप्तदशस्तोमं सिद्धवत् कृत्य, त्रिषु चरमेष्वहःसु सप्तदश-स्तोम-नैरन्तर्यमर्थवादेनानुवदति। 'यत्

---

* 'त्रयस्त्रिंशयोरर्थव्यत्यासम्'-इति संस्कृतविद्यालयपुस्तकपाठः।

---

(१)—विकृति-यागे।

प्रकृतेरतिदेशो विकृतिः यत्र विशेषरूपमेव कर्त्तव्यं श्रुत्योपदिश्यते, इतरत् सर्वं कर्मान्तरादतिदिश्यते सा विकृतिः। स चातिदेशः प्रत्यक्ष-श्रुति-वचनाद् साम्याद्वा लिङ्गाद् वा अवगन्तव्यः। एतत्सर्वं जैमिनीये सप्तमाष्टमाध्यायाभ्यां बहुधा विचारितम्॥

(२)—वैष्णव-नामके द्वे सामनि, तत्रैकम् उत्तरार्चिकस्य तृतीय-प्रपाठक-गत-द्वितीयार्द्धस्य द्वादश-सूक्त-मूलकम्, ऊहगानस्य विंशति-प्रपाठक-प्रथमार्द्धीयैकविंशतितमम्; द्वितीयं छन्दोनामार्चिकस्य षष्ठ-प्रपाठक-प्रथमार्द्धीय-तृतीय-दशति-गत-पञ्चमर्क्-मूलकम्, ऊहगानस्य विंशति-प्रपाठक-प्रथमार्द्धीय-विंशतितमम्। तदेतद्-द्वय-साम-घटितो विचारो न्यायमालायामष्टमाध्याये षष्ठाधिकरणे गतः, तत्साम्यादित्यर्थः।

तृतीयं सप्तदशमहः तत् त्रयस्त्रिंशस्थानमभिपर्यां हरन्ति'-इति व्यत्यासविधिः, 'त्रयाणां सप्तदशानामनवानतायाः'-इत्यर्थवादः (१)। तत्र यद्यन्तयोरङ्गोः* सप्तदशस्तोमं स्वरसामशब्दोऽति-दिशेत्, तदा नैरन्तर्यमुपपद्यते, नत्वन्यथा। तस्मान्न वैष्णव-न्यायेन गुणः-विधिः किन्तु धर्माणामतिदेशकः[40]"-इति ॥

दशमाध्यायस्य चतुर्थपादे नवमाधिकरणम् — [41]"बाध्यं श्लोकादिनाज्यादि न बाध्यः स्तुति-लिङ्गतः। देशसाम्नोर्विधौ भेदो वैशिष्ट्यात्तु समुच्चयः॥ महाव्रते श्रूयते 'श्लोकेन पुर-स्तात् सदसः स्तुवते, अनुश्लोकेन पश्चात्'-इत्यादि (१)। तत्र श्लोकानुश्लोकादिनामकैः सामभिः (२) प्राकृतान्याज्य-पृष्ठादि-स्तोत्र-गतानि रथन्तर-वामदेव्यादि-नामकानि सामानि बाध्यानि,

* 'यद्यान्तयोरङ्गोः'-इति स० वि० पु० पाठः।

(१) तथाचेत्यादि समस्तं ताण्ड्यस्य गवामयन-सत्र-प्रकरणमाद्यन्त-समालोचने-नावगन्तव्यम् ।

(२) ताण्ड्य-पञ्चम चतुर्थे स्फुटम् । तत्र गेयगानस्यैकादश-द्वितीयस्याद्ये सामनी श्लोकानुश्लोक-संज्ञके, तयोर्मूलं छन्दोग्रन्थस्य पञ्चम-द्वितीय-प्रथमायां चतुर्थी ऋक् ।

(३) स्तवादिपदात् बहुवचनाच्च तत्र च श्लोकानुश्लोक-विधानानन्तर-श्रुतानि यामादीनि बोध्यानि । तत्र छन्दोग्रन्थस्य चतुर्थ-प्रपाठक-प्रथमार्द्धीय तृतीय-दशति-गतायामृच्युत्पन्नम् अरण्यगानस्य तृतीय-प्रथम-तृतीयं साम 'यामम्', किञ्च छन्दआर्चिकस्य पञ्चम-प्रपाठक-द्वितीयार्द्धीय-प्रथम-प्रथमायामृच्युत्पन्नं अरण्यगानस्य-तृतीय-प्रथमे त्रयोदशं साम 'आयुः'-संज्ञकम्, अपरम् आरण्यकार्चिकस्य चतुर्थ-दशति-गतायां 'हरितइन्द्र श्मश्रूणी'त्येतस्यामृच्युत्पन्नम्, अरण्यगानस्य-पञ्चम-प्रथमे द्वाविंशतितमम्-ऋष्याख्यं साम ।

कुतः? 'स्तुवते'-इति प्रकृति-लिङ्ग-दर्शनात्, प्रकृतौ (१) आज्यैः स्तुवते, पृष्ठैः स्तुवते'-इति श्रुतम्। नैतत् सारम्। किमत्र स्तुतिमनूद्य देश-साम-गुणौ विधीयेते? किं वा गुणद्वयविशिष्टा स्तुतिः? नाद्यः, वाक्य-भेदापत्तेः। द्वितीये तु कार्य्यभेदेन बाध्याभावात् समुच्चयः स्यात्"४१-इति॥ ॥तत्रैव दशमे कौत्सादि-साम्नः प्राकृत-साम-बाधकत्वम्— ४२"समुच्चीयेत कौत्सादि यद्वा प्राकृत-बाधकम् *। स्तुत्याभावादादिमोऽन्त्यो लिङ्ग-प्रकरण-द्वयात्॥ विकृति-विशेषे श्रूयते— कौत्सं भवति काण्वं भवति-इति (२), तदेतत् कौत्सादि-नामकं साम प्राकृतेन साम्ना समुच्चीयते, कुतः? प्राकृतस्य स्तुति-लिङ्गस्याभावेन कार्य्यैक्याभावात्। मैवम्, प्रकरणात् क्रत्वङ्गत्वे सति ऋगक्षराभिव्यक्ति-सामर्थ्य-लक्षण-प्राकृत-लिङ्गेन कार्य्यैक्यावगमात्। तस्माद् बाध-

---

* 'प्रकृतिबाधकम्'-इति पाठः रा॰ पुस्तके।

---

(१)—प्रकृतियागे।

यत्र कर्त्तव्यं सर्वं प्रकर्षेण कर्मान्तर-नैरपेक्षेण उपदिश्यते सा प्रकृतिः। तत्र चास्ति मूलावान्तरभेदाद् द्वैविध्यम्। सर्वात्मना कर्मान्तर-निरपेक्षा मूलप्रकृतिः, कतिपयेष्वङ्गेषु कर्मान्तरं चापेक्षते स्वयञ्च कैश्चित् कर्मभिः अपेक्षणीयो भवति सेयमवान्तर-प्रकृतिः, तत्र तिस्रो मूल-प्रकृतयः, ताश्चाष्टमाध्यायस्य प्रथमपादे तृतीयाधिकरणस्य द्वितीयवर्णके विचारिताः॥

(२)—ताण्ड्य-त्रयोदश-नवमादौ। तेषां स्वरूपाणि गेयगानस्य षोडश-प्रथमार्द्धस्य त्रयोदशादीनि त्रीणि सामानि; तेषामाधारभूमिः छन्दोग्रन्थस्य षष्ठ-द्वितीय-प्रथमाया द्वितीया ऋक्।

कम्”[४२]-इति ॥ ॥एकादशे त्वेकाद्युक्तितः प्राकृत-बाधकत्वम्—[४३]“तत् सर्व-बाधकं सर्वमेक-द्व्याद्युक्तितोऽथवा । अविशेषाद्वादिमोऽन्त्यएकाद्युक्ति-विशेषतः ॥ तत् पूर्वोक्तं कौत्सादि-साम-विषयः । तत्र, किं 'कौत्सं' साम प्राकृत सर्व-साम-निवर्त्तकम्, 'काण्वमपि तथेत्येकैकस्य सर्व-निवर्त्तकत्वमुच्यते ? आहोस्विदेक-वचनान्त-निर्दिष्टमेकस्य निवर्त्तकं, द्विवचनान्त-निर्द्दिष्टं द्वयोः, बहुवचनान्त-निर्दिष्टानि बहूनाम् ? तत्र नियामकाभावादाद्यः पक्षः प्राप्नोति, एकादि-वचन-रूपाणां श्रुतीनां नियामकत्वादन्त्यः पक्षोऽभ्युपेयः । तथाहि 'कौत्सं भवति' (१), 'वसिष्ठस्य जनित्रे भवतः' (२) 'क्रौञ्चानि भवन्ति' (३)-इति निवर्त्तकेषु श्रूयमाणानि एक-द्वि-बहुवचनानि निवर्त्यानां तत्सङ्ख्यावत्वं प्रत्यासत्त्या बोधयन्ति, किञ्च एवं सति अबाधित-साम-विषयश्चोदकोऽनुगृहीतोभवति, कृत्स्न-बाधे तु सर्वश्चोदको निरुध्यते; तस्मान्न सर्व-बाधकः”[४३]-इति ॥ ॥ द्वादशे स्तोम-वृद्ध्यवृद्ध्योः प्राकृत-बाधिका—[४४]“स्तोमस्थयोर्वृद्ध्यवृद्ध्योः प्राकृतः किं निवर्त्तते ।

---

(१)—ताण्ड्यस्य तृतीयपञ्चिकायां विभिन्नस्थलयोर्द्दृष्टव्यौ । कौत्स-स्वरूपन्तु ऊह-गानस्य प्रथमप्रपाठक-द्वितीयार्द्धीय-दशमं साम, तन्मूलन्तु उत्तरार्च्चिकस्य प्रथमस्य द्वितीये द्वादशं सूक्तं ; काण्व-स्वरूपन्तु ऊहगानस्य प्रथम-प्रथमान्त्य साम, तन्मूलन्तु उत्तरार्च्चिकस्य प्रथमस्य द्वितीये तृतीयं सूक्तम् ।

(२)—ताण्ड्य-चतुर्द्दशैकादशे । स्वरूपविवरणादिकन्तूक्तमेव ।

(३)—ताण्ड्योनविंशस्य तृतीये । तत् स्वरूपं गेयगानस्य पञ्चदशप्रपाठक-द्वितीयार्द्धस्याष्टम-नवमे सामनी ; तयोराधारभूता ऋक् तु छन्दोग्रन्थस्य पञ्चम-प्रपाठक-प्रथमार्द्धस्य चतुर्थ-दशत्यां पञ्चमी ।

अवृद्धावेव वाच्यः स्यात् सामोत्पत्त्युपयोगतः अवृद्धावुपयोगाय प्राकृतस्य निवर्त्तकम्। वृद्धौ पूर्वोपयोगित्वात् वृद्धौ तु न निवर्त्तकम्। सन्ति वृद्ध-स्तोमकाः अवृद्ध-स्तोमकाश्च विकृति-रूपाः क्रतवः, तत्रोभयत्रापि यानि सामान्युपदिष्टानि तैरतिदिष्टानां साम्नां निवृत्तिः स्यात्, अन्यथा सामोत्पत्ति-वैयर्थ्यात् इति पूर्वपक्षः। सिद्धान्तः स्पष्टार्थः"[४४] ॥ ॥त्रयोदशे स्तोत्रे छन्दोविशेषत आवापः— "[४५]क्वापि स्तोत्रकृचि क्वापि स्यादावापस्तयोर्हतिः। पवमानेषु गायत्र्यादिष्वेवोता विशेषतः। आद्यो नो परिसङ्ख्यानादत्र ह्येवेति तद्विधेः। विध्यन्तराशेषरूपमपूर्वं तद्विधीयते। अवृद्ध-स्तोमकेषु प्राकृतस्यातिदिष्टस्य साम्नउद्वापः, प्रत्यक्षोपदिष्टानामावापः, वृद्ध-स्तोमकेष्वावापः; इति स्थितं पूर्वाधिकरणे। तावेतावावापोद्वापौ यस्मिन् कस्मिंश्चित् स्तोत्रे यस्यां कस्याञ्चिदृचिस्याताम्, कुतः? नियामकाभावात्; इति पूर्वपक्षः। नो खल्वेतद् युक्तम्, एव कारेण प्रकृत-पवमान-व्यतिरिक्तेष्वाज्यादि-स्तोत्रेषु गायत्री-बृहत्यनुष्टुव्-व्यतिरिक्तास्वृक्षुआवापोद्वापयोः परिसङ्ख्यातत्वात्। एवकारश्चैवमाम्नायते—'त्रीणि ह वै यज्ञस्योदराणि यद् गायत्री बृहत्यनुष्टुप् च, अत्र ह्येवावपन्त्यतएवोद्वयन्ति'-इति। ननु माभूतामन्यत्रावापोद्वापौ, विवक्षित-देशेषु कथं प्राप्नुते?-इति चेत्— अनेन वाक्येन तद्विधानात्-इति प्राप्ते ब्रूमः— नचायमर्थवादः, अनन्य-शेषत्वात्। नाप्यनुवादः अपूर्वार्थत्वात्। तस्मात् पवमानेष्वेव गायत्र्यादिषु आवापोद्वापौ"[४५]॥ ॥ चतुर्विंशे तु 'कण्वरथन्तरं' स्व-योनावेव— [४६]"बृहद्रथन्तरैकीय-योनौ कण्वरथन्तरं। रथ-

न्तरस्यैवयोनौ किं स्व-योनावुताग्निमः। चोदकस्याविशेषेण द्वितीयोनाम-साम्यतः। अनङ्गत्वान्नातिदेशः स्व-योनौ पठितत्वतः। वैश्य-स्तोमे पृष्ठ-स्तोत्रे साम-विशेषोविहितः—'कण्व-रथन्तरं पृष्ठं भवति' (१) इति, प्रकृतौ पृष्ठस्तोत्रे बृहद्रथन्तर-सामनी विकल्पिते, 'त्वामिद्धि हवामहे (छ०३-१-५-२)' इतीयसृक् बृहतो योनिः— 'अभि त्वा शूर (छ०३-१-५-१)' इति रथन्तरस्य— 'पुनानः सोम (छ०५-१-३-१)'-इति कण्व-रथन्तरस्य। तत्र बृहद्रथन्तरयोरन्यतरस्य साम्नोयोनौ कण्व-रथन्तरं गेयम्, कुतः? चोदक-प्राप्तयोर्विशेष-नियामकाभावात्। अथवा रथन्तरस्यैव योनौ गेयम्, कुतः? रथन्तरेति-नाम-साम्यस्य धर्मातिदेशार्थत्वेन नियामकत्वात् (२)। नैतद् युक्तम्, बृहद्रथन्तर-साम्नोरेव प्रकृतावङ्गत्वेन विधानम्, न तु तद्योन्योः, अतो नास्ति तयोः (३) अतिदेशतः प्राप्तिः। तस्मात् स्व-योनौ गेयमिति परिशिष्यते (४)। प्राप्तिश्च सामगानामुत्तरा-ग्रन्थ-पाठादवगन्तव्या (५)। एवं सतिश्रुत-हान्यश्रुत-कल्पने न भवि-

(१)—ताण्ड्याष्टादशप्रपाठकस्य षष्ठखण्डे। तत्स्वरूपम् ऊहगानस्य चतुर्थ-प्रथमस्य चतुर्थं साम; तदाधारभूमिस्तु उत्तरार्चिकस्य प्रथम-प्रथम-षष्ठ्याः प्रथमं सूक्तम्।

(२)—प्रकृतिवद् विकृतिः कर्त्तव्येतिशास्त्रादिति यावत्।

(३)—तद्-योन्योः क्व कदा प्राप्तिः स्यात्, यदि प्रकृतियागे तयोः स्तुतिरूपांगत्वेन विधानं, न च तथेति न तयोरत्र विकृतावतिदेशः।

(४)—स्व-योनौ पुनानः सोमेत्यस्यामृचि कण्वरथन्तरं गेयम्, तच्च गेयगानस्य चतुर्दश-प्रथमस्योनविंशतमं साम। कण्वरथन्तरपृष्ठन्तु त्वचनिष्पाद्यम् ऊहे प्रसिद्धम्।

(५)—उत्तराग्रन्थ-पाठस्त्वेवम्—अभित्वेति १,१,११,१; त्वामिद्धिहेति २,१,११,१; पुनानः सोमेति १,१,९,१।

थत:"४६ ॥ ॥ पञ्चविंशे तु कण्वरथन्तरं स्वकीययोरेवोत्तरयोर्गेयम्—४७"सन्देह-निर्णयौ पूर्ववदेवोत्तरयोर्ऋचोः । योनि-त्यागः समस्तेन तृच-शब्देन बाधनात् ॥ 'एकं साम तृचे क्रियते'-इति श्रुतेः कण्वरथन्तर-साम्नः ऋचां त्रयमाश्रयः, तत्रैका स्व-योनिः इतरे स्व-योन्युत्तरे। एवं बृहद्रथन्तर-साम्नोर्द्रष्टव्यम्। तत्र बृहदुत्तरयोः रथन्तरोत्तरयोर्वा अतिदेश-प्राप्तत्वाविशेषेण स्वेच्छया गेयमित्याद्यः पक्षः। नाम-साम्याद्रथन्तरोत्तरयोरेव गेयमिति द्वितीयः पक्षः। प्रकृतात्वचो: * साक्षादङ्गत्वाभावेऽपि साम-द्वारकमङ्गत्वमङ्गीकृत्य चोदक-प्राप्त्या पक्ष-द्वयोपन्यासः। योनि-वदुत्तरयोर्ग्रन्थ-पठितत्वात् स्व-योन्युत्तरयोर्गेयमिति तृतीयः पक्षो राद्धान्तः। (१) बृहद्रथन्तरोत्तरयोः स्व-योन्युत्तरयोर्वा गीयताम्, सर्वथापि स्व-योन्यृक्-त्याग ऋगन्तर-परिग्रहश्च समानः; तथा सति चोदकोऽत्र प्रापकः-इति (२) पूर्वपक्षिणोऽभ्यधिका शङ्का। तृच-शब्दः समानच्छन्दस्कानामेकदेवत्यानामृचां त्रये

---

* 'ऋचः'-इति पाठः रा० पुस्तकस्य ।

---

(१)—पूर्वाधिकरणादत्र विशेषः कोविचारः—इति दर्शयति बृहदित्यादिना।

(२)—अक्षरविशिष्टस्य स्वरादेर्नास्ति सामत्वमपितु स्वरादेरेवेति पूर्वं सिद्धान्तितम्, तथाच पुनान-इति सूक्तस्य दुहान-इति द्वितीयायामृचि अष्टच्छ्रमिति तृतीयायामृचि च कण्वरथन्तर-गानकाले पुनान-इत्याद्यामृचं त्यजत एवेति स्वयोनित्याग ऋगन्तरग्रहौ गले पतित एव, एवञ्च अपरामृचमपि आधारतया ग्रहणे नास्ति वैषम्यमिति प्रकृतिवद्विकृतिरिति चोदकबलात् प्रकृतिभागे श्रुतस्य रथन्तरस्य बृहतश्च योनी अस्य आधारभूते भवितव्ये-इति पूर्वपक्ष्याशयः।

प्रसिद्धः (१); अतस्तृच-श्रुत्या प्रत्यक्षया, चोदक-प्राप्तस्य बाधः-इति राद्धान्ताशयः इति"४७-इति ॥

पञ्चम-पादस्य द्वितीयेऽधिकरणे तिसृष्वित्यग्रिमस्तृचोविवक्षितः—४८"तृचाद्यासु तृचेवाद्ये तिसृष्वित्युच्यतेऽग्रिमः। त्रिच्छन्दस्त्वात् प्राकृतं स्यात् क्रमादत्र तृचोऽखिलः ॥ एक-सङ्ख्यायास्त्रि-सङ्ख्यायाश्च व्यतिषङ्ग-विधानात् 'एकत्रिक-नामकः' कश्चित् क्रतुर्भवति, सचैवं श्रूयते—'अथैषएकत्रिकस्तस्यैकस्यां बहिष्पवानं (२) तिसृषु होतुराज्यम् (३) एकस्यां मैत्रावरुणस्य (४) तिसृषु

(१)—ताण्ड्यादौ।

(२)—एतत्स्वरूपं तदाधार-स्वरूपादिकञ्च पर्वं वर्णितम्।

(३)—"पान्तमावो अन्धसः"-इति छन्दोग्रन्थस्य द्वितीय-द्वितीय-द्वितीये प्रथमा ऋक् अस्यामुत्पन्नानि त्रीणि सामानि श्रुतानि. तानि च गेयगानस्य चतुर्थ-द्वितीये षोडशादीनि 'वैतहव्य'-नामकानि, तत्रान्त्यमोकोनिधनं यद् वैतहव्यं तन्नात्र ग्राह्यं, तिसृष्वित्युक्तेः, अपितु उह्यगानस्य प्रथम-प्रथमे श्रुतमष्टादशमोकोनिधनाख्यमेव ग्राह्यम्, तदाधारभूतस्तृचस्तु उत्तराग्रन्थस्य प्रथम-द्वितीये प्रथम-सूक्तात्मकः, तत्र प्रथमा "पान्तमावो" इत्याद्या छन्दसि श्रुतैव, द्वितीया "पुरुहूतं पुरुष्टुतमित्याद्या, तृतीया "इन्द्रइत्रो"-इत्याद्या। इति प्रथम पर्याये होतुराज्यम्। द्वितीयपर्याये "अयन्तइन्द्रसोम"-इति उत्तराग्रन्थस्य प्रथम-द्वितीये पञ्चमं त्यृचात्मकं सूक्तम्, तत्र तिसृषु गीतमूहग्रन्थस्य प्रथम-द्वितीये द्वितीयं साम दैवोदासाख्यम्। तृतीये "इद ह्यन्वोजसा"-इति उत्तराग्रन्थस्य प्रथम-द्वितीयेत्यृचात्मकं नवमं सूक्तम्, तत्र तिसृषु गीतमहग्रन्थस्य—माधुच्छन्दसाख्यं साम। अत्र प्रमाणं ताण्ड्य-नवम-द्वितीयं खण्डम्।

(४)—अस्ति "प्रवइन्द्रायमादनम्"—इति छन्दोग्रन्थस्य द्वितीय-द्वितीय-द्वितीय-द्वितीया ऋक्, अस्यामुत्पन्नान्ति षट् सामानि, तानि च गेयगानस्य चतुर्थ-द्वितीये ऊनविंशादीनि, तत्र तृतीयं "गौरीवीतं" तदेवात्र प्रथमपर्याये मैत्रावरुणस्य। अस्ति "आतूनइन्द्रक्षुमन्तम्"—इति छन्दोग्रन्थस्य द्वितीय-द्वितीय तृतीये तृतीये ऋक्,

ब्राह्मणाच्छंसिनः (१) एकस्यामच्छावाकस्य (२) तिसृषु माध्यन्दिनः पवमानः'-इति। सन्ति प्रकृतौ माध्यन्दिन-पवमानस्य तयस्तृचाः—'उच्चा ते जातम्'-इत्ययं (उ,१प्र,८सू,२।३ ऋ) प्रथमो-गायत्रीच्छन्दस्कः, 'पुनानः सोम' इत्ययं (उ,१प्र,९सू,१।२।३ ऋ) द्वितीयोबृहतीच्छन्दस्कः, 'प्र तु द्रव'-इत्ययं (उ,११प्र,१०सू,१।२।३ऋ) तृतीयस्त्रिष्टुप्-छन्दस्कः। एतदेवाभिप्रेत्य श्रुतम्, 'त्रिच्छ-

---

अस्यामुत्पन्नानि चत्वारि सामानि, तानिच गेयगानस्य पञ्चम-प्रथमे षोडशदीनि, तत्र तृतीयमाकुपारम्, तदेवात्र द्वितीयपर्य्याये मैत्रावरुणस्य। अस्ति "आत्वेतानिषीदत" इति छन्दोग्रन्थस्य द्वितीय-द्वितीय-द्वितीये दशमी ऋक, अस्यामुत्पन्नं गेयगानस्य पञ्चम-प्रथमे श्रुतं 'दैर्वातिथ'-नामकं साम, तदेवात्र द्वितीये पर्याये मैत्रावरुणस्य। अत्र प्रमाणं ता.९.२। किञ्च "प्रवइन्द्रायेत्याद्या ऋचः सन्ति चोत्तरा ग्रन्थे, सन्ति च तदाधारकानि गानानि तत्तन्नामभिः प्रसिद्धानि ऊहग्रन्थे, परं तान्यत्र न गृह्यन्ते एकस्यामिति श्रवणात्।

(१)—अस्ति "वयमुत्वातदिदर्था:"—इति उत्तराग्रन्थस्य प्रथम द्वितीये तृतीयं तृचम्, तत्र ऊहगानस्य प्रथम-प्रथमान्त्यं काण्वनामकं साम, तदेवात्र प्रथमपर्याये। अस्ति "अभित्वा वृषभासुतः"—इत्याद्याः उत्तराग्रन्थस्य प्रथमद्वितीये सप्तमसूक्तात्मिकास्तृचः, तत्रोहगानस्य प्रथम-द्वितीये पञ्चममार्षभाख्यं साम, तदेवात्र द्वितीयपर्याये। अस्ति "योगेयोगेतवस्तरम्" इत्याद्याः उत्तराग्रन्थस्य प्रथम-द्वितीये एकादश-सूक्तात्मिकास्तृचः, तत्रोहगानस्य प्रथम-द्वितीये श्रुतं दशमं कौत्सनामकं साम, तदेवात्र तृतीयपर्याये गृह्यते।

(२)—अस्ति "इन्द्रायमद्वने सुतम्"—इति छन्दोग्रन्थस्य द्वितीय-द्वितीय-द्वितीये चतुर्थी ऋक्, अस्यामुत्पन्नानि त्रीणि सामानि, तानि च गेयगानस्य चतुर्थ द्वितीये सप्तविंशत्यादीनि, तत्र, तृतीयं श्रौतकक्षाभिधं साम, तदेवात्र प्रथम-पर्याये। अस्ति "इदं वसो सुतमन्धः"—इति द्वितीय-प्रथम-तृतीयायां दशमी ऋक्, अस्यामुत्पन्नानि त्रीणि "गार"-नामकानि गेयगानस्य तृतीय-द्वितीये एकविंशत्यादीनि सामानि, तत् तृतीयमिह द्वितीय-पर्याये, ऊहग्रन्थे प्रथम-द्वितीये तस्यैव गारमिति प्रथितत्वात्।

न्द्राआवापोमाध्यन्दिन:'-इति (१)। एवं सति एकत्रिकस्य माध्यन्दिन-पवमाने तिसृष्विति यदुक्तं तत्र त्रयाणां तृचाना-माद्यास्तिस्रः ऋचो ग्राह्याः? किं वा प्रथम-तृच-स्थाः क्रम-पठितास्तिस्रः? इति संशयः। तत्र त्रिच्छन्दस्त्व-श्रुत्या प्रबलया दुर्बलं पाठ-क्रमं बाधित्वा प्रथम-पञ्चो ग्राह्यः—इति प्राप्ते, अभिधीयते—यदेतत् त्रिच्छन्दस्त्वं तदेतत् प्राकृतम्, तत्र छन्दस्त्रयोपेतस्य तृच-त्रयस्योपदिष्टत्वात्। विकृतावपि तत्सर्वमतिदिष्टमिति चेत्— वाढम्! अतएव पाठ-क्रमोऽप्यतिदिष्टः, तथासति प्रक्रान्त-गायत्री-छन्दस्कस्य-तृचस्य समाप्तौ सत्यां पश्चाद् बृहतीच्छन्दस्के तृचे प्रथमायाः ऋचः प्रारम्भावसरः स चारम्भस्तिसृषु-इति विशेष-विधानेन बाध्यते; तस्मादाद्यस्तृचोनिखिलोग्राह्यः"[४८] (२)॥ ॥ तृतीये धूर्गानमेकस्यामृचि कर्त्तव्यम्—[४९]"तृचे स्याद्दृचि वैकस्यां धूर्गानं प्रकृताविव। तृचे भवेद्दिहैकस्यां श्रुत्यावृत्ति-विधानतः। एकत्रिकएव क्रतौ व्यति-

---

अस्ति "इन्द्रसुतेषु सोमेषु"—इति छन्दोग्रन्थस्य चतुर्थ-द्वितीये पञ्चम्यां प्रथमा ऋक्, अस्यामुत्पन्नानि त्रीणि सामानि, तानि च गेयगानस्य दशम-प्रथमे चतुर्विंशत्यादीनि, तत्र तृतीयं "कौत्स"-नामकं, तदेवात्र तृतीयपर्याये ग्रहणीयं भवति। अत्र सर्वत्र मानं ताण्ड्यनवमद्वितीयमार्षेयञ्च ब्राह्मणम्।

(१)—तदेतत् स्फुटं ताण्ड्यसप्तमतृतीये, तथाहि "त्रिभिश्च छन्दोभिः"—इत्यादि, "त्रिभिः गायत्री त्रिष्टुब् बार्हतैरिति तद्भाष्यम्।

(२)—तत्र "उच्चातेजातमन्धसः"-इत्यादिः प्रथमा, "सनइन्द्राय यज्यवे"-इति द्वितीया, "एनाविश्वान्यर्यआ"-इति तृतीया ऋक्। गानञ्चैतत् ऊहगानस्य द्वादश प्रथमस्य प्रथमं प्रसिद्धम्। त्रिच्छन्दस्त्वन्तु त्रिभिःपर्यायैरुपपद्यते नत्वेकस्मिन्नेव पर्याये इति सिद्धान्ताशयः।

प्रकृत्येकस्यां च स्तोत्रेषु सम्पाद्यमानेषु यद्धूर्गानं तत् किं तृचे स्यात्? उतैकस्यामृचि?-इति संशयः। तत्र चोदकेन तृचे भवेदिति प्राप्ते, ब्रूमः—इहैकत्रिक-क्रतौ एकस्यामृचि धूर्गानं भवेत्, कुतः? 'आवृत्तं धूर्षु स्तुवते'-इति आवृत्ति-विधानात्। तृचे गानेऽपि साम्नस्त्रिरावृत्तिर्भवेत्? न, आवृत्तेः स्तुति-विशेषणत्वात्। गुण-सङ्कीर्त्तन-परः पद-समूहः स्तुतिः, तच्च ऋगावृत्तिं विना तिसृष्वृक्षु न सिध्यति। तस्मादेकस्यां धूर्गानम्"[४९]॥ ॥षष्ठे स्तोम-वृद्धिरागमाद् भवेत्—[५०]"स्तोम-वृद्धिः किमभ्यासादागमाद्वाग्रिमो यतः। न काल्पमश्रुतं मैवं सङ्ख्यावापादि-लिङ्गतः। विवृद्ध-स्तोमकः क्रतुरेवमाम्नायते,—'एकविंशेनातिरात्रेण प्रजा-कामं याजयेत्, त्रिणवेनौजस्कामम्, त्रयस्त्रिंशेन प्रतिष्ठा-कामम्' इति। प्रकृतिगतेभ्यः (१) त्रिवृत्-पञ्चदशादिस्तोमेभ्यो विवृद्धाः एकविंश-त्रिणव-त्रयस्त्रिंश-स्तोमाः (२), तेषु किं प्राकृतानां (३) साम्नाम् अभ्यासाद् वृद्धिर्भवति? किं वा सामान्तरागमात्?-इति संशयः। अश्रुतस्य सामागमस्य कल्पयितुमशक्यत्वाद् अभ्यासाद् वृद्धिः-इति प्राप्ते, ब्रूमः—(४)-अभ्यासोऽपि न साक्षाच्छ्रुतः, किन्त्वेकविंशादि-सङ्ख्या-

(१)—प्रकृतियागो ज्योतिष्टोमादिः तद्गतेभ्यः।

(२)—एषामुपजनिः ताण्ड्य-षष्ठ-द्वितीयादौ। अत्र ताण्ड्य-दशम-प्रथमस्थानि वाक्यानि ध्येयानि, तथाहि—"आदित्य एवैकविंशस्यायतनम्"-इत्यादि, "त्रिवृद्देव त्रिणवस्यायतनम्"-इत्यादि, "देवता एव त्रयस्त्रिंशस्यायतनम्"-इत्यादि।

(३)—प्रकृतियागगतत्रिवृदादिस्तोमसूलकानाम्।

(४)—यदुक्तं पुरस्तात् पञ्चमाध्याय-तृतीयपाद-पञ्चमाधिकरण-व्याख्याने" किन्तु सामागमेन स्तोमपूरणमिति दशमेवक्ष्यते"-इति तदेवात्र अभ्यासोपीत्यादिना वक्ति।

पूरणाय कल्पते, सङ्ख्या च द्रव्य-गता, भिन्न-द्रव्यैरेव पूर्य्यते नत्वेकद्रव्यावृत्त्या, नह्यष्टकृत्वएक-घटमानीय मन्त्र हे सन्त्यष्टौ घटाः-इति व्यवहरन्ति; ततः स्तोमावयव-द्रव्यगता सङ्ख्या तदवयवभूतानां साम्नां पदार्थानां भेदं गमयति, स च भेदः सामान्तरागम-लिङ्गम्; अत्र ह्येवावपन्तीत्यावापोद्देशेन देशविशेष-विधिरपरं लिङ्गम्— सामान्तरोत्पत्त्यर्थमन्यल्लिङ्गम्; तस्मादागमेन वृद्धिः"[५०] (१)॥

सप्तमे बहिष्पवमान-वृद्धावृचआगमः—[५१]"किं बहिष्पवमानवृद्धौ साम्नर्चा वाभिपूरणम्। साम्ना पूर्वोक्तितोमैवं सामैकत्व-परा-कृतः॥ प्रकृतौ प्रातः सवने बहिष्पवमानस्य अविवृद्धः स्तोमः, तस्य विकृतिषु वृद्धौ सत्यां पूर्वोक्त-रीत्या सामान्तरागमे प्राप्ते, ब्रूमः—'एकं हि तत्र साम'-इति बहिष्पवमानं प्रकृत्य सामैकत्व माम्नायते, अतो न सामान्तरागमः सम्भवति। एवं तर्ह्य-भ्यासेन सङ्ख्या-पूरणमस्तु- इति, न वाच्यम्, 'पराग् बहि-ष्पवमानेन स्तुवन्ति'-इति (२) पराक्-शब्देनाभ्यास-प्रतिषेधात्; तस्मादृगागमः"[५१]॥

---

(१)—ताण्ड्यस्य द्वितीयप्रपाठक-चतुर्दशादि-खण्डत्रयाणां तृतीयप्रपाठक-प्रथमादि-सप्तखण्डानाञ्च परिदर्शनात्, अपिच "वर्द्धमानेषु स्तोमेषु प्रथमस्य पर्यायस्य प्रथमा तृचभागा तस्यास्त्रिर्वचनम्, मध्यमावापस्थानम्, उत्तमा परिचरा तृचभागावाप-स्थानम्"-इति लाट्यायन-सूत्रपर्यालोचनात्, एष विचारो भवेद् बोधविषयोऽविवादः।

(२)—श्रुतिपाठस्तु नैवम्, परमर्थत एषएव, तथाहि—"अमुष्मै वा एतल्लोकाय स्तुवन्ति यद् बहिष्पवमानम् सकृद्धि हताभिः पराचीभिः स्तुवन्ति"-इत्यादिः, परा-चीभिर्बहिष्पवमानीभिः स्तुवते"-इत्यादिश्च ताण्ड्य-षष्ठाष्टमे।

षष्ठपादस्याद्येऽधिकरणे एकं साम तृचे गेयम्—[५२]"सामैकस्यां तृचे वास्यादाद्यः स्वाध्यायवद् भवेत्। वचनाल्लिङ्ग-संयुक्तात् स्तोत्रे साम तृचे भवेत् पवमानाज्य-पृष्ठादि-स्तोत्रेषु यद् विहितं रथन्तर-बृहद्-वैरूपादि-साम अध्येतारः एकस्यामृच्यधीयते, तत् किं स्तोत्र-प्रयोग-कालेऽप्येकस्यामृचि गेयम्? किं वा तृचे गेयम्?-इति संशयः (१) अध्ययनस्यानुष्ठानार्थत्वाद् यथाध्ययनमेकस्यामृचि साम्नः कृतं तथैकस्यामेव साम गेयम् * इति पूर्वपक्षः।

---

* "यथाध्ययनमेकस्यामृचि सामगेयम्"-इति न्यून-पाठः गौ० सा० पुस्तकयोः।

---

(१)—अत्रेदं तत्त्वम्—अस्ति छन्दोग्रन्थस्य तृतीय-प्रथम-पञ्चम्यां प्रथमा ऋक्, तस्यां गीतं रथन्तरम्, तच्च अरण्यगानस्य द्वितीय-प्रथमे एकविंशतितमं साम; तथा छन्दोग्रन्थस्य तृतीय-प्रथम पञ्चम्यां-द्वितीया ऋक्, तस्यां गीतं बृहत् तच्च अरण्यगानस्य प्रथम-प्रथमे सप्तविंशतितमं साम; तथा छन्दोग्रन्थस्य तृतीय-द्वितीय-चतुर्थ्यां षष्ठी ऋक्, तस्यां वैरूपसंज्ञकान्यष्टौ सामानि, तत्र प्रथमम् अजोवैरूपम्, द्वितीयं ह्रस्ववैरूपम्, तृतीयं दृढदोपश्वैरूपं पञ्चनिधनवैरूपं वा, चतुर्थम् षण्णिधन वैरूपम्, पञ्चमं सप्तनिधनवैरूपम्, षष्ठम् अष्टानिधनवैरूपम्, सप्तमं द्वादश निधनवैरूपम्, अष्टमम् पुष्यवैरूपम्; (अत्र मानमार्षेयब्राह्मणस्य तृतीयप्रपाठकाष्टमखण्डम्) तानि च अरण्यगानस्यारम्भे एव श्रुतानि। एवम् अस्ति उत्तराग्रन्थस्य प्रथम-प्रथमैकादशे प्रथमस्तृचः, तत्र च गीत रथन्तरम्, तद्धि ऊह्यगानस्यादिमं साम; तथा उत्तराग्रन्थस्य द्वितीय-प्रथम-द्वादशे प्रथमस्तृचः, तत्र च गीतं बृहत्, तद्धि ऊह्यगानस्य प्रथम-प्रथमे पञ्चमं साम; तथा उत्तराग्रन्थस्य द्वितीय-द्वितीयैकादशे प्रथमस्तृचः, तत्र च गीतं "(पञ्चनिधनं) वैरूपम्", तद्धि ऊह्यगानस्य प्रथमे सप्तमं साम। तदत्र रथन्तरं गेयमिति विहिते अरण्यगाने श्रुतं छन्दोग्रन्थीयैकस्यामृच्युत्पन्नं गातव्यमाहोस्वित् ऊह्यगाने श्रुतम् उत्तराग्रन्थीयतृचबीजकं गातव्यमिति शङ्कास्वरूपः। एवं बृहद्वैरूपयोरन्यत्र च बोध्यम्।

'अष्टाक्षरेण प्रथमायाः ऋचः प्रस्तौति, द्व्यक्षरेणोत्तरयोः'-इति(१) तिसृष्वृक्षु प्रस्तोत्रा गातव्य-भागो निरूप्यते, तदिदं तृचस्य लिङ्गम्—'ऋक्सामे वाव मिथुनौ सम्भवाव'-इत्यादौ ऋग्देवता-सामदेवतयोः संवाद-रूपेऽर्थवादे साम-देवतैकामृचं द्वे ऋचौ च प्रत्याख्याय तिस्रः ऋचोऽङ्गीचकार, तदिदम् अपरं लिङ्गम्; ताभ्यां लिङ्गाभ्यामुपबृंहिताद् 'एकं साम तृचे गीयते स्तोत्रियम्'-इतिवचनात् तृचे गातव्यमिति" ५२॥ ॥द्वितीये स्वर्दृक्-शब्दो मीलनावधिः—५३"स्वर्दृक-शब्दे वीक्षणे च किं स्यादङ्गाङ्गिताथवा । मीलनावधितायोस्तु भिन्न-वाक्येन तद्विधिः । प्रतिशब्देनावधिर्हि द्योत्यो वाक्यं न भिद्यते । सत्येवं मीलनस्यापि विधिर्नोत्तरयो र्भवेत् । अस्ति रथन्तर-साम्नोयोनौ 'अभित्वाशूर'-इत्यस्यामृचि स्वर्दृक्-शब्दः 'ईशानमस्य जगतः स्वर्दृशम्'-इत्याम्नातः (२) अस्ति चोद्गातुः कर्तृता तृचे 'रथन्तरे प्रस्तूयमाने सम्मीलयेत्

(१)—नैवमानुपूर्विकः श्रुतिपाठः; तथाहि—"पशवो वै बृहद्रथन्तरे अष्टाक्षरेण प्रथमाया ऋचः प्रस्तौत्यष्टाशफांस्तत् पशूनवरुन्धे, द्व्यक्षरेणोत्तरयोर्ऋचोः प्रस्तौति द्विपाद् यजमानो यजमानमेव यज्ञे पशुषु प्रतिष्ठापयति, पञ्चाक्षरेण रथन्तरस्य प्रतिहरति पाङ्क्तांस्तत् पशूनवरुन्धे"-इति ताण्ड्य-सप्तम-सप्तमाद्योभागः ।

(२)—तद्यथा,

२ १ २ २ १ २ २ १ २
"अभि त्वा शूर नोनुमो दुग्धाइव धेनवः ।

१ २ २ १र २र २ २२ १ २ २ १ २
ईशानमस्यजगतः स्वर्दृशमीशानमिन्द्रतस्थुषः"-

इति छन्दोग्रन्थस्य तृतीय-प्रथम-पञ्चम्यां प्रथमा ऋक्, इयमेव उत्तराग्रन्थस्य प्रथम-प्रथमैकादशस्य तृचस्याद्या । अरण्ये यद् गीतं तदेकर्ङ्मूलकत्वात् एकर्चं रथन्तरम्, यच्च ऊह्य-प्रथम-प्रथमे गीतं तत्तृचमूलकत्वात् तृचं रथन्तरमिति व्यपदिश्यते

स्वर्दृशं प्रति वीक्षेत'-इति (१) श्रुतेः। तत्र संशयः। किं स्वर्दृक्-शब्दोच्चारण-वीक्षणयोरङ्गाङ्गिभावोऽत्र विधीयते ? किं वा विधीयमान-सम्मीलनावधित्वेन स्वर्दृक्-शब्दोच्चारणं निर्दिश्यते ? इति। तत्र सम्मीलन-वाक्याद् वीक्षण-वाक्यं भिन्नं ततो न मीलनावधित्वेनान्वयः सम्भवतीति। किञ्च वीक्षेतेति लिङ्-प्रत्ययोऽत्र विधायकः श्रूयते, ततः स्वर्दृक्-शब्दोच्चारणं वीक्षणाङ्गम्, वीक्षणं वा तदङ्गम्-इत्यङ्गाङ्गिभावोऽभ्युपेयः (२)। तथा सति स्वर्दृक्-शब्दरहितयोर्ऋचोर्गीयमाने रथन्तरेऽपि विहित-सम्मीलनानुवृत्तिः फलिष्यतीति पूर्वपक्षः। स्वर्दृशंप्रतीत्यनेन कर्मप्रवचनीयेन (३) प्रतिशब्देन स्वर्दृक्-शब्दोच्चारणस्य मीलन कालावधित्वं द्योत्यते। न चात्र भिन्न-वाक्यत्वम्, एक-वाक्यत्वसम्भवात्। तथाहि विरोध-परिहाराय स्वतएव प्राप्तत्वाद् वीक्षणं न विधेयम्। तथा सति आ स्वर्दृक्-शब्दोच्चारणात् सम्मीलयेदित्येकं वाक्यं सम्पद्यते। एवंसत्युत्तरयोर्ऋचोर्मीलन-विध्यभावः फलिष्यतीति राद्धान्तः"५२ (४)॥ ॥ तृतीये बृहद्रथन्तरयोर्दिन-भेदेन

---

(१)—ताण्ड्य-सप्तम सप्तमे। अस्याएव श्रुतेः सम्मीलयेदित्यन्त नवमाध्याय-द्वितीय-पाद-पञ्चदशाधिकरण-व्याख्यायां (४२४०) पुरस्तादुपन्यस्तमेकदा।

(२)—अयमेवाङ्गाङ्गिभावः शेषशेषीभावो-गुणगुणीभावश्चेत्युच्यते। यद् यस्योपकारकं तत्तस्याङ्गम् इत्यङ्गलक्षणं शेष-लक्षणञ्च; तदाह—"शेषः परार्थत्वात् (जै३,१,२)"

(३—"लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः (१,४,९०) इति पाणिनिस्मरणात, अत्र लक्षणेऽर्थे कर्मप्रवचनीय-सञ्ज्ञा, तथाच स्वर्दृशशब्दं संलक्ष्य यावत् स्वर्दृशमिति न गीयते तावत्कालं सम्मीलनेन भाव्यमिति तस्याः श्रुतेरर्थः सम्पद्यते।

(४—परमतार्थे ताण्ड्य भाष्य-विरोधो हठात् प्रतीयते, तथाहि—"तस्मिन् प्रस्तूयमाने चक्षुः 'सम्मीलेत्' मुकुलितं कुर्यात्, पुनः 'स्वर्दृश' स्वर्दृशमिति पदं गीयमानं 'प्रतिवीक्षेत' अवलोकयेत्"-इति (ता-७-७)।

प्रयोगः—[१९]"गावामयनिके * पृष्ठ्यः षडहे प्रत्यहं द्वयं। बृहद्रथन्तरं चोत भवेत् किञ्चित् क्वचिद्दिने। द्वन्द्व-गर्भ-बहुव्रीहे र्वाद्योऽन्त्येऽपि समोह्यतौ। अन्योन्य-निरपेक्षस्य चोदकादन्ति-मोभवेत्। द्वादशाहे (१) पृष्ठ्यः षडहउत्पन्नः (२) तत्र षण्णामप्यह्नां क्रमेण रथन्तर-बृहद्-वैरूप-वैराज-शाक्वर-रैवतानि सामानि (३) विहितानि (४)। गवामयने (५) तु विकृतिरूपोयः

* "गावामायनिके" इत्युभयपदवृद्धि पाठः गौ पुस्तके ।

(१)—द्वादशाहस्तावद् द्विविधः, सत्रात्मकोऽहीनात्मकश्च ; पुनरपि प्रत्येकं द्वेधा समुढोव्यूढश्च, यत्र कामव्यूहनाभावः स आद्यः तदन्योद्वितीयः। इह सत्रात्मकः ताण्ड्य दशम-तृतीयखण्डादिना विहितः, संवत्सरसाध्यो ग्राह्यः। तत्र च अहःशब्देन सवन-त्रयात्मकः सोमयागः, तं द्वादशाह-संज्ञं सोमयागसमृद्धिकामोऽत्यतिष्ठदिति स्फुटम् ।

(२)—संवत्सरसाध्यस्य यागमात्रस्य द्वौ षडहौ भवतः अभिप्लवः पृष्ठ्यश्चेति ; तत्र एकस्मिन् मासि आभिप्लविव-षडहाः चत्वारः, पृष्ठ्यः षडहः एकः, इत्थं षडह-पञ्चकेस्त्रिंश-द्दिनानि भवन्ति। स्पष्टमेतत् ताण्ड्य-चतुर्थ-प्रथम-खण्डादौ।

(३)—पृष्ठ्यडहे याः स्तोत्रियाः सामानि च, तेषामसाङ्कर्याय प्रत्यहं विभिन्नानि रूपाणि ताण्ड्य-दशमाध्याय-षष्ठ-खण्डानन्तरं षड्भिः खण्डैः प्रदर्शितानि, तत्रादितस्त्रिभिः स्तोत्रियाणां रूपाणि, ततस्त्रिभिः साम्नां रूपाणीति विवेकः।

(४)—एतदाकाराः ऊह्यगानस्य प्रथम-पञ्चम-सप्तम-दशम-पञ्चदशाष्टादश-संख्यक गानदर्शनाद्बोध्याः।

(५)—गवामयननामकं सत्रमस्ति, तच्च द्विविधम् ; "गावो वा एतत् सत्रमासत तासां दशसु मास्सु शृङ्गाण्यजायन्त"-इत्याद्याख्यायिकया दशमासनिर्वर्त्त्यम् ; तासां द्वादशसु मास्सु शृङ्गाणि प्रावर्त्तन्त"-इत्याद्याख्यायिकया द्वादशमासनिर्वर्त्त्यञ्च ; श्रूयते चैतत् समस्तं ताण्ड्य-चतुर्थ-प्रपाठकारम्भ-खण्डे। तत्र अहर्नियमस्त्वेवम्—प्रायणीयोऽतिरात्रः प्रथममहः, चतुर्विंशो द्वितीयमहः, उक्थस्तृतीयमहः ज्योतिगा-चतुर्थमहः, आयुर्गौरिति पञ्चममहः, आयुर्ज्योतिरिति षष्ठाहः, एषएव षडहः आभिप्लवि-

पृष्ठ्यः षडहः, तत्र श्रूयते— “पृष्ठाः षडहो बृहद्रथन्तरसाम,”-इति चोदक-प्राप्तयोः बृहद्रथन्तरयोः पुनर्विधानात् वैरूपादि-निवृत्तिः। ततः श्रियमाणं बृहद्रथन्तरं सामद्वयं किं प्रत्यहं कर्तव्यम्? किं वा केषुचिदहःसु बृहत्, केषुचिद्रथन्तरम्?-इति

---

कउच्यते ; एवं चतुर्भिराभिप्लविकैश्चतुर्विंशत्यहानि भवन्ति, ततः त्रिवृत्-स्तोम-साध्यः एकाहः पञ्चदशस्तोम-साध्यो द्वितीयाहः, सप्तदश-स्तोम-साध्यस्तृतीयमहः, एकविंश-स्तोम-साध्यश्चतुर्थाहः, त्रिणव-स्तोम-साध्यः पञ्चमाहः, त्रयस्त्रिंश-स्तोम-साध्यः षष्ठाहः, सोऽयं षडहः पृष्ठ्य उच्यते ; पूर्वविहित आभिप्लविकषडहचतुष्टयैः सहास्य योगे त्रिंशद्दिनात्मक एक मासः सम्पन्नः। द्वितीय-तृतीय-चतुर्थ-पञ्चम-मासास्त्वेवमेव। षष्ठमासस्याद्याष्टादश-दिनानि आभिप्लविकषडहत्रयात्मकानि, ऊनविंशत्याद्यः पृष्ठ्यः षडहः-इति चतुर्विंशतिः, पञ्चविंशतितममहोऽभिजित्, ततस्त्रीणि दिनानि प्रथमादि-स्वर-साम-त्रय-साध्यानि, ऊनत्रिंशत्तमाहः प्रायणीयः, त्रिंशत्तमश्चतुर्विंशाख्यकम्। इत्थं मब्दस्य पूर्वार्द्धं वृत्तम्। उत्तरषण्मासानां प्रथममासस्य प्रथममहस्तृतीयस्वरसामसाध्यम्, द्वितीयमहो द्वितीय-स्वरसामसाध्यम्, तृतीयमहः प्रथम-स्वरसाम साध्यम्, चतुर्थमहो विश्वजिदाख्यम्, (पञ्च-मादीनि षट् दिनानि पृष्ठ्य-संज्ञकानि तत्र) त्रयस्त्रिंशस्तोमसाध्यं पञ्चममहः, त्रिणव-स्तोमसाध्यं षष्ठमहः, एकविंशस्तोमसाध्यं सप्तममहः, सप्तदशस्तोमसाध्यमष्टममहः, पञ्च-दशस्तोमसाध्यं नवममहः, त्रिवृत्स्तोमसाध्यं दशममहः, ततोऽभिप्लवाः षडहास्त्रयः-इत्य-ष्टाविंशतिः, ऊनविंशतममहो महाव्रताख्यं, अन्तिमोवाप्यश्च त्रिंशत्तमम्। द्वितीया-दिषु मासचतुष्टये प्रथमदिनषट्कं पृष्ठ्यषडहः ततः पूर्वोक्त-प्रतिलोमेनानुष्ठिताश्चत्वारः आभिप्लविकाः षडहाः अन्त्यमासस्य त्रयोऽभिप्लविकाः षडहाः प्रथमाः, तथाचाष्टादश-दिनानि निष्पन्नानि, गौष्टोमसाध्यमूनविंशतितमम्, आयुष्टोम-साध्यं विंशतितमम् दश-रात्रस्थदिवसादश इति त्रिंशत्। इत्थमुत्तरार्द्धमब्दस्य। अनयोर्मासषट्कयोः सन्धिस्था-नम् अशीत्युत्तरशतदिनानन्तरम् अशीत्युत्तरशतदिनापुरस्ताच्च विद्यमानमहः विषुवन्ना-मकम्, तदिदमेकषष्ट्युत्तर-त्रिंशद्-दिन-निर्वर्त्यं गवामयनं सत्रं ताण्ड्यस्य ब्राह्मणे चतुर्थप्रपाठकेन विहितम् ; विस्तरश्च ततः परः परः। तदयं श्लोकः—“शतानि त्रीणि षष्टिश्च विषुवांश्च चतुर्थके। प्रोक्तानि गव्यसत्रस्य सुत्याहानि क्रमादिह”।

संशयः । बृहच्च रथन्तरञ्च बृहद्रथन्तरे ते च सामनी यस्य इति द्वन्द्व-गर्भिते बहुव्रीहावितरेतरयोग-द्वन्द्वेन साहित्यं प्रतीयते, ततः प्रत्यहं सामद्वयम्—इति पूर्वपक्षः। ते सामनी यस्याह्नः-इ त्यह्नोय व्यन्यपदार्थत्वं तदा भवदुक्तमेव स्यात्, इह तु षडहोऽन्य पदार्थः; तथासति षडहे द्वयोः साम्नोः साहित्यं सिद्धान्तेऽपि समानम्। प्रकृतौ साम्नोरन्योन्य-निरपेक्षत्वादिहापि निरपेक्षत्वमेव साम-चोदकेनातिदिश्यते। तस्मात् केषुचिदहःसु किञ्चित साम-इति राद्धान्तः"[५३] ॥ ॥पञ्चमे सर्वपृष्ठे यथोक्तदेशे पृक्तानि—"किं सर्वपृष्ठे सर्वाणि पृष्ठदेशे यथोक्ति वा। पृष्ठ-शब्दात् पृष्ठ-देशे वचनात् तु व्यव-स्थितिः ॥ इदमाम्नायते—'विश्वजित् सर्वपृष्ठः'-इति। षडहे षट्स्वहःसु क्रमेण 'रथन्तरं' 'बृहद्' 'वैरूपम्'-इत्यादिभिः सामभिः पृष्ठ-स्तोत्रं, निष्पादितम् तानि सर्वाणिपृष्ठ-सामानि यस्मिन् वि-श्वजिति सोऽयं सर्व-पृष्ठः; तत्र माध्यन्दि न-पवमान-मैत्रावरुण-साम्नोरन्तरालभूते पृष्ठस्तोत्रदेशे किं सर्वाणि पृष्ठ-सामानि कार्याणि ? किं वा यथावचनं देश-व्यवस्था ?-इति संशयः। पृष्ठ-कार्य्य-गमकेन पृष्ठ-शब्देन पृष्ठ-देशे प्राप्ते, वचनेन देश-विशेषोव्यवस्थाप्यते, वचनं चैवमाम्नायते—'पवमाने रथन्तरं करोत्याभवे बृहन्मध्य-इतराणि वैरूपं होतुः पृष्ठं वैराजं ब्रह्म-साम शाक्करं मैत्रावरु-णस्य रैवतमच्छावाकस्य'-इति; वचनं हि न्यायाद् बलीयः, तस्माद्देशविशेषो व्यवस्थितः"[५४]॥ ॥ षष्ठेवैरूप-वैराजे उक्‌थ-षोड़शिनोः पृष्ठ-गते—[५५]"कार्त्स्न्याद् वैरूप-वैराजे उक्‌थ-षोड़शिनोरुत। पृष्ठे स्यात् क्रतु-संयोगादाद्योन्त्यः पृष्ठ-लिङ्गतः ॥ इदमाम्नायते—'उक्‌थी वैरूपसामैकविंशः षोड़शी वैराजसामेति। तत्र

क्लृप्ते उक्थे 'वैरूपं' साम, क्लृप्ते षोड़शिनि 'वैराजम्'; 'वैरूपं' साम यस्मिन्नुक्थे क्रतौ—'वैराजं' साम यस्मिन् षोड़शिनि क्रतौ-इत्येवं क्रतु-सम्बन्धः प्रतीतेः। मैवम्। प्रकृतौ रथन्तर-साम बृहत्साम-इत्येवंविधस्य निर्द्देशस्य पृष्ठ-स्तोत्र-विषयत्व-दर्शनादत्रापि तन्निर्द्देशेन पृष्ठ-लिङ्गेन पृष्ठ-कार्यं वैरूपं वैराजं च भवितुमर्हति; क्रतु-सम्बन्धस्तयोः पृष्ठ-द्वारेणोपपद्यते"[५५]॥ ॥सप्तमे त्रिवृदग्निष्टुति स्तोमएव—[५६]"त्रिवृदग्निष्टुदित्येतत् सर्वत्र स्तोमएव वा। आद्यस्त्रैगुण्य-वाचित्वादन्त्य-स्तोमेऽस्य रूढ़ितः। एवं श्रूयते—'त्रिवृदग्निष्टुदग्निष्टोमः'-इति (१)। किं त्रिवृत्वमग्निष्टुति क्रतौ सर्वेषु साधनेषु संबध्यते? किं वा स्तोम-मात्र-सम्बन्धि तत्? त्रिवृद्रज्जुरित्यादौ त्रिवृच्छब्दस्य त्रैगुण्य-वाचित्व-दर्शनादत्रापि क्रतु-साधनेषु या सङ्ख्या श्रूयते सा सर्वा त्रिवृत्वेन विक्रियते-इति प्राप्ते, ब्रूमः—यद्यपि त्रिवृच्छब्दोऽवयव-प्रसिद्ध्या लोके त्रैगुण्यं ब्रूते, तथापि वेदे रूढ्या स्तोम-वाचकः, त्रिवृद्वहिष्पवमानः इत्युक्त्वा स्तोत्रियाणां नवानामृचामनुक्रमणेन स्तोम-विषयमेव त्रिवृत्वम्"[५६]॥ ॥अष्टमे संसवादौ पृष्ठत्वम्—[५७]"संसवादौ द्वयोरेकं पृष्ठं यद्वा समुच्चितम्। एकं प्रकृतिवद् विश्वजिद्वदन्यत्र चेतरम्। वचनाद् विश्वजित्येते साम्नी द्वे स्तोत्रयोर्द्वयोः। नेहास्ति तत् पृष्ठएव साहित्यं स्यात् पुनर्विधेः॥ इदमाम्नायते—'संसवउभे कुर्याद्, गोसवउभे कुर्याद्, अभिजित्येकाहः उभे बृहद्रथरे कुर्यात्'-इति। किमत्र बृहद्रथन्तरयोरेकं पृष्ठ-स्तुतौ इतरदन्यस्तुतौ स्यात्? किं वा समुच्चितमुभयं पृष्ठ-स्तुतौ? इति

(१)—ताण्ड्यस्य तृतीयपञ्चिकायां बक्तृत।

संशयः। प्रकृतौ द्वयोर्विकल्पितत्वादेकस्मिन् प्रयोगे एकस्य पृष्ठत्वा दन्यत्रापि तथात्वं युक्तम्, तथा सत्यवशिष्टं साम सर्वपृष्ठ-विश्व-जिन्न्यायेन स्तोत्रान्तरे प्रयोक्तव्यम्-इति पूर्वपक्षः। तादृग्वचना भावेनात्र विश्वजिद् वैषम्यात् प्रकृतिवद् विकल्पे सति पुनर्विधान-वैयर्थ्यात् समुच्चयः-इति राद्धान्तः"[५७]॥

सप्तम-पादस्य षोड़शाधिकरणे बृहद्-यव-खादिराः नियताः —[५८]"बृहद्-यव-खादिराश्च * विकल्प्यानियतास्उत। विकल्प्या श्चोदक-प्राप्तेर्नियताः स्युः पुनर्विधेः॥ क्वचिद् विकृतौ श्रूयते— 'बृहत् पृष्ठं भवति'-इति, वैधातवीये श्रूयते—'यवमयो मध्यमः'-इति, वाजपेये श्रूयते—'खादिरो यूपोभवति'-इति; तत्र बृहद्रथन्तरयोः व्रीहियवयोः खादिर-वैल्वादीनाञ्च प्रकृतौ विकल्पितत्वादत्रापि चोदकेन विकल्पिता इति चेत्— न, पुन र्विधान-वैयर्थ्यात्। परिसंख्या तु दुष्टत्वात् (१) न शंक्या। तस्मान्नियताः। कोद्यन्तरं (२) त्वर्थान्निवर्त्तते"[५८]॥

अष्टम-पादस्य षष्ठाधिकरणे विप्र-गानं (३) विकल्पितम्—[५९] "उन्नेयोर्ब्रह्म-गानस्य निषेधोविहितस्तुतिः। विकल्पितोवा शून्यो

* "बृहद् यवः खादिरश्च"-इति पाठः रा० पुस्तके।

(१)—तदुक्तम्—"श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाध इत्येवं परिसङ्ख्या त्रिदूषणा"-इति। परिसङ्ख्या-लक्षणन्त्वत्र श्लोके स्फुटम्, तथाहि— "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते"-इति।

(२)—रथन्तरस्य पृष्ठत्वेनात्र ग्राह्यत्वं वैल्वादीनां यूपत्वेन च तथात्वमिति यावत्।

(३)—विप्र उद्गाता, तत्कर्तृकं वामदेव्यादि-साम्नां गानम्।

ऽपि वपोत्खेददिव स्तुतिः। विध्यनन्वयतोऽस्तोत्रं ब्रह्मोद्गाता तथा सति। विषयैक्याद्द विकल्पोऽत्र षोड़शि-ग्रहवन्मतः। आधाने वामदेव्यादि-साम्नां मानानि विहितानि, आधान एवेदमपरमाम्नायते— 'उपवीता वा एतस्याग्नयोभवन्ति, यस्या ग्न्याधेये ब्रह्म-सामानि गायति'-इति। उप-शब्दः सा मीप्यं ब्रूते, विगताः काल-विलम्बमन्तरेण परैस्त्यक्ताइत्यर्थः। अनया निन्दया ब्रह्मणः (१) साम-गान-निषेधउन्नीयते, स निषेध उद्गातुर्विहितं वामदेव्यादि-साम-गानं स्तौति। ननु ब्रह्मणः सामगानमप्रसक्तं (२) ततस्तन्निषेधोऽत्यन्तमसम्भावित त्वाच्छश-विषाणवच्छून्यः, न हि वन्ध्या-पुत्रो वा तद्-वधो वा सम्भावयितुं शक्यते, तथासति तादृशेन कथं स्तुतिः ? इति चेत्-वपोत्खेदवत्, इति ब्रूमः—'सआत्मनोवपामुदखिदत्'-इत्यनेनात्यन्तासम्भावितार्थेन यथा प्राजापत्यस्य तूपरस्य(३) अजस्य विधिः स्तूयते, तद्वत्- इति प्राप्ते ब्रूमः-नेदं वामदेव्यादि-साम-विधीनां स्तोत्रं भवितुमर्हति, विधीनामनेकत्वेन स्व-स्व-सन्निधि-पठितैरर्थवादैर्निराकांक्षत्वेन च तदन्वयायोगात्। का तर्ह्यस्य-

(१)—ब्रह्मा यज्ञीयऋत्विग्विशेषः, स हि सर्वेषामुद्गातादीनामृत्विजां कार्य-दोषोपशमनकारी सर्वद्रष्टा।

(२)—ब्रह्मणा इदं गायेत-इत्येवं विधे क्वचिदप्यदर्शनात्।

(३)—तूपरः शृङ्गहीनः, सच अजातशृङ्गः पतितशृङ्गोवा. तथाहि—ताण्ड्य-चतुर्थ-प्रथमे "ताः सर्वमन्नाद्यमाप्नुवंस्ता एतास्तूपराः"-इत्यस्यभाष्य—"ताः पतितशृङ्गाः गावः सर्वर्तु-भवमन्नाद्यमदनीयमन्नं प्राप्नुवन्, ता गावस्तूपराः शृङ्गहीनाः दृश्यन्ते"-इति।

वाक्यस्य गतिः? इति चेत्, उच्यते—ब्रह्म-शब्दोऽत्र विप्रत्व-जाति-द्वारेणोद्गातारं ब्रूते, यस्य च गानं तस्मिन्निषेधे सति विधि-निषेधाभ्यामेक-विषयाभ्यामुद्गातुर्गानं विकल्प्यते"[५९] ॥

एकादशाध्यायस्य द्वितीय-पादे द्वादशेऽधिकरणे ब्रह्मसामन्युत् कर्षः—[६०]"पर्य्यग्निकरणे त्यागआलम्भोब्रह्म-सामनि। कर्म-शेष निषेधस्व कर्मान्तर-विधिर्भवेत्। किं वोत्कर्षोऽवशिष्टस्य द्वारण्योक्तिवदादिमः। अदृष्ट-वाक्य-भेदाप्तेर्द्रव्याभेदेन चान्तिमः॥ वाजपेये 'सप्तदश-प्राजापत्यान् पशून् सञ्चिनुते'-इति प्रकृत्य श्रूयते— 'तान् पर्य्यग्निकृतानुत्सृजति'-इति, 'ब्रह्म-साम्न्यालभते'-इति, सप्तदशसु पशुषु पर्य्यग्निकरणेऽनुष्ठिते सत्युत्तरकाल-भावी कर्मशेषः उत्सर्ग-शब्देन निषिध्यते, अश्वमेधे 'पर्य्यग्नि कृतान् आरण्यानुत्सृजति'-इत्यत्र कर्मशेष-निषेधस्य प्रतिपन्नत्वादत्रापि तथात्वेन सप्तदश पशवः पर्य्यग्निकरणान्ताः समाप्याः, आलभतिना च ब्रह्मसाम-काले कर्मान्तरम्-इति प्राप्ते, ब्रूमः—कर्मान्तर-विधौ सप्तदश-जन्यादृष्टाद् भिन्नं किञ्चिददृष्टं कल्प्येत, वाक्यभेदश्च प्राप्नुयात्, किञ्च 'ब्रह्मसाम्न्यालभते'-इत्यत्र द्रव्य-देवतयोरश्रवणात् न कर्मान्तर-विधिः सम्भवति (१)।

(१)—अत्रेदं तत्वम्— शब्दान्तरम्१ अभ्यासः२ सङ्ख्या३ गुणः४ प्रक्रिया५ नामधेयम्६-इति षट् कर्म-भेद-हेतवः स्वीकुर्वन्ति जैमिनीयाः। तथाहि, जैमिनीये द्वितीय-द्वितीये प्रथमं सूत्रम्—"शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्"-इति। यजति, जुहोति, ददातीत्येवमादयो बहवः क्रियाशब्दाः श्रूयन्ते, तत्र सर्वत्रैव भावयेत्-इति समं प्रतीयते, एवञ्च भावनावाचकत्वांशे एकत्वेऽपि 'कृतानुबन्धत्वात्' यज्यादि धातु-रूपानुबन्धकृतभेदात् शब्दान्तरत्वं स्वीकार्यमेव, सत्येवं कर्मभेदोप्यागतः-इति तदर्थः,

तस्मात् पर्य्यग्निकरणानन्तरमेव कार्य्यस्य सप्तदश-पशूनामाल आदि-शेषस्य ब्रह्म-साम-काले उत्कर्षो विधीयते, तथासति अर्थप्राप्तः, पर्य्यग्निकरणानन्तर-भावि-कर्म्म-व्यापारोपरमउत्सर्ग-शब्देनानूद्यते"[६०] (१)॥

मन्त्र-लक्षणमारभ्य ब्रह्मसामोत्कर्ष-पर्य्यन्तैः पूर्व्व-मीमांसा गतैः* द्वि-षष्टि-संख्याकैर्व्विचारैः सामवेदस्य क्रतुषूपयोगो विस्त-

* 'जैमिनीयैः'-इति सा० पु० पाठः।

'सोमेन यजेत' 'हिरण्यमात्रेयाय ददाति' 'दाक्षिणानि जुहोति'-इत्यादि तदुदाहरणम्। तदेतन्नप्रायेनात कर्म्मभेदशङ्का— अपवादपादगत-विंशतितम-सूत्रानुसारेण च समाधानम्। तद्धि सूत्रम्—"अद्रव्यत्वात् केवले कर्म्मशेषः स्यात्"-इति। 'केवले' द्रव्यदेवतारहितवाक्ये 'कर्म्मशेषः स्यात्' कर्म्मणः उक्तस्य शेषः अनुवादादिरूपः स्वीकार्य्यो भवति। कुतः? 'अद्रव्यत्वात् (द्रव्यमित्युपलक्षणं देवताया अपि केवले इति सम्बन्धात्) द्रव्यदेवतयोरश्रवणात्-इति तदर्थः। अतएवोक्तम्—'श्रौवं साधारणं द्रव्यं देवता मान्त्रवर्णिकौ। रूपवन्तौ ततो यागौ विधीयेते पृथक्तया"-इति।

(१)—अत्र हि— प्रजापतिर्द्देवता यस्य पशोः स प्राजापत्यः-इति तद्धितान्तं प्रातिपदिकं व्युत्पाद्य पश्चात् तद्धितान्त-प्रातिपदिकार्थस्य प्रजापतिदेवताविशिष्ट पशोः कर्म्म-बहुत्व-विवक्षायामुत्पन्ने इमे द्वितीयाविभक्ति-बहुवचने, तत्र प्रथमभाविन्या द्वितीयाविभक्तेरेव तावत्तद्धितोत्पत्तिवेलायामन्वयो नास्ति, कुतः पश्चाद्भाविनो बहुवचनस्यान्वयः? एवं सति प्राजापत्येत्यनेन तद्धितान्तप्रातिपदिकेन एकपशुद्रव्यमेकदेवतोपेतं यागस्य रूपं समर्प्यते, तादृशानां बहुत्वाय बहुवचनं; बहुत्वविशेषः सप्तदश इति निर्दिश्यते—तस्मादिह सङ्ख्यया कर्म्मभेदः। सत्येवमेकस्मिन् पशौ दुष्टे स एवावर्त्त्यते, न हि पशुः पश्वन्तरमाकांक्षति; अन्यथा एकस्मिन् पशौ दुष्टे कृत्स्नः पशुगण आवर्त्त्येत तच्चादृष्टार्थमभविष्यत्। विचारोऽयं जैमिनीय-द्वितीय-द्वितीय-विंशतितमे सूत्रे (तद्भाष्ये) भाषितं स्फुटम्।

ष्टोक्तः (१)। अतः (२) स प्रयोजनवत्वाहग्वेदादिवदेवावश्यं व्याख्यातव्यः॥

नन्वस्मिन् सामवेदे ब्राह्मणभागस्य व्याख्यातुं योग्यत्वेऽपि मन्त्रभागस्य न व्याख्यान-योग्यतास्ति, तत्रत्यानां मन्त्राणां गीतिमात्रात्मकत्वात्—न खलु पद-वाक्य-व्यतिरिक्तायां स्वरस्तोभादि-साधनायां गीतौ क्रिया-कारक-योजनाभिव्यङ्ग्यः कश्चिदर्थोऽस्ति यस्याभिव्यक्तये भवता गीतिर्व्याख्यायेत। यत्तु स्वरादि-लक्षण विशेष-कथनेन गीति-व्याख्यानं तत्पूर्वाचार्यै (३) रेव तत्तल्लक्षण-मन्त्र-ग्रहणेषु सम्पादितम्-इति न तत्र त्वया यतितव्यम्, अतः कथं भवतः मन्त्रभाग-व्याख्यानम्? अत्रोच्यते—न तावद् गीतिर्निराश्रया, तस्याः ऋचाश्रितत्वात्; अतएव छन्दोगा उपनिषद्येवमामनन्ति—'तस्मादृच्यध्यूढं साम गीयते'-इति (४)गीत्याश्रयभूता सेयमृगपि मन्त्रएव, 'तेषामृग्यत्रार्थवशेन

---

(१)—अत्रेदं वेद्यम्—दर्शितानामेषां द्विषष्टिसङ्ख्याक-विचाराणां जैमिनीय न्यायविस्तरादौ च तथा परः परः पाठादर्शनम्, प्रत्युत दृश्यते च तत्र सर्वत्र तेषां बहुविधविषयक-बहुविचार-व्यवाय-द्वारा मिथो विभिन्न-देश-संस्थानम्। यदि च क्वचित् क्वचित् चतुर्णां पञ्चानामधिकरणानां वा साहित्यमस्ति, परं न तथा सर्वेषाम्, अध्याय-पादाधिकरण-व्यवायस्य तत्र तत्रापि च स्फुटदर्शनात्। तथाच सामवेद-क्रतु-विषयक-विचार-सङ्ख्या-निर्द्धारणे एवास्य तात्पर्यम्, मन्त्रलक्षणादाब्रह्मसामोत्कर्षमिति कथनं न नैरन्तर्य्यपरम्।

(२)—ग्रन्थारम्भे एव नन्विति योविचार उपक्रान्तः तमिदानीमुपसंहरति।

(३)—पुष्पसूत्रकारादिभिः।

(४)—छान्दोग्य-प्रथमप्रपाठक-षष्ठखण्डे।

पाद-व्यवस्था'-इति मन्त्र-विशेषत्वेन सूचितत्वात्(१); ऋगात्मकस्य तु मन्त्रस्य क्रियाकारकान्वयाभिव्यङ्ग्योऽर्थो विद्यते, स च क्रत्वनुष्ठान-कालेऽनुस्मर्त्तव्यः—इति ऋग्-व्याख्यानमवश्यं कर्त्तव्यम्" ६१ "मन्त्रैरर्थानुस्मरणं तु प्रथमाध्यायस्य द्वितीयपादे चतुर्थाधिकरणे निर्णीतम्—मन्त्रा उरुप्रथस्वेति किमदृष्टैक-हेतवः। यागेषूत पुरोडाश-प्रथनादेश्च भासकाः। ब्राह्मणे नापि तद्भानान् मन्त्राः पुण्यैकहेतवः। न तद्-भानस्य दृष्टत्वात् दृष्टं वरमदृष्टतः। उरुप्रथस्वेत्ययं कश्चिन्मन्त्रः, तस्यायमर्थः—भो पुरोडाश! त्वं उरु विपुलता यथा भवति तथा प्रसर-इति। एवमादयो मन्त्राः यागप्रयोगेषूच्चार्य्यमाणाः अदृष्टमेव जनयन्ति, न त्वर्थ-प्रकाशनाय तदुच्चारणम्, पुरोडाश-प्रथन-लक्षणस्यार्थस्य ब्राह्मण-वाक्येनापि प्राप्तत्वात् ('उरुप्रथस्वेतिपुरोडाशं प्रथयति'-इति हि ब्राह्मण-वाक्यम्) नैतद् युक्तम्, अर्थ-प्रत्यायनस्य दृष्ट-प्रयोजनसम्भवे सति केवलादृष्टस्य कल्पयितुमशक्यत्वात् (२)। तस्मात् दृश्यमानार्थानुस्मरणमेव याग-प्रयोगे मन्त्रोच्चारणस्य प्रयोजनम्, ब्राह्मण-वाक्येनार्थानुस्मरण-सम्भवे मन्त्रेणैवानुस्मर

---

(१)—पूर्व मीमांसायां द्वितीय-प्रथमे मन्त्रविचारप्रक्रमे द्वात्रिंशत्तमं सूत्रम्। 'तेषाम्' मन्त्रभागानां यत्र भागे 'अर्थवशेन पादव्यवस्था' विद्यते स ऋगाख्यः; इह-सूत्रे अर्थवशेनेत्यविवक्षितमिति शबरभाष्ये स्फुटम्, अन्यथा 'अग्निमीले पुरोहितम्'-इत्यत्र स्यादृक्त्वम्, अत्र न स्यात् 'अग्निः पूर्वेभिरृषिभिः'-इति; तस्माद् यत्र पादकृता व्यवस्था स मन्त्र ऋगाख्यः-इत्येव सारम्।

(२)—तदुक्तम्—'लभ्यमाने फले दृष्टे नादृष्टफलकल्पना'।

णीयमिति योनियमः तस्य दृष्टा*सम्भवात् अदृष्टं प्रयोजनमस्तु"[६१] ॥ अस्मिन्नेवाधिकरणे (१) मतान्तरेण (२) पूर्वोत्तर-पचावाह — [६२]"मन्त्रब्राह्मणयोर्यद्वा कलहोविनियोजने। न मन्त्र-लिङ्ग-सिद्धार्थमनुवर्त्तीतरद् यतः। अस्य मन्त्रस्य लिङ्गेन विनियोगे ब्राह्मण-वाक्यम् अविवक्षितार्थं स्यात्, वाक्येन विनियोगे मन्त्र-लिङ्गं न विवक्ष्येत—इत्युभयोर्विरोधादप्रामाण्यं चोदनायाः-इति पूर्वपक्षः (३)। नायं विरोधः, प्रबलेन लिङ्गेन विनियोग-सिद्धौ वाक्यस्यानुवादकत्वात्-इतिराद्धान्तः"[६२] ॥

---

(इति ऋत्त्वस्य भाष्यस्यावतरणिका समाप्ता)

---

* 'दृष्टार्थी'-इति स० वि० पु० पाठः।

---

(१)—उरुप्रथस्वेति विषयवाक्यस्यैक्यादधिकरणैक्यम्।

(२)—आसीत् कश्चन भट्टरहस्यादि-मीमांसा-जीवन-ग्रन्थ-निर्मातुः यागपद्धति-प्रथयितुश्च मीमांसक-वरस्य भट्टेति प्रसिद्धस्यान्तेवासी कान्यकुब्जो ब्राह्मणः प्रभाकर-नामकः गुरु-दत्त-गुरूपाधिकः तस्य मतेनेति यावत्। शालिकनाथीय-प्रकरण पञ्जिकादौ व्यक्तं तन्मतं स्फुटतरम्।

(३)—प्रमाणाध्यायसङ्गत्या प्रामाण्याप्रामाण्यएव विचारोपयुक्त इति गुरोराशयः।

(१) अर्थानुस्मरणाय व्याख्यातव्याः साम-योनि-भूताः ऋचः संहिता ग्रन्थे (२) छन्दोनामके समाम्नाताः, ताः सर्वाः ऋचः आम्नात-क्रमेणेह व्याख्यायन्ते(३)॥

(४) न च तासां क्रतुषु स्वातन्त्र्येण विनियोगोऽस्ति ब्राह्मणेन सूत्रेण च विनियुक्तानां साम्नामाश्रयतया (५) तदुपयोगात् तस्माद् ऋग्वेद-व्याख्यानवदैतद्व्याख्याने विशेषेण विनियोगोनान्वेषणीयः (६)। सामान्येन तु विनियोगो यद्यपि ब्रह्मयज्ञ(७)-विषयोऽस्ति तथाप्यसौ कृत्स्नस्य वेदस्यैकएवेति नान्वेषण-प्रयासोऽस्ति(८)। नन्वेवमप्यृचामृषि-च्छन्दोदैवतान्यवगन्तव्यानि, अन्यथा प्रत्यवाय-प्रसङ्गात्; तथाच छन्दोगा आमनन्ति— 'यो ह वा अविदितार्षेय-छन्दोदैवत-ब्राह्मणेन याजयति वाध्यापयति वा स्थाणुं

---

(१)—अथ पूर्व-संहिता-मूल-रूप-छन्दोनामार्चिकमात्रस्य भाष्यस्यावतरणिका।

(२)—उक्तं पुरस्तात् सामगानां संहिताग्रन्थौ द्वौ, तत्राद्य इति विवेक्तव्यः।

(३)—अथ तत्र ज्ञातव्य-विषयावाह-न चेत्यादि।

(४)—यद्यपि त्रिवृदादि-स्तोमात्मकानामृङ्मात्राणामपि नियोगो दृश्यते, परं न ता ऋचः छन्दोग्रन्थ-पठिताः।

(५)—आश्रयताभावेनैवेति भावः।

(६)—परन्तु यथा ऋग्वेदीयानामृत्विजामुपकाराय ऋग्भाष्ये ऋचां प्रत्येकस्य विनियोगो ज्ञापितः, इह तथा अस्यामृचि इदं गानं तस्य तत्र विनियोग इति साम्नां विनियोगः कथं न भाषितः -इति निवृत्तरकल्पः प्रश्न उज्जृम्भते।

(७)—ब्रह्मयज्ञो वेदपारायणः। तथाहि मनुः—

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् होमोदैवो बलिर्भौतो नृयज्ञोऽतिथि-पूजनम्" (३ अ० ७० श्लो०) 'अध्यापन-शब्देनाध्ययनमपि गृह्यते जपोऽहुत(७४) श्लो०) इति वक्ष्यमाणत्वात्, अतोऽध्यापनमध्ययनञ्च ब्रह्मयज्ञः"-इति तत्र कुल्लूकः।

वर्छति गर्त्तं वा पद्यति प्रवामीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्त्यथ यो मन्त्रे मन्त्रे वेद सर्वमायुरेति श्रेयान् भवत्ययातयामान्यस्य छन्दांसि भवन्ति, तस्मादेतानि मन्त्रे मन्त्रे विद्यात्'-इति (१)। एवन्तर्हि तासामृचां क्रम-व्यत्यासेन बह्वृचैः (२) अप्यधीयमानत्वात् (३) तदीयानुक्रमणिकोक्तान्यृष्यादीन्यत्रानुसन्धेयानि (४) ॥

---

(१)—आर्षेयब्राह्मणस्य प्रथम-प्रथम-खण्डे। छन्दोगइति तु सामगानां यौगिकं नाम।

(२)—बह्वृच-शब्दः ऋग्वेदपरः, सूक्तपरः, तदभिज्ञपरश्च तथाचात्र ऋग्वेदीयैरिति बोध्यम्।

(३)—स्वकीयसंहितामध्ये इति शेषः।

(४)—साम्नां छन्दो नास्ति परमृषिदेवते ऋग्भ्यः प्रविभिन्ने चार्षेयदैवतयोर्ब्राह्मणयोर्विज्ञानात् स्तएव, वक्तव्ये च ते भाष्यकारस्य, तदिमे च कथं नोक्ते? इत्यपि प्रश्नोऽनवद्योऽभ्युपेयोऽभ्युपगम्यवादिभिः।

# छन्द आर्चिकः।

## अथ प्रथमप्रपाठके प्रथमार्द्धः।

## हरिः ओम्। *

(१)आग्नेयमैन्द्रं पावमानमिति काण्ड-त्रयात्मकोयोऽयं छन्दो-नामकः संहिता-ग्रन्थः सोऽयमारण्यकेनाध्यायेन षट्-सङ्ख्या-पूरकेण सह षड्भिरध्यायैरुपेतः (२)।

---

* वेदाध्ययनाध्यापनारम्भ-सूचकमेतद् वाक्यम्, वैदिक-सम्प्रदाय-सिद्धम्। अध्ययनारम्भावसानयोरोङ्कारोच्चारणं मन्वादि-विहितञ्च, तथाहि— "ब्रह्मणः प्रणवं कुर्य्यादादावन्ते च सर्वदा। "स्रवत्यनोङ्कृतं सर्वं परस्ताच्च विशीर्य्यति"—इति मनुः २अ० ७४ श्लो०।

(१) अथ ग्रन्थमधिकृत्य किञ्चिद् ब्रूते।

(२)—संहिता-लक्षणं त्वेवमुक्तम् नैरुक्त-प्रथमाध्याय-चतुर्थ-पादादिखण्डे— 'परः सन्निकर्षः संहिता, पद-प्रकृतिः संहिता, पदप्रकृतीनि सर्वचरणनां पार्षदानि'-इति। अत्र भाष्यम्—"'परः' प्रकृष्टोयः 'सन्निकर्षः' संश्लेषः परस्परेण स्वराणां स्वराधिरूढानां व्यञ्जनाञ्च, सा 'संहिता'-इत्युच्यते। सा च पुनरियं 'पदप्रकृतिः संहिता' अत्र द्विविधा वर्णयन्ति— पदानां या प्रकृतिः सेयं पद-प्रकृतिः संहिता, विकारस्य संहितातोहि पदानि प्रक्रियन्ते, तस्मात् संहितैव प्रकृतिः, विकारः पदानि-इत्येवमेके मन्यन्ते; अपरे पुनः 'पद-प्रकृतिः संहिता' इति पदानि प्रकृतिर्यस्या सेयं पद-प्रकृतिरिति, किं कारणम्? पदान्येव हि संहत्यमाना संहिता भवति, तस्मात् पदान्येव प्रकृतिः

तत्र प्रथमे खण्डे(१) या ऋचस्ताः क्रमेणोदाहृत्य(२) व्याख्यायन्ते ॥

---

विकारः संहिता-इति। एवञ्च कृत्वा 'पद-प्रकृतीनि सर्वचरणानाम् पार्षदानि' सर्वेषां चरणानां सर्वशाखान्तराणामित्यर्थः; किम्? 'पार्षदानि' स्व-चरण-पर्षद्येव यैः प्रतिशाखा-नियतमेव पदावग्रहं प्रगृह्य क्रम-संहिता-स्वर-लक्षणमुच्यते तानीमानि 'पार्षदानि' प्रातिशाख्यानीत्यर्थः; आह किं तेषाम्? इति, उच्यते—तानि 'पद-प्रकृतीनि' पदं येषु संहितायाः प्रकृतित्वेन चिन्त्यते तानीमानि पद-प्रकृतीनि' तेषामपि स एव समयः-इत्यभिप्रायः॥ आह किम्पुनरत्र साधीयः? पदानां प्रकृतित्वम्, संहिताया विकारत्वम्? उत वा विकारत्वम् पदानाम्, प्रकृतित्वं संहितायाः?-इति; उच्यते—संहितायाः प्रकृतित्वं ज्यायः। आह किं कारणम् उच्यते—मन्त्रो ह्यभिव्यज्यमानः पूर्वमृषेर्मन्त्रदृशः संहितयैवाभिव्यज्यते, न पदैः। अतश्च संहितामेव पूर्वमध्यापयन्त्यनूचानाः ब्राह्मणा अधीयते चाध्येतारः। अपिच यज्ञकर्मणि संहितयैव विनियुज्यन्ते मन्त्राः, न पदैः। यदि हि पदानि प्रकृतिरभविष्यन्, संहिता पदैरेव मन्त्रोऽभिव्यज्येत? पदान्येव च पूर्वमध्यापयिष्यन्, ब्राह्मणाः अध्येष्यन्त चाध्येतारः, पदैरेव विनियोक्ष्यन्त मन्त्राः कर्मसु। न त्वेतत् सर्वमस्ति। तस्मात् एतैर्विशेषैः हेतुभिः संहितैव प्रकृतिर्न पदानीति पश्यामः"-इति॥ संहत्य पठिताः यत्र मन्त्राः, सा संहितेति स्फुटार्थः। अस्य हि सामवेदस्य चत्वारः संहिताग्रन्थाः, तत्र वेदसामोहगाननामकौ गानग्रन्थौ द्वौ मुख्यौ, छन्दउत्तराभिधौ आर्चिकग्रन्थौ द्वौ तदाधारभूतौ तत्र छन्दोनामके पूर्वार्चिके काण्डत्रयात्मक-संहिताग्रन्थे अध्यायाः पञ्च वर्त्तन्ते, आरण्याभिधश्चापरोऽध्यायः क्रोडपत्रमिव च, स षष्ठः; तदयं छन्दो ग्रन्थः षडध्यायात्मकः सम्पन्नः। तत्रात्र प्रथमेऽध्याये यावन्तो मन्त्रा विद्यन्ते ते सर्वे एव अग्निमनुकूलयितुं क्रतुषु नियुज्यन्ते, ततस्तत्समुदायः आग्नेयं काण्डमित्युच्यते, अग्निर्देवता अस्येति विग्रहे 'सास्यदेवता'-इत्यधिकारे 'अग्नेर्ढक्'-इति अग्निशब्दात् ढक्प्रत्यये विहिते तथारूपं तथाविधोऽर्थश्च प्रतिपद्यते: एवं द्वितीयाद्यध्यायत्रयात्मकमैन्द्रं, पञ्चमाध्यायात्मकं पावमानम्, षष्ठमारण्यकम्, अरण्येऽध्येतव्यतया तस्य तथाविधं नामधेयम्।

(१)—प्रथमाध्याये द्वादशखण्डाः सन्ति, तत्र प्रथमे दश ऋचो विद्यन्ते।

(२)—न हि विवरण-ग्रन्थकृदिवेहं मन्त्रप्रतीकमात्र-दर्शनमपि त्ववकलः कृत्स्नमन्त्रपाठ एव यथाक्रममुद्धृतोऽभिगन्तॄणां सुखबोधायेति भावः।

अग्नआयाहीत्येषा(१) भरद्वाजेन दृष्टा(२)गायत्री(३)आग्नेयी(४)।

---

(१)—ननु गानग्रन्थारम्भे गायत्रीसामैव श्रुतम्, तद्योन्यृगेव आदौ व्याख्यातुं युक्तमिति चेत्-न, तस्या उत्तरा(६,३,१०,१) श्रुतत्वेन अतत्स्थानत्वात्; गानारम्भे श्रुतिस्तु लोकशास्त्रयोरनुशासनादिति ध्येयम्।

(२)—भरद्वाजादि नामधेयं पङ्कजादिवद् योगरूढम्। तथाहि—वाजस्यान्नस्य भरणाद् 'भरद्वाजः', यष्टुमस्त्वस्य मेधा प्रिया इति 'प्रियमेधः', भर्जनाद् 'भृगुः' अत्रेदमपि दृत्तम्—प्रजापतिना आत्मीयं शुक्रमग्नौ हुतम्, ततोऽर्चिषि ज्वालायां स महर्षिरुत्पन्नः, व्यपगते तस्मिन्नर्चिषि योऽङ्गारेषु जातः सः 'अङ्गिराः', अत्रैव अङ्गारेषु जातस्तृतीयः 'अत्रि', व्रतं कर्म महि महत् अस्य इति 'महिव्रतः'—इत्येवं नानारूपत्वात् 'विरूपः'-इत्यादिकमभिधान-निर्वचनम्। स्फुटमेतत् निरुक्त-तृतीय-तृतीयान्ते तद्भाष्ये च। एतदृक्प्रयोग-फलं भरद्वाजर्षिः साक्षात् पश्यन् शिष्येभ्योऽस्या उपदेशं ददौ-इत्यर्थः। तथाहि, निरुक्त-प्रथम षष्ठ-षड्विंशतितमे—'साक्षात् कृतधर्माण ऋषयो बभूवुः, तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्राहुः'-इति। अत्र धर्मपदेन तज्जन्यं फलं ग्राह्यं तस्यामूर्त्तत्वेनादृश्यत्वात्-इति, ऋषन्ति परिणामं पश्यन्ति-इति ऋषयः-इति च तत्रैव तद्भाष्ये विवृतम् विस्तारतः। "उच्चावचैरभिप्रायै ऋषीणां मन्त्रदृष्टयो भवन्ति"-इति निरुक्त-सप्तम-प्रथम-तृतीये च। उच्चावचैरित्यस्य कर्मणां स्तुति-निन्दाद्युत्कृष्टापकृष्टबोधकैरित्यर्थः॥

(३)—गीयन्ते स्तूयन्ते देवता अनयेति गायत्री, तदुक्तम्, नैरुक्त-सप्तम-तृतीय षष्ठे—'गायत्री गायतेः स्तुति-कर्मणः'-इति। सैषा अष्टाक्षरात्मकै स्त्रिभिः पादैर्निबद्ध-च्छन्दोविशेषः, तत्परिस्फुटम् छन्दोग्रन्थस्य द्वितीयखण्डे 'छन्दः'-इत्यधिकारे 'गायत्र्या-वसवः'-इत्याद्युक्तितः, तत्रैव निरुक्ते 'त्रिगमना'-इत्युक्तेश्च छन्दस्त्वं चास्याः नियताक्षरादि-सन्निवेश-रूपच्छदनात्, तथाहि तत्रैव नैरुक्तम् 'छन्दांसि छदनादिति।

(४)—आग्नेयी, अनया ऋचा अग्निर्देवोपास्य इत्यर्थः। तथाहि, निरुक्त-सप्तम-प्रथम-प्रथमे—"यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति"-इति। आर्थपत्यमर्थपतेर्भावम्, अमुष्या देवतायाः प्रसादेन अहममुष्यार्थस्य पतिर्भविष्यामीत्याकारमित्यर्थः।

तैषा प्रथमा।

२ ३ १ २ ३ १ २ ३ २ ३ १ २

* अग्न आ याहि वीतये गृणानो हव्यदातये।

१ २ ३र ३ १ २

नि होता सत्सि बर्हिषि॥१॥

४ २र २ १ २ १

१† ओग्ना इ। आयाहो३ वोइतोया २इ। तोया२इ।

१ र२र १ १ १ २र १

गृणानोह। व्यदातोया २इ। तोया २इ। ना इहोतासा

हे 'अग्ने' अङ्गनादि-गुण-विशिष्ट! (१)त्वम् 'आयाहि' अस्मदयज्ञं प्रत्यागच्छ। किमर्थम्? 'वीतये' (२) हविषां चरु-पुरोडाशा-

---

* इयमेव ऋक् उत्तरार्च्चिके १,१,४,१,।

† इमानि त्रीणि अग्नआयाहीति प्रकृतायामृच्युत्पन्नानि गेयगानारम्भे एव पठितानि, तत्र हि छन्दःश्रुतासु सर्वास्विव ऋक्षु यथाक्रमसाम-श्रुतिः। तत्र च क्वचिदेकं क्वचिद्बहूनि च; तेषां ऋषिनिर्णयं नामकीर्त्तनञ्च आर्षेय-ब्राह्मणान्वेषणेन लभ्यम्। तथाहि— 'गोतमस्य पर्क्कावभितः काश्यपस्य बर्हिष्यम्'—इति तद्द्वितीयखण्डारम्भे। तदिदं निष्पन्नम्—अस्यसाम्नः गोतम-ऋषिः पर्क्क इत्यभिधानम्।

(१)—तथाहि नैरुक्तम्—'अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयतेऽङ्गं नयति सन्नममानोऽक्नोपनो भवतीति स्थौलाष्ठीविर्न क्नोपयति न स्नेहयति, त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिरितादक्ताद्दग्धाद्वानीतात् स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवति। ७-४-१।

(२) "...ने रुषेषपचमनविदभूवीदाभ्य उदात्तः (पा०३,२,८३)"-इति क्तिन्।

२३ । त्वा २इ । वा२३४ औहोवा । ही२३४षी ॥१॥

२* अग्न आयाहोवी । तयाइ । गृणानोहव्यदाता । २३याइ । निहोतासत्सिबर्हा२३इषि । बर्हा२इषा२३४औहोवा । बर्ही३षी२३४५ ॥२॥१

३† अग्न आयाहि । वाधूइतयाइ । गृणा नोहव्यदा-१ता३ये । निहोता२३४सा । त्सा२३४इबा३ । हा२३३-४इषोंहाइ ॥३॥

दोनां भक्षणाय । कीदृशः सन् ? 'गृणानः' अस्माभिः स्तूय-मानः (व्यत्ययेन कर्मणि कर्त्तृ-प्रत्ययः) पुनश्च किमर्थम् ? 'हव्यदातये'(१) । देवेभ्योहविः प्रदानाय आगत्य च 'होता' देवाना-माह्वाता सन् 'बर्हिषि' आस्तीर्णे दर्भे 'निषत्सि'(२) निषीद-(सदेश्छान्दसः शपोलुक्) (३) ॥१॥

---

* कश्यपऋषिः, बर्हिष्यम् ।

† गोतमऋषिः, पर्क्कः ।

(१)—"मन्त्रे (३,३,९६) इत्यादिना क्तिनि दातिः सिद्धति ।

(२)—"छन्दसिपरेऽपि"-इति छन्दस्यधिकारे व्यवहिताश्च (१,४,८२)-इति पाणिनि-स्मरणात् होतेति-पद-व्यवहितस्यापि नीत्यस्योपसर्गत्वम् ।

(३)—"अदिप्रभृतिभ्यः शपः"-इत्यधिकारे "बहुलं छन्दसि (२,४,७३)"-इति स्तवात् ।

त्वमग्ने-इत्यस्या ऋष्याद्याः पूर्ववत्।

सैषा द्वितीया।

१२ ३२ ३ १ ३ १ २ ३२
*त्वमग्ने यज्ञानाꣳ होता विश्वेषाꣳ हितः।
३२ ३१ २३१२
देवेभिर्मानुषे जने॥ २॥

४ ५ र ४र ५र ४ ५ ४ २१र र र र र र
१† त्वमग्नेयज्ञानाम्। त्वमग्नाइ। यज्ञानांहोता। विश्वेषां
२ र१र १ ३ र११ १ ४५
हा२३इता। देवेभा२३इ र्मा। नुषेजना। औ३होवा।
४
होपूइ। डा॥४॥

हे 'अग्ने' त्वं 'विश्वेषां यज्ञानाम्' अग्निष्टोमात्यग्निष्टोमादीनां सम्बन्धी 'होता' होम-निष्पादन-शीलः (जुहोतेस्ताच्छीलिकस्तृन्) यद्वा 'यज्ञानां' यष्टव्यानां 'विश्वेषां' देवानां 'होता' आह्वाता। एवं भूतस्त्वं 'मानुषे' मनोरपत्य-भूते यजमान-लक्षणे 'देवेभिः' देवैः (छान्दसोभिसऐसभावः) देवनशीलैर्ऋत्विभिः 'हित': निहितः गार्हपत्यादि-रूपे संस्थापितोभवसि। यद्वा। देवैदेवेन्द्रादिभिरुक्त-लक्षणः सन् यज्ञानां निष्पादनाय यजमाने नियुक्तोसि॥ २॥

---

* इयमेव उत्तरार्चिकस्य ६,३,१४,१।

† विश्वमना ऋषिः, सौपर्णम्।

अग्निन्दूतमित्येषा कण्वपुत्रेण मेधातिथिना दृष्टा,
छन्दोदेवते पूर्ववत् ।

सैषा तृतीया ।

१ २३ १ २ ३ १ २ ३ १ २
अग्निन्दूतं वृणीमहे होतारं विश्ववेदसम् ।
१ २ ३ १ २ ३ १ २
अस्य यज्ञस्य सुक्रतुम् ॥ ३ ॥ ३

५ र १ २र १र २र २
अग्निन्दूताम् । वृणीमहाइ । होतारा२३०वि ।
२र १ १ १ २ १
श्ववेदसाम् । अस्य या२३ज्ञा । आ । औ३होवा ।
१ १ १ १ १
स्यासुक्रतुम् । इडा२३भा३४३ । ओ२३४५इ । डा ॥५॥ ३

'दूतम्' देवानां हौत्ये विनियुक्तम् 'अग्निं देवम्' 'वृणीमहे' स्तुतिभिर्हविर्भिः सम्भजामहे [ अस्य च दूतत्वं तैत्तिरीयके समाम्नातम्—"अग्निर्वै देवानां दूतआसीदुशनाकाव्योऽसुराणाम्"-इति ] कथम्भूतम् ? 'होतारं' साधुदेवानामाह्वातारं [ह्वयतेः साधुकारिणि तृन्(१), 'बहुलं छन्दसि (६,१,३४)'-इति सम्प्रसारणम् ] 'विश्ववेदसं' विश्वानि वेत्तीति विश्ववेदाः, तम्

---

३-इयमेव उत्तरार्चिकस्य २, १, ६, १ ।
I भारद्वाजऋषिः, बृहद् ।

(१)—'आक्वेस्तच्छील-तद्धर्म-तत्साधुकारिषु । तृन् (३, २, १३४-१३५)' ।

अग्निर्वृत्राणीत्येषा भरद्वाजेन दृष्टा, छन्दोदेवते पूर्ववत्।

सैषा चतुर्थी।

२ ३ ३ १ २ ३ १ २ ३ १ २
अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया।
१ २ ३ १ २ ३ १ २
समिद्धः शुक्र आहुतः॥ ४॥ ४

[ वेत्तेरसुन् (२) ] यद्वा, वेद-इति धन-नाम(३) विश्वं सर्वं वेदो धनं यस्य, तम् [ 'बहुव्रीहौ विश्वं संज्ञायाम् (६,२,१०६)'-इति(४) पूर्वपदान्तोदात्तत्वम्] 'अस्य' प्रवर्त्तमानस्य यज्ञस्य (५) 'सुक्रतुम्' निष्पादकत्वेन शोभन-कर्माणम्(६) [अथवा क्रतुरिति प्रज्ञा-नाम (७) ] शोभन-प्रज्ञं वा। तं त्वां वृणीमहे-इति पूर्वेण सम्बन्धः॥ ३॥ ३

'द्रविणस्युः' द्रविणं धनं (१) स्तोतृणामिच्छन् [छन्दसि परे-

---

४-इयमेव उत्तरार्चिकस्य ६, २ ७, १।

(२)—विद ज्ञाने।

(३)—'धन-नामान्युत्तराण्यष्टाविंशतिः'-इति नैरुक्तम् २, १, १०। तत्र वेद इति चतुर्थम् निघण्टु-द्वितीय-दशम-पाठात्।

(४)—'बहुव्रीहौ प्रकृत्या पूर्वपदम् ६, २, १'-इत्यस्यापवादः।

(५)—'षष्ठी-निर्देशात् परिसमाप्त्यर्थमिति वाक्यशेषः'-इति विवरणम्।

(६)—'कर्मनामान्युत्तराणि षड्विंशतिः'-इति नै०२,१,१। तत्रैकादशतमम् नि२,१।

(७)—'प्रज्ञानामान्युत्तराण्येकादश'-इति नै० ३, ३, १४। तत्र पञ्चमम् नि० ३, ९।

(१)—नै० ३, २, १०। तत्र द्रविणं पञ्चविंशतितमम् नि० २,१०।

५ १ ३ ५र र ३
I अग्निर्वृ त्रा । णा२यि जा२३४ औहोवा । घा२ ३

५ २ १ २ १ २र ऽ १ २
४नात् । द्रविणस्युर्विपन्यया२ । ओयिसमिद्धा२३ः शू ।

१ र २ १ २ १
क्रायाहुतः । इडा२३भा३४३ । ओ२३४५इ । डा ॥ ६ ॥

३ २ ३र ४ ५ ५ ४ ५ १ २ २ ५ २
II अग्निरौहोवा हायि । वृत्राणि । जाङ्घा३नात् । औहो

२ १ ३ ५ १ ५ ० १ २
३वा३ । द्रविणा२३४स्यूः । ओयिवोयिपन्यया२ । समायेः३ ।

१ ३ ५रर २१र ३ १११२
धा२ःश्र२३४औहोवा । क्रयाहुना२३४५ः ॥ ७ ॥

४ ५ २ १र ३र २ ३ ५
III ओग्नीः । वृत्राणि जङ्घनात् । औहौहो२३४ वा ।

२ १ २१ ३र २ ३ ५ १ २ १
द्रविणस्युर्विपन्यया । औहौहो२३४वा । समिद्धः शुक्र

३र २ ३ ५ ४ ५
या । औहौहो२३४वा । होपुतोईहायि ॥ ८ ॥४

च्छायां क्यच(२) । प्रातिपदिकेभ्यः इच्छायां क्यचि सुगागमः(३)]
यद्वा । हविर्लक्षणं धनं तदात्मन इच्छन्नग्निः 'विपन्यया' [पनतिः

I,II,III त्रयाणामेषाम् औतर्षम् नाम, ऋषिस्तदनुगतः कल्पः ।

(२)—क्यच्प्रकरणस्य-वार्त्तिकमेतत् ।

(३)—'दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ७, ४, ३६' इति सूत्रेण । 'क्याच्छन्दसि ३,२, १७०' इति उप्रत्ययश्च ।

प्रेष्ठं वइत्येषा उशनसा दृष्टा, छन्दोदैवते पूर्ववत् ।

सैषा पञ्चमी ।

१ २ ३ १ २ ३ २ ३ १ २ ३ २

प्रेष्ठं वो अतिथिꣳस्तुषे मित्रमिव प्रियम् ।

२३ २ ३ १ २ ३ २

अग्ने रथं न वेद्यम् ॥ ५ ॥ ५

स्तुत्यर्थः (४)] अस्माभिः क्रियमाणया स्तुत्या स्तूयमानः सन्(५) 'वृत्राणि' बलेन जगतामावरकाणि रक्षः प्रभृतीनि, तमांसि वा(६) 'जङ्घनत्' भृशं हन्तु [ हन्तेर्यङ्लुगन्ताल्लिङर्थे लेट् (३,४,७) ] कीदृशोऽग्निः ? 'समिद्धः' समिदादिभिर्हविर्भिः सम्यग्दीपितः । अतएव 'शुक्रः' दीप्यमानः(७) । 'आहुतः' हविर्भिराहुतः ॥ ४ ॥ ४

हे 'अग्ने'(१)'वः' त्वां [पूजार्थे बहुवचनं(२)] 'स्तुषे'(३)स्तौमि,

---

५-इयमेव उत्तरार्चिकस्य ५, १, १८, १ ।

(४)—'अर्चति-कर्माणउत्तरे धातवश्चतुश्चत्वारिंशत्'-इति नै ३, ४, १० । तत्रेद षोडशतमम् नि० ३, १४ ।

(५)—'वि शब्दोवैविध्यार्थः, विविधया स्तुत्या, तृतीया-निर्देशात् स्तुतः सन्निति वाक्यशेषः'-इति विवरणकारः ।

(६)—'वृत्राणि शत्रु-कुलानि स्तोतुः यष्टुश्च'-इति वि० ।

(७)—'शुक्रः शुक्लवर्णः'-इति वि० ।

(१) 'अग्नुद्रेकवचनं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्'—इति वि० ।

(२)—'एक वचनं न युञ्जीत गुरावात्मनि चेश्वरे'—इति शासन-मूलकमित्यर्थः, परं नेत्थमत्र सर्वत्र ।

(३)—'स्तुषे' नेदं स्तडात्मनेपद-मध्यमपुरुषैकवचनम्, किन्तर्हि ? पञ्चरूस

४र ५ ४　　१　　१　　१ र १　　३१

I प्रेष्ठ वाः । अता२३यियीम् । स्तौषेमित्रम् । इवप्रा

२　　१　　२ २　　१　　२　　१

२३याम् । अग्नायिरा३था३म् । नावा२३हा३४३यि । दा

५ ५

२३४योई्हायि ॥ ८ ॥

४र ५　　४　　१　　२　　२

II प्रेष्ठं वाः । ओहायि । अता२३यियीम् । स्तु,षा यि ।

१ २　　५　　२र　　१२र

मित्रा३म् । इवा२प्रा२३४याम् । औहो॰१यि । अग्ने

१　　१ ४　　२　　५ ५

राया२३म् । ना२३वे३ । दा३४५योई्हा । यि ॥ १०॥

५र र　　१　　१ र

III प्रेष्ठं वोहाउ । अतिथायिम् । स्तुषेमित्रमिवप्रा२३

२　　१　　२　　१ २　　५र र　　१ १र २ १११

याम् । अग्नाये३ । रा२था२३४औहो वा । न वेदिया२३४

१

पुम् ॥ ११ ॥ ५

अहमुशनादृति शेषः । कीदृशम् ? 'प्रेष्ठ' स्तोतृणामस्माकं धन-

---

I, II, III, त्रयाणामेषामुशना ऋषिः, गैरिषं नाम ।

लकारस्यात्मने पदे उत्तमपुरुषैकवचनम्,—इति वि० । तथाचि 'लिव्यङ्‌लं लेठि ७, ४, ३४'—'लेटोऽडाटौ ३, ३, ९४'-इति सूत्रद्वयाभ्यां साधनीयम् ।

त्वं न इत्येषा सुदीति-पुरुमीढ़ाभ्यां तयोरन्यतरेण वा दृष्टा, छन्दोदेवते पूर्ववत्।

सैषा षष्ठी।

१ २ ३ १ २ ३ १ २र३ १ २
त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः।
३२ ३१२ २ र
उत द्विषोमर्त्यस्य॥ ६॥ ६

दानेन प्रियतमम्। 'अतिथिं' सर्वैरतिथिवत्पूज्यम्। यद्वा [अत सातत्य-गमने। ऋतन्यञ्जीत्यादिना अतेरिथिन्] सततं देवानां हविः प्रदातुं गच्छन्तम्। 'मित्रमिव' सखायमिव 'प्रियं' स्तोतुः प्रीणन-करं। 'रथं न'(४) रथमिव 'वेद्यं' वेदोधनं धन-हितं लाभ-हेतुं, यथा रथेन धनं लभते, तद्वत्, स्तोतारोऽनेन धनं लभन्ते, तादृश-धन-लाभ-कारणम्॥

"अग्ने"-इति छन्दोगानाम्, "अग्निम्"-इति बह्वृचानां पाठः॥ ५॥ ५

हे 'अग्ने' त्वं 'नः' अस्मान् 'महोभिः' पूजाभिः महद्भिर्धनैर्वा 'पाहि' रक्ष। कस्याः पाहि? 'विश्वस्याः' बहुविधात् 'अरातेः

---

६ नास्तीयमुत्तरार्च्चिके।

(४)—'प्रतिषेधार्थीयः पुरस्तात् * * * उपमार्थीयउपरिष्टात् १,२,६,-इति नवन्नयासनादत्र परस्ताच्छ्रुतस्य न शब्दः इवार्थः।

५ र २र १र२ १र २ १ १र र २र
I त्वन्नोयाग्ने महोभिः। पाहोयिवी३स्वा। स्या अरातेः।
१ २ १ २ १ २ १
उतादाऽ१यिषा२ः। मर्त्त्यस्य। इडा२३भा३४३। ओ३४इ।
डा ॥ १२ ॥

४र ५र र ४ ५ ५ १र १ २ २
II त्वान्त्वन्नोअग्नेम। होई भाईः। पाहो वीस्वा। औ३हो।
१ २ २ १ २ १ १ - १ २
स्या औ३हो। आरातेः। उतादा१ ईषाः२। मर्त्ता२या२३४
५र र २ १ १ १ १
औहोवा। स्या२३४५॥ १३ ॥ ६

अदातुः सकाशात् अदानाद्वा (१) पाहि। त्वमेव महद्धनं दत्वा अदातुरदानाद्वा सकाशाद्रक्षेत्यर्थः। यद्वा महोभिः (२) युक्तस्त्वमिति योज्यम्। 'उत' अपिच। 'द्विषः' द्वेष्टुः 'मर्त्यस्य' मर्त्त्यात्सकाशात् पाहि अस्मभ्यं बलं दत्त्वेति भावः। अथवा मर्त्यस्य द्विषोद्वेषाद्रक्षेति सम्बन्धः। अरातेरित्यस्य अदानादितिपक्षे तत्रापि मर्त्यस्यादानादिति सम्बन्धनीयम्(३) ॥ ६ ॥ ६

---

I साकमश्वऋषिः, साश्वगम्।

II स एव ऋषिः, वार्त्रघ्नम्।

(१)—'अरातिः शत्रुः, स्त्रीलिङ्गनिर्देशो जात्यपचः, सर्वस्याः शत्रुजातेः सकाशात्'-इति वि०।

(२)—'कैः? सामर्थ्यात् पालनैः'-इति वि०।

(३)—विवरणग्रन्थे तस्मात् प्राक् 'अग्निर्मूर्द्धा (ऋ०१,१,१,७-ऊ०७,१,१६,१)'-इत्येषा

एह्यूष्वित्येषा भरद्वाजेन दृष्टा, छन्दोदेवते पूर्ववत्।

सैषा सप्तमी।

२ ३ १ २ २ २ ३ १ २ ३ १ २ ३ १ २

एह्यु षु ब्रवाणि तेऽग्न इत्थेतरा गिरः।

३ १ २ ३ १ २

एभिर्वर्द्धासि इन्दुभिः॥ ७ ॥ ७

५ २ २ १ ४ २ ५ ५ १ २ २

I एह्यूषू३ ब्रवाणा६यि तायि। अग्नइत्थेतरागा२

१ २२ १ १ २ १ ५

यिराः। एभा२यिर्वर्द्धा। सया२३हा३४३यि। दू२३४भो६

५

हायि॥ १४॥

५२२ २ १ ५ १ २ २ २ २

II एह्युषु ब्रवौ होणायितायि। अग्न इत्थेतरा१गी३राः।

२ ३ ५ १ २ १ ५ ५

एभिर्वा२३४र्द्धा। सया२३हा३४३यि। द२३४भो६हायि॥

१५॥ ७

हे 'अग्ने' 'एहि' आगच्छ 'ते' तुभ्यं त्वदर्थं 'गिरः' स्तुतीः

---

७ इयमेव उत्तरार्च्चिकस्य १, १, २१, १।

I II अनयोर्वत्सऋषिः, शौनःशेपम् नाम।

व्याख्याता, इत्ता च तत्र यमवतरणिका-'अग्निर्मूर्द्धादिवः परापररूपेण व्यवस्थितोऽस्या-मृचि अग्निः स्तूयते। अग्निमूर्द्धा दिव इति मन्त्रः चलत्यो न भवति, 'त्वम्नो अग्न महोभिरित्यादिरवत्यः, अयमित्यभिनयेन दर्शयति'—इति।

आ ते वत्सइत्येषा कण्वगोत्रेण वत्सेन दृष्टा ।

छन्दोदेवते पूर्ववत् ।

सैषा अष्टमी ।

१ २ ३ १ २र ३ १ २ ३ १ २
आ ते वत्सोमनोयमत्परमाच्चित्सधस्थात् ।
२ ३ १ २ ३ २
अग्ने त्वाङ् कामये गिरा ॥ ८ ॥ ८

'इत्था' (१) इत्थमनेन प्रकारेण (२) 'सु' (३) सुष्ठु 'ब्रवाणि' इत्याशास्यते । ताः स्तुतीः शृणुित्यर्थः । 'उ' (४) इत्येताः 'इतराः'(५) असुरैः कृताः, स्तुतीः शृणुतिशेषः । [तथाच ब्राह्मणम्— "अग्निरित्येतरागिरइत्यसुर्य्याह वा इतरागिरः" इति] अपि च । आगतस्त्वं 'एभिः' एतैः 'इन्दुभिः' सोमैः 'वर्द्धास' वर्द्धस्व ॥ ७॥७

'वत्सः' एतन्नामा ऋषिः 'ते' तव 'मनः' 'परमाच्चित्' उत्-

८. इयमेव उत्तरार्चिकस्य ४,२,१२,१ ।

(१)—'इत्थाः सत्यादित्यर्थः'-इति वि० । इत्थेत्यादन्त एव निघण्टु-तृतीये सत्यनामसु पठितः ।

(२)—इत्थमित्यव्ययस्य छान्दसमलोपे 'निपातस्य च ६, ३, १३६'-इति दीर्घरूपम् ।

(३)—मन्त्रे 'षु'-इति 'सुञः ८, ३, १०७'-इति मूर्द्धण्ये रूपम । एतच्च पादपूरणार्थमेवात्र प्रयुक्तमिति विवरणमतम् ।

(४)—'उ'-इत्येतदत्र पादपूरणे-इति वि०-मतम् ।

(५)—'इतराः सत्यतोऽन्याः असत्याः'-इति वि० ।

५र र १ र २ १ २र २ १ २
I आतेवत्सोः । मनोयमत् । परमात् । चित्सधा२३स्थात् ।
१ २ २ ४ ५ ४ ५
अग्नायित्वा३ङ्का३ । मयो वा । गा५पुयिरो६हायि ॥ १६ ॥

४र ५र ४र ५र ४ ५ २ १र र
II आतेवत्सोमनोयमत् । ऐयाहायि । परमाच्चित्सधस्था
र १ १ र र र र १
दैया२३होइया । अग्ने त्वाङ् कामय ऐया२३होइया ।
२ र १ २ १
गिरा । इडा२३भा३४३ । ओ२३४५इ । डा । १७ ॥ ८

कष्टादपि 'सधस्थात्' सहस्थानात् द्युलोकात् (१)'आ यमत्' (२) आ यमयति । केन साधनेन? 'गिरा' स्तुत्या । गिष्टं (३) प्रत्यक्षकृतम् (४) । हे 'अग्ने' 'त्वां कामये' त्वदीयं मनो मय्येव नियच्छामीति प्रार्थये ।

"त्वाङ् कामये"-इति छन्दोगाः । "त्वाम् कामये"-इति बह्वृचाः, सुवन्तत्वादवग्रह्य पठन्ति ॥ ८ ॥ ८

I,II द्वयोरेवानयोः काण्वऋषिः,

अभिधानन्तु ऋषिनामानुगतमेव कल्प्यम् ।

(१)—'सह तिष्ठन्ति यत्र देवाः सः सधस्थः स्वर्ग उच्यते'-इति वि० । सहसधौ पर्य्यायशब्दौ ।

(२)—'छन्दसि लङ् लुङ् लिटः'-इति तृतीयाध्यायीयवचनात् इह लडर्थे लङ् ।

(३)—ऋगुत्तरदलम् ।

(४)—त्रिविधाः ऋचोभवन्ति, परोक्षकृताः १, प्रत्यक्षकृताः २, आध्यात्मिकाश्च ३।

त्वामग्न इत्येषा भरद्वाजेन दृष्टा, छन्दोदेवते पूर्ववत्।

सैषा नवमी।

१ २३ १ २ ३ १ २३ १ २
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत।
३ १ २ २ ३ १ २
मूर्ध्नो विश्वस्य वाघतः॥ ९॥ ९

५र २ ५र ५र १ २ २ १ ७
I त्वामग्ने पूष्काइराढधी। आथर्वा। नायिः। अमार्
२ ५ २ ५ २ ५ ४ ५
न्था२३४ता। मू२३४र्द्धो। वा२३४यिश्वा। स्य वो वा।
४ ५
घाऽ५तोइहायि॥ १८॥ ९

हे 'अग्ने' 'अथर्वा' एतत्सञ्ज्ञ ऋषिः 'त्वां' 'पुष्करादधि' पुष्करे

९ नास्तीयमुत्तरार्चिके।

I वाध्र्यश्वः सुमित्र ऋषिः।

तत्र प्रथमपुरुषादिनिर्देशेन परोक्षार्थेषु नियुक्ता पूर्वा, यथा 'अग्निर्वृत्राणि जङ्घनत्' इति पुरस्ताद्गता, इहैव 'आ ते वत्सो मनो यमत्'-इति पूर्वदलञ्च। सम्बुद्ध्यादि-निर्देशेन यत्र देवः प्रत्यक्षीकृतोबुध्यते सा द्वितीया, यथा—'अग्न आयाहि वीतये' इति प्रथमा, इहैवोत्तरदलञ्च। आत्मानमेव स्तोतव्यमधिकृत्य अभिव्यक्ता तृतीया, यथा—'अहमिद्धि पितुष्परि मेधामृतस्य जग्रह। अहं सूर्य इवाजनि। छ० २.२,१,८' विस्तरश्चै-तत् समस्तम्—नैरुक्ते तद्भाष्ये च सप्तम-प्रथम-प्रथमादित्रये।

सैषा दशमी।

२३ १२३१ २३ १ २३१२ ३२
अग्ने विवस्वदाभरास्मभ्यमूतये महे।
३१२ २२ ३२
देवो ह्यसि नो दृशे॥ १० ॥ १०

पुष्कर-पर्णे 'निरमन्थत' अरण्योः सकाशादजनयत्। कीदृशात्पुष्करात्? 'मूर्द्ध्नः' मूर्द्धवद्धारकात्। 'विश्वस्य' सर्वस्य जगतः 'वाघतः' वाहकात् [“पुष्करपर्णे हि प्रजापतिर्भूमिमप्रथयत् तत् पुष्करपर्णे प्रथयत्-”इति श्रुतेः। भूमिश्च सर्व्वजगतआधार-भूतेति पुष्करपर्णस्य सर्व-जगद्धारकत्वम्। अत्र पुष्कर-शब्देन पुष्कर-पर्णमभिधीयते, इत्येतच्च तैत्तिरीयके विस्पष्टमाम्नातम्-“त्वामग्ने पुष्करादध्यथर्वा निरमन्थत, पुष्करपर्णे ह्येनमुपश्रुतमविन्दत्”-इति(१)॥ ९ ॥९

१० इयमेव उत्तरार्च्चिकस्य ८,१,६,१।

(१)—विवरणकारस्त्वेषान्यथैव व्याख्याता, तथाहि—“अत्रेतिहासमाचक्षते—सर्वमिदमन्धतमससमासीत्, अथ मातरिश्वा वायुः आकाशे-सूक्ष्ममग्निमपश्यत् स तम् मथ्नात्। अथर्वा ऋषिः तदेतदुच्यते—हे अग्ने! त्वाम् पुष्करमित्यन्तरिक्षनाम (नि०१,३,१२)-तस्मात्, अधिशब्दस्य 'अधिपरी अनर्थकौ १,४,९३'-इति कर्मप्रवचनीयः पादपूरणः। 'निरमन्थत' नितरां मथितवान्। कीदृशादन्तरिक्षात्? उच्यते—'मूर्द्ध्नः' प्रधानभूतात्। कस्य? उच्यते—'विश्वस्य' सर्वस्य 'वाघतः ऋत्विङ्नामैतत् (नि०३,१८,२) अन्तर्णीतमर्थश्चात्र द्रष्टव्यम् ऋत्विजोयजमानस्य च, षष्ठीनिर्देशात् अर्थायेति वाक्यशेषः” इति

४ ५र ४ ५  १र ५ ४  ४ ५  २र  २  १
I अग्ने विवस्वदाभरो। वाहायि। अस्मभ्यमूताऽ३यायि
२र  १  २ २  १  २ २  १ २
मह्वे। ओऽ। वा२हायि। ओ ऽ। वा२हायि। दायिवोऽ१

पूर्वोक्तासु ऋत्तु बह्वृचानामनुक्रमणिका-ग्रन्थं पर्य्यालोच्य तत्रोक्ता ऋषिछन्दोदेवता योजिताः। एव मुत्तरास्वपि योजनीयाः॥ अग्ने विवस्वदित्येषा तु बह्वृचैर्नाम्नाता, तथाप्यस्याः छन्दोदेवते पूर्ववद्दिस्पष्टे, ऋषिस्तु वामदेवइति ग्रन्थान्तरादवगतः (०)॥

हे 'अग्ने' त्वम् 'अस्मभ्यम्' अस्माकं (१) 'महे ऊतये' महते रक्षणाय [अव रक्षणे-इति धातोः ऊति-यूति-जूतीति (२) सूत्रेण निपातितं रूपम्] 'विवस्वत्' (३) स्वर्गादि-लोकेषु विशेषेण निवासस्य हेतुभूतमिदं कर्म 'आभर' सम्पादय। [हृ-ग्रहोर्भश्छन्दसीति भत्वम्] 'हि' यस्मात् त्वं 'नः' अस्माकं 'दृशे' दर्शनार्थं 'देवः' द्योतमानः 'असि'। [इन्द्रादयोनास्माभिर्दृश्यन्ते, त्वं तु गार्हप-

---

I वध्र्यश्वऋषिः अनूपो वा।

(०)—नैगेयादिग्रन्थात्।

(१)—षष्ठ्यर्थे चतुर्थी '२, ३, ६२'-इति कात्यायनवचनम्।

(२)—'ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च' ३, ३, ९७।

(३)—'विवासनवत्, तमसां विवासनकरम्, किन्तत्? सामर्थ्यात् ज्योतिः'-इतिवि०।

२ १ २ २ १ २ २ १
ण्डिया २ । औ॒ऽ । वा॒२३हा॒यि । औ॒ऽ । वा॒२३हा॒२३यि । सा॒२यि
२ ५र र २
ना॒२३४ औ॒हो॒ वा । ह्रश्शे ऽ१ ॥ १८ ॥ १०

इति प्रथमा दशतिः* ॥

त्वादिदेशेऽतिद्योतमानः प्रत्यक्षेण दृश्यसे तस्मात्त्वां विशेषेण प्रार्थयामहे-इत्यभिप्रायः ॥१०॥१०

इति सायणाचार्य्यविरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य प्रथमः खण्डः ॥

---

* मूले महद्‌ग्रन्थेषु मत्प्रतिकपुस्तकेषु सर्वत्रैव 'दशति'-इत्येव पाठः । उदीच्यमुद्रितेऽपि तथैव । विवरणग्रन्थे 'दशत्या'-इत्येवम् । सायण-मते तु खण्डइत्येव साधुः । इह मूलानुरोध एवाश्रितः ।

## अथ द्वितीयखण्डे

सेयं प्रथमा ।

(आयुङ्क्ष्वाहिर्ऋषिः) *।

१ २      ३ १ २    ३ १ २    ३ १ २
नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः ।
१ २ ३ १ २
अमैरमित्रमर्दय ॥ १ ॥ ११

४ ५ र    ४ ५     १ २     १ २
I नमस्तौ । होग्नायि । ओजसाइयि । गृणा२न्ता२३४
५  १ ०     १ २    १ २    ५ र र
यिदे । वाकृष्टया २ः । अमायेः । आ२मा२३४ औहोवा ।
२  ३ १ १ १ १
त्रमर्दया२३४५ ॥ १ ॥११

हे 'अग्ने ! देव' ! 'ते' (१) तुभ्यं 'नमोगृणन्ति' नमस्कार-शब्द-

---

११ इयमुत्तरार्च्चिकस्य ८,१,१२,१ ।

I ऋषिरविदितः संवर्गानाम ।

* —इत आरभ्य खण्डद्वये भाष्यकृता ऋष्यादिकं नोल्लिखितम्। तत्र छन्दसः देवतायाश्च प्रथमखण्डतो वैलक्षण्याभावादकीर्त्तनं सुव्यवस्थितम्, परमृषिनाम्नः प्रकटने कोऽपि हेतुर्नोपलभ्यते; प्रत्युत तत्प्रकाश एव उचितः इति विवरणग्रन्थादुद्धृत्यैव सर्वत्र वेष्टन-चिह्नान्तर्गतः कृतः ।

(१)—'षष्ठ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्'-इति वि० ।

सैषा द्वितीया।

(वामदेवऋषिः।)

१ १ २ ३ १ २ ३ २ ३ १ २
दूतं वो विश्ववेदसꣳ हव्यवाहममर्त्यम्।
१ २ ३ २
यजिष्ठमृञ्जसे गिरा॥ २॥ १२

५र४ २ १ ५र २ १र १
I दूता३०वो३ विश्ववेदसाम्। हव्यवाहाम्। अमा२
५ ५ १ २ १ २—२ ० १
र्त्या२३४ याम्। याजिष्ठम्। ऋ। जसे३हायि। गिरा।
२ १ ५ ५
औ३होवा। हो५इ। डा॥ २॥ १२

मुच्चारयन्ति। किमर्थम्? 'ओजसे' बलाय (२)। के? 'कृष्टयः' मनुष्याः (३) यजमानाः [अतोऽहमपि गृणामीत्यर्थः] त्वं च 'अमैः' बलैः (४) 'अमित्रं' शत्रुम् 'अर्दय' नाशय॥ १॥ ११

हे अग्ने! 'विश्ववेदसं' विश्वं समस्तं वेदोधनं यस्यासौ विश्ववेदाः तम्, सर्वविदं वा। 'हव्यवाहं (५)' देवेभ्योहविषां वोढारम्।

१२ नास्तीयमुत्तरार्च्चिके।

(२)—ओजइति बलनामसु पठितम्-नि० २, ९, १।

(३)—कृष्टिरिति मनुष्यनाम, नि० २, ३, ८।

(४)—'रोगैर्भयैर्वा'-इति वि०।

(५)—"वहश्च ३, २, ६४"-इतिपिवः।

मैषा तृतीया ।

(प्रयोगऋषिः) ।

१ २ २ २ ३ २ ३ १ २ ॰ २
उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः ।
३ १२ २ १
वायोरनीके अस्थिरन् ॥ ३ ॥ १३

'अमर्त्यम्' अमरण-धर्म्माणं 'यजिष्ठम्' अतिशयेन यष्टारं । 'दूतं' देवानाम् । 'वः' त्वां 'गिरा' स्तुति-रूपया वाचा 'ऋञ्जसे' (२) यजमानोऽहं प्रसाधयामि वर्द्धयामीत्यर्थः [ ऋञ्जतिः प्रसाधन-कर्म्मा (६,२,४)-इति यास्कः (३) ॥ २ ॥ १२

हे अग्ने! 'हविष्कृतः'(१)यजमानार्थं 'गिरः'(२)स्तुतयः 'जामयः'(३) स्वसारइव 'देदिशतीः' (४) तव गुणान् दिशन्त्यः 'त्वा' (५) त्वाम्

---

१३ इयमुत्तरार्चिकस्य ७, २, १४, १ ।

(२)—'मध्यमपुरुषैकवचनमिदमुत्तमपुरुषस्य स्थाने द्रष्टव्यम्'-इति वि० ।
(३)—यास्को निरुक्तकारः । निघण्टौ नैगमकाण्डे च पदश्रुतिः ।

(१)—'हविषा याः क्रियन्ते ताः हविष्कृतः, कथम्पुनर्हविषा ताः क्रियन्ते ? आज्ये हि प्रक्षिप्यमाणे वक्त्र्योभवन्ति प्रत्यक्षमेतत्'-इति वि० ।
(२)—'गिरन्ति भक्षयन्ति हवींषि ताः गिरः भक्षयित्र्यः'-इति वि० ।
(३)—'जामयः भगिन्यः, काः पुनरग्नेर्भगिन्यः ? ज्वालाः'-इति वि० ।
(४)—'अत्यर्थं ददत्यः, किं ददत्यः ? सामर्थ्याद् धनम्'-इति वि० ।
(५)—'त्वा'-इत्येतद् द्वितीयैकवचनं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम्, तव'-इति वि० ।

५ र १२र ऽ१ १२ ७ २ १ १
I उपत्वाजा। मयोऽगि। रऔयियय्रू २ः। दायिदीय-
र १ २१ ७ २र १र १ ३ १
तिर्हविष्कृ। तऔऽयियय्रू २ः। वायोरा२३ नी। कयाइ
४ ५ १ २ १र १११
स्थाऽ५ धिराई५ ईन्। अस्थाइगावा२३४५ः॥ २२॥ २

५ र र ५र १ २ १
II उपत्वाजामाईयोगिराः। दाऽयिदिय। ताऽयिः।
२ १ ५ ५र र र र ४ ५ १ २
हवी२ष्का२३४र्त्ताः। वायोरनाहायिकाया। स्थायिरा।
३र ५ ४ ५
औहो२३४वा। ई डा॥ २२॥ १२

उपतिष्ठन्ते। 'वायो': (६) 'अनीके' (७) समीपे त्वां समेधयन्त्यः 'अस्थिरन्' (८) अतिष्ठंश्च॥ ३॥ १३

---

I आभम्।

II औष्टीयम्।

(६)—वाति गच्छति 'कृवापाजिमिस्वदिसाध्यशूभ्य उण् (उ० १, १, १) वायुः। 'वायुर्गन्ता, सर्वयज्ञानग्रहान् प्रति गन्तृत्वव'-इति वि०।

(७)—'अनीक-शब्दोमुख-वचनः'-इति वि०।

(८)—'छन्दसि लङ् लुङ् लिटः (३, ४, ६)' इति काल-सामान्ये लङ्, 'प्रकाशन स्थेयाख्ययोश्च (१, ३, २३)-इति आत्मने पदं व्यत्ययेन भाष्य रन्।

सैषा चतुर्थी।

(मधुच्छन्द ऋषिः)

१ २   ३ १ २ ३ २   ३ २ ३ १ २
उप त्वाग्ने दिवे दिवे दोषा वस्तर्धिया वयम्।
२ ३ १ २ ३ १ २
नमोभर न्तएमसि॥ ४॥ १४

२ १   ४र ५र   १   १   २ १र
I उपात्वा२३ग्नेदिवेदिवायि। दोषा२ वास्ता२ः। धिया-
१   १   ११र   २   १
वयम्। नामो२भारा२। न्तयेमा२३सा३४३यि। औ२३४
५ड्। डा॥ २४॥ १४

हे 'अग्ने' 'वयम्' अनुष्ठातारः 'दिवे दिवे' प्रतिदिनं 'दोषा-वस्तः' (१) रात्रावहनि च 'धिया' बुध्या 'नमोभरन्तः' नमस्कारं सम्पादयन्तः 'उप' समीपे 'त्वा एमसि' त्वामागच्छामः॥ [उप-शब्दस्य निपात-स्वरः २]। 'त्वामौ द्वितीयायाः (८,१,२३)'-इति

---

१४ नास्तीयमुत्तरार्च्चिके। ४
I वैश्वामित्रम्।

(१)—'दोषेति रात्रेर्नाम (नि० १, ७, ८) वस्ता आच्छादयिता, रात्रौ यः स्वेन ज्योतिषा तमांस्याच्छादयति सदोषावस्ता, तस्य सम्बोधनम् हे 'दोषावस्तः!' इति वि०।

(२)—'निपाता आद्युदात्ताः (५, १२)'-इति शान्तनवसूत्रम्।

अथ पञ्चमी।

(शुनःशेपऋषिः)।

१ २   ३ १ २   ३ २ ३   ३ १ २
जराबोध तद्विविड्ढि विशे विशे यज्ञियाय।
१ १   ३ १ २   ३ २
स्तोमꣳरुद्राय दृशीकम् ॥ ५ ॥ १५

युष्मच्छब्दस्यानुदात्तस्त्वादेशः। दोषा-शब्दोरात्रि-वाची (नि०-१,७,८)। वस्तः-इत्यहर्वाची (नि० १,८,१)। द्वन्द्वसमासे कार्त्तकौजयादित्वादाद्युदात्तः ([३])। सावेकाचइति धियोविभक्तिरुदात्ता ([४])। नमः-इति निपातः, ([५]); यद्वा, नव्विषयस्येत्याद्युदात्तः ([६])। भरन्तइत्यत्र शपः पित्वात् ([७]) शतुर्लसार्वधातुकत्वाच्च ([८]) अनुदात्तत्वे सति धातु-स्वरः ([९]) शिष्यते ([१०])।

---

१५ इयमुत्तरार्च्चिकस्य ८, २, ३, १।

(३)—'कार्त्तकौजपादयश्च (६, २, ३७)'-इति पाणिनिसूत्रम्।

(४)—'सावेकाचस्तृतीयादि विभक्तिः (६, १, १६९)'-इति पा०।

(५)—तथाच निपातस्वर आद्युदात्तः।

(६)—'नव्विषयस्यानिसन्तस्य (२, ३)'-इति फि०।

(७)—'सुप्पितावनुदात्तौ (३, १, ४)'-इति पा०।

(८)—'तास्यनुदात्तेत् ङिद्दुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः (६, १, १८६)'-इति पा०।

(९)—'धातोः (६, १, १६२)'-इति पा०। अन्तोदात्तः स्यात्।

(१०)—'सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः'-इति नियमादिति भावः।

४ ५ १ १ १ २ र १
I जारा। बोधा२ बोधा२। तद्विविड्ढायि। विशेवा-
१ र २ ५र र १र २ १र
यिशे२। यज्ञा२३। याया३४औहोवा। स्तोम॰ रुद्राय
२ र १
दृशीकाम् ॥ २५ ॥

५ र र ४ ५ १ २ १ २ १
II जराबोधोवा। ताद्विविड्ढायि। विशायिवा२३
२ २ १र र ७ ४ ५ २र २
यिशे। यज्ञियाया। स्तोमा॰ रुद्रा२३याऽ। दृशीको३४५
इ। डा। २६ ॥ १५

एमसीति 'इदन्तोमसि (७,१,४६)'-इत्यनेन इकारः, 'तिङः-इति (११) निघातः] ॥ ४ ॥१४

हे 'जराबोध' जरया स्तुत्या बोध्यमानाग्ने ! 'विशे विशे' तत्तद्यजमान-रूप-प्रजानुग्रहार्थं 'यज्ञियाय' यज्ञ-सम्बन्ध्यनुष्ठानसिध्यर्थं 'तद्' देवयजनं 'विविड्ढि' प्रविश। यजमानोपि 'रुद्राय' क्रूरायाग्नये तुभ्यं 'दृशीकं' दर्शनीयं समीचीनं स्तोत्रं करोतीति शेषः।

---

I, II द्वे इमे जराबोधीये।

(११)—'तिङतिङः-(८, १, २८)'-इति पा०।

अत्र, यास्क एवं व्याख्यातवान्—"जरास्तुतिः, जरतेः स्तुतिकर्मणः, तद्भावतया बोधयितरिति वा तद्विविड्ढि तत्कुरु, मनुष्यस्य यजमानाय स्तोमं रुद्राय दर्शनीयम् इति" (१०,१,८)। जराबोध, 'जॄष् वयोहानौ' अत्र तु स्तुत्यर्थः(१)। "षिद्भिदादिभ्योऽङ् (३,३,१०४)" इत्यङ् प्रत्ययः, अतष्टाप् (४,१,४), जरया स्तुत्या बोधो यस्यासौ जराबोधः; यद्वा, जरया बोध्यते इति जराबोधः, कर्मणि (२) आमन्त्रिताद्युदात्तत्वम् (३)। विविड्ढि 'विश् प्रवेशने' लोटो हिः (३,४,८,७), 'बहुलं छन्दसि (२,४,७६)'-इति शपः श्लुः, अभ्यास-हलादिशेषौ (६,१,४।७,४,६०) 'हुझल्भ्यो हेर्धिः (६,४,८७)' इति हेर्धिरादेशः, षत्व-ष्टुत्वे (८,२,३६।८,४,४१); यद्वा, विष्लृ व्याप्तावित्यस्य लोण्मध्यमैकवचने अभ्यासस्य गुणाभावः। विशे विशे, सावेकाचइति (६,१,१६८) चतुर्थ्याउदात्तत्वम्। 'अनुदात्तञ्च (८,१,३,)-इत्याम्रेडितानुदात्तत्वम् (४)। यज्ञियाय, 'यज्ञर्त्विग्भ्यां घ-खञौ (५,१,११)'-इति घः। दर्शीकम्, अनिदृशोभ्यांचेति कीकन् प्रत्ययः, नित्वादाद्युदात्तः (५)(०)॥५॥१५

(१)—निघण्टौ तृतीयस्य चतुर्दशे अर्चतिकर्मसु षडनन्तरपाठात्।

(२)—'अकर्त्तरि च कारके सञ्ज्ञायाम् (३, ३, १९)'-इति सूत्रात्।

(३)—'आमन्त्रितस्य च (६, १, १९८)'-इति सूत्रेण।

(४)—'तस्य परमाम्रेडितम्'-इति ८, १, २।

(५)—'ञ्णित्यादेर्नित्यम् (६, १, ११७)'-इति सूत्रात्।

(०)—"अत्रेतिहासमाचक्षते—अग्निः शुनःशेपमुवाच—रुद्रं स्तुहि, रौद्रा हि पशवः; स तं प्रत्युवाच—नाहं जानामि रुद्रं स्तोतुम्, त्वमेव चैनं स्तुहीति। तदेतद्-तया ऋचा उच्यते। ** हे 'जराबोध!' यन्मामवोचः तत्त्वमेव 'विविड्ढि' वेत्थ

अथ षष्ठी ।

(मेधातिथिऋर्षिः) ।

२ ३  १  ३र २ १ २ ३ २ ३ १२
प्रति त्यञ्चारु मध्वरं गोपीथाय प्रहूयसे ।
३ १ २ ३ १ २
मरुद्भिरग्न आ गहि ॥ ६ ॥१६

२ १  ४र ५  २र र १र  २ ३
I प्रतित्या२३ञ्चारुमध्वराम् । गोपीथा । याऽ । प्राहूया
५  २ १ २  १  २र १  २ ४ ५
२३४सायि । मरुद्भिः । आग्ना आगहा । औ३होवा ।
४
होऽ५इ ॥ डा ॥ २७ ॥ १६

---

१६ नास्तीयमुत्तरार्चिके । ५

I मारुतम् ।

जानासि, मारुम्; अथवा 'विविड्ढि' विष्लृव्याप्ताविल्येतस्येदं रूपम्, अयञ्च धातुः, वेषदति कर्मनामसु पाठात् नाम्नां चाख्यातवलात्, कर्म्मणि च करोत्यर्थस्य सम्भवात् करोत्यर्थोऽपि धात्वर्थ एवेति गम्यते, तत् कुर्वित्यर्थः। किन्तत्? उच्यते—'विश्वेविश्वे' मनुष्यस्यार्थाय, 'यज्ञियाय' यज्ञसम्पादिनोऽर्थाय 'स्तोमम्' स्तोत्रम् 'रुद्राय' 'दृशीकम्' दर्शनीयम्। अथवा रोदन क्रियायोगात् अग्निरेवात्र रुद्र उच्यते, जराबोध इत्यपि अन्तरात्मनः सम्बोधनम्। प्रैषश्च। हे मदीयान्तरात्मन्! कुरु—किन्तत्? सर्व मनुष्याणां यज्ञसम्पादिनः अग्नेरर्थाय स्तोमम्"-इति वि०।

अथ सप्तमी ।

(शुनःशेपऋषिः) ।

२ ३ २ ३ १ २ ३१ २ ३ १ ३२
अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ॥
३ १ २ ३ १ २
सम्राजन्तमध्वराणाम् ॥ ७ ॥ १७

[त्यच्छब्दः सर्वनामस्तच्छब्द-पर्यायः] हे 'अग्ने' योयज्ञः चारुः अङ्ग-वैकल्य-रहितः 'त्यम्' तथा.वधं 'चारुम् अध्वरं' 'प्रति' लक्ष्य(१) 'गोपीथाय' सोम-पानाय 'प्र ह्वयसे' प्रकर्षेण त्वं ह्वयसे। तस्मादस्मिन्नध्वरे त्वं मरुद्भिर्देवविशेषैः सह 'आ गहि' आगच्छ ॥ [सेयमृग्यास्केनैवं व्याख्याता—"तं प्रति चारुमध्वरं सोमं पानाय प्रह्वयसे सोऽग्निर्मरुद्भिः सहागच्छ"-इति (१०,२,१२) ॥ ६ ॥१६

अध्वराणां यज्ञानां 'सम्राजं तं' सम्राट्स्वरूपंस्वामिनमग्निं त्वां 'नमोभिः' स्तुतिभिः 'वन्दध्यै' वन्दितुम् (१) प्रवृत्ता इति

---

१७ इयमुत्तरार्चिकस्य ८, १, ७, १ ।

(१)—'प्रतीत्येष लक्षणे कर्मप्रवचनीयः'-इति वि०। 'लक्षणेत्थम्भूताख्यान भागवीप्सासु प्रतिपर्यनवः' १, ४, ९० ।

(१)—'तुमर्थे—से, सेन, असे, असेन् क्से, क्सेन्, अध्यै, अध्यैन्, कध्यै, कध्यैन, शध्यै शध्यैन्, तवै, तवेङ्, तवेनः (३, ४, ९)'-इति पा० ।

१ २ २र ५ १ २ २र ५
I आश्वा। औहो२३४वा। नात्वा। औहो२३४वा।
४र ५ ४ १ २ २र ५ ४ ५र
वारवन्तंवन्दध्या। अग्ना। औहो२३४वा। नमोभिः
४र ५ ४ १ २र २ १ ४ ५ ४
सम्राजन्ताम्। आध्वराणाम्। औ२३होवा। हो५ई।
डा॥ २८॥

५ ५ ४ ५र ४र ५ ४ २ १ र र
II अश्वन्नत्वावारवन्ताम्। वन्दध्या अग्निन्नमोभायिः।
२ १र २ २ १र ४र ५ १ ३ ५
सम्म्राजम्। नमाध्वरा३औहोवा। इहा२३४हाइ।
१र २ ३ ५र र २
औहो३१२। या२३४औहोवा। णा३४५म्॥ २९॥

५ र र ४ ५ २ ३ ५ १ १
अश्वन्नत्वा औहोहायि। वारावा२३४न्ताम्। वन्दा-
५ १ २ २र र ५ १ २
ध्या२३४हायि। अग्नायिन्नमा३४। औहोवा। इहा २३४
५ २ ३ ५ २ १र २ १ ० २
हायि। उक्ववा२३४भीः। सम्म्राज। न्ताऽमध्वरा३४।
१र ४३ ५ १ ३ ५ १र २
औहोवा। इहा२३४हायि औहो३१२३४। णाम्।
५र ५ ४
एहियाई६हा। होऽ५इडा॥ ३०॥ १७

---

I, II, III त्रयाणामेवैषां भृगुःशुनःशेपोवा ऋषिः, वारवन्तीयं नाम।

अथाष्टमी।

(प्रयोगऋषिः)।

२ १ २र २ १ २र
और्वभृगुवच्छुचिमप्नवानवदाहुवे।
२ १ २१ १ २
अग्निꣳसमुद्रवाससम् ॥ ८ ॥ १८

शेषः (२)। अग्नेर्दृष्टान्तः 'वारवन्त' वालयुक्तम् 'अश्वं न' अश्वमिव। अश्वो यथा वालैर्व्यथकान् मशक-मक्षिकादीन् परिहरति तथा त्वमपि ज्वालाभिरस्मद्विरोधिनः परिहरसीत्यर्थः ॥ ७ ॥ १७

'समुद्रवाससं' समुद्रमध्य-वर्तिनं वाड़वं (१) 'शुचिं' शुद्धम् अग्निम् 'और्वभृगुवत्' यथा और्वभृगुः 'अप्नवानवत्' यथा अप्नवानः, तथा 'आहुवे' (२) अहमाह्वयामि ॥ ८ ॥ १८

---

१८ नास्तीयमुत्तरार्चिके। ६

(२)—'इच्छामइति वाक्यशेषः'-इति ।श०।

(१)—'समुद्रइत्यन्तरिक्ष-नाम (नि० १, ३, १५) तत्र निवासोऽयस्य स समुद्रवासाः, तं समुद्रवाससम्, अन्तरिक्षनिवासमित्यर्थः ; वैद्युताग्नि रूपसौ तत्र निवसति। अथवा * *'-इति वि०।

(२)—'बहुलं छन्दसि (६, १, ३४)'-इति ह्वः सम्प्रसारणम्।

५र ४ २ ५ १ २र
I और्वम्भृगुवत्। औहायि। शूश्३४चीम्। आप्नवान

१ १२१ १ १ ११२ १
वदा२ह्ववा२यि। ऊवओयि। अग्ना२यि४ॐसमूरसमुओ।

११२ ११११
द्रवाससा३१ऊवा२३४५॥ ३१॥

२५ ४ ५ ४ ४ १ २र
II और्वम्भृगुवच्छुचिम्। एऽ५। शूऽचीम्। आप्नवान

११ २२१ २१ ० ११२ १ २ २
वदा२इह्ववायि। ह्ववा२३यि। ऊवए। अग्नायिॐसा३मू।

२१ १२२ १ १ र २र २ १ १
समू२३। समूए३। द्रा२वा२३४औवोवा। ससा३मे२३-

११
४५॥ ३२॥ १८

अथ नवमी।

(प्रयोगऋषिः।)

२ १ ११ १ २र२ १२ १ १२
अग्निमिन्धानोमनसा धियॐसचेत मर्त्यः।

२ १ २ २ १ २
अग्निमिन्धे विवस्वभिः॥ ९॥ १९

I और्वं ऋषिः,सामुद्रं समुद्रस्य वासो वा।

II वैधारय ऋषिः, सामुद्रं समुद्रस्य वासो वा।

१९ नास्तीयमुत्तरार्च्चिके। ७

५ ४ ५ र ४ ५ र ५ ३ ४ ५ र
I अग्निमिन्धानोमनसौ। हौहोवाहाइ। धीयꣳसचे-
र र८ १ १ १
तमौ। हो३हा३। हो२३४र्त्तिया:। अग्नाये३म्।
१ ५र र २१ ३ ११११
आयिन्धा२३४ओहोवा। विवस्वभो२३४५ः॥ २३॥ १९

'मर्त्य:' मनुष्योऽग्निमिन्धानः काष्ठैः प्रज्वलयन् मनसा एव श्रद्दधानः 'धियं' कर्म (१) 'सचेत' काले भजेत। 'विवस्वभिः' ऋत्विग्भिश्च (२)अग्निम् एव 'इन्धे' प्रज्वलयति॥

बहृचानाम् "ईधे"—इति पाठः॥ ८॥ १९

---

अथ दशमी।

(वत्सऋषिः।)

२उ २ २१ १२३ १ २ ३ २
आदित्प्रत्नस्य रेतसोज्योतिः पश्यन्ति वासरम्।
३२उ ३ १२ ३ २
परोयदिध्यते दिवि॥ २०॥ २०

---

I अत्रिऋषिः, असङ्गम्।

२० नास्तीयमुत्तरार्चिके। ८

(१)—धीरिति निघण्टौ द्वितीय-प्रथमे कर्मनामसु विंशत्यनन्तरं पठितम्, तृतीय-नवमे प्रज्ञानामसु च षडनन्तरं पठितम्। "अथवा धीरिति प्रज्ञानाम, ताम्, सचेत सम्भजेत लभेतइत्यर्थः"-इति वि०।

(२)—'तमसां विवासयितृभिर्चिर्भिः-इति वि०।

४र  र ४  १र  र
I आदित्प्रत्नापुस्य रेतसाः। ज्योतिः पश्यन्ति वासा२
१  २ १र  १  २ १
राम्। परायार दिध्यताइ। दिवि। द्योइ। द्योइ।
२र १र  २र  १  १ १
औहो औहोवा२३४पुहा उ। वा॥ ३४ ॥ २०

इति द्वितीया दशति॥

'परोदिवि' (१) दिवः परस्तात् [व्यत्ययेन सप्तमी (३,४,८८)। बह्वृचानां दिवेति तृतीयान्तेन व्यत्ययः, दिवि द्युलोकस्योपरि] 'यद्' यदा अयं वैश्वानरोऽग्निः सूर्यात्मना 'इध्यते' दीप्यते 'आदित्' अनन्तरमेव (२) 'प्रत्नस्य' चिरन्तनस्य 'रेतसः' गन्तुः [('री' गति-रेषणयोः, अस्मात् 'सुरीभ्यां तुड् वेत्यतुसुन् तुडागमश्च। यद्वा, रेतसइत्युदकनाम (नि० १,१२,१६) रेतस्विनउदकवतः, साम र्थ्यान्मत्वर्थोलच्यते] इदृशस्येन्द्रस्य सूर्यात्मनः 'वासरं' (३) नियामकं

---

I प्रजापतिऋर्षिः, निधनकामम्।

(१)—'व्यत्ययेन पुंलिङ्गम्, नपुंसकलिङ्गं कर्त्तव्यम्; परम् इध्यते दीप्यते। दिवि द्युलोके'-इति वि०।

(२)—'आत्-इत्-द्वावपि पादपूरणे'-इति वि०।

(३)—'वाशब्दः वैविध्ये वर्त्तते, सर इति सर्त्तेर्गत्यर्थस्य रूपम्, विविधं यद् गच्छति

---

* इति ग्रामे गेय-गाने प्रथमस्यार्द्धः प्रपाठकः॥

वासरस्य निवास-हेतु भूतं वा 'ज्योतिः' द्योतमानं तेजः 'पश्यन्ति' सर्वे जनाः। [यद्वा वासरमित्यत्यन्तसंयोगे द्वितीया (२,३,५), कृत्स्नमहः उदयप्रभृत्यास्तमयात् ज्योतिः पश्यन्तीत्यर्थः 'इसुसोः सामर्थ्ये (८,३,४४) इति विसर्जनीयस्य षत्वम्॥१०॥ २०

इति सायणाचार्यविरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य द्वितीयः खण्डः॥

---

तद् वासरम्; किम्पुनस्तत्? तदेव सूर्याख्यं ज्योतिः, तद्धि दिवा उष्णेन गच्छति रात्रौ शीतेन। * *। अथवा वासरं गमनं तत् करोतीति णिच्, वासरयति वासरयते, अथ वासरं गमयितृ इत्यर्थः; वैद्युतं हि ज्योतिः मेघात् यत् पृथिवीं प्रति उदकं गमयति नयति।—'ये पश्यन्ति जनाः, यच्च वासरम्, यच्च परम् दृश्यते दिवि, तत् पुराणस्योदकस्य सम्बन्धी'-इति वि०।

अथ तृतीये खण्डे—

सैषा प्रथमा ।

(प्रयोगऋषिः)

३ १ २३१ २ ३ १ २ ३ २
अग्निं वोवृधन्तमध्वराणां पुरूतमम् ॥
२३ २३ १२
अच्छा नप्त्रे सहस्वते ॥ १ ॥२१

५ र ४ ५ १ २र र १ २र
I अग्निं वोवृधान्ताम् । आध्वराणाम् । पुरूतामौ ।
र २ १ १ २१ ५ ४
होवा३हा३ । आच्छा२नाप्त्रे२३ । सहो२३४वा । स्वा-
५
५तोई्हाइ ॥ १ ॥

५ ५ २१ र र र
II अग्निं वाईए । वृधन्ताम् । अध्वराणाम् । पुरूतम-
२ १
मच्छा२ होश्इ । ना२३प्त्रे । सहास्वा२३४५ताई५ई्इ ।
३ ५
ई२३४तो ॥ २ ॥

५ ४ ५ ४ १ २ १ र र
III अग्निं वः । ओहाइ । वृधा२३न्ताम् । अध्वराणाम् ।

---

२१ इयमुत्तरार्च्चिकस्य ३, १, २०, १ ।
I, III, II इमानि त्रीण्येव सैन्धुक्षितानि

अथ द्वितीया।

भरद्वाजऋषिः।

२ २ ३ १ २ ३ २ ३ २ ३ २ ३ २ १ २
अग्निस्तिग्मेन शोचिषा यꣳसद्विश्वन्यऽत्रिणम्।
३ १ २ ३ ३
अग्निर्नोवꣳसते रयिं॥ २॥ २२

२ २ २ २ ३ ५ १ २ २
पुरु१नाइमाम्। अच्छानप्त्रो२३४हाइ। साहाइहा।
१ २ ४ ५ ४
स्वता। औ३होवा। होपुइ। डा॥ २॥ २१

'अध्वराणाम्' अहिंस्यानां बलिनां 'नप्त्रे' बन्धुं 'सहस्वते' बलवन्तं [ विभक्ति-व्यत्ययः (१,४,९८) 'वृधन्त' ज्वालाभिर्वर्द्धमानम् 'पुरुतमम्' अतिशयेन बहुमग्निं हे ऋत्विजः! 'वः' युयम् 'अच्छा' (१) अभिगच्छत(२)॥ १॥ २१

'अयम्' 'अग्नि' 'तिग्मेन' तीक्ष्णेन 'शोचिषा' तेजसा 'विश्वं'

---

२२ नास्तीयमुत्तरार्चिके। ६

(१)—'निपातस्य च (६, ३, १३६)'-इति दीर्घः।

(२)—'अध्वराणाम्' यज्ञानां 'वृधन्तम्' वर्द्धयन्तम् 'वः' त्वाम् अग्निम् 'सहस्वते नप्त्रे' बलवत्पुत्र-लाभाय 'अच्छ' आप्तुम् इच्छामि-इत्यर्थः वि०-सम्मतः।

१ २ ३ ५ २ र १ २ ३
I आग्नाओ२३४वा । तिग्मेनाइशा । चाइषाओ२३४
५ १ २ २र ५ १ २ ३
वा । याऽसाओ२३४वा । वा इश्वानिया । त्राइणाओ२३४
५ २ १ ४र र ३
वा । अग्निर्नो२वऽसतेरयी१म् ॥ ४ ॥

४ ५ ४ ५ ३ ५ २ १ ३
II ओहा । ओग्नीः । ता२३४इग्मे । नाशोचा३२४
५ १ ३ ५ २ ३ ५
इषा । यऽसा२द्वा२३४इश्वाम् । नियत्रा२३४इणाम् ।
२ १र १ २ ३ ५र र ३ ५
अग्निर्नो२ । वा२ऽसा२ता२३४औहोवा । रा२३यीम् ॥ ५ ॥

सर्वम् 'अत्रिणम्' अत्तारं राक्षसादिक 'नियंसत्' (१) निहन्तु [बह्वृचा अनुस्वार-स्थाने आकारं कृत्वा "यासत्" इति पठन्ति] अपिच 'नः,' अस्मभ्यमग्निः 'रयिं' धनं (२) 'वंसते' ददातु ।"

"वंसते"-इति छन्दोगाः । "वनते" इति बह्वृचाः ॥ २ ॥ २२

I, II अनयोर्हर-इति नाम, ऋषिरविदित

(१)—यच्छतेर्लेटि रूपम् ।

(२)—निघण्टौ द्वितीय-दशमे धननामसु पठितमष्टमम् ।

अथ तृतीया।

(वामदेवऋषिः)

१ २ ३ २ ३ २ ३ २ ३ १ २ ३ १र २र
अग्ने मृड महाँ असि य ईमा देव युञ्जनम्।
३ १ २ ३ २ ३ १ २
इयेथ बर्हिरासदम्॥ ३॥ २३

५ ४ ५ ४र ५ र ४ ५र ४ १
III अग्निस्तिग्मेनशोचिषा। इहा। यऽंसद्विश्वं
१ २ १ र १ २ १
न्यत्रिणा२म्। इहा। अग्निर्नोवंसता२इ। इहा३रा२
५ ५
३४योई्हाइ॥ ६॥ २२

१ ७ ३ २ २ ५ १
I अग्नाइमृडा२ऽ०। महाँ आ२३४सी। अय
र २२ ३ ५ १ र ३ २
आदा२इ। वयुञ्जा२३४नाम्। इयेथबा२३। र्हिरा३
४
सा५दाई५ईम्॥ ७॥

---

२३ नास्तीयमुत्तरार्चिके। १०

III इहवद्वामदेव्यम्।

I यामम्।

२ ४र ३ ४ ३र ४ ५ ३र २ ४ ५ २ ४ ३र ४र
II अग्नेमृडमहाऽ॰असि। ओहाइओहा। अयआदे-
२ ४ ५ ३र २ ४ ५ २१र २ ३ २ ४
वयुञ्जनम्। ओहाइओहा। इयेथा२३व। र्हिरा ३सापु
दा६५ई म्॥ ८॥ २३

५ र २ ४र ५र ४ ५ १ र २ १ २
I अग्नेरा३क्षाणो अ॰ह्सः। प्रतिस्मदेवरिषा२३ता:।
१ २ १ र २ १
तपाइष्ठा२३इरा। जरौदा२३हा३४३। औ२३४५इ।
डा॥९॥ २४

हे 'अग्ने'! 'मृड' अस्मान् सुखय। स त्वं 'महान् असि' प्रभूतो भवसि। 'यः' त्वम् 'अयः' गन्ता 'देवयुं' (१)देवानां कामयितारं 'जनं' यजमानं 'बर्हिः' दर्भम् (२)'आसदम्' यज्ञे आसत्तुम् (३) 'आ इयेथ' (४) आगच्छसि॥

"अयः"-इति छन्दोगाः। "ययीम्"-इति बह्वृचाः॥ ३ ॥२३

---

II इदमपियामम्।

I राक्षोघ्नम्।

(१)—देवान् यष्टुमिच्छतीति क्यचि 'क्याच्छन्दसि (३, २, १७०)'-इति उः।

(२), (३)—'बर्हिः'—द्वितीयैकवचनमिदं सप्तम्येकवचनस्य स्थाने द्रष्टव्यम्, बर्हिषि। 'आसदम्'-इदमपि द्वितीयैकवचनं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम्, आसदे आसदनायेत्यर्थः'-इति वि०।

(४)—'छन्दसि लङ् लुङ् लिटः (३, ४, ६)'-इति लिट्।

अथ चतुर्थी।

(वसिष्ठऋषिः)

२३ १ २ ३ १ २ ३ १ २ ३ २
अग्ने रक्षा णो अंहसः प्रति स्म देव रीषतः।
१ २ ३ १ २
तपिष्ठैरजरो दह ॥ ४ ॥२४

हे 'अग्ने'! त्वं 'नः' अस्मान् 'अंहसः' पापात् 'रक्ष' पाहि [संहितायां(१) दीर्घश्छान्दसः(२)] अपिच हे 'देव' द्योतमानाग्ने! 'अजरः' (३) जरा-रहितस्त्वं 'रीषतः' हिंसतः शत्रून् [संहितायां दीर्घश्छान्दसः] 'तपिष्ठै(४)' अतिशयेन तापकैस्तेजोभिः 'प्रति दह स्म' (५) भस्मीकुरु॥

स्मेति सकारस्य संहितायां "प्रति ष्म"-इति षत्वं (६) बह्वृचाः कुर्वन्ति॥ ४॥ २४

---

२४ नास्तीयमुत्तरार्च्चिके। ११

(१)—'अग्ने रक्षाणो'-इत्यादौ ऋक्पाठे।

(२)—'द्व्यचोतस्तिङः (६, ३, १३५)'-इति सूत्रेण। तत्रैव रक्षाणइति णत्वमपि 'नश्च धातुस्थोरुषुभ्यः ८,४, २७)'-इति छान्दसम्।

(३)—'जरा स्तुतिः, सा यस्य कर्त्तव्यत्वेन विद्यते (तान् नास्तिकान्)'-इति वि०

(४)—'अन्येषामपि दृश्यते (६, ३, १३६)'-इति सूत्रेण।

(५)—'स्म-इति पादपूरणः'-इति वि०।

(६)—अनादिष्टस्यापि 'पूर्वपदात् (८, ३, १०६)'-इति षत्वम्।

अथपञ्चमी।

(भरद्वाजऋषिः)

१ २ ३ १र　　२र　　३ १२
अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः ।
३ १२ ३ १२
अरं वहन्त्याशवः ॥ ५ ॥ २५

५ र२　४र ५ ४र ५　१ र र र १र　२
I अग्ने यू३ऽङ्क्ष्वाहियेतवा । अश्वासोदेवसाधा२३वाः ।
१　२　१र　१
अरंवा२३हा । तियाशा२३वा३४३ः । ओ२३४५इ ।
डा ॥ १० ॥ २५

हे 'देव' द्योतमान! 'अग्ने!' तानश्वान् 'युङ्क्ष्व' आत्मीये रथे योजय [वह्वृचास्तैत्तिरीयाश्च विकरण-प्रत्ययस्य लोपं कृत्वा "युङ्क्ष्व"-इति पठन्ति] ये 'तव' त्वदीयाः 'साधवः' साधकाः सुशीलावा 'अश्वासः' (१) अश्वाः 'आशवः' क्षिप्रगामिनः (२) 'अरम्' अलं पर्याप्तं त्वदीयं रथं 'वहन्ति' (२) ॥

---

२५ इयमुत्तरार्च्चिकस्य ६,२,२,१ ।
I इयमपि राक्षोघ्नम् ।

(१)—'आज्जसेरसुक (७, १, ५०)'-इत्यसुकि रूपम् ।
(२)—नि० २, १५-१६ ।
(३)—अस्मावृत्ति चेति पादपूरणार्थः ।

अथ षष्ठी ।

(वशिष्ठऋषिः)

१ २ ३ १ २ ३ २

नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम् ।

३ १ २

सुवीरमग्न आहुत ॥ ६ ॥ २६

५ र २ ४ ५ १ २ १

I नित्वा । होइइ । न । क्षिया । वाइश्पताइ । द्युम-

२ १ २ ३ ५ ४ २र १ २र

न्तम् । धाइ । माहेवा२३४याम् । सुवाहाइ । रामग्ना

१ ५ ४ ५

औ२३वा । होपुतो६हा इ ॥ ११ ॥ २६

"वहन्त्याशवः"-इति छन्दोगाः । "वहन्ति मन्यवः"-इति बह्वृचाः ॥ ५ ॥ २५

'नक्ष्य' ! उपगन्तव्य ! [ नक्षतिर्व्याप्ति कर्मा (१) ] 'विश्पते' विशां पते ! (२) 'आहुत' सर्वैर्यजमानैरभिहुत ! हे 'अग्ने !'

---

२६ नास्तीयमुत्तरार्चिके । १२

I वैश्वमनसम् ।

(१)—निघण्टु-द्वितीयाष्टादशे व्याप्तिकर्मसु 'नक्षते २' इति पाठात् ।

(२)—निघण्टु-द्वितीय-तृतीये मनुष्यनामसु 'विशः'-इति षष्ठं पदम् ।

अथ सप्तमी।

(विरूपऋषिः)

१ २३ २ ३ २ ३ १२ २२ ३ २ ३ २
अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्।
३ १ २२
अपाᳩरेताᳩसि जिन्वति॥ ७॥ २७

५ २२ ५ १ १ १२
I अग्निर्मूर्द्धादोईवःककूत्। पातो२ःपार्थो२। विया
१ १ १ २
अयाम्। आपा२ᳩराइ.ता२। सिजिन्वा२३ता३४इ।
१
ओ२३४५ूइ। डा॥ १२॥ २७

'द्युमन्तं' दीप्तिमन्त' 'सुवीरं' कल्याण-स्तोटकं (१) 'त्वा' त्वां वयं 'नि धीमहे' निहितवन्तः॥

"धीमहे वयम्"-इति छन्दोगाः। "देव धीमहि"-इति-बह्वृचाः॥ ६॥ २६

'मूर्द्धा' देवानां श्रेष्टः 'दिवः' द्युलोकस्य 'ककुत्' उच्छ्रितः

---

२७ इयमुत्तरार्चिकस्य ७, १, १६, १।
I आर्षेयम्।

(१)—'शोभनाः वीराः पुरुषाः ऋत्विगाख्याः परिचारकत्वेन सम्बन्धिनो यस्य स सुवीरः, तं सुवीरम्, शोभनैर्वीरैः सम्बद्धमित्यर्थ'-इति वि०।

अथाष्टमी।

(शुनःशेपऋषिः ।

१ २ ३ २उ ३ १ २ ३ १ २ ३ १र २र
इममू षु त्वमस्माकꣳ सनिं गायत्रं नव्याꣳसम् ।
१ २ ३ २ ३ १ २
अग्ने देवेषु प्र वोचः ॥ ८ ॥ २८

५ र २ १ ५ १ १
I इममूषू । त्वमास्मा२३४काम् । सानी२ꣳ होइ ।
१ १ २१ २ १ १
गाया२ हो । त्रन्नव्या२३ꣳसाम् । आग्ने२ होइ । दाइ-
१ २१ १ १
वा२ हो । षुप्रावो२३चा३४२ः । ओ२३४५ इ । डा ॥ २८॥

'पृथिव्याः' च 'पतिः' 'अयम्' अग्निः 'अपां रेतांसि' (१) स्थावर-जङ्गमात्मकानि भूतानि 'जिन्वति' प्रीणयति ॥ ७ ॥ २७

हे 'अग्ने' ! त्वम् 'अस्माकम्' अस्मत्सम्बन्धिनम् ["अस्मभ्यम्"-इति

---

२८ इयमुत्तरार्चिकस्य ७, १, ४, १ ।

I सोमसाम ।

(१)—'अप इत्यन्तरिक्षनाम (नि० १, ३, ८) ; रेत इत्युदकनाम (नि० १, १२, १६) ; अन्तरिक्षस्य सम्बन्धेन अन्तरिक्षस्य सारभूताः। अथवा अपां वीर्याणि रेतांसि तानी-त्यर्थः। 'जिन्वति' प्रीणयति। कुत एतत् ? 'अग्निर्वा इतोवृष्टिं समीरयति'-इति श्रुतेः' इति वि० ।

अथ नवमी ।

(गोपवनऋषिः) ।

१ २ ३ १२ ३ १र २र
तं त्वा गोपवनोगिरा जनिष्ठदग्ने अङ्गिरः ।
१ २ ३ १ २
सपावक श्रुधी हवम् ॥ ९ ॥ २९

तैत्तिरीयाः] 'इममूषु' (१) पुरोदेशेऽनुष्ठीयमानमपि 'सनिं' हविर्दानं 'नव्यांसं' नवतरं ["नवीयांसम्" इति तैत्तिरीयाः] 'गायत्रं' स्तुतिरूपं वचोपि 'देवेषु' देवानम् अग्रे 'प्रवोचः' प्रब्रूहि (३)॥ ८ ॥ २८

हे 'अग्ने' ! 'तं' 'त्वा' 'त्वं' 'गोपवनः' ऋषिः 'गिरा' स्तुत्या 'जनिष्ठत्' जनयति वर्द्धयति [स्तूयमाना हि देवता वर्द्धन्ते] तादृशाग्ने

---

२९ नास्तीयमुत्तरार्च्चिके । १३

(१)—'ऊ षु-इति द्वावपि पादपूरणे'-इति वि० ।'सुञः (८, ३, १०७)'-इति षत्वम् ।

(२)—'षणु दाने' तनादिः, तस्य रूपम् । 'छन्दसि वनसनरक्षिमथाम् (३, २, ६७)'-इति इनि रूपम् ।

(३)—'नूवः खतमिन् यौ च (४, ४, १३३)'-इति य-प्रत्यये नव्यम्, तस्यातिशय्ये 'नव्यांसम्' ; 'देवेषु' देवेभ्यइत्यर्थे । तथाच हे अग्ने ! पूर्वैः कृतं नवतरं स्तोत्रम् अस्मद्दत्तं पुरोडाशादिदानञ्च देवेभ्यः 'प्रवोचः' प्रकर्षेण ज्ञापय-इत्यर्थौ वि० सम्मतः ।

(१)—अगिगताविस्यस्य रूपम् । 'अङ्गिरा जाठरोग्निः तस्य सम्बोधनम्, हे अङ्गिरः ! शरीरस्थितिहेतोः ! अशितपीतरसस्य कर्त्तः ! इत्यर्थः'-इति वि० ।

अथ दशमी ।

(वामदेवऋषिः) ।

२ ३ १ २ २ ३ ३ २ ३ १ २
परि वाजपतिः कविरग्निर्हव्याः न्यक्रमीत् ॥
२ ३ १ २ ३ १ २
दधद्रत्नानि दाशुषे ॥ १० ॥ ३०

५ र र १ २ ५ २ १ २ १
I तं त्वागोपा । वानो२गा२३४इरा । जनाइष्ठदा ।
७ २ ५ २ ३ ५ २ १ २
अया२ङ्गा२३४इराः । सपौवाओ२३४वा । कौवाओ२३४
५ ४
वा । श्रुधीपुह्वाम् । हो ५इ । डा ॥ १४ ॥ २९

'अङ्गिरः' (१) सर्वत्र गन्तः, अङ्गिरसां पुत्रो वा हे 'पावक' शोधक ! गोपवनस्य 'हवम्' आह्वानं 'श्रुधि' (२) शृणु ॥

"तं त्वा"-इति-"जनिष्ठत्"-इति च छन्दोगाः, "यं त्वा"-इति "जनिष्ठत्"-इति च बह्वृचाः ॥ ८ ॥ २९

---

३० नास्तीयमुत्तरार्चिके । १४

I गौपवनम् ।

(१)—☞ पूर्वपृष्ठायाम्——(१)

(२)—'श्रु शृणु पृक्ष्वयस्कन्दसि (६, ४, १०२)'-इति सिद्धम् ।

अथैकादशी ।

(काण्वऋषिः ।)

२३ २ ३ १ २ ३ १ २ ३ १ २
उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
३ १२ २२ ३ १ २
दृशे विश्वाय सूर्यम् ॥ ११ ॥ ३१

४ ५र ४ ५ २ १ २ १ २ र
I पर्यौ । होइवाजा । पताइः का१वी२ः । आग्निर्हव्या
१ ७ १ १ ३ ५र र
नायक्रमी२त् । दधा२३त् । रा२त्ना२२४ओहोवा ।
२ र १ ३ १ १ १ १ १
निदाशुषे२३४५ ॥ १५ ॥ ३० ॥

'वाजपतिः' वाजानामन्नानां (१) पतिः पालकः [परि वाजपतिः कविरित्येष हि वाजानां पतिरिति ब्राह्मणम्] 'कविः' क्रान्तदर्शी मेधावी वा । 'दाशुषे' हविर्दत्तवते यजमानाय 'रत्नानि' रमणीयानि धनानि 'दधत्' प्रयच्छन् 'अग्निः' 'हव्यानि' हवींषि 'पर्यक्रमीत्' परिक्रामति (४) व्याप्नोतीत्यर्थः ॥ १० ॥ ३०

---

३१ नास्तीयमुत्तरार्चिके । १५

I सूर्यवर्चावा वसुरोचिर्वा ऋषिः, सूर्यसाम ।

(१)—वाजइत्यन्ननामसु पठितम्, निघण्टु-द्वितीय-सप्तमे प्रथमानन्तरम् ।

(२)—मेधाविनामसु दशमं कविरिति नि० ३, १५ ।

(३)—'दाश्वान् साह्वान् मीढ्वांश्च (६, १, १२)'-इति सिद्धम् ।

(४)—'नीतवानित्यर्थः । कनप्रति ? सामर्थ्यात—देवान्'-इति वि० ।

४ ५ ४    १   ७ २   ५
I उदुत्यम। ओहाइ। जा। तवे२दा२३४साम्।
२र १   २ २   ५   १   र ५   १   २र १र
देवंवहा। तीकेता२३४वाः। दा२३४ग्नौहाइ। वाइश्वायसू।
४ ५   ४
र्याम्। औ२३होवा। होपुइ। डा॥ १ ॥ ३०

इयं सौरी। (१) आग्नेय-समाख्यानं छत्रिणोगच्छन्तीति-वत् (२) प्राणभृतउपदधातीतिवच्च (३) द्रष्टव्यम्(४)॥

---

I अस्यापि सूर्यवर्चावसुरोचिर्वा ऋषिः, इदमपि सूर्यसाम।

(१)—यद्यपीयं सौरी, तथाप्यग्निं वोदृधन्तमिति खण्डेऽस्मिन् प्रथमादि-मन्त्राणा-मग्नि-पदोपेतत्वात् तस्यैव प्राधान्यात् तत्समवायात् इयमाग्नेयीत्युपचर्य्यते। तत्र दृष्टान्तमाह—

(२)—लौकिकदृष्टान्तमेतत्। छत्रिसहितसेनासु गच्छत्सु छत्रिणः प्राधान्यस्य सम-वायात् उपचारात् अप्रधानानां हि सेनानां यथा छत्रिशब्देन ग्रहः तथा अत्रापीत्यर्थः; तदुक्तम्—“तास्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात्तथैव च। तत्साहचर्य्याच्च तादर्थ्यात् ज्ञेया वै लक्षणा बुधैः”; तत्र चेयमजहत्स्वार्था।

(३)—वैदिक-दृष्टान्तमेतत्। अस्त्यग्न्याधाने इष्टकोपधानविधिः। तदेवं श्रूयते—“प्राणभृत उपदधाति”; तत्र “अयं पुरोभवस्य प्राणोभौवायनः”-इत्येकस्यैव प्रथमस्यास्य मन्त्रस्य प्राणशब्दोपेतत्वेऽपि “तत्सिद्धि-जाति-सारूप्य-प्रशंसा-भूम-लिङ्ग-समवायात् (१, ४, १९)”-इति जैमिनि-शासनात् प्राण-लिङ्गक-तन्मन्त्र-समवेताः अन्येऽपि प्राणभृच्छब्देन लक्ष्यन्ते; तथा चोक्तम्—“तत्सिद्धि-जाति-सारूप्य-प्रशंसा-लिङ्ग-भूमभिः। षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पिता”-इति।

अथ द्वादशी ।

(मेधातिथिर्ऋषिः)

१ २ ३ १र २र ३ १ २ ३ २
कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे ।
३ १ २ ३१ २
देवममीवचातनम् ॥ १२ ॥ ३२

'केतवः' प्रज्ञापकाः (५)सूर्याश्वाः [यद्वा, सूर्य-रश्मयः] 'सूर्यम्' सर्वस्य प्रेरकमादित्यम् 'उद्वहन्ति' ऊर्ध्वं वहन्ति 'उ' इति पाद-पूरणः। [उक्तञ्च—"मिताक्षरेष्वनर्थकाः कमीमिद्विति" (६)] किमर्थम ? 'विश्वाय' विश्वस्मै (७) सर्वस्मै भुवनाय 'दृशे' द्रष्टुं। यथा सर्वे जनाः सूर्यं पश्यन्ति तथोर्ध्वं वहन्तीत्यर्थः । कीदृशं सूर्यम् ? 'त्यं' तं प्रसिद्धम्, 'जातवेदसं' जातानां प्राणिनां वेदितारं, जात-प्रज्ञं, जात-धनं वा, 'देवं' द्योतमानम् [अत्र निरुक्तम्—'उद्वहन्ति जातवेदसं देवमश्वाः केतवोरश्मयोवा सर्वेषां भूतानां सन्दर्शनाय सूर्यम् (१२, २, ४)-इति ॥ ११ ॥ (८) ३१

---

३२ नाग्नेयमुत्तरार्चिके । १६

(५)—प्रज्ञा-नामसु केतुरिति द्वितीयम् नि० ३, ९।

(६)—अत्र नैरुक्त-प्रथमाध्याय-द्वितीयपाद-चतुर्दश-खण्डे । मिताक्षरेषु ग्रन्थेषु कम्, इम्, इत्, उत्-इति चत्वारः पद पूरणाः-इति तदर्थः।

(७)—'षष्ठ्यर्थे एषा चतुर्थी'-इति वि० ।

(८)—'एकमेवेदं ज्योतिः त्रिधा विभक्तमित्येवमग्नेःयत्नमविप्रतिषिद्धम्'-इति वि०

अथ त्रयोदशी।

(सिन्धुद्वीपोऽम्बरीषो वा त्रितआप्त्यो वा ऋषिः)

१ २ ३ २३ १ २ ३ १ २ ३ १ २

शन्नोदेवीरभिष्टये शन्नोभवन्तु पीतये।

२उ ३ १ २

शंयोरभिस्रवन्तुनः॥ १३॥ ३३

५ ३ १ १ ३ ५र र

I कविमग्निमोम्। उपा२३। स्तू२हा२३४औहोवा।

३ १२र १ र २र २ र १र २

सत्यधर्माणमध्वरे। देवाम्। अमीवचाता२३ना२३४३म्।

१

ओ४५इ। डा॥ १७॥ ३२

हे स्तोतृसङ्घ! (१) 'अध्वरे' क्रतौ 'अग्निम्' 'उपस्तुहि' उपेत्य, स्तुतिङ्कुरु कीदृशम्? 'कविं' मेधाविनं 'सत्य-धर्माणम्' सत्य-वचनरूपेण धर्मेणोपेतं (२) 'देवं' द्योतमानम् 'अमीवचातनम्' अमीवानां हिंसकानां शत्रुणां वा घातकम्॥ २॥ ३२

---

३३ नास्तीयमुत्तरार्च्चिके।१७

I वसुरोचिऋषिः, काव्यम्।

(१)—'अन्तरात्मनस्वाय प्रेषः। हे मदीयान्तरात्मन्!-'इति वि०।

(२)—'सत्यकर्माणम्'-इति वि०।

५ र र    २ १    २    ५ र    २ १र
I शन्नो देवीः । अभिष्टा२३या३४इ । शन्नो भवा । तुपी

२    ५ र    २ १    ३
ता२३या३४इ । शंयोरभी । स्रव । तू२ । ना२३४ ।

५र र    ३    ५
औ३होवा । ऊ२३४पा ॥ १८ ॥

३ २    १    र ५र र    ४    ५    ३ २
II हुवा३हो२३४इ । शन्नोदेवीः । अभिष्टयाइ । हुवा३

१    र ५    ४ र ५    ३ २    १
हो२३४इ । शन्नोभव । तुपीतयाइ । हुवा३हो२३४इ ।

र ५    ४ ५    २ २    १    ३    ५र र
शंयोरभि । स्रवन्तुनाः । हुवा३हो२ । वा२३४औ३होवा ।

३    ५
ऊ२३४पा ॥ १९ ॥ ३३

'नः' अस्माकं पापापनोद-द्वारेण 'शं' सुखं (१) भवन्तु । 'देवीः' देव्यः आपः 'अभिष्टये' (२) अस्मद्यज्ञाय भवन्तु, यज्ञाङ्गभावाय च भवन्त्वित्यर्थः । अपिच, 'नः' अस्मत्सम्बन्धिने 'पीतये' (३) पानाय च

---

I, II अनयोः पारावतिर्ऋषिः,
काशीतं कापीतं वा सुमन्दं वा नाम ।

(१)—निघण्टौ सुखनामसु शं द्वादशम् (३, ६)।

(२)—'अभिष्टये अभिगमाय, अपां हि किमभिगमनम्? स्नानादिभिस्तत्पुनराऽऽसेवनम् तदर्थम्' इति वि०।

(३)—'स्थागापापचोभावे (३, ३, ९५),-इति क्तिनि रूपम्।

अथ चतुर्द्दशी।

(उशना ऋषिः)

१ २ ३१२ २२ ३ १ २
कस्य नूनं परीणसि धीयोजिन्वसि सत्पते।
१ २ ३ १ २ ३ १ २
गोषाता यस्य ते गिरः॥ १४ ॥३४

१ २ २ १ ३ ५ १ २
I कस्यानू१ना२म्। परोणा२३४सी। धियोजिन्वा२।
३ १ ३ ५ १२२२ २ १ १ ३ ५२ २
सिसत्पा२३४ताइ। गोषातायाा२३। स्या२ता२३४औहो-
२ ३ ५
वा। उप्। गो२३४राः॥ २०॥ ३३

'शं' सुखंभवन्तु। तथा, 'शम्' (४) उत्पन्नानां रोगाणां शमनम् 'योः' यापनम् अनुत्पन्नानां पृथक्करणं च कुर्वन्तु। अपिच, 'नः' अस्माकम् 'अभि' उपरि स्रवन्तु, अत्यर्थं सिञ्चन्तु॥

"शन्नोभवन्तु"-इति छन्दोगाः। "आपोभवन्तु"-इति बह्वृचाः तैत्तिरीयाश्च॥ ३॥ ३३

---

३४ नास्तीयमुत्तरार्च्चिके।१८

(४)—'शमनं शम्, यापनं युः अपनयनमित्यर्थः, द्वे अप्येते प्रथमैकवचने चतुर्थ्येकवचनस्य स्थाने द्रष्टव्ये; शमनाय, कस्य? सामर्थ्यात् रोगाणाम्; यापनाय, कस्य? सामर्थ्याद् भयानाम् अभिस्रवन्तु'-इति वि०।

२र र   १   २३१   र   ४   १र १
II औहोइहुइवाइरइ। हुवए। कस्यनूनाइम्पाइरीण-
५   २र र   १   २३२   र   ५
सि। औहोइहुइवाइरइ। हुवए। धियोजिन्वाइसी

हे 'सत्पते' सतां पते ! अग्ने! 'नूनम्' इदानीं 'कस्य' कीदृशस्य जनस्य 'परीणसि ब्रह्माणि (१) 'धियः' कर्माणि (२) 'जिन्वसि' प्रीणयसि। 'यस्य' 'ते' तव सम्बन्धिन्यः 'गिरः' स्तुतयः 'गोषाता' गोसातौ (३) गवां लाभे भवन्तु खलु। तस्मात्त्वं कुत्र तिष्ठसि ? अस्माकमिदानीं गवेच्छा प्र वर्तते ॥

यद्वा। हे अग्ने ! त्वमिदानीं कस्य कर्माणि प्रीणयसि ? न कस्यापीत्यर्थः। अस्माकमेव कर्माणि प्रीणयेतिभाव (४) ॥

---

I, II अनयोः गौराङ्गिरसोगोतमोवा ऋषिः, मनाज्यं नाम।

(१)—परीणसीति बहुनामसु निघण्टु-तृतीय-प्रथमेऽष्टमम्।

(२)—धीरिति कर्मनामसु एकविंशतितमम् नि २, १।

(३)—'ऊतियूतीत्यादिना (३, ३, १०) सिद्धम्। 'सनोतेरनः (८, ३, १०८)'-इति षत्वम्।

(४)—"कमिति सुखनाम (नि ३, ६, ७) तस्य सुखस्येतार्थः। 'नूनं' निश्चयेन। 'परीणसि' सप्तम्येकवचनमिदं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम्, परीणसः बह्वीरित्यर्थः। 'धियः' प्रज्ञाः। 'जिन्वसि' प्रीणयसि पूरयसि, प्रज्ञा-सुखाभ्यां पूरयन् सुखिनः करोतीत्यर्थः। 'सत्पते' सतां पालयितः !। कस्य पुनः प्रज्ञा-सुखेन पूरयसि ? उच्यते 'गोषाता यस्य ते गिरः' गो-शब्देनात्र सोमउच्यते, सातादित्यपि सनोतेः सम्भजनार्थस्य

२ ३५ २र र १ २३२ र र र
इसत्पताइ। औहोइहूइवा३२इ। हुवए। गोषातायइ।
३ २ ४
स्यताइइगापुइराईपुई: ॥ २१ ॥३४

इति तृतीया दशति।

"परीणसि"-इति "सत्पते"-इति च छन्दोगाः; "परिणसः" इति "दस्पते" इति च बह्वृचाः ॥१४॥३४

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य तृतीयः खण्डः॥

---

कृण्वन्, सोमान् याः सम्भजन्ते ताः गोषाताः, सोमानां सम्भक्त्र्यः, सोमैः सह याः क्रियन्ते इत्यर्थः। 'यस्य' यजमानस्य 'ते' तव सम्बन्धिन्यो 'गिरः' स्तुतयः सोमेन सह, ताभिः भक्त्वा स्तौतीत्यर्थः"-इति वि०।

यज्ञायज्ञेति-खण्डेषु विंशेष्वष्टौ च विंशतिः।
ऋचोऽत्र्यहत्य (१) आग्नेय्यस्त्वन्ना तिस्त्रइमाऋचः॥ १
अधज्मो अधवेत्यैन्द्री प्रै वित्यृग् ब्रह्मणस्पतेः।
ऊर्ध्वऊष्विति यूपस्य तं स्तुतिरग्नेरपीतराः (२)॥ २
समाख्या प्राणभृन्नायादिति पूर्वमुदीरितम् (३)।
तदा तदाऽभिधास्यन्ते ऋषयः पूर्ववत् क्रमात्॥ ३

अथ चतुर्थ-खण्डे—

सेयं प्रथमा।

शंयुर्ऋषिः।

२ ३ १ २    १ २ ३ ३ १ २    ३ १ २
यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे।
१ २ १२३१२ ३ १ २    ३१ १ २र    २र
प्र प्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम्॥ १॥ ३५

---

३५ उत्तरार्च्चिकस्य १, १, २०, १।

(१)—'बृहती परिबर्हणात्'-इति नै० ७, ३, ८। उक्तं पुरस्तात् 'गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टुभोभवति' तथाच पूर्वोक्ता अनुष्टुबेव परिबर्द्धिता बृहती भवतीति तदर्थः।

(२)—यज्ञायज्ञा वोअग्नये-इत्याद्येकं खण्डम्, तत्र सन्ति ऋचोदश; एनावोअग्निमित्यादि द्वितीयम्, तत्रापि दश; देवोवोद्रविणोदाइति तृतीयम्, तत्राष्टौ; एवं मिलित्वा अष्टाविंशत्यृचो इङ्गत्यः, बृहतीच्छन्दस्काः। तत्र एनेति खण्ड-गता 'अधज्मो-अधवेत्यष्टमी ऋक्, देवोवोद्रविणोदेति-खण्ड-गता प्रैलिति द्वितीया, ऊर्द्ध्वेति तृतीया,

५ र २र १ २ १ २र
I यज्ञायज्ञा । वो अग्नयाइ२इ । गिरा२गिरा३४ । च्चा

२ १ २ ३ ५ १ २ ३ १ २र १
होइ२इ । यादक्षा२३४साइ । प्रप्रा२वयमम्नतञ्ज्ञा । ता

२ १ २ १ २र
वे१दासा२म । प्रियम्मित्राम । नश्शं९सिषाम । एह्वि-

२ १र र
या । औहोहो२३४५इ । डा ॥ २२ ॥

४ १र ४ ५र २ १ २ २ ५ ६ २ र ११
II यज्ञायज्ञ । चोइ । वो२अग्नयए३४हिया । गिरागिरा ।

१ २ २ १ २ २र २ १ २ १ २ १ ३
चा२दक्षसाइ । प्रप्रावयाम । अमृतञ्ज्ञा३ । तवे२दा

५ २ १ २ १ १र २
२३४साम । प्रियम्मित्राम । नश्शं९सिषाम । एह्विया

१र
औहो२३४५इ । डा ॥ २३ ॥

हे स्तोतारः ‘वः’ यूयं ‘यज्ञा यज्ञा’(१) यज्ञे यज्ञे सर्वेषु

---

I, II अनयोः भरद्वाजऋषिः, उपह्वम् ।

एतास्तिस्रोवर्जयित्वा अवशिष्टाः आग्नेय्यः ; तासु च तिसृषु प्रथमा ऐन्द्री, द्वितीया ब्रह्मणस्पति-देवताका, अन्त्या यूपस्य स्तुत्यात्मिकेति-स्फुटार्थः ।

(२)—पूर्वम् उदुत्यमित्येतस्यां एतत्सर्गव्याख्यानावसरे ।

(१)—‘सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः (७, १, ३९)’-इति सप्तम्येकस्यात्वम् । ‘नित्यवीप्सयोः (८, १, ४)’-इति वीप्सायां द्विर्वचनम् ।

१ र १ १ र
III याज्ञायाज्ञा२। वो अग्नाया२इ। गाइरागाइरा२।
१ ० १ १ २
चादक्षासा२इ। प्रप्रानाया२म्। अम्टत ञ्जा३।
१ ३ ४ १ १ ७
तवे२दा२३४साम्। प्रायम्माइत्रा२म्। नाग्र९सा२३
२ १
इ षा३४३म्। ओ२३४५इ। डा॥ २४॥

यागेषु 'दक्षसे' प्रवृद्धाय 'अग्नये' (२) 'गिरा गिरा' स्तुतिरूपया वाचा स्तोत्रं कुरुतेतिशेषः ['च'-शब्दोभिन्नक्रमोवइत्यस्मात्परोद्र-ष्टव्यः(३)]यूयं च स्तोत्रं कुरुत, वयमपि तमग्निं 'प्र प्र शंसिषम्' ['प्रसमुपोदः पादपूरणे (८,१,६०)'-इति प्र-शब्दस्य द्विरुक्तिः पाद-पूरणार्था। व्यत्ययेनैकवचनं (३,४,८८)। छान्दसोलुट् (४) प्रशंसामः] कीदृशम्? 'अमृतं' मरणरहितम्। 'जातवेदसं' जातानां वेदितारं जात-प्रज्ञानं जात-धनं वा। 'मित्रं न' सखि-

III भरद्वाजऋषिः, श्रौष्टीगवम्।

(२)—'क्रियार्थोपपदस्य च कर्मणि स्थानिनः (२, ३, १४)'-इति कर्मणि चतुर्थी तथाचाग्निमनुकूलयितुमित्यर्थः।

(३)—'च-शब्दः समुच्चयादेरर्थस्यासम्भवात् पादपूरणः'-इति वि०।

(४)—'छन्दसि लुङ्लङ्लिटः (३, ४, ६)' धातु सम्बन्धे सर्वकालेष्वेते।

४ २ ४ २ ४ ५ १ २ १
IV यज्ञाऽ५य। ज्ञाइवोइग्रायाइ। गाइरागिरा। चा
१ २ २ १ २ ऽ १ २ २ १
इदा चाइसाइ। प्रप्रा२वयमम्ृतम्। जाता२३वा। ऊ-
२ १ १ १ २
म्माइ। दाइसाम्। प्रायम्मित्रन्नशा२ꣳसिषा उ। वा
१ १ १
३४५॥ २५॥ ३

भूतमिव प्रियमनुकूलम्। [यद्वा व्यत्ययेन त्वमित्यस्य वसादेशः (३,४,९८)। अग्नयइति च कर्म्मणि चतुर्थी, क्रिया-ग्रहणमपि-कर्त्तव्यम्, इति कर्म्मणः सम्प्रदानत्वात्। च शब्दश्च णिति (५) निपातश्चेदर्थे वर्त्तते। दक्षसइति दक्षेर्वृद्धि-कर्म्मणः अन्तर्भावित-ण्यर्थाल्लटि रूपम्। 'चण्-योगान्निपातैर्यद्यदिहन्त'-इति निघात-प्रतिषेधः (६)। तत्रायमर्थः— हे स्तोतस्त्वं यज्ञे इममग्निं गिरा स्तुत्या दक्षसे च वर्द्धयसि चेत् वयमपि अमृतत्वादि-गुणकं तं प्रशंसामः(७) ॥१॥ ३५॥

---

IV भरद्वाजऋषिः, यज्ञायज्ञीयम्।

(५)—णकारानुबन्धोपेतोयः सएवाचगृह्यते इतिभावः।

(६)—'तिङतिङः (८, १, २८)'-इति निघाते प्राप्ते 'निपातैर्यद्यदिहन्तकुविन्नेच्चण् कच्चिद्यत्रयुक्तम् (८, १, ३०)'-इति निषेधइत्यर्थः।

(७)—'अमृतं', 'जातवेदसं', 'दक्षसे' बलवन्तं 'वः' त्वाम् 'अग्नये' अग्निम् यज्ञे यज्ञे प्रियमित्रमिव 'गिरा प्रशंसिषम्' स्तुत्यामित्याम्नाद्वे-इति वि०-सम्मतोऽर्थः।

अथ द्वितीया।

भर्गऋषिः।

३ २ १ ३१२ ३१ १ ३१२
पाहि नो अग्नएकया पाह्यू३त द्वितीयया।
३ २ ३१२३१२ ३१२३१२ २
पाहि गीर्भिस्तिसृभिरूर्जाम्पतेपाहि चतसृभिर्वसो॥२॥३६

५र २ ४ ५ ४र ५ १ २ २ २
I पाहिनो३अग्नएकया। पाहियुत। द्वितायाश्या२।
१ २र ५ १ २ १ २
पाहिगीर्भिस्तिसृभिः। ऊर्जाम्पा१ता२इ। पाहिचतो
५ २ १ १ २ १
३। वोइवा। सृभिर्वा२३सा३४३ओ। ओ२३४५इ।
डा॥२६॥

हे 'अग्ने!' 'नः' अस्मान् 'एकया' (१) ऋचा गिरा 'पाहि' रक्ष।
'उत' अपिच। 'द्वितीयया' (२) ऋचा 'पाहि' पालय। 'तिसृभिः'

---

३६ उत्तरार्चिकस्य ७, २, ४, १।

I भरद्वाजऋषिः कार्त्तयशम्।

(१)—ऋग्लक्षणया, तृतीयानिर्देशात् स्तुतः सन्निति वाक्यशेषः'-इति वि०।

(२)—'यजुर्लक्षणया'-इति वि०।

५र र र ५ २र १ २ १
II पाहिनोअग्नएकयाई ए। पा। होइ। उ। ता।
२ १ २ २ १र ३ ५ १ २ र
हितायाश्या। पाहोरइगा२३४इभीः। ताइहभीः। ऊ
१ २ ३र र ५ १ ५ २ १ २
र्जाम्पातां। औहौहो२३४वा। पा२३४हिहाइ। चलाहभां।
३र र ५ १ ऽ ५र ५ ४
औहौहो२३४वा। वा२३४सा उ। एहियाईहा। होपुइ।
डा॥ २७॥

४र ३ ४र ५ र ३ २ १ ५ र
III पाहिनो अग्नए। कया३। पा२३४। हियुतहिती।
४ ५ ४र ३ ४र ३ ४ ३ ४ ५र र २ २ २र
याया। पाहिगोर्भिस्तिहभिरूर्जाम्। पा३ताइ। पाहो
२ २ ५र ४ ५ १ २ र १ २ १ १ १ १
इचा३ता३४। हा ओवा। हभिर्वसो। उपा२३४५॥२२॥२६

'गीर्भिः' (३) स्तुतिभिः 'ऊर्जाम्' अन्नानां (४) बलानां (५) वा

---

II भरद्वाजऋषिः, नार्मेधम्।

III भरद्वाजऋषिः, कार्त्तवेशम्।

(३)—'ऋग्-यजुः-साम-लक्षणाभिः'-इति वि०।

(४)—निघण्टौ २, ७, सप्तदशानन्तरं पठितम् ऊर्क्-इति।

(५)—निघण्टौ द्वितीय-नवमे चैकविंशतितमम्-इति।

अथ तृतीया ।

शंयुरृषिः * ।

२१.२ १ १ २ ३१ २ १ १२ ३१२
बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा । भरद्वाजे
३ १ २ ३१ २
समिधानोयविष्ठ रेवत्पावक दीदिहि ॥३॥ ३७

हे 'पते !' स्वामिन् ! तथा 'पाहि' । हे 'वसो !' (६) वासक ! अग्ने ! 'चतसृभिः' (७) गीर्भिः 'पाहि' ॥ २ ॥ ३६

हे 'देव !' दानादि-गुण-युक्त ! 'यविष्ठ' युवतम ! 'पावक' शोधक ! अग्ने ! 'शुक्रेण' निर्मलेन 'शोचिषा' तेजसा 'भरद्वाजे'

---

३७ नास्तीयमुत्तरार्चिके । १९

(६)—'लुप्तमत्वर्थञ्च तद् द्रष्टव्यम्—'वसो' हे धनवन् !'-इति वि० ।

(७)—'ऋग्-यजुः-साम-निगद-लक्षणाभिः'-इतिवि०। 'उच्चैर्निगदेन'-'उपांशु यजुषा', इति धर्म-पार्थक्य-श्रवणात् निगदश्चतुर्थः। वेदानां त्रयित्वे साधनीये तु ऋक्-सामान्य तमत्वमेव यजुष्ट्वमिति तस्यापि यजुष्ट्वम् । स एवंविचारो जैमिनीय-द्वितीयाध्याय-प्रथम-पाद-गत-पञ्चविंशदादि-सप्त-सूत्राणामधिकरणमालादौ च द्वितीय-प्रथम-त्रयोदशाधि' करणे सुपरिस्फुटः । 'प्रोक्षणीरासादय','इध्मबर्हिरुपसादय','अग्नीदग्नीन् विहर'- इत्येवमादयः, पर-सम्बोधनार्थामन्त्राः निगदाः ॥

*—'तृणपाणेरार्षम्-इति वि० ।

२१ ४र ५ ११ २र र १२र
I बृहाद्गीरइरग्ने अर्चिभिर्हा उ। शुक्राइणदेवशोचिषा
१ २ १ २ २ १ २र १ ०
भरद्वा१जे२३। होवाइहाइ। समिधानः। यविष्ठि-
१ २ २ र १ १ १ २ १
ष्टिया२३। होवाइहाइ। रेवात्पो१वा२३। होवाइहाइ।
१ र २ १ २ १
का दीदिहि। इडा२३भा३४३। ओ२३४५इ। डा ॥२९॥

५ र ५ २१ २र र १२र १
II बृहद्भिरग्नेअर्चिभीर्द्रे। शुक्राइणदेवशोचिषा। भरा-
२ २ऽ २ १ २र १ ०
द्वा१जे२३। ओ३वा। समिधानः। यविष्टिया२३।
२ऽ २ र १ २ २ऽ २ १ र २
ओ३वा। रेवाइत्पा१वा२३। औ३वा। कादीदिहि।
१ २ १
इडा२३भा३४३। ओ२३४५इ। डा॥ ३०॥३७

अस्मद्भ्रातर्वि (१) 'समिधानः' (२) समिध्यमानस्त्वं 'बृहद्भिः' महद्भिः स्तेजोभिः 'नः' अस्मदर्थं 'रेवत्' (३) धन-युक्तं यथा भवति तथा 'दीदिहि' (४) दीप्यस्व॥

---

I, II अनयोः भरद्वाजऋषिः, पृश्निनाम।

(१)—'मयि यजति'-इति वि०।

(२)—'ताच्छिल्योऽयं चानस्'-इति वि०।

(३)—'रय्येर्मतौ बहुलम् (६, १, ३४)-इति कात्यायन-वचनात् सिद्धम्।

(४)—दीधिङश्छान्दस-धातोः रूपमिदम्।

अथ चतुर्थी।

वसिष्ठऋषिः।

१ २     ३ १ २     ३ १ २   २ २ ३ १
त्वे अग्ने स्वाहुत: प्रियास: सन्तु सूरय:। यन्तारोये
३ १ २ ३ १ २   ३ १र २र३ १ २
मघवानो जनानामूर्वं दयन्त गोनाम्॥ ४ ॥ ३८

"रेवत् पावक"-इति छन्दोगाः। "रेवन्नः शुक्र दीदिहि द्युमत् पावक"-इति बह्वृचाः) ॥ ३ ॥ ३७

हे 'अग्ने!' 'स्वाहुत' यजमानैः सुष्ठुभिः हुत! 'त्वे' (१) तव 'सूरय:' प्रेरका: स्तोतार: (२) 'प्रियास:' (३) प्रिया: 'सन्तु' भवन्तु! किञ्च। 'ये' 'मघवान:' धनवन्त: 'यन्तार:' (४) प्रदातार: जनानाम् अस्मदीयानाम् 'ऊर्वम्' समूहम्। 'गोनां' (५) गवां

---

३८ नास्तीयमुत्तरार्च्चिके। २०

(१)—युष्मदः परस्य षष्ठ्येकवचनस्य "सुपां सु-लुक्-पूर्वसवर्णाच्छे-याडाड्यायाजालः (७, १, ३९)"-इति शे-भावे "शेच्छन्दसि बहुलम् (६, १, ७०)"-इति त्वा-देशे पररूपे रूपम्।

(२)—स्तोतृ-नामसु निघण्टु-तृतीय-षोडशे पठम्।

(३)—'आज्जसेरसुक् (७, १, ५०)'-इत्यसुकि रूपम्।

(४)—'स्तु तिभिर्हविर्भिश्चोद्बोढारः'-इति वि०।

(५)—"गोः पादान्ते (७, १, ५७)"-इति नुकि रूपम्।

१र ४र र ५ २ १र २ र१२ १
I त्वेआ२३ग्नेस्वाऊतहाउ। प्रियासः सन्तुसूरयः। यन्ता
२ ३४र ५र ४ ५र २ १ ०
रो१या२३४इ। मघवानोजना। नाम्। ऊर्वंदया२३
२ १र ५र १ २ १
हा। नगोना२म्। इडा२३भा३४३। ओ२३४५इ।
डा ॥ २१ ॥ ३८

च ऊर्वं (६) समूहं 'दयन्त' प्रयच्छन्ति, ते च तव प्रियाः सन्त्विति पूर्वेणान्वयः(७) ॥

"ऊर्वम्"-इति छन्दोगाः। "ऊर्वान्"-इति-बह्वृचाः ॥ ४ ॥ ३८

---

अथ पञ्चमी।

भारद्वाजऋषिः।

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ १ २
अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः। अप्रोषि-
३ १ २ १ २ ३ १ २ ३ १ २
वान् गृहपते महाँ असि दिवस्पायुर्दुरोणयुः ॥ ५ ॥ ३९

---

I उरोराङ्गिरसस्य साम।

३९ नास्तीयमुत्तरार्च्चिके। २१

(६)—ऊर्वमिति नित्य-बहुवचनान्तस्य बहु-वाचकस्योर्वशब्दस्य छान्दसैकवचनेऽपि 'वाच्छन्दसि (६, १, १०६)'-इति सूत्रात् पूर्वरूपाभावे सांहित-दीर्घे च रूपम्।

(७)—अस्मदीयानां गवां समूहम्—एवमन्वयेनार्थः वि० सम्मतः।

४५र४५ ४ ५ र ४ ५ र
I अग्नेजरितर्विश्पतिः। औहोवा। एहिया। हाउ।
२ र १ र र १ १ २ १ २ १ २
तपानोदे२वरक्षसः। अप्रोषा१इवा२न्। गार्हपता३इ।
१ २ ३ ५ १ २ ३ ५ २
माहाꣳआ२३४सी। दिवाः। पायौवाओ२३४वा। हा
२ ४ ४
३हाइ। दुरोपूण्यूः। होपूइ। डा॥ ३२॥

७ ४र३ ४५ २ २ १ र र५र ४ ५
II अग्नेजरितर्विश्पतीः३। ता२३४पानोदेवर। क्षसाः।
१ र र र २ २ १ २ १ २
तापानोदेवरक्षसो। अप्रोषो३वान्। गृहपताइ। माहा
३ ५ ३ ५ ३ २ ५ २र १ १ १ १ १
ꣳआ२३४सी। ओ४हा। हहाइ। दिवस्पायू२३४५ः।
३ ५ ३ २ ३ १ २ १ १ १ १ १ ३ ५ ३ २
ओ४हा। हहाइ। दुरोणयू२३४५ः। ओ४हा। हहा
१
३४३इ। ओ२३४५इ। डा॥ ३३॥ ३९

हे 'अग्ने! देव!' 'जरितः' स्तोतः! (१)स्तुत्येत्यर्थः। 'विश्पतिः' प्रजानां (२) पालकः 'रक्षसः' राक्षसानां 'तपानः' सन्तापकः

---

I, II अनयोः गौतमऋषिः, पौरुमद्गम् नाम।

(१)—निघण्टु-तृतीय-चतुर्दशेऽर्च्चतिकर्मसु 'जरति'-इति सप्तमम्।

(२)—नि० २, ३, मनुष्य-नामसु विश इतिपठम्।

अथ षष्ठी।

प्रस्कण्वऋषिः।

२ ३ १ २ ३ १ २ ३ १र २र २ ३ १ २
अग्ने विवस्वदुषसश्चित्रꣳराधो अमर्त्य। आदाशुषे
३ २३२ ३१ २३१२
जातवेदोवहा त्वमद्या देवाꣳउषर्बुधः॥ ६॥ ४०

'असि'। हे गृहपते' यजमान-गृहस्य पालकाग्ने! त्वम् 'अप्रोषिवान्' यजमानस्य गृहमत्यजन् 'महान्' अतिशयेन पूज्योऽसि। 'दिवः' द्युलोकस्य 'पायुः' पाता। 'दुरोणयुः' (३) यजमान-गृहस्य मिश्रयिता सर्वदा वर्तमानः इत्यर्थः। तादृशस्त्वं महानसीत्यन्वयः (४)॥

"तपान" "तपान"-इतिपाठौ। "गृहपते"
"गृहपतिः"-इति च॥ ५॥ ३९

हे 'अग्ने'! त्वम् 'उषसः' उषोदेवतायाः (१) सकाशात्

---

४० उत्तरार्चिकस्य ८, १, ६, १।

(३)—'दुरोणः-इति गृह-नाम (नि० ३, ४, ८), तद् यदृच्छति सदुरोणयुः (पा० ३, २, १७०'-इति वि०।

(४)—'यश्च विश्पतिः राक्षसान् तपानः महानसि, यश्च अप्रोषिवान्; यश्च दिवस्पायुः, यश्च दुरोणयुः, तं त्वां हे अग्ने! जरितः! देव! गृहपते! स्तौमीति शेषः'-वि० कृतोऽन्वयः।

(१)—उषा-नामके च द्वे देवते। या मेघादुदकादि विवासयति सा वायवी शक्ति-रन्तरिक्षदेवतासु चतुःषष्ठितमा; या तु वह्नेः कान्तिकर्मणोरूपमिति निरुक्तप्रसिद्धा,

५ र    र    २ १ २ २    १ ३ २
I अग्नेविवाहाउ। स्वा३दूषा३साः। चाइ्त्रा२३हा

१ २ २    १ ३ ५ १ २
इ। राधो३हा३इ। अमा२र्त्ता२३४या। आदा१शुषे२।

१ २र    २ १ २    १र    २
जातवेदः। वहातू१वा२म्। अद्याहोइ। दा२३इवा७

१    ३ ५र र    २ र १ ३ १ १ १ १
उषः। बू२धा२३४औहोवा। हुवेवसू२३४५॥ ३४॥

५ र    ४ ५    २ १ र २र १ र ऽ
II अग्नेविवस्वदुषासाः। चित्र७राधोअमा२र्त्तिय।

१ २    १ ३र    १    १र
आदा१शुषे२। जातवेदः। वहात१वा२म्। अद्यादा

२    १    ३    ५र र    २ र १ ३
२३इवा७। उषः। बू२धा२३४औहोवा। विदावस

१ १ १ १
२३४५॥ ३५॥ ४

'राधः' (२) धनं 'दाशुषे' (३) हविर्दत्तवते यजमानाय 'आवह' (४)

---

I, II अनयोः जामदग्नऋषिः, माण्डवं नाम।

सा सूर्या, द्यु-स्थान-देवतासु तृतीया ( भेदएष निरुक्तपर्य्यालोचनादवगन्तव्यः ; तत्राद्या एकादश-चतुर्थ-द्वादशे; द्वितीया द्वादश-प्रथम-पञ्चमे )।

(२)—धननामसु अष्टादशतमम्—नि० २, १०।

(३)—निघण्टु-तृतीय-विंशे दाशति दानकर्मसु द्वितीयम्। दाश्वानिति (६, १, १२) सिद्धम् क्वसन्तम्, तस्य चतुर्थ्यां रूपमिदं दाशुषे इति।

(४) वहादिति मन्त्रे 'द्व्यचोतस्तिङः (६, ३, १३५)'-इति दीर्घः।

अथ सप्तमी।

तृणपाणिर्ऋषिः।

१ २ ३ २ ३ २उ ३ १ २ ३ २

त्वन्नश्चित्र ऊत्या वसोराधाꣳसि चोदय। अस्य

३ १र २र ३ १ २ ३ २ ३ २ ३ १र ४ २र

रायस्त्वमग्नेरथीरसि विदा गाधन्तु चे तु नः ॥७॥४०

आनीयप्रापय। सोऽग्निर्विशिष्यते। 'अमर्त्य' मरण-रहित! हे 'जातवेदः' जातानां वेदितः! कीदृशं राधः? 'विवस्वत्' विशिष्ट-निवासोपेतम्। 'चित्रं' नानाविधम्। किञ्च। 'अद्य'(५) अस्मिन् दिने 'उषर्बुधः' उषःकाले प्रबुद्धान् देवानावह (६) ॥ ६ ॥ ४०

हे 'वसो' वासक! अग्ने! 'चित्रः' दर्शनीयस्त्वं 'ऊत्या' (१) रक्षया सह 'राधांसि' धनानि 'नः' अस्मभ्यं 'चोदय' प्रेरय। 'अस्य' लोके परिदृश्यमानस्य 'राधः' धनस्य त्वं 'रथीः (२)

---

४१ उत्तरार्चिकस्य ८, १, ३, १।

(५)—अद्या-इति 'निपातस्य च (६, ३, १४३)'-इति मन्त्रे दीर्घः।

(६)—हे अमर्त्य, जातवेदः, अग्ने! राधः स्वरूपं विवस्वत् तमसां विवासनकरम् उषसः स्वभूतं चित्रं विचित्रं पूज्यं वा ज्योतिः, अन्यांश्च उषर्बुधो देवान् दाशुषे यजमानाय अद्य त्वम् आवह-इत्यर्थो वि० सम्मतः।

(१)—अवतेः रूपम् ऊतियूतीत्यादिना सिद्धम्। सहार्थे तृतीया (२, ३, १९)।

(२)—रथीरिति रंहतेः रूपम्, रंहतिश्च गतिकर्मसु पञ्चविंशतितमः—नि० २, १४।

१　　१　५र　　२१　२　　६२
I त्वन्ना२३श्चित्र ऊत्या । वसोराधा । सिचोदा१या२३

१ २ ३　५　१ २र　१　२　१२ ३
आस्थारा२३४याः । त्वमग्ने । रथाइरासा३इ । वीदागा

५　२१　२　१　२ ४ ५ ४
२३४धाम् । तुचा२३हाइ । तुना । औ३होवा । होप्
इ । डा ॥ २६ ॥ ४१

असि' रंहिता नेता भवसि । अतः कारणात् अस्मभ्यं धनानि प्रेरयेत्यर्थः । अपिच 'नः' अस्माकं 'तुचे' [अपत्यनामैतत् (नै०२,२,१) अपत्याय अपतन-हेतु-भूताय पुत्राय 'गाधं' प्रतिष्ठां (२) 'तु' क्षिप्रं (३) 'विदाः' लम्भय (४) ॥ ७ ॥ ४१

---

I भारद्वाजऋषिः, गाधम् ।

इह विवरणकारः—"रथी-शब्दः सारथि-वाची, स इह प्रेरकत्वसामान्यात् अग्नौ प्रयुक्तः, प्रेरयितासि दातासीत्यर्थः" ।

(२)—"गाध-शब्दोऽयमगाधमुदकमित्येवमादिषु प्रयोगेषु उदकमध्ये या भूमिः पादयोराश्रयत्वं प्रतिपद्यते, तस्याः वाचकः ; इह तु स्थानसामान्यादाश्रयस्थाने प्रयुक्तः"-इति वि० ।

(३)—"तु-इति पादपूरणः"-इति वि० ।

(४)—"विदाः वेत्थ जानीहि, ज्ञानेनात्र दानं लक्ष्यते, देहीत्यर्थः"-इति वि० ।

* इति ग्रामे गेय-गाने प्रथमः प्रपाठकः ॥१॥

अथाष्टमी।

(विरूपऋषिः)

२उ ३ १ २ ३ १ २ ३ २ ३ २ ३१ २ २
त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतः कविः। त्वां विप्रासः
३ १ २ ३ १ २
समिधान दीदिव आ विवासन्ति वेधसः॥ ८॥ ४२

५र र १ र २र १
I हाउत्वमित्सप्रथाअसिहाउ। आग्नेत्रातः। ऋताः
७ २र २ १र २र १ २र
कवा२३४इः। हाहोइ। त्वांविप्रासः समिधा।
१ र २ ३र २ १ २ ३र २ १ १
नादीदिवा३४ः। हाहोइ। आविवासा३४हाहोइ। तिवो
५ ४ ५
२३४वा। धा५सो६हाइ॥ १॥

५ ५ २ १ १ ३ ५
II त्वंत्वा६मे। इप्रप्रा३थायासाइ। आ२३४सी।
१ र२र १ ७ ३ ५ १र २र
आग्नेत्रातः। ऋताःकवा१इः। का२३४वीः। त्वांविप्रासः

हे 'अग्ने'! 'त्रातः' रक्षक! 'ऋत' (१) सत्यभूतः 'कविः

---

I, II अनयोः गौतमम् नाम।

४२ नास्तीयमुत्तरार्च्चिके। २२

(१)—ऋतमिति सत्यनामसु पठम—नि० ३,१०।

अथ नवमी ।

(शुनःशेपऋषिः ।

१ २ ३१२ ३१२ ३ १ २ १ २
आ नो अग्नेवयोवृध९रयिम्पावकश९स्यम्। रास्वा

१ २र १ र २ ३ ५ १ २र १
समिधा। नादीदिवो। दा२३४इवाः। आविवासा२३

२ १र २ १
हा। तिवेधा२३सा३४३ः। ओ२३४५इ। डा ॥२॥ ४२

कान्तप्रज्ञः (१) 'त्वमित्' (३) त्वमेव 'सप्रथाः' (४) सर्वतः पृथुः 'असि' भवसि। हे 'समिधान' समिध्यमान! हे 'दीदिवः' दीप्ताग्ने! (५) 'त्वां' 'विप्रासः' (६) विप्राः मेधाविनः (७) विधातारः स्तोतारः 'आविवासन्ति' (८) विचरन्ति ॥८॥४२

---

(२)—कविरिति मेधावि-नामसु द्वयम्—नि० ३, १५ ।

(३)—"इदिति पादपूरणः"-वि० ।

(४)—प्रथतेरसुनि रूपम् सुविस्तीर्ण इत्यर्थः । "सप्रथाः सर्वतः पृथुः"-इति नै० ६, २, ८ ।

(५)—दीदिर्दीनं तद् विद्यते यस्येति मतुपि 'छन्दसीरः (८, २, १६)'-इति वत्वे दीदिवत्, तस्य सम्बोधने 'मतुवसोरुःसम्बुद्धौ छन्दसि (८, ३, १)'-इति रुत्वे रूपम्। "दानवन्"-इति वि० ।

(६)—विप्र इति मेधावि-नामसु प्रथमम्—नि ३, १५। असुकि (७, १, ५०) रूपम् ।

(७)—वेधः-शब्दो विधातृ-पर्यायः प्रसिद्धः, विधातृ-परं च मेधावि-नामसु त्रयोदशम्; इह स्तोत्रर्थ-प्रतिपादकः । "वेधसः मेधाविनः ऋत्विजः"-इति वि० ।

(८)—आविवासतीति परिचरण-कर्मसु अन्त्यम्—नि० ३, ५ ।

३ २ ३ १ २ ३ १ २
चन नुपमाते पुरुस्पृहꣳसूनीतो सुयशस्तरम् ॥९॥४३

३२ ४२ ५ २ २ ४ ५ २ ३ २ १ १ १
I आनोअग्नेवयोवृधम्। ए३४। रया३४५इम्।
१२ १ ७ २ १२ २२ १ २२ २ १ ७
पावा३काशाꣳसा२३याम्। रास्वाचनउपमाते। पूरु-
१ २ २ ३ २ १
स्पृहा२म। सुनाइताइ३४३हाइ। यशस्तराम्। औ२३
४ ५ ४
होवा। होपुइ। डा॥ २॥४३

हे 'अग्ने'! 'पावक' शोधक! 'वयोवृधं' अन्नस्य वर्धकं 'शंस्यं' स्तुवन्तं 'रयिं' धनं 'नः' अस्मभ्यम् आभरेति शेषः। आहृत्य च हे 'उपमाते! उपास्मात्समीपे मातिष्ठतमित्युपमातिः, हे तादृश! अग्ने! (१) 'नः' अस्मभ्यं 'सुनीती!' सुनीत्या शोभननयनेन (२) 'पुरुस्पृहं' बहुभिः स्पृहणीयं 'सुयशस्तरम्' अत्यन्तस्वभूतं कीर्ति-धनं 'रास्व' (३) देहि॥

---

४३ नास्तीयमुत्तरार्च्चिके। २३
I अग्निऋषिः, आयुः।

(१)—"उपमातिः उपमाता निर्माता, तस्य सम्बोधनम्, हे उपमाते! स्रष्टः! इत्यर्थः। एतदुक्तं भवति—त्वमेवास्माकं स्रष्टा, त्वमेवास्मभ्यं शरीरस्थित्यर्थं धनं देहीत्यर्थः"-इति वि०।

(२)—"नीतिशब्दोमार्गवचनः, तस्मादियं तृतीया, सुनीत्या सुमार्गेण प्रतिग्रहादिनेत्यर्थः"-इति वि०।

(३)—रातिर्दान-कर्मसु चतुर्थः —नि० ३, २०।

अथ दशमी ।

सोभरिऋषिः ।

१उ　२ १ २ ३२३ १ २ ३१र　२र　३ १र
योविश्वादयतेवसुहोता२मन्द्रोजनानाम् । मधोन्न
२र　३ १ २ ३ १र　२र ३　३ १ २
पात्रा प्रथमान्यस्मै प्रस्तोमायं न्त्वग्नये ॥ १० ॥ ४४

५र　२　४र ५ ४र ५　　१　　१　　१ र
I योविश्वा३दायतेवसू । होता२मांद्रो२ । जना-
र　　१　　१　　१र　र　र
नाम् । माधो२र्नापा२ । त्राप्रथमान्यस्मै । प्रास्तो२
१　　२ १　　५　　४　　५
माया२३ । तुवी२३४वा । आ५यो६हाइ ॥४॥

५र　र　र　　　　१　　　१
II योविश्वादयतेवसूहाउ । होता२ । मांद्रो२ ।
१ र र　　　२　　१　२　　१　　१　　१र
जनानाम् । ओवा । ओवा । माधो२र्नापा२ । त्राप्र-
र　र　　१　२　　१　२　　१　　१　　२ १
थमान्यस्मै । औवा । औवा । प्रास्तो२माया२३ । तुवो
५　　४　　५
२३४वा । आ५यो६हाइ ॥ ५ ॥ ४४

"सुयशस्तर"-"स्वयशस्तरम्"-इति पाठौ ॥ ८ ॥ ४३

---

४४ उत्तरार्च्चिकस्य ७, ३, ५ १ ।

I, II अनयोः अग्निऋषिः, हरीनाम ।

५र र र र र र ५ १५ २१ १र २१
III योविश्वादयतेवस्वोहाओहाई ए। होता२मंद्रोजना

र १ २ १ २ २ ३ २ ३ २ १ २
२नाम्। ओ३हा। ओ३हा३ए३४म३४धोर्नपा। त्वाप्रथ-

र १ २ १ २ १ २ २ २ २ १र २
मानायस्माइ। ओ३हा। ओ३हा३ए३४। प्रस्तो३४माया

२ १ ५ ४ ५
३। तुवो२३४वा। ग्नापूयोई२हाइ॥ ६॥

५र र र ५ १र र र र र १
IV योविश्वादयतेवसुई ए। होतामंद्रोजनानाम्। मा

२ २ १र र र १ २ २
धो१र्नापौ। वा३२। त्वाप्रथमान्यस्मै। प्रास्तो१मायौ।

२र र २ १
वा३२। त्वग्नये। इडा२३भा३४३। ओ२३४५ इ। डा॥७॥

'होता' देवानामाह्वाता 'मन्द्रः' मोदनः(१)यः अग्निः 'विश्वा' (२) सर्वाणि 'वसु' (३) वसूनि धनानि 'जनानां' (४) जनेभ्यः 'दयते'

---

III, IV अनयोः अग्निऋषिः, दैर्घश्रवसम्।

(१)—'मदि' स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु-इत्यस्य रूपम्। "मन्द्रः स्तुत्यः"-इति वि०।

(२)—सुपां सु लुगित्यादिना (७, १, ३९) शस आले रूपम्।

(३)—"एकवचननिदं बहुवचनस्य स्थाने"-इति वि०। परं, 'सुपां सुलुगिति (७, १, ३९) शसीलुक्यपि सिद्ध्यति।

(४)—'चतुर्थ्यर्थे बहुलं छन्दसि (२, ३, ६२)' इति षष्ठी। वि० मते तु जनानां स्तुत्यः-इत्येवमन्वयः।

## इति चतुर्थी दशति ॥

प्रयच्छति । तस्मै 'अस्मै' अग्नये 'मधोः (५) न' मदकरस्य सोमस्येव 'प्रथमानि' मुख्यानि 'पात्रा' पात्राणि 'स्तोमाः' स्तोत्राणि 'प्र यन्ति' गच्छन्ति ॥१०॥ ४४

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य चतुर्थःखण्डः ॥ ४ ॥

---

अथ पञ्चम-खण्डे—

सेयं प्रथमा ।

(वामदेवऋषिः)

३ १२ ३ १र २र ३ १र २र३ १ २ ३ १र
एनावो अग्निन्नमसोर्ज्जोनपातमाहुवे । प्रियं
२र ३ १ २ ३१र २र ३ २ ३ १ २
चेतिष्ठमरतिᳫंस्वध्वरं विश्वस्य दूतमम्रृतम् ॥१॥ ४५

---

४५ उत्तरार्चिकस्य १, २, १३ १ ।

(५)—'सुप्तिङुपग्रहलिङ्गेति (३, ४, ९८) भाष्य-वचनात्, इह लिङ्ग-व्यत्ययेन रूपम् ।

५र र र ४ ५ १ र २ र र २
I एनावो३अग्निन्नामसा। ऊर्ज्जोनपा। तामा१
१ २र २ १ २ २ १
हुवे२। प्रायन्त्वेतिष्ठमरतिम्। सुवाध्वा१रा२म्। विश्वा
२ १ २ १ २ १
स्या१दू२।ताममृतम्। इडा२३भा३४३। ओ२३४५
५
इ। डा॥ ८॥

५र र र र १ र २ र १ २
II एनावो३अग्निन्नमसाहाउ। ऊर्ज्जोनपा। तामा
२ १ २र २ १ २
१ऊवे२३। हाउ। प्रायन्त्वेतिष्ठमरतिम्। सुवाध्वा१
२ १ २ २ १
रा२३म्। हाउ। विश्वास्या१दू२३। हाउ। ताम-
२ १ २ १ ५
मृतम्। इडा२३भा३४३। ओ२३४५इ। डा॥ ९॥

५र ४र ५र ४ ४ ५ ४ २र १र २र १र २ र
III एनावो३अग्निमे५नमसा। ऊर्ज्जोनपातमाहुवे।
१ २ १ २ १ २ १ २
प्रा२३याम्। चाइतिष्ठम्। आरतिम्। सुवाध्वा१
१ २ १ २ १ २
रा२म्। विश्वास्या१दू२। ताममृतम्। इडा२३भा
१ ५
३४३। ओ२३४५ इ। डा॥ १०॥

---

I, II अनयोः गोतमऋषिः आग्नेयं नाम।

५र ४र ५र ४ र ५र ४ ५ १ र २ र
IV एना वो अग्निन्नमसो। ऊर्जोनपाता। तामाहुवे।
१ २ १ २ १ २ १
प्रा२३याम्। चाइतिष्ठम। रा२३तीम्। स्वध्वरम्।
२ १ २ १ २ १
विश्वस्या२३दू। ताममृतम्। इडा२३भा३४३। ओ२३४५इ।
डा ॥११॥४५

'ऊर्जः' (१) बलस्य 'नपातं' पुत्रं 'प्रियम्' अस्माकं, 'चेतिष्ठम्' (२) अतिशयेन ज्ञातारं प्रज्ञातारं प्रज्ञापकं वा। 'अरतिं' गन्तारं स्वामिनं वा 'स्वध्वरं' सुयज्ञं, 'विश्वस्य' सर्वस्य यजमानस्य 'दूतम्' 'अमृतं' नित्यम् 'अग्निम्' 'एना' (३) एनेन 'नमसा' स्तोत्रेण [यद्यप्यत्रान्वादेशोनास्ति तथापि छान्दसत्वादिदं शब्दस्यैनादेशः] हे स्तोतारः। 'वः' युष्मदर्थम् 'आहुवे' (४) आह्वयामि ॥१॥४५

---

III, IV अनयोः गोतमऋषिः, मनाज्यं नाम।

(१)—"ऊर्क् अन्नम्, तस्य नपात् पौत्रम्; कथं पुनरसौ अन्नस्य पौत्रः? अन्नाद्धि बलं जायते, बलान्मथ्यमानएष जायते, एवमग्ने रन्नस्य पौत्रत्वम्"-इति वि०।

(२)—चेतइति प्रज्ञा-नामसु तृतीयम्, नि० ३, ९। अथवा 'चिती सञ्ज्ञाने' अस्य, तृचि 'तुश्छन्दसि (५, ३, १११)'-इतीष्ठनि रूपम्।

(३)—सुपां सुलुगित्यादिना तृतीयाया आले रूपम्।

(४)—सम्प्रसारणं बाहुलकात् ६, १, ३४।

अथ द्वितीया।

भर्गऋषिः।

२ १२ ३ २३ २ ३ १ २ १ २
ग्रोषे वनेषु मातृषु सन्त्वा मर्त्तासइन्धते। अतन्द्रो
३ १ २ ३ २ ३ २उ ३ १ २
हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि॥२॥४६

४र र र ४ १ २र १ २र १
I ग्रोषेवनाधूइषु मातृषू। सांत्वामर्त्तासः। इन्धा२३
२ १ २र १ २ १ ७ ३ ५
ताइ। आतंद्रोहव्यंवह। साइ। हवीऽष्का२३४र्त्ताः।
१ २र १ २ १र २ १
आदिद्देवाइ। षुराजा२३सा३४३इ। ओ२३४५इ।
डा॥१२॥४६

हे 'अग्ने!' 'वनेषु' 'मातृषु' च 'स्वपिषि' वर्तसे। तथा भूतं 'त्वा' त्वां 'मर्तासः' मनुष्याः अध्वर्य्यादयः मन्थनेनोत्पाद्य 'समिन्धते'। पश्चात् वृद्धस्त्वं 'अतन्द्रः' अनलसः सन् 'हविष्कृतः' यजमानस्य 'हव्यं' हविः 'वहसि' देवान् प्रति। 'आदिद्' अनन्तरमेव 'देवेषु' मध्ये 'राजसि' दीप्यसे (१)॥

---

४६ नास्तीयमुत्तरार्च्चिके।२४

I गोतमऋषिः, दैवराजम्।

(१(—हे 'अग्ने!' यस्त्वम् 'अतन्द्रः' अनलसः देवान प्रति 'हव्यं' हविः, 'हविष्कृतः'

अथ तृतीया ।

सौभरिर्ऋषिः ।

१ २　　३ १ २ ३ १ २　३ १ २ ३ २　　३ २
अदर्शि गातुवित्तमो यस्मिन् व्रतान्यादधुः । उपोषु
३ १र २र　२ ३ १ २　३ १ २
जातमार्यस्य वर्द्धनमग्निं नक्षन्तु नो गिरः ॥ ३ ॥ ४७

५　र　५ १　२ १र　२र १
I अदर्शि गातुवित्तमाइए । यास्मिन् व्रतानि यादधुः ।
र २　२ २　१र २ १ २　१
ऊपोषु जाइ । हाइहाइ । तमारि यस्य वर्द्धनम् । अग्ना-
२　२ २　र १ २　१ २　१
इन्नक्षाइ । हाइहा । तुनोगिरः । इडा२३भा३४३ ओ२३
५
४५ई । डा ॥ १३ ॥४७

"मातृषु", "मात्रोः"-इति पाठौ । "हव्यं", "हव्य"-इति च ॥ २ ॥४६

'यस्मिन्' अग्नौ 'व्रतानि' कर्माणि (१) 'आदधुः' यजमानाः

---

४७ उत्तरार्चिकस्य ७, १, ११, १ ।

I कौशिकऋषिः, गाथिनम् ।

हविषा सह क्रियमाणाः स तौद्य 'वहसि', 'देवेषु' राजसि च—'मर्त्तासः' तं 'त्वाम्' 'शेषे' अपत्याय, 'मातृषु' जगतो निर्मातृभूतेषु 'वनेषु' उदकेषु उदकार्थञ्च समिध्यते-इति वि०-सम्मतोऽर्थः । शेष-इति अपत्य-नामसु षष्ठम्, नि ७ २, २; वनेत्युदकनामसु नवमम्, नि० १, १२ ।

(१)—व्रतमिति कर्म-नामसु सप्तमम्, नि० २, १ ।

अथ चतुर्थी ॥

मनुः प्रार्थयते ।

३ २ ३ २ ३१ २ ३ १ २ ३ १२ ३२ ३ १
अग्निरुक्थे पुरोहितोग्रावाणोबर्हिरध्वरे। ऋचा
२ ३ २ ३ २३ १ २
यामि मरुतो ब्रह्मणस्पते देवाअवोवरेण्यम् ॥४॥४८

आहितवन्तः। 'गातुवित्तमः' (२) अतिशयेन मार्गाणां ज्ञाता सोग्निः 'अदर्शि' प्रादुरभूत्। किञ्च। 'सुजातं' सम्यक् प्रादुर्भूतं अस्य 'आर्यस्य' उत्तम-वर्णस्य 'वर्द्धनं' वर्द्धयितारं 'अग्निं' 'नः' अस्माकं 'गिरः' स्तुति-रूपाः वाचः 'उपो (३) नक्षन्तु' उप गच्छन्तु [नक्ष गताविति धातुः (४) ॥

"नक्षन्तु नोगिरः"-इति छन्दोगाः। "नक्षन्त नोगिरः' -इति बह्वृचाः ॥ १ ॥४७

---

४८ नास्तीमुत्तरार्च्चिके। २५

(२)—गातुरिति पृथिवी-नामसु षोडशम्, नि० १, १। इह तात्स्थ्यात् ताच्छब्द मङ्गीकृतं भाष्यकृता। विवरणकारस्तु—'कैगैरै शब्दे-इत्यस्य रूपम्, गातुः शब्दयिता स्तुतीनाम् उच्चारयिता, तं यो वेत्ति सगातुवित, अतिशयेन गातुवित् गातुवित्तमः, स्तुतीनामुच्चारयितुरतिशयेन वेत्तेत्यर्थः"।

(३)—"उप, उ, सु त्रयोपि पादपूरणाः"-इति वि०।

(४)—"नक्षतिः व्याप्तिकर्मा"-इति वि०। तच्च व्याप्तिकर्मसु द्वितीयम्, नि० २, १८

५ २ २ ४ ५ २र १र २र १ २ १
I अग्निरुक्थाइ। पुरो३हाइताः। ग्रावाणोब। र्हिरा३
४ ५ २ १र र र ७ १
ध्वाराइ। ऋचायामिमरुतोब्रह्माणस्पाता२इ। दाइवा२
१ २ १ ५ ४
आवा२३ः। वरो२३४वा। णापूयो६हाइ॥ १४॥

५ र र ४ ५ २ २ २ ५ ४
II अग्निरुक्थाऔहोहोहाइ। पुरौवाऔ२३४वा। हि
२र १र २र १ २ २ २ ५ ४ २ ५ २
ताः। ग्रावाणोब। र्हिरौवाऔ२३४वा। ध्वराइ। ऋचौ३हो
१र र ७ १ १ २ १
यामिमरुतोब्रह्माणस्पाता२इ। दाइवा२आवा२३ः। वरो
५ ४ ५
२३४वा। णापूयो६हाइ॥ १५॥४८

'उक्थे' स्तोत्र-शस्त्रात्मके 'अध्वरे' हिंसा-रहिते अस्मिन् यज्ञे 'अग्निः' 'पुरोहितः' यज्ञात्पुरतः उत्तरवेद्याम् ऋत्विग्भिर्निहितोऽभूत्। तथा 'ग्रावाणः' सोमाभिषवार्थं पुरतोनिहिताः। 'बर्हिः' च पुरतोनिहितम् आसादितम्। एवं सामग्र्यां सत्यां हे 'मरुतः' एकोनपञ्चाशन्मरुद्गणाः! हे 'ब्रह्मणस्पते' स्तोत्रस्य पालक! एतन्नामक! देव! हे 'देवाः' द्योतनादि-गुण-युक्ताइन्द्रादयः! 'वरेण्य' वरणीयं भजनीयम् 'अवः' रक्षणम् 'ऋचा' सूक्त-रूपया

---

I, II अनयोः वार्हदुक्थं नाम।

अथ पञ्चमी।

सुदीतिर्ऋषिः पुरुमीढोवाष्कम्भोवा।

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
अग्निमीडिष्वावसे गाथाभिः शरीशोचिषम्। अग्निं
३ १ २ ३ २उ ३ १ २ ३ १ २ ३ २
राये पुरुमीड श्रुतन्नरोग्निः सुदीतये छर्दिः ॥५॥४९

स्तुत्या 'वः' युष्मान् 'यामि' मनुरहं याचामि (१) [याचतेर्लटि रूपम्। वर्णलोपश्छान्दसः (२)] ॥

"मरुतोब्रह्मणस्पतेदेवाः"-इति चौथ्यामंत्रितत्वेन छन्दोगाः पठन्ति। मरुतोब्रह्मणस्पतिं देवान्"-इति द्वितीयान्तत्वेन बह्वृचाः॥ ५ ॥४८

हे 'पुरुमीढ !' त्वम् (१) 'अग्निम्' 'अवसे' रक्षणाय 'ईडिष्व' स्तुहि 'गाथाभिः' [गाथेति-वाङ्नाम (१,११,३६)। मन्त्ररूपा

---

४९ नास्तीयमुत्तरार्च्चिके।२६

(१)—यामीति याच्ञाकर्मसु द्वितीयमस्ति पठितम् (नि० ३, १९), तदनुसारेण याचतेर्लोपायासः कथं स्वीकृतइति चिन्तनीयम्।

(२)—इह उक्थे अध्वरे पुरोहितमग्निं, ग्रावाण, वर्हिः, मरुतः, ब्रह्मणस्पतिः। अत्र वचनव्यत्ययः स्वीकार्यः।

(१)—'हे पुरमीढ ! मदीयान्तरात्मन् !' -इति वि०।

५ ४ ५र ३ २　　३र ४र ५　　२ २र　१र २र
I अग्निमीडिष्वा३४औहोवा । आवसे । गाथाभिःशी ।
१र　　२　　　१ र　　　२
रशोचा२३इषाम् । अग्नि७रायाइ । पुरुमा२३इदो ।
१　　१　　२　　१
श्रुतन्नरो । अग्निःसू२३दो । तयाइच्छा२३४५दी६५६ः ।
१ २ १ १ १ १ १
इर्हाइया२३४५ ॥ १६ ॥४९

भिर्वाग्भिः] कीदृशम्? 'शीरशोचिषं' शयन-स्वभाव-रोचिषं (२) तथा 'राये' धनाय ईडिष्व। 'श्रुतम्' (३)एनं 'नरः' अन्येपि यजमानाः (४) स्तुवन्ति स्वार्थम्। तस्मात् 'सुदीतये' (५) मह्यम् 'अग्निः' (६) त्वयाभिष्टुतः सन् 'छर्दिः' गृहं (७) प्रयच्छत्वित्येवं सुदीतिः पुरुमीढं ब्रूते ॥

---

I पौरुमीढम् ।

(२)—'शीरं व्यापि, शोचिर्दीप्तिः ; व्यापिनी दीप्तिर्यस्यासौ शीरशोचिः, तं शीरशोचिषम्, व्यापि-दीप्तिमित्यर्थः। अथवा जठरात्मना आश्रयणीया दीप्तिर्यस्य'-इति वि०। "अनुशायिनमिति वा आशीनमिति वा"-इति नै० ४, २, १४। शीङ्‌ आशीतेर्वेति भावः।

(३)—'श्रुतं विख्यातम्'-इति वि०।

(४)—नरइति मनुष्य-नामसु बहुवचनान्तं चतुर्थं पदम्, नि० २, ३ 'नरः प्रथमैकवचनमिदं (नि० २, ३, १) द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्, नरं नराकारम्,-इति वि०।

(५)—'शोभनस्य दानस्यार्थाय'-इति वि०।

(६)—'अग्निः प्रथमैकवचनमिदं द्वितीयैकवचनस्य स्थाने'-इति वि०।

(७)—छर्दिरिति गृहनामसु ऊनविंशतितमम् नि० ३, ४। 'छर्दिः प्रथमैकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम्, छर्दिषे गृहस्यार्थायेति यावत्'-इति वि०।

अथ षष्ठी ।

प्रस्कण्व ऋषिः ।

३ १ २ ३ १ २ ३ १ २ ३ १ २ १ २
श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः । आ सी-
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
दतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे ॥६॥

२ २ १ ५ ४ ५ २र१र
I श्रुधी३ । श्रू२३४ । धिश्रुत्कर्णव । ह्निभाइः । देवै-
र १ १र २ १र र र २
रग्ने सयावा२३भीः । आसीदतुबर्हिषिमित्रोअर्या२३मा ।
र १ २ १ ५र र २ २ २
प्रातर्या२३वा३ । भा२इरा२३४औहोवा । ए२३ । ध्वर
आ ॥१७॥५०

"अग्निः सुदीतये छर्दिः"-इति छन्दोगाः । अग्निं सुदीतये छर्दिः-इति बह्वृचाः ॥ ५ ॥४९

हे 'श्रुत्कर्ण' श्रवण-समर्थाभ्यां कर्णाभ्यां युत ! अग्ने ! अस्मदीयं वचनं 'श्रुधि' (१) शृणु । यः 'मित्रः' देवश्च 'अन्यैः' 'प्रातर्यावभिः' प्रातःकाले देव-यजनं गच्छद्भिः 'देवैः' सर्वैः 'सयावभिः'

---

५० नास्तीयमुत्तरार्च्चिके । २७

I कार्णश्रवसम्, प्रास्कण्वं वा ।

(१)—"श्रुशृणुपृकृवृभ्यश्छन्दसि (६, ४, १०२)"-इति हेर्धिः ।

अथ सप्तमी ।

सौभरिर्ऋषिः ।

१२ २र   ३ २ ३ २उ   ३ २ ३ १ २   १ २
प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना *। अनु
३ १ २  ३ १र   २र ३ १र   २र३ १ २
मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥७॥५१

५ र र र ४ ५   २र१   २ १
I प्रदैवोदासोग्नीः । देवइंद्रोनमज्मना †। अनुमा२३

आहवनीयाग्निना त्वया समान-गतिभिः अन्यैः वह्निभिः' देवैः सह 'अध्वरे' क्रतु-निमित्ते 'बर्हिषि' दर्भे 'आसीदतु' उपविशतु ॥

"आसीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे"-इति छन्दोगाः, "आसीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम्"-इति बह्वृचाः ॥ ६ ॥५०

'देवः, द्योतमानः इन्द्रः परमैश्वर्य-युक्तः (१) 'दैवोदासः' दिवो-

---

५१उत्तरार्चिकस्य ७, १, ११, ३ ।

I दैवोदासम् ।

* "मज्मना"-इति अन्त्यस्थमध्य-पाठो बहुपुस्तके

† गानग्रन्थे सर्वत्रैव प्रायः "मज्मना"-इति अन्त्यस्थ-मध्य एव पाठः।

(२)—'वह्निभि वोढृभिः देवैः अन्यैः अग्निभिः'-इति वि० ।

(१)—'इदि' परमैश्वर्य्ये तस्मा दौणादिकेर-प्रत्यये रूपम् ।

अथाष्टमी।

मेधातिथिर्मेध्यातिथिश्चोभावृषी। [इयमैन्द्रीत्युक्तमेव]।

२ ३ १र २र ३ १ २ ३ १ २ ३ १र २र
अध यो अधवा*दिवोबृंहतोरोचनादधि।

२ १ २ १र र २ १
ता। रंपृथिवींविवावृताइ। तस्थौना२३का। स्याश-

२ १ २ १ ५
र्मणि। इडा२३भा३४३। ओ२३४५इ। डा॥ १८॥५१

दासेनाहूयमानः 'अग्निः' 'मातरं' सर्वस्य लोकस्य धारणात् पृथिवी माता, ताम्, पृथिवीम् 'अनु (२)प्र वि वावृते' देवान् प्रति हविर्वोढुं विशेषेण प्रवर्तयति। यस्मादेनमग्निं दिवोदासः 'मज्मना' बलेन (३) आजुहाव तस्मादयम् अग्निः 'नाकस्य' स्वर्गस्य शर्मणि गृहे (४) स्वायतनएव 'तस्थौ' अतिष्ठत् (५)

"अग्निर्देव इन्द्रः"-इति, "नाकस्य शर्मणः"-इति च छन्दोगाः। "अग्निर्देवाँ अच्छ"-इति "नाकस्य सानवि"-इति च बह्वृचाः॥५१

---

* "अधयो"-इति अन्त्यस्थ-मध्य-पाठो बहुपुस्तके।

(२)—'अन्विति पादपूरणः'-इति वि०।

(३)—मज्मनेति तृतीयान्तं बलनामसु पञ्चविंशतितमम् नि० २, ९।

(४)—शर्मेति गृहनामसु षोड़शतमम्, नि० ३, ४। इह वि०—'वैद्युतीह्यग्निः स्वेन बलेन मेघान् घ्नन् पृथिवीं वर्त्तयति, प्रतस्थौ प्रतिष्ठते च, स्वेनैव बलेन गच्छतीत्यर्थः, क्वपुनर्गच्छति? उच्यते—नाकस्य शर्मणि द्युलोकस्य सम्बन्धिनि गृहे, द्युलोक यद् गृहं तस्मिन् गच्छतीत्यर्थः"।

(५)—क्वचि श्रुतो न शब्दः पादपूरणार्थएवेतीह न व्याख्यातः।

२ १ २ क २र ३ २उ ३ १ २
अया वर्द्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥८॥५२

५ र ४ ५ १ २ १ र र
I अधय्मा*ओवा । धवादा१इवा२ः । बृहतोरो-
२ १ र २र २ १ २
चाना१दाधी२ । आ । पौ । हौहो३ । वा । वार्द्धस्वत-
र १ २ १ २र र २
न्वा । गाइरा१ममा२ । आजातासौ । हौहोइवा३४ ।
५ २ २ र ३ १ १ १ १
हा हाउवा३ । क्रतोपृणा२३४५ ॥ १९ ॥५२

हे 'इन्द्र !' 'अध' अधुना (१) । 'ज्मः' जमन्ति गच्छन्त्यस्या-मिति ज्मा पृथिवी, (२) तस्याः सकाशात् । 'अध वा' अपिवा व अन्तरिक्षात् 'बृहतः, महतः रोचनात् नक्षत्रैर्दीप्यमानास्स्वर्गाद्वा आगत्य । 'अधि' पञ्चम्यर्थनुवादो (३) 'अया' (४) अनया

---

५२ नास्तीयमुत्तरार्च्चिके ।२८

I सौक्रतवम् ।

* गान-ग्रन्थे प्रायः सर्वत्रैव "अधय्मा"-इति अन्तस्थ-मध्य एव पाठः ।

(१)—वेदे प्रायः थ-धयो रैक्यम्, प्रयुज्यते च धएव बहुत्र, तथाचेहैवमन्त्रे अथेत्यर्थे अध, अथवेत्यर्थे अधवेति । अध अनन्तरम्, अधुनेत्यर्थस्तु फललभ्यः ।

(२)—ज्मेति पृथिवी-नामसु तृतीयम् नि० १, १ ।

(३)—"तथाच अधिपरी अनर्थकौ ( १, ४, ९३ )"-इति कर्मप्रवचनीये गतिसंज्ञा-भावात् "अतिर्गतौ ( ८, १, ७० )"-इति निघातो न ।

(४)—छान्दसत्वादनादेशाभावे रूपम् ।

अथ नवमी ।

विश्वामित्रऋषिः ।

१ २ २२३ ३ १२ २र ३ २ १र २र
कायमानोवना त्वं यन्मातृरजगन्नपः। न तत्ते
३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
अग्ने प्र मृषे निवर्त्तनं यद्दूरे सन्निहा भुवः॥ ९ ॥५३

४र २ २ ४ २ १र २र २ १ २ ३
I कायमानोऽपूवनातुवाम्। यन्मातृरा। जागन्ना
५ २ २ १ २ २ १ ३
२३४पाः। नतत्तेअग्ने३। प्रमृषे३हा३इ। निवा र्त्ता२३४

'तन्वा' (५) तथा, विस्तृतया 'ममा' मदीयया गिरा स्तुत्या 'वर्द्धस्व' वृद्धे भव। हे 'सुक्रतो'! शोभनक्रकर्मवन्द्रि ! 'जाता' (६) जातानस्मदीयान् जनान् अभिलषितैः फलैरापूरय (७) ॥ ८ ॥५२

हे 'अग्ने' !' 'वना (१) वनानि काननानि भक्षितुं 'काय-

---

५३ नास्तीयमुत्तरार्च्चिके। २९

(५)—'तन्वा शरीरेणेति वि०।

(६)—जातेति सुपांसुलुगित्यादिना (७, १, ३९) शसश्चाले रूपम्। 'जाता जातानि ममापत्यानि'-इति वि०।

(७)—'पृण प्रीणयेत्यर्थः'-इति वि०।

(१)—सुपामित्याले (७, १, ३९) रूपम्। 'वन-शब्देनाव वनावयवकाष्ठानि' इति वि०।

५ २ १र २ ३ र २ १ २ ४ ५
नाम् । यद्दूरा२३इसान् । इन्द्राभुवा । औ३होवा ।
४
होपुइ । डा ॥ २० ॥

४ ५ १र ३ २ ३ ५ २
I एकाया । मानो । वनात्वू२३४वाम् । ओइ ।
२ ५ ४ ५ २ ऽ २ २ १र २र
तू२३४वाम् । उहुवाहाइ । औ३हो३१इ । यन्मातृरा ।
१ २ ३ ५ ३ ५ ४ ५ २ ऽ २
जागन्ना२३४पाः । आ२३४पाः । उहुवाहाइ । औ३हो
२ १ २ १ २ १ २ १ ३
३१इ । नतत्त्वा । ग्नाइप्रमृषाइइ । निवार्त्ता२३४
५ ३ ५ ४ ५ २ ऽ २
नाम् । ता२३४नाम् । उहुवाहाइ । औ३हो३१इ ।
२ १र २र १ १ २ ३ ५ ३ ५ ४ ५
यद्दूरेसाम् । इन्द्राभू२३४वाः । भू२३४वाः । उहुवाहा
२ ऽ २ ३ ५र र ३ ५
इ । औ३हो३१२ । या२३४औहोवा । ऊ२३४पा ॥२२॥२३

मानः (२) कामयमानः त्वं 'यत्' यस्मात्कारणात् तानि विहाय 'मातृः' (३) मातृभूता 'अपः' 'अजगन्' (४) अगमः गतवानसि ।

---

I, II अनयोः काण्वं नाम ।

(२)—'चायृ पूजा निशामनयोरित्यस्य चकारस्य ककारापत्या रूपम्'-इति वि० । "कायमान चायमानः कामयमान इति वा" -इति नै० ४, २, १४ ।

(३)—'मातरइति प्रथमा-बहुवचनान्तं नदी-नामसु दृश्यते, नि० १, १३,३७ । इह मातृरिति सुपांसुलुगित्यादिना (७, १, ३९)-शसि पूर्वसवर्णदीर्घे रूपम् ।

(४)—वर्त्तमाने लुङ् (३, ४, ६), च्लेरङादेशः, प्रथमपुरुषो बहुवचनञ्च व्यत्ययेन ।

अथ दशमी।

कण्व ऋषिः।

१ र २र३ १ २ ३ २ ३ १ २ ३ १ २ ३ २ ३
नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते। दीदेथ
१ २ ३ ३ १र २र ३ १ २ ३ १ २
कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः॥१०॥५४

असु प्रविष्टत्वाच्छान्तो वर्त्तसे। 'तत्' तस्मात् 'ते तव निवर्तनं नितरां तत्रैव वर्तनं, तेन च विनाशीलच्यते। सो 'न प्रमृषे' [कृत्यार्थे केन् प्रत्ययः (५)] न प्रमृष्यते न सह्यते। कुतः? इत्यत आह। 'यत्' यस्मात्कारणात् 'दूरे (६) सन्' दूरे अदृश्यतया वर्तमानस्त्वं 'इह' अस्मत्सम्बन्धिष्वरणीरूपेषु काष्ठेषु 'आभुवः' (७) समन्तात् भवेः [ मथनात् क्षण-मात्रेणास्माकं समीपे भवसि, तस्मात्तव दूरतोवर्त्तनम् अस्मभ्यं न रोचते ]॥

"इहाभुवः"-इति "अभव"-इति च पाठौ॥ ९ ॥५३

हे 'अग्ने!' 'ज्योतिः' प्रकाशरूपं 'शश्वते' (१) बहुविधाय यज-

---

५४ नास्तीयमुत्तरार्च्चिके।३०

(५)—"कृत्यार्थे तवै केन् केन्यत्वनः ३, ४, १४"-इति सूत्रेण।

(६)—पदकारास्त्विह 'दुः ए'-इत्येवं पठन्ति।

(७)—वर्त्तमाने लुङ् (३, ४, ७)।

(१)—शश्वत्-इति बहुनामसु षष्ठम् नि० ३, १।

५ र २ ३ ५ १ २ र
I नित्वामग्नाइ। मनुर्दा२३४धाइ। ज्योतिर्जना।
१ ७ २र १ २ १ ७ २
याशश्वाता२इ। दो। दाइ। थक। णा्कृतजा३।
१ २ ५ १ २ १ १ २ ५र
तऊ२चा२३४इताः। यन्नमस्या२३। ता२इकृ२३४औ
र २
होवा। ष्टा२३४याः ॥ २२ ॥

४ २ ५ र ४ ५ र ४ १र
II होवाइ। नित्वामग्नेमनुर्द्दधे। होवाइ। ज्योति-
र र १ २ २ १ ७ २ ७
र्जनायशश्वते। दाइदे१थक। णा्कृतजा१३। तऊ-

आलाय 'मनुः' प्रजापतिः (२) 'निदधे' देव-यजन-देशे स्थापितवान्। हे 'अग्ने'! त्वम् 'ऋतजातः' ऋतेन यज्ञेन निमित्त-भूतेनोत्पन्न उक्षितः हविर्भिस्तर्पितः सन् (३) 'कण्वे' एतन्नामके महर्षौ मयि 'दीदेथ' (४) दीप्तवानसि। 'यम्' अग्निं 'कृष्टयः' मनुष्याः 'नमस्यन्ति' नमस्कुर्वन्ति स त्वमिति पूर्व्वान्वयः ॥१०॥५४

---

I, II अनयोः मानवम्।

(२)—'यामथर्वा च मनुश्च पिता'-इत्यादि नैरुक्तम् (२, ३, १५)।

(३)—'उक्षितः महानुपचितः'-इति वि०।

(४)—दीधिङ्लोरूपम्।

२ ५ २ १ २ १ २ ५र र
२ह्वा२३४इताः । पन्नामा२३स्या३ । ता२इक्तृ२३४औहो

२
वा । ष्ठा२३४याः ॥ २३ ॥५४

इति पञ्चमी दशति ।

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने
प्रथमस्याध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

---

अथ षष्ठे खण्डे—

सेयं प्रथमा ।

वसिष्ठऋषिः ।

१ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ १ २
देवोवोद्रविणोदाः पूर्णां विवष्ट्वासिचम् । उद्वा

३ २ ३ १ २ ३ १२ ३१२ ३ १ २
सिञ्चध्वमुप वा पृणध्वमादिद्वोदेव ओहते ॥१॥५५

---

५५ उत्तरार्च्चिकस्य ७, १, १० ।

अथ द्वितीयाः।

अस्याउत्तरस्याश्च कण्वऋषिः।

२१ १२ १ २ १ २ १ क २र ३ १ २ १ २ ३१र
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता। अच्छा वीरं

५र४ २ ४ ५र २र १र २र १२ १२
I देवो३वो३द्रविणोदाः। पूर्णां विवष्ट्वासिचम्। ऊदा

१ २र १ ७ १ २
१सिञ्चा२। ध्वमुपवापृणध्वम्। आदिद्दोदे२। वओ-

२र १ २ १
हते। इडा२३भा३४३। ओ२३४५इ। डा॥ २४ ॥ ५५

'द्रविणोदाः' धनानां दाता (१) 'देवः अग्निः' 'वः' युष्मदीयां 'पूर्णां' हविषा 'आसिचम्' आसिक्तां च स्रुचं 'विवष्टु' कामयताम्। अतः 'उत्सिञ्चध्वं वा' सोमेन पात्रं। 'उपपृणध्वं वा' सोमं [ वा-शब्दौ समुच्चयार्थौ। ध्रुव-ग्रहेण होतृ-चमसं पूरयत च, अग्नये-सोमं प्रयच्छत चेत्यर्थः] 'आदिद्' अनन्तरमेव 'देवः' अग्निः 'वः' युष्मान् 'ओहते' (२) वहति।

"विवष्टु" 'विवष्टो'-इति पाठौ॥ १ ॥५५

---

५६ नास्तीयमुत्तरार्चिके।३१

I अग्निऋषिः, द्रविणम्।

(१)—द्रविणमिति धन-नामसु पञ्चविंशतितमम्; नि० २, १०।

(२)—'ओहते वहयति'-इति वि०। ओहते-इति सायण-मते वहतेरूपम्, विवरण-मते वंहते इत्यस्य, परमुभय-नये एव छान्दसत्वं शरणम्।

२ ३र ३ १ २ ३ २ ३ १ २
नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥२॥५६

३ २ ४ ५ ४ ५ २ १ २ १ २
I प्रैतू३ब्रह्मणस्पतिः। प्रदाइवियै। तुसूनृता३।
१ २ ५ १ १ २ १र
अच्छा२वा२३४इराम्। नर्यं पा। ङ्क्तिराधा१सा२३म्। देवा
२ ५ १ ५र र २
२या२३४ज्ञाम्। ना२र्या२३४औहोवा। तू२३४
५
नाः ॥२ ५॥५६

'ब्रह्मणस्पतिः'(१)देवः 'प्रैतु' अस्मान्प्राप्नोतु। 'सूनृता' देवी प्रिय-सत्य-भूता वाग्देवता प्रैतु अस्मान् प्राप्नोतु। 'देवाः' ब्रह्मणोस्मत्यादयोदेवताः 'वीरं' शत्रुं निःशेषेण 'दूरे' प्रेरयन्तु। तं 'नर्यं' मनुष्येभ्योहितं। 'पङ्क्तिराधसं' ब्राह्मणोक्त-हविषा पङ्क्त्यादिभिः समृद्धं (२) यज्ञं प्रति न अस्मान् 'अच्छ' आभिमुख्येन (३) 'नयन्तु' प्रापयन्तु॥ २ ॥५६

---

I अग्निऋषिः बार्हस्पत्यम्।

(१)—'ब्रह्म अन्नं, तस्य पतिः स्वामी'-इति वि०।

(२)—द्विनाराशंसं प्रातःसवनम्, द्विनाराशंसं माध्यन्दिनं सवनम्, सकृन्नाराशंसं तृतीयं सवनम्; एषा नाराशंसपङ्क्तिः पशूपवसथ्यः, त्रीणि सवनानि पशुरनुबन्ध्यः; एषा सवनपङ्क्तिः। एताभिः पङ्क्तिभिः यः साध्यते तं पङ्क्ति-राधसम—इति भावः।

(३)—'अच्छ आप्तुं सम्भावयितुम्'-इति वि०।

अथ तृतीया।

( ऋषिः स एव )

३ २ ३ १ २३ २३ १ २ ३१र २र ३ २ ३ १र
ऊर्द्ध ऊ षु ण ऊतये तिष्ठा देवो न सविता। ऊर्द्धो
२र ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्वि ह्वयामहे॥३॥५७

२र र १ ५ १ र र र
I ऊर्ध्वऊषुणा३ऊता२३४याइ। तिष्ठादेवोनसवि-
र र २ १ २ र १ ७
ता। ऊर्द्धोवा२३जा। स्यासनिता यादञ्जिभो२।
२र१ १ २ १र २ १
वाघाद्भो२ः। वीवी२। ह्वयामा२३हा३४३इ। ओ२३४५
५
इ। डा॥२६॥५७

हे यूप! [यद्वा, यूपात्मक-दारु-निष्ठाग्ने! 'नः' अस्माकम् 'ऊतये' रक्षणाय 'ऊर्द्धः' (१) उन्नतः 'तिष्ठ' (२)

---

५७ नास्तीयमुत्तरार्च्चिके।२२

I वशिष्ठ ऋषिः वौङ्कम्।

(१)—'ऊषुण'-इति मन्त्रे यत्न पाले ८, ३, १०७। ८, ४, २७। ऊ, सु—इमौ द्वावेह पादपूरणार्थावित्यत्र न व्याख्यातौ।

(२)—मन्त्रे तिष्ठा-इत्यादन्तपाठः, तत्र द्व्यचोतस्तिङः (६, ३, १३५)-इत्यनो दीर्घः।

अथ चतुर्थी।

सोभरिर्ऋषिः।

२उ ३ १र २र ३ २ ३ १ २ ३ १ २ ३ १
प्र योरायेनिनीषति मर्त्तोयस्ते वसो दाशत्। सवीर
२ ३ २३ १ २ ३ १२
न्धत्ते अग्नउक्थशꣳसिनं त्मना सहस्रपोषिणम् ॥४॥५८

तिष्ठ। 'सविता (३) देवः 'न' यथा सूर्योदिवउन्नतस्तिष्ठति, तद्वत् ऊर्ध्वः उन्नतः सन् 'वाजस्य' अन्नस्य 'सनिता' (४) दाता भविष्यसि। 'यद्' यस्मात् कारणात् 'अञ्जिभिः' (५) यत्नेन यूपमञ्जद्भि 'वाघद्भिः' यज्ञं वहद्भिः ऋत्विग्भिः सह 'विह्वयामहे'। अन्नस्य दानाय त्वां विशेषेणाह्वयामः, तस्मादन्नस्य दाता भवेति पूर्वत्रान्वयः॥ ३ ॥५७

हे 'वसो' (१) वासकाग्ने! त्वां 'ये' तव स्तोता 'राये'

---

५८ नास्तीयमुत्तरार्च्चिके।२३

(३)—'आदित्योऽपि सवितेत्युच्यते, तथाच—'हैरण्यस्तूपे स्तुतोवंन् हिरण्यस्तूप ऋषिरिदं सूक्तं प्रोवाच तदभिवादिन्येषर्ग् भवति'-इत्यादि नै० १०,३,८।

(४)—'सनितिर्लाभः, तस्मादियं तादर्थ्य-चतुर्थ्यां या आदेशः (७, १, ३९) सनितये लाभायेत्यर्थः'-इति वि०।

(५)—'त्वद्-गुण-प्रकाशकैश्छन्दोभिः'-इति वि०।

(१)—'हे वसो! प्रशस्तधनवन्!'-इति वि०।

अथ पञ्चमी ।

कण्वऋषिः ।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
प्र वोयह्वं पुरूणां विशां देवयतीनाम् । अग्निं

४ र र र ४ १ र १र र
I प्रयोरायापुइनिनीषताइ । मर्त्तोयस्तेवसोदाशत् ।

र २ १ २ र
सवीरा२३न्धा । ताश्रग्नउ । वथशांसिनम् । त्मनासा

२ १र २ १
२३हा । सूपोषा२३इणा३४३म् । ओ२४३५इ । डा ॥२७॥५८

धनार्थं 'प्र निनीषति' प्रणेतुमिच्छति(२) । 'यः' 'मर्त्तः' मनुष्यः 'ते' तुभ्यं 'दाशत्' (३) हवींषि प्रयच्छति । 'सः' मनुष्यः 'उक्थशंसिनम्' उक्थानां (४) शस्त्राणां शंसितारम् 'त्मना' (५) आत्मनैव 'सहस्रपोषिणं' बहु-धनम् 'वीरं' पुत्रं 'धत्ते' धारयति (६) ॥

"प्र योराये निनीषति"-"प्रयं राये निनीषसति"-इति पाठौ ॥४॥५८

---

I आङ्गिरसऋषिः, वैरूपर्द्धसम् ।

(२)'प्रकर्षेण पूर्वस्यां दिशि आह्वनीये आत्मानं नेतुमिच्छति'-इति वि० ।

(३)—दाशतीति दानकर्मसु द्वितीयम् नि० ३, २० ।

(४)—'उक्थानि स्तोत्राणि तेषाम्'-इति वि० ।

(५)—'मन्त्रे ष्वाङ्ग्यादेरात्मनः (६, ४, १४१)'-इत्यात्मन आदि-लोपः ।

(६)—'तस्य पुत्रं ददासीत्यर्थः'-इति वि० ।

२ ३ २ ३ १ २ ३ २उ ३ २ ३ १ २
सूक्तेभिर्वचोभिर्वृणीमहे यꣳसमिदन्य इन्धते ॥५॥५९

५ ४ २ २ १ र र २ १
I प्रवाः। यह्वं पुरू२३णाम्। विशांदेवयता२३यि-
२ १ र र र २ १ र २ १
नाम्। अग्निꣳसूक्तेभिर्वचोभिर्वृणीमा२३हाइ। याꣳसा

हे ऋत्विग्यजमानाः! 'देवयतीनां' देवान् कामयमानानां (१) 'पुरूणां' बहूनां (२) 'विशां' (३) प्रजारूपाणां (४) 'वः' युष्माकमनुग्रहाय 'यह्वं' महान्तम् (४) 'अग्निं' 'सूक्तेभिः' सूक्तरूपैः 'वचोभिः' वाक्यैः 'प्र वृणीमहे' (५)। 'अन्ये इत्' (६) अन्येऽप्यृषयः 'यम्' एनमग्निं 'समिन्धते' सम्यग्दीपयन्ति तमग्निमिति पूर्वेणान्वयः॥

"वचोभिर्वृणीमहे"-इति, "अन्यइन्धते"-इति च छन्दोगाः।
"वचाभिरीमहे"-इति "अन्यईळते"-इति च बह्वृचाः॥५॥५९

---

५९ उत्तरार्च्चिकस्य १, २, ५ १।

I ऐतवाध्यम्।

(१)—देवान् यष्टुमिच्छन्तीयाः प्रजास्तासामित्यर्थः। 'न छन्दस्यपुत्रस्य ७, ४, ३५'-इति इत्वाद्यभावः।

(२)—पुरु-बहु-पर्य्याय-शब्दौ नि० (३, १, ४) स्फुटम्।

(३)—यद्यपि 'विशः'-इति मनुष्य-साधारण-वाचकः (नि० २,२,६), परमिह देवयतीनामिति स्त्रीत्व-बहुत्व-निर्देशात् विशामित्यस्य प्रजारूपाणामित्यर्थः।

(४)—'यह्वः'-इति महन्नामसु चयोदशम् नि० ३, ३।

(५)—'प्रवृणीमहे—याचामहे, किम्पुनर्याचामहे? सामर्थ्याद्धनम्'-इति वि०।

(६)—सायण-मते इच्छब्दोऽप्यर्थः, विवरण-नये पाद-पूरणार्थः।

अथ षष्ठी ।

अनेनात्कीलः स्तौति ।

३ २ ३ २　३ २ ३ २ ३ १र　२र　३ १२
अयमग्निः सुवीर्य्यस्येशे हि सौभगस्य । रायईशे
३ १ २ ३ १ २ ३१२　३ १ २
स्वपत्यस्य गोमतईशे वृत्रहथानाम् ॥६॥६०

१　१ २र　१　१
२माइदा २न् । य इन्धते । इडा२३भा३४३ओ२३४५इ ।
५
डा ॥ २८ ॥५८

५　र　१ २र र २
I अयमग्निः सुवीर्य्यस्यहाउ । आइशेहिसौभगस्य ।
१ २ २　र १र २र १ २　१ २
होवा३हाइ । रायईशेस्वपत्य । स्यागो१माता२३ः ।
१ २ २　२र १र　२　१ २ २　२ २र
होवा३हाइ । ईशेहा२३इ३ । होवा३हा । वाहथा-
र १ २ १ ५
नाम् । इडा२३भा३४३ । ओ२३४५इ । डा ॥ २६ ॥६०

'अयम्' यजनीयत्वेनाङ्गुल्या निर्दिश्यमानोऽग्निः 'सुवीर्य्यस्य' शोभन-सामर्थ्योपेतस्य 'सौभगस्य' त्वम् 'ईशे हि' ईष्टे खलु (१) ।

---

६० नास्तीयमुत्तरार्च्चिके । ३४

I मनाऋषिः, दोहः ।

(१) 'ईशेति पादपूरणः' इति वि० ।

अथ सप्तमी।

वसिष्ठऋषिः I

१ २ ३ १ २ ३ १र २र ३ २ १र २र
त्वमग्ने गृहपतिस्त्वꣳ होता नोअध्वरे। त्वम्पोता
३ १ २ ३ २ ३ १ २ ३ १ २
विश्ववार प्रचेता यक्षि यासि च वार्यम् ॥७॥६१

४ ५ र ४ ५ ४ १ र २र १
I त्वमग्नेगृहपताइः। त्वꣳहोतानोअध्वराइ। त्वंपो

ईश्वरोभवसि [सर्वस्य बलारोग्य-हेतुतया-सौभाग्य-कारित्वात्] तथा 'गोमतः' गवादि-पशु-युक्तस्य 'स्वपत्यस्य' शोभनापत्यस्य 'रायः' धनस्य 'ईशे' ईष्टे, पुत्र-पश्वाद्युद्देशेन क्रियमाण-कर्म-फल-सम्पादकत्वेन तत्स्वामित्वात्। तथा एवम् भूतोग्निः 'वृत्रहथानां' [हननं हथः (२)] शत्रु-भूत-पाप-विनाशानामपि 'ईशे' [त्वयि समर्पित-कर्मणामस्माकं त्वत्प्रसादात्पाप-क्षयोभवतीति तस्यापिस्वामी॥ 'ईशीहि"-इति "ईशीमहे,"-इति च पाठौ॥ ६ ॥६०

हे 'अग्ने !' 'नः' अस्माकम् 'अध्वरे' यज्ञे 'त्वं' 'गृहपतिः' यजमानोसि। 'त्वं' 'होता' देवानामाह्वातासि। हे 'विश्ववार' सर्वै

६१ नास्तीयमुत्तरार्चिके। ३५

I अग्निर्वसिष्ठो वा ऋषिः, समन्तम्।

(२)—'नपुंसके भावे क्तः (३, ३, ११४)'-इति क्ते, 'तप्-तनप्-तन-थनाश्च (७, १, १५५)'-इति तस्य थनादेशे रूपम्।

२ १ २र १ १र ३र २ ३र २
२३ता । वाइस्वा । रप्रचाइताः । औहो३४वाहाइ ।
१ २ १ २ ५ १र २
य । चाइया२३सी३ । होवा३हाइ । चवारा२३या३ ४३म् ।
१
ओ२३४५इ । डा ॥ ३० ॥

४ ५ र ४ ४ २ ३ ५ २ ३
II त्वमग्नेए । हापूपताः । त्वःहो२३४ता । नोऑवा
५ १ ३ ५ २ ३ ५ २र
राइ । त्वा२म्पो२३४ता । विश्वावा२३४रा । प्रचेताइः ।
१ २ १ ३ ५र र २१र ३ ११११
यक्षाये३ । या२सा२३४औहोवा । चवारिया२३४५म् ॥३१॥

वरणीयाग्ने ! 'त्वं' 'पोता' एतन्नामकऋत्विगसि (१) । अतः 'प्रचेताः' प्रकृष्टमतिस्त्वं 'वार्यं' वरणीयं हविः 'यक्षि' यज । 'यासि (२) च' अस्माकं धनं प्रापय ।

"यक्षि यासि च"-इति छन्दोगाः । "यक्षि वेषि च" -इति वह्वृचाः ॥ ७ ॥ ६१ ॥

---

II वरुणऋषिः,समन्तम् ।

(१)—'शोधयिता वा'-इति वि० ।

(२)—'यामीति याच्ञा-कर्मसु पठितत्वात् (नि० ३, १९, २) यातिरत्र याच्ञा कर्मणि. लेट् लोडर्थे (३, ४, ७, पा० सू०); याहि याचस्व प्रार्थयेत्यर्थः'-इति वि० ।

अथाष्टमी ।

विश्वामित्रः स्तौति ।

१ २ ३ १ २र ३ १ २ ३ १
सखायस्त्वा ववृमहे देवं मर्त्तास ऊतये । अपा न्न-
२र ३ १ २ ३ १ २ ३ १ २ ३ १ २
पातꣳ सुभगꣳ सुदꣳससꣳ सुप्रतूर्त्तिमनेहसम् ॥८॥६२

५ २ ४र ५ ४ ५ १ र २र र १ २ र १
III त्वमाइग्नेगृहापतीः । त्वꣳहोतानोअध्वरे । त्वा
र २ २र २ ४र ५र २र २ १ २र
२३म्पोता । औहोइ४इ । औहो । वाहाइ । वाइस्त्ववा ।
१ २र ३र २ ४र ५र ३र २ १
रप्रचाइताः । औहोइ४इ । औहो । वाहाइ । यन्ना-
२ ३र २ ४र ५र ३र २ १र २
इयासा । औहोइ४इ । औहो । वाहाइ । चवारा२३या-
१
३४३म् । ओ२३४५इ । डा ॥ ३२ ॥६१

हे अग्ने ! 'सखायः' सोमाज्यादि-हविः-प्रदानेनोपकारक-त्वात् मित्रा।णि 'मर्त्तासः' मनुष्याः ऋत्विजोवयम् 'अपां नपातम्'[१]

---

६२ नास्तीयमुत्तरार्च्चिके । ३६

III अस्यापि वरुणऋषिः, समन्तम् ।

(१)—'अपां नपातम्, अपां पौत्रम् । कथं पुनरग्नेरपां पौत्रत्वम्? अद्भ्य ओषधयो वृक्षाश्च जायन्ते, वृक्षेभ्यः सकाशात् निर्मथ्यते ; एवमग्नेरपां पौत्रत्वम् ।

५ र　र र ४　५　२　२　५
I सखायस्त्वाओहोहोहाइ । वन्नू । मा२३४हाइ ।
१र १　२　२　१　२　५　१र　२
देव मर्त्ताइहाइ । सऊ२ता२३४याइ । अपान्नपाइ ।
४ ५　३ २　२　१ २ ३　५
तꣳसू । भगौ । वाइहाइइ । सूदꣳसा२३४साम् ।
२ १　२　२ १र　२　१
सुप्रतू२३र्त्तीम् । अनेहा२३सा३४३म् । ओ२३४५इ ।
डा ॥ २३ ॥ ६२

## इति प्रथमादशति ।

अपां नप्तारं 'सुभगं' शोभन-धन-युक्तम् । 'सुदंससं' सुकर्म्माणं (२) 'सुप्रतूर्त्तिं' (३) शोभन-प्रतरं कर्म्मानुष्ठात्टभिः सुखेन गन्तव्यम् 'अनेहसम्' (४) उपद्रव-रहितम् । एतादृशन्त्वाम् 'ऊतये' (५) रक्षणाय 'वव्रमहे' (६) वृणीमहे ॥ ८ ॥ ६२

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य षष्ठखण्डः ॥ ६ ॥

---

I वाम्र-वैखानस ऋषिः, आञ्जिग-दानवो वा ।

(२)—दंसः कर्म-नामसु तृतीयम् नि०२,१ ।

(३)—'तूर्वति हिंसार्थः ( नि०२,२०,२१ ) सुष्ठु प्रकर्षेण हिंसितारं 'शत्रूणाम्' इति वि० ।

(४)—'अनेहसम् अक्रोधम्'-इति वि० । एहः-इति क्रोधनामसु षष्ठम् नि०२,१३ ।

(५)—'चतुर्थ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्'-इति वि० । 'चतुर्थ्यर्थे बहुल छन्दसि (२, ३, ६२)'-इति सूत्रं तत्र साधकम् ।

(६)—'प्रार्थयामः'-इति वि० ।

खण्डयोराजुहोतेति त्रिष्टुभोदशपञ्च च।
अग्निन्नरोविराट्, चित्र-इमंस्तोममितिद्वृचः।
जागतोऽग्नेर्ऋचः सर्वाः, पूष्णः शुक्रान्तइत्यसौ (०)॥

अथ सप्तम-खण्डे—

सेयं प्रथमा।

श्यावाश्वऋषिः वामदेवो वा।

१ २ ३ १ २ २
आ जुहोता हविषा मर्जयध्वं
१ २र ३ १ २
नि होतारं गृहपतिं दधिध्वम्।
३ २ ३ १ २र ३ १ २
इडस्पदे नमसा रातहव्यं

(०)—आजुहोता हविषामर्जयध्वमित्याद्येकः सप्तमः खण्डः, अबोध्यग्निः समिधे-त्याद्यपरः; तत्र प्रथमे ऋचोदश, द्वितीये अष्टौ; तदित्थमुभयोः खण्डयोरष्टादश ऋचः सन्ति। तत्राह— आजुहोता-इत्याद्योः द्वयोः खण्डयोः अग्निन्नरो-इति या सप्तमखण्ड-स्यान्तिमा ऋक्,— सा विराट्-छन्दस्का; ये इमे चित्र इमंस्तोममित्याद्ये सप्तमखण्डस्य द्वितीय-चतुर्थे— ते जगती-छन्दस्के, अथावशिष्टाः पञ्चदश ऋचः त्रिष्टुप्-छन्दस्काः। किञ्च, शुक्रन्तेअन्यदिति अष्टम-खण्डस्य तृतीया ऋक् सौरी, तदितराः समस्ताः आग्नेय्य इति स्फुटार्थः।

२ १ २  ३ २ ३क २र
सपर्यता यजत म्पस्त्यानाम् ॥ १ ॥६३

४र ५ र ४  २ १ र  १  १र
I आ जुहोता। हविषामर्ज्जया २ध्वाउवा २। नि-
र १  १  ३ २  ३ २
होतारङ्गृहपतिन्दधा २इध्वाउवा २३४। इडा३४स्पदाइ।
१ र र २ १  १ २ १  २ १  ४
नमसारातहाव्या २म्। सापर्यता। याजतम्पा २३। स्ति
५  ४  ५
योवा। आपूनोई हाइ ॥ ३४ ॥६३

हे ऋत्विजः! (१) 'आ जुहोत' (२) अग्निमाह्वयत। किञ्च 'हविषा' 'मर्जयध्वं' मृडयध्वं सुखयध्वं (३) (डकारस्य जकारश्छान्दसः (४) अपिच। 'इडः' इलायाः (५) 'पदे' उत्तरवेद्याम्

---

६३ नास्तीयमुत्तरार्चिके। २७

I श्यावाश्वम्।

(१)—'हे ऋत्विजः! मत्पुत्राद्ययोवा'-इति वि०।

(२)—जुहोतेति सम्प्रसारणे(५,१४,२४) रूपम्, 'ऋचि तुनु'-इत्यादिना (६,३,१३३) ऋचि दीर्घः।

(३)—'मर्जयध्वम्, शोधयध्वम्, सम्मार्गं तृणैः कुरुध्वम्'-इति वि०।

(४)—सुप्तिङित्यादिना—(३,४,९८) इल्-वर्ण-व्यत्ययः-इति भावः।

(५)—इला शब्दस्य पञ्चम्यन्तम् इलः-इति, डलयोरैक्यात् इडः श्रुतिः; "षष्ठ्याः पति-पुत्र-पार-पद-पयस्पोषेषु-(८,३,५३)"-इति सत्वे इडस्पदे-इति।

अथ द्वितीया।

वाष्टहव्य * ऋषिः †।

३ २उ ३ १ २ ३ १२
चित्र इच्छिशोस्तरुणस्य वक्षथो
२उ ३ १२ ३२ ३ १२
न यो मातरावन्वेति धातवे।
३ १र २र ३१ २ ३ २
अनूधा यदजीजनदधा चिदा
३१२ ३१ २र ३ २ १२
ववक्षत्सद्यो महि दूत्यं चरन्॥ २ ॥६४

इत्यर्थः (६)। 'होतारं' देवानामाह्वातारं 'गृहपतिं' गृह-पालकम् अग्निं 'निदधिध्व' निःशेषेण धारयध्वम्। किञ्च 'नमसा' नमस्कारेण हविषा वा युक्तम्। अतएव 'रातहव्यं' दत्त-हविष्कं 'पस्त्यानां' यज्ञ-गृहाणां (७) मध्ये 'यजतं' यजनीयं पूजनीयमग्निं 'सपर्य्यत' परिचरत॥ १ ॥६३

---

* वार्षहव्येति पाठान्तरम्।

(†)—'उपस्तुतस्य वार्षम्'-इति वि०।

६४ नास्तीयमुत्तरार्च्चिके। ३८

(६)—'इडित्यन्न-नाम (नि०२,७,१६) तेन चात्र हविर्लक्षणमन्नं परिगृह्यते, तस्य पदे वेद्याख्य-स्थाने इत्यर्थः'-इति वि०।

(७)—'पस्त्यानि गृहाणि (नि०३,४,७), तेषु ये निवसन्ति ते पस्त्याः, तेषाम्'-इति वि०

१ २ ४ २ ३ ५
I ओइ। चित्रइच्छाइशो१स्तरुणा२३। स्या३वच्चथः।
१ र र २ ४ २र३५र १
ओइ। नयोमातारा१वनुवा२३इ। तो३धातवे। ओइ।
रर ७ र ४ २र ३५र १
अनूधायादजीजना२३त्। आ३धाचिदा। ओइ। वव-
२ २ ४ २र१
त्न्सादो१मह्दि२३। तिया३श्चापुरा६५६न्। दूत्यश्चर-
३ १ १ १ १
न्मह्दे२३४५॥ ३५॥

'शिशोः' शिशु-भूतस्य (१)। अतएव 'तरुणस्य' (२) अग्ने 'वच्चथः' (वच्चेरौणादिकोऽथस् प्रत्ययः) हविर्वहनं (३) 'चित्रइत्' आश्चर्य्यभूत मेव(४)। 'यः' जातोग्निः 'मातरौ' सर्वस्य निर्मात्र्यौ सर्वस्य मातृ-भूते द्यावापृथिव्यावरण्यौवा 'धातवे'(धेट् पाने' तुमर्थे इति (३,४,९) तवेन् प्रत्ययः) स्तनपानाय न अन्वेति' न गच्छति (इण्, गतौ लट्युपसर्गेण समासः (५) तिङि चोदात्तवतीति

---

(१)—'शंसनीयस्य'-इति वि०।

(२)—'तॄ प्लवन-तरणयोरित्यस्यैतद्रूपम्, प्लवन-समर्थस्य; अथवा तरुणस्य युनः।

(३)—'वच्चथः वहनं गमनमित्यर्थः'-इति वि०।

(४)—इह चित्रइति पुंल्लिङ्गोव्यत्ययेनेति (३.४,९८) बोध्यम। चित्रः पूज्यं गमनमिति विवरण-रुद्र-व्याख्यानम्।

(५)—'सह सुपा (२,१,४)'-इत्यत्र सहेति योगविभागात्।

II चित्राऽ२इए। ए३१२३४। शिशोस्तरुणस्यवक्षथः। क्षथः। हिहिहियाऽ२इहाउ। ए३१२३४। नयोमातरा वन्वेतिधातवे। तवे। हिहिहियाऽ२इहाउ। ए३१२३४। अनूधायदजीजनाऽ२धाचिदा। चिदा। हिहिहियाऽ२इहाउ। ए३१२३४। ववक्षत्सद्योमहिदूतियञ्चरन्। चरन्। हिहिहियाऽ२इहाउ। वा। ए३। क्रतून्॥ २६ ॥६४

(८,१,७१) गतेर्निघातः) 'अनूधाः' (नञा बहुव्रीहि-समासः(६), तस्मिन्, अनूङ्स्त्रियामिष्टत्वात् (७) अत्रानङ्ङभावः। प्रत्येक-विवक्षया एकवचनम्) ऊधोरहितः। अयं लोकोऽसौ लोकस्य 'यत्' यदि एनमग्निम् 'अजीजनत्' जनयेत् तर्हि स्तनपानाय न गच्छतीति युक्तम्, तथा न भवति, किन्तु द्यावापृथिव्यौ हि सर्वेषां कामदुघे खलु तथापि न याति, तस्मादस्य हविर्वहनं विचित्रम्। 'अध चित्' उत्पत्त्यनन्तरमेव 'सद्यः' तदानीमेव

---

I,II इमे ऋतु-सामनी।

(६)—'नञोऽस्त्यर्थानां वोत्तरपदलोपः (२,२,२४)'-इति वचनात्।

(७)—'उधसोऽनङ् (५,४,१३१)'-इति सूत्रे स्त्रियामित्युपसङ्ख्यानात्।

अथ तृतीया।

बृहदुक्थऋषिः।

३ २  ३ १ २ ३ १ २ ३ १ २
इदन्त एकं पर ऊ त एकं

३ १ २ ३ १ २ ३ १ २
तृतीयेन ज्योतिषा संविशस्व।

३ १ २ ३ २ १ २
संवेशनस्तन्वे३चारुरेधि

३ २ ३ १ २ ३ २ ३ १ २
प्रियो देवानां परमे जनित्रे॥ ३॥ ६५

शीघ्रं 'महि' महत्वम् 'दूत्यं' ["दूतस्य भाग-कर्म्मणी (४,४,१२०)" इति कर्म्मणि यत् प्रत्ययः] दूत-कर्म्म 'चरन्' आचरन् 'आ ववचत्' देवान् प्रति हवींष्यावहति॥ २॥ ६४

एतया बृहदुक्थो वाजिनं नाम स्व-पुत्रं मृतं वदति। हे मृत-पुत्र! 'ते' तव 'इदम्' (उपरि(१)ज्योतिषेति वक्ष्यमाणत्वात् अत्रेदं शब्देन ज्योतिरभिधीयते) इदं ज्योतिरग्न्याख्यम्, 'एकम्' एकोऽशः, अतः 'ते' तव देह-गताग्न्यंशेनवाह्यमग्निं 'संविशस्व' सङ्गच्छस्व। तथापरः 'उ' अन्योपि 'ते' तव 'एकं' वाय्वाख्योऽशः, तेन च प्राणवाय्वाख्येनांशेन वाह्यं वायुं संविशस्व (शरीराग्नि-

---

६५ नास्तीयमुत्तरार्च्चिके। ३८

(१)—अस्या एव ऋचो द्वितीये पादे इति यावत्।

२ ५ २२ १ २ १ २२४
I ओ४हा। हहाइ। इदन्तए। का३म्पर:। उतए

५ २१रर र २ २३४५ २१र
काम्। तृतीयेना। ज्योतिषा३। संविशस्वा। संवेशना:।

२१र २३४५ २ ५ २२ १रर
तनुवे। चारुरेधी। ओ४हा। हहाइ। प्रियोदेवा।

२ १ २ २ ४
ना३म्पर। मा३४३इ। जा३नापुइवाई५ूईइ ॥२७॥ई५ू

-प्राणवायुोः वाह्याग्नि-वायुोश्चैकत्वादंशत्वमिति भावः) तथा, 'तृतीयेन ज्योतिषा' आदित्याख्येन तेजसा तवात्मना संविशस्व (सूर्य्यगतात्म-चैतन्ययोरभेदादंशत्वम्, "योऽहं-सोऽसौ"—"योऽसौ सोऽहं"-"सूर्य्य आत्मा जगतः"-इत्यादि-श्रुतेः आत्मनः सूर्य्य-प्रवेशो-युक्तः) 'तन्वे' तनवे पुनः शरीर-ग्रहणाय 'चारुः' कल्याणीभूत्वा तस्मिन् सूर्य्ये 'संवेशनः' सम्यक् प्रवेष्टा 'एधि' भव। कीदृशस्त्वं? 'प्रियः' तेन सह प्रीयमाणः। कीदृशि तस्मिन्? 'देवानां' 'परमे' उत्तमे 'जनित्रे' जनके ("देवानां ह्येतत् परमं जनित्रं यत् सूर्य्यः"-इति हि श्रुतिः (२) ॥ २ ॥ ई५ू

---

I यामं कौत्सं वा, अग्नेः।

(२)—'इदं' 'ते' तव 'एकं' ज्योतिः वैद्युताख्यम्, 'परः' परम् उत्कृष्टमित्यर्थः (उ-इति पादपूरणः)। 'ते' तव 'एकम्' आदित्याख्यम्। 'तृतीयेन ज्योतिषा' पार्थिवेन अग्न्याख्येन 'संविशस्व'। क्व पुनः संविशामि? उच्यते,—'संवेशनः तन्वे' संविश्यते अस्मिन्निति संवेशनं स्थानम्, तस्मिन्नित्यर्थः; 'तन्वे' तन्वः शरीरस्य। संविश्य

अथ चतुर्थी ।

कुत्स ऋषिः ।

३ २उ　　३ १ २　३ १ २ १
इमꣳ स्तोममर्हते जातवेदसे

१ २　३ १ २　　३ १ २
रथमिव सम्महेमा मनीषया ।

३ २उ　　३ १ २　　३ १
भद्रा हि नः प्रमतिरस्य सꣳसद्-

२र ३ १र　　२ र　३ १　२
यग्ने सख्ये मा रिषामा वयन्तव ॥ ४ ॥६६

'अर्हते' पूज्याय 'जातवेदसे' जातानामुत्पन्नानां वेदित्रे जात-प्रज्ञाय जात-धनाय वा अग्नये 'मनीषया' निश्चितया बुद्ध्या 'इमं स्तोमम्' एतत् स्तोत्रं 'रथमिव' यथा तक्षा रथं संस्करोति तथा, 'सम्महेम' सम्यक् पूजितं कुर्म्मः(१) । 'अस्य' अग्नेः 'संसदि' सभाजने 'नः' अस्माकं 'प्रमतिः' प्रकृष्टा बुद्धिः 'भद्रा हि' कल्याणी

---

६६ उत्तरार्च्चिकस्य ४,१,७,१ ।

'चारुः एधि' शोभनोभव । 'प्रियः' 'देवानाम्' । क पुनः प्रियः ? उच्यते,—'परमे' उत्कृष्टे 'जनित्रे' जन्यतेऽस्मिन्निति जनित्रं कर्म्म यागाख्यम्, तस्मिन्नित्यर्थः । अथवा जन्मैव जनित्रम्, परमे जन्मनि, इत्यादौ यज्जन्म, तस्मिन्नित्यर्थः"-इति वि० ।

(१)—'सम्महतिरत्रगमनार्थः, अन्तर्णीत-ण्यर्थश्च द्रष्टव्यः । यथा कश्चिद्रथं गमयति तद्वद् गमयेम उच्चारयामीत्येतदाशास्महे-इत्यर्थः'-इति वि० ।

अथ पञ्चमी।

द्वयोर्भारद्वाज* ऋषिः।

२ १२ ३१ २३१ २३ १
मूर्द्धानं दिवो अरतिं पृथिव्या

३ २ ३ ५ ३ ५ १२र१२
I इमाꣳस्तोर२३४माम्। अर्हति२३४जा। तावेदसे

१ ३२ ३ ५ २ ३ ५ २र
३। होइ। रथामी२३४वा। सम्माहे२३४ऽ॥। मानो-

२२ १ ३ २ ३ ५ २ ३ ५
षया३। होइ। भद्राही२३४नाः। प्रमाती२३४रा।

१२ १२ १ ३ २ ३ ५ २ ३
स्यासꣳसदे३। होइ। अग्नाइसा२३४ख्याइ। माराइषा

५ १२१२ १
२३४मा। वायन्तवा३। हो२३४५इ। डा॥ ३८॥ ६६

समर्था: खलु (२) अतस्तया बुद्ध्या कुर्मइत्यर्थः। हे 'अग्ने!' 'तव सख्ये' अस्माकं त्वया सह सखित्वे सति वयं 'मा रिषाम'(३) हिंसिता न भवाम। अस्मान् रक्षेत्यर्थः॥ ४॥ ६६

---

* भरद्वाजइति पाठान्तरम्।

I यज्ञसारथिः, अग्नेः।

(२)—'हि यस्मादर्थे। यस्माद् 'भद्रा' कल्याणी 'नः' अस्माकम् 'उपरि'-इति वाक्यशेषः। 'प्रमतिः' प्रकृष्टा मतिः अनुग्राहिका बुद्धिरित्यर्थः'-इति वि०।

(३)—रिष् हिंसायाम्-इति रेषतेः रूपम्।

२ ३ २ ३ २ ३ ३ २ ३ २
वैश्वानरमृत आ जातमग्निम् ।
३ २ ३ २ ३ १ २ ३ १ २
कविꣳ सम्राजमतिथिं जनाना-
३ २ ३ १ २ ३ २
मासन्नः पात्रं जनयन्त देवाः ॥ ५ ॥ ६७

'मूर्द्धानं' शिरोभूतम् । कस्य? 'दिवः' द्युलोकस्य, 'पृथिव्याः' प्रथितायाभूमेः 'अरतिं' गन्तारम् (१) । यद्वा गन्तव्यं स्वामिनं । 'वैश्वानरं' विश्वेषां सर्वेषां नराणां सम्बन्धिनम् । 'ऋते' ऋतमिति सत्यस्य (२) यज्ञस्य वा नाम । (निमित्तसप्तम्येषा (३)) ऋत-निमित्तम् 'आ' आभिमुख्येन जातं (४) सृष्ट्यादावुत्पन्नम् । 'कविं' क्रान्त-दर्शिनम् 'सम्राजं' सम्यग्राजमानं, यजमानानाम् 'अतिथिं' हविर्वहनाय सततं गन्तारम् । यद्वा, अतिथिवत्पूज्यम् । 'आसन्' (५) (आसनि आस्यं, द्वितीयार्थे सप्तमी) आस्य-भूतम् (अग्नि-लक्षणेनास्येन हि देवा हवींषि

---

६७ उत्तरार्चिकस्य ४,२,३,१ ।

(१)—पृथिवीतः हवींषि गृहीत्वा द्यु-लोकस्य गन्तारमित्यर्थः ।

(२)—नि० ३,१०,६ ।

(३)—'निमित्तात् कर्म-योगे (२,३,३६)'-इति वचनात् ।

(४)—'आ- इत्येष उपेत्येतस्य स्थाने । उपजातम् प्रवृद्धमित्यर्थः'-इति वि० ।

(५)—पद्दन्नो-इत्यादिना (६,१,६३) आस्य-शब्दस्यासन्, सुपां सुलुगित्यादिना (७,१.३९) सप्तम्यालुक् च ।

५र४ ५ २ ३ ५ १ १ २
I मूर्द्धौहोवाइ। नन्दा२३४इवाः। अरताइम्। पृथी-
२ २१र २ १ र २ ३४५ २१
इव्याः। वैश्वानराम्। ऋतआ। जातमग्नोम्। कवि९
र ७ २ र१ २
सम्राजमतिथायिम्। जना२३नाम्। आसन्नःपा। त्रा-
१ २ २ ४
३ज्जन। या३४३। ता३दा५इवा६५६ः॥ २९॥

४र५र र ४. ५ २ १ २ १ २
II होवाइ। मूर्द्धौहाइ। नन्दाइ। वा३अर। ति
२ ४ ५ २ र ऽ २ २र१र २ १ र
मृथिव्याः। इहोइया३। ई३या। वैश्वानराम्। ऋतआ
२ ३ ४ ५ २ र ऽ ऽ २ १ २
जातमग्नोम्। इहोइया३। ई३या। कवि९सम्रा। जा
१ २ ३ ४ ५ २ र ऽ २ र १
३मति। थिञ्जनानाम्। इहोइया३। ई३या। आसन्नः
२ १ १ २ ३ ४ ५ २ र २ १ ३
पा। त्रा३ज्जन। यन्तदेवाः। इहोइया३। ई२। या२३
५र र ३ १ १ १ १
४५औहोवा। ई२३४५॥ ४०*॥ ६७

भुञ्जते (६) 'पात्रं' पातारं रक्षकम्। यद्वा, आस्येन धारकम्।

---

I,II वैश्वानरस्येमे।

(६)—तथाहि ऐतरेयादौ श्रूयते 'अग्निमुखा वै देवाः'-इत्यादिः।

* इति ग्रामे गेय-गाने द्वितीयस्यार्द्धः प्रपाठकः॥

अथ षष्ठी ।

२३ २ १ २र २ २
वि त्वदापो न पर्वतस्य पृष्ठा-
२ १ २ २ २
दुक्थेभिरग्ने जनयन्त देवाः ।
२ १र २ १ २
तं त्वा गिरः सुष्टुतयो वाजय-
२ १ २र२ १ २ २ १ २
न्त्याजि न गिर्ववाहो जिग्युरश्वाः ॥ ६ ॥ ६८

एवं गुण-विशिष्टं वैश्वानराग्निं 'नः' अस्माकं सम्बन्धिनि यज्ञे 'देवाः' स्तोतारऋत्विजः (०) देवा एव वा 'आ जनयन्त' यज्ञाभिमुख्येनाजनयन् अरण्योः सकाशाद् उदपादयन् ॥ ५ ॥ ६७

हे 'अग्ने' ! 'त्वत्' (१) त्वत्-सकाशात् 'उक्थेभिः' (२) उक्थैः स्तोत्रैः यज्ञैः हविर्भिश्च (३) 'देवाः' स्तोतारः कामान् आत्मनः 'व्यजनयन्त' विविधं जनयन्ति। तत्र दृष्टान्तः—'पर्वतस्य' मेघस्य (४) 'पृष्ठात्' उपरि भागात् 'आपो न'(५) आपः उदकानि

---

६८ नास्तीयमुत्तरार्चिके । ४०

(०)—द्युतिमत्त्वेन स्तोतारः ऋत्विजोऽपि देवाः उच्यन्ते ।

(१)—पञ्चम्याश्च लुक् ७,१,३९ ।

(२)—भिस ऐसादेशो न ७,१,१० ।

(३)—उक्थ-शब्दः स्तोत्रे एव रूढः, यज्ञादावौपचारिकः ।

(४)—नि०१,१०,९ ।

(५)—न-शब्दः उपरिष्टादुपमार्थीयः नि०१,२,६ ।

४ १र र २
I ओम् ॥ विल्वत् । ओहाइ । आपोनपर्वतस्य
१ २ २ १र र २ १ २ १र
पा२३ष्ठात् । उक्थेभिरग्नेजनयन्तदा२३इवाः । तंत्वागिरः
र र २ १ २ र १ ० २ १ २
सुष्टुतयोवाजया२३न्तो । आजिन्नगाइर्ववा२३हाइः । जाये
१ २ ५र र २ १ ११११
३ । ग्यू२रा२३४ औहोवा । अश्वा२३४५ः ॥१॥

५ ३२ ३ ४ ५ ४ ५ १र २ १
II हा । ययाइदिवोहाइ । विल्वत् । आपो । तपर्व ।
२ ३ ४ ५ ३ २ ३ ४ ५ ४ ५ १
तस्यपृष्ठात् । हा । ययाइ । दिवोहाइ । उक्थाइ । भिरा
२ १ २ ३ ४ ५ ३ २ ३ ४ ५ ४
ग्ने३जन । यन्तदेवाः । हा । ययाइ । दिवो हाइ । तं
५ १ २ १ २ ३ ४ ५ ३ २
त्वा । गिराः । सुष्टुतयः । वाजयन्तो । हा । ययाइ ।
३ ४ ५ ४ ५ ० २ १ २
दिवोहाइ । आजोम् । नगाइर्ववा२३हाइः । जाये३ ।
१ २ ५र र २ १ १११५
ग्यू२रा२३४औहोवा । अश्वा२३४५ः ॥ २ ॥ ६८

यथा, तद्वत् । अपिच, हे 'गिर्ववाहः' गीर्भिः स्तुति-रूपाभिः

---

I, II अनयोरभिधानमाज्यम् ऐरतं वा ।

अथ सप्तमी ।

वामदेवोब्रूते ।

१ ३ १ २ ३ १ २ ३ १
आ वोराजानमध्वरस्य रुद्रꣳ

२र ३ १ ३ १ २
होतारꣳ सत्ययजꣳ रोदस्योः।

२ २ ३१ २ ३२ ३ २३
अग्निं पुरा तनयित्नोरचित्ता-

१ २ ३ १ २
द्धिरण्यरूपमवसे कृणुध्वम् ॥ ७ ॥ ६९

थाभिर्वहनीयाग्ने ! 'भरद्वाजाः' (६) स्तोतारः 'तं' प्रसिद्धं 'त्वा' त्वां 'वाजयन्ति' बलिनं (७) कुर्वन्ति । यद्वा, वाजमन्न (८) मिच्छन्ति । अपिच, त्वां 'सुष्टुतयः' शोभन-स्तुति-रूपाः 'गिरः' वाचः 'जिग्युः' जयन्ति वशीकुर्वन्ति । तत्र दृष्टान्तः— 'अश्वाः' वाहाः 'आजिन्' संग्रामं यथा शीघ्रं जयन्ति तद्वदित्यर्थः ॥ ६ ॥ ६८

---

६९ नास्तीयमुत्तरार्चिके । ४१

(६)—अस्याभरद्वाजदृष्टत्वात् ।

(७)—नि०२,९,३ ।

(८)—नि०२,७,२ ।

४र ५र र ४ २ २ २ २ २ ४ ५ १ २र
I आवोराजा। नमध्व। रस्यरुद्राम्। होता।
१ २ २ ३ ४ ५ २ १
राम्। स। त्ययजा३म्। रोदसीयोः। अग्निम्पु। रा।
२ ३ २ ३ ४ ५ १ २ १ २ १ २
तनयि। त्नोरचित्तात्। हिरण्य। रू। पा३मव। सा
२ ३
३४३इ। का३र्णूपुध्वा६५६म्॥ २॥ ६९

हे ऋत्विग्यजमानाः! 'अध्वरस्य' यज्ञस्य 'राजानम्' अधिपतिं 'होतारं' देवानामाह्वातारं 'रुद्रं' (१) रोरूयमाणं द्रवन्तं, शत्रून् रोदयन्तं वा। यद्वा, 'एषा वा घोरातनूर्यद्रुद्र्इति रुद्रात्मकम्। 'रोदस्योः' द्यावा-पृथिव्योः (२) 'सत्ययजं' सत्यस्यान्नस्य (३) दातारम्। यद्वा सत्ययजं सत्येन हविषा (४)

I वामदेव्यं रौद्रं वा।

(१)—रुद्र इति निघण्टोस्तृतीय-काण्डीय-तृतीय-खण्डस्य तृतीयं पदम्। "रुद्रो रौतीति, सतो रोरूयमाणो द्रवतीति वा, रोदयतेर्वा, यदरुदत्तद्रुद्रस्य रुद्रत्वमिति काठकम्, यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति हारिद्रविकम्"-इति नैरुक्तम् १०,१,५। 'रुद्रं रोदनस्वभावकरम्। पार्थिवोग्निः प्रदीप्तः घुग्घुगाशब्दं करोति, वैद्युतोपि गर्जित-लक्षणम्, सौर्यो ✻✻ स्यः। अतोऽसौ रोदन-क्रिया-योगात् रुद्रः उच्यते' -इति वि०।

(२)—नि०३,३०,४। 'द्यावा-पृथिवी-ग्रहणञ्चात्र प्रदर्शनार्थं सर्वदेवानां यष्टारम्' -इति वि०।

(३)—नि०२,७,२४।

(४)—हविर्लक्षणेनान्नेनेत्यर्थः।

अथाष्टमी ।

वसिष्ठऋषिः ।

३ २उ　३ २ ३ १२ २२ ३
इन्धे राजा समर्य्यो नमोभिः

२ ३ १२ ३ १ २　३ १ २
यस्य प्रतीकमाहुतं घृतेन ।

१ २ ३ १ २　३ २ ३
नरो हव्येभिरीडते सबाध

१२　२२ ३ १ २
अग्निरग्रमुषसामशोचि ॥ ८ ॥ ७०

देवान् यजन्तम् । यद्वा, सत्यस्यानन्द-लक्षणस्य सङ्गमयितारं रोदस्योर्व्याप्य वर्त्तमानम् । 'हिरण्य-रूपं' सुवर्ण-प्रभम् । एवं विधम् 'अग्निं' 'वः' युष्माकम् 'अवसे' रक्षणाय 'तनयित्नोः' तनयित्नुरशनिः (५) सह्याकस्मिकः, तत् सदृशाद् 'अचित्तात्' न विद्यते चित्तं यस्मिन् तदचित्तम्, (चित्तोपलक्षित-सर्वेन्द्रियोपसंहारो मरणमिति यावत्) तस्मान्मरणात् 'पुरा' प्रागेव 'आ कृणुध्वं' यूयं समन्ताद्धविर्भिरग्निं भजध्वम् ॥७॥ ६९

---

७० नास्तीयमुत्तरार्च्चिके । ४२

(५)—स्तनयित्नुर्मेघ-वाचकः प्रसिद्धः, तच्छब्द-परोऽशनि-परश्चौपचारिकस्तुल्यः । तथा च विवरण-नये 'अचित्तात्' अचेतनात् 'तनयित्नोः' गर्जित-लक्षणाच्छब्दात् 'पुरा' प्राक् दृश्यमानम् 'हिरण्यरूपं' वैद्युतात्मानमग्निम्-इत्याद्यर्थः ।

२ ५र र र ४र ५र ४ ५ ४र
I इन्द्रा३१२३४इ। हाउहाउहाउ। राजासमर्यान।
५ ४ ५ ४ ५ ३ २ ५र र
मोमोरोभीः। ओभीः। यस्या३१२३४। हाउ। हाउ
र ४५र ४र ५ ४ ५ ४ ५ ४ ५
हाउ। प्रतीकमाहुतङ्ग्। ताइनाआइना। आइना।
३ २ ५र र र ४र ५ र र ४ ५
नरा३१२३४ः। हाउहाउहाउ। हव्येभिरीडतेस। बाधा
४ ५ ४ ५ ३र २ ५र र र
बाधाः। बाधाः। आग्ना३१२३४इ। हाउहाउहाउ।
२ १ २ १ १ १ १
अग्रमुषसा२३मशाउ। वा३। चो२३४५॥ ४॥

१ १ १र २ र र र र
II हौहो२। हौहो२। हौहोइ। इन्द्रेराजासमर्या-
१ १ १ २ र र
ना३मोभी२ः। ओभी२ः। ओभी२ः। यस्यप्रतिकमाहुत
१ १ १ र र
ङ्ग्३ताइना२। आइना२। आइना२। नरोहव्येभि-
र र १ १ १ १
रीडतेसा३बाधा२ः। बाधा२ः। बाधा२ः। हौहो२।
१र २र १ २
हौहोइ। आग्निरग्रमुषसा२३मशाउ। वा३। चो
१ १ १ १
२३४५॥ ५॥ ७०

---

I,II इमे वैश्वज्योतिषे।

अथ नवमी।

त्रिशिरास्त्वाष्ट्रऋषिः।

३ १ २ ३ १ २ ३ १र
प्र केतुना बृहता यात्यग्नि
२र ३ १ २
रा रोदसी वृषभोरोरवीति।

'राजा' दीप्तः (१) 'अर्य्यः' स्वामी (२) हविषां प्रेरकोवा 'अग्निः' 'नमोभिः' स्तुतिभिः सह 'समिन्धे' समिध्यते। 'यस्य' अग्नेः 'प्रतीकं' रूपं (३) 'घृतेन आहुतं' भवति। ये च 'नरः' अस्मदीयाः 'सबाधः' संश्लिष्टाः सञ्जात-बाधाः(४) 'हव्येभिः' हव्यैः सार्द्धम् 'ईडते' स्तुवन्ति। 'सः' अग्नि 'उषसाम्' 'अग्रम्' 'आ अशोचि' आ दीप्यते॥ ८॥७०

'अग्निः' 'बृहता' 'केतुना' प्रज्ञानेन (१) युक्तः सन् 'आ' इदानीं 'रोदसी' द्यावापृथिव्यौ 'प्र याति' प्रकर्षेण गच्छति।

---

(१)—यद्यपि राजेति राजतेर्त्यैश्वर्य्यकर्मणोरूपम् (नि०२,२१,४) भवितुं युक्तं, परमिहोत्तरमीश्वर-वाचकापराय्य-शब्द-श्रुतेर्दीप्तार्थस्य प्रसिद्धस्यैव ग्रहणम्।

(२)—नि०२,२२,२। स्वामिनः प्रेरकत्वं सम्भवत्येव।

(३)—'प्रतीकं, नाम मुखं वा'-इति वि०।

(४)—'सबाधः ऋत्विजः'-इति वि०। युक्तं चैतत् तस्य निघण्टु-तृतीयाष्टादश-पञ्चम-पदत्वात्।

(१)—नि०७,९,२।

३२ ३१ २ ३१र २र
दिवश्चिदन्तादुपमामुदान
३ २ ३ १ २ ३ १ २
ड़पामुपस्थे मह्हिषोववर्द्ध ॥ ८ ॥ ७१

२ र १ २ १र २ १ २ १
I प्रकेतुना। वृहताया। तियग्नाइ:। होइहोवा३होइ।
२र र २ २ १र २ १र २ १
आरोद्साइ। वृषभोरो। रवीताइ। होइहोवा३होइ।
२ १ २र २ १र १ २ १
दिवश्चिदा। तादुपमाम्। उदानाट्। होइहोवा३होइ।
२ र १ २र १ २ १ २र
अपामुपा। स्थेमह्हिषो। ववर्द्धा। होइहोवाहा३१उ।
२ १ १ १ १ १
वा२३। दे३। दिवा२३४५म्॥ ६ ॥

किञ्च, देवानामाह्वान-काले 'वृषभः' (३) इव 'रोरवीति' अत्यर्थं शब्दं करोति। 'दिवश्चित्' अन्तरिक्ष-लोकस्यापि 'अन्तात्' पर्य्यन्तात् 'उपमाम्' (उपमेत्यन्तिक-नाम ४) मेघस्य समीपम् 'उदानट्' उदश्नुते ज्वलनात्मनादित्यात्मनावस्थितः सन् ऊर्द्ध

७१ नास्तीयमुत्तरार्च्चिके। ४३

(३)—'वृषभः वर्षिता'—इति वि०।
(४)—नि०२,१६,११।

अथ दशमी।

वसिष्ठऋषिः।

३ २उ ३ १ २ ३२ ३
अग्निं नरोदीधितिभिररण्यो

५ २ र ३ ५ १ २ ३ २
II हा। हाऔहोइ। प्रा२३४के। तुना। बृहताइ।
१ २४५ २ र ३ ५ १
यातियग्नीः। हा। हाऔहोइ। आ३४रो। दसाइ।
२ ३ २ २ ३ ४ ५ २ र ३ ५
वृषभोइ। रोरवीति। हा। हाऔहोइ। दी२३४वाः।
१ २ १ २ ३ ४ ५ २ र
चिदा। ताइदुप। मामुदानट्। हा। हाऔहोइ।
३ ५ १ २ १ २ ३४५ २
आ२३४पाम्। उपा। स्थेइमहि। षोववर्द्धा। हा। हा
र ३ ५र र २ १ १११
औहो। वा२३४औहोवा। एइ। दिवा२३४५म् ॥७॥७१

व्याप्नोति। अश्नोतेर्व्यत्ययेन परस्मैपदम्। तिपो हल्ङ्यादि लोपः। 'अपां' वृष्टिलक्षणानामुदकानाम् 'उपस्थे' उपस्थाने अन्तरिक्षे (४) वैद्युतात्मना 'महिषः' महान् 'ववर्द्ध' वर्द्धते ॥८॥७१

---

I, II इमे यामे, इन्द्रस्य।

(४)—'आपउपगम्य यत्र तिष्ठन्ति, तदपामुपस्थमन्तरिक्षम्, तस्मिन्नित्यर्थः'—इति वि०।

१ २ ३ २
हस्तच्यूतं जनयत प्रशस्तम् ।
२ १ २ ३ १ २ ३ २
दूरेदृशं गृहपतिमथव्युम् ॥ १० ॥ ७२*

५र र र ४ ५ २ १ २ १ २ १
I हाउहाउहाउ आग्नोम् । नराः । नराः । नराः ।
२ १ २ ३ ४ ५र र र र ४ ५ २ १
दीर्धिति । भिररण्योः । हाउहाउहाउ । हास्ता । च्युताम् ।
२ १ २ १ २ १ २ ३ ४ ५ र र र
च्यूताम् । च्यूताम् । जनय । तप्रशस्तम् । हाउहाउहाउ ।
४ ५ २ १ २ १ २ १ २ १ २ ३ ४ ५
दूराइ । दृशाम् दृशाम् । दृशाम् । गृहप । तिमथव्युम् ।
ऽ ऽ ऽ ३ १ १ १ १
हाउहाउहाउ । वा । ई२३४५ ॥ ८ ॥

'नरः' नेतारऋत्विजः 'प्रशस्तं' प्रकर्षेण स्तुतं 'दूरे दृशं' दूरे दृश्यमानं दूरे पश्यन्तं वा 'गृहपतिं' गृहाणां पालकम् 'अथर्व्युं' (अथर्वतिर्गत्यर्थः [१]) अगमम् अतनवन्तवा 'हस्तच्युतं' हस्तेन गतम् हस्तेन जातम्, अरण्यो विद्यमानम अग्निः 'दीधितिभिः'

---

७२ उत्तरार्चिकस्य ६,१,१०,१ ।

* यदुक्तं पुरस्तात् सप्तमखण्ड-भाष्यारम्भे 'अग्निन्नरोविराट्' इति तदिह साक्षात् प्रदृश्य प्रमाणीकार्य्यम्

(१) —अथर्यति-इति गति-कर्मसु नि०२,१४,९७। अथर्युमिति नैगम काण्डे ४,२,४१। उभवैव यकार-वकारात्मकः पाठ-भेदः ।

८र　र　र　४ ५　२ १　२ १
II हाउहाउहाउ। आग्नीम्। नराः। दी३धिति।
२ ३ ४ ५र　र　र　र र र　४ ५
भिररस्यो। एयो। एयोः। हाउहाउहाउ। हास्ता।
२ १　२ १　२३४ ५
च्यूताम्। जनय। तप्रशस्तम्। स्तम्। स्तम्।
र र र　४ ५　२ १　२ १　२ ३ ४
हाउहाउहाउ। दूराइ। हशाम्। गृहप। तीमथ
५　ऽ ऽ ऽ　२
व्यूम्। व्यूम्। व्यूम्। हाउहाउहाउ। वा। ई
१ १ १ १
२३४५॥ ८॥ ७२

इति द्वितीय-दशति ॥

अङ्गुलिभिः(१) 'जनयत' जनयन्ति। [अत्र यास्कः—(२)"दीधितयो-

---

1,II अनयोर्वसिष्ठः प्रजापतिर्वा ऋषिः, राशिमरायं, मरायराशिनं वा स्फान्तिकरणं वा च्यावनं वा शैखण्डिनं वा इन्वकं वा नाम।

(१)—'दीधितयः'-इति नि०२,५,८।

(२)—यास्क-धृतेत्वस्मिन् मन्त्रे 'जनयन्त', 'हस्तच्युती', 'अयर्थुम्'-इति त्रयः पाठभेदाः परिलक्ष्यन्ते। किञ्च अथर्युमिति नानेन व्याख्यातम्। व्याख्यातमेतद् देवराजयज्वना, तद्यथा,—'अतते: जनि-मनि-यजि-दमिभ्यो अथि मिधीति बाहुलकात्

ङ्गुलयो-भवन्ति, धीयन्ते कर्म्मस्वरणौ प्रत्यृतराने अग्निः समरणाज्जायत इति वा, हस्तच्युती हस्त-प्रच्युत्या जनयन्त प्रशस्तं दूरेदर्शनं गृहपतिमतनवन्तम् (५,२,११)"-इति ॥ १० ॥ ७२

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने,
प्रथमस्याध्यायस्य सप्तमखण्डः ॥ ७ ॥

---

अथ अष्टम-खण्डे—

प्रथमा।

बुधस्य गविष्ठिरस्य चार्षी।

१ २ ३२ ३ २३ १ २ ३
अबोध्यग्निः समिधा जनानाम्
१ २ ३ १ २ ३२ ३ १ २
प्रति धेनुमिवायतीमुषासम्।
३ २३ २ ३ २ ३ १ २ ३
यह्वा इव प्र वयामुज्जिहानाः
२ ३ १ २ ३ २ ३ १ २
प्र भानवः सस्रते नाकमच्छ ॥ १ ॥ ७३

---

७३ उत्तरार्च्चिकस्य ८,३,१३,१।

युस्-प्रत्ययो धातोः अथरादेशस्य, सकार इत्संज्ञकः। अतनं गमनं अथर्यु-शब्देनोच्यते। मत्वर्थीयस्य लुक्, गमनवन्तमित्यर्थः।

४ ५र  ४  १  २ १ २र  १ ऽर  र  १  २
I अबोधिया। ग्नाइःसमिधा। जना२नाम्। प्रताइधे३

२  र १र  र २  २ २ २  १ ऽर १र २
नूम्। इवायतीमुषासम्। यह्वाई३वा। प्रवा२यामु

१ २र र  १र  २  र १र २ १ २  १
ज्जिहानाः। प्रभाना२३वाः। सस्रतेनाकमक्र। इडा२३

२  १
भा३४३। ओ२३४५इ। डा ॥१०॥ ७३

अयम् 'अग्निः' जनानाम् अध्वर्य्वादीनां 'समिधा'(१) समिद्भिः 'अबोधि' प्रबुद्धोभूत्। 'धेनुमिव' अग्निहोत्रार्थं धेनुं प्रति यथा प्रातर्बुध्यते तद्वद् 'आयतीम्' आगच्छन्तीम् 'उषासम्'(२) प्रति उषः काले इत्यर्थः। अथ प्रबुद्धस्याग्नेः 'भानवः' रश्मयोज्वालाः 'यह्वाः' महान्तः (३) 'वयां' (४) शाखां 'प्रोज्जिहानाः' प्रोद्गमयन्तोवृक्षाइव। यह्वामहान्तः प्रोज्जिहानाः स्वाधिष्ठानं

---

I श्येनः प्रजापतिर्वा ऋषिः, श्यैतं वा श्रयनं वा श्रायनं वा दीर्घायुष्यं वा नाम।

(१)—'समिन्धनेन'-इति वि०।

(२)—'वा ष-पूर्वस्य निगमे (६,४,९)'-इति सूत्रे अनश्चनवृत्तिमते तेनैव दीर्घः।

(३)—'पक्षिणः'-इत्यधिकोभावार्थः परिदृश्यते विवरण-ग्रन्थे।

(४)—'वयां, द्वितीयैकवचनमिदं पञ्चम्येकवचनस्य स्थाने द्रष्टव्यम्, वयाभ्यः-इत्यर्थः'-इति वि०।

अथ द्वितीया।

वत्सप्रिर्ऋषिः।

२ ३ १ २ ३ १ २ ३ ३
प्र भूर्जयन्तं मह्नां विपोधां

३ १र २र ३ २ ३ १ २
मूरैरमूरं पुरान्दर्माणम्।

१ २ ३ २ ३ १र २र ३
नयन्तङ्गीर्भिर्वना धियं धां

१ २ ३ १र २र ३ २
हरिश्मश्रुं न वर्मणा धनर्चिम्॥२॥ ७४

त्यजन्तोभानवः 'नाकम्' अन्तरिक्षम् (५) 'अच्छ' आभिमुख्येन 'प्र सस्रते' प्रसरन्ति॥

"सस्रते"-"सिस्रते"-इति पाठौ॥१॥ ७३

हे स्तोतः! त्वम् 'जयन्तम्'(१) असुर-सेनानां जेतारं 'मह्नां'

---

७४ नास्तीयमुत्तरार्च्चिके। ४४

(५)—'नाकं द्युलोकम्'-इति वि०। नाकमिति निघण्टौ दिवआदित्यस्य च साधारण-नामसु तृतीयम्। 'सूर्य्योद्यु-स्थानः'-इति नैरुक्ताष्टम-शासनाद् आदित्य-पर-पक्षेऽपि द्यु-लोक-परं सुलभम्, अन्तरीक्ष-परन्तु कृच्छ्र-लभ्यम्।

(१)—'प्रत्ययं जयन्तमित्यनेन सम्बन्धयितव्यः, भूः प्रथमैकवचनमिदम् द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्, भुवं पृथिवीलोकं जयन्तम्, भूर्ग्रहणञ्च प्रदर्शनार्थम् त्रीनपि लोकान् जयन्तम्'-इति वि०।

४ ५र ४ ५ ४ २ २ २ ३र ५र २र १२ र
1 प्रभूर्जयन्ताम् । महा३४३०विपोधाम् । मूरैरमूरं पुरां
७ २ ३ २ २ ३र ५ ३ २ २ ३ ५र
दर्मा३३णाम् । नया२४३न्तङ्गीर्भिः । वना३४३धियन्धाः ।
४ ५ ४ ५ २ १ १ १ १ १
हरिश्मश्रुं नवर्मणाई । हाउवा । धना३र्चौ२३४५म् ॥११॥७४

महान्तं 'विपोधां' (२) मेधाविनः (३) धर्तारं 'मूरैः' मूढैरधिष्ठितानां 'पुरां' शरीराणां 'दर्माणं' आदरेण रचकम् 'अमूरम्' अमूढमग्निं 'प्रभूः' स्तोतुं प्रभव समर्थोभव 'गीर्भिः' स्तुतिभिः 'वना' वननीयं सम्भजनीयं 'नयन्तं' धनानि प्रापयन्तं 'वर्मणा' कवच-स्थानीय-ज्वालयोपेतं 'हरिश्मश्रुं न' (४) हरित-वर्ण-केशमयमिव 'धनर्चिं' धार्यमाणं क्रियमाणं स्तोत्रं यस्य तम्, प्रीणनकर-स्तोत्रं वा अग्निमुद्दिश्य 'धियं' परिचरण-रूपं कर्म 'धाः' विधेहि ॥

"मूरैः"-"मूराः"-इति च पाठौ॥ 'नयन्तं गीर्भिर्वना धियन्धा हरिश्मश्रुं न वर्मणा धनर्चिम्"-इति छन्दोगाः, "नयन्तोगर्भं वनां धियं धुर्हरिश्मश्रुं नार्वाणं धनर्चम्"-इति बह्वृचाः ॥ २ ॥ ७४

---

I पौषम् ।

(२)—'वेपइति कर्म-नाम (नि० २, १, १) तस्मेदमादि-प्रत्ययम्, स्व-कर्मणः हविर्वहनादेर्धारयितारम्'—इति वि० ।

(३)—विपइति निघण्टौ मेधावि-नामसु चतुर्दशतमम् ।

(४)—हरिश्मश्रुम्, श्मश्रु-स्थानीय-हरित-वर्ण-ज्वाला-समेतम् । न शब्दः पाद-पूरणे-इति वि० सम्मतोर्थः ।

अथ तृतीया ।

भरद्वाजऋषिः ।

३ १ २ ३ १ २ ३ १ २ ३ १र
शुक्रं ते अन्यद्यजतं ते अन्यद्
२र ३ १ २ ३ १ २
विषु रूपे अहनी द्यौरिवासि ।
२ ३ २ ३ १र २र
विश्वा हि माया अवसि स्वधावन्
३ १ २ ३ २ ३ १ २
भद्रा ते पूषन्निह रातिरस्तु ॥ ३ ॥ ७५

हे 'पूषन्' ! 'ते' तव 'शुक्रं' शुक्लवर्णम् 'अन्यत्' एकमहर्भवति वासरात्मकम्, तथा 'ते' तव सम्बन्धि 'यजतं' [यजिरत्र सङ्गतिकरणे (१) वर्त्तते] यजनीयं प्रकाशेन सङ्गमनीयं स्वतः कृष्णवर्णम् 'अन्यत्' एकमहर्भवति रात्र्याख्यम् । इत्थं 'विषु रूपे' शुक्ल-कृष्णतया नानारूपे 'अहनी' तव महिम्ना निष्पद्येते । यद्वा । हे पूषन् ! त्वदीयमन्यद्रूपं 'शुक्रं' निर्मलं दिवसस्योत्पादकम्, त्वदीयमन्यदेकं रूपं 'यजतं' केवलं यजनीयं न प्रकाशकं रात्रेरुत्पादकम् । अतएव 'विषु रूपे' विषम-रूपे 'अहनी' अहश्च रात्रिश्च भवतः । अहोरात्रयोर्निर्माणे सूर्य्यएव कर्त्ता ।

---

७५ नास्तीयमुत्तरार्च्चिके । ४५

(१)—'यज देवपूजा-सङ्गतिकरण-दानेषु'-इति भ्वा० उभयपदिषु ।

५ ४ २५   ४ ५ ४   ५   ५   १ २ २
I शुक्रंतेअन्यद्यजतम् ।  तआाइन्यात् ।  विषुरूपे
२   ७   २   १ २   २ २
अहनिद्यौः ।  इवा२३सी ।  वाइश्वाहिमायाअवसाइ ।
२   २   १२ १२   १   २ १   २ ३ ४ ५
स्वधा३वान् ।  भद्रा ते ।  पू ।  षा३निह ।  रातिरस्तु ।
४
तिरा५स्तहाउवा ॥ १२ ॥ ७५

कथमस्य प्रसक्तिरिति ? तत्राह,—'द्यौरिवासि' यथा द्यौरादित्यः प्रकाशयिता तथा त्वं प्रकाशकोऽसि । कुतः ? इत्यत आह,—हे 'स्वधावन् !' अन्नवन् ! (२) पूषन् ! 'विश्वाः' सर्व्वाः मायाः प्रज्ञाः 'हि' यस्मात् कारणात् 'अवसि' रक्षसि, अतः कारणात् त्वं सूर्य्य-इव भवसीत्यर्थः । तादृशस्य 'ते' तव 'भद्रा' कल्याणी 'रातिः' दानम् 'इह' अस्मासु 'अस्तु' भवतु(३) । यास्कस्त्वाह—"शुक्रं तेऽन्यल्लोहितं तेऽन्यद्यजतं तेऽन्यद्यज्ञियं तेन्यद्विषमरूपे ते अहनी कर्म्मणा द्यौरिव चासि सर्व्वाणि प्रज्ञानान्यवस्यन्नन्नवन् (१२,२,६)" इति ॥

"स्वधावन्"-"स्वधावः"(४) इति च पाठौ ॥ २ ॥ ७५

---

I शुक्रम् ।

(२)—स्वधेत्यन्न-नामसु विंशतितमम् (नि० २, ७, २०) ।

(३)—क्वचित् 'ते अन्यत'-इति पाठः, 'प्रकृत्यान्तःपादमव्यपरे (६, १, ११५)'-इति साधनीयः ।

(४)—'मतुवसो रुसम्बुद्धौ छन्दसि (८, ३, १)'-इत्यादिना सिद्धम् ।

अथ चतुर्थी।

विश्वामित्रऋषिः।

१ २ ३ १ २ २ १र
इडामग्ने पुरुदꣳसꣳ सनिं गोः

२र ३ १र २र
शश्वत्तमꣳ हवमानाय साध।

१ २ ३ १र २र ३ २उ
स्यान्नः सूनुस्तनयो विजावा

३ १ २ ३ १ २ ३ २
ग्नेसा ते सुमतिर्भूत्वस्मे ॥ ४ ॥ ७६

५ १ २ २ ३ ४ ५ ४ ३ ४
I इडामग्नाइ। पुरुदा३। सꣳसनिंगोः। शश्वत्तमꣳहव

५र २ ३ ५ १र र २ २
माना। यसा२३४धा। स्यान्नसूनुस्तनयः। विजा३वा३।

४ ५ ४ ५ २ २ २ ४र ५ ३
आग्नेमाताइ। सुमा३४३। तो३ः। भूतुह्वाउवा। स्मा

१ १ १ १
२३४५इ ॥ १३ ॥ ७६

हे 'अग्ने!' 'पुरुदंससं' [ 'दंसः वेषः'—इति (नि० १२, १, ३) कर्म्मनामसु पठितत्त्वाद्दंसः-शब्दः कर्म्म-वाची ] पुरूणि बहूनि

---

७६ नास्तीयमुत्तरार्च्चिके। ४६

। कौत्सम्।

अथ पञ्चमी ।

वत्सप्रिर्ऋषिः* ।

१र　२र　३　२　३ १ २ ३　२
प्र होता जातो महान्नभोविन्

३ १ २　　३ १ २ ३ २
नृषद्मा सीददपां विवर्त्ते ।

दंसांसि कर्म्माणि यस्याः सा, तां बहु-कर्म्माणं 'गोः सनिं' (१) गवादि-पशूनां सम्पादयित्रीं 'इडाम्' (२) एतन्नामिकां गो-रूपां देवतां 'शश्वत्तमं' निरन्तरं 'हवमानाय' यजमानाय मह्यं 'साध' साधय । किञ्च । 'नः' अस्माकं 'सूनुः' पुत्रः 'तनयः' पौत्रः 'स्यात्' भवतु—इति 'ते' तव या 'सुमतिः' शोभना बुद्धिः सा 'विजावा' (३) अवन्ध्या सती 'अस्मे' (४) अस्माकं 'भूतु' (५) भवतु ॥ ४ ॥ ७६

'यः' अग्निः 'अपाम्' [ अन्तरिक्ष-नामैतत् ( नि० १,३,८) ]

---

* 'वत्सप्रीः'-इति वि० पाठः ।

(१)—"छन्दसि वन-सन-रक्षिमथाम् (३,२,२७)"-इति इनि रूपम् । 'षणदाने, तत्पूर्वकत्वाल्लाभउपलक्ष्यते; सनिं च लाभं च गोः'-इति वि० ।

(२)—'इडामन्नमिति (नि० २, ७, १६) वि० । 'कीदृशमन्नम्? पुरुदंसमिति च वि० । एतदुक्तम्भवति—'अन्नं गावश्च अस्मभ्यं देहीत्यपि वि० ।

(३)—विजावेति तनय-विशेषणमिति वि०-मतम् । तथाचोक्तम्—'कीदृशः पौत्रः उच्यते—'विजावा' विविधं जनयिता पुत्राणाम्, अनेन प्रकारेण वंशस्याविच्छेद आशास्यते'-इति वि० ।

(४)—सुपां सुलु गित्यादिना (७,१,३९) विभक्तेः शे-भावे, 'शेश्छन्दसि बहुलम् (६,१,७०) इति सिद्धम् ।

(५)—विकरणाभावादिकं सर्वं बाहुलकात् (२,४,७३) ।

अथ षष्ठी।

वसिष्ठऋषिः।

२ ३ २ ३ १ २ ३ २
प्र सम्राजमसुरस्य प्रशस्तं
२ १ २ ३ १ २ ३ १ २
पुꣳसः कृष्टीनामनु माद्यस्य।
१ २ ३ २ ३ १ २ ३ १ २
इन्द्रस्येव प्र तवसस्कृतानि
३ १ २ ३ १ २
वन्दद्वारा वन्दमाना विवष्टु ॥ ६ ॥ ७८

१ १ १ र र र २ १
दाधा२द्योधा२। याइमुते वयाꣳसियन्तावसू२३नी। आ
२ २ १२ १ २ १ ३ ५र र
औ३हो। इहा। विधताये३। तनू२पा२३४औहोवा।
२ र ३ १ १ १ १
हविष्मते२३४५ ॥१५॥७७

'असुरस्य' बलवतः(१) 'पुंसः' वीरस्य [पौंस्यमिति वीर्यमुच्यते(२) तथाच यास्कः—'पुमान् पुंसमना भवति पुंसतेर्वेति] 'कृष्टीनां'

---

७८ नास्तीयमुत्तरार्चिके। ४८

(१)—'प्राणवतः'-इति वि०। "असुरिति प्राणनाम"—इति नै०३,२,९। तेन तद्वान् असुरः। प्राणबलयोरेकार्थता प्रायः प्रसिद्धा।

(२)—पौंस्यानि-इति नि० २,९,२१।

५ र २ २ ३ ४ ५ २ १
I प्रसंम्राजाम्। असुरा३। स्याप्रशस्ताम्। पुं(ं)सः
२ १ २ ३ ४ ५ २ र २ ३
कृष्टाइ। ना३मनु। मादियस्या। इंद्रस्येवा३४३प्रतव।
२ ३ ४ ५ २ १ र २र १ २र र १ ३ ५र र
सस्कृतानि। वन्दद्वारावन्दमाना। विवा२ष्ट२३४ओहोवा।
२ ५
वो२३४ शाः॥ १६॥ ७८

जनानाम् 'अनु माद्यस्य' स्तुत्यस्य 'तवसः'(२) बलवतः 'इन्द्रस्येव'(३) तस्याग्नेः प्रशस्तम् (४) उत्कृष्टं 'सम्राजं' सम्यग्राजमानं स्वरूपं प्रस्तौतु। तथा 'वन्दद्वारा'(५) वन्दनं वन्दः स्तुतिः, तद्वाराणि स्तुति-प्रमुखानि 'वन्दमाना' सर्वैः स्तूयमानानि 'कृतानि' कर्माणि 'प्र विवष्टु' प्रकर्षेण-कामयताम्॥

"**प्रसम्राजमसुरस्य प्रशस्तम**"-इति छन्दोगाः; "**प्रसम्राजो असुरस्य प्रशस्तिम्**"-इति बह्वृचाः। "**वन्दद्वारा वन्दमाना विवष्टु**"-इति, "**वन्दे दारुं वन्दमानो विवक्मि**"-इति च पाठौ॥ ६॥ ७८

I घृताचेराङ्गिरसस्य साम।

(२)—तवः-इति नि० २,९,५। पदमेतत् 'इन्द्रस्य'-इत्यस्य विशेषणम्।

(३)—'यथा इन्द्रस्य कृतानि वृत्र-वधादीनि कर्माणि कश्चिद् वदति, तद्वदग्नेरपि कृतानि कर्माणि हविर्वहनादीनि 'प्र वदत्' प्रकर्षेण स्तौति'—इति वि०।

(४)—विवरण-कृन्मतेऽसौ द्वितीया षष्ठ्यर्थे, तथाचेदमपि पदमिन्द्र-विशेषणम्।

(५)—विवरण-मते 'वदद्वारा'-इति पाठः। प्रेत्यनेन च वददित्यस्य सम्बन्धः।

अथ सप्तमी।

विश्वामित्रऋषिः।

३ २ ३ १ २र ३ १ २ ३
अरण्योर्निहितो जातवेदा
१ २ ३ १र २र ३ १ २
गर्भइवेत्सुभृतो गर्भिणीभिः।
३ १ २ ३ १ २ ३ १ २
दिवे दिवईद्योजागृवद्भि-
३ १ २ क २र ३ २
र्हविष्मद्भि र्मनुष्येभिरग्निः॥ ७॥ ७९

I अरण्योः। निहितोजा३४३तवेदाः। गर्भइवेत्सुभृतो-
ग। भिणा२३४इभीः। दिवेदिवईद्योजागृवा२३द्भीः।

'जातवेदाः' सर्व-विषय-ज्ञानवान् 'अयम्' अग्निः 'अरण्योर्नि
हितः' देवैर्यज्ञार्थं नितरां स्थापितः। तत्र दृष्टान्तः—'गर्भः इव'-

७९ नास्तीयमुत्तरार्च्चिके। ४९

I भरद्वाजस्य, प्रासाहम्।

तथाच,—'प्रवदत्' प्रकर्षेण स्तौति 'वारा' वारं वरणीयं 'वन्दमाना' वन्दमानं स्तुवन्तं 'विवष्टु' विविधं कामये-इत्यर्थः।

अथाष्टमी।

पायुर्ऋषिः।

३ १ २   ३ २ ३
सनादग्ने मृणसि यातुधानान्
२ ३ १ २  ३ १ २
न त्वा रक्षाꣳसि पृतनासु जिग्युः।

१ ५ २ ५ ४२ ४ ५२
हा२३४वो। आ२३४ङ्गोः। मनुष्येपुभिरग्निः। एहियाई
५ ४
हा। होपुइ। डा॥१७॥७९

इति, यथा गर्भोगर्भिणीभिः स्त्रीभिः 'सुभृतः' सुष्ठु धार्यते तद्वत्। स तादृशोऽग्निः 'हविष्मद्भिः' सम्भृत-हविष्कैः अतएव 'जागृवद्भिः' कर्मणि जागरूकैः 'मनुष्येभिः' मनुष्यैरस्माभिः 'दिवे दिवे' प्रत्यहं स्तुत्यर्थम् 'ईड्यः' स्तुति-रूपाभिर्गीर्भिः स्तोतव्यः(१)॥

"सुभृतोगर्भिणीभिः"-इति, "सुधितोगर्भिणीषु"-इति च पाठौ॥ ७॥ ७९

हे 'अग्ने'! त्वं 'सनात्' चिरादेवारभ्य 'यातुधानान्' कु-व्यापारेण युक्तान् 'क्रयादः' क्रव्यादोमांस-भक्षकान् राक्षसान्(०)***

(१)—इह मन्त्रे श्रुतइच्छब्दः पाद-पूरणार्थएवेति न व्याख्यातः।

(०)—इह किञ्चित् पाठोनष्टइति लक्ष्यते, मृणसीत्यादेर्व्याख्यानादर्शनात्। विम-

१ २ ३ १ २ ३ २ ३
अनु दह सह मूरान् कयादो
१ २ ३ १ २ ३ १ २
मा ते हेत्या मुक्षत दैव्यायाः ॥ ८ ॥ ८०

३ २ २ २ १र २ १
I अहा। वोऽहा। वोऽहा। सनादग्नाइ। मृणसि।
२ ३ ४ ५ २ १र २ १ २ ३ ३ ५
यातुधानान्। नत्वारक्षा। सीऽपृत। नासुजिग्यूः।
२ १ २ १र ? ३ ४ ५ ३ २ २
अनुदहा। सहमू। रान्कयादाः। अहा। वोऽहा।

'दह' तेजसा भस्मीकुरु। किञ्च। तव सम्बन्धिनो 'दैव्यायाः'

---

८० नास्तीयमुत्तरार्च्चिके। ५०

I अग्नेर्वैश्वानरस्य अत्रेर्वा, राक्षोघ्नम्।

रणकारस्त्वस्यैवं व्याख्यानं कृतम्—हे 'अग्ने' त्वं 'मृणसि' मारयसि 'यातुधानान्,' राक्षसान् [नेत्ययं प्रतिषेधो जिग्युरनेन सम्बन्धयितव्यः] 'त्वा' त्वां 'रक्षांसि 'पृतनासु' सङ्ग्रामेषु (नि०२,१६,९) 'न जिग्युः' न जयन्तीत्यर्थः, सर्वदा अपराजेता एव, अतो ब्रवीमि—'अनुदह'। 'सह मूरान्' सह भूतान् मूढान् मूर्खानित्यर्थः। 'कयादः' क्रव्य-शब्दस्य रेफवकारयोश्छन्दसि वर्णलोपेन कयदित्येतद् भवति, तानि ये अदन्ति ते कयादः, तान्, मांसस्य भक्षितृनित्यर्थः। किञ्च 'मा ते' 'हेत्याः' हेतिर्वधः तस्य मांसम 'मुक्षत' अमुच्यत इत्यर्थः दैव्यायाः देवानां सम्भूतायाः; सर्वदा देवैर्हन्यमानामि-त्यर्थः"-इति।

२  र १ २र १  २ १  २  २ ४
वो३ह्वा । माताइह्वेत्याः । मुञ्चत । दा३४३इ । वो३या

पूयाई५ई ॥ १८॥ ८०

इति तृतीय-दशति ॥

दैव्यात् 'हेत्याः'(२) 'आयुधात्' ते यातुधानाः 'मा मुञ्चत' मुक्ता मा भूवन् ॥

"कयादः"-"क्रव्यादः"--इति च पाठौ ॥ ८ ॥ ८०

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने
प्रथमस्याध्यायस्य अष्टमखण्डः ॥ ८ ॥

---

षोडशानुष्टुभोह्यग्न ओजिष्ठमिति खण्डयोः ।
सोमंराजानमित्येषा वैश्वदेवी ततः परा ।
स्तुतिरङ्गिरसां शिष्टाः आग्नेय्यस्तु चतुर्दश (०) ।

---

(२)—हेतिः—नि०१,२०,१ । ऊति-यूतीत्यादिना (३,३,९७) सिद्धम् ।

(०)—अग्न ओजिष्ठमाभरेत्यादि-नवम-दशम-खण्डयोः प्रथमे दश, उत्तरे षट्-इति षोडश ऋचः सन्ति । तत्र दशम-खण्डारम्भकं सोमंराजानमिति, अस्याः विश्वेदेवा देवताः, तदत्यवहित-श्रुता इतएतेति, सा तु अङ्गिरसां स्तुतिः, तदितराः सर्वाएव आग्नेय्यइति विवेकः ।

अथ नवमी खण्डे—

सेयं प्रथमा।

गयत्रिर्ऋषिः।

२ ३ १ २ ३ १ २ ३ २ ३ १ २
अग्न ओजिष्ठमाभर द्युम्नमस्मभ्यमध्रिगो।
१ २ ३ १र २र ३ २ ३ १ २ ३ १ २
प्र नो राये पनीयसे रत्सि वाजाय पन्थाम्॥ १ ॥ ८१

हे अग्ने! 'ओजिष्ठं'(१) बलवत्तमं 'द्युम्नं' द्योतते कटक-मुकुटादि-रूपेण सर्वत्र काशतेइति द्युम्नं(२) धनम् अस्मभ्यम् 'आभर' आहर। हे 'अध्रिगो!' अधृत-गमन! [अधृतमप्रतिहतं गमनं यस्येति, अधृता अनिवारिता गावोरश्मयोयस्येति वा, अध्रिगुः(३), तस्य सम्बोधनं हे अध्रिगो] 'पनीयसे' पनीयसा स्तोतव्येन 'राये' राया धनेन। [सुपां सु लुगिति (७,१,३९) शे आदेशः] 'नः' अस्मान् प्रकर्षेण योजय। 'वाजाय' अन्नस्य लाभाय 'पन्थाम्'

---

८१ नास्तीयमुत्तरार्चिके। ५१

(१)—ओजः-इति निघण्टौ द्वितीय-नवमे बल-नामसु प्रथमं पदम्।

(२)—'द्युम्नम्'-इति निघण्टौ द्वितीय-नवमे धन-नामसु त्रयोदशतमम्। स्वासास्वादु ननिर्मेत्यादिना द्युत-दीप्तावित्यस्मात् नक् प्रत्ययो मकारान्तादेशश्च निपात्यते।

(३)—'अधृत-शब्दस्याध्रिभावः, गमनं गौः'-इति निघण्टु-भाष्यम्। रश्मि-नामस्वपि गो-शब्दः परिलक्ष्यते, तथाहि-'गावः'-इति नि० १,५,१।

१ २ ३ ५ २र १ २ ३

I आग्नाओ२३४वा । ओजिष्ठा३मा । भाराओ२३४

५ २ १ २ १ २ ३ ५

वा । द्युम्नमस्मभ्यमध्रिगो३ । ओइ । प्रानाओ२३४वा ।

२र १र ३र १ २ ३ ५ १र २र १ २

रायेपनो २यसे३ । ओइ । रात्माओ२३४वा । वाजायपन्था

१ १ १ १

२३४५म् ॥ १९ ॥

४ ५ १र २ २ ३र

II अग्नेहाउ । ओजि । ष्ठामा१भारा । औहो२३४

५ २ १ ७ २ ३र ५ १ र

वा । द्युम्नस्म । भ्यामध्रीगा । औहो२३४वा । प्रनो-

र र २ २ ३र ५ १ १

राये । पानी१यासा । औहो२३४वा । रात्मी२वाजा२ ।

१ २ १ ५ ४ ५

यपीवा३ । ओ२३४वा । था५वोई्हाइ ॥ २० ॥ ८१

पन्थानम् अत्रस्य, मत्समीप-प्राप्ति-साधनं मार्गं, 'रत्सि'(४) वि-
लिख कुर्वित्यर्थः ॥

"प्र नो राये पनीयसे"--इति छन्दोगाः; "प्र णो राया
परीणसा"--इति बह्वृचाः ॥ १ ॥ ८१

---

I, II इमे पाठे द्वे ।

(४)—'रद' विलेखने अदादिः, द्वितीयाध्यायीय-बहुल-वचनात् लोपोलुक ।

अथ द्वितीया।

वामदेवऋषिः, भरद्वाजोवार्हस्पत्योवा।

१ २ ३ २उ ३ २ ३ १ २ ३ १ २
यदि वीरो अनु ष्यादग्निमिन्धीत मर्त्यः।
३ १ २ ३ १ २ ३ १र २ ३ १ २
आ जुह्वद्धव्यमानुषक् शर्म्म भक्षीत दैव्यम्॥ २ ॥ ८२

३ २ र ३र ४ ५र २र २ ५ ४ ३
I यदिवीरो अनुष्यात्। ऐया३४३ई३४या। अग्नि
४ ५र र ५ २ १ ५ १ १
मिन्धीतमौ। हो३हा३। हो२३४र्त्तियाः। आजु२ह्वा
१ ३ ५ १ २ १ २
द्वा२३। व्यमा२नू२३४षाक्। शर्मभ। क्षाइ। तदा३
२ २ १ ५ ३ १ १ १ १
हा३इ। वा३ओ२३४वा। व्या२३४५म्॥ २१ ॥ ८२

'यदि' यदा 'यस्य' मनुष्यस्य 'वीरः' पुत्रः 'स्यात्' भवति, तदा सः 'मर्त्यः' 'अग्निमिन्धीत' आधानमादधीत कुर्वीत। किञ्च। 'आनुषक्' अविच्छिन्नं यथा भवति तथा 'हव्यम्' 'आ जुह्वत्'

---

८२ नास्तीयमुत्तरार्च्चिके। ५२

I बृहत्, आग्नेयम्।

अथ तृतीया ।

द्वयोर्भरद्वाजऋषिः ।

३ १ २　३ १ २　३ २उ　३ १र　२र
त्वेषस्ते धूम ऋण्वति दिवि सञ्छुक्र आ ततः ।
३ २उ　३ २उ　३ १ २　३ १ २
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ३ ॥ ८३

२र १　४र　५　२　१　२
I त्वेषास्ते२३धूमऋण्वतिहाउ । दिविसंच्छुक्रा२आताता

आभिमुख्येन जुहोति । अपिच । 'दैव्यं' देव-सम्बन्धि 'शर्म्म' गृहं सुखं वा 'भक्षीत' भजेत सेवेतेत्यर्थः(१) ॥ २ ॥ ८२

हे अग्ने ! 'त्वेषः' दीप्तस्य 'ते' तव 'शुक्रः' शुक्लोनिर्मलः शुभ्र-वर्णोवा 'धूमः' 'दिवि' अन्तरिक्षे 'आ ततः' विस्तीर्णः 'सन्' 'ऋण्वति' मेघात्मना परिणतोगच्छति । अपिच । हे 'पावक !'

---

८३ नास्तीयमुत्तरार्च्चिके । ५३
I यामम् ।

(१)—'यदि' 'मर्त्यः' 'इत्थम्' 'आनुषक्' आनुपूर्व्येण 'आजुहवत्' अग्निम् 'हूयीत', तर्हि 'वीरः' 'स्यात्', किञ्च 'दैव्यं' 'शर्म' 'भक्षीत' लभेतेत्यर्थः ; अग्निति पाद-पूरणः—इति वि०-सम्मतोऽर्थः ।

अथ चतुर्थी ।

१र २र३१र २र ३ १र २र
त्वꣳ हि चैतवद्यशोऽग्ने मित्रो न पत्यसे ।
१ २ ३ २ ३ १ २ ३ १र २र
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ ४ ॥ ८४

४र र ५ २ १ २ ४ र ५
३: । सूरोनचोहाउ । द्युताहृवाइम् । क्षपापवाहाउ ।
२ १र २ १
करोचा२३सा३४३६ । ओ२३४५ड् । डा ॥ २२ ॥ ८३

शोधक ! अग्ने ! 'सूरोन' सूर्य इव 'क्षपा'(१) स्तोतव्याभिमुखीकरण-समर्थया स्तुत्या स्तूयमानस्त्वं 'द्युता' दीप्त्या 'रोचसे हि' प्रकाशसे खलु ।

"दिवि सन्"–इति, "दिवि षन्"-इति च पाठौ(२)॥३॥८३

हे 'अग्ने !' 'त्वं हि' त्वं खलु 'चैतवत्' चितिः चयोऽपचयः तत्सम्बन्धि चैतं शुष्क-काष्ठं, तद्युक्तं 'यशः' अन्नं (नि०२,७) हविर्लक्षणं 'पत्यसे' अभिपतसि गच्छसि। तत्र दृष्टान्तः—'मि-

---

८४ नास्तीयमुत्तरार्च्चिके । ५४

(१)—'क्षपा'-इति निघण्टु-तृतीय-चतुर्दशे अर्चति-कर्मसु द्वादशं पदम्, ततः सुपामित्यादिना (७,१,३९) तृतीयायालुक् ।

(२)–'पूर्वपदात् (८,३,१०६)'-इति षत्व-वैकल्पाच्च सिद्धमेव ।

४ २५ ४५ ४५४ ५ १ २
I त्वꣳह्यिच्चैतवद्यशः । इयइयाहाइ । अग्नाइमि ।
१ २ २ ५ १ २ ५ ४ ५
त्रो । नापत्या२३४साइ । आऔ३४हो । इयाहाइ ।
१ ७ २ ५ १ २ ५ ४
त्वंवि । चा । षणो२आ२३४वाः । आऔ३४हो । इया-
५ १ २ २ १ २ २ ५
हाइ । वासा३उवा । पु । ष्टाइम् । नापुष्या२३४सी ।
१ २ ५ ४ ५ ४
आऔ३४हो । इयाहा । हो५इ । डा ॥ २३ ॥ ८४

त्वोन' अहरभिमानी मित्रोदेवः(१) सइव [यद्वा । त्त्यइति गृह-नाम (नि०३,४) 'चैतवत्' चैतं निवासकं हविर्लक्षणमन्नं तद्युक्ताम् यजमान-गृहं मित्रभूतः पुरुधाभिपतसि । यद्वा । पत्यतिरैश्वर्य-कर्मा, (नि०२,२१) ईदृशमन्नं 'पत्यसे' ईशिषे ] अतः कारणात् हे 'विचर्षणे !' विशेषेण सर्वस्य द्रष्टः ! 'वसो !' वासकाग्ने ! त्वं 'श्रवः' श्रवणीयमन्नम् (नि०२,७) अन्न-कार्य-भूतां 'पुष्टिं' च पुष्यसि वर्द्धयसि ॥ ४ ॥ ८४

---

I बृहच्चैवाग्नेयम् ।

(१)—स च अन्तरिक्षस्थः, नैरुक्ते (१०,२,८-९) वाय्वादिषु परिगणितत्वात् । 'मित्रो जनान्यातयति ब्रुवाणोमित्रोदाधार पृथिवीमुतद्याम् । मित्रः कृष्टीरनिमिषाभिचष्टे मित्रायहव्यं घृतवज्जुहोत'-इति ऋक् च तत्रैवोदाहृतम् ।

अथ पञ्चमी।

मृक्त*वाहाद्वितऋषिः।

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
प्रातरग्निः पुरुप्रियो विशस्तवेतातिथिः।
३ २ ३ १ २ ३ १र २र ३ १ २
विश्वे यस्मिन्नमर्त्ये हव्यं मर्त्तास इन्धते॥ ५॥ ८५

५र र ५ २ १ र र १
I प्रातरग्नाइः पूईरुप्रियाः। विशास्तवे। ता२३। अ-
३ २ १ २ १ ३ ५ १
तिथाइः। वाइश्वेयास्मीऽन्। अमा२र्त्ता२४याइ। हव्या

'पुरुप्रियः' बहु-प्रियः 'विशः' यजमाने धनस्य निवेशकः(१) 'अतिथिः' यजमानानां गृहान् प्रति [तिथिषु न अभ्येतीत्यतिथिः। तथाह यास्कः—"अतिथिरभ्यतितो गृहान् भवत्यभ्येति तिथिषु पर-कुलानीति पर-गृहाणीतिवा(४,१,५)" इति] एवं विधोऽग्निः 'प्रातः' 'स्तवेत' स्तूयते। 'अमर्त्ये' अमरण-धर्मके 'यस्मिन्'

---

८५ मास्तोयमुत्तरार्च्चिके। ५५

* सूक्त-इति वि०-पाठः।

I बृहतस्य कौमुदस्य साम।

(१)—'विशः, प्रथमा-बहुवचनमिदं तृतीया-बहुवचनस्य स्थाने द्रष्टव्यम्, विड्भिः यजमान-मनुष्यैः; 'स्तवेत' लिङयं लडर्थे द्रष्टव्यः कर्मणि च विड्भिः स्तूयते'-इति वि०।

अथ षष्ठी ।

वसूयवआत्रेयाऋषयः ।

१र २र३ २ ३१२ ३१२
यद्वाहिष्ठं तदग्नये बृहदर्च्च विभावसो ।
१ २ ३ २३ २उ ३ १२
महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ ६ ॥ ८६

१ २ १ २१ २ १
२३(९)होइ । मर्त्ता३हो । सइन्धा२३ता३४३इ । ओ२३
४५इ । डा ॥ २४ ॥ ८५

अग्नौ 'विश्वे' सर्वे 'मर्तासः' मर्ताः मनुष्याः 'हव्यम्' 'इन्धते' दीपयन्ति दधतइत्यर्थः(२) ॥

"विश्वे यस्मिन्नमर्त्त्ये हव्यं मर्त्तास इन्धते"-इति छन्दोगाः, "विश्वानि यो अमर्त्त्यो हव्या मर्त्तेषु रण्यति" इति बह्वृचाः ॥ ५ ॥ ८५

'वाहिष्ठं' वोढृतमं 'यत्' स्तोत्रं 'तत् अग्नये' क्रियते । अतः हे 'विभावसो!' (१)प्रभा-धनाग्ने! 'बृहत्' बहुलं धनं च 'अर्च्च'

---

८६ नास्तीयमुत्तरार्च्चिके । ५६

(२)-'विश्वे यस्मिन्-इति परस्माद् यच्छब्द-श्रवणात् पूर्वस्मिन्नप्यर्द्धर्चे तच्छब्दोऽध्याहार्य्यः—पाठक्रमादर्थ-क्रमस्य बलीयस्त्वात् पूर्वं द्वितीयोऽर्द्धर्चो व्याख्यातव्यः'-इति वि० । यस्मिन्नग्नौ विश्वे मर्तासोहव्यमिन्धते, सोऽयं विड्भिः स्तूयतइति भावार्थः ।

(१)—वसु धनं, तद् यस्य विविधं भाति दीप्यते स विभावसुः ।

४र ५ ४ १ २१र २
I यद्वाहिष्ठं तदा। ग्नयाइ। बृहदर्चविभावा२३साउ।
१ १ १ २ १र २
माही२षाइवा२। त्वद्रयिः। त्वद्वा२३जाः। उदीरा२३ता
१
३४३इ। ओ२३४५इ। डा॥ २५॥

४ र ५ ४५४५र र ४ ५ २१
I यद्वाहिष्ठं तदग्नये। यद्वाहिष्ठोवा। तदग्नयाइ।
२ १र २ १
बृहदा२३र्चा। विभावसाउ। महिषा२३इवा। त्वद्रयिः।
२ १र २ १
त्वद्वा२३जाः। उदीरा२३ता३४३इ। ओ२३४५इ। डा
॥ २६॥ ८६

अस्मभ्यं प्रयच्छ। कथमस्यान्न-धन-प्रदातृत्वमित्यपेक्षायामाह— यतः 'त्वत्' त्वत्तः सकाशात् 'महिषी' महती([२]) 'रयिः' धनम् 'उदीरते' उद्गच्छन्ति([३])। 'इव'-इति पाद-पूरणः([४]) ॥ ६ ॥ ८६

---

I,II अग्निऋषिः, यद्वाहिष्ठीये यज्ञाऽ(?)हिष्ठीये वा।

(२)—महन्नामसु 'महिषः'-इति षष्ठं पदम् (नि० ३, ३)।

(३)—'त्वद्वाजा'-इत्यस्य व्याख्यानमिह नोपलभ्यते। विवरणकारस्तु 'त्वद्रयिः'-इत्यस्य त्वया सह धनम् इति व्याख्याय 'त्वद्वाजा' त्वया सह अन्नानि इति व्याख्यातम्। भाष्य-. ..स्तु 'त्वत्' त्वत्तः सकाशात् 'वाजा' अन्नानि इत्यर्थः सम्भवपरः।

(४)—'एतदुक्तं भवति—यस्मादग्निना दत्तं धनमन्नं च त्वया सङ्गच्छते, यस्मा-

अथ सप्तमी ।

गोपवनऋषिः, सप्तवध्रिर्वा ।

३ १　२　३ १ २　३ १ २　३ २
विशो विशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
३ २ ३ २३ १२ ३१ ३२३ १२
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ ७ ॥ ८७

५ र र र　५　१र　र
I विशोविशोऊम्वोई अतिथाइम । वाजयन्ताः । पू-
१ २ २　१ ५र　१　२　१
३रुप्रो३याम् । अग्निंवो२ । दूरा२३याम् । वुम्माइ ।
२ २　१　र ५　१　३ २　३　५
वा३चा३ः । स्तूर३४षेहाइ । ओ । हुवाइ । शू२३४षा ।
१　२　२　१　ऽ　५र　५　४
हुम्मा । स्या३मा३ । न्मार३४भाइ । एहियाइहा । हो
५इ । डा ॥ २७ ॥ ८७

हे ऋत्विग्यजमानाः ! 'वः' यूयं 'वाजयन्तः' अन्नमिच्छन्तः

---

८७ उत्तरार्चिकस्य ७,२,१२,१ ।

I अग्निऋषिः, विशोविशीयम् ऐडं वा ।

इभिना दत्तेन धनेनान्नेन च त्वमीश्वरोऽसि । (कथम्पुनर्धनमन्नानि च त्वया सङ्गच्छन्त्योत उच्यते—'महिषीव' यथा राजभार्य्या तेनैव सह सङ्गच्छते तद्वदित्यर्थः)'-इति वि० ।
अतः 'अग्नये' अग्निम् 'अर्च'-इति योजना ।

अथाष्टमी।

पुरुराचेयऋषिः।

१ २उ ३ २ ३ १र २र ३ २ ३ १ २
बृहद्वयो हि भानवे र्चादेवायाग्नये।
३ १र २ २र ३ १ २ ३ २ ३ २
यं मित्रं न प्रशस्तये मर्त्तासो दधिरे पुरः॥ ८॥ ८८

५ २ १र २ १ २ २र १र २
I बृहद्वयाः। हिभानार२३वाइ। आर्चादेवा। य-

'विशोविशः' सर्वस्याः प्रजायाः 'पुरु-प्रियं' बहुप्रियम् 'अतिथिं' पूज्यम् 'अग्निं' स्तुत्या परिचरतेतिशेषः। अहं च 'वः' युष्मदर्थं 'दुर्यं' गृह-हितम्(१) अग्निं 'वचः' 'स्तुषे' स्तौमि 'शूषस्य' सुखस्य(२) लाभाय। कैः साधनैः? 'मन्मभिः' मननीयैः स्तोत्रैः॥ ७॥ ८७

यस्मै 'भानवे' दीप्तिमते 'अग्नये' 'बृहत्' महत् 'वयः' हवी-

---

८८ नास्तीयमुत्तरार्च्चिके। ५७

(१) 'दुर्य्याः'-गृहाणाम्'-इति नि० ३, ४, ९। 'दुर्य्यं यज्ञं गृह-द्वारि भवम्'-इति वि०।

(२)—'शूषम्'-इति निघण्टु-तृतीय-षष्ठे सुख-नामसु एकादशतमम्। लाभायेति षष्ठी-श्रवण-सामर्थ्याद् गम्यते।

१ २ १ ७ १ २
अग्नाऽ२३याइ । यम्मित्रन्न । प्राशस्ताया२इ । मर्त्तासो-
२ ४ ५ ४ ५
३दा३ । धिरोवा । पुपूरो६हाइ ॥२८॥

५ र र ५ १ र२र र १
II बृहद्वयोहिभानाऽ६वाइ । आर्चादेवा । यअग्नाऽ२३-
२ १ २ १ ७ १ २र र १
याइ । यम्मित्रन्न । प्राशस्ताया२इ । मर्त्तासोद । धा-
२ २ ३र र र २ ५र र २ १ ११
इरे१पूरा । औहोवाहा३४औहोवा । वा३हा २३-
११ १२
४५ः ॥ २९ ॥ ८८

रूपमन्नं(१) दीयते 'हि' अतस्त्वमपि 'देवाय' द्योतमानायाग्नये वयः 'अर्च' प्रयच्छ । 'मर्तासः' मनुष्याः 'यम्' अग्निं 'मित्रं न' सखायमिव 'प्रशस्तये'(२) प्रकृष्ट-स्तुतये अस्मदर्थं देवानग्निः स्तौत्विति 'पुरः' 'दधिरे' पुरस्कुर्वन्ति(३) ॥

"प्रशस्तये"—"प्रशस्तिभिः"-इति पाठौ ॥ ८ ॥ ८८

---

I,II शार्गप्रजापतिर्ऋषिः, कनीनिके द्वे ।

(१)—'वयः'-इत्यन्न-नामसु द्वाविंशतितमम् । नि० २, ७ ।

(२)—'प्रशस्तये, चतुर्थ्येकवचनमिदं तृतीया-बहुवचनस्य स्थाने द्रष्टव्यम्, प्रशस्तिभिः स्तुतिभिः; स्तुवन्तइति वाक्यशेषः'-इति वि० ।

(३)-'पुरः' पूर्वस्यां दिशि 'दधिरे' धारयन्ति आहवनीयात्मनेति वि०-सम्मतोऽर्थः ।

अथ नवमी।

गोपवनऋषिः।

१ २ ३ १ २ ३ १ २ ३ १र २र

अगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम्।

१ २ ३ २ ३ २ ३ १ २ ३ १ २

यः स्म श्रुतर्वन्नार्क्षे बृहदनीक इध्यते॥ ९॥ ८९

५ २ १ २ २ १ २ १

I अगन्मवृ। त्रा२हान्ता३माम्। ज्याइष्ठम। ग्निमा-

२ २ १ १ २ १ र

ना३वाम्। यस्मा२३होइ। श्रुतर्वन्नार्चाइ। बृहा२३-

१ र २ २ ५ २

होइ। आनीकया३१उवाये३ ध्या२३४ते॥ १०॥ ८९

'वृत्रहन्तमं' पापानामतिशयेन हन्तारं 'ज्येष्ठं' प्रशस्यम् 'आनवं' मनुष्य-सम्बन्धिनं, तेषां हित-कारिणम्(१) 'अग्निम्' 'अगन्म' गन्ता 'वयं' [पूजार्थं बहुवचनम्] अग्निः 'यः' 'आर्क्षे' ऋक्ष-पुत्रे 'श्रुतर्वन्' नाम्नि राजनि(२) निमित्तं 'बृहत्' महान् 'अनीकः'

---

८९ नास्तीयमुत्तरार्चिके। ५८

I अत्रिऋषिः, श्रौतर्वणम्।

(१)—'अनवः मनुष्याः' नि० २, ३, १०। 'अनुर्मनुष्यः तस्यापत्यम् मनुष्येण हि मन्थनेन अग्निर्जन्यते, तेनासौ आनवः, अतस्तम् आनवम्'-इति वि०।

(२)—'श्रुतर्वा नाम ऋषिः'-इति वि०।

अथ दशमी।

वामदेवः कश्यपोवा मारीचोमनुर्वा वैवस्वतउभौवा।

३ १र　२र३ १ २ ३　२ ३ १ २　३ १ २
जातः परेण धर्मणा यत्सवृद्भिः सहाभुवः।
३ २उ　३ १ २ ३ २ ३ २ ३ १र　२र ३ २
पिता यत् कश्यपस्याग्निः श्रद्धा माता मनुः कविः ॥१०॥ ९०

२र　र　१　३ २　१　३ २　३
I जातः परेणा३धा। इहा। मणा। इहा। यो
५　१र　२　१　३ २
२३४नीम्। योनिमिन्द्रस्यगकथः। यत्सवृद्भिःसा३हा। इहा।

ज्वाला-समूहः सन् 'इध्यते स्म' प्रवृद्धो भवत्। [लट् स्मे (३,२, ११८) इति भूते लट] तमग्निमागताइति समन्वयः। एवं श्रुतर्वाणं भिक्षणायागतो गोपवनः अग्निं स्तौति॥

"अगन्म"—"आगन्म"-इति च पाठौ। "यः स्म श्रुतर्वन्नार्क्षे बृहदनीकइध्यते"-इति छन्दोगाः; "यस्य श्रुतर्वा बृहन्नार्क्षोअनीकएधते"-इति च बह्वृचाः॥ ८॥ ८९

---

९० नास्तीयमुत्तरार्चिके। ५८

I कश्यपस्य च स्वयोनीन्द्रस्य वा, इन्द्रियम्। इन्द्रस्य वा प्रियम्।

१ ३ २ ३ ५ १र २
भुवाः। इहा। योर३४नीम्। योनिमिन्द्रस्वगक्थः।
र १ ३ २ र १ ३ र ६ ३ ५
पितायक्तश्याउ्पा। इहा। स्यामाइ। इहा। योर३४नीम्।
१र २ र र र १ ३ २ १
योनिमिन्द्रस्वगक्थः। अद्वामातामाउ्नूः। इहा। कवा-
३ २ ३ ५ १र २ २ १११११
इ। इहा। योर३४नीम्। योनिमिन्द्रस्वगक्थार३४५ः॥
३१॥ ९० *

इति चतुर्थ-दशति॥

हे 'अग्ने! त्वं 'परेण' उत्कृष्टेन 'धर्मणा'(१) आधानादि-कर्मणा 'जातः' प्रादुर्भूतोसि। 'यत्' यः 'सद्भिः' यज्ञे सह वर्तन्ते इति सद्वतः ऋत्विजः, तैः सह 'अभुवः' भुमि-सम्बन्धि-यज्ञे वर्तसे [कश्यपस्याग्निरित्येतयोः परस्परं विभक्ति-व्यत्ययः(२)] 'यत्' यस्या

---

(१)—धर्म इति यज्ञ-नामसु अन्त्यम् नि० ३, १७।

(२)—विवरण-ग्रन्थे तु यथा-विभक्ति व्याख्यानं दृश्यते। तथाहि—'यत्' यः 'अग्निः', 'कश्यपस्य' ऋषेः 'पिता' पालयिता, 'श्रद्धा' अदिति सत्य-नाम (नि० ३, १०, ३), तस्य धारयिता, 'माता' दृष्टि-प्रदान-द्वारेण सर्वस्य जगतो निर्माता, 'मनुः' ज्ञाता अधिकारस्य भक्ततया अभक्ततया वा, 'कविः' मेधावी; यश्च 'सद्भिः' सह विद्यमानैर्देवैः 'सहाभुवः' सहैव प्रादुर्भवति; सोयम् 'परेण' उत्कृष्टेन 'धर्मणा' कर्मणा 'जातः' प्रादुर्भूतः। इति विवरण-निष्पन्नोर्थः।

* इति ग्रामे गेय-गाने द्वितीयः प्रपाठकः। २।

ग्ने: 'कश्यपः' 'पिता' 'श्रद्धा' देवी 'माता' च 'मनुः' 'कविः' क्रान्त-कर्मा मेधावी वा [''मनुर्वैवस्वतः स्तोतासीत् सोऽग्निः यजमानायाभीष्टं फलं प्र यच्छतु'' अनेन सूचितमुपाख्यानं ब्राह्मणान्तरे द्रष्टव्यम् ॥ १० ॥ ९०

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य नवमखण्डः ॥ ९ ॥

---

अथ दशमे खण्डे—

सेयं प्रथमा।

अग्निस्तापसऋषिः*।

१ २　१ २　३ १ २　३ २ ३ १ २
सोमꣳ राजानं वरुणमग्निमन्वारभामहे।
२　३ ७　२　१ २ ३ १ २　३ २ ३ १ २
आदित्यं विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ १ ॥ ९१

२ ५　४ र ४ र　४ ५ ४　२ १ र　१ र
I ओम्। सोमꣳ राजानं वरुणाम्। अग्निमन्वारभाम-

---

* 'वामदेवस्यार्षम्'-इति वि०।

९१ नास्तीयमुत्तरार्चिके। ६०

I वार्हस्पत्यम्।

१ २ २ २ १ २ १२२ १ २
हे३। होवा३हाइ। आदित्य विष्णु७सूर्यम्। होवा३
२ १र २ १ २ २ १ ऽ २
हाइ। ब्रह्माणा२३म्वा३। होवा३हाइ। बृहा३उवा३।
५ ८
पा२३४तोम् ॥ १ ॥ ९१

'राजानं'(१) राजमानमीश्वरं वा 'सोमं'(२) 'वरुणं'(३) च 'अग्निं' च 'गीर्भिः' स्तुतिभिः 'अन्वारभामहे' रक्षणार्थम् आह्वयामहे। तथा 'आदित्यम्' अदितेः पुत्रं(४) 'विष्णुं'(५) च 'सूर्यं'(६) च 'ब्रह्माणं'(७) च बृहस्पतिं'(८) च अन्वारभामहे(९) ॥ १ ॥ ९१

---

(१)—राजानमिति सोममित्यादेर्विशेषणम्।

(२)—"चन्द्रमसो वैतस्य वा 'सोमं मन्यत' * * सोमोरूपविशेषैरोषधिश्चन्द्रमा वा"-इति नै० ११,१,२—५।

(३)—"वरुणो वृणोतीति * * वृष्टिर्भुनत्ति भूमिम् इत्यादि नै० १०,१,४-५।

(४)—यद्यप्यादित्यः सूर्यइति प्रसिद्धः "सूर्यमादितेयम्"-इति नैरुक्ताच्च (२,१,१६) परमिह सूर्यमिति पृथक्श्रुतेः अदितेः पुत्र-विशेषस्य इन्द्रानुक्तस्य वायोर्ग्रहणमित्याशयः, तथोक्तम् तत्रैव नैरुक्ते—"अदितेः पुत्रः * * अन्यासामपि देवतानामादित्य-प्रवादाः स्तुतयो भवन्ति"-इति।

(५)—"विष्णुर्भवति * * 'इदं विष्णुर्विचक्रमे"-इत्यादि नै० १२,२,८।

(६)—"सूर्यः * * उदुत्यं जातवेदसम्"-इत्यादि नै० १२,२,३-५।

(७)—"ब्रह्मा सर्वविद्यः, सर्वं वेदितुमर्हति"-इति नै० १,२,१२। नायं दैवत-काण्डे देवतासु परिगणितः।

(८)—"बृहस्पतिर्वृतः पाता"-इत्यादि म० १०,१,११।

(९)—आश्रयामइत्यर्थः। इह मन्त्रे क्षित्यप्तेजोमरुद्व्योमसूर्य्यचन्द्रब्रह्मनाम-यजमानेत्यष्टमूर्त्त्युपासनं ध्वन्यतइति बोध्यम्।

अथ द्वितीया ।

वामदेवोह्यो: ।

२ २ ३१ २ १ २ ३ २ ३ १र २र
इत एत उदारुहन्दिवः पृष्ठान्यारुहन् ।
२ ३ २ ३ १ २ ३ १र २र
प्रभूर्जयो यथा पथो द्यामङ्गिरसो ययुः ॥ २ ॥९२

१र २ २ २ र १ २
I आरो३हान् । ३ । इत एतऊ२दारु१हा२न् । दिवः
र १ २ र र १ २
पृष्ठानो२३यारु१हा२न् । प्रभूर्जयोया२३यापा१था२ । उ-
र १ २ १र २ १
द्यामङ्गिरा२३सोया१यू२ः । आरो३हान्२ । आ२३ ।
१ २ ५र र २ ५ १२
रो२ । हा२३४ । औहोवा । ऊ२३४पा ॥ २ ॥९२

एते अङ्गिरसः 'यथा' 'पथा' मार्गेणैव 'द्यां' दिवं 'प्र ययुः' प्रापुः । कीदृशाः ? 'भूर्जयः' [भृज्जतिः पाक-कर्मा] हविषां पक्तारः(१) । तत्र दृष्टान्तः--'पथा' मार्गेण जना ग्रामादीन

---

९२ नास्तीयमुत्तरार्च्चिके । ६१

I आरुढ़वत् आङ्गिरसं यामं वा ।

(१)—नेदं व्याख्यानं साधु मन्यते, 'भूः, जयः'-इत्येवं पदकारकृतावग्रह-दर्शनात्, न हि भृज्जतेर्भूर्जयइतिरूपे 'भूः, जयः'-इत्येवमवग्रहः सम्भवति, नापि तदधीन-स्वर-श्रुतिः । विवरणकारस्तु—'भूः पृथिवी तां ये महावीराख्येनामुष्ठानेन जितवन्तः ते'-इत्याह ।

अथ तृतीया।

एतस्याः कश्यपोऽसितोदेवलोवा* ।

१ १ २ ३ २ ३ १ ३ ३ ८ ८
राये अग्ने महे त्वा दानाय समिधीमहि।
१ २३ २ ३ १ २३ १ २ ३ १ २ ३ २
ईडिष्वा हि महे वृषन्द्यावा होत्राय पृथिवी ॥ ३ ॥ ९३

५र ४र ५ र ४ १ र र र
I रायें अग्नेमहाइ। त्वा। दानायसमिधीमा२३

२ १ १ १र १
हो। आइडो२ष्वाहो२। महेवृषन्। द्यावा२होत्रा२।

१ २ १ ५ ४ ५ ०
यपोवा३ ओ२३४वा। थाधुइवो६हाइ ॥ ३ ॥

२र १ ४र र र ५ १र र र
II रायायार३ग्नेमहेत्वाहाउ। दानायसमिधीमा२३

गच्छन्ति, तथा इतः भूमेः सकाशात् 'उदारुहन्' उदगच्छन्। आगत्य च 'दिवः' स्वर्गस्य 'पृष्ठानि' स्थानानि 'आरुहन्' प्राक्रमन्ति ॥ २ ॥ ९२

---

* 'वामदेवस्यार्षम्'-इति वि०।

९३ नास्तीयमुत्तरार्च्चिके। ६२

I,II इमे आसिते।

अथ चतुर्थी ।

भार्गहुतिः सोमो वा ऋषिः* ।

१ २ ३ २ ३ २ ३ २ ३ २उ ३ २ ३ २
दधन्वे वा यदीमनु वोच द्ब्रह्मेति वेरु तत् ।
२ ३ १ २ ३ १ २ ३ २ ३ १ २
परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत् ॥ ४ ॥ ९४

२ १ २ २ १ २ ३ ५ १र
हाइ । आइडाइघा२हा३इ । मा२हेवा३३४र्षान् । द्यावा-
२ २ २ १ ५ ४ ५ ८
हो३त्रा३ । यपो२३४वा । था५इवो६हाइ ॥ ४ ॥ ९३

हे 'अग्ने' ! 'त्वा' त्वां 'महे' महतः 'राये'(१) धनस्य 'दानाय' दानार्थं 'समिधीमहि' वयं सम्यग् दीपयामहे । 'वृषन्' वर्षितः । अग्नये 'महते' 'होत्राय' अग्निहोत्रार्थं(२) 'द्यावा' दिवं 'पृथिवी' च 'ईडिष्व' स्तुहि ॥ ३ ॥ ९३

---

* 'गृत्समदस्यार्षम्'-इति वि० ।

९४ नास्तीयमुत्तरार्च्चिके । ६३

(१)—'राये महे इ आयेते षष्ठ्यर्थे द्रष्टव्ये-इति वि० । एवञ्च रूपः इ-भावे रूपमिति ध्वनितम् ।

(२)—'हूयते तदिति होत्रं होमद्रव्यम्; इ अपिचैते तादर्थ्य-चतुर्थ्यौ, महतो होमद्रव्यस्यार्थायेत्यर्थः । होम-ग्रहणञ्चात प्रदर्शनार्थम्, सर्वासां दानादि-क्रियाणां सम्बन्धिनो द्रव्यस्यार्थायेत्यर्थः'-इति वि० ।

४ र र ४ १र र र
I दधन्वेवापूयदीमनू। वोचद्ब्रह्मोतिवे-रुतत्। पारि-
१र २ ३ ५
विश्वा२। निकाव्या। नाइमिश्वकौवा। ई२३४वा।
२ १ ४ ५ ४ ६
भुवात्। औ२३होवा। होपुड्। डा॥ ५ ॥९४

'वा' अथवा 'ईम्' एनं यज्ञम् 'अनु' लक्षीकृत्य(१) 'यत्' हविरादिकं 'दधन्वे' धारयत्यध्वर्य्वादिः(२) यद् 'ब्रह्म' स्तोत्रम् 'अनुवोचत्' अनुवक्ति होत्रादिः [अत्र वा अन्वित्येतद्योज्यम्]। 'तत्' सर्वं 'वेरु' (३) वेरेव कामयते जानाति वा स्वयमनुष्ठातुम्। अयमग्निः 'विश्वानि' सर्वाणि 'काव्या'(४) काव्यानि 'कवयः' मेधाविनऋत्विजः तत्-सम्बन्धीनि कर्माणि 'पर्यभुवत्' परिभवति स्वायत्तानि करोति व्याप्नोतीत्यर्थः। व्याप्नो-

---

I त्वाष्ट्रीसाम।

(१)—'वेति पाद-पूरणः'-इति वि०। 'इम्', 'अनु' द्वावपि पाद-पूरणौ-इति च वि०।

(२)—'दधन्वे धारयति, अमूर्त्तस्य धारणं न सम्भवति अतः धारणेनात्र श्रवणं लक्ष्यते शृणोतीत्यर्थः, किम्पुनः शृणोत्यग्निः ? उच्यते'-इत्यादि वि०।

(२)—इह वेः, उ—इतिच्छेदः ; उ-शब्द एवार्थः।

(३)—'वेः, मध्यमपुरुषस्यैकवचनमिदं प्रथमपुरुषैकवचनस्य स्थाने प्रयुक्तम् ; वक्ति जानातीत्यर्थः।

(४)—'सालं सुपामित्यादिना। 'काव्यानि स्तुति-वचांसि हव्यानि वा'-इति वि०।

अथ पञ्चमी।

पायुर्ऋषिः।

१ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
प्रत्यग्ने हरसा हरः शृणाहि विश्वतस्परि।
३ १ २ ३ २ ३ २ ३क २र ३क २र
यातुधानस्य रक्षसो बलं न्युब्ज वीर्यम्॥ ५॥ ९५

२ ४ ५र २ ३ ४ र ५ ५ २ १र २ १
I प्रत्यग्ने। श्रोइ। हरसाहरा६ए। शृणाहिवा२
३ २ ३ ५ २र १र २ १ ५र
इ। श्वता३४५ः। पा२३४री। यातुधानस्यरक्षसो३।
१ २ १ २ १ ५ ३ ५ ६
बा२३लाम्। नियुब्जवो२३४वारी२३४याम्॥ ६॥ ९५

दृष्टान्तः—'नेमिः' बहिर्वेष्टन-वलयः 'अरमिव' रथाङ्गं यथा कार्त्स्न्येन व्याप्नोति तद्वत्॥

"ब्रह्म"-इति "ब्रह्माणि"-इति च पाठौ। "भुवद्"-"भवत्"—इति च॥ ४॥ ९४

हे 'अग्ने!' त्वं 'हरसा' त्वदीयेन तेजसा क्रोधेन वा(१)

९५ नास्तीयमुत्तरार्च्चिके। ६४
I अगस्त्यऋषिः, राक्षोघ्नम्।

(१)—'निघण्टौ—प्रथम-सप्तदशे ज्वलत् पर्य्याये, द्वितीय-त्रयोदशे क्रोध पर्य्याये चेत्युभयत्र पाठात्।

अथ षष्ठी।

प्रस्कण्व ऋषिः।

१ २५ १ २ ३ २ ३ १ २ ३ २ ३ २
त्वमग्ने वसूꣳरिह रुद्राꣳआदित्याꣳ उत।
१ २ ३ १२ ३ १ २ ३ ३ १ २
यजा स्वध्वरञ्जनं मनुजातं घृतप्रुषम्॥ ६॥ ९६

४ ५ २ ४ ५ ४ २१२ २
I त्वमग्ने। त्वमग्नाइ। वसूꣳरिहा। रुद्राꣳआ२३
२ १२ २ २ १
दो। तियाꣳउता। यजासू२३वा। ध्वरञ्जनम्। मनु-

[तथाच यास्कः—हरोहरतेर्ज्योतिर्हर उच्यते-इति। 'यातुधानस्य' राक्षसस्य 'हरः' हरण-शीलं बलं 'विश्वतः' सर्वतः 'परि' गतं प्रति 'शृणाहि' नाशयेत्यर्थः। तथा, 'रक्षसः' राक्षसस्य 'वीर्यं' च 'न्युब्ज'(१) निःशेषेण रुज भञ्जयेत्यर्थः॥

"शृणाहि"—"शृणीहि"—इति पाठौ। "बलं न्युब्ज वीर्यम्"-"बलं विरुज वीर्यम्"-इति च॥ ५॥ ९५

हे 'अग्ने' त्वम् 'इह' कर्मणि वस्वादीन् 'यज'। 'उत'

---

९६ नास्तीयमुत्तरार्च्चिके। ६५

I मानवम्।

(१)—'न्युब्ज, ऋजुं कुर्वित्यर्थः'-इति वि०।

२ १२ १ ९ १
जा२३ताम् । घृतप्रुषम् । इडा२३भा३४३ । ओ२३४
५
पूइडा ॥ ७ ॥ ९६

इति पञ्चम-दशति* ॥

अपिच 'जनम्' अन्यमपि देवता-रूपं प्राणिनं(१) यज । कीदृशम् ? 'स्वध्वरं' शोभन-याग-युक्तं 'मनुजातं' मनुना प्रजापतिना उत्पादितं 'घृतप्रुषं' उदकस्य सेक्तारं(२) यजेति सम्बन्धः(३) ॥६॥ ९६

इति सायणाचार्य्य-विरचिते सामवेदार्थप्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य दशमखण्डः ॥ १० ॥

---

(१)—प्राणोवायुः, तदेकस्थानतया तद्वन्तं प्राणिनम् आकाशापरपर्य्यायं प्रजापति-देवमित्यर्थः । "वायुर्वेन्द्रोवान्तरिक्षस्थः"-इति हि नैरुक्तम् (७,२,१) ; प्रजापतेश्चान्तरिक्षस्थानेषु परिगणनञ्च स्पष्टं निघण्टु-शेष-काण्ड-तृतीय-खण्डे ; आकाशो हि प्रजापतिरिति च शबरस्वामिना स्फुटमुक्तम् (१,२,१०)। अस्याञ्च ऋचि वस्वादीनां सर्वासामेव देवगणानामुल्लेखः परिदृश्यते, प्रजापतेरुल्लेखएवावशिष्टः उतेत्यनेन स एव द्योत्यते। एवञ्चोपपत्स्यते सर्वासामेव त्रयस्त्रिंशत्सङ्ख्याकानां देवतानां यजनमिति ध्येयम् ।

(२)—घृतमित्युदकस्य नाम, निघण्टु-प्रथम-द्वादशे तस्य दशम-पदत्वात् । उदक-सेचनञ्च वायोः कर्म,-तदुक्तं भगवता निरुक्तकारेण—"अथास्य कर्म—रसानुप्रदानं, वृत्र-वधः"-इत्यादि (७,२,२) "वृत्र-वधो मेघ-वधः"-इति च तद्भाष्यम् । वायुरिन्द्रश्चाभिन्नः "वायुर्वेन्द्रोवेति यास्कोक्तेः (७,२,१)। वायुरिन्द्रश्चैक एव यथा वृत्तः करइति" तद्भाष्याच्च ।

(३)—'इहेदं तत्वम्—"त्रयस्त्रिंशद्देवताः"-इति हि ताण्ड्यादि-श्रुतिः, तत्र च

---

* इति छन्द आर्च्चिके प्रथम-प्रपाठकः ॥ १ ॥

खण्डयोर्द्वयोः पुरुत्वेति ककुभोऽष्टौ दशोष्णिहः।
जज्ञानः पावमानी स्यादुतस्येत्यदितिः स्तुतिः।
शिष्टाः षोडश चाग्नेय्यः समाख्या हविणीति वत्(०)॥

अथैकादश-खण्डे—

सेयं प्रथमा।

दीर्घतमाऋषिः।

२ १ २   ३ १   २ ३ १ २ ३ १ २   ३ १
पुरु त्वा दाशिवाङ्* वोचे रिरग्ने तव स्विदा।
३ १ २   १ २उ   ३ १ २
तोदस्येव शरण आ महस्य॥ १ ॥ ९७

---

*"दाश्वान्"-इतिपाठो बह्वृचां निरुक्त-सम्मतश्च(५,२,८)।

---

९७ नास्तीयमुत्तरार्च्चिके। ६६

"अष्टौ वसवः, एकादश रुद्राः, द्वादश आदित्याः, इन्द्रश्चेति द्वात्रिंशत्, प्रजापतिस्त्रयस्त्रिंशत्-सङ्ख्या-पूरकः"-इत्यादि भाष्यम्। ते च सर्वे मनु-जाताः, तद्यथा—"इति स्तुतासो असथा रिशा दसो ये स्थ त्रयश्च त्रिंशच्च। मनोर्देवा यज्ञियासः"-इति ऋग्वेदीया श्रुतिः (८,४,१०,२)। तत् सर्वं यज।

(०)—'पुरु त्वा'-इत्यादिरेकादश-खण्डः, तत्र ऋचोदश; 'प्र मंहिष्ठाय'-इत्यादि द्वादश-खण्डं तत्र ऋचोऽष्टौ; अनयोरुभयो खण्डयोः सङ्कलनया अष्टादश ऋचः श्रूयन्ते। तासु द्वादश-खण्डात्मकाष्टौ ककुप्छन्दस्काः, एकादश-खण्डात्मकास्तु दश उष्णिक्छन्दस्काः किञ्च एकादश-खण्डीय-जज्ञानइत्याद्या पञ्चमी ऋक् पवमान-देवताका, तदव्यवहित-श्रुता उतस्येत्याद्या षष्ठी अदिति-देवताका, अवशिष्टास्तु सर्वाः आग्नेय्यः। नन्वनाग्नेय-मन्त्र-संश्रवेऽपि कथमस्याग्नेय-पवत्वं न नश्यति? इति शङ्कामपनोदयितुमाह,—'समाख्या हविणीति वत्' एकस्मिन्नेव प्रधाने हविषि राज्ञि याने यथा, अप्रधानभूतासु

५ ४   २र १र   र   र   र   ४ ५ ४ ५
I पुरू । त्वादाशिवाᳬवोचायेऽ । आरोराग्नाइ ।
२र १   २र १ र   १   १ २
तावखिदा । तोदस्येवशरणआ२ऽहोइ । महा२ऽहोये
२   २   र ५र   २ १ १ १ १   ९
ऽ । स्यो । या२३४औहोवा । ई२३४५ ॥ ८ ॥

५ ४ ५र र   ४र   ५र   २ ऽ २   ५
II पुरुत्वादाशिवाᳬवो । चे । आरोरा२३४ग्नाइ ।
२   २   ५   ४र २ ४र ५   २   ५   ऽ
तावस्वा२३४इदा । तोदस्येवशर । णयो२३४हाइ । मा
२   १   २   २   २   ५र र   २ १ १
ऽहाऽ । हुम्मायेऽ । स्यो । या२३४औहोवा । ई२३
१ १   ८
४५ ॥ ९ ॥

हे 'अग्ने' ! 'त्वा' त्वां 'पुरु' बहु 'वोचे' [यद्वा बहु दाश्वानितिसम्बन्धः] पुत्रं देहि, वित्तं देहि—इत्याद्याशासनानि ब्रवीमीत्यर्थः । किन्तूष्णीम्? नेत्याह—यतः 'दाशिवान्' दाश्वान्(१) अभिमतं हविर्दत्तवानस्मि, अतो वोचे । इतर-साधारण्येन ब्रुवतः कथं दातव्यम्-इति न मन्तव्यम् । यतः हे अग्ने! 'तव स्विदा'(२)

1,II इमे तौदे, दैर्घतमसे वा ।

समस्तासु सेनासु क्षत्रित्वारोपेण क्षत्रिणो यान्तीति समाख्यानम्, तद्वदित्यर्थः । प्राधान्यानुरोधात् अनाग्नेय्योऽपि ऋचः आग्नेय्यः-इति व्यवह्रियन्ते-इति भावः ।

(१)—"दाश्वान्साक्षान् मीढ्वांश्च (६,१,१२)"-इति कसौ बाहुल्येन रूपम् ।

(२)—'स्वित्, आ-इत्येतौ एव-शब्दस्यार्थे द्रष्टव्यौ ।

I पुरुत्वादाशिवा३वो। चे। चे। अराइरार२३४
ग्राइ। तावस्वार२३४इदा। तोदास्यार२३४इवा। शारा-
णा२३४या। माइद्वापुस्याई५६। ए३१॥ १०॥

II पुरुत्वा३दाशिवा३वोचे। अरिर। ग्राइ। तवा
२स्वार२३४इदा। तो२३४दा। स्या२३४इवा। शाराणा
२३४या। माइद्वापुस्याई५६॥ ११॥

III पुरुत्वार३दाशिवा३वोचे*ओहा। हा। औहो३
हा। ओ२३४वा। अरिरग्नेतवस्विदा। हा। औहो
३हा। ओ२३४वा। तोदस्येवशरणआ। हा। औहो३
हा। ओ२३४वा। ए३। महस्यार२३४५॥ १२॥ ९७

---

* ब्र० पुस्तके पञ्चस्वेषु सामसु "वाङ्वोचे"-इति स-ङकारः पाठः।

III, IY, Y इमानि दैर्घतमसानि तौदानि वा।

अथ द्वितीया।

विश्वामित्रऋषिः।

१र  २र ३१२उ  ३ १२  ३ २
प्र होत्रे पूर्व्यं वचोग्नये भरता बृहत्।
३ १र  २र  ३ १ २३ २ ३१२
विप्रा ज्योतींषि बिभ्रते न वेधसे॥ २॥ ९८

'अरिः'(३) तवैव अर्त्ता सेवकोहं(४) 'महस्य' महतः 'तोदस्य' शिक्षकस्य स्वामिनः(५) 'शरणआ'(६) ['इव'—इत्युपमार्थे] तदा ईशमहे यथा गर्भ-दासादिर्नियतोवर्त्तते तद्वदहमपि। यस्मादेवं तस्मात् अभिमतं बहु वोचे। त्वमपि तत् सर्वं देहीत्यर्थः॥

अत्र निरुक्तम्—"बहु दाश्वांस्त्वामभिह्वयाम्यरिरमित्रमृच्छतेरीश्वरोप्यरिरेतस्मादेव यदन्यदेवत्या अग्नावाहुतयोह्रयन्तइत्येतद्दृष्ट्वैवमवक्ष्यत्तोदस्येव शरणआ महस्य तुदस्येव शरणेधि महतः (५,१,८)"—इति॥ १॥ ९७

---

९८ नास्तीयमुत्तरार्च्चिके। ६७

(३)—निघण्टु-तृतीय-पञ्चम-पठितस्य परिचरण-कर्मणः ऋच्छतेरूपम्। उक्तञ्च निरुक्तकारेण 'ऋच्छतेः'-इति ५,१,८।

(४)—'अरिः ईश्वरः त्वम्'-इति वि०। अर्य्यः-इति निघण्टौ द्वितीय-द्वाविंशे ईश्वर-पर्याये द्वितीयं पदम्। निरुक्त-कृतापुक्तम्—ईश्वरोप्यरिरिति (५,१,८)।

(५)—'तोद-शब्देन ग्टहस्थ उच्यते'-इति वि०।

(६)—शरणे, आ—इति छेदः पदग्रन्थे तथैव दर्शनात्। आ-इत्येतत् पाद-पूरणे कस्मिन्नपि भाष्ये तदर्थादर्शनात्; निरुक्त-मये त्वयमा अप्यर्थः।

४ र र   र १   १   २   १र
I प्रहोत्रेपू। विँयं वचो। अग्नयार२इ्भा। रताबृ-

र   २   १ २   १ ३   ५र र
हत्। विपाजज्यो२३ती। षिबाये३। भा२ता२३४औहो-

१   १र १३११११   ७
वा। न वे२धसे२३४५। ॥ १३ ॥

५   र२   ४र५ ४   ५   २ १ र २   र ३ २   २
II प्रहोत्रा३इपूर्विँयं वचाः। अग्नये२भरता३बृ। हा

२ ३र र २   २   ५   १ २   २
२३त्। विपाञ्ज्योताइ। षी२३४वी। भ्रताइ। नार

४   २   ५   ६
३वे३। धा३४५सो६हाइ ॥ १४ ॥ ९८

यजमानो होत्रादीन् प्रति ब्रूते—हे होत्रादयः! 'विपां' विप्राणाम् मेधाविनाम् अध्वर्य्वादीनां 'ज्योतीषि' सत्कर्मानुष्ठान-सम्पाद्यानि तेजांसि 'बिभ्रते' निमित्ततया कुर्वाणाय 'वेधसे' जगतोविधात्रे 'होत्रे' देवानामाह्वात्रे 'अग्नये' 'बृहत्' महत् 'पूर्व्यं' पुरातनं 'वचः' स्तोत्र-शस्त्रादिकं वाक्यं 'प्र भरत'(१) सम्पादयत। नेत्ययं पाद-पूरणः, अन्वयाभावात्। यद्वा 'वेधसे न' यथा

---

I,II अनयोः आश्वऋषिः, प्रहितो नाम।

(१)—भरतेति हरते रूपम् हृग्रहोर्भश्छन्दसीति वचनाद्धस्य भत्वम्। क्वचि अन्यात्वन्तु "क्वचि तु-नु (६,३,१३३)"-इत्यादि सूत्रे तङ्-ग्रहणात्।

अथ तृतीया ।

गोतमऋषिः ।

३ १ २३ १ २ ३ १ २
अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
३ १२ ३ २ ३ १ १
अस्मे देहि जातवेदो महिश्रवः ॥ ३ ॥ ९९

वेधाः जगद्विधाता परमेश्वरः आदित्यादीनि ज्योतींषि करोति तद्वदिति । प्र-शब्दस्य "छन्दसि" "व्यवहिताश्च"इति(१) भरते त्यनेन सम्बन्धः ॥ २ ॥ ९८

हे 'सहसोयहो'(१) बलस्य पुत्र ! 'अग्ने' ! 'गोमतः' बहुभिर्गोभि र्युक्तस्य 'वाजस्य' अन्नस्य 'ईशानः' ईश्वरस्त्वमसि, अतः 'अस्मे' अस्मासु हे 'जातवेदः' जात-धन ! जातानां 'वेदितः' वा अग्ने ! 'महि' प्रभूतं 'श्रवः' अन्नं 'देहि' प्रयच्छ स्थापयेत्यर्थः । सहसो-यहो-परांगवद्भावाद्(२) आमन्त्रितस्य षष्ठामन्त्रित(३) समुदायो-

---

९९ उत्तरार्चिकस्य ७,२,११,१ ।

(१) "छन्दसि परेऽपि (१,४,८१)"-इति सूत्रात् छन्दसीत्यधिकारे वर्त्तमाने "व्यवहिताश्च (१,४,८२)"-इति सूत्रेणेति स्फुटार्थः ।

(१)—निघण्टौ द्वितीय-नवमे बल-पर्यायेषु सहः पदमष्टादशम्, तृतीय-द्वितीये अपत्य-पर्यायेषु यहुः पदश्चैकादशम् ।

(२)—"सुबामन्त्रिते पराङ्गवत् स्वरे (२,१,२)"-इति सूत्रेणेति यावत् ।

(३)—"षष्ठ्यामन्त्रित-कारकं वचनम्"-इति वचनं कृतं परिगणनं बाबाधमस्तीहे-त्यभिप्रायः ।

८ र र र ४ २र २र२ ३ ३
I अग्नेवाजा५स्य। गोमतोवा। ईशानः सा। हू-
३र २३ २ ३ २र २र १र र २ र
सोयहो। अस्माइदेहि जातवेदोम। हा२३इ। अवा-
२र ३ २ ३
ओवा। अूधिया३। ए२३हिया३४३। ओ३४३५इ।
११
डा॥ १५॥

५ र र र र ४ ५ २र २र १र २ १
II अग्नेवाजस्य गोऽ३म् मतोहोहाइ। ईशानः सा।
२ ३ ५ १ २ २ ४र ५ ३र २
हासोया२३४हो। आस्मे१दाइहो३। जात। वेदा३ः।
१ ४ २ ५ ८
मा२३हो३। आ३४५वो६हाइ॥ १६॥ ९९

निहन्यते (४)। अस्मे—सुपांसुलुगिति (७,१,३९) सप्तम्याः शे आदेशः(५)॥

"अस्मे देहि"—"अस्मे धेहि"-इति च पाठौ॥ ३॥ ९९

---

I,II इमे शुधिये वा शुद्धेत्र वा अद्भे वा सत्ये वा सामनी, अनयोः प्रजापतिऋृर्षिः।

(४)—"आमन्त्रितस्य च (८,१,१९)"-इत्ययमाष्टमिको निघातः।

(५)—"शेश्छन्दसि (६,१,७०)"-इत्यत्रापीद्द स्मर्तव्यम्।

अथ चतुर्थी।

विश्वामित्रऋषिः।

३ १ २   ३ २३ १ २ ३ २ र २
अग्ने यजिष्ठो अध्वरे देवान् देवयते यज।
१ ३ ३ १र २र  २ ३ २ १ २
होता मन्द्रो वि राजस्यति स्रिधः *॥ ४ ॥ १००

५ र  र  ५  २र र र  १ २
I अग्नेयजिष्ठो अध्वरा६ए। देवां देवया३ताइया१
३ २  ऽ २  १ र २  १ २
जा२। हुवा३होवा। होतामन्द्रः। विराजा१सी२।
३ २  ऽ २  १  २  १
हुवा३। हो३वा। अतिस्रा२३इधा३४३ः। ओ२३४५इ।
६
डा ॥ १७ ॥

हे 'अग्ने'! 'यजिष्ठः' यष्टृतमः 'त्वम्' 'अध्वरे' यज्ञे 'देवयते' (१)

---

* "स्रधः"-इति क० पाठः। "स्निधः"-इति ग० पाठः।

---

१०० नास्तीयमुत्तरार्चिके। ६८

I प्रजापतिर्ऋषिः सदोनाम।

(१)—"न च्छन्दस्यपुत्रस्य (७,४.३५)"-इति दीर्घ-निषेधः, "देवसुम्नयोर्यजुषि काठके (७,४,३८)"-इत्यस्याप्यविषयः।

अथ पञ्चमी।

त्रितऋषिः।

३ २ ३ २ ३ १र २ ३ १र ३ २र १ ३ २
जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये।
३ २ ३ १ २ ३ १ २ ३ २
अयं ध्रुवो रयीणाञ्चिकेतदा॥ ५॥ १०१

५ र २ २ ५ १ र र
II अग्ने। इयार३४र्इ३४या। यजिष्ठो अध्वराइ।
१र र र १ १ १ १
देवां देवयते२। हौहो२। याजा२। होता२। मान्द्रो
१ २ २ १ २ ५र र ३
२। विराजा३सी। आ२। तिया३४औहोवा। हो२३-
५ ०
४धाः॥ १८॥

५ ४ ५ ४ ५ १ र रर
III अग्नइया। ओवा। यजिष्ठो अध्वराइ। देवां दा
२ १ २ १ २ २ र १
२३इवा। याते१याजा२। होता३ओवा। मन्द्रोवी३रा२३
१ ३ ५र र १ २ १ २ १ १ १ १ ६
जा२सा२३४औहोवा। अतिस्त्रिधा२३४५ः॥ १९॥ १००

देवानात्मनइच्छते यजमानाय 'देवान् यज' तदर्थं यष्ट-

---

१०१ नास्तीयमुत्तरार्चिके। ६९

II,III इमे हविर्धाने, अनयोरपि प्रजापतिर्ऋषिः।

५ र              २ र १              २ ३              ५
I जज्ञानः सा । प्तमातृभाइः । मेधामार३४शा ।
२ १         ७   ३   ५   १   २   १
सतआयाइ । अयार३ध्रु२३४वाः । रया२३इणाम् । चि-
२   १  ३   ५र र   ३   ५   ४
कायेइ । तार२ता२३४औहोवा । ऊ२३४पा ॥ २० ॥ १०१

व्यानग्न्यादीन् देवान् पूजय । किञ्च । 'होता' देवानामा-ह्वाता 'मन्द्रः' यजमानस्य मादयिता स त्वं 'स्त्रिधः' क्षपयितॄन् शत्रून् 'अति' अतिक्रम्य 'वि राजसि' विशेषेण शोभसे ॥४॥ १००

'ध्रुवः' स्थिरोऽयमग्निः 'रयीणां' धनानाम् 'आचिकेतत्' अस्यानुशासने जानाति । 'सप्त' सप्त-सङ्ख्याभिः 'मातृभिः'(१) हविर्मान-समर्थाभिर्जिह्वाभिः स्वात्मनि हविः-प्रक्षेत्रीभिर्वा जिह्वा-भिः सह 'जज्ञानः' प्रादुर्भूतः सोऽग्निः 'मेधां' कर्मणो विधातारं सोमं 'श्रिये' सेवार्थम् 'अनुशासत' अनुशास्ति । [शास्तेर्लटि व्यत्ययेनात्मनेपदम् (३,४,९८) "बहुलं छन्दसि"—इति(२,४,७३) शपो लुङ् न भवति] अन्विच्छतीत्यर्थः ॥

"जज्ञानः सप्तमातृभिः"—"जज्ञानं सप्त मातरः"-इति च पाठौ । "चिकेतद्"-"अचिकेतयद्"-इति च ॥ ५ ॥ १०१

---

I त्वष्टाऋषिः, आतिथ्यम् ।

(१)—'सप्त मातरः—सप्तच्छन्दांसि अथवा सप्त होताः अथवा सप्त सोम-संस्थाः, ताभिः'-इति वि० ।

अथ षष्ठी।

इरिमिठिर्ऋषिः।

२ २उ २ १ १ ३ १र २र ३ १ २
उत स्या नो दिवा मतिरदितिरूत्यागमत्।
१र २ ३ १ २ ३ २ ३ १ २
सा शन्ताता मयस्करदपस्रिधः* ॥ ६ ॥ १०२

५ २ ४र ५ ४र ५ १ १र १
I उतस्या३नोदिवामतीः। आदितिरू। तिया
१ १र २ २ ४ ५ ३ २ २
गा१मा२त्। साशन्ता३ता३। मा। यः। करा औ२३४
५ ४ ४ ४
वा। अपा५स्रिधाः। हो५इ। डा ॥ २१ ॥ १०२

'उत' अपिच 'स्या' सा पूर्वोक्ता 'मतिः' मन्त्री(१) मन्तव्या स्तोतव्या वा 'अदितिः'(२) 'ऊत्या' रक्षया सार्द्धं 'दिवा' अहनि 'नः'

---

* इह सर्वत्रापि "स्रधः"-"स्निधः"-"स्रिधः"-इति पाठ-भेदः।

---

१०२ नास्तीयमुत्तरार्च्चिके। ७०

I अदितिर्ऋषिः, आदित्यम्।

(१)—'मतिर्ज्ञात्री'-इति वि०।

(२)—दीङ् क्षये, हत्य-स्युटोबहुलमिति कर्त्तरि क्तिनि छान्दसं ह्रस्वत्वम्, नञ् समासः; अदितिः सकल-प्रपञ्च-धारणेष्वदीना, न क्षियते इत्यर्थः। अदितिरदीनेत्यत्र भाष्ये स्कन्दस्वामी—यद्यपि नञ्-पूर्वात् द्यतेः क्तिनि 'द्यति-स्यति-मा-स्थामित्तीत्ति च' रूपं सिध्यति, तथापि द्यतेर्नित्यमपूर्वादर्थान्वयाच्च दीङ् क्षये इत्यस्यैवेदं छान्दसं रूपं द्रष्टव्यम्। तथा चोक्तं 'न संस्कार माद्रियेत, अर्थोनित्यः परीक्षेत'-इति। 'अदिति

अथ सप्तमी ।

द्वयोर्विश्वमनावैयश्वऋषिः * ।

१ २ ३ १ २ ३ २ १ २ ३ १ २

**ईडिष्वा हि प्रतीव्या३० यजस्व जातवेदसम् ।**

३ १ २३ २ ३

**चरिष्णु धूममगृभीतशोचिषम् ॥ ७ ॥ १०३**

अस्मान् 'अगमत्' आगच्छतु; आगत्य च 'शन्ताता' शन्तातिः(३) शान्तिकरं 'मयः' सुखं(४) 'सा' अदितिः 'करत्'(५) करोतु। 'स्त्रिधः' नाशकान् शत्रूंश्चापगमयतु [स्त्रिधिर्बाधनार्थः] ॥

"उत स्या"-"उत त्या"-इति च पाठौ। "सा शन्ताता"-"सा शन्ताति"-इति च ॥ ६ ॥ १०२

---

* 'विश्वमनसआर्षम्'-इत्येव वि० ।

१०३ नास्तीयमुत्तरार्च्चिके । ७१

देवमाता'-इति वि०। ऐतिहासिकानां मते देवमाता, नैरुक्तानां मते अदीनादि-गुणः, आत्मपक्षे प्रकृतिः। 'अदिति र्द्यौरदितिरन्तरिक्षम्"-इति निघण्टु-भाष्यम्। 'अदि-तिरदीना देवमाता। "अदिति र्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्"-इत्यदितेर्विभूतिमाचष्ट एनान्यदीनानीति वा'-इति नै० ४,४,२२—२४।

(३)—"शिवशमरिष्टस्य करे (४,४,१४३)"-इति शङ्करोतीति विग्रहे तातिलि रूपम्।

(४)—निघण्टोस्तृतीय-पञ्चमे सुख-पर्य्याये मयइत्यष्टमं पदम्।

(५)—लेटोरूपमिदम्।

२र१ ४ ५र १ २१ २१र
I ईडाइष्वा२३हिप्रतीवियाम्। याजस्वश्रा। तवे-
२१ १२ २ ३ ५ ३२ १
दसा२३म्। चरिष्णुधू। मा२३४म। गृभा३इ। ता२
३ ५र र २ ५ ५
शो२३४औहोवा। चो२३४षाम्॥ २२ ॥ १०३

'प्रतीव्यं' शत्रुषु प्रतिगमन-शीलम्(१) अग्निं ['हि' अवधारणे(२), अग्निमेव] 'ईडिष्व' स्तुतिभिः स्तुतं कुरु। किञ्च, 'चरिष्णुधूमम्' सर्वत्र चरण-शील-धूम-ज्वालम् 'अगृभीतशोचिषं'(३) रक्षोभिर-प्रधृत-दीप्तिम् 'जातवेदसं' जातप्रज्ञं [यद्वा, जातानि भूतानि वेत्तीति जातवेदाः,(४) तमग्निं(५) 'यजस्व' हविर्भिः पूजय॥ ७॥ १०३

---

I वार्कजम्भम्।

(१)—'महाभूतत्वात् सर्वगतम्'-इति वि०।

(२)—'हीति पादपूरणः'-इति वि०।

(३)—'हृग्रहोर्भश्छन्दसि, हस्य'-इति भत्वे रूपम्।

(४)—"जातवेदाः, कस्मात्? जातानि वेद, जातानि वैनं विदुर्जाते जाते विद्यत इति वा, जातवित्तो वा, जातधनोव, जातविद्यो वा, जातप्रज्ञानो यत्तज्जातः पशूनविन्दत, तज्जातवेदसो जातवेदस्त्वमिति** अयमेव सोऽग्निर्जातवेदाः"-इति नै०७, ५,१—५। 'एष माहाभाग्यात् कर्मपृथक्त्वादग्निरेव'-इति च तद्भाष्यांशः।

(५)—सूर्योपि जातवेदा इत्युच्यते, तथा च तत्रैव नैरुक्ते—"जातवेदसे सुनवाम"-इत्यृचमुदाहरणमुखेन व्याख्याय—"यत्तु किञ्चिदाग्नेयं तज्जातवेदसानां स्थाने युज्यते स न मन्येत अयमेवाग्निरिति अप्येते उत्तरे ज्योतिषी जातवेदसा उच्येते** अथासावादित्यः—उदुत्यं जातवेदसमिति"—इदमुक्तम्।

अथाष्टमी।

१र २र २ १ २ ३१ २ १ २ १२
न तस्य मायया चन रिपुरीशीत मर्त्यः।
२ १२ ३ २ ३ २
यो अग्नये ददाश हव्यदातये ॥ ८ ॥ १०४

५ ४ २ ५ २१र २ १ र
I नतोवा। स्यार२३४मा। ययाचा२३ना। रिपुरी-
र १ २ ५ १र १र
शीतमा३१ओवा२३। तो२३४याः। योअग्नये२ददा।
५ २ ५ ६
शहव्यदो२३४वा। ता२३४ये ॥ २३ ॥ १०४

'मर्त्यः' मनुष्यः 'रिपुः' शत्रुः [चनेति निपात-समुदायोऽप्यर्थे(१)] 'मायया चन' माययापि(२) 'तस्य' जनस्य 'न ईशीत' ईश्वरो न भवति। 'यः' जनः 'हव्यदातये' हविषामादान-समर्थाय 'अग्नये' योयजमानः 'ददाश' हवींषि प्रयच्छति तस्य रिपुर्न ईशीतेत्यर्थः॥ 'हव्यदातये'-"हव्यदातिभिः"-इति च पाठौ ॥ ८ ॥ १०४

---

१०४ नास्तीयमुत्तरार्चिके। ७२

I अगस्त्यऋषिः, राक्षोघ्नम्।

(१)—'चन शब्दः पादपूरणः'-इति वि०।

(२)—'मायया प्रज्ञया'-इति वि०।

अथ नवमी।

भारद्वाजऋषिः* ।

३ १ २ ३ २ ३ २ ३ १ ३ क २र
अप त्यं वृजिनꣳरिपुꣳस्तेनमग्ने दुराध्यम्।
१ २ ३ २ ३ २
दविष्ठमस्य सत्पते कृधी सुगम्॥ ९॥ १०५

३ ४ ३ ४ ५ ३ २ र ३ १ १ १ १ २
I अपत्यं वृजिनम्। रिपूम्। स्तेना२३४५म्। अग्ना-
१र २ २ ४ ५ १ २
इ। दूराधा२३या३४म्। दविष्ठमस्य सत्। पता३इ।
१ ४ २ ५ ४
का२३ध्नो३। सू३४५गोई२हाइ॥ २४॥ १०५

हे 'अग्ने!' त्वं 'त्यं' तं प्रसिद्धं 'वृजिनं' कुटिलं 'रिपुं' पापकारिणं 'दुराध्यं' दुःखस्याध्यातारं दुष्टाभिप्रायम् एवम्भूतं 'स्तेनं' हिंसकं 'दविष्ठं' दूरतमम् 'अपास्य' अप क्षिप [अस्, क्षेपणे-इति धातुः]। हे 'सत्पते!' सतां पालयितः अग्ने! अस्माकं 'सुगं' शोभनेन गन्तव्यं सुखं 'कृधि' कुरु। [अत्र सर्वदेवात्मकस्याग्नेः स्तवनाद् वैश्वदेवत्वम्(१)॥ ९॥ १०५

---

* 'ऋजिश्वनआर्षम्'-इति वि०।

१०५ नास्तीयमुत्तरार्च्चिके। ७३

I सौमक्रतवं बृहदाग्नेयीयं वा।

(१)—'विश्वे देवाः सर्वे देवाः'-इति नैरुक्तम् (१२,४,५)। 'अनादिष्ट-देवता-लिङ्गो

अथ दशमी।

विश्वमनाएवर्षिः।

३क२र ३ १२ ३ १ २
अृष्टयग्ने नवस्य मे स्तोमस्य वीर विश्पते।
३ १र ३ १ २ ३ १ २
नि मायिनस्तपसा रक्षसो दह॥१०॥१०६

५र र र २र १ २ १
I हाउअृष्टयग्नेनवस्य मेहाउ। स्तोमास्य वाइ।
२ १ २ ५र र र ४ ५ २र १ २१
रविश्पतायेश४। ऐहोहाउहोवा। निमायिनाः। तप-
२र १ ५र र र ४ ५ १ ५र र र
साराश४। ऐहोहाउहोवा। क्षासाश४ः। ऐहोहाउ-
४ ५ २ ५ ५ ४ १५
होवा। दहए३४। हियाइहा। होपुइ। डा॥२५॥१०६

इति प्रथम-दशति॥

'वीर' शत्रूणां विनाशयितः! वीर्य्यवन्! वा 'विश्पते' विशां पाल यितः! हे अग्ने! 'नवस्य' इदानीं क्रियमाणत्वान्नूतनं 'मे' मदीयं

१०६ नास्तीयमुत्तरार्चिके। ७४

I अगस्त्यऋषिः, राक्षोघ्नम्।

मन्त्रराशिः स्यात् स सर्वसाधारणत्वाद् बहु-दवतो वैश्वदेवः स्यात्'-इति देवराजयज्वा (७,१,४)। आग्नेयत्वमप्यस्याध्याहृतम्, अग्नावेव सर्व-देवताभिवादात्; अत उक्तं निरुक्त-भाष्य-कारेण—'अग्निर्वै सर्वा देवता इति च विज्ञायते, अग्निर्वै देवतानां भूयिष्ठ भागिति च, अपरिग्रहं च प्रधानमासीति न्यायः, तस्मादाग्नेयः स मन्त्रः स्यात्' इति (७,१,४)।

'स्तोमस्य' स्तोत्र-शस्त्रादिकं 'श्रुष्टी' श्रुत्वा 'मायिनः' मायाविनः रक्षसः कर्म-विघ्न-कारिणः, राक्षसान् 'तपसा' तापकेन तेजसा 'निदह' नितरां भस्मीकुरु(१) [श्रुष्टीति "ज्ञात्व्यादयश्च(७,१,३८)"-इति निपातितः(२); वकार-लोपश्छांदसः(३)]॥

"तपसा"-तपुषा-इति च पाठौ॥ १० ॥ १०६

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य एकादश-खण्डः॥११॥

---

अथ द्वादश-खण्डे—

सेयं प्रथमा।

प्रयोगोभार्गवऋषिः *।

१र २र २ १ २ १२ २ १ २
प्र मꣳहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे।
२ १ २ ३ २
उप स्तुतासो अग्नये॥ १ ॥ १०७

---

* "सौभरेरार्षम्"-इति वि०।

१०७ उत्तरार्च्चिकस्य २,२,१७,१।

(१)—'मे' 'नवस्य' 'स्तोमस्य' बलेन 'वीर!' 'विश्पते!' 'अग्ने!' 'मायिनः' 'रक्षसः' 'तपसा' 'श्रुष्टी' क्षिप्रम् 'नि दह'—इति वि०-निष्पन्नोऽन्वयः; इह मते न विभक्ति-व्यत्ययः।

(२)—अनेन हि सूत्रेण आकारस्य ईत्वमात्रं विधीयते।

(३)—षकारागमश्च तथैव।

५ २ ४र ५ २१ १ र
I प्र मꣳहा३इ ष्ठाय गायता । ऋताव्ने२ । बृहते
२ ४ ५ २ १ २ २ १
शूक्रा२शो३ । चा२३४इषा३ । उपा३औ३हो । स्तोता
२ ४ २ ५ २
सो३आ३ । ग्मा३४५यो६हाइ ॥ २६ ॥

४ ५ र ४ ४ २ १
II प्रमꣳ हिष्ठाय । गा५यता । ऋता२१व्ने२ । बृहा-
२ १र २ १
ता१इशू२ । क्र । शोचा१२इषाइ । उप । स्तुयतो२ ।
१ ऽ २ २१ ५ ४ ५ २
ऊवाइ । हो३वा३ । सओ२३४वा । ग्मा५या६हाइ ॥ २७ ॥

२ ४ ५र र २ २ ५ १ रर
III प्र मꣳहिष्ठाय गा । इया३४३ई३४या । यतऋताव्ने
र २ १ १ १२
बृहतेशुक्रशो२ । हो२ । हुवा२इ । चाइषा२इ । उपा-
१ २ १ २र१ २ १
३होइ । स्तुता३हो । सोऽग्मा२३या३४३इ । ओ२३४
६
५ । इ । डा ॥ २८ ॥

---

I,II प्रमꣳहिष्ठीये, इन्द्रऋषिः ।

III प्रमꣳहिष्ठीयम् आसितं वा, इन्द्रो वसिष्ठो वा ऋषिः ।

अथ द्वितीया।

द्वयोः सौभरिर्ऋषिः *।

१र २र३ २ ३ १ २ ३ १ २ २ १ २
प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः।

४ ५ र र ४ ५ १ र २
IY प्र मꣳहिष्ठाय गायता। प्र मꣳहिष्ठो वा। यागायत।

१ २ ३र ४ ५र २ २ र
ऋतार२३न्वा३४इ। बृहतेशुक्रशो। चा३इषाइ। उपौ-

र २ र र २ २ १
होवा३हाइ। स्तुतौहोवा३हा३। सत्रो२३४५इ। डा-

६
॥ २८ ॥ १०७

हे 'उपस्तुतासः!' (१) हे उपस्तोतारः! यूयं 'मंहिष्ठाय'(२) दातृतमाय 'ऋतावे'(३) यज्ञवते सत्यवते वा 'बृहते' महते 'शुक्रशोचिषे' दीप्त-तेजसे 'अग्नये' 'प्र गायत' स्तोत्रं पठत(४)॥१॥ १०७

---

* "सोभरिः"-इति वि० पाठः।

IY प्रमꣳहिष्ठीयम्, इन्द्रऋषिः।

(१)—कर्त्तरि तृजर्थे क्तः। 'उपगम्य ये स्तुवन्ति'-इत्यादि वि०।

(२)—मंहतिर्दान-कर्मा, निघण्टौ तृतीयाध्यायीय-विंशतितम-खण्डे पाठात्। तस्मात् तृचि "तुश्छन्दसि (५,३,५९)"-इतीष्ठनि रूपम्।

(३)—"मतौ (६,३,१३१)"-इति योग-विभागादकारस्य दीर्घः।

(४)—ऋचि 'स्तुतासो अग्नये'-इति (६,१,११५) प्रकृतिभावे रूपम्।

२ ३१२　३ १र　२र
यस्य त्वꣳ सख्यमाविथ ॥ २ ॥ १०८

१ २　२　　१ २ २
I प्रासो३ह्वाइ। आग्ने३ह्वाइ। तवा३१ ओवा२३।
३　५　२१र र २　१र २　१ २
तौ२३४भीः। सुवीराभिस्तरतिवाजकर्मभिः। यस्या३-
२　१　४ ५ ४　५
ह्वाइ। त्वा३सा२३। ख्यमोवा। वा५इयो६ह्वाइ ॥३०॥ १०८

हे 'अग्ने'! 'तव' 'ऊतिभिः' रक्षाभिः 'सः' यजमानः 'प्र तरति' प्रवर्द्धते। ऊतयो विशेष्यन्ते—'सुवीराभिः' शोभन-वीराः पुत्रादयो यासु, ताभिस्तथोक्ताभिः 'वाजकर्मभिः' वाजानामन्नानां बलानां वा कर्म रक्षणं यासु, तादृशीभिः। हे अग्नेः! 'त्वं' 'यस्य' यजमानस्य 'सख्यं' सखित्वं मित्रत्वम् 'आविथ'(१) प्राप्नोषीत्यर्थः, स प्र तरतीति पूर्वेणान्वयः॥

"तरति वाजकर्मभिः"-"तिरते वाजभर्मभिः"-इति च पाठौ। "आविथ"-"आवरे"-इति च ॥ २ ॥ १०८

---

१०८ उत्तरार्चिकस्य ८,२,२,१।

I वाजभृद्वा वाजाभृद्वा वाजाभर्मीयं वा, भरद्वाजऋषिः।

(१)—"छन्दसि लुङ्-लङ्-लिटः (३,४,६)"-इति काल-सामान्ये लिट्।

अथ तृतीया।

१ २ क २र २ १ २ ३ १ २ ३ १ २
तं गूर्द्धया स्वर्णरं देवासो देवमरतिं दधन्विरे।
३ २ ३ १ २
देवत्रा हव्यमूहिषे ॥ ३ ॥ १०९

५ ४ १ ४ऽ ५ ४ ५ २र १र र र १
I तं गूरर्द्धा३या सुवर्णरोवा। देवासो देवमरा२ता

७ ५ ४ ५ १ ३ ५
इन्दधावा। म्रा५यो६हाइ२३। हो। न्वा२३४इराइ।

२र १र ऽ २ १ ३ ५र र ३
देवत्राह। व्यम३हा३। हा२इषा२३४औहोवा। ऊ-

१ १ १ १ ८
२३४५ ॥ ३१ ॥

५ र र ४ ५ २र १र २र १ २ ३ २ १
II तं गूर्द्धयास्वुवर्णाराम्। देवासोदाइ। व मरता२३

३ ३ २ २ ५ २र १
इम्। दधन्वउरा। वा३। दे२३४वा। त्राहा२३।

४ ५ ४ ५
व्यमोवा। हा५इषो६हाइ ॥ ३२ ॥

५ र र र ४ ५ १र ३ ५ १
I,II तं गूर्द्धयास्वौहोर्णाराम्। देवा२सो२३४दे। वम-

१०९ उत्तरार्च्चिकस्य ८,२,११,१।

I,II,III इमानि त्रीणि सौभराणि।

२ ५ २ ५ २ २
रता२इम् । दा२३४धा । न्वा२३४इराइ । हाहो२३४
५ १र २ ५ २ २ ४ २ १ १ १ १
हा । देवा२चा२३४हा । व्यमू२हा५इ । षा२३४५
५
॥ २२ ॥ १०६

हे 'स्तोतः' ! 'तं' प्रसिद्धमग्निं 'गूर्द्धय'स्तुहि [गूर्धयतिः स्तुति-कर्मा (नि० ३, १४, ५] कीदृशम्—'स्वर्णरं' सर्वस्य नेतारं सर्वैः यजमानैः कर्मादौ नेतव्यं वा । अथवा, स्वर्गं प्रति हविषां नेतारम्(१) । 'देवासः' दीव्यन्ति स्तुवन्तीति(२) देवाऋत्विजः 'देवं' दानादि-गुण-युक्तम् अर्यं स्वामिनं, यद्वा, अभिप्राप्तव्यं(३) 'दधन्विरे' [धन्वन्ति गच्छन्ति] स्तुत्यादिभिः प्राप्नुवन्ति [धविर्गत्यर्थः(४)] प्राप्य च तेनाग्निना 'देवत्रा' देवान् [देवमनुष्येत्यादिना(५) द्वितीयार्थे त्रा

---

(१)—'स्वः', 'नरम्'—इति पृथक् पद-द्वयमिति पद-कृत्-पाठात् स्वर-श्रुतेश्च स्पष्टमवगम्यते ; विवरणकारश्चैवमेव व्याचष्टे, तद्यथा,—'स्वः लुप्तोपममिदं द्रष्टव्यम्, स्वरिव आदित्यमिवेत्यर्थः, [नरं नराकारम्'-इति । स्वः, पृश्निः—इत्यादि नाम-षट्कं दिव आदित्यस्य च साधारणम्, निरुक्त-द्वितीयस्य तृतीय-षोड़शं हि तत्र प्रमाणम् । क्वचि स्वर्णरमिति णत्वमसमानपदेऽपि छान्दसम् ।

(२)—दीव्यतेः स्तुतिश्चैकोऽर्थः स्पष्टोऽस्ति गण-पाठादौ ।

(३)—'अरतिम् अलमतिम्, पर्याप्त-मतिं सर्वज्ञमित्यर्थः ; अथवा देवान् यजमानांश्च प्रति गन्तारम्'-इति वि० ।

(४)—निघण्टोर्द्वितीय-चतुर्द्दशे पठितत्वात् । 'दधन्विरे, धारितवन्तः, स्थापितवन्तः'-इति वि० ।

(५)—"देव-मनुष्य-पुरुष-पुरु-मर्त्त्येभ्यः ।"

अथ चतुर्थी ।

प्रयोगोभार्गवऋषिः, सोभरिः काण्वो वा * ।

१ २ १ १ २ ३ १ २ ३ १ २ ३ २ ३ २
मा नो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्त एषः ।
३ १ २ ३ २
यः सुहोता स्वध्वरः ॥ ४ ॥ ११०

४ऽ ऽ २ ऽर १ ७ २ १ २ ३
I मा । नाः । हृणी२थाअतिथी३म् । वासूरा२३४
५ २ र र २ र र २ २ १
ग्नीः । पुरौहोवा३हाइ । प्रशौहोवा३हा३ । स्तओ२३
५ ४ ५ ५
४वा । आ५इषोईहाइ ॥ ३४ ॥ ११०

प्रत्ययः] 'हव्यं' चरु-पुरोडाशादि-लक्षणं हविः 'आ ऊहिषे' अभि प्राप्य [वहेर्लिटि(६) यजादित्वात् सम्प्रसारणम्(७) ॥ ३ ॥ १०९

---

* 'सौभरेरार्षम्'-इत्येव वि० ।

११० नास्तीयमुत्तरार्च्चिके । ७५

(६)—"लिङर्थे लेट् (३,४,७)" । लिङर्थश्चात्र प्रार्थनं, लोडर्थश्च सरत्येति भाष्य-कृता अभिप्रापयेति लोटोरूपं प्रतिपदं दृष्टम् ।

(७)—'वचि-स्वपि-यजादीनां किति (६,१,१५)।

४र ५ १ २ २ ३ ४ ५ २
II मानोहाउ। हा२३४। णीथाअतिथिम्। वा

३ ५ ११र २ १ २ १र २ १ र
सूरा२३४ग्राइः। पुरौहहोइ। प्रशौहहो। स्ता२३४एषाः।

५र ५ ४ ७
एहियाइहा। हो५इ। डा॥ २५॥ ११०

हे ऋत्विक्-सङ्घ! 'नः' अस्मत्-सम्बन्धि-यज्ञे 'अतिथिम्' अतिथिवत् प्रियम् अग्निम् 'मा हृणीथाः' मा हर। कमग्निम्? इत्यत-आह—'यः' अग्निः 'सुहोता'(१) सुष्ठु देवानामाह्वाता(२) 'स्वध्वरः' शोभन-यज्ञो भवति 'एषः'(३) अग्निः 'पुरुप्रशस्तः' बहुभिः स्तुतः 'वसुः'(४) वासकश्च भवति [तमिति पूर्वेणान्वयः(५)॥

"मा हृणीथा अतिथिम्"-इति छन्दोगाः, मा हृणीतामतिथिः"-इति बह्वृचाः॥ ४॥ ११०

---

I,II पक्थस्य सौभरस्य सामनी।

(१)—यास्क-वङ्गल-वचनात् (५,१,१४) ऋः सम्प्रसारणम्।

(२)—अन्यत्रापि 'त्वमग्ने यज्ञानां होता'-इत्यादौ (ऋ०१,१,१,२) अग्नेर्होतृत्वं श्रूयते। अतएव यास्कः—'अथास्य कर्म, वहनं च हविषामावाहनञ्च देवतानाम्'-इत्यादि(७,२,१,)।

(३)—'इण् गतौ(भ्वा०प०) इत्यस्येदं रूपम्, गन्ता'-इति वि०।

(४)—यद्यपि वसुर्देवविशेषोऽपि श्रूयते परं नेह तस्य ग्रहणम् अग्नेः तस्य च स्थानैक्याभावादसामञ्जस्यात्, अस्ति हि नैरुक्तम्—'अग्निः पृथिवी-स्थानः'(७,२,१)'-इति, 'मध्यस्थाना वसवः(१२,४,८)'-इत्यादि च।

(५)—'यः' 'अतिथिम्' अतिथि-स्थानीयः, 'वसुः' प्रशस्त-धनवान् वा, 'पुरुप्रशस्तः'

अथ पञ्चमी।

तिसृणां सोभरिर्ऋषिः।

३ १ २ ३ १र २र ३ २ ३ १ २ ३ १ २ ३ २
भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः।
३ २ ३ १र ३र
भद्रा उत प्रशस्तयः॥ ५॥ १११

४ ३ ५ २ २ ४र ५ ५ ३ र २र १
I भद्रो४नः। होइ। अग्निराऊता६ए। भद्राराताइः।
२ १ २ १ २ ५ २ १र २ १
सुभगाभा३। द्रो२ध्वा२३४राः। भद्राऊ२३ता३। प्रा२
४ २ ५ ४
३शा३। स्ता३४५यो६हाइ॥ ३६॥१११

'आहुतः' हविर्भिस्तर्पितोऽग्निः 'नः' अस्माकं 'भद्रः' कल्याणो भवतु। हे 'सुभग' शोभन-धनाग्ने! 'भद्रा' 'कल्याणी' 'रातिः' दानं च अस्माकं भवतु। 'भद्रः' कल्याणः 'अध्वरः' यागश्च भवतु। 'उत' अपिच 'भद्राः' कल्याण्यः 'प्रशस्तयः' प्रशंसाः स्तुतयश्च भवन्तु॥ ५॥ १११

---

१११ उत्तरार्च्चिकस्य ७,२,१०,१।

I दैवानीकम्, पथो वा पक्थस्य ऋषिः।

वसुभिः स्तोतृभिः स्तुतः, 'सुहोता' 'स्वध्वरः' 'एषः' गन्ता 'अग्निः' त्वम् 'नः' अस्माकमुपरि माहृणीथाः' मा क्रोत्सीः—इत्ययमर्थो वि०-सम्मतः। हृणिर्निघण्टु-द्वितीय-द्वादशे क्रुध-कर्मसु, शंसतिश्च निघण्टु-तृतीय-चतुर्दशे पठितो दृश्यते।

अथ षष्ठी।

१ २　　　　　३ १र २ ३ १र　　२र ३ १ २
यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम्।
३ २ ३ १ २　३ १ २
अस्य यज्ञस्य सुक्रतुम्॥ ६॥ ११२

१　　　　४ २　४ ५　　१र १ र र र
I या५पूजि। ष्ठं त्वा ३वा ३वृमहाइ। देवं देवत्रा हो
२　　१　　२　　१ ७　　　१　　४
ता२३राम्। आमर्त्तियम्। आस्ययाज्ञा२३। स्या२३सू३।
२　　　५　　४
क्रा३४पुतो६हाइ॥ ३७॥ ११२

हे अग्ने! 'यजिष्ठं' यष्टृतमं 'त्वा' त्वां 'ववृमहे' वृणीमहे सम् भजामहे। कीदृशं त्वाम्? 'देवत्रा'(१) देवेषु मध्ये 'देवम्' अतिशयेन दानादि-गुणम्। 'होतारं' देवानामाह्वातारम्। 'अमर्त्यम्' अविनाशिनम्। 'अस्य' 'यज्ञस्य' यागस्य 'सुक्रतुं' सुष्ठु कर्तारं(२)॥ ६॥ ११२

---

११२ उत्तरार्च्चिकस्य ६,२,१३,१।
I गौतमं साध्यं वा।

(१)—"निपातस्य च (६,३,१३६)" इति दीर्घः।

(२)—'यजिष्ठम्, 'देवता' 'देवम्,' 'होतारम्, 'अमर्त्यम्' 'सुक्रतुम्' 'त्वा' त्वाम् 'ववृमहे' प्रार्थयामहे। 'अस्य' प्रक्रान्तस्य यज्ञस्य परिसमाप्त्यर्थमिति शेषः। अयमर्थो विवरणकार-सम्मतः।

अथ सप्तमी।

१२ ३१र २र२ ३२३ १२३ १२३१२

तदग्ने द्युम्नमाभर यत्सासाहा सदने कञ्चिदत्रिणम्।

३१र २र ३क २र

मन्युं जनस्य दूढ्यम्॥ ७ ॥११३

४ र र ४ २१र २ १

I तदग्नेद्यूपुम्नम्। आभरोवा। यत्सासार३हा। स-

३ १ २ १

दार३नाइ। कञ्चिदत्रार३इणाम्। मान्युञ्जनस्यदूर३

१ ५ ५र ५ ४ ४

हो। ढार३४याम्। एहियाहा। होपुइ। डा॥ ३८ ॥११३

हे 'अग्ने!' 'तत्' 'द्युम्नम्' अन्नं यशोवा 'आभर' अस्मभ्यमाहर। 'यत्' यदा 'आसदने' यज्ञ-गृहे वर्त्तमानं कञ्चित् कमपि 'अत्रिणम्' अत्तारं राक्षसादिकं 'सासाह' अत्यर्थमभिभव। तथा 'दूढ्यं'(१) दुर्धियं पाप-बुद्धिं(२) शत्रुं 'जनस्य' 'मन्युं' क्रोधं च अभिभव, तदेति पूर्वत्रान्वयः॥

"दूढ्या"-"दूढ्यम्"-इति च पाठौ॥ ७॥ ११३

---

११३ नास्तीयमुत्तरार्च्चिके। ७६

I संवर्गः, जमदग्निऋषिः।

(१)—"तन्वादीनां छन्दसि बहुलम (६,४,७७)"-इति वचनात् यणि, छान्दस-रफ-लोपे च रूपम्।

(२)—'दूढ्यः, दुर्धियः पापधियः'-इति नै० ५,४,२६।

अथाष्टमी।

विश्वमना ऋषिः।

१र २र३ १ २ ३ १र १र३ १ २ ३ २
यदा उ विश्पतिः शितः सुप्रीतो मनुषो विशे।
२उ ३ २उ ३ १ २
विश्वेदग्निः प्रति रक्षांसि सेधति॥ ८॥ ११४

२ १र ४ ५ १ र २र १ २र १र
I यदाऊ२३विश्पतिः शिताः। सुप्रीतोमनुषोविशे।
२ १ २ १ २र ३ र २ १ २ ४ ५
विश्वाइदा२३ग्नीः। प्रतिरक्षां। सिसेधता। औ३होवा।
५
हो५इ। डा॥ २८*॥ ११४

इति द्वितीय-दशति॥

'विश्पतिः' विशां पतिः(१) पालयिता 'शितः' हविर्भिस्तोक्ष्णी-

११४ नास्तीयमुत्तरार्चिके। ७७
I राक्षोघ्नम्, अगस्त्यऋषिः।

(१)—विडिति मनुष्य-नामसु पाठः—'मनुष्य-नामान्युत्तराणि पञ्चविंशतिः'-इति नैघण्टुकम् २,३,८ निघण्टौ द्वितीय-तृतीये चतुर्थम् पदं विशः-इति तेषां पतिरीश्वरः।

* इति ग्रामे गेय-गाने तृतीयस्यार्द्धः प्रपाठकः।

सतः(२) सोऽग्निः 'सुप्रीतः' सुष्ठु प्रीतः सन् 'मनुषः' मनुष्यस्य 'विशि' [विश निवेशने (तु०प०] गृहे 'यद्वै'(३) यदा खलु वर्तते तदानीम् 'अग्निः' 'विश्वाइत्' विश्वान्येव(४) तस्य बाधकानि रक्षांसि 'प्रति(५)सिधे धति' हिनस्ति। [षिधु गत्यां(६) भौवादिकः]; 'उ'-प्रसिद्धौ ॥

"विश्रे" "विश्रि"-इति च पाठौ ॥ ८ ॥ ११४

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य द्वादश खण्डः ॥ १२ ॥

---

(२)—'शो तनुकरणे (दि०प०) इत्यस्यैतद्रूपम्, शतिः संस्कारार्थः, शितः संस्कृत इत्यर्थः'-इति वि० ।

(३)—'वै. उ—द्वावपि पाद-पूरणे।

(४)—विश्वा-इति "सुपां सु लुक् (७,१,३९)"-इत्यादिना शाले रूपम्। 'इदिति पादपूरणः-इति वि० ।

(५)—'प्रति शब्दः पाद-पूरणः'-इति वि० ।

(६)—गत्यर्थः सोऽयमिह हिंसार्थः।

वेदार्थस्य प्रकाशेन तमो हार्द्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः॥ १ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिक-मार्ग-प्रवर्त्तक-श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्य्येण विरचिते माधवीये-सामवेदार्थ-प्रकाशे छन्दोव्याख्याने आग्नेय-पर्वणि प्रथमोऽध्यायः॥ १॥

॥ समाप्तम् आग्नेयं पर्व आग्नेय-काण्डं वा ॥

॥ इति १म पर्व ॥

(सामवेदीय-मन्त्र-भाग-लभ्याः सन्ति यावन्तः अग्नि-दैवता मन्त्राः तावन्तः सर्वएवेहैव पर्व्वणि काण्डे वा दृश्यन्ते।)

---

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १ ॥

## अथ द्वितीयाध्याय आरभ्यते ।

अस्मिन्नध्याये इन्द्रः स्तूयते * ।

---

अथ प्रथमे खण्डे—

सेयं प्रथमा ।

शंयुर्बार्हस्पत्य ऋषिः † ॥

१ २     २ १र   १र    २ २ २ १ २
तद्वो गाय सुते सचा पुरुहूताय सत्वने ।
२उ   २ २ १ १ २
शंयद्गवे न शाकिने ॥ १ ॥ १

---

* इत आरभ्य चतुर्थाध्याय-शेष-पर्य्यन्तमध्याय-त्रयात्मकमैन्द्रं काण्डमैन्द्रं पर्व्व वेत्युच्यते ।

† 'भरद्वाजस्यार्षम्' इति वि० ।

१ उत्तरार्च्चिकस्य ८,२,४,१ ।१

५ २ ४ ५  १  १२ ३  ५
I ओम् । तद्वोहोवा । गायार२ । सुताइ्सार२३४चा ।
१ २ ८ २  १ २  १  २ २
पुरुहूता । यसात्वा१ना२इ् । शंयन् । हा । औ३होइ् ।
२ ५  १ ३  ५ र र  २  १ १ १ १ १
गार२३४वाइ् । नार२शार२३४औहोवा । ए३ । किने२३४५
॥ १ ॥

हे "स्तोतारः !" "वः" (१) यूयम् "सुते" अभिषुते सोमे सति "पुरुहुताय" बहुभिर्यजमानैराहुताय "सत्वने" शत्रूणां सादयित्रे [यद्वा धनानां सनित्रे दात्रे (२)] इन्द्राय "तत्" स्तोत्रम् "सचा"(३) सह संहता भूत्वा "गाय" गायत । "यत्" स्तोत्रं "शाकिने" (४) शक्तिमते इन्द्राय "शं" सुखकरं भवति । "गवे न" यथा गवे यवसं(५) सुखकरं तद्वदित्यर्थः(६) ॥ १ ॥ १

(१) —'द्वितीया-बहुवचनमिदं प्रथमैक-वचनस्य स्थाने द्रष्टव्यम्'-इति, 'अन्तरात्मन एवायं प्रैषः, हे मदीयान्तरात्मन् !'-इति च वि० ।

(२)—'सत्वने' षणु दाने इत्यस्यैतद्रूपम्, दात्रे स्तोतृभ्यः'-इति वि० ।

(३)—'सचा सह इत्यर्थः'-इत्यादि नैरुक्तम् ५,१ ।

(४)—शकनं शाकः शक्तिः ।

५ —यवसं इ-असच् घासं तृणम् ।

(६)—विवरण-मते 'शाकिने'-गवे'-इति विशेष्य-विशेषणे । तथाच—यथा कश्चित् कृषीवलः शक्तिमते वृषभाय सुखकराः स्तुतीरुच्चारयति, तद्वदिन्द्रस्य सुखकरं स्तोम-मुच्चारयेत्यर्थः सम्पन्नः ।

५ र र २ १ र २
II तद्वोगाया। सुताइसचा३। पूरू२३हूता३४।

२र२ १ २ ३ ५ २ १ २
ह्वाहो३। यासत्वा२३४नाइ। शंयद्गा२३वे। नशौ २।

१ ५ ४ ५
हौ२। ऊवो२३४। वा। कापुइनो६ह्वाइ॥ २॥

५ र र र ५ २ र १र १र १
III तद्वोगायसुतेसचा६ए। पुरुहूतायसत्वने। पुरु।

र १र १ ७ २ ५ २ ३ ५
हूता। यासत्वा२३ना३४इ। शंयत्। गौवा ओ२३४वा।

१ ४ २ ५
ना२३शा३। का३४५इनो६ह्वाइ॥ ३॥

५ र र र ५ २ र१र
IV तद्वोगायसुतेसचा६ए। पुरुहूतायसत्वनाइ। शं-

२ २ १ १ २
यद्गा२३वे। ऐ२हो१आ२३इहो। नशा२३। का२इना-

५र र ३ ३ १ १ १ १
२३४औहोवा। ई२३४५॥ ४॥ १

---

I,II,III,IY "रौद्रे द्वे मार्गीयवे द्वे, अपि वा मार्गीयवं च रौद्रे च मार्गीयवं च, सर्व्वाणि वा रौद्राणि सर्व्वाणि वा मार्गीयवाणि। इत्यार्षेयकम।

अथ द्वितीया ।

सुभकाचऋषिः * ।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
यस्ते नूनꣳशतक्रतविन्द्र द्युम्नितमो मदः ।
१ २ ३ १र २र
तेन नूनं मदेमदे: ॥ २ ॥ २

४ र र ४ १ र १
I यस्तेनूनाꣳशतक्रताउ । इन्द्रद्युम्नितमोमा२दाः ।
२र१र २ १ ऽ २ १११११
तेननूना२३म्मा । दाइमा३उवा३ । दे२३४पूः ॥ ५ ॥ २

अत्र सोमः स्तूयते—

हे "शतक्रतो"-शतविध-प्रज्ञान ! (१) हे "इन्द्र !" (२)

---

* 'श्रुतकक्षस्यार्षम्'-इति वि० ।

I आश्वम् ।

(१)—'क्रतुरिति निघण्टु-तृतीय-नवमे पञ्चमं पदम् । 'शतमिति बहु-नाम (नि०३,१,१०), क्रतुरपि कर्म-नाम (नि०२,१,११) शतं क्रतवो यस्य स शतक्रतुः, तस्य सम्बोधनं शतक्रतो ! बहु-कर्मन् !'-इति वि० ।

(२)—इन्द्रः अन्तरीक्षस्थ-देवः, "यो जातएव प्रथमो मनस्वान् देवो देवान् क्रतुना-पर्य्यभूषत् । यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना सजना स इन्द्रः"-इति ऋक् स च वायुरेव "वायुर्वेन्द्रो वा अन्तरिक्ष-स्थानः (७,३,१)"-इति हि नैरुक्तम् ; "वायु-रिन्द्रश्चैक एव यथा स्थलः करः"-इति तद्-भाष्यम् । "इन्द्रः इरां दृणातीति वेरां ददा

अथ तृतीया।

हर्य्यतः प्रगाथः*।

२ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
गाव उपवदावटे मही यज्ञस्य रप्सुदा।

"द्युम्नितमः"(३) यशस्वितमः "यः मदः" [माद्यन्त्यनेनेति मदः सोमः] यः सोमः "नूनं" पुरा "ते" त्वदर्थम् अस्माभिरभिषुतोऽस्ति। "तेन" अस्माभिर्दीयमानेन सोमेन "नूनम्" इदानीम् "मदे"(४) तत्पानेन मदे। तव सञ्जाते सति अस्मानपि "मदेः" धनादिदानेन त्वं मादय [मदी हर्षे, अत्रान्तर्भावितण्यर्थः] "छन्दसि बहुलम्"-इति शप्(५)॥ २॥ २

---

* 'हर्य्यतस्यार्षम्'-इति वि०। प्रग्रथनं प्रगाथः।

तीति वेरां दधातीति वेरां दारयतइति वेरां धारयतइति वेभ्ये भूतानीति वा तद् यदेनं प्राणैस्समैन्धत तदिन्द्रस्येन्द्रत्वमिति विज्ञायत इदं करणादित्याग्रायण इदम्-मादित्यौपमन्यव इन्दते वैश्वर्य्यकर्मण इन्छत्रूणां दारयिता वा दरयिता वा यज्ञानाम्'-इत्यादि नैरुक्तम् १०,१,८। "इरा शब्दे उपपदे दृणातेर्दधातेर्दारयतेर्धारयतेर्वा"—इत्यादि, "इरामन्नं तेन सम्बन्धाद्वा तद्धेतु-हेतुकं बलं लक्ष्यते, तेन बल-लक्षित-लक्षणया तदाधार-भूतो मेघः"-इत्यादि च देवराजः॥

(३)—'द्युम्नं द्योतते, तेन दीप्तार्थस्य, अतिशयेन दीप्तिमः'-इति वि०।

(४)—'मदे सप्तम्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम्, मदेन; 'मदेः' माद्यस्वेत्यर्थः'-इति वि०।

(५)—'छन्दसि शायजपि (३,१,८४)'-इतश्छन्दसि पदं 'व्यत्ययो बहुलम् (३,१,८५)' इतो बहुलंपदञ्च सङ्कलय्य छन्दसि बहुलमिति वचनम्। वस्तुतोऽयमुपग्रह-व्यत्ययः।

२ १र २र　　३ १ २
उभा कर्णा हिरण्यया ॥ २ ॥३

४र ५　　४　५　　२　　२　　१　२
I गावः। ए गावाः। उपव। दा३। वा२दा

५र र　　२　५　　१　२　५　　२ १
२३औहोवा। वा२३४टे। महीया२३४ज्ञा। स्यरा३।

१　२　५र र　　२　५　२　२　५
स्यार२रा२३४औहोवा। प्सू२३४दा। उभाका२३४र्णा।

२ २　१　२　५र र　　२　५
हिरा३। हार२ण्या२३४औहोवा। ण्या२३४या ॥ ६ ॥

हे "गावः" घर्मदुघाः ! (?) यूयम् "अवटे"(१) अवटं महावीरं(२) प्रति "उप वद" उपावत [वर्ण-व्यत्ययः (३,४,९८)] उपागच्छत। "यज्ञस्य" घर्म-यागस्य(?) साधन-भूते "रप्सुदा"(३) रप्सुदे आ-रिप्सोः फलदे [रिप्सोरश्विनोर्दातव्ये वा ; यद्वा रपणं शब्दनं रप् मन्त्रः, तेन सुदातव्ये ; अथवा प्सुद क्षरणे (भ्वा० आ०), रपा मन्त्रेण क्षारणीये दोहनीये, ईदृशे] गवाजयोः पयसी "मही" महती(४) बहुले अपेक्षिते, अत उपावत [गो-शब्दो

३ उत्तरार्चिकस्य ७,३,१६,१ ।२

(१)—'ग्रे-भावे (७,३,२९) पररूपे (६,१,७०) च रूपमिदम्।

(२)—"घर्म-यागे प्रधान-भूतं महावीर-नामकमग्निम्"-इति वि०।

(३)—,(४)—द्विवचनार्थे एकवचनम् (३,१,८५)।

२ ३ ५ २ १ २ २
II ओइ गार३४वाः। उपवा३दा। वाटाओर३४-

५ २१२ २ १ २ २ ३ ५ १ ५
वा। मह्योयज्ञस्यरपसुदा३। ओउर३४भा। कार्णा

५ २ १ ११११
ओर३४वा। हिरण्ययार३४५॥ ७ ॥ ३

अजाया अप्युपलक्षकः, अजा-पयसोऽपि महावीरे आसेचनीयत्वात्]। अपिच अस्य महावीरस्य "उभा"(५) "उभौ" कर्णा(६) कर्णस्थानीयौ द्वौ रुक्मौ "हिरण्यया"(७) हिरण्मयौ सुवर्ण-रजतमयावित्यर्थः(८)॥

"उपवदावटे"-इति छन्दोगाः, "उपावतावतम्"-इति बह्वृचाः॥ २॥ ३

---

I,II एटते।

(५),—(६).—सुपां सु-लुगित्यादिना (७,१,३९) आत्वम्।

(७)—"ऋत्व्य-वास्त्व्य-वास्त्व-माध्वी-हिरण्ययानि छन्दसि"। ६,४,१७५।

(८)—'गावः' हे मदीया वाचः! 'अवटे' अवटं मेघम् 'मही' महत्यौ च द्यावापृथिव्यौ 'उप' उपगम्य 'वद' वदत। कीदृशं मेघम्? 'उभा कर्णा हिरण्यया' उभौ कर्णौ हिरण्मयौ यस्य। कीदृशौ द्यावापृथिव्यौ? 'यज्ञस्य रपसुदा' यज्ञस्य रूपदे। अयमर्थो विवरण-कृत्सम्मतः।

अथ चतुर्थी।

द्वयोः श्रुतकक्षनाम ऋषिः।

३ १ २　　३ १ २ ३ २ ३ १ २
अरमश्वाय गायत श्रुतकक्षारङ्गवे।

३ १ २३ १ २
अरमिन्द्रस्य धाम्ने ॥ ४ ॥ ४

I अरा३४म्। अश्वाय। गायाइता। श्रूतक। क्षाराङ्गावाइ। आर२३४राम्। हा३हाइ। इ। द्रास्या२३धा। ऊम्नाये३। म्नो। या२३४औहोवा। ई२३४ती ॥ ८ ॥

II अरमश्वायगायता। रमश्वोवा। यागायत। श्रुतक। क्षार३। हा३हा३इ। आरार२ङ्गा२३४वाइ। आ

श्रुतकक्षऋषिरात्मानमेव सम्बोधयति(१)—हे 'श्रुतकक्ष' आत्मन्!

I,II श्रौतकक्षे।

(१)—नेदं वि०-सम्मतम्, तत्र हि "हे 'श्रुतकक्ष' श्रुतकक्षस्य मम पुत्र!"-इति।

अथ पञ्चमी।

श्रुतकक्षऋषिः।

१र २र २ २ ३ २ ३ १ २
तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे।
१र २र ३ १ २
स वृषा वृषभो भुवत् ॥ ५ ॥ ५

२ २ २ १ २र १ २ ४ ५ ४
इमिन्द्रा३। हा३हा। स्याधाम्ना। औ३होवा। हो
५इ। डा ॥ ६ ॥ ९

"अरम्" अलं "गायत" [वचन-व्यत्ययः (३,१,८५] गाय गीतिं कुरु। किमर्थमिन्द्रोद्देशेनस्तुतिस्तत्राह—"अश्वाय" इन्द्रेण दीयमानायाश्वाय तदर्थम् "अरम्" अलं गाय इन्द्र-विषयं स्तोत्रं कुरु, तथा "गवे" अलं गाय, "इन्द्रस्य" इन्द्रकर्तृकाय "धाम्ने" गृहाय तदर्थञ्च "अरम्" पर्याप्तं स्तुहि; गृहादिकमिन्द्रः प्रयच्छति, तस्मै गायेति [यद्वा इन्द्रस्येति कर्मणि षष्ठी, गवादिलाभार्थमिन्द्रं स्तुहि ॥

"श्रुतकक्षा"—"श्रुतकक्ष"-इति च पाठौ ॥ ४ ॥ ४

यजमानाआहुः—"तम्" पूर्वोक्तलक्षणम् "इन्द्रम्" वाजया-

---

५ उत्तरार्च्चिकस्य ५,१,१०,१ । ३

२ १ ०४र ५र १ र २ र १ २
I तमिन्द्रा२३वाजयामसि। माहेवृत्रा। यहान्ता-

१ २ २ १ ५ ४ ५
१वे२। सवार्षा१वार३। षभो२३४वा। भूपुवो६हा

इ॥ १०॥

२ १ ०४र र ५ १ र २ र १
II तमिन्द्रा२३वाजयामसिहाउ। माहेवृत्रा। यहा

२ १ २ २ २ १ २ १ २
न्ता१वे२३। होवा३हाइ। सवार्षा१वार३। होवा३

२ १ १ ३ ५र र २ २र १ १
वां। षभो२३। भूर्वा२३४औहोवा। ए३। दावव-

१ १ १ १
२३४५॥ ११॥

मसि"(१) सोमेन स्तुतिभिर्वाजयामः वाजवन्तं कुर्मः, किमर्थम्? "महे"(२) महान्तम् "वृत्राय"(३) अपावरकं वृत्रासुरं "हन्तवे"(४) हन्तुम्, सोमपानेन मत्तः स्तुतिभिर्वा स्तुतः सन्, वृत्रहत्यायाश्च,

---

I तन्वः पार्थऋषिः।

II तन्वः पार्थो वा दावसुराङ्गिरसो वा ऋषिः।

(१)—'वाजयति'-इति निघण्टु-तृतीय-चतुर्द्दशे पर्च्चाशत्तमं पदम्। "इदन्तो मसि (७,१,४६)"-इति मसइगागमे रूपम्।

(२),—(३)—द्वितीयार्थे चतुर्थी (२,४,९८)।

(४)—"तुमर्थे से सेन् (३,४,९)"-इति तवेन् प्रत्ययः।

५ २ २ ५ २ २ १ ५२
III तमिन्द्रं वाजयामसीऽ६ए। मह्वा३ह्वाइ। वृत्रा३-
१ ७ १ ऽ १ १ १ २
याहन्तवे२। ओ२। ई२३या। ओमोवा। सहे-
१ १ १ ऽ २ १ २ १
वार्षा२। ओ२। ई२३या। ओमोवा। वृष। भो२
३ ५२ २ ३ ५
या२३४औहोवा। भू२३४वात्॥ १२॥

२२ २ १ २ २ ४५
IV औहोइऊवा३होइ। तमिन्द्रं वाजया३मसी।
२२ २ १ २ २ ४ २ २ ५२ ५२ २
औहोइऊवा३होइ। महेवृत्रा३या३हन्तवे। औहोइ
१ ३ २३ ५ २ १२ २ १ २
ऊवा३होइ। सवार्षा२३४वृ। षभोभुवत्। इडा२३भा
४ ५ ४ ५
३। एहीडा। होपुइ। डा॥ १३ ॥५

[वाजयामसि वाजवन्तं करोतीत्यर्थे तत् करोतीति(५)णिच्, 'णावि-ष्ठवत्(६)'-इति णेरिष्ठवद्भावात् 'टेः' (६,४,१५५)-इति टिलोपः,

---

III वसिष्ठऋषिः, निवेष्वो नाम।

IV वसिष्ठऋषिः इडा वा ऋषयः, निवेष्वः संचारो नाम।

(५)—"तत् करोति तदाचष्टे"-इति गणसूत्रम् (३,१,२५)।

(६)—"प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च"-इति ग०(३,१,२५)।

अथ षष्ठी ।

इन्द्रमातरोदेवजामयऋषिकाः ।

१ २ ३ २ ३ २ ३ १ २ ३ १र २र
त्वमिन्द्र बलादधि सहसो जातओजसः ।
१र २र ३ १र २र
त्वꣳसन् वृषन् वृषेदसि ॥ ६ ॥६

५र २ १ २ २ १
I हाउत्वमिन्द्रा । बलादधि । हाउहाउ । सह-
२र र १ २ २ २ २ १ २
सोजा । ताओ१जसा३ः । हा३उहाउ । त्वाꣳसन्वृषा
२ २ १ २ २ ५र र
३न् । हा३उहाउ । वृषायेत् । आ२सा२३४औहो
२
वा । वृषे१ ॥ १४ ॥

'विन्मतोर्लुक्(५,३,६५)'-इति वचनान्मतुपो लुक्] "वृषा" धनानां सेक्ता दाता "सः" इन्द्रः "वृषभः" अस्माकं स्तोतृणां सोमस्य दातृणां धनादि-सेचको दाता(५) "भुवद्"(६) भवतु ॥ ५ ॥ ५

हे "इन्द्र!" "त्वम्" "सहसः"(१) परेषामभिभावुकाद्

---

(५)—'वर्षणाद् वृषभः'-इति नै०९,२,१ ।

(६)—लेटोरूपम् ।

(१)—'षह मर्षणे, छन्दस्यभिभवार्थः, असुन्'-इति देवराजयज्वा ।

५ २ ५ १ २२ २ १ २ २
II त्वमिन्द्रबलादधोई। सहसोजा। ताओ१जसः।
२२ १ ३२ ३ ५ १ २ ३२ १
इयाश्होइ। इयायो२३४वा। त्वाꣳसन्वृषन्। इयाश्हो
२२ २ ५ २१२ १ २ ५र र
इ। इयायो२३४वा। वृषायेश्त्। आ२सा२३४औहो
२
वा। महे१॥ १५॥

४ ५ ४५र४ ५४५४ १ १र
III त्वमिन्द्रबलादधिसहसाः। जाता२ः। ओजसा
४५र ४ १ २ ४५र ४
२३४ः। इहोइहा। त्वाꣳसन्वृषा३४न्। इहोइहा।
२१२ १ २ ५र र २ ५
वृषायेश्त्। आ२सा२३४औहोवा। ई२३४हा॥ १६ ॥ ६

"बलात्" "अधि जातः" असि(२) [अधिः पञ्चम्यर्थानुवादकः। वृत्रादि-बध-हेतु-भूताद् बलाद्धेतोस्त्वं प्रख्यातो भवसीत्यर्थः] अपिच "ओजसः" ओजोनाम बल-हेतुः हृदय-गतं धैर्य्यं, तस्मा-

I,II,III आर्ष्यातानि त्रीणि।

(२)—'बलस्य त्वयि दृश्यमानत्वात् कारणानुविधायित्वस्य कार्य्याणामिष्यमाण-त्वात्'-इति वि०।

अथ सप्तमी ।

गोषूक्त्यश्वसूक्तिनौ ऋषी हृचस्य(०) ।

२ १र २र　　३ २उ ३ १ २
यज्ञ इन्द्रमवर्द्धयद्भूमिं व्यवर्त्तयत् ।
२　१ २ ३ २ ३ २
चक्राण ओपशन्दिवि ॥ ७ ॥ ७

५　　५　२ १र　१　७
I यज्ञइन्द्रमवर्द्धा६यात् । यद्भूमिम् । व्या । व्यवा-
२　५　२　५　२　५　१ २　१
र्त्ता२३४यात् । चा२३४क्रा । णा२३४ओ । पाशन्दिवि ।
२ ३र २ १　१ २　५र र　२　५
चक्राणओ२३ । पा२शा२३४औहोवा । दी२३४वो ॥१७॥ ७

इपि त्वं जातोऽसि(३) । हे "वृषन्" वर्षितः ! "सन्" श्रेष्ठः "त्वम्" "वृषा इत् असि" कामानां वर्षितैव भवसि(४) ॥ ६ ॥ ६

"यज्ञः" यजमानैरनुष्ठीयमानो यागः "इन्द्र" देवम् "अवर्द्ध

---

(०)—अस्याॠचः, उत्तरस्याश्चेत्यर्थः । दृचस्येति स-यकारपाठोयुक्तः ।

७ उत्तरार्चिकस्य ८,१,९,१ । ४

I इन्द्राण्याः साम ।

(३)—ओजसइति षष्ठ्यन्तं व्याख्यातं विवरणकृता । तथाच—'ओजसः' परकीयस्य बलस्य 'सहसः' अभिभावुकात् 'बलात्' 'अभिजातः'-इति वि० ।

(४)—'इदिति पाद-पूरणः'-इति वि० ।

अथ अष्टमी।

१ २ ३ २उ ३ १र २र ३ २ ३ २ ३ २
यदिन्द्राहं यथा त्वमीशीय वस्व एक इत्।
३ २ ३ १ २
स्तोता मे गोसखा स्यात्॥ ८॥८

यत्" [श्रूयते हि—'इन्द्र इदं हविरजुषतावीवृधत महोज्यायो क्रतः'-इति] स इन्द्रः "यत्"(१) यस्मात् "भूमिम्" पृथिवीं (नि०१,१,१८) "व्यवर्तयत्" वृष्ट्यादि-प्रदानेन विशेषेण वर्त्त-मानामकरोत्। किङ्कुर्वन्? "दिवि" अन्तरिक्षे मेघम् "ओपशं" उपेत्य शयानं(२) "चक्राणः"(३) कुर्वन् [यद्वा आत्मनि समवेतो वीर्यविशेषः ओपशः, तमन्तरिक्षे कुर्वन्॥ ७॥ ७

हे "इन्द्र!" "यथा" "त्वम्" "एकइत्" एकएव केवलः "वस्वः"(१) वसुनः धनस्य ईशिषे, एवम् "अहम्" अपि "यद्" यदि "ईशीय" ऐश्वर्य्य-युक्तः स्याम्!! तदानीं "मे" मम

---

८ उत्तरार्च्चिकस्य ८,२,८,१। ५

(१)—'नपुंसकलिङ्गमिदं पुँल्लिङ्ग-स्थाने द्रष्टव्यम्। 'यः' 'भूमिम्' 'पृथिवीम्' 'व्यवर्त्तयत्' विवर्त्तयति विवर्त्तितवान् वा अन्यरूपां करोतीत्यर्थः'-इति वि०।

(२)—'गर्जित-लक्षणं शब्दं कुर्वन्'-इति वि०।

(३)—"लिटः कानज्वा (३,२,१०६)"।

(१)—व्यत्ययेन पुंल्लिङ्गः (३,४,८८), "जसादिषु छन्दसि वा वचनम् (७,३,९०)"-इति कात्यायन-वचनात् गुणाभावश्च।

I यदिन्द्राहं यथौ। हौहोवाहाइ। तुवाम्। ई-
शीयवस्वऔ२। ऊवाइ। ऊवाये। काई२त्। स्तोता
येगोसखौ२। ऊवाइ। ऊवाये। सायार२३त्। हो-
२वा२३४औहोवा। अग्निराऊता२३४५ः॥ १८॥

II आऔहोवाहाइ। यदिन्द्राहाम्। यथा। त्वम्।
ऐहोयैहो१। आइशीयवस्वआइकइत्। ऐहोयैहो१।
आ२इ। स्तोता२माइगो२। सखा२३। सा२या२३-
४औहोवा। शुक्रआऊता२३४५ः॥ १९॥८

"स्तोता" "गोसखा स्यात्" गोभिः सहितो भवेत् [ईश्वरस्य तव स्तोता कुतो हेतोर्गो-सहितो न भवेत्? अपितु भवेदेवेत्यभि-प्रायः॥ ८॥ ८

---

I, गोषूक्तम्।

II अश्वसूक्तम्।

अथ नवमी।

मेधातिथिराङ्गिरस ऋषिः।

१२ ३ १२ ३ १ २ ३ १२
पन्यं पन्यमित्सोतार आ धावत मद्याय।

१ २ ३२ ३ १ २
सोमं वीराय शूराय ॥ ८ ॥ ९

४५ ४ ५र ५ १ २ २
I पन्यम्पन्यमित्। सोताइराः। पन्यम्पन्यमित्सो२ता

२ १ २र ३ २३४५ १ २र १
३राः। आ। धावत। मदियाया। सोमं वी। रा२३।

३ २ ४
यशूरा५याइ५६ ॥ २० ॥ ९

हे "सोतारः" अभिषोतारोऽध्वर्यवः! "मद्याय" मादयितव्याय "वीराय" विक्रान्ताय "शूराय" शौर्यवते इन्द्राय "पन्यम् पन्यम्(१) इत्" सर्वत्र स्तुत्यमेव "सोमम्" "आ धावत" अभि गमयत प्रयच्छतेत्यर्थः(२) ॥ ८ ॥ ९

---

९ उत्तरार्च्चिकस्य ८,२,१,१। ६

I गौरीवीतम्।

(१)—'पनति स्तुत्यर्थः (नि० ३,१४,१६)। 'क्रियासमभिहारे च (८,१,१२)'-इति कात्यायनवचनाद् द्विर्वचनम्।

(२)—'नयतेत्यर्थः'-इति वि०।

अथ दशमी।

काण्वः प्रियमेधऋषिः*।

२ १ २ २ २उ ३ २ ३ १ २ २ १ २
इदं वसो सुतमन्धः पिबा सु पूर्णमुदरम्।

१ २ ३ १ २
अनाभयिन् ररिमा ते॥ १०॥ १०

५ २ १ ० २ १ २र २ २
I इदंवसाउ। सुतमा२३धाः। पिबा२सुपू। र्ण-

१ २ ३ २ ३ २ ४ ५ ४
मुदा२३रा३४म्। अना३४भया३इन्। ररोवा। मा-

५
पुतोई३डा॥ २१॥

हे "वसो" वासयितः! (१) इन्द्र! "इदम्" पुरोवर्त्तमानं 'सुतम्" अभिषुतम् "अन्धः" अन्नम्(२) सोमलक्षणम् "पिबा"(३), यथा "उदरम्" त्वदीयं जठरं "सु पूर्णम्" अतिशयेन सम्पूर्णम् भवति तथेत्यर्थः। हे "अनाभयिन्!" [आ समन्ताद् बिभेत्याभयी, बिभेतेरौणादिक इनिः, न आभयी अनाभयी तादृश!] हे इन्द्र!

* 'मेधातिथेरार्षम्'-इति वि०।

१० उत्तरार्चिकस्य १,२,८,१।७

(१)—'प्रशस्तधनवन्' इति वि०।

(२)—अन्धइति अन्ननामसु प्रथमम् नि० २,७।

(३)—'द्व्यचोतः (६,३,१३५)'-इति दीर्घः।

५ ४ ० २ १ २ ४ ५ २ १ २ २ १ २
II इदा३वसोसुतमन्धाः। पिवाह्व२३पू३। णमू२दा-

५ १ २ १ ७ २
२३४राम्। आ२३ना। भा२याइन्। ररा२३। हाउ-

१२ ३ १ १ १ १
वा३। माते२३४५॥ २२॥

५ २ ५ २ २ ५ २ १ ७ २२
III इदंवसोसुतमन्धाइए। पिवासुपूर्णामुदरौ। हो-

२ १२ २ ७ २२ २ ५ २ २
३वा। पिवासुपूर्णामुदरौ। हो३वा। आनाभा३यीन्।

१ २२ १ २ ४ ५ ४
ररीमाता। औ३होवा। होपूइ। डा॥ २३॥ १०

॥ इति तृतीय-दशति॥

"ते" तुभ्यं त्वदर्थं "ररिमा"(४) उक्तगुणं सोमं दद्मः [रा दाने, छान्दसो लिट् (५)॥ १०॥ १०

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने द्वितीयाध्यायस्य प्रथमः खण्डः॥ १॥

---

I,II,III गाराणि ।

(४)—'तिङि:(६,१,१३५)'-इति योगभागाद् दीर्घः ।

(५)—'छन्दसि लिट्' ३, २, १०५ ।

अथ द्वितीये खण्डे—

सेयं प्रथमा।

द्वयोः सुतकक्षः श्रुतकक्षो वा ऋषिः।

२उ　३ २　३ १ २　३१र २र
उद्घेदभि श्रुतामघं वृषभन्नर्यापसम्।
१ २
अस्तारमेषि सूर्य॥ १ ॥ ११

४ र ४ ५　१२ ३　५　२१ २ १
I उद्घेदभ्योवा। श्रुतामा२३४घाम्। वृषाभन्ना।
७ ३ ५　१　२ १ २र　१
रियार्पा२३४साम्। आ२स्ता। रा२३मे। षाइस्रिया।
२ ४ ५　४
औ३होवा। हो५इ। डा॥ २४॥

अस्मिन् तृचे सूर्यरूपेणेन्द्रस्य स्तुतिः क्रियते——'असौ वा आदित्य इन्द्रः'-इति हारिद्रविकम्। हे "सूर्य!" [(१)द्वादशसु भानुषु इन्द्रोऽपि सूर्यात्मना पठितः, तस्मात्] सूर्यात्मक,

---

११ उत्तरार्चिकस्य ६,३,४,१।८

I,II सौपर्णे शकप्रवेतसे वा।

(१)—ननु 'वायुर्वेन्द्रो वा अन्तरिक्ष-स्थानः सूर्यो द्युस्थः (७,२,१)'-इति नैरुक्त-सिद्धान्ते कथमिन्द्रसूर्ययोरैकात्म्यमिति शङ्कां निराकुर्वन्नाह—द्वादशस्वित्यादि। आदित्याश्च द्वादश, तत्र मानम्—'अष्टौ वसवः, एकादश रुद्राः, द्वादश आदित्याः-इत्यादि ताण्ड्य'-ब्राह्मणादिकम् २,१,२।

५र र ५ ४ ३ ४ ५ १
II उद्वेदभिश्रुतामाईघाम्। वृषभन्नर्या। ऊम्।
२ ५ १ २ २ र १ २ १ ५
पार२३४साम्। आस्ता३उवा। रामाइ। पिब्द२३४वा।
४ ५
रा५योईहाइ॥ २५॥

४ र ५ ४ ५ ४र५ ४ ५ ४ ५ ४ ३ ४५र
III उद्घेदभिश्रुतामघम्। इयइयाहाइ। वृषभन्नर्या।
२ २ १ ५ १ २ २ १ २
हा३हा३इ। पार३४साम्। आस्ता३उवा३। रा२मा
५र र २र ३ १ १ १ १
२३४औहोवा। पिबरिया२३४५॥ २६॥ ११

सुवीर्य्य, हे इन्द्र! "श्रुतामघम्"(२) सर्व्वदा देयत्वेन विख्यात-धनम्, अतएव "वृषभम्" याचमानानां धन-वर्षितारं "नर्य्यापसम्" [नर-हितं नर्य्यम्] नर-हित-कर्म्माणम् "अस्तारं"(३) दानशौण्डम् औदार्य्यवन्तं एतादृशम् "उदेषि" अभितउदेषि। "इदम्" अवधारणे, त्वमेव तस्य यज्ञे सूर्य्यात्मना उद्गतोऽसि। "घ"-इति प्रसिद्धौ(४)॥ १॥११

---

III विलम्बसौपर्णं शक्रप्रवेतस वा।

(२)—"घचोऽतः (६,१,१२५)"-इति योगभागाद् दीर्घः।

(३)—'अस्तारं, क्षेप्तारं, शत्रूणाम्'-इति वि०।

(४)—'वा', 'इत्' द्वावपि पादपूरणौ'-इति वि०।

अथ द्वितीया ।

२ ३ १र २र ३ १ २ ३ १ २
यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य ।
३ १ २ ३ १२
सर्वन्तदिन्द्र ते वशे ॥ २ ॥ १२

४ ४ २ १ र २ १र २
I यदद्यका५च्चवृत्रहान् । उदगाअभिहरा२३या ।
१ १ २ १ २ १ २ ५
सार्वा२म् । तादिन्द्रतायेर । ऊम् । वा३४५ शोई डा
इ ॥ २७ ॥ १२

अत्र शौनकः(१)—

"यदद्यकच्चेत्युदिते रवौ स्तुत्वा पुरन्दरम् ।
शत्रूनपाहते क्षिप्रं वश्यं वा कुरुते जगत्"-इति(२) ॥

हे "वृत्रहन्" वृत्रस्य अपामावरकस्य मेघस्य हन्तः ! (३) हे

---

I शाकलम् ।

(१)—आथर्वणशाखाप्रवर्त्तकः शौनकः, स्मृतिकारोऽप्यस्ति, शौनकः; स एव स इत्यत्रास्ति संशयः; इह तु कथ्यमानमिदं स्मृतिवचनम् ।

(२)—विहितमेतत् सामविधानब्राह्मणे तथाहि—"उदिते यदद्यकच्च इत्यवहन्नित्या-कालं स्वस्त्ययनम्"-इति सा० ब्रा० १प्र० ४ख० ।

(३—वृत्र इति निघण्टौ प्रथम-दशमे मेघ-नामसु अष्टाविंशतितमम् । 'वृत्रः' वृणोतेराच्छादनार्थात् 'स्फायि-तञ्चि-वञ्चि-शकि-क्षिपि-क्षुदि-सृपि-तृपि-दृपि-वन्दि-उन्दि-श्विति-वृत्यजि-नीपदि-मदि-मुदि-खिदि-छिदि-भिदि-मन्दि-चन्दि-दहि-दसि-दम्भि-वसि-वाशि-शीङ्-हसि-सिधि-शुभिभ्यो रक्' इति ...

अथ तृतीया।

भरद्वाजऋषिः।

१र २र ३ २उ ३ १ २ ३ २ ३ १ २
य आ नयत्परावतः सुनीती तुर्वशं यदुम्।
३ २ ३ २३ १ २
इन्द्रः स नो युवा सखा॥ ३॥ १३

"सूर्य्य" सूर्य्यात्मकेन्द्र! (२) "अद्य" अस्मिन् दिने(३) "यत् कच्च" यत् किञ्चित् पदार्थजातम् "अभि" अभिमुखीकृत्य "उदगाः" [इण् गतौ उत्पूर्व्वः, तस्य लुङि गादेशः] उदयं प्राप्तवानसि "तत् सर्व्वं" पदार्थजातं "ते" तव "वशे" वशवर्त्ति स्वायत्त-मस्ति॥ २॥ १२

"यः" इन्द्रः "तुर्वशं यदु" च एतत्संज्ञौ राजानौ शत्रुभिः

---

आच्छादयति ह्यसौ कृत्स्नं नभः। वर्त्ततेर्वा गति-कर्म्मणः, 'स्फायि-तञ्चि'-इत्यादिना रक् प्रत्ययः; गच्छत्यसौ कृत्स्नं नभः। वर्द्धतेर्वा वृद्ध्यर्थात्, बाहुलकात् इति धकारस्य तकारः वर्द्धते हि वर्षासु मेघः। ब्राह्मणोक्ता एवामी वचोऽप्यर्थाः'-इति देवराजयज्वा। 'अथास्य कर्म—रसानुप्रदानं, वृत्र-बधः'-इति नै० ७,३,२। 'वृत्र-बधो मेघ-बधः'-इति तद्भाष्यम्।

(२)—विवरण-मते सूर्य-इति 'सुपां सुलुगित्यादिना (७,१,३९) सोर्लुकि रूपम्। हे 'वृत्रहन्' इन्द्रः! 'अद्य' 'यत्' 'कच्च' किञ्चित् 'अभि' अभिलक्ष्य 'सूर्य' सूर्यः उद्गाः उद्गच्छति प्रकाशयति 'तत्' 'सर्वम्' 'ते' तव 'वशे' वर्त्तत इति-शेषः—इत्यर्थो वि०-सम्मतः।

(३)—'अद्य-ग्रहणं चात्र प्रदर्शनार्थम्, सर्वकालमित्यर्थः'-इति वि०।

४ ५ १ १ २
I यच्चाहाउ । आनाया २त् । आनाया२३त् । पारा२-

३ ५ १ र १ र १ ३
वा२३४ताः । सूनीतीतू २ । सूनीतीतू२३ । वाशंया२३४-

५ १ १ १ ३ ५र
दूम् । इन्द्रःसाना २ः । इन्द्रःसाना२३ः । यू२वा२३४औ-

र ३ ५
होवा । सा२३४खा ॥ २८ ॥

४ र ५ ४ ५ र ५ १ र र २ ० २
II यच्चानयत् । परावाइताः । सुनीतीतुर्वशा१या

२ १ र २ २ २ ३ ५ २
३दूम् । इन्द्रःसनोयुवा१सा३खा । इन्द्रो२३४वाइ । इ-

१ २ ५ १ २र १ ३
न्द्राऔ३होर२३४ । वाइ । आइन्द्रोश्च । वा२ । या२३४

५र र ३ ५
औहोवा । ई२३४न्द्राः ॥ २९ ॥ १३

दूरदेशे प्रक्षिप्तौ “सूनीती”(१) सुनीत्या शोभनेन नयनेन “परावत.” तस्माद् दूरदेशात्(२) “आनयत्” आनीतवान् “युवा” तरुणः “सः इन्द्रः” “नः” अस्माकं “सखा” भवतु ॥ ३ ॥१३

---

I,II आभरद्वसवे ।

(१)—‘सुपां सुलुगित्यादिना (७,१,३९) पूर्वसवर्णदीर्घः ।

(२)—‘परावतः’-इति निघण्टु-तृतीय-सप्तविंशतमे दूर-नामसु पञ्चमम् ।

अथ चतुर्थी।

श्रुतकक्षऋषिः।

१ २ ३ २ २ ३ १ २ ३ १र २र
मा न इन्द्राभ्या३दिशः सूरो अक्तुष्वायमत् *।
३१ २ ३ २
त्वायुजा वनेम तत् ॥ ४ ॥ १४

५र र र ४ ५ १ र २ १र
I मानइंद्राभियादाइशाः। सूरोअक्तु। ष्वाया-
२ ३२ ३२ १ २ १
२३मा३४त्। तुवा३४युजा। वनाइमा२३ता३४३त्। ओ
२३४५इ। डा ॥ ३० ॥

हे "इन्द्र!" "आदिशः" आदेष्टा समन्तादायुधान्यति-सृजन् "सूरः" [सृ गतौ (भ्वा०प०] सर्व्वत्र सरणशीलः राक्षसः "अक्तुषु" रात्रिषु(१) "नः" अस्माकम्? "अभ्यायमत्" आ आभि-मुख्येन "मा" नियन्ताऽऽगन्ता भवतु। यद्यागन्ता चेत् तदा

* "यमत"-इति मु० ख० पुस्तकयोः पाठः।

(२)—अक्तुः इति निघण्टु-प्रथम-नवमे रात्रि-नामसु चतुर्थम्। 'रात्रि-ग्रहणञ्चात्र प्रदर्शनार्थम् सर्वकालमित्यर्थः'-इति वि०।

अथ पञ्चमी।

अस्याः परस्याश्च मधुच्छन्दा ऋषिः।

१ २ ३ २ ३ २ ३ १ २ ३ १ २
एन्द्र सानसिꣳ रयिꣳ सजित्वानꣳ सदा सहम्।

१ २ ३ १ २
वर्षिष्ठमूतये भर * ॥ ५ ॥१५

५र ४ २ ४र ५र २ ३ ५
II मानाꣳआꣳइन्द्राभियादिशाः। सरोआ२३४क्तू।
२ ३ ५ १र र ऽ २ १
षूआया२३४मात्। त्वायुजावनौ३हो। मतौ२। ऊ
ऽ २ १ १११११
वाइ। औ३हो२३४५वा६५६। ए३। ययू२३४५ः॥१३॥१४*

"तत्" रक्षः "त्वायुजा" त्वत्सहायेन वयं "वनेम" हन्याम [ब्रथ क्रथ हिंसार्थाः, वन चेत्यत्र (भ्वा०प०) पठितत्वाद्धिंसार्थः॥

'आयमत्'-'आयमन्'-इति च पाठौ॥ ४ ॥१४

---

* "भरा"-इति मु० भा० पुस्तकयोः पाठः।

---

I,II तान्वि इमे।

---

* इति ग्रामे गेय-गाने तृतीयः प्रपाठकः॥

४र५ ४ २ १- र
I ओम्। एन्द्रसा। नसिंरयिम्। सजित्वानं-
२ १र २ १ २ १ र २ २
सदासा२३हाम्। वा२३र्षा। ष्ठामूतया३१उवाये३।
५
भा२३४रा ॥ १ ॥

४र५ र ४ २ १ र २ १र
II एन्द्रसानसाइम। रया२इम्। सजित्वानंसदा-
२ १ १ २ १ ५ ४
सा२३हाम्। वार्षो२ष्ठामू२३। तयो२३४वा। भा५रो
५
६हाइ ॥ २ ॥ १५

हे "इन्द्र!" "ऊतये" अस्मद्रक्षार्थम्(१) "रयिम्" धनम् "आ-भरा"(२) आहर, कीदृशं रयिम् ? "सानसिम्"(३) सम्भजनीयम् "सजित्वानम्" समान-शत्रु-जय-शीलम्(४) [धनेन हि शूरान् भृत्यान् सम्पाद्य शत्रवो जीयन्ते] "सदासहम्" सर्व्वदा शत्रूणामभिभवन-हेतुम् "वर्षिष्ठम्" अतिशयेन वृद्धम् प्रभूत-मित्यर्थः ॥ ५ ॥ १५

---

I,II इन्द्रो विश्वामित्रो वा ऋषिः; रौहिकुलीयं नाम।

(१)—'ऊतये, तर्पणाय'-इति वि०।

(२)—भरा इति "द्व्यचोतस्तिङः (६,३,१३५)"-इत्यन्तदीर्घः।

(३)—वन-षण सम्भक्तौ (भ्वा०प०) इत्यस्येदं रूपम्।

(४)—'सहभतानां शत्रूणां जेतृ'-इति वि०।

अथ षष्ठी।

१२ ३१२ ३२उ ३१२
इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे।

१२ ३१२ ३१२
युजं वृत्रेषु वज्रिणम्॥ ६॥ १६

१ ० १ ०र
I इन्द्राम्। इन्द्रंवाया२म्। महा। महाधाना२इ।

१ ० १ ०र १
इन्द्राम्। इन्द्रमर्भा२इ। हवा। हवामाहा२इ। युजाम्।

० १ ० १
युजं वृत्रा२इ। षुवा। षुवज्रिणा२३४३म्। ओ२३४५इ।
डा॥ ३॥

१ ०र १ २ २ १र
II महा। महाधाना२३इ। आ औ३हो। इह।

"वयम्" अनुष्ठातारः "महाधने"(१) प्रभूत-धन-निमित्तम्(२) "इन्द्रम्" "हवामहे"(३) आह्वयामः, "अर्भे" अर्भके स्वल्पे-

---

I,II इन्द्राख्याः सामनी।

(१)—'महति सङ्ग्रामे'-इति वि०। 'महाधने-इति' निघण्टु-तृतीय-षोडशे सङ्ग्राम-नामसु उनचत्वारिंशत्तमम् पदम्।

(२)—निमित्त सप्तम्यर्थः, धर्म्मेण द्विपिनमितिवदित्याशयः।

(३)—ह्वः सम्प्रसारणे (६,१,३४) रूपम्।

अथ सप्तमी।

त्रिशोकऋषिः।

१ २ ३१२ ३१ २र ३१२
अपिवत् कद्रुवः सुतमिन्द्रः सहस्रबाह्वे।
१२ ३१ २
तत्रादद्दिष्ट पौंस्यम्॥ ७॥ १७

१ २ ३ ५ १ ७ र
इहिवाला। ओ२३४वा। इन्द्रमर्भाइ। हवा। हवामा-
१ २ २ १२ १ २ ३
हा२३इ। आ औ२हो। इह। इहिवाला। ओ२३-
५ १ ७ १ २
४वा। युजंवृत्राइ। षुवा। षुवज्रिणा२३म्। आ औ
२ १२ १ २ ३ ५ ३ ५
३हो। इह। इहिवाला। ओ२३४वा। ई२३४हा॥४॥ १६

ऽपि धने निमित्त-भूते सति(४) इन्द्रं हवामहे। कीदृशम् इन्द्रम्? "युजं"(५) सहकारिणं [समाहितं वा] "वृत्रेषु" शत्रुषु धन-लाभ-विरोधिषु प्राप्तेषु तन्निवारणाय "वज्रिणं" वज्रोपेतम् [महा-धन-शब्दो यद्यपि सङ्ग्राम-वाची तथापि महद्धनमत्र विवक्षितम्(६)॥ ६॥ १६

(४)—'अर्भकः'-इति निघण्टु-तृतीय-द्वितीये दशमम्।

(५)—'युज्यते इति युक् सहायः तम् इत्यर्थः'-इति वि०।

(६)—इह विनिगमकं चिन्त्यम्।

५ २ ५ १ १
I अपिबत्काद्रूइवःसुताम् । इन्द्राहो२इ । सहाहो२ ।
१ २ १र २ १
स्रावा१ऊवे२ । तत्राहा२३दी । ष्टपौ२ । हो२ । ऊवा
ऽ २ १ ४ ५ ४
२इ । ई३या । सियाम् । औ२३होवा । हो५इ ।
डा ॥ ५ ॥ १७

"इन्द्रः" "काद्रुवः" कद्रुनामकस्य ऋषेः सम्बधिनं(१) "सुतम्" अभिषुतं सोमम् "अपिबत्" पीतवान् "सहस्रबाह्वे" सहस्रबाह्वाख्यं शत्रुम्(२) अहन्निति शेषः । "तत्र" तस्मिन्नवसरे(३) "पौंस्यम्" इन्द्रस्य वीर्यम् "आ ददिष्ट" आ दीप्यत(४) ॥

'तत्राददिष्ट'-इति छन्दोगाः, 'अत्राददिष्ट'-इति बह्वृचाः ॥ ७ ॥ १७

---

I इन्द्रऋषिः, सहस्रबाहवीयम् ।

(१)—तन्वादित्वात् रूपम् । 'कद्रु र्नाम कश्यपस्य भार्या, तस्याः स्वभूतम्'-इति वि० ।

(२)—सहस्रमिति बहुनाम (नि० ३,१,११) बाहुशब्देनापि अवयवेन समुदायस्य सम्बन्धात् कर्त्ता उच्यते। सहस्रं बहवः कर्त्तारो यत्र तत् सहस्रबाहु सत्रं, तस्मिन् पीतवान् इत्यर्थः'-इति वि० ।

(३)—'तत्र सत्रे'-इति वि० ।

(४)—'अत्यर्थं दृश्यते वर्ण्यत इत्यर्थः ; केन ? सामर्थ्यान्मन्त्रैः'-इति वि० ।

अथ अष्टमी ।

वसिष्ठऋषिः ।

२१ ३ २३ १र २र
वयमिन्द्र त्वायवोभि प्र नोनुमो वृषन् ।
३ २ ३१ २
विद्धी त्वा३स्य नो वसो ॥८॥ १८

२१ ५ १ १ २ ५र र
I वयमा२३४इन्द्रा । त्वा२३ । या२वा२३४औहोवा ।
२ १ ३र र २ २ १ २ ५र
अभिप्रनो२नुमोवृषन् । विद्धा२इतुवा३ । स्या२ना२३४औ
र ३ ५
होवा । वा२३४सो ॥ ६ ॥

५र १ १ र
II हाउवयमिन्द्रा । त्वा२यावा२ः । अभिप्रनोनुमो२-
१ १ १ १ २
वार्षा२न् । विद्धा२इतूवा२ । स्यनो२३ । वा२सा२३४
५र र २ १ २र १ २ ३ १ १ १ १
औहोवा । अस्मभ्यङ्गातुवित्तमा२३४५म् ॥ ७ ॥

५ १ २ ३ १ र २ २
III वयमिन्द्रा । त्वाया३वाः । अभिप्रनोनुमो१वा३-

---

I वृषतो मारुतस्य साम ।

II भारद्वाजऋषिः, अदारसृत् ।

III वृषऋषिः, अदारसृत् ।

र्षान् । विद्मोह२३४वा । उ२३४हाइ । स्यनोवा५सो६
हाइ ॥ ८ ॥

IV वयामौहो । इन्द्रा । त्वाया३वाः । अभिप्रनो-
नुमो१वा३र्षान् । विद्मोत्वो२३४हाइ । स्यानो३हाइ ।
वसा । औ३होवा । हो५इ । डा ॥ ९ ॥

V वयामौहोवाहाइ । इन्द्रा । त्वाऔहोवाहाइ ।
यावाः । आ२३भो । प्रा२३नो । ओइनुमोवा२३र्षान् ।
वा२३इद्मो । तू२३वा३ । स्या२ना२३४औहोवा । वा
२३४सो ॥ १० ॥ १८

हे "वृषन्" कामानां वर्षितः ! "इन्द्र !" "त्वायवः" (१) त्वत्कामाः "वयं" वासिष्ठाः त्वाम् "अभि प्र णोनुमः"(२) प्रकर्षेण स्तुमः । हे "वसो" वासयितः इन्द्र ! "अस्य"(३) इदम् "नः"

---

IV,V मारुतस्य भरद्वाजस्य इमे अदारसृती ।

(१)—त्वां यष्टुमिच्छन्तइति विग्रहे, क्यचि, "नच्छन्दस्यपुत्रस्य (७,४,३५)-इतीत्वाभावे, "याच्छन्दसि (३,२,१७०)"-इति उ-प्रत्यये रूपम् ।

(२)—'अभि प्रणोनुमः, अभि प्रेति द्वावपि पाद-पूरणौ, अत्यर्थं स्तुमः"-इति वि० ।

(३)—'अस्य सुतस्य'-इति वि० ।

अथ नवमी ।

द्वयोस्त्रिशोकऋषिः ।

२ ३ २ ३२ ३ १२ ३१ २ ३ १२ ३२
आ घा ये अग्निमिन्धते स्तृणन्ति* बर्हिरानुषक् ।
३ २ ३ २३ १२
येषामिन्द्रो युवा सखा ॥ ९ ॥ १९

अस्मदीयं स्तोत्रं "नु" क्षिप्रं(४) "विद्धी"(५) अवधारय ॥ ८ ॥ १८

"ये" ऋषयः "आ घा"(१) आभिमुख्येन खलु "अग्निम्" "इन्धते" दीपयन्ति "येषां" च "युवा" नित्य-तरुणः "इन्द्रः" "सखा" भवति(२) ते "आनुषक्" आनुपूर्व्येण(३) "बर्हिः" "स्तृणन्ति" ॥ ९ ॥ १९

---

* "स्तिणन्ति"-इति ख० ग० पुस्तकयोः पाठः ।
"स्तृणन्ति"-इति ए० पाठः ।

---

१९ उत्तरार्चिकस्य ५,२,२१,१ । ९

(४)—क्षिप्रमिति निरुक्त-द्वितीय-पञ्चदशे प्रथमम् । 'नु इति पादपूरणः'-इति वि० ।

(५)—"द्व्यचोतस्तिङः (६,३,१३५)"-इति दीर्घः ।

(१)—'घा'-इति "निपातस्य च (६,३,१३६)"-इति दीर्घः । 'आ इत्येषमर्यादायाम् घ-इति पाद-पूरणः'-इति वि० ।

(२)—'स्तुत्य-स्तोतृ-लक्षणेन सम्बन्धेन सखिभूतः, स्तुत-स्तुत्यइत्यर्थः'-इति वि० ।

(३)—'आनुषगिति नामानुपूर्व्यस्य'-इत्यादि नैरुक्तम् ६,३,१६ ।

५र　र　४ ५　२ १　र
I आघाये अग्निमिन्धाताइ । स्तृणन्तिबर्हिरानुषाक् ।
२र१र　र　र　१　५　४
येषामिन्द्रोयवाइहा । ऊवाइ । ऊवो२३४ । वा । सा५
५
खो६हाइ ॥ ११ ॥

५र र ४　२ १　२ २ ५
II आघायइहा । ग्निमाइ । धाताओ२३४वा ।
२ ५ १　१ २ २　२ ५
ई२३४हा । स्तृणन्तिबर्ही३रा । नूषाओ२३४वा । ई२३४हा ।
२र १　२ २　५　२　५　१　०
येषाम् । आइन्द्राओ२३४वा । ई३३४हा । युवा । युवार-
२　२ ५
सा२३४५खाई५६ । ई२३४हा ॥ १२ ॥

५र र र र　५　२ १　२　२र
III औहोआघाया६ए । ग्निमाइन्धाता । औहो३३४
५　२　१ २　२र　५　२र १
वा । स्तृणन्तिबर्ही३रानूषा । औहो२२४वा । येषामा
२　२र　५　२ २　१　५
इन्द्रा । औहो२३४वा । युवा३ । सा२३४खा । उक्ववा
५
६हाउ । वा ॥ १३ ॥ १९

I,II,III ऐध्मवाहानि ऐध्महाराणि वा ।

अथ दशमी।

२ २उ ३ १ २ ३ २ ३ १ २ ३ २ ३ १२ ३१२
भिन्धि विश्वा अप द्विषः परिबाधो जही* मृधः।
१ २ ३ १२ ३१२
वसु स्पार्हन्तदा भर॥ १०॥ २०

५ ४ १ २ २
I भि। ध्योहाइ। वाइश्वाअपा। द्वाइषाओ२३४
५ १ २ ३ ५ १२ २ २ ३ २
वा। पाराओ२३४वा। बाधोजहाइ। मार्द्धाओ२३४वा।
१ २ २ १ २ २ ३ १ १ १ १
वसुस्पार्हन्तदाभरा२३४५॥ १४॥ २०

॥ इति चतुर्थ-दशति॥

हे "इन्द्र!" "विश्वाः" सर्व्वाः "द्विषः" द्वेष्ट्रीः शत्रु-सेनाः "अप(१) भिन्धि" विदारय "बाधः" हिंसित्रीः "मृधः" सङ्ग्रामान्

---

* "जहि"-इति क-पाठः।

---

I अहेः पैङ्गस्य सामाहिषो वा पैङ्गस्य पैल्वस्य वा।

२० उत्तरार्चिकस्य ४,१,९,१। १०

(१)—'अप उपसर्गश्रुतेः क्रियापदमध्याह्रियते, अपेत्य अस्मत्तः अपनीयेत्यर्थः'-इति वि०।

[‘स्पृधः’, ‘मृधः’—इति सङ्ग्राम-नामसु पठितत्वात्(१)]. “परि जह्रे”(२) हिंस्याः । ततः तासां “स्पार्हं” स्पृहणीयं “तत्” प्रसिद्धं “वसु” “आ भर” अस्मभ्यम् आ हर ॥ १० ॥ २०

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने द्वितीयाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

---

अथ तृतीय-खण्डे—

सेयं प्रथमा ।

कण्वोघौरऋषिः ।

२ १ २　　३ २ ३ १ २ ३ १र २र
इहेव शृण्व एषां कशा हस्तेषु यद्वदान् ।
१र २र ३ १ २
नियामञ्चित्रमृञ्जते ॥ १ ॥ २१

---

(१)—निघण्टौ द्वितीय-सप्तदशे ‘स्पृधः’-इति ऊनविंशतितमं पदम्, तत्परस्ताच्च मृधइति ।

(२)—ह्वाचोत इति (६,१,१३५) दीर्घः ।

अथ द्वितीया ।

द्वयोस्त्रिशोकऋषिः ।

२ १ २ ३ १ २ ३ १ २ ३ १ २
इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः ।
३ १ २ ३ १ २ ३ २
पुष्टावन्तो यथा पशुम् ॥ २ ॥ २२

२ १र ४ ५र १ र र २ २ २
I इहेवा२३श्टण्वएषाम् । कशाहस्तेषुया१दा३दान् ।
र ४ २ २ ५ ३ १र २ १ ० २
नियामञ्चा३त्रा३म्टञ्जताइ । नियामञ्चाइ । त्रमा२ञ्जा-
५ ३र २ ३र ४र ५ २र १र २र
२३४ताइ । एहिया३४औहोवा । एहियौहोइ । एहि-
१र ५
यौहो२३इ । ए२३४हो ॥ १५ ॥ २१

"एषां" मरुतां "हस्तेषु" स्थिताः "कशाः" स्व-स्व-वाहन-ताडन-हेतवः "यद् वदान्"(१) यद् वदन्ति ध्वनिं कुर्व्वन्ति, तं ध्वनिम् "इहेव" अत्रैव स्थित्वा "शृण्वे"(२) शृणोमि । स ध्वनिविशेषः "यामम्"(३) सङ्ग्रामे "चित्रं" विविधं शौर्य्यं

I ऐषम् ।

(१)—'यत् यदा'-इति वि० । वदान्-इति लेटोरूपम् ।

(२)—शृण्वे इति वि० ।

(३)—'यान्ति येन स यामो रथः, तम्'-इति वि० ।

४ ३ ४ र ३ ४ ५ र २ ४ ५ १ र
I इमउत्वाविचक्षते। एइ। सखायाः। इन्द्रसोमा

२ १ २ १र २ १ २
२३इनाः। होइहोवा। पुष्टावा२३न्ताः। होइहोवा-

२ १ ५ ४ ५
३। यथो२३४वा। पा५श्शोइहाइ॥ १६॥ २२

"न्यृजते"(४) नितरामलङ्करोति ["ऋञ्जतिः प्रसाधन-कर्मा (६,४,२४)"-इति यास्कः(५)॥ १॥ २१

हे "इन्द्र!" "त्वा" त्वां "सोमिनः" अभिषुत-सोमाः "सखायः इमे उ" खल्वस्मदीया जनाः "पुष्ठावन्तः"(१) सम्भृत-पाशाः "यथा पशुम्" पशुमिव "वि चक्षते" वि पश्यन्ति(२)॥ २॥ २२

---

I पौषम्।

(४)—'नि ऋञ्जते, नियमेन गमयति'-इति वि०।

(५)—यदा एषां हस्तेषु कशाः वदन्ति, यदा च एषां चित्रं रथं सारथयो नियमेन गमयन्ति, तदा स शब्दः इहैव स्थिता श्रूयते—इति विवरण-निष्पन्नोऽर्थः।

(१)—मतौ दीर्घः। 'पोषणं पुष्टम्, तद्वन्तः पुष्टावन्तः, पोषणवन्त इत्यर्थः।

(२)—'एतदुक्तम् भवति—घासहारिणो घासेन गृहीतेन पशोस्तर्पणाय परमया प्रीत्या युक्तास्तमेव पशुं पश्यन्ति, तद्वदस्मदीया ऋत्विजः सोमवन्तः तेनैव सोमेन गृहीतेन तर्पणार्थं त्वां पश्यन्तीत्यर्थः'-इति वि०।

अथ तृतीया।

वत्सः काण्वऋषिः।

१ २ ३ २ ३ २ ३ १ २ ३ १ २
समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः।
३ १ २ ३ १ २
समुद्रायेव सिन्धवः॥ ३॥ २३

१ २ १र २ २
I समस्यामा२। न्यावेविशाः। विश्वानामा२। ता-
१ १ २ १
कृष्टयाः। समुद्राये२। वसिन्धा२३वा३४३ः। ओ२३-
४५इ। डा॥ १७॥ २३

"विशः" निविशन्त्यः(१) "विश्वाः" सर्व्वाः "कृष्टयः" प्रजाः "अस्य" इन्द्रस्य "मन्यवे" क्रोधाय [यद्वा मन्युर्मनन-साधनं स्तोत्रं तदर्थम्] "सं नमन्त" सम्यक् स्वत एव नमन्ति प्रह्वीभवन्ति। तत्र दृष्टान्तः—"समुद्राय इव" यथा समुद्रम् अब्धिम् प्रति "सिन्धवः" स्यन्दन-शीला नद्यः स्वयमेव नमन्ति तद्वत्॥ ३॥२३

---

I मरुतां संवेशीयम्, सिन्धुषाम वा।

(१)—'यद्यपि विशइति मनुष्य-नाम (नि०) तथापि कृष्टय इत्यनेन पौनरुक्त्य-प्रसङ्गात् क्रिया-निमित्तं द्रष्टव्यम्। विष्लृ व्याप्तौ (धा०उ०) इत्यस्येदं रूपम्, स्तुतिभिर्हविर्भिश्च व्याप्ताः'-इति वि०।

अथ चतुर्थी ।

कुसीदी काण्वऋषिः ।

३ २ ३ १र २र३ १र २र ३ २
देवानामिदवो मद्दत्तदा वृणीमद्दे वयम् ।
१ २ ३ १ २ ३ १ २
वृष्णामस्मभ्यमूतये ॥ ४ ॥ २४

५र र र ३ २ ३ ५ १ २ ३ ५
I देवा। नाम्। इदाश्रो२३४वा। श्रोवाश्रो२३४वा।
३ ५ २ १र २ ३ ५ ३
मा२३४हात्। तदावृणाइ। माद्दाश्रो२३४वा। वा२-
५ २ १र २ ५ ३
३४याम्। वृष्णामस्मा। भ्यामाश्रो२३४वा। ता२३-
५
४ये ॥ १८ ॥

हे देवाः ! "देवानां" स्व-तेजसा सर्व्वतो दीप्यमानानाम् "इत्" एवार्थे(१) युष्माकमेव "महत्" व्याप्तं [मंहनीयं वा] "अवः" पालनं यद् विद्यते "तत्" "वृष्णां" कामानां वर्षितॄणां युष्माकं

---

I,II द्वाविंशते द्वे ।

(१)—'इदिति पादपूरणः'-इति वि० ।

५र २र र र र २१र २ १
II हाउदेवानामिदवोमहद्वाउ। तदावृणाइइ। मा-
२ ३ ५ २ १ २ २
हेवार२३४याम्। ऐ२हो१आ२२इहो। वृष्णामा३स्मा।
१ १ ३ ५र र २१ २११११
भ्यम्२३। ता२या२३४औहोवा। हविष्मते२३४५॥ १९॥
५रर र र र ४ ५ २१र
III देवानामिदवोहाउमाहात्। तदावृणाइ। महा
२ १ २ १
इवार३याम्। वृष्णा२९होइ। आ२३स्मा। भ्यम्-
१ ३ ५र र २ १२११११
२३। तारया२३४औहोवा। हविष्कृते२३४५॥ २०॥
५रर र र ४ ५ १ र२र १
IV देवानामिदवोमाहात्। तादावृणी। महाइवा२३
२ १र २ २ १ ५ ४
याम्। वृष्णामार३स्मा३। भ्यम्२३४वा। तापूयोई
५
हाइ॥ २१॥ २४

स्वभूतं तद्रक्षणं यजमानाः "वयम्" "आ वृणीमहे" समन्तात् सम्भजामहे(१)। किमर्थम्? "अस्मभ्यम्" "ऊतये" पूर्व्वमस्मभ्यमस्मदर्थमिति साधारणेनोक्तं तद् विशिनष्टि-ऊतयइति, अस्माकं पालनायेति॥ ४॥ २४

---

III,IV हाविष्कृते द्वे।

(१)—'आभिमुख्येन प्रार्थयामः'-इति वि०।

अथ पञ्चमी ।

मेधातिथिः ऋषिः ।

३ २ ३　१ २　३ १ २'
सोमानाꣳ स्वरणं कृणुहि ब्रह्मणस्पते ।
३ १ २ ३ १ २ ३ २
कक्षीवन्तं य औशिजः ॥ ५ ॥२५

५र २　४र　५　२ १ २ १　२　१　२
I सोमा३नाꣳस्वरणाम् । कृणूहि ब्र । ह्मणस्पताये-
२　३र २　१　२　२र
३ । औ३४ । हाहोइ । कक्षाइवा२३न्ताम् । यऔ-
२　३र १　५　४　५
होइ । औहोर३४वा । शापूइजो६हाइ ॥ २२ ॥ २५

हे "ब्रह्मणस्पते !" एतन्नामक देव !(१) त्वं "सोमानाम्" अभिषवस्य कर्त्तारं माम् अनुष्ठातारं "स्वरणं" देवेषु प्रकाशन-

---

२५ उत्तरार्च्चिकस्य ६,२,१०,२। ११
I काक्षीवतम् ।

(१)—ब्रह्मणस्पतिरिति निघण्टौ दैवतकाण्डे परिगणितो नोपलभ्यते, अपितु तत्र अन्तरीक्ष-स्थान-देवतासु वाय्वादिषु बृहस्पतिरिति । तस्यैव निर्वचनावसरे 'ब्रह्म-णस्पतिः' 'क्षेत्रस्यपतिः' 'वास्तोष्पतिः' 'वाचस्पतिः' 'वसोष्पतिः' एषामपि पञ्चानां सोदाहरणं निर्वचनं प्रदर्शितम्——'ब्रह्मणस्पतिर्ब्रह्मणःपाता पालयिता वा'-इत्यादि नै० १०,१,१२ । ब्रह्मणः मन्त्रस्येति तद्भाष्यकारः । 'षष्ठ्याः पति-पुत्र-पार-पद-पय-स्पोषेषु (८,३,५३)"–इति सत्वम् ।

वन्तम्(२) "कृणुहि"(३) कुरु। तत्र दृष्टान्तः—"कक्षीवन्तम्" एतन्नामकमृषिम् [इव-शब्दोऽत्राध्याहार्य्यः] कक्षीवान् यथा देवेषु प्रसिद्धः तद्वदित्यर्थः "यः" कक्षीवान् "औशिजः" उशिजः पुत्रः तमिवेति पूर्वत्र योजना॥ कक्षीवतोऽनुष्ठातृषु मुनिषु प्रसिद्धिस्तैत्तिरीयैराम्नायते—"एतं वै पर आट्णारः कक्षीवानौशिजो वीतहव्यः श्रायसस्त्रसदस्युः पौरुकुत्स्यः प्रजाकामा अचिन्वत"-इति। ऋगन्तरेऽप्यृषित्व-कथनेन अनुष्ठातृत्व-प्रसिद्धिः सूच्यते—"अहं कक्षीवानृषिरस्मि विप्रः"-इति। तस्मादस्यानुष्ठातारं प्रति दृष्टान्तत्वं युक्तम्॥ मन्त्रोऽप्येवं यास्केनैव व्याख्यातः—"सोमानां सोतारं प्रकाशनवन्तं कुरु ब्रह्मणस्पते! कक्षीवन्तमिव य औशिजः कक्षीवान् कक्षावा*नौशिजः उशिजः पुत्रः, उशिक् वष्टेः कान्तिकर्म्मणोऽपि त्वयं मनुष्यकक्ष्य† एवाभिप्रेतः स्यात्, तं सोमानं सोतारं मां प्रकाशनवन्तं कुरु ब्रह्मणस्पते! (६,३,१२)"-इति॥ अस्मिन् मन्त्रे सोममिति पदेन ब्रह्मणइति पदेन च सूचितं तात्पर्य्यम् तैत्तिरीया आमनन्ति—"सोमं स्वरणमित्याह—सोमपीथमेवावरुन्धे, कृणुहि ब्रह्मणस्पत इत्याह-ब्रह्मवर्चसमेवावरुन्धे"-इति॥ ५॥ २५

---

*,†, निरुक्त-कार-पाठस्तु—"कक्ष्यावान्", "कक्ष्यएव"—इति स-यकारः।

---

(२)—'स्वृ शब्दोपतापयोः (भ्वा०प०) इत्येतस्यैतद्रूपम्, शब्दयितारं स्तुतीनाम् उच्चारयितारं स्तोतारं यष्टारञ्चेत्यर्थः'-इति वि०।

(३)—विकरण-व्यत्ययेन धातूनामनेकार्थत्वेन वा रूपम्।

अथ षष्ठी ।

श्रुतकक्षऋषिः ।

१ २ ३ १२ २१ २
बोधन्मना इदस्तु नो वृत्रहा भूर्यासुतिः ।
३ १ २ ३ २ ३ १ २
शृणोतु शक्र आशिषम् ॥ ६ ॥२६

५र १ १ १ २र १ ७
I बोधन्मनाः । इदा२स्तूना२ः । वृत्रहाभू । रिया-
२ ५ २ २ ५ २ २ १
२सू३४जोः । शृणा३४औहो । तुशक्रआ । शि ।
४ ५
षाम् । औ२३होवा । होपुइ । डा ॥ २३ ॥२६

अयं परोक्षकृतः(१)। "वृत्रहा" वृत्रस्य हन्ता "भूर्यासुतिः"(२) बहुषु देशेषु इन्द्रार्थं सोमा आसूयन्ते अभिषूयन्त इति तादृशः [यद्वा, बहूनि सोमादि-हवींषि इन्द्रार्थमासूयन्ते ह्रयन्तइति तादृशः] "बोधन्मनाः" [बुध अवगमने (भ्वा०प०), औणादिको-ऽत् प्रत्ययः] यस्य मनः स्तोतॄणामभिमतं बुध्यते जानातीति

---

I औषसम् ।

(१)—उक्तं पुरस्तात्, (१०६ पृ०) 'त्रिविधा ऋचो भवन्ति परोक्षकृताः १, प्रत्यक्ष-कृताः२, आध्यात्मिक्यश्च ३,-इत्यादि । तदिह स्मर्त्तव्यम् ।

(२)—'भूरीति बहु-नामधेयम्(३,१,५)अत्रासुति-शब्दो रस-वचनः—'ता सम्राजा-घृतासुती' इति । तथाच भूरि आसुतिर्यस्य स भूर्यासुतिः बहुरसइत्यर्थः'-इति वि० ।

अथ सप्तमी।

श्यावाश्वऋषिः।

३ १ २ ३ १ २ ३ १ २
अद्य नो देव सवितः प्रजावत् सावीः सौभगम्।
१ २ ३ १ २
परा दुष्वप्न्यꣳ सुव॥ ७॥ २७

तथोक्तः "इद्"(३) अवधारणे "नः" अस्माकं बोधन्मना एव "अस्तु" सर्व्वदास्मदभीप्सितानि जानात्विवेत्यर्थः [यद्वा एतादृश इन्द्रः नोऽस्माकं सम्बन्धि यज्ञे भवत्विति]। किं ततः? "शक्रः" सङ्ग्रामे शत्रु-हनन-समर्थ इन्द्रः "आशिषम्" अस्मदीयां स्तुतिम् [आशासनं वा] "शृणोतु"(४)॥

'बोधन्मना'-'बोधिन्मना-इति पाठौ॥ ६॥ २६

हे "सवितः(१) देव!" "नः" अस्मभ्यम् "अद्य" अस्मिन् यागदिने "प्रजावत्" पुत्राद्युपेतं "सौभगं" धनं(२) "सावीः"

---

(३)—'इदिति पाद-पूरणः'-इति वि०।

(४)—'एतदुक्तम् भवति—यदहं प्रार्थयामि, तच्छृणोतु शक्रः, श्रुत्वा च बुद्ध्यतु, बुद्धा च सम्पादयतु'-इति वि०।

(१)—'सविता आदित्यः तस्य सम्बोधनम् हे सवितः'-इति वि०। "सविता, सर्वस्य प्रसविता"-इत्यादि नैरुक्तम् १०,३,७,। "आदित्योऽपि सवितोच्यते"-इत्यादि च तत्रैव तदुत्तरखण्डे।

(२)—भगमिति धननाम, शोभनं भगं सुभगम्, सुभगमेव सौभगम् स्वार्थिक-तद्धितः, शोभनं धनमित्यर्थः।

५ ४ ५र र　　४र ५र ४　　२ १
I अद्यनोदेवसवितः । औहोवा । इहश्रुधाइ ।

र　२　र १र　र　२　१
प्रजावा२३त्सा । वोःसौभगाम् । परादू२३षाइ । हो-

२　२　१　१ २　१ १ १ १ १
वा३हा । प्रियᳪसू२३४पूवा६५६ । दहा३या२३४५ ॥२४॥

२ २　र र ५ र　४ ५　२ र १　२र
II अद्या३४नोदेवसा । विताः । प्रजावत्सा । वोः

१र　२　४ ५　२　१　२　१
सौभगाम् । पारा३दूष्वा । प्रियᳪसुवोवा३ । ओ२ ।

१　५र र　२ १ २ र　१ २ ३ १ १ १ १
वा२३४ । औहोवा । अस्माभ्यञ्ज्ञातुवित्तमा२३४५म॥२५॥२७

प्रेरय(३) । "दुःष्वप्न्यम्"(४) दुःस्वप्नं दुःस्वप्नवद् दुःखकरं दारिद्र्यं "परासुव"(५) दूरे प्रेरय ॥ ७ ॥ २७

---

I भरद्वाजस्य मौक्षम्, दक्षणिधनं वा ।

II भरद्वाजस्य मौक्षम् ।

(३)—'सावीः अभ्यनुजानीहि'-इति वि० ।

(४)—अनिष्टस्य कस्यचित् सूचकः स्वप्नः, दुस्वप्नः, तस्मिन् भवं दुस्वप्न्यम् । "पूर्व-पदात् (८,३,१०६)"-इति षत्वम् ।

(५)—'सुवेति षु प्रेरणे (भ्वा०प०) इत्यस्येदं रूपम्'-इति वि० ।

अथ अष्टमी।

प्रागाथः काण्व ऋषिः।

२   १   २ ३ १ र   २ र   ३ २ ३   १ २
क्वाऽस्य वृषभो युवा तुविग्रीवो अनानतः।
३ १ र   २ र
ब्रह्मा कस्तꣳ सपर्यति ॥ ८ ॥ २८

१   र ४   २   १   १ र
I कूर३४वस्यवा५वृषभोयुवा। तुविग्रीवो२। अनानताः। ब्रह्माका२३स्ताम्। ए२हो१आ२३इहो। सपर्य्या२३ता३४३इ। ओ२३४५इ। डा ॥ २६ ॥

४ ५ ४ ५   २   १ ७ ऽ   २   ३र २
II कुवाकुवा। स्यवृषा३भोयुवा२। ओ३४। हाहोइ। तुविग्रीवोआ३नानता३ः। ओ३४। होहोइ।

"स्यः" सः "वृषभः" वर्षिता "युवा" नित्य-तरुणः "तुविग्रीवः" प्रवृद्ध-ग्रीवः(१) "अनानतः" कदाचिदप्यनवनतः इन्द्रः "क्व ?"

---

(१)—'तुविग्रीवः, पुरुग्रीवः बहुग्रीवइत्यर्थः। कथमिन्द्रोबहुग्रीवः? उच्यते—परमात्मस्वरूपत्वात्। सर्वतः पाणिपादान्तः सर्वतोऽक्षिशिरोमुखः, सर्वतः श्रुतिमांल्लोके सर्वमावृत्य तिष्ठति'-इति वि०। तुवि-इति बहु-पर्यायः नि० ३,१,३।

अथ नवमी ।

वत्सऋषिः ।

२　　१ २ ३ १　 २ ३ १ २ ३ १ २
उप ह्वरे गिरीणाᳬ सङ्गमे च नदीनाम् ।
१　　　१　२　　५ र र　　　 २　　३ १ १ १ १
ब्रह्मा२३ । का२स्ता२३४औहोवा । सपर्य्यती२३४५ ॥२७॥

५ र र र र　　　　र ४　　५ र र
III एहीयैही । कस्यवृषभोयुवा । एहीयैही । तु-
र र　 र ४　　　५ र र र र　　र　　　४
विग्रीवोअनानताः । एहीयैही । ब्रह्माकस्तᳬसमर्य्य-
५ र र र र　　१　　　३ २　 ५ र र
ती । एहियैही । आ२इ । हिया३४औहोवा ।
२　 ५
आ२३४इही ॥ २८ ॥ २८

कुत्र वर्त्तते ?—इति को जानातीत्यर्थः । "कः" "ब्रह्मा" स्तोता "तम्" इन्द्रं "सपर्य्यति"(२) पूजयति ?(३) ॥ ८ ॥ २८

---

I,II,III भारद्वाजानि आर्षभाणि वा सैन्धुक्षितानि वा ।

(२)—निघण्टौ परिचरण-कर्मसु तृतीयम् ३,५

(३)—अस्यास्त्वचि ख्यप्यभइति "स्यश्छन्दसि बहुलम्(६,१,१३३)"-इति हल्परकतां निमित्तीकृत्य लोपः । तुविग्रीवो अनानत इति अव्यपरे (६,१,११५)इति प्रकृतिभावः । काइति "अनुदात्तं प्रश्नान्ताभिपूजितयोः (८,२,१००)" इति प्लुतिरनुदात्तश्च ।

३ १ १ २र
धिया विप्रो अजायत ॥ ९ ॥ २९

१ २ १ १ २र १
I उपह्वराइ । गिरा२इणाम् । सङ्गमेचा । न

१ २ १ २ १
दा२इनाम् । धियाविप्रो । अजायता । अयाम् ।

२ २ ५
अया२१उ । वा२३ । ऊ३४पा ॥ २९ ॥

३ २ ३ ५ २ १ २ ३ २ ३ २ ३
II इदामो२३४दाम् । इदामिदकम् । इदामोर

५ २ र १ २ ३ २ ३ ५
४दाम् । उपह्वरेगो३राइणाम् । इदामो२३४दाम् ।

२ १ २ ३ २ ३ २ ३ ५ २ र १
इदामिदकम् । इदामोर३४दाम् । सङ्गमे चना३दाइ

२ ३ २ ३ ५ २ १ २ ३ २ ३ २ ३
नाम् । इदामो२३४दाम् । इदामिदकम् । इदामोर३-

५ २ र र १ २ ३ २
४दाम् । धियाविप्रोआ३जायाता । इदामा५इदा६५

१र २ १र
६म् । गोष्पदे पुट् ॥ ३० ॥ २९

"गिरीणां" पर्व्वतानाम्(१) "उपह्वरे" उपह्वर्त्तव्ये प्रान्ते

---

I,II शाक्य सामनी ।

(१)—'गिरीणाम् मेघानाम्'-इति वि०। गिरिरिति मेघ-नामसु दशमम् नि०१,१०।

अथ दशमी ।

इरिमिठऋषिः* ।

२ ३ १ २　३ १२　२२　३ १ २ ३ २
प्र सम्राजञ्चर्षणीनामिन्द्रꣳ स्तोता नव्यं गीर्भिः ।

१ २ ३ २ ३ १ २
नरं नृषाहं मꣳहिष्ठम् ॥ १० ॥ ३०

"नदीनां" सरितां "सङ्गमे" सङ्गमने च ईदृग्विधे देशे क्रियमाणया "धिया" स्तुत्या[२] "विप्रः" मेधावी[३] इन्द्रः "अजायत"[४] प्रादुर्भवति, स्तुतिं श्रोतुमिति शेषः[५] [गिरीणामित्यत्र 'नामन्यतरस्याम्' (६,१.१७७)-इति नाम उदात्तत्वम्[५] ॥

'सङ्गमे'-'सङ्गथे' च इति पाठौ ॥ ९ ॥ २९

"चर्षणीनां" मनुष्याणां मध्ये[१] "सम्राजं" सम्यग् राजमा-

---

(२)—'धिया प्रज्ञया'-इति वि० । धीरिति प्रज्ञा-नामसु सप्तमम् पदम् नि० ३,९ ।

(३)—विप्रइति मेधावि-नामसु प्रथमम् नि० ३,१५ ।

(४—कालसामान्ये प्रत्ययः (३,४,६) । मन्त्रे—विप्रोअजायत इति प्रकृतिभावोऽव्यपरे इति (६,१,११५) ।

(५)—'एतदुक्तम् भवति—यत्र प्रदेशे बहवो मेघाः, यत्र बहूदकं, तत्र तेषां चोदकस्य पानार्थम्' इत्यादि वि० ।

(१)—'चर्षणयः'-इति मनुष्य-नामसु नवमम् नि०२,३ ।

I प्रसम्म्राजाम्। चार्षा२णाइना२म्। आइन्द्रा२९- स्तोतार३। नव्यार२ङ्गार३४इर्भीः। नारा२मार्षा२इ। हम्मोवा। हा५इष्ठो६हाइ॥ २१॥

II प्रसम्म्रजोहाइ। चार्षाणी३नाम्। आइन्द्रा९स्तो इता३। नव्यार२ङ्गार२३४इर्भीः। नारमोई। नृषाहमो३इ। म९हा५इष्ठाम्। होपूइ। डा॥ २२॥

नम्(२) [यद्वा मनुष्याणामधीश्वरम्(३)] "इन्द्रम्" हे स्तोतारः! "प्र- स्तोत"(४)प्रकर्षेण स्तुत। कीदृशम्? "गीर्भिः" स्तुतिभिः "नव्यं"(५)

---

I,II वार्षन्वरे।

(२)—'राजते'-इति ज्वलति-कर्मसु नि० १,१५।

(३)—'राजति'-इति ऐश्वर्य्य-कर्मसु चतुर्थम् नि० २,२२।

(४)—गुणभावोबाऊलकात्। ऋचि दीर्घान्तो द्व्यचोत स्तिङ (६,३,१३५,) इति।

(५)—'नव्यं नवतरम्'-इति वि०। इह नये नीतेरूपम्। नौतीति अर्चति-कर्मसु अष्टादशम् नि० ३,१४।

३ ५ ३र ४ ५ ३ २ ५ २ १ २
III प्रसम्राजञ्च। षणाइ२३४इनाम्। इन्द्राऽस्तोइ-
२ १ २ ५ ४ ५ ४र ५ ४
ताइ। नव्या२ङ्गा२३४इर्भीः। नरंनृषाहम्मा५ऽहि।
५ २ १ १ १ १
आ६हाउवा। ष्ठा२३४५म्॥ ३३॥

४ ५ ४र ५ र ४र ५ र र ४ ५ ५
IV प्रसम्राजञ्चर्षणीनामिन्द्रऽस्तोतान। व्यङ्गा६इर्भीः।
१ र र २ ५ ४ ५ ४
इन्द्रऽस्तोतानव्यङ्गा२३इर्भी३४ः। नरन्नृषाहम्। मापुऽ-
४ २ र ऽर १ २ ५र र २
हिष्ठाम्। सहमहै२होर। या२३४औहोवा। मऽ-
१ १ १ १ १
होइष्ठा२३४५म्॥ ३४॥ ३०*

॥ इति पञ्चम-दशति॥ **

---

III,IV कुत्सस्य प्रस्तोकौ।

---

** छन्दआर्चिके द्वितीयस्यार्द्धः प्रपाठकः।

* इति ग्रामे गेय-गाने चतुर्थस्यार्द्धः प्रपाठकः।

स्तुत्यं "नरं" नेतारं(६) "नृषाहम्"(७) नृणां शत्रु-मनुष्याणाम् अभिभवितारम् "मंहिष्ठम्"(८) दातृतमम् ॥१०॥३०

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दो-व्याख्याने
द्वितीयाध्यायस्य तृतीयःखण्डः ॥ ३ ॥

---

अथ-चतुर्थखण्डे—

सेयं प्रथमा।

श्रुतकक्षऋषिः।

१ २ ३ १ २ ३ १ २ ३ १ २
अपादु शिप्र्यन्धसः सुदक्षस्य प्र होषिणः।
२ ३ २ ३ १ २
इन्दोरिन्द्रो यवाशिरः॥ १ ॥ ३१

"शिप्री"(१) ["शिप्रे हनू नासिके वा(२)"] शोभन-हनुः

---

(६)—'नरं नराकारम्'-इति वि०।

(७)—"छन्दसि सहः (३,२,६३)"-इति ण्वौ "पूर्वपदात् (८,३,१०६)"-इति षत्वे रूपमिदम्।

(८)—मंहत-इति दान-कर्मसु पन्ठ्यम्। तस्य तृचि "तुश्छन्दसि (५,३,५९)-इतीष्ठनि रूपम्।

(१)—प्रशस्ते शिप्रे यस्य—सुशिप्री।

(२)—इत्येतत् षष्ठाध्यायीय-यास्क-वचनम् (६,४,१९। सृप गतौ, स्काधि-तखि-वखि

५ र २ १ २ र
I अपादुशी। प्रियन्धसाः। सुदक्षा२३स्या। प्रहो-
१ र २ १र २ र १
षिणः। इन्दोरा२३इन्द्राः। यवाशा२३इराः। ऐ। हि-
२ १ ५र र २ १ २ १ १ १ १
या२इ। हिया३४औहोवा। ए३। ऊपा३१२३४५॥ १॥

५ र २ ४ ५ २ १ र र
II अपादूइशिप्रियन्धसाः। सुदक्षस्यप्रहोषिणाः। इन्दौ
१ २ ५ र ४ ५
२। हौ२। ऊवा२३इ। आ३४इन्द्रो। यवाशाइराः।
२र १ २ ५र र २ १ २
ऐ। हा२ए२३। हिया३४औहोवा। ए३। ऊपा३१-
१ १ १ १
२३४५॥ २॥३१

[यद्वा शिप्राः शीर्षण्याः(३), सुशिरस्त्राणः] सः "इन्द्रः" एव "प्रहो-षिणः"(४) प्रकर्षेण देवान् हविर्भिर्जुह्वतः "सुदक्षस्य" एतन्नामकस्य ऋषेः(५) सम्बन्धि "यवाशिरः" [श्रीञ् पाके (क्र्या० उ०) आङ्-पूर्व-

---

I,II औपगवे, सौश्रवसे वा अथमथे वा मथाथे वा सौमित्रे वा ग्रैवखण्डिने वा।

शकि-स्वयि-स्पि-तृपीति-रक्, बाहुलकात् स-शब्दस्य शि-भावः; यज्ञं गम्यनं प्रति वा सृप्तं भवतः'-इति देवराजयज्वा।

(३)—इह मानं यत्न-लभ्यम् भवितु मर्हति।

(४)—'जुहोतेर्दानार्थस्येदं रूपम्'-इति वि०।

(५)—'सुष्ठु उत्साहितस्येत्यर्थः'-इति वि०।

अथ द्वितीया।

मेधातिथिऋषिः।

३ १ २ २ १२ २२ ३ १ २
इमा उ त्वा पुरूवसो* भि प्र नोनवुर्गिरः।
१ २ ३ २उ ३ १ २
गावो वत्सन्न धेनवः॥ २॥ ३२

कस्य "अपस्पृधेथामानृचुः"-इत्यादिना([6]) धातोः श्रिरादेशः)" यवैः- श्रामिश्रितं([7]) यवैः सह पक्कम् "इन्दोः" सर्वत्र पात्रेषु चरन्तम् "अन्धसः"([8]) सोमलक्षणमन्नम् "अपात्" अपिवत् "यद्वा- सोमस्य भागम् इन्द्रार्थम् परिकल्पितं सोमांशम् अपिवत्। "उ"-इत्यवधारणे॥ १॥ ३१

हे "पुरूवसो!" बहुधन! "यद्वा वसवो यज्ञाः([1]) बहुयज्ञ!

---

* "पुरूवसो"-इति ख० ग० ए० पुस्तकानां पाठः।
३२ उत्तरार्च्चिकस्य ७, ३, १८, १।

---

([6])—"अपस्पृधेथामानृचुरानृकुश्चिच्युषेतित्याजश्रात-श्रितमाशिराशीर्त्तः"(६,१,३६।

([7])—'यव-शब्देनात्र यव-विकाराः सक्तव उच्यन्ते, तैर्मिश्रणं यस्य स यवाशिरः। प्रथमा च षष्ठ्यर्थे द्रष्टव्या। यवमिश्रितस्येत्यर्थः। मन्थी च नाम ग्रहः स सक्तुभिः श्रीयते "मन्थिनं सक्तुभिरिति वचनान्तरमवेक्षितैतदुच्यते यवाशिरइति'-इति वि०।

([8])—'सोमस्य'-इति वि०।

([1])—इह मानं यत्न-लभ्यम्।

अथ तृतीया।

गोतमऋषिः*।

२उ　३ १ २　３ २ ३ १ २ क २र
अत्रा ह गोरमन्वत नाम त्वष्टुरपीच्यम्।
३ २　３ १ २　３ २
इत्था चन्द्रमसो गृहे॥ २॥३३

५ र　१　१　१ र　१
I इमाउत्वा। पुरू२वासा२उ। अभिप्रनोनवू२र्गी-
२र २　२र र १　१ ४
इरा२ः। औ२हो१इ। गावोवात्सा२३म्। ना२३धे३।
२　५
ना३४५वो६हाइ॥ २॥ ३२

इन्द्र! "त्वा" त्वाम् "अभि" "इमाः" अस्मदीयाः "गिरः" स्तुतयः "प्रनोनवुः" प्रकर्षेण पुनः पुनः स्तुवन्ति प्राप्नुवन्तीत्यर्थः। नौतिरत्र व्याप्तिकर्मा"। तत्र दृष्टान्तः—"गावो वत्सं न धेनवः" यथा धेनवः गावः गृहे वर्त्तमानं वत्सं शीघ्रमभिगच्छन्ति तद्वत। यद्वा, अस्मदीया वाचः त्वाम् अभिनोनवुः शब्दयन्ति स्तुवन्ति, यथा गावो वत्समभिलक्ष्य हम्भा-रवं कुर्वन्ति तद्वत्॥ २॥ ३३

*—'गौतमस्यार्षम्'-इति वि०।

I त्वाष्ट्री साम।

४ ५ २र १र १ १ र
I आत्रा। हागोरमन्वताउवा२३। होवा२३होइ। ना-
र १ १ २ १र र
मत्वष्टुरपीचियाउवा२३। होवा२३होइ। इत्थाचन्द्रमसो
१ १ ३ ५र र २
गृहाउवा२३। होवा२३हो२। वा२३४औहोवा। ऊ२-
५
३४पा॥ ४॥

४ ५ २र १र १
II हावात्रा। हागोरमन्वताउवा२३। होइया२३।
१ र र १
हा२ऊवाइ। नामत्वष्टुरपीचियामियाउवा२३होवा२३-
२ १र र १
हा२ईया। इत्थाचन्द्रमसोगृहाउवा२३। होइया२३।
१ २ ५र र ३ ५
हा२ऊवा२। या२३४औहोवा। ऊ२३४पा॥५॥२२

"अत्रा(२)ह" अस्मिन्नेव "गोः" गन्तुः(३) "चन्द्रमसः" "गृहे" मण्डले "त्वष्टुः"(४) एतन्नामकस्य आदित्यस्य सम्बन्धि "अपीच्यं"

---

I,II त्वष्टुरातिथ्ये।

(२)—"निपातस्य च (६,३.१३६)"-इति दीर्घः।

(३)—'गो-शब्देनेह सुषुम्ना नाम आदित्य-रश्मिः, चन्द्रमसं प्रति गतः, अल्पत्वा चन्द्रमण्डलस्य, रश्मिं प्रति गतः, ततः परावृत्य पृथिव्यां ज्योत्स्नारूपेण दीप्यते सोऽत्र गो-शब्देनोच्यते'-इति वि०।

(४)—त्वष्टेति पृथि-स्थान-देवतासु, अन्तरिक्ष-स्थान-देवतासु, द्यु-स्थान-देवतासु च नैघण्टुकाः संस्मरन्ति। नैरुक्तास्य विषूपलक्ष्यते, तद्यथा——"त्वष्टा तूर्णमश्नुत इति

रात्रौ अन्तर्हितं स्वकीयं यत् "नाम"[५] तदादित्यरश्मयः "इत्था इत्थम् अनेन प्रकारेण "अमन्वत" अजानन्[७]। उदकमये स्वच्छे चन्द्रविम्बे सूर्य्यकिरणाः प्रतिफलन्ति, तत्र प्रतिफलिताः किरणाः सूर्य्ये यादृशीं सञ्ज्ञां लभन्ते, तादृशीं चन्द्रेऽपि वर्त्तमानां लभन्त इत्यर्थः॥ एतदुक्तम् भवति—यद्रात्रावन्तर्हितं सौरं तेजः तच्चन्द्रमण्डलं प्रविश्याथ नैशं तमो निवार्य्य सर्व्वं प्रकाशयति; ईदृग्भूततेजसा युक्तः सूर्य्य इन्द्रएव, द्वादशस्वादित्येषु इन्द्रस्यापि परिगणितत्वात्। अतोऽहोरात्रयोः प्रकाशक इन्द्रएवेति इन्द्रस्तुतेः प्रतीयमानत्वात् इन्द्रो देवतेत्युपपन्नं भवति, ईदृग्भूतस्य तेजसः तदाश्रयत्वेन चन्द्रमसः प्राधान्य-विवक्षया चान्द्रमस्यामिष्टौ विनियोगोऽप्युपपद्यते॥ अत्र निरुक्तम्—"अथाप्यस्यैकोरश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्य आदित्यतोस्य दीप्तिर्भवतीति सुषुम्नः सूर्य्यरश्मिश्चन्द्रमा गन्धर्व्व इत्यपि निगमोभवति सोऽपि गौरुच्यते अत्राहगोरमन्वतेति" (२,३,८); अत्र ह गोः सममंसतादित्यरश्मयः स्व-नामापीच्य-

---

नैरुक्ताः, त्विषेर्वा दीप्ति-कर्मणः, त्वक्षतेर्वा स्यात् करोति-कर्मणः ** अग्निरिति शाकपूणिः"-इत्यादि प्रथमम् (नै० ८,२,११—१२)। "त्वष्टा व्याख्यातस्तस्यैषा भवति" इत्यादि द्वितीयम् (नै०१०,२,९—१०)। "त्वष्टा **त्वष्टा दुहितुर्वहनं करोतीमानि च सर्वाणि भूतान्यभि समागच्छन्ति यमस्य माता पर्य्युह्यमाना महतो जाया विवस्वतो ननाश रात्रिरादित्यस्यादित्योदयेन्तर्द्धीयते"-इति अन्त्यम् (नै० १२,१,६६)। इह चान्त्य-व्याख्यात एव त्वष्टा गृह्यते।

(५)—'नाम नमनं प्रह्वीभावम्'-इति वि०।

(६)—"प्रत्नपूर्वविश्वेमात्थाल् छन्दसि (५,३,१११)"-इति इदमो विहितादिवार्थे-विहितोऽपि थाल् व्यत्ययेन प्रक्रान्तभूतादिदं-शब्दादपि।

(७)—'अमन्वत, अनुमन्यन्ते'-इति वि०।

अथ चतुर्थी।

भरद्वाजऋषिः।

२उ ३ १ २ ३ १ २ ३ २ ३ १र २र
यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः।
१ २ ३ १ २ २ १ २
तत्र पूषा भुवत्सचा ॥ ४ ॥ ३४

५ र १ १ २ ४ ५
I यदिन्द्रोया। नायार३त्। उमो३म्। उवा।
१ र र १ २ ४ ५ १ ०
रितोमहीरापार३ः। उमो३म्। ओवा। वृषावृषा२।
३ २ ५र र १ २र १र २ १ ३ १ १ १ १
तमा३४औहोवा। तत्रपूषाभुवत्सचा२३४५ ॥ ६ ॥

५ र ५ १ र १ र
II यदिन्द्रोअनयद्रिता६ए। महीरापा२ः। मही-

मपचितमपगतमपहितमन्तर्हितं वा(८) (४,४,२ ५)"-इति॥३॥ ३३

"यद्" यदि(१) "इन्द्रः" "वृषन्तमः" अतिशयेन वर्षिता इन्द्रः "रितः" गच्छतीः(२) "महीः" महतीः "अपः" वृष्ट्युदकानि "अन-

---

I,II पौषे।

(८)—निरुक्तपाठस्तु—'अमुत्र चन्द्रमसो गृहे'-इत्यंशेनाधिको लक्ष्यते।

(१)—'यत्, मेघस्थानम्'-इति वि०।

(२)—'रितः, गतः प्राप्तः सन्'-इति वि०।

अथ पञ्चमी ।

विन्दुः पूतदक्षो* वा ऋषिः ।

१ २　३ १ २　२ २ ३ २　३ १ २
गौर्धयति मरुता७ श्रवस्युर्माता मघोनाम् ।

३ २उ　२ १ २
युक्ता वह्नी रथानाम् ॥ ५ ॥ ३५

१ २ ३　५　१　२　१ २
रापा२३: । वार्षतार३४माः । तत्रापूषा३ । पू२षार-

५र र　२ १ २ १ १ १ १
३४औहोवा । भुवत्सचा२३४५ ॥ ७ ॥ ३४

५र　५　२　१ ७ ८　२
I गौर्धया६ए । तिमरुता३म् । अवास्युर्मा३ । ता

यत्"(३) इमं लोकं प्रापयति । "तत्र" तदानीं(४) "पूषा" पोषको देवः(५) "सचा भुवत्"(६) इन्द्रस्य सहायो भवति ॥ ४ ॥ ३४

---

* 'पूतदक्षणः'-इति वि० पाठः ।

---

(३)—कालसामान्ये लङ् (३,४,६ ।

(४)—'तत्र तत्स्थाने'-इति वि० ।

(५)—असौ द्युस्थानदेवतासु दशमो देवः, "पोषं पुष्यति तत् पूषा भवति"-इत्यादि च नैरुक्तम् (१२,२,७ ।

(६)—सचेति सहार्थेऽव्ययम्, भुवादिति लेटोरूपम् ।

२ ५ १ ७ २ १ १ २
मघोर३४नाम्। युक्तावङ्काइ:। रथा२। ना२मा२३४

५र र २ ५
औहोवा। ऊ२३४पा॥ ८॥

५र ५ २ १ ५र १र र ५र
II गौर्द्धयतिमरुता६मे। श्रवस्युर्मा२तामघोना२म्।

२ १ २ १र २ १ २
उक्रवा२३हाइ। युक्तावा२३न्हो:। उक्रवा२३हाइ।

३ २र १ ४ ५ ४
रथानाम्। औ२३होवा। होपृइ। डा॥ ८॥ ३५

"मघोनां" धनवतां "मरुतां"(१)"माता" निर्मात्री "गौः"(२) पृश्निरूपा [पृश्निवै पयसो मरुतो जाता इति श्रुतेः; गौर्माध्यमिका वाक्(३), तत्रैव मध्यमस्थाने मरुतामपि वर्त्तनात्(४), तेषां

---

I,II श्यावाश्वे।

(१)—मरुतो अन्तरीक्ष-स्थान-गणविशेषाः। तथा च नैरुक्तम्—"अथातोमध्यस्थाना देवगणास्तेषां मरुतः प्रथमागामिनो भवन्ति, मरुतो मितराविणो वा मितरोचिनो वा महद्द्रवन्तीति वा'-इत्यादि ११,२,१—२।

(२)—"गौर्व्याख्याता तस्यैषा भवति ** वागर्थेषु विधीयते, तस्मान्माध्यमिकां वाचं मन्यते"-इति नैरुक्तम् ११,३,६।

(३)—"चतुर्धा हि वाचो वदन्ति परा पश्यन्ती मध्यमा वैखरीति शाब्दिक-सिद्धान्तः, तत्र गौरिति माध्यमिक-वाचोऽभिधानम्। वाक्पदञ्च अन्तरिक्षभागित्वेन परिगणितं निघण्टौ, नैरुक्तञ्च सोदाहरणं वर्णितम् तद्यथा—"वागर्थेषु विधीयते, तस्मान्माध्यमिकां वाचं मन्यते,—वाग् व्याख्याता तस्या एषा भवति। 'यद्वाग् वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा। चतस्रोनुदिशऊर्जं दुदुहे पयांसि क्वचिदस्याः परमं जगाम (ऋक्१०,७,१०)"यद् वाग्वदन्त्यविचेतनानि अविज्ञातानि"-इत्यादि ११,३,७। "वागेषा माध्यमिका"-इत्येवमादि च ११,४,८।

(४)—'गौः'-इति निघण्टु-दैवतकाण्डे मध्यमस्थानभागिषु उनषष्ठितमम् पदम्, 'मरुतः'-इति तत्रैव सप्तत्रिंशत्तमम्।

अथ षष्ठी।

द्वयोः श्रुतकक्ष एव सुकक्षो वा ऋषिः।

१ २ ३ १ २ ३ २ ३ १ २
उप नो हरिभिः सुतं याहि मदानांपते।

१ २ ३ १ २ ३ २
उप नो हरिभिः सुतम्॥ ६ ॥३६

२ १ ४ ५ ४ ५ २र १ २ र २ १
I उपनोर३हरिभिःसुतोवा। याहिमदा३नाम्प। ता-

तत् पुत्रत्वमुपचर्य्यते(५), सा] "धयति" सोमं पिबति [पोषयति वा स्व-पुत्रान् मरुतः] किमिच्छन्ती? "अवस्युः"(६) अन्नं कामयमाना। कीदृशी? "रथानां" मरुतां(७) "वह्निः" पृषतीभि र्वडवाभिर्वोढ्री संयोजयित्री सा "युक्ता" सर्व्वत्र सम्मता पूज्या-भवति॥ ५॥ ३५

हे "मदानां पते!" "माद्यन्त्यनेनेति मदः सोमः ['मदोऽनुप-

---

३६ उत्तरार्च्चिकस्य९,१,१०,१। १४

(५)—वैदिकाख्यायिकाणु वृत्तान्तान्वाख्यानस्य अयथात्वात् कल्पनाबीजत्वाद्वा। तदुक्तम् तर्कपादान्तिमे—'असद्वृत्तान्तान्वाख्यानम्'-इत्यादि शवरस्वामिना भगवता मीमांसाचार्य्य विशेषेण तथान्यान्यै रपि।

(६)—'अवःशब्देन कीर्त्तिरुच्यते तामिच्छति अवस्यति, अवस्यतेः उ-प्रत्ययः; (३,२,-१७०) कीर्त्तिकाम इत्यर्थः'-इति वि०।

(७)—'कीदृशानां पुनर्मरुताम् वोढ्री? उच्यते—'रथानां' रथस्वभावकानामित्यर्थः'-

२ ३ २   २ १ ५ ३ ५
२३इ । उपनो३ । हा३औ२३४वा । रा२३४इभोः ।

२ १ ४ ५ ४
सुताम् । औ२३होवा । हो५इ । डा ॥ १२ ॥

५ र र ४ ५ ४ ५ १ २ १
II उपनोहाहोहा । राइभोः । स्व२३ताम् । याहि-

२ र १र २ ३ १ २ ५ १ ३
मद्रा । नाम्या२३ताइ । उपानो२३४हा । रा२इभा

५र र २ १ २ १ १ १ १ १
२३४औहोवा । सुतꣳरयिष्ठा२३४५: ॥ ११ ॥ ३६

सर्गे ?"-इति करणे अण् प्रत्ययः] सोमानां स्वामिन्! इन्द्र! "हरि-भिः" [आ शतेन हरिभिरित्यादिषु बहूनामश्वानां श्रुतेः अत्रापि शतसहस्र-सङ्ख्याकैः] अश्वैः(१) सह "नः" अस्माकं यज्ञे "सुतम्" अभिषुतम् सोमम् "उप याहि" तत्पानार्थं शीघ्रमागच्छ । पुनः "उप नः"-इत्याद्युक्तिरादरार्था ॥ ६ ॥ ३६

---

I,II प्रजापतेः सुतं रयिष्ठीये सहोरयीष्ठीये वा ।

इति वि० । 'रथो रंहतेर्गति-कर्मणः'-इति नै०९,२,१ । तथाच गन्तृणामित्यर्थो निष्पद्यते ।

(१) —इन्द्राश्वाः हरि-सञ्ज्ञकाः, तथाहि निघण्टुः—'हरिः इन्द्रस्य(१,१५,१)'-इति ।

अथ सप्तमी।

३ १र　२र　३ १ २ ३ १ २　३ २
इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे।
१ २　३ १र २र
अच्छावभृथमोजसा ॥ ७ ॥ ३७

५ र ४ ५　१ २ ३　५　२ १　७
I इष्टाहोत्राः। असृक्षार३४ता। इन्द्रंवृधा। तो
३　५　१ २ ४ ५　३ २　४
२३ध्वार३४राइ। अच्छा२वोभृ। थमो३जा५सा६५६।
२ २ १ २
ए३। उदधिर्निधी१ः॥ १२ ॥ ३७

"अध्वरे" अस्मदीये यज्ञे "वृधन्तः" हविर्भिरिन्द्रं वर्द्धयन्तः "इष्टाः" इष्टवन्तः यागं कृतवन्तः सप्तसङ्ख्याकाः "होत्राः" होतृकाः "अवभृथम्"(१) तुल्याभिवसम् "अच्छ" अभि प्रति "ओजसा" स्व-तेजसा सहिताः "इन्द्रम्" "असृक्षत" व्यसृजन्(२)। यावदवभृथ-समाप्ति होतृका यजन्तीति ॥ ७ ॥३७

---

I इष्टाहोत्रीयम् अप्सरसं वा अपांनिधि र्वा।

(१)—प्रधानाकृतिषु कृतासु अवभृथ-सञ्ज्ञं कर्म करिष्यते, तमित्यर्थः।

(२)—'ऋषिः आत्मीयान् ऋत्विजआह—'इष्टाः' प्रियाः 'होत्राः' हूयन्त इति होत्राः आकृतय इत्यर्थः, ताः 'असृक्षत' विजत इत्यर्थः'-इति वि०।

अथाष्टमी।

वत्सः काण्वऋषिः।

३ २उ ३ १र २र ३ २ ३ १ २ ३ १ २
अहमिद्धि पितुस्परि मेधामृतस्य जग्रह।
३ १र २र
अहꣳ सूर्य्यइवाजनि॥ ८॥ ३८

४ ४ २र १र
I अहमिद्धा५इपितुष्परा३। मेधामृतस्यजग्रहा।
२ १ र ७ ३र २ — १
अहꣳसूर्य्याः। इवा२३४। हाहोइ। जनि। होइ।
२र १र २र १र १ १ १ १
होइ। औहोऔहोवा२३४५हाउ। दा॥ १३॥ ३८

"पितुः"(१) पालकस्य "ऋतस्य" सत्यस्यापि तस्येन्द्रस्य "मेधाम्" अनुग्रहात्मिकां बुद्धिम् "अहम् इत्"(२) अहमेव "परिजग्रह" परिगृहीतवानस्मि नान्यः "हि"(३) यस्मात् एवं तस्मात् "अहं" "सूर्य्यः इव अजनि" सूर्य्यो यथा प्रकाशमानः सन् प्रादुर्भवति तथा अहमजनिषम् प्रादुरभूवम्॥ ८॥ ३८

---

३८ उत्तरार्च्चिकस्य ७, १, ५, १। १५

I प्रजापतेः निधनकामम् सिन्धुषाम वा।

(१)—'पितुः', कण्वस्य सकाशात्'-इति वि०।

(२), (३)—'इत् हि द्वावपि पाद-पूरणौ'-इति वि०।

अथ नवमी ।

शुनःशेपऋषिः ।

३ १ २　　　३ २ ३१　　　३ २ १ २
I रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
३ २ ३ २ ३ १ २
क्षुमन्तो याभिर्मदेम ॥ ९ ॥ ३९

५र र　　　१　२　५　१　२
रेवतीर्नाः । सधा२मा२३४दाइ । इन्द्रा२इसार-
५　२ १　१　२　१　२ १
३४तू । तुविवा२जाः । क्षू२३मा । तो२या । भिर्मा-
५　४　५
२३४वा । दा५इमो६हाइ ॥ १४ ॥ ३९

"क्षुमन्तः"(१) अन्नवन्तः वयं "याभिः" गोभिः "मदेम" हृष्येम "इन्द्रे" "सधमादे" अस्माभिः सह हर्षयुक्ते सति "नः" अस्माकं ता गावः "रेवतीः"(२) क्षीराज्यादि-धनवत्यः "तुविवाजाः" प्रभूतबलाश्च(३) "सन्तु" ॥ ९ ॥ ३९

---

३९ उत्तरार्चिकस्य ४,१,१४,१ । १६

I रेवत्यः वाजदावर्यौ वा ।

(१)—क्षुरिति अन्न-नामसु द्वादशम् नि०२,७ । विवरणकारस्तु 'क्षु शब्दे (अ०प०) इत्यस्येदं रूपम् ; शब्दवन्तः, कीर्त्तिवन्तः'-इत्याह ।

(२)—'रयेर्मतौ बहुलम् ; (६,१,३४)'-इति वचनादिह रे-भावः । "सुपां सु लुग् (७,१,३९)" इति जसः सु ।

(३)—'तुवि-शब्दो बहु-वाची (नि०३,१,१); वाज-शब्द इह बल-वाची (नि०२,९,१)।

अथ दशमी।

शुनःशेपो वामदेवो वा ऋषिः।

१ २ ३१ २ ३ १ २ ३ २
सोमः पूषा च चेततुर्विश्वासाᳫ सुक्षितीनाम्।
३ २ क २र ३ २
देवत्रा रथ्योर्हिता ॥ १० ॥ ४०

५र र २ १ २ ३ २ ३ ५ १
I सोमःपूषा। चचाइततूः। अयायो२३४वा। वा-
र २र र १ ३२ २ ५ १ ७
इश्वासाᳫसुक्षिती। नाम्। अयायो२३४वा। दाइव-

"देवत्रा"(१) देवेषु "रथ्यः" रथार्हः "अर्हिता"(२) आरोढा "सोमः"(३) तादृशः "पूषा" सूर्य्यश्च(४) "विश्वासां" सर्व्वासां "सुक्षितीनां" [क्षियन्ति निवसन्तीति क्षितयः प्रजाः] शोभन-

---

I सौमापौषम् गौश्ववीयं वा।

(१)—'देव-मनुष्य-पुरुष-पुरु-मर्त्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्'-इति त्रा।

(२)—'रथ्यः, अर्हिता'—इति छेदस्तु पदग्रन्थ-विरुद्धो विवरण-विरुद्धश्च। पदकारस्तु 'रथ्योः, हिता'-इत्येवं चिच्छेद। "रथ्योः, रथशब्देनात्र यज्ञ उच्यते', रंहतेर्गतिकर्मणः, रथ्योः रथस्य यज्ञस्य यौ वोढारौ तौ पत्नीयजमानावत्र रथ्यावुच्यते, तयोः, यज्ञस्य देवान् प्रति प्रापयित्रोः पत्नीयजमानयोः 'हिता द्विवचनस्याकारः हितौ'"-इति वि०।

(३)—अन्तरिक्ष-स्थो देवः, चन्द्रमाः द्रष्टव्यमेतन्नैरुक्तम् (११,१,४)।

(४)—द्यु-स्थान देवः, 'पोषं पुष्यति पूषा भवति'-इत्यादि नै०१२,२,५-७।

२　४　　　　　　१२ ३२　१　२　११
चाराऽ२३ ।　थियोऽ२र्हाऽ५इताऽ६५६ ।　गावोऽ२अश्वाऽ२३-
११
४५: ॥ १५ ॥ ४०

॥ इति प्रथम-दशति ॥

क्षितीनां मनुष्याणां सम्बन्धीनि हवींषि इन्द्रार्थं कृतानि "चेततुः" जानीतः ॥ १० ॥ ४०

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने
द्वितीयाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

अथ पञ्चमे खण्डे—

सेयं प्रथमा ।

श्रुतकक्षऋषिः ।

३　२　३　१　२　३　१　२　३　१र　२र
पान्तमावोअन्धसइन्द्रमभिप्रगायत ।
३　१　२　　३　१　२　३　१　　२　　३　२
विश्वासाहꣳशतक्रतुंमꣳहिष्ठञ्चर्षणीनाम् ॥ १ ॥ ४१

हे ऋत्विजः ! "वः" यूयम् "अन्धसः" सोमलक्षणम् । अन्नम्

---

४१ उत्तरार्चिकस्य १,२,१,१ । १७

४र ५ ४र ५र ४ ५ ४ २ १ २ १ २

I पान्तमावोऽअन्धसाः। इन्द्रामाभि। प्रगायाता

२ २ १ २ १ २ । १

३। हाउहाइ। विश्वासाहम्। शताक्रातुउम्। हा-

२ १ २ २ २ १ ३

उहाइ। मᳫहाइष्ठचाउ। हाउहा। षणार्ऽइ। नार्ऽ३

५र र २ ५

४औहोवा। उऽर्ऽ३४पा॥१६॥

"आ पान्तम्" आभिमुख्येन पिबन्तं [पा पाने (भ्वा०प०) छान्दसः शपोलुक्(१)। 'सर्व्वे विधयश्छन्दसि विकल्पन्ते"-इति 'न लोकाव्यय" (२,३,६९पा०)-इति षष्ठी-प्रतिषेधाभावः। ततोऽन्धसइत्यत्र 'कर्त्तृकर्म्मणोः" (२,३,६५पा०) इति षष्ठी] सोममाभिमुख्येन पिवन्तम् एतादृशम् "इन्द्रम्" "प्र गायत" प्रकर्षेणाभिष्टुत। कीदृशम्? "विश्वासाहम्" सर्व्वेषां शत्रूणामभिभवितारम् "सर्व्वेषां भूतजातानां वा" अतएव "शतक्रतुम्"-(२) बहुविध-प्रज्ञानं "बहुविध-कर्माणं वा" "चर्षणीनाम्"(३)

---

I अध्यर्द्धेड-वैतहव्यम्।

(१)—शब्लुकि शित्परकत्वाभावात् पिबादेशाभावः।

(२)—'शतम्'-इति बहुनामसु दशमम् नि०३,१। 'क्रतुः'-इति प्रज्ञा-नामसु पञ्चमम् (नि०३,९)-कर्म-नामसु च एकादशम् नि०२,१।

(३)—'चर्षणयो मनुष्याः (नि०२,३,९)। षष्ठी-बहुवचनं चतुर्थी-बहुवचनार्थे, यजमान-मनुष्येभ्य इत्यर्थः'-इति वि०।

४र ५ ४र ५र ४ ५　　४　　२ १　　२ र
IIपान्तमावोअन्धसः। इहा। इन्द्रमभाइ। प्रगा-
१　　१ २　　१ र र　　१　　२
यता२। इहा। विश्वासाहॅशता२क्रतूम्। इहा।
१　　२　　१　　३ ११
मॅहा२इष्ठञ्चा। इहा। षणा२इनाम्। इहा२३-
११
४५॥ १७॥

३　　४ २ ४ ५　　१
III पाऽपून्तम्। आ३वो३अन्धसाः। आइन्द्राम-
७ २ ५ १ २ ५ २
भाइ। प्रगा२या२३४ता। विश्वा२सा२३४हाम्। शा-
१ २ २　　१ २ १२　१ २　　१ २
३ताक्रा३तूम्। मॅहिष्ठञ्चर्ष। णाये३। ना२मा२३४-
५र र　　२ ११११
औहोवा। ओ३का२३४५ः॥ १८॥ ४१

मनुष्याणाम् "मॅहिष्ठम्" धनस्य दातृतमं यद्वा यजमानानां यष्टव्यत्वेन पूजनीयमिन्द्रं प्र गायतेति समन्वयः॥ १॥ ४१

---

II इहवद्वामदेव्यम्।
III ओकोनिधनं वैतहव्यम्।

अथ द्वितीया।

वसिष्ठऋषिः ।

२३१ २३१ २३ १२
प्रवइन्द्रायमादनꣳहर्य्यश्वायगायत ।

१२ ३१२
सखायःसोमपाव्ने ॥ २ ॥ ४२

१ ३२ ३ ५ २ १
I प्रवइन्द्रा२ । यमादा२३४नाम् । प्रवा२इन्द्रा ।

२ २ ३ ५ २ २ १
औ३हो । या२३४मा । दा३नाम् । हरा२अश्वा ।

२ २ ३ ५ २ २ १
औ३हो । या२३४गा । या३ता । सखा२याःसो ।

२ २ १ ५ ४ ५
औ३हो३ । मापो२३४वा । आ५व्नो६हाइ ॥ १८ ॥

१ १ २ २ ३ ५ २ २
II प्रवा२इन्द्रा । औ३हो । या२३४मा । दा३नाम् ।

१ १ २ २ ३ ५ २ २ १
हरा२अश्वा । औ३हो । या२३४गा । या३ता । सखा-

---

४२ उत्तरार्चिकस्य १,२,२,१ । १८

I,II शार्क्ये सामनी ।

२याःसो। औ३होइ। मापो२३४वा। आ५वोइ६-
हाइ॥ २०॥

III प्रवई३या। ई३या। इन्द्रोई३या। इ३या। या-
२३४मा। दा३नाम्। हरई३या। ई३या। आश्वो-
ई३या। ई३या। या२३४गा। या३ता। सखई३या।
ई३या। याःसोई३या। ई३या३। मापो२३४वा। आ-
पुवोइ६हाइ॥ २१॥

IV प्रवौहोवा२। इन्द्रौहोवा। या२३४मा। दा३-
नाम्। हरौहोवा२। आश्वौहोवा। या२३४गा।
या३ता। सखौहोवा२। याःसौहोवा३। मापो२३४वा।
आपुवोइ६हाइ॥ २२॥

V प्रव्रोदा३दा। औ३हो। इन्द्रोद्दा। औ३हो।

---

III, IV गौरीविति। V श्यावाश्वंसाम।

या२३४मा। दा३नाम्। हरिदा३दा। औ३हो।
आस्वोददा। औ३हो। या२३४गा। या३ता। सखि
दा३दा। औ३हो। याःसोददा। औ३हो३। मापो-
२३४वा। आ५वो६हाइ॥ २३॥

VI प्रवः। प्रवा। इन्द्रायेन्द्रा। यमादा१ना२म्।
हराइहर्यश्वा। यगाया१ता२। सखाया२३ःसो३। मा-
पो२३४वा। आ५वो६हाइ॥ २४॥ ४२

हे "सखायः!" "वः" यूयं "हर्य्यश्वाय"(१) हरि-नामकाश्वाय "सोमपाव्ने"(२) सोमानां पात्रे "इन्द्राय" "मादनं" मदकरं स्तोत्रं "प्र गायत" प्र पठत॥ २॥ ४२

---

VI गौरीवीतम्। सर्वाणि शाक्त्यसामानि, सर्वाणि वा गौरीवीतानि।

(१)—'हरी हरितवर्णौ अश्वौ यस्य सः, हर्य्यश्वः,-इति वि०। "हरी इन्द्रस्य"-इति नै० १,१५,१।

(२)—'आतो मनिन्क्वनिब्वनिपश्च' (३,२,७४)।

अथ तृतीया ।

मेधातिथिः ऋषिः प्रियमेधश्च ।

३ १ २　३ १ २ ३ १ २ ३ २ ३ १ २
वयमुत्वातदिदर्था इन्द्रत्वायन्तःसखायः ।
१ २ ३ १ २
कण्वाउक्थेभिर्जरन्ते ॥ २ ॥ ४३

५ ४ ५　२　५　२　२　५
I वयंवायाम् । ऊ२३४त्वा । ताद्दीदा२३४र्थाः ।
३ ४ ५२ ४ ५　२　५　२ २　२
इन्द्रत्वायन्तः । सखा२३४याः । कण्वा३१२३४ः । उक्थे-
५　२　२　५ ४
भिर्जरन्ते । एहियाईहा । होपुइ । डा ॥ २५ ॥

५ २ ४२　५　१२　१ २
II वयमूत्वातदिदर्थाः । ऐहिहा२इ । वयमुत्वातदि-
२　२　२ १　२　३　५　१
दर्थाइन्द्रत्वायन्तः सखा२३याः । का२३४ण्वाः । उ ।
२ १　५　२　१ १ १ १ १
क्थाइ । भिर्जो२३४वा । रन्ता३या२३४५ ॥ २६ ॥ ४३

हे "इन्द्र !" "त्वायन्तः" त्वामात्मनइच्छन्तः "सखायः" समानख्यानाः(१) "वयम्" "तदिदर्थाः" यत् त्वद्विषयं स्तोत्रं

---

४३ उत्तरार्चिकस्य १,२,३,१ । १९
I,II काण्वे इमे ।

(१) –'याग-परा इत्यर्थः'-इति वि० ।

अथ चतुर्थी ।

श्रुतकक्षऋषिः ॥

१ २ ३ १ २ ३ १र २र ३ १ २
इन्द्रायमद्वनेसुतम्परिष्टोभन्तुनोगिरः ।

३ १ २ ३ १ २
अर्कमर्चन्तुकारवः ॥ ४ ॥ ४४

४ ५र ४ ५ ४ २ १ र र २ १
1 इन्द्रायमद्वनाइ । सुताम् । इन्द्रायमद्वनेसुताम् ।

तदित् तदेवार्थः प्रयोजनं येषां, तादृशाः सन्तः(२) "त्वा" त्वाम् जरामहे(३) स्तुमहे । "उ"-इति पाद-पूरणः । "कण्वाः" कण्व-गोत्रोत्पन्नाः अस्मदीयाः पुत्राश्च "उक्थेभिः"(४) उक्थैः शस्त्रैः "जरन्ते"(५) त्वां स्तुवन्ति(६) ॥ ३ ॥ ४३

"मद्वने" "माद्यतेः क्वनिप्" मदन-शीलाय "इन्द्राय" तदर्थं सुतम्" अभिषुतं सोमं "नः" अस्मदीयाः "गिरः" स्तुति-लक्षणा-वाचः(१) "परिष्टोभन्तु" "स्तोभतिः स्तुति-कर्मा (नि० ३,१४,४)"

---

४४ उत्तरार्च्चिकस्य १,२,४,१ । २०

(२)—उत्तर-वाक्ये जरन्ते इति दर्शनात् इहापि जरामहे इत्यध्याहारः ।

(३)—सार्व्वमिक-बहुल-वचनात् भिसऐसभावः (७,१,११) ।

(४)—'जरति'-इति अर्च्चति-कर्मसु सप्तमं पदम् नि०३,१४ ।

(५)—विवरण-मते वयं कण्वाः जरन्ते इत्येकदलमेव व्याख्यानम् । तथाचोक्तम्—
'कण्वाः' कण्वस्य पुत्राः, मेधातिथि-प्रभृतयः-इति ।

(१)—'गिरः स्तुतयो गिरो गृणातेः'-इति नै०१,३,१५ ।

२ १ २ १र २ १२
पराइष्टो२३भा। तुनोगिरो। अर्कमार२३र्चा। तुकारा-
२ १
२३वा३४३ः। ओ२३४५इ। डा॥ २७॥

५ र र १ २ र १ २र
II इन्द्रायमद्वनेद्वाउ। ओइह्व३ताम्। परिष्टो।
१ ० २ १ १ र ०
भा। तुनोर२३ह्वाइ। गाइरार२ः। परिष्टोभा। तुनोर२-
२ १ १ १ ३ ५र
३ह्वाइ। गाइरा२ः। अर्का२३म्। आर२र्चा२३४औ-
र २ २ १ १११
होवा। ए३। तुकाउ२वा२३४५ः॥ २८॥

४५र ४५र ४ ५र ४५ २ १ २
III इन्द्रायमद्वनेसुतम्। इन्द्रायमोवा। ह्वा३नाइह्व
२ १ २र १ २ २ १ २
३ताम्। परिष्टो। भार३। ह्वा३ह्वा३। तुनोर्गार२३-
५ १ २ २ २ १र २
४इराः। आर्कमर्चा३। हा३हा। तुकारार२३वा३४३ः।
१
ओ२३४५इ। डा॥ २९॥ ४४

परितः सोमं स्तुवन्तु। ततः "कारवः" स्तुतिकारिणः स्तोता-

---

I,II गौरीवीते इमे।
III इदं औतकक्षम्।

अथ पञ्चमी।

इरिमिठऋषिः।

२ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
अयन्तइन्द्रसोमोनिपूतोअधिबर्हिषि।
१ २ ३ २उ ३ १२
एहीमस्यद्रवापिब॥ ५॥ ४५

५ २ १र २ १ २ १र र
I अयन्तआ। द्रसोमो। होवा३होइ। निपूतो-
२ १ २ ३ ५ १ २र १ १
आ३। धीबर्हा२३४इषी। आइहीमस्या२३। द्रा२वा
५र र २ ५
२३४औहोवा। पी२३४बा॥ ३०॥

५ ५ १र र १ र
II अयन्तइन्द्रसो४माः। निपूतोअधिबार्हाइषीर। ए-

रश्च(२) "अर्कम्"(२) सर्वैरर्चनीयं सोमम् "अर्चन्तु" पूजयन्तु॥४॥४४

हे "इन्द्र!" "ते" तुभ्यं त्वदर्थम् "अयं सोमः" "बर्हिषि अधि"

---

४५ उत्तरार्चिकस्य १,२,५,१। २१
I,II इमे हेसौमित्रे।

(२)—'कारुः'-इति स्तोतृनामसु तृतीयम् नि०३,१५।

(३)—'अर्कं देवं सोमम्'-इति वि०। "अर्को देवो भवति, यदेनमर्चन्त्यर्को मन्त्रो भवति, यदेतेनार्चन्त्यर्कमन्नम् भवत्यर्चति भूतान्यर्को वृक्षो भवति स-वृतः कटुकिम्ना"-इत्यादि नै० ५,१,५-६।

१ २ र १ १ र २
हो२इमास्या। द्रवापाइवा२। आइहीमस्याद्रवा३१उवा
५
२३। पी२३४वा॥ ३१॥

४ ३ ४ ३ ५ १ र ५र ४ ५ ४
III अयन्तइन्द्र सो४मः। ना२३४इ। पूतोअधिबर्हि-
५ १ र र २ १ २ र १ २ १र
षी। निपूतोअधिबर्हा२३इषी। ऐहोइमा२३स्या। द्रवा
२ ५
पा२३४५इबा६५६। ई२३४हा॥ ३२॥ ४५

वेद्यामास्तीर्णे दर्भे(१) "निपूतः" नितरां दशापवित्रेण शोधितः अभिषवादि-संस्कारैः संस्कृतः इत्यर्थः "इम्" इदानीम्(२) "अस्य"(३) इमं सोमं प्रति "एहि" आगच्छ, आगत्य च यत्र रसात्मकः सोमो ह्रयते तं देशं प्रति "द्रव"(४) शीघ्रं गच्छ, तदनन्तरं तं सोमं "पिब"॥ ५॥ ४५

---

III इहवद्दैवोदासम्।

(१)—'अधिबर्हिषि बर्हिषः उपरि'-इति वि०।

(२)—'ईम्'-इति पद-पूरणः-इति वि०। निरुक्तकारोऽप्याह—'पद-पूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति' १,३,१४।

(३)—'अस्य सोमस्य षष्ठी-निर्द्देशात् सङ्गम'-इति वि०।

(४)—'एहि, द्रव—इति द्वावपि गत्यर्थौ, अभ्यासे च भूयांसोर्थाः प्रतीयन्ते'-इति वि०।

अथ षष्ठी।

मधुच्छन्दा ऋषिः।

२ २३१२३१२ ३१२
सुरूपकृत्नुमूतयेसुदुघामिवगोदुहे।
२ २३१२
जुहूमसिद्यविद्यवि ॥ ६ ॥ ४६

४५ २१ २२१ २१२८ १
II सुरू। पकृत्नुमूतयाइ। सुदुघाम्। इवगो२।
१२ २ ५ २१८ २ १ २
दुहया३१उवा२३। ऊ३४पा। जुहूमा२३सी। द्यविद्यविया३१
२ ५
उवा२३। ऊ२३४पा॥ २३ ॥

"सु-रूप-कृत्नुम्" शोभन-रूपोपेतस्य कर्म्मणः कर्त्तारम् इन्द्रम् "ऊतये" अस्मद्रक्षार्थं "द्यविद्यवि" प्रतिदिनं "जुहूमसि"(१) आह्वयामः। आह्वाने दृष्टान्तः—"गोदुहे" गो-धुगर्थं "सुदुघाम् इव" सुष्ठु दोग्ध्रीं गामिव, यथा लोके गोर्यो दोग्धा तदर्थं तस्याभि मुख्येन दोहनीयां गामाह्वयन्ति तद्वत्(२)॥ वस्तोरित्यादिषु

४६ उत्तरार्च्चिकस्य ४,१;१५,१। २२

I ग्रामगेयगानम्।

(१)—मसइगागमे (७,१,४६सू०) रूपम्।

(२)—'एतदुक्तं भवति,—यथा गो-दोह-कर्मार्थं तस्या एव गोर्दोहनार्थम् आह्वयति, तद्वत्'-इति वि०।

५ र र २१ १ १ २र
II सुरूहाहाउ। पक्कल्नुमू२ताया२इ। सुदुघाम्।
१ १२र रर२र२र २ २ १
इवगो२। दुहे। ऐहोयैहो१। जुहो२। ऊवा२इ।
१ १ २र र२र २
मासो२। द्यविद्यवि। ऐहोयैहो१ ॥ ३४ ॥

२र १ ५ १ .र २
III सुरूपकल्नू३मूता२३४याइ। ओइसुरूपकल्नूमू१जा-
१ र २ १र
या२इ। ओइसुदुघामिवागो१दुहा२इ। जुह्वमसा२इ।
१२३ ५ ४ ५ १ १ १
द्यविद्या२३४वी। ऐहो। जूहू२मासो२। द्यविद्या।
४ ५र ४र ५र ५ २ २
वोवी२३। आऔहोइ। आऔहो६वा। ए३। द्यवी३-
१११११
ई२३४५ ॥ ३५ ॥

४ ५र ४ १ १ २१र २ १ २
IV सुरूपकृ। त्नूमूरतयाइ। सुदुघामो३। वागो-

नामसु द्यविद्यवीति द्वादशाहर्नामानीति पठितम्(१) ॥ ६ ॥४६

---

II, वीङ्कम्। III,IV ऐशवे वैशवे वा औदले।

(१)—अहर्नामानि द्वादश—इति यत्रं वक्त-परिगणनं, 'वस्तोः'-इत्यादिषु द्वादशसु नामसु तदनुगतं 'द्यविद्यवि'-इति निघण्टौ पठितम् इत्यर्थः। तथा च नैरुक्तम्,—"अहर्नामान्युत्तराणि द्वादश, अथः कस्मात्? उपाहरन्त्यस्मिन् कर्माणि"-इत्यादि २,२,२८।

अथ सप्तमी ।

त्रिशोकऋषिः* ।

२ १ २   २ २ ३ १ २   ३ १ २
अभित्वावृषभासुतेसुतꣳसृजामिपीतये ।
३ १ २   ३ १ २
तृम्पाव्यश्नुहीमदम् ॥ ७ ॥ ४७

२   ५   ४ ५ र ४   १   १   २ १र
हू२३४हाइ । सुदुघामा । वागोऽ२दुहाइ । जुहमा२३-
२   १   ४   २   ५
सो३ । द्या२३वो३ । द्या३४५वौ६हाइ ॥ ३६ ॥* ४६

हे "वृषभ !"(१) कामानां वर्षितरिन्द्र ! "त्वा" त्वाम्(२)

* 'तृशोक'-इति वि०-पाठः ।

४७ उत्तरार्च्चिकस्य १,२,७,१ । २३

"वस्तोः१ घुः२ भानुः३ वासरम्४ स्वसराणि५ ६ घर्मः७ घृणिः८ दिनम् दिवि१० दिवे-दिवे११ द्यविद्यवि१२"-इति नि०१,९ ।

(१) - ऋचि वृषभा इति 'सुपां सु लुगिति (७,१,३९) आत्वे रूपम् ।

(२ —'द्वितीयैकवचनमिदं चतुर्थ्येकवचनस्यार्थे द्रष्टव्यम्'—इति वि० । तथाच "चतुर्थ्यर्थे बहुलञ्छन्दसि (२,३,६२)"-इति हि स्मरणम् ।

* इति ग्रामे गेय-गाने चतुर्थः प्रपाठकः ॥४॥

५ ४ ५र र ४ १ २ र १
I ओम्। अभित्वावृषभासुताइ। सुतᳪसृजा। मिपाइ-
१ १ २ २
ता१या२इ। त्पावा१या२। अुचा३१उवायेइ। मार-
५
३४दाम ॥ १ ॥

५ र र र र २र १ २
II अभित्वावृषभासुतेअभ्याहाउ। त्वा३षाभा१सू-
१ २ र १ २ ३ २ १
ता२इ। सृतᳪसृजा। मिपाइता१या२इ। त्पा३हो-
३ २ १ २ १र २ १
इ। विया३हो। अुहोमा२३दा३४३म्। ओ२३४५इ।
डा ॥ २ ॥

५ ४ ५र र ४र ५ ४ ५ २ र १
III अभित्वावृषभासुते। सुतᳪसृजोवा। मिपीता-
१ २र १र २ १ १
या२इ। सुतᳪसृजामि। पीता२३याइ। चा२३म्पाइ।
१ २ ५र र २ र १ ३ १ १ १ १
वा२या२३४औहोवा। अुहोमदा२३४५म् ॥ ३ ॥ ४७

"सुते" सोमेऽभिषुते सति तं "सुतम्" अभिषुतं स.मं "पीतये"(२)

---

I,II,III आर्षभानि त्रीणि सैन्धुक्षितानि वा बाभ्राश्वानि वा।

(२)—"स्थागापापचोभावे (३,३,९५)"-इति क्तिनि रूपम्।

अथ अष्टमी ।

कुसीदऋषिः* ।

१ २ ३ १र २र३ १ २ ३ २
यद्दन्द्र चमसेष्वा सोमश्चमूषु ते सुतः ।
१र २र ३ १ २
पिबेदस्य त्वमीशिषे ॥ ४ ॥ ४८

२ २ १ ४ ५ ४र र ५ १र २ १र २र
I याद्दोन्द्रा२३ । चमसेषुवाईया । सोमश्चमूषुतेसु-
१ २ र १ २ १ २ २ १
तः । सोमश्चमू । षुताइस्ह२३ताः । पाइबे२द्वाइ । आ-
२ २ १र २ १
स्या२हाइ । त्वमोशा२३इषा३४३इ । ओ२३४इ । डा ॥

॥ ४ ॥

५ र ५र १र र २ २ २ र
II यद्दंद्रचामाईसेषुवा । सोमश्चमूषुता१इस्ह३ताः । सो

पानाय "अभिसृजामि"(३) "तृम्प"(४) तृप्य "मदं" मदकरं सोमं "व्यश्नुहि"(५) विशेषेण प्राप्नुहि ॥ ७ ॥ ४७

---

* 'कुसीदी'-इति वि० ।

---

I,II कौत्से, पाश्ववाजे वा दाशवाजे वा ।

(३)—'आभिमुख्येन ददामीत्यर्थः'-इति वि० ।

(४)—ऋचि तृम्पा इति 'द्व्यचः (६,३,१३५)'-इति दीर्घः ।

(५)—ऋचि व्यश्नुही इति दीर्घश्छान्दसः ।

अथ नवमी ।

शुनःशेप ऋषिः ।

१ २　३ १ २ ३ १ २
योगेयोगेतवस्तरंवाजेवाजेहवामहे ।
१ २ ३ १ २ ३ १ २
सखायइन्द्रमूतये ॥ ९ ॥ ४९

२ १ २ २　१　र २
मखमू२ । षूश्ताइह३ताः । आऽ२इ । पिबेदस्यो२३-
५　३ २　४
४हाइ । त्वमा३इशाषइषा६५६इ ॥ ५ ॥ ४८

हे "इन्द्र !" "ते"[२] त्वदर्थं "सुतः" अभिषुतो यः "सोमः" "चमसेषु"(१) एतन्नामकेषु पात्रेषु तथा "चमूषु" [चमन्ति(२) भक्षयन्त्यत्रेति] चम्बोग्रहाः तेषु च "आ" सर्वतः अस्ति । "अस्य"(३) तमेतं सोमं "त्वम्" "पिब इत्" [इदवधारणे] पिबैव । कथं मम सोम-पान-योग्यता ? तत्राह—हे इन्द्र ! त्वम् "ईशिषे" तस्य त्वमीश्वरो भवसि खलु ; यत एवं ततः पिबेति समन्वयः [ईश ऐश्वर्ये (अ०आ०) लटि "ईशः से (७,२,७७)" -इति इडागमः ॥ ८ ॥४८

"योगे योगे" प्रवेशे प्रवेशे तत्तत्कर्मोपक्रमे(१) "वाजे वाजे"

---

४९ उत्तरार्चिकस्य १,२,११,१ । २४

(१)—'बहुवचनं, बहुयज्ञापेक्षम् ; बहुषु यज्ञेषु अधिषवण-फलकेषु'-इति वि० ।

(२)—चम्, छम्, जमु, अदने भ्वा० प० ।

(३)—'अस्य सोमस्य, षष्ठी-निर्देशात् एकदेशमिति वाक्यशेषः'-इति वि० ।

(१)—'योगः नियोगः व्यापारः कर्म हलवधादि, तस्मिन् सर्वस्मिन्'-इति वि० ।

४र ५र र र  र  ४ ५ ४  १र र २र र  र  र
योगेयोगेतवस्तराम्। वाजेवाजेहवामहे। स-

१र  २  २ १  ५  ४  ५
खाया२३ई३। इन्द्र२३४वा। ता५यो६हाइ॥ ६॥

४र ५र र र  ५  १र ३र र ३र  १ ३र
II योगेयोगेतवस्ता६राम्। वाजे२वाजे२हवा२महे३।

१ २ २  १  १  १ १  २  १
होवा३हाइ। साखा२याई२३। होवा३हाइ। इन्द्र२३।

१ ३  ५र र  २  ५
ता२या२३४औहोवा। ऊ२३४पा॥ ७॥

५र र र र र र र  ४ ५  १र र २र र
III योगेयोगेतवाहाउस्ताराम्। वाजेवाजे। हवा-

१  २  ५  १ २र १
२माहाइ। ऊवाइ। औ३हो२३४वा। साखायई।

१  २  ५  ३ र २ १
इन्द्र२तायाइ। हुवाइ। औ३हो२३४वा। सखायआ।

५  २  १  १ १ १ ५
हुवा२इ। औ३हो२३४५वा६५६। इन्द्र३तये२३४५॥८॥४९

कर्म-विघातिनि तस्मिन् तस्मिन् सङ्ग्रामे(२) "तवस्तरम्" अति-

---

I,II,III सौमेधानि, पूर्वतिथानि वा पौर्वातिथानि वा।

(२)—अन्ने अन्ने हविर्लक्षणे उपकल्पिते'-इति वि०। 'वाजे'-इति निघण्टौ सङ्ग्राम-नामसु चत्वारिंशत्तमं पदम् (२,१७)। 'वाज'-इति निघण्टौ अन्न-नामसु द्वितीयं पदञ्च (२,७)।

अथ दशमी ।

मधुच्छन्दा ऋषिः ।

२उ　३　१　२　३१　२　३१र　२र
आत्वेतानिषीदतेन्द्रमभिप्रगायत ।
१　२　३　१　२
सखायःस्तोमवाहसः ॥ १० ॥५०

॥ इति द्वितीय-दशति ॥

३र　२　　　२र　　　५र　　५　　२　　१
I आतू३४ । एतानि । षीदाईता । इन्द्रमभाइ ।
२ र १　　२र　१र　　　२　　२　　१　　२
प्रगायता । साखायःस्तोम । वा । औ३हो । ववा२हा

शयेन बलिनम्(२) "इन्द्रम्" "ऊतये" रक्षार्थं "सखायः(४) सखि-वत् प्रिया वयं "हवामहे" आह्वयामः ॥ ८ ॥ ४९

[तु शब्दः क्षिप्रार्थो निपातः] 'आ तु आ इत'(१) [-इति

---

५० उत्तरार्चिकस्य १,२,१०,१ । २५
I दैवातिथं मैधातिथं वा ।

(२)—'तवः'-इति निघण्टौ बल-नामसु पञ्चमं पदम् (२.९) ।

(४)—'हे 'सखायः' ऋत्विजः !'-इति वि० ।

(१)—इता-इति ऋचि निपात-लक्षणोदीर्घः (६,३,१३६) ।

५ २१ २र १र २ १
२३४साः। इयाइ। साखायःस्तोम। वा। औ३हो।
१ २ ५
ऊम्मा२३। हा३४५सोऽ६हाइ॥ ८॥ ५०

द्वाभ्यामाङ्भ्यां मन्त्रे तु इत-शब्दोऽभ्यसनीयः](२) हे "सखायः" ऋत्विजः! क्षिप्रमस्मिन् कर्मणि आगच्छतागच्छत [आदरार्थोऽभ्यासः] आगत्य च "निषीदत" उपविशत "इन्द्रम्" "अभिप्रगायत" सर्वतः प्रकर्षेण स्तुत। कीदृशाः सखायः? "स्तोमवाहसः" त्रिवृत्-पञ्चदशादि-स्तोमान्(३) अस्मिन् कर्मणि वहन्ति प्रापयन्ति॥ १०॥ ५०

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने
द्वितीयाध्यायस्य पञ्चमः खण्डः॥ ५॥

---

(२)—उपसर्गानुरोधात् क्रियायाश्चावर्त्तनमित्यर्थः।विवरणे तु एक श्चा व्यर्थः स्वीकृतः।

(३)—त्रिधा वर्त्तते इति त्रिवृत्। एवं पञ्चदशादयश्च स्तोमाः। ते च "तिसृभ्यो हिङ्करोति स-प्रथमया, तिसृभ्यो हिङ्करोति स-मध्यमया; तिसृभ्यो हिङ्करोति स उत्तमयोद्यती त्रिवृती विष्टुतिः"-इत्यादि ताण्ड्याद्यनुशासनादभिगन्तव्याः। ताण्ड्ये हि आद्वितीयाध्यायारभ्भतृतीय ध्यायान्तं समस्तमेतद्दृत्तेष्वेव नियुक्तं श्रुतम्। तत्र च त्रिवृत्१ पञ्चदशः२ सप्तदशः३ एकविंशः४ त्रिणाववः५ त्रयस्त्रिंशः६—इति पृष्ठ्यषड़हस्य षट् स्तोमाः क्रमेण विहिताः। अनन्तरं छन्दोमानां चतुर्विंशः१ चत्वारिंशः२ अष्टचत्वारिंशः३ —इति त्रयस्तोमाः व्यवस्थिताः। इत्थं सङ्कलनया नवस्तोमाः, तथाचात्र आदिपदात् सप्तदशादेर्ग्रहः।

अथ षष्ठे खण्डे—

सेयं प्रथमा।

विश्वामित्र ऋषिः।

३ १२　　२२　३ १　२
इदꣳह्यन्वोजसासुतꣳराधानाम्पते।
३ २ १ २
पिबात्वा३स्यगिर्वणः॥ १॥ ५१

५　５　２　१२　　　　१ २ १ २
I इदा३म। ह्निया३नू३ओ१जासा२। सुतꣳराधा।
१ २　　१ र　७　　३२　१ २
नाम्पा१ता२इ। पिबातुवस्यागिर्वाणा२३४ः। पिबा३४तुवा३।
१ ३　५ र　२　५
स्या२गा२३४औहोवा। वा२३४णाः॥ १०॥

हे "राधानां" धनानां (१) "पते"! "गिर्वणः"(२) गीर्भिः स्तुतिभिर्वननीय! इन्द्र! "ओजसा" बलेनोपहितस्त्वं "इदम्(३)

५१ उत्तरार्चिकस्य १,२,९,१।२६
I आङ्गिरसं माधुच्छन्दसं वा।

(१)—'राधः'-इति निघण्टौ धन-नामसु अष्टादशं पदम् (२,१०)।

(२)—गिर्वणस्-इति सान्तः शब्दः। "गिर्वणा देवा भवन्ति गीर्भिरेनं वनयन्ति। 'जुष्टं गिर्वणसे बृहत्'-इत्यपि निगमो भवति"-इति नैरुक्तम्, ६,३,१६।

(३)—'नपुंसकलिङ्गं व्यत्ययेन'-इति वि०। तथाच इदम् इममित्यर्थः। सायण-मते त्वयं 'सुपां सुलुगित्यादिना तृतीयाया लुकि रूपम्।

५ ५ ऽ २ ३ ५ १ २
II इद्रं‌ ह्यिया४औहो। नूइओजा२३४सा। सुतं‌-
१ २ ऽ २ ५ १ र ४
राधा। ना३२म्। पा२३४ताइ। पिबातुवस्या२३। ग।
५ १ ५र ५ ४
वाहाइ। वा२३४णाः। एहियाइहा। होप्इ।
डा॥ ११॥

५ ५र २ १ २ १ २र
III इद्रं‌ ह्यनूइओजसा। सुतं‌राधा। नाम्पातौ।
र १ १ २ १ २र र २
होवा३हाइ। पिबातुव। स्यगाइर्वाणौ। होवा२हाइ।
१ र २ १र १ ३ ५र
पिबातुवौ। होवा३हा। स्यगाये३ः। वा२ना२३४औ-
र २ ६ ३ १ १ १ १
होवा। घृतस्नुता२३४५॥ १२॥ ५१

अनु" अनेनानुक्रमेणेत्यर्थः "ओजसा" बलेन ग्रावभिः(४) "सुतम्" अभिषुतं "अस्य"(५) इमं सोमं "तु" क्षिप्रं "पिब(६) हि"(७) ॥१॥ ५१

---

II आङ्गिरसं क्रौञ्चं वा।

III आङ्गिरसं घृतस्नुन्निधनम् प्राजापत्यं माधुच्छन्दसं वा।

(४)—पाषाणविशेषैरित्यर्थः। इह निरुक्तम् "ग्रावाणो हन्तेर्वा गृणातेर्वा गृह्णातेर्वा"-इत्यादि तदत्र गृह्णातेरेवोपयोगः।

(५)—'अस्य षष्ठी-निर्देशात् एकदेशमित्यर्थः'-इति वि०।

(६)—क्वचि पिबा इति द्व्याच इति दीर्घः।

(७)—'हि' अत्र द्वावपि पादपूरणौ।

अथ द्वितीया ।

मधुच्छन्दा ऋषिः ।

२ १र  २र ३ १ २  ३ १ २  ३ १ २
महाँ इन्द्रः पुरश्चनो* महित्वमस्तुवज्रिणे ।

१र  २र ३ १र  २र
द्यौर्न्नप्रथिनाशवः ॥ २ ॥ ५२

४  ५  २ १  २  १
I महाँ इन्द्राः । पुरश्चनो । मा१हो२त्वामा२ ।

१  १  १र  २
स्तुव । ज्रिणाइ । द्यौ२र्नाप्रा२ । थिनाशा२३वा३४३ः ।

१
ओ२३४५इ । डा ॥ १३ ॥

५ र र ४ ५  २ १ २  २  १  ३
II माहाहाइन्द्राः । पू३राश्चा३नो । महा२इत्वा२

५  २ र  ४  र१
३४मा । स्तुवौ३हौ३ । हवा५ज्रिणाइ । द्यौर्नप्र ।

अयम् "इन्द्रः" "महान्" शरीरेण प्रौढः "परश्च" गुणैक-

---

* "पुरश्चनो"-इति पाठः क० ख० ए० क०-प० ख०-प० इति षट्सु, विवरणसम्मतश्च । "परश्च नु"-इति भाष्य-सम्मतः पाठः, नान्यत्र क्वचिदपि ।

२ १ ०        ५   २ ३ऽ २    ४ ५
थिनाशवा२३:। द्यौ१र्नी२३४शा। थिनौ३द्दौ२। द्दवोवा।

४    ५
शा५वो६हाइ॥ १४॥

४ र       ४   ३ २    २
III महा ३इन्द्रा५ पुरश्चना:। माहित्वा३२३२३मा।

२ २ १ऽ    २   र    २   १र २ २
स्तुवज्रा३२३२३इणाइ। द्यौर्नी३२३२३प्रा। थिनाशवा-

१
३२३४३:। ओ२३४५इ। डा॥ १५॥ ५२

त्कृष्ट:, किञ्च "वज्रिणे" वज्रयुक्ताय "महित्वं" पूर्वोक्तं विविधमाधिक्यम् सर्वदा "अस्तु," [स्वभाव-सिद्धस्यापि भक्त्या प्रार्थनमेतत्,] किञ्च "द्यौर्न" द्युलोकइव "शव:" बलम्(१) इन्द्रस्य सेनारूपं "प्रथिना" पृथुत्वेन पुत्यताम्--इति शेष:(२) [यथा द्युलोक: प्रभूत: एवमस्य सेना प्रभूतास्तु]। "नु"-शब्दो यद्यपि

---

I,II,III वात्राणि, प्रैयमेधानि वा वैयश्वानि वा आश्वानि वा उद्वाहदमनानि वा।

(१)—'शव:'-इति निघण्टौ बलनामसु चतुर्थम् २,७।

(२)—'स्थितिरनुषज्यते'-इति वि०।

अथ तृतीया ।

कुसीदो काण्व ऋषिः ।

१र  २र   ३ १ २ ३ १ ३ १र   २र
आतून इन्द्र क्षुमन्तञ्चित्रं ग्राभꣳ सङ्गृभाय ।
३   १र  २र
महाहस्ती दक्षिणेन ॥ ३ ॥ ५३

क्षिप्र-नामसु(३) नु-मक्ष्वित्यादिषु पठितः(४) तथापि तदर्थत्वासम्भवात् समुच्चयार्थोऽत्र गृहीतः(५) ॥ न शब्दो लोके प्रतिषेधार्थ एव, स्वाध्याये तु प्रतिषेधार्थ उपमार्थश्चेति द्विविधः; यत्र पदे नान्वीयते, तस्मात् पूर्वं प्रयुज्यमानः प्रतिषेधार्थः, उपरिष्टात्-प्रयुज्यमान उपमार्थः; तथाच यास्क उदाहरति—"उभयमन्वध्यायं नेन्द्रं देवममंसतेति प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत् प्रतिषेधति, दुर्मदासो न सुरायामित्युपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमिमीते(१,२,६,)" इति । अत्रोपमा-वाचिनो क्षु-शब्दस्योपरि-प्रयुक्तत्वादुपमार्थः स्वीकृतः ॥ २ ॥ ५२

---

५३ उत्तरार्च्चिकस्य १,२,६,१ । २७

(३)—"क्षिप्र-नामान्युत्तराणि षड्विंशतिः । क्षिप्रं कस्मात् ? सङ्क्षिप्तो विकर्षः"-इति नैरुक्तम् २,२,१० ।

(४)—निघण्टोर्द्वितीयाध्यायीय-चतुर्दशखण्डादनन्तरम् ।

(५)—आश्चर्य्यमेतत् ? क्वास्ति मन्त्रे 'नु'-इति । विवरणकृता तु यथाश्रुतस्य 'नः' इत्यस्य विवरणं पादपूरणार्थइत्युक्तम् । पद-ग्रन्थे खलु नः, मक्षु इत्येवं छेदः श्रूयते, तथाच नः मक्षुत्वम् अस्तु इत्येतादृशेऽर्थे कोवा वादः इत्यपि न गम्यते !! ।

I आतूनआ। इन्द्रुमार३न्ताम्। चाइत्रंग्राभार३१९-
हाइ। संगृरभाया। महाहस्तोर३४हाइ। दक्षार३इ-
णाइना। माहार३। हार्स्तो२३४औहोवा। दक्षिणे
३ना२३४५॥ १६॥

II आतूनइंद्रक्षुमान्ताम्। चित्रार३ग्ना२३४भाम्।
सङ्गृभार३४या। मा३हा३। हार्स्ता२३४औहोवा।
दक्षिणेना२३४५॥ १७॥

हे "इन्द्र"! "महाहस्ती"(१) महाहस्तवान् त्वम् "तु"(२) तदानीमेव "नः" अस्मभ्यं दातुं "क्षुमन्तं" शब्दवन्तं स्तुत्यमि-

---

I,II गौरीविते।

(१)—महांचासौ हस्तश्च महाहस्तः, तस्मादिदं तृतीयैकवचनम्, तस्य "इयाडियाजिकाराणामुपसङ्ख्यानम् (७,१,३९)"-इतीकारादेशः महता हस्तेनेत्यर्थः।

(२)—ऋचि तु इति "ऋचि तु-नु-घ-मक्षु-तङ्-कु-त्रोरुष्याणाम् (६,३,१३३)"-अनेन दीर्घः।

४र २५ ४ ५ ५ २ १र
III आतूनइ। द्रच्चुमा६न्ताम्। चित्रंग्राभꣳसङ्गृभा२
१ २ १र २ २ ३ ५ २र१
या। चित्रंग्राभꣳसम्। गृ। औ३होइ। भा२३४या। ऐहोइ।
र र १ २र १ ३र ५ ४
मह्राहस्तोदत्ता२३होइ। औहो। वाहो२३४वा। णा५इनो
५
६हाइ॥ १८॥

५र र ५ २ १र र
II आतूनइन्द्रद्युमा६न्ताम्। चित्रं ग्राभꣳसङ्गृभाया।
२ १र २ ५ २ ५
चित्रङ्ग्राभꣳसम्। गृ२३। ई३४हा। भा२३४या।
२र१ र र १ २र १ ३र
ऐहोइ। मह्राहस्तोदत्ता२३होइ। औहो। वाहो२३-
५ ४ ४ ५
४वा। णा५इनो६हाइ॥ १९॥ ५३

त्यर्थः "चित्रं" चायनीयं "ग्राभं"(३) ग्राहकं [ग्रहणार्हं वा] धनं "दक्षिणेन" हस्तेन "आ सङ्गृभाय"(४) आभिमुख्येन सङ्गृहाण॥ ३॥ ५३

---

III,IV आपालवैणवे, वेणवे वा आपाले वा आकूपारे वा पारववे वा।

(३)—हग्रहोरिति भत्वे रूपम्। अभिषवादिभिः संस्कारैः संस्कृतमित्यर्थः।
(४)—"छन्दसि शायजपि (३,१,८४)"-इति शायच्। हग्रहोरिति भत्वम्।

अथ चतुर्थी।

प्रियमेध ऋषिः।

३ १२ २२ ३ १ २ ३ १ २ ३ २
अभिप्रगोपतिङ्गिरेन्द्रमर्च्चयथाविदे।

३ २ ३ २ ३ १ २
सूनुꣳसत्यस्यसत्पतिम्॥ ४॥ ५४

४ ५ ४ ५ २ २ १ १ २ ७ १ २
I अभो अभो। प्रगो३पातिङ्गिरा २। इन्द्रमर्च्चयाथा

२२ २ १ २ ५ १ ३
१विदा२इ। सूनू३ꣳहाइ। सात्या२३४हा। स्या२सा

५२ २ २ १ १ १ १ १
२३४औहोवा। पतो३मे२३४५॥ २०॥

४ ५ ४ ५ २ १ २ ३ १
II अभो अभो। प्रगो। पतिङ्गिरा। इन्द्राम्।

"गोपतिं" गवां(१) स्वामिनम् "इन्द्रम्" "अभि अर्च(२)"

---

५४ उत्तरार्च्चिकस्य ७,१,१,१। २८

I,II धुरोः सामनी।

(१)—'गोशब्देनात्र सोमउच्यते'-इति वि०।

(२)—'मध्यम-पुरुषैकवचनमिदमुत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम्, लोट् लडर्थे। 'अभ्यर्च' आभिमुख्येन स्तौमीत्यर्थः—इति वि०।

२ २ ३ ५ १ ५ २ १ ४२ ३
अर्चायार२३४था। ऊ३ऊ३म्। आर२३४इविदाइ। सूनुं

४ ३ ४ ५ १ ५ २ १ ५ ४
सत्यस्यमा। ऊ३ऊ३म्। ओर२३४वा। पा५। तोई-

५
हाइ॥ २१॥

५ ३ २ ४ ५ १ र
III अभि। प्रगोर। पतिं गिरा। इन्द्रमर्चयथावि-

१ २ ४ १
दार२३ई। सूनुंसत्या३१२३। स्यसापूत्पतायिम्। सूनुं

२ ४ ५ ४ ५
सत्या३१२३। स्य सावा। पा५। तोईहाइ॥ २२॥ ५४

"गिरा" स्तुत्या प्रकर्षेण पूजय "यथा विदे"(३) स यथा स्वात्मानं स्तुत-प्रकारं जानाति [यथा वा यागं प्रति गन्तव्यमिति जानाति] तथाऽर्चेति। कीदृशमिन्द्रम्? "सत्यस्य" यज्ञस्य "सूनुम्" पुत्रं(४) [तत्रानुरक्तत्वात् सूनुरित्युपचर्यते] "सत्पतिं" सतां यजमानानां पालकम्॥ ४॥ ५४

---

III महागौरीवितम् गौरीवितं वा।

(३)—'कथं पुनः स्तौमि? 'यथाविदे' यथा जानामीत्यर्थः'-इति वि०।

(४)—कथम्पुनः सत्यस्यपुत्रः? उच्यते—त्रैविद्य-लक्षणं ब्रह्म सत्यं तेन (ब्रह्म-नामकेन

अथ पञ्चमी।

वामदेव ऋषिः ।

१ २ २ १र २र ३ २ ३ १ २ ३ १ २
कयानश्चित्रआभुवदूतीसदावृधःसखा ।
३ १ २ ३ २
कयाशचिष्ठयावृता ॥ ५ ॥ ५५

५ र २ १ २ २ र १ २ १
I कयानश्चो। त्रआभू३वात्। ऊताइस। दा।
३ ५ १ २ २ १ ४ २
वाइः सा२३४खा। कयाशा३चो३। ष्ठा२३या३। वा
५
३४५ओ६हाइ ॥ २२ ॥
५र र र १र र २ १ २ २ ५र र
II हावोइ। होवाइकयानश्चित्रआभू३वा३४त्। होवाइ।

"सदावृधः" सर्वदा वर्द्धमानः "चित्रः" चायनीयः(१) "सखा"

---

५५ उत्तरार्च्चिकस्य १,१,१२,१ । २८
I,II वाचः सामनी ।

ऋत्विजा। यानि हवींषि हूयन्ते तैर्जन्यते यस्मात्, तस्मात् सत्यस्य सूनुः। अथवा सत्यमन्नं हविर्लक्षणं तेन सञ्जायते आप्यायते वा, तस्मात् सत्यस्य सूनुः'-इति वि०।

(१)—'चितः विचित्रः पूज्यो वा' इति वि०।

र र र र २ १ २ २ ५र र ५र र
होवाऊतीसदा । वृधाः सा३खा३४ । होवाइ । होवाइ ।

र २ १र २ ५र र २
कयाश्चाइ । ष्ठया । वा२र्त्ता२३४औहोवा । ऊ२३-

५
४पा ॥ २४ ॥

३ र ४ २ ४र ५ १ र २ १र
III का॒ऽ५या । नश्चा३इत्रा३आभुवात् । ऊ । तीसदावृ-

२ १ २ र २ १ २ २
धःस । खा । औ३ हो हाइ । कया२३श्चाइ । ष्ठ

र २ १ १ २
यौ हो३ । ऊम्मा२ । वा॒ऽ२ । र्त्तो३५हाइ ॥ २५ ॥ ५५

मित्रभूतः इन्द्रः "कया" "ऊती"(२) ऊत्या तर्पणेन "नः" अस्मान् "आ भुवत्"(३) आभिमुख्येन भवेत् "शचिष्ठया" प्रज्ञावत्तमया(४) प्रज्ञासहित मनुष्ठीयमानेन "कया वृता" केन वर्त्तनेन कर्मणा च अभिमुखो भवेत् ॥ ५ ॥ ५५

---

III महावामदेव्यं वामदेव्यं वा ।

(२)—'सुपां सुलु'गित्यादिना (७,१,३९) पूर्वसवर्णदीर्घः ।

(३)—लेटो रूपम् ।

(४)—'शची'-इति निघण्टौ प्रज्ञानामसु अष्टमम् पदम् ३.९ । 'शचीति कर्म-नाम

अथ षष्ठी ।

श्रुतकक्ष ऋषिः ।

१ २ २ २ ३ १ २ ३ १ २
त्वमुवः सत्रासाहं विश्वासु गीर्ष्वायतम् ।

१ २ ३ १ २
आच्यावयस्यूतये ॥ ६ ॥ ५६

५ २ र १ १ र र २
I त्वमुवाः । सत्रासाहा२म् । विश्वासुगीर्षू आ१या-

१र १ २ ५र र २
तार्म् । आच्यार३ । वा२यार३४औ । होवा । सि-

१ १ १ १ १
यू३त । ये२३४५ ॥ २६ ॥

यजमानः स्तोतारं सम्बोध्याह(१)—हे स्तोतः ! "सत्रासाहं" [सत्रा शब्दो बहु-वाची(२)] बहूनामभिभवितारं [यद्वा शत्रून् स्व-

---

५६ उत्तरार्च्चिकस्य ८, १, १०, १—ऋग्वेदस्य ६, ६, १६, २—ऊहगानस्य १३, २, ४ ।

(नि० २, १, २२) अतिशयेन शची, शचिष्ठा, तया शचिष्ठया, अतिशय-कर्मवत्या याग-क्रियये त्यर्थः'-इति वि० ।

(१)—'श्रुतकक्षः पुत्रपौत्रमाह'-इति वि० ।

(२)—निघण्टौ द्वादश पदानि बहुवाचकानि पठितानि (३, १) । न तत्र सत्रेत्युपलभ्यते ।

२ ५ २ ४२ ५ ५ १ २
II त्या३४म्। उवःसत्रासाहम्। ओ६वा। विश्वा-

२ २ १ १ २ १ ऽ २२
सुगीर्षाया२ताम्। आ२च्या। वा२३या। सियौ३हो।

१२ २ १ ५ ५
वाहा३४२इ। ता२३४यो६हाइ॥ २७॥ ५६

बलेन सङ्गत्य जेतारं(३)] "वः" युष्मदीयेषु "विश्वासु गीर्षु"(४) सर्वेषु स्तोत्रेषु "आयतं"(५) विस्तृतं [सर्वत्रेन्द्र एव स्तूयते तस्मात् तेषु विततम्] "त्यम् उ" ['उ'-इत्यवधारणे] तमेवेन्द्रम् "ऊतये" अस्मद्रक्षणाय "आच्यावयसि" [च्युङ्, प्रुङ्, प्लुङ्-गतौ (भ्वा०आ०)] त्वदीयैः स्तोत्रैः यज्ञं प्रति आभिमुख्येन गमय॥ ६ ॥५६

---

I,II इन्द्रस्य सत्रासाहीये, अजितस्य आजित्ती वा।

(३)—'सत्रा शब्दः सत्य-वचनः (नि०३,१०,३)सदा शब्दपर्य्यायो वा। सहि अभिभवे मर्षणे च (भ्वा० आ०), अत्र सहि अभिभवार्थः। सत्येन सर्वदा वा शत्रूणामभि भवितारम्'-इति वि०।

(४)—'सप्तमी-बहुवचनमिदं तृतीया-बहुवचनस्य स्थाने द्रष्टव्यम्। विश्वाभि र्गीर्भिः सर्वाभिः ऋग्यजुःसाम-लक्षणाभि र्वाग्भिरित्यर्थः'—इति वि०।

(५)—'आयतं निबद्धं स्तुतमित्यर्थः'-इति वि०।

अथ सप्तमी

मेधातिथि ऋषिः।

१ २ ३ २ ३ १ २ ३ १र २र ३ १ २
सदसस्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्यम।
३ २ ३ १ २
सनिंमेधामयासिषम्॥ ७॥ ५७

४ ५ १ ७ २ ३ ५ ५ २ ३
I सादा। सस्पताइमद्भुता। ओ२३४वा। प्रायाओ-
५ १ १ २ ३ २ १ र
२३४वा। आइन्द्रा। स्याकामा२३४५याई५६म्। सनिम्मे-
ऽ १र २र ३ १ १ १ १
२धामयासिषा२३४५म्॥ २८॥ ५७

"मेधां" लब्धुं "सदसस्पतिं"(१) एतन्नामकं देवम्(२) "अयासिषम्" प्राप्तवानस्मि। कीदृशम्? "अद्भुतम्" आश्चर्यकरम् "इन्द्रस्य प्रियम्" [सोम-पाने सहचारित्वात्] "काम्यम्" कमनीयं "सनिं"(३) धनस्य दातारम्(४)॥ ७॥ ५७

---

५७ ऋग्वेदस्य १,१,३५,१।

I वामदेव्यम्।

(१)—"षष्ठ्याः पति-पुत्रेत्यादिना (८,३,५३) सत्वम्।

(२)—नैघण्टुक-दैवत-काण्डे अ-परिगणितम्।

(३)—"छन्दसि वनेत्यादिना (३,२,२७) इन्।

(४)—'सदसस्पतिं' सदोनाम-यज्ञगृह-स्वामिनम् 'अद्भुतं' महान्तम् 'काम्यं' कमनीयं

अथाष्टमी।

वामदेव ऋषिः।

२ ३ १ २　३ २ ३ २उ　क २र ३ १ २
येतेपन्थाअधोदिवोयेभिर्व्यश्व*मैरयः।

३ १ २　३ १ २
उतश्रोषन्तुनोभुवः॥ ८॥ ५८

२　२　५　२　३　५
I हाइ। आप्हदा२३४त्ताः। आप्हदा२३४त्ताः।

२र र　र　१ ७　१ १ १ १　२　३　५
येतेपन्थाआ३धोदिवा२३४५ः। हाइ। आप्हूदा२३४त्ताः।

२र　१ ७ १ १ १ १　२　२ २ ३　५
येभिर्व्यश्वा३माइरया२३४५ः। हाइ। उताश्रो२३४षा।

२ १　१ ३　५र र　३　५
तुनो२३। भूरवा२३४औहोवा। ई२३४तो॥ २९॥ ५८

हे इन्द्र! "दिवः" द्युलोकस्य "अधः" अधस्तात् "ये"

---

* "विश्वम्"-एष पाठो भाष्य-मात्र-सम्मतः। "व्यश्वम्"-इति पाठस्तु सङ्गृहीत-समस्त-पुस्तकानाम्।

विवरणकारस्य सम्मतश्च स एव, तथाच—'व्यश्वम् वेगिताश्वं शीघ्र मित्यर्थः'-इति तद्-विवरणम्।

---

I अश्विनोः साम।

'प्रियं' यष्टॄणाम्, 'इन्द्र', 'सनिं' गोः, 'मेधां' प्रज्ञाञ्च 'अयासिषम्' याचे—एषोऽर्थो विवरण-सम्मतः।

अथ नवमी ।

श्रुतकक्ष ऋषिः* ।

२ १ २ २ २ २ २ ३ १ २
भद्रम्भद्रन्नआभरेषमूर्जꣳशतक्रतो ।

१ २ ३ १ २
यदिन्द्रमृडयासिनः ॥ ८ ॥ ५८९

"पन्थाः"(१) पन्थानः मार्गाः सन्ति, "येभिः"(२) यैर्मार्गैः "विश्वं" सर्वं जगत् "ऐरयः" प्राप्तवानसि, ते मार्गाः यजमानैः स्तूयन्तामिति शेषः । "उत" अपिच "नः" अस्मदीयाः "भुवः"(३) भूमीः निवास-स्थानानि "श्रोषन्तु"(४) यजमानाः त्वदनुग्रहाच्छृण्वन्तु(५) ॥ ८ ॥ ५८८

---

* 'सुकक्षस्यार्षम्'-इति वि॰ ।

५८९ ऋग्वेदस्य ६,६,२६,३ ।

---

(१)—'एकवचनमिदं बहुवचनार्थे भवति'-इति वि॰ ।

(२)—भिसऐसादेशश्छन्दसि बाहुल्येन भवति (७,१,१०) ।

(३)—"छन्दस्युभयथा (६,४,८६)"-इत्युवङ् ।

(४)—लेटि सिप्पक्षे (३,४,९४)-रूपम् ।

(५)—'ये' 'ते' तव स्वभूताः 'पन्थाः' पन्थानः 'दिवः अधः' अन्तरीक्ष-लोके 'येभिः' यैः पथिभिः 'विश्वं' शीघ्रम् 'ऐरयः' आगतवानसि । 'उत' अपिच तैः रेत्य 'भुवः' अवयवे वेद्याख्य-प्रदेशे 'नः' अस्माकं स्तुतीः 'श्रोषन्तु' शृणोतु भवान्—इत्ययमर्थो विवरणसम्मतः ।

५ ४ ५ २ १र २ ४ ५ ४ ५

I भद्रम्भाद्राम्। नआभार२३रा३। आइषामूर्जाम्।

२ १ २ ४ ५ ४ ५ १ ३ ५र र

शतक्रार२३ता३उ। यादिन्द्राम्टृ। डा२या२३४औहोवा।

२ ५

सो२३४नाः॥ ३०॥ ५९

हे "शतक्रतो" शत-विध-कर्मन्! [शत-प्रज्ञ! वा] "इन्द्र"! "भद्रं भद्रं" कल्याणतमं(१) [सुखोत्पादकं वा] धनं "नः" अस्मभ्यम् "आभर"(२) सम्पादय देहि, तथा "इषम् ऊर्जम्"(३) अन्नरसं [यद्वा बलवदन्नं(४) देहि], "नः" अस्मान् "यद्"(५) यदि "मृडयासि" सुखयसि तर्हि धनादिकं देहीति [मृड सुखने (क्र्या० प०)] तस्य लेटि अङ्गस्याडागमः(६)॥ ८॥ ५९

---

I गोतमस्य भद्रम्।

(१)—अभ्यासेनातिशय्यं लक्ष्यते।

(२)—हरतेर्भत्वे रूपम् आहरेत्यर्थः।

(३)—'इषम्', 'ऊर्जम्' द्वे अप्येते अन्ननामनी (नि०२,७,१७—१८), अतः पौनरुक्त्य-प्रसङ्गात् ऊर्जशब्दोऽत्र रस-वचनो द्रष्टव्यः अन्नञ्च रसञ्चेत्यर्थः—इति वि०।

(४)—'ऊर्ग्'-इति निघण्टौ बल-नामसु एकविंशतितमम् २,९।

(५)—'यत्' तृतीयाया अत्र लुक्, येन अन्नेन रसेन च 'मृडयसि' सर्वदा सुखयसि, जीवयसीत्यर्थः—इति वि०।

(६)—"लेटोऽडाटौ (३;४,९४)"।

अथ दशमी।

बिन्दु ऋषिः* ।

२ ३ १ २ ३ २ ३१२ २२ ३१२
अस्तिसोमो अयᳬसुतः पिबन्त्यस्य मरुतः ।
३ २ ३१ २ ३ १ २
उतस्वराजो अश्विना ॥ १० ॥ ६०

॥ इति तृतीय-दशति ॥

३ ४ ३२ ४२ ३ ४३ ४ ५ ३२ ४२
I अस्तिसोमो अयᳬसुतः । अ । स्येआस्तो । सोमो-
२ ४३ ४५ ३ ५ ४ ४
अयᳬसुतःपिबन्त्यस्यम । रुतोर२३४हाइ । उतस्वरा५जो-
५ ४ ५
वा । श्वा५इनो६हाइ ॥ ३१ ॥ ६०

"अयं" पुरोवर्त्ती "सोमः" "सुतः" मरुदर्थमस्माभि रभिषुतः "अस्ति" विद्यते, तस्मात् "अस्य" अन्वादेशे एनं सुतं सोमं "स्वराजः" स्वयं दीप्यमानाः स्व-तेजसा नान्यदीयेनेत्यर्थः, तादृशाः

---

* 'पूतकक्षस्य सुकक्षस्य वा इदमार्षम्'-इति वि०।

६० उत्तरार्च्चिकस्य ८,१,८,१—ऋग्वेदस्य ६,६,२८.४ ।

I अश्विनोःसाम, सोम-साम वा।

"मरुतः" प्रातः(१) "पिबन्ति"(२); "उत" अपिच "अश्विना"(३) अश्विनौ च सोमं प्रातः सवने पिबतः ॥ १० ॥ ६०

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने द्वितीयाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

---

अथ सप्तमे खण्डे—

सैषा प्रथमा।

इन्द्रमातरो देवजामय ऋषिकाः।

३ १ २ ३ १ ३ १ २ ३ १ २र
ईङ्खयन्तीरपस्युवइन्द्रञ्जातमुपासते।
३ १ २ ३ १ २
वन्वानासःसुवीर्य्यम् ॥ १ ॥ ६१

---

६१ ऋग्वेदस्य ८,८,११,१।

(१)—प्रातइति न जाने कुतोलब्धः ?

(२)—'लडयं लोडर्थे द्रष्टव्यः, पिबन्तु।'-इति वि०।

(३)—"अथातो द्युस्थाना देवता तासा मश्विनौ॥ द्यावापृथिव्यावित्येके, अहोरात्रा वित्येके, सूर्य्याचन्द्रमसावित्येके, राजानौ पुण्यकृतावित्यैतिहासिकाः"—इत्यादि नैरुक्तम्१२,१,१—२।

५र २ १ १ २र
I ईङ्खयन्तीः। अपा२स्यूवा२ः। आइन्द्रञ्जातम्।
१ २ १र २ १ २
ऊपा१साता२इ। वन्वाना२३साः। सुवीरिया३१उवा२३।
२
वृधे१ ॥ ३२ ॥ ६१

"ईङ्खयन्तीः"(१) गच्छन्त्यः स्तुत्यादिभिः इन्द्रं प्राप्नुवन्त्यः "अपस्युवः" अपः कर्मात्मन इच्छन्त्यः इन्द्रमातरः अस्य सूक्तस्य द्रष्ट्र्यः(२) "जातं" प्रादुर्भूतं तम् "इन्द्रम्" "उपासते"(३) परिचरन्ति, "सुवीर्यं" शोभन-वीर्योपेतं धनं च "वन्वानासः"(४) तस्मात् इन्द्रात् सम्भक्तवत्यो भवन्ति ॥

"वन्वानासः"-"भेजानासः"-इति पाठौ ॥ १ ॥ ६१

---

I त्वाष्ट्रसाम। "त्वाष्ट्री"-इति च पाठः।

(१)—'ईङ्खते'-इति गतिकर्मसु अशीतितमम् नि०२,१४।

(२)—'स्तुतयः'-इति वि०।

(३)—'उपगम्य इन्द्रं तस्यैव समीपे अवतिष्ठन्त इत्यर्थः'-इति वि०।

(४)—'वनु, याचने—इत्यस्येदं रूपम्। याचमाना उच्यन्ते। किं याचमानाः? उच्यते—तस्यैवेन्द्रस्य शोभनं वीर्यम्'-इति वि०।

अथ द्वितीया।

गोधा ऋषिः।

१ २　　　　३ १र　　२र
नकिर्देवा*इनीमसिनक्या†योपयामसि।
३ १ २
मन्त्रश्रुत्य‡ञ्चरामसि ॥ २ ॥ ६२

५ र　　२ १　　२　　१ ऽ २
I नकिर्देवाः। इनाइ। इनोमासा३इ। मासी३या।
५ र　　२ १　　२　　१ ऽ २　५
नकियायो। पया। पयामासा३इ। मासी३या। मन्त्र-
२ १　　२　　१ ऽ २
श्रुत्याम्। चरा। चरामासा३इ। मासी३या ॥ ३३ ॥ ६२

हे "देवाः" इन्द्रादयः! युष्मद् विषये "न कि(१) इनीमसि" न किमपि हिंस्मः(२) [मीङ् हिंसायां, क्र्यादिकः "मीनाति

६२ ऋग्वेदस्य ८,७,२२,७।

* "नकिर्देवा"-इति, † "नकिरायो"-इतिच ऋग्वेद-पाठः।

‡ "मन्त्रश्रुत्यम्"-इति आद्यनुदात्त अन्तोदात्तश्च ऋग्वेद-पाठः।

I गोधासाम।

(१)—'नेति प्रतिषेधे, कीति निपातोऽनर्थकः'-इति वि०।

(२)—'हे देवाः न इनीमसि, प्राणि-वधं कर्म पश्वादि-यागं न कुर्म इत्यर्थः' -इति वि०।

अथ तृतीया।

दध्यङ्ङाथर्वण ऋषिः*।

३ १र २र३ १ २ ३१
दोषोआगाद् बृहद्गायद्युमद्गामन्नाथर्वण।
३ २३१ २ ३१२
स्तुहिदेवᳲसवितारम्॥ ३॥ ६३

४र ५र र ४ २ १ र २ १र
I दोषोआगात्। बहद्गाया। द्युमद्गार३मान्। आथ-

निगमि (७,३,८१पा०)"-इति ह्रस्वः, "इदन्तोमसि (७,१,४६ पा०)" मकार-लोपश्छान्दसः। आकारः समुच्चये।] "न कि' न च "योपयामसि" योपयामः(३) अननुष्ठानेन [अन्यथानुष्ठानेन वा] मोहयामः [युप विमोहने (चु०प०)]। किन्तर्हि? "मन्त्रश्रुत्यं" मन्त्रेण स्मार्यं श्रुतौ विधिवाक्य-प्रतिपाद्यं यद् युष्मद्विषयं कर्म(४) तत् "चरामसि" आचरामः(५) अनुतिष्ठामः॥

"इनीमसि"-"मिनीमसि"-इति च पाठौ॥ २॥ ६२

---

* 'वामदेवस्यार्षम्'-इति वि०-पाठः।

I सवितुः साम।

(३)—'इह निखननार्थो द्रष्टव्यः; यूप-निखननमपि न कुर्मः, इत्यौषध्यादि-हिंसामपि न कुर्मः'-इति वि०।

(४)—'जपाख्यम्'-इति वि०।

(५)—'प्राणि-वधं न कुर्मः, जपमेव कुर्म इत्यर्थः। उक्तञ्च—"जप्येनैव तु संसिद्धे द्

२ २      २ १      ऽ २      २र २      ४ ५
वंणा३। स्तुहि। औ३हो३४इ। देवा३म्। सवोवा।
४      ५
तापुरोईहाइ ॥ ३४ ॥ ६३

हे "बृहद्गाय"(१) बृहदाख्यस्य साम्नो गातः! "द्युमद्गामन्"(२) दीप्त-गमन! "आथर्वण"(३) अथर्वऋषेरपत्य!(४) [ऋषिः स्वात्मानमेवामन्त्रयते] त्वं "दोषः"(५) ऋत्विग्यजमानापराधेन यः कश्चिद् दोषः "आगात्" आगच्छति तत्परिहारार्थं "सवितारं"(६) प्रेरकम् एतन्नामकं "देवं" "स्तुहि"। [यद्वा "दोषः" दूषयति नाशयति तमांसीति, दुनोति उपतपति रक्षांसीति वा दोषः, सः सविता "आगात्", अतो हे "आथर्वण!" "बृहत्" स्तोत्रं "गाय"। तथा "गामन्" गायतीति गामा हे एवं विध! स्वात्मन्! "द्युमत्" दीप्तिमदन्यत् स्तोत्रम् उप गाय। शिष्टं(७) पुनरादरार्थम् ॥ ३ ॥ ६३

---

ब्राह्मणो नात्र संशयः। कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते (मनुः२अ०)" -इति'-इति वि०।

(१)—'गाय उच्चारय'-इति वि०।

(२)—'द्युमतां स्वर-सौष्टव-युक्तानां साम्नां गामन् गातः,'-इत्यर्थो वि०-सम्मतः।

(३)—थर्वति गत्यर्थः, थर्वा गन्ता, न थर्वा अथर्वेत्युच्यते, तस्यायं स्तोता स्वभूतः, तेन स आथर्वणः, तस्य सम्बोधनं हे आथर्वण! मम वामदेवस्य स्वभूत! इत्यर्थः' इति वि०।

(४)—"अथर्वाणोऽथनवन्तस्थर्वतिश्चरतिकर्मा तस्य प्रतिषेधः"-इत्यादि नै०११,१८।

(५)—'दोषा रात्रिः, उ इति पदपूरणः'-इति वि०। पद-कारस्त्वेव मेव विच्छेद—'दोषा, उ'-इति।

(६)—'सविता सर्वस्य प्रसविता'-इत्यादि नै०१०,३१। 'सवितृ-दैवत्यञ्च बृहत्' -इति वि०-ध्वनिः।

(७)—शेषमर्द्धर्चम्।

अथ चतुर्थी।

प्रस्कण्व ऋषिः।

३ २ ३ १र २र क २र ३ २ ३ २
एषोउषाअपूर्व्याव्युच्छतिप्रियादिवः।

३ १ २ ३ २
स्तुषेवामश्विनाबृहत् ॥ ४ ॥* ६४

५र र १ र२ र १ २ १ २ २
I एषोउषाः। आपूर्वि॑या। व्युच्छति। होवा३हाइ।

१र २ ३ २ ३र २ २ १ ५
प्रियादा२३इवा३४ः। स्तुषा३४इवामा३। श्विनो२३४वा

४ ५
बृ५हो६हाइ ॥ ३५ ॥

"एषः"(१) एषैव अस्माभिः परिदृश्यमाना "प्रिया" सर्वेषां प्रीतिहेतुः "अपूर्व्या"(२) पूर्वेषु मध्यरात्रादिकालेषु विद्यमाना न

---

६४ उत्तरार्चिकस्य ८,३,७,१—ऋग्वेदस्य १,३,२३,१।

I उषस साम।

(१)—'एषा, उ, उषाः'-इति पदकारः। विवरणकारेण च तथैव व्याख्यातः 'उकारः पादपूरणः'-इति।

(२)—'यतः पूर्वं नास्ति सा अपूर्वा, अपूर्वा एव अपूर्व्या, स्वार्थिकस्तद्धितः; प्रथमेत्यर्थः'-इति वि०।

---

*॥ इति ग्रामे गेये पञ्चमस्यार्द्धः प्रपाठकः ॥

अथ पञ्चमी।

गोतम ऋषिः।

१ २　३ २ ३ १ २ ३ १र　२र
इन्द्रोदधीचोअस्थभिर्वृत्राण्यप्रतिष्कुतः।
३ १ २　३ १र २र
जघाननवतीर्न्नव॥ ५॥ ६५

भवति किञ्चिदानीन्तना "उषा"(३) उषो देवता "दिवः" द्यु-लोकस्य सकाशात् आगत्य "व्युच्छति" तमो वर्जयति(४)। हे "अश्विना" अश्विनौ! (५) "वां" युवां "बृहत्" प्रभूतं यथा भवति तथा "स्तुषे" स्तौमि॥ ४॥ ६४

---

६५ उत्तरार्च्चिकस्य ३,१,८,१—ऋग्वेदस्य १,६,७,४।

(३)—'उषाः, कस्मात्? उच्छतीति सत्या रात्रेरपरः कालस्तस्या एषा भवति' इत्यादि नैगम-काण्डीयं नैरुक्तम् (२,१८) पदलन्मतेऽवलम्बनीयम्।' सायण-मते तु—'उषा, वष्टेः कान्ति--कर्मणः, उच्छतेरितरा माध्यमिका; तस्या एषा भवति'-इत्यादि दैवत-काण्डीयं नैरुक्तम् (६.५—६) प्रेक्ष्यम्।

(४)—'व्युच्छति, उच्छिविवासे, विवासयति—किम्? सामर्थ्यात् तमांसि; शक्नोति विवासयितुम् अतो विवासनेनात्र उदितत्वं लक्ष्यते, उदितेत्यर्थः' इति वि०।

(५)—'अथातोद्युस्थाना देवताः। तासामश्विनौ प्रथमागामिनौ भवतः। अश्विनौ यद् व्यश्नुवाते सर्वं रसेनान्योज्योतिषान्यः। अश्वैरश्विनावित्यौर्णवाभः। तत्काव-श्विनौ द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्य्याचन्द्रमसावित्येके राजानौ पुण्यकृता-वितीतिहासिकाः। तयोः कालः ऊर्द्ध्वमर्द्धरात्रात् प्रकाशीभावस्यानुविष्टम्भमनुतमो भागो हि मध्यमो ज्योतिर्भाग आदित्यः। तयोरेषा भवति'-इत्यादि नैरुक्तम्. १—२।

१ र २र ५ २ १र
I ओम्। इन्द्रोदधीचोअस्थभिरिया२ई३या। वृत्राण्य-
५ २ १र र १
प्रतिष्कुतइया२ई३या। जघाननवतीर्नवइया२। इ२।
२ ५र र २ ५
या२३४। औहोवा। ऊ२३४पा॥ १॥

५ र २ २ ५ २ १र
II इन्द्रोदधाइ। चोअस्था२३४भोः। वृत्राणिया।

अत्र शाट्यायनिन इतिहास माचक्षते—'आथर्वणस्य दधीचो जीवतो दर्शनेन असुराः पराबभूवुः। अथ तस्मिन् स्वर्गते, असुरैः पूर्णा पृथिव्यभवत्। अथेन्द्रस्तैरसुरैः सह योद्धु मशक्नुवंस्त मृषि मन्विच्छन्, स्वर्गं गत इति शुश्राव। अथ पप्रच्छ तत्रत्यान्—इह किमस्य किञ्चित् परिशिष्टमङ्गमस्ति? इति, तस्माअवोचन्—अस्त्येतदाश्वं शीर्षं, येन शिरसा अश्विभ्यां मधुविद्यां प्राब्रवीत्, तत्तु न विद्मः तद्यत्राभवदिति; पुनरिन्द्रोऽब्रवीत्—तदन्विच्छतेति। तद्धा अन्वेषिषुः। तच्छर्यणावत्यनुविद्या जह्रुः, (शर्यणावद्ध वै नाम कुरुक्षेत्रस्य जघनार्द्धे सरः स्यन्दते)। तस्य शिरसोऽस्थिभिरिन्द्रो ऽसुरान् जघानेति'(१)॥

---

I,II त्वष्टुरातिथ्ये द्वे।

(१)—विवरणकारस्त्वेनमितिहासमन्यथाचष्टे। तथाहि—'कालखञ्जा नाम असुराः। रसुरैर्बाध्यमाना देवा ब्रह्माणमुपगम्योक्तवन्तः—भगवन्! कालखञ्जै रसुरैर्बाध्यामहे,

२र १ २ १र २ २ र २ १ २ ४ ५
प्रातिष्कुताः । जघानार२३ना । वतीर्नवा । औ३होवा ।
४
होपुइ । डा ॥ २ ॥ ६५

"अप्रतिष्कुतः"(२) परैरप्रतिशब्दितः प्रतिकूल-शब्द-रहितः "इन्द्रः" आथर्वणस्य "दधीचः" (३) एतत्सञ्ज्ञकस्य ऋषेः "अस्थभिः" पार्श्व-शिरः-सम्बधिभिरस्थिभिः "नवतीर्नव" नव-सङ्ख्याका नवतीः, दशोत्तरा अष्टशत-सङ्ख्याकाः [८१०] [तथाहि—लोक-त्रय-वर्त्तिनो देवान् जेतुम् आदावासुरी माया त्रिधा सम्पद्यते, त्रिविधा सा अतीतानागत-वर्त्तमान-काल-भेदेन तत्काल-वर्त्तिनो जेतुं पुनरपि प्रत्येकं त्रिगुणिता भवति, एवं नव सम्पद्यन्ते, पुनरपि उत्साहादि-शक्ति-त्रय-रूपेण(४) त्रैगुण्ये सति

---

तेषां मारणोपायं विधत्स्वेति । तच्छ्रुत्वा स तानुवाच—दधीचि नाम ऋषिस्तमुपगम्य ब्रूत, स मारणोपायं विधास्यति । ते तच्छ्रुत्वा तथेत्यङ्गीकृत्य तं दधीचमुपगम्य उक्तवन्तः—भगवन् ! अस्मदीयान्यस्त्राणि शुक्रस्तेषां पुरोधा अपहरति, तानि रक्षस्व । ततः स ऋषिस्तानुवाच—मम मुखे प्रक्षिपध्वम् । तत इन्द्रादिभि र्देवैः स-मरुद्गणैः तस्य मुखे प्रक्षिप्तानि । पुनः कालेन देवासुर-सङ्ग्रामे पर्य्युपस्थिते एत्य देवा ऊचुः—भगवन् ! तान्यस्त्राणि प्रयच्छस्वास्माकम् । ततस्तेनोक्तम्—तानि मे जीर्णानि, न तानि पुनः प्राप्तुं शक्यानि । ततः प्रजापति-मुखा देवा ऊचुः—भगवन् ! प्राण-त्यागं कुरुष्व । इति श्रुत्वा पुनः कृतश्च तेन प्राण-त्यागः । तस्य दधीचः स्वभूतैरस्थिभिरिन्द्रो वृत्राणि जघान' -इति ।

(२)—'अप्रतिस्खलितः'-इति वि० ।

(३)—"या मथर्वा मनुष्पिता दध्यङ् धियमत्नत"-इति (१,१२,७,१९) ऋग्वेदीय-मन्त्रार्थः परिद्रष्टव्यः ।

(४)—प्रभावोत्साहमन्त्रजाः शक्तयस्त्रिषः ।

अथ षष्ठी ।

मधुच्छन्दा ऋषिः ।

२उ ३१र २र३ १२ २१२
इन्द्रेहिमत्स्यन्धसोविश्वेभिःसोमपर्वभिः ।

३१ २ ३ १र १र
महाꣳअभिष्टिरोजसा ॥ ६ ॥ ६६

५र र २ १ २ २ १ २र
I इन्द्रेहिमाहाउ । त्सोइआन्धाइसाः । वाइश्वेभिः

सप्तविंशतिः सम्पद्यते, पुनः सात्विकादि-गुण-त्रय-भेदेन त्रैगुण्ये सति एकोत्तरा अशीतिः सम्पद्यते, एवं चतुर्भिस्त्रिकै र्गुणिताया मायाया दशसु दिक्षु प्रत्येक मवस्थाने सति नव नवतयः सम्पद्यन्ते; एवं विधं मायारूपाणि] "वृत्राणि" (५) आवरकाणि असुर-जातानि "जघान" हतवान् ॥ ५ ॥ ६५

हे "इन्द्र!" "एहि" अस्मिन् कर्मणि आगच्छ, आगत्य च "विश्वेभिः" सर्वैः "सोमपर्वभिः"(१) सोमरसरूपैः "अन्धसः"

---

६६ ऋग्वेदस्य १,१,१७,१—यजुर्वेदस्य ३१,२५ ।

I पौषम् ।

(५)—नपुंसकलिङ्गमिदं व्यत्ययेन (३,१,३९)—वृत्रानिति ।

(१)—'पर्वाणि अवयवाः, सोमस्य पर्वाणि, तैः सोमपर्वभिः, तदर्थमभिषुतैः सोमावयवैः'-इति वि० ।

अथ सप्तमी।

वामदेव ऋषिः।

१र २र　　३ २ ३ २ ३　१ २
आतून इन्द्र वृत्रहन्नस्माकमर्द्ध* मागहि।
३ २ ३ १ २ ३ १ २
महान्महीभिरूतिभिः॥ ७॥ ६७

१　२　१ २ ३　५　१　१ २
सो२३हा३। मापर्वा२३४भीः। महा५२३। आ२भा२३-
५र र　२ १र २ १ १ १ १
४औहोवा। ष्टिरोजसा२३४५॥ ३॥ ६६

अन्धोभिः अन्नैः(२) "मत्सि" माद्य हृष्टो भव, तत ऊर्द्ध्वम् "ओजसा" बलेन महान् भूत्वा "अभीष्टिः"(३) शत्रूणामभिभविता भवेति शेषः [अष्टाविंशति(४)-सङ्ख्याकेषु बल-नामसु 'ओजः' 'पाजः' -इति (नि० २,९) पठितम्॥ ६॥ ६६

---

* 'अर्धम्'-इति ऋग्वेद-पाठः।

६७ ऋग्वेदस्य ३,६,२७,१—आरण्यगाने ४,३।

(२)—"अन्ध इत्यन्न-नाम"-इति नै० ५,१।

(३)—'आभिमुख्येन यष्टव्यो वा'-इति वि०।

(४)—'बल-नामान्युत्तराण्यष्टाविंशतिः'-इति नै०२,८।

अथाष्टमी।

वत्स ऋषिः।

३ १ २ ३ २उ ३ १ २
ओजस्तदस्य तित्विष उभे यत्समवर्त्तयत्।
३ १ २ ३ १ २
इन्द्रश्चर्मेव रोदसी॥ ८॥ ६८

२र २र २र ५र २र २र २र ५र २ १ २ १ ५
I आतूऔहो। आतूऔहो। नइन्द्रवृत्रा२३४हान्।
२ १र २ १ २ १र २ १ १
अस्माकमर्द्धम्। आगा२३ही। गाही२। माही२म्मा
२ १ ५ ४ ५
हो२३। भिरू२३४वा। ता५इभोई्हाइ॥ ४॥ ६७

हे "वृत्रहन्!"(१) वृत्राणां शत्रूणां हिंसक! इन्द्र! त्वं "नः" अस्मान्(२) प्रति "तु"(३) क्षिप्रम् आगच्छ, हे "इन्द्र!" "महान्" प्रभूतः त्वम् "महीभिः" महतीभिः "ऊतिभिः" रक्षाभिः सह "अस्माकम्" "अर्द्धं" समीपम् "आ गहि" आगच्छ॥ ७॥ ६७

---

६८ उत्तरार्चिकस्य ८,१,१३,३।

I इन्द्रस्य माया।

(१)—'अथास्य कर्म—रसानुप्रदानं वृत्रवधो या च का च बलकृतिरिन्द्रकर्म्मैव तत्' इत्यादि नैरुक्तम् ७,१,१०। 'वृत्रवधो मेघ-वधः'-इति तद्भाष्यम्।

(२)—'अस्माकम्'-इति वि०।

(३)—'ऋचि तु, 'तू'-इति दीर्घः श्रूयते। तत्र सूत्रम्—"ऋचि तु-नु-घ-मक्षु-तङ्-कु त्रोरुष्याणाम् (६,३,१३३)"-इति।

५ २ १र २ ३ ५
I हा। हाउवा३। ओजस्तदस्यतित्विषेर३४। हा।

२ १र २३ ५ २ १
हाउवा। उभेयत्समवर्त्तयार३४त्। हा। हाउवा३। इन्द्र-

ऽर १र ३११११
श्चर्मे२वरोदसीर३४५॥ ५॥ ६८

४र ४ २१र २
II ओजस्तदा५स्यतित्विषाइ। उभेयत्समवर्त्तयादा१-

१ ३ ५र र २१र ३११११
इन्द्रा२३:। चा२र्मा२३४औहोवा। वरोदसीर३४५॥६॥६८

"अस्य" इन्द्रस्य "तत्" "ओजः" बलं "तित्विषे" दिदीपे [त्विष दीप्तौ (दि०प०] "यत्" येन ओजसा अयम् "इन्द्रः" "उभे" "रोदसी" द्यावापृथिव्यौ "चर्मेव"(१) "समवर्त्तयत्" सम्यग् वर्त्तयति। यथा कश्चित् किञ्चित् चर्म कदाचिद् विस्तारयति कदाचित् सङ्कोचयति, एवं तदधीने अभूता-मित्यर्थः(२) ॥ ८॥ ६८

---

I,II इन्द्रस्य संवर्त्तस्य वा सांवर्त्ते।

(१)—"चर्म चरतेर्वोच्चृत्तं भवतीति वा"-इति नै०२,५।

(२)—'यथा कश्चित् चर्म वेष्टयति, तद्वदित्यर्थः'-इति वि०।

अथ नवमी।

शुनःशेप* ऋषिः।

२ १२३१२ २१२ ३२
अयमुतेसमतसिकपोतइवगर्भधिम्।
३१२
वचस्तच्चिन्नओहसे॥ ८॥ ६९

४ ३ ४ २ ४र ५ १ र २
I अयाऽ५मु। ता३इसा३मानसाइ। कापोतइ।
१ २ १ १ २ १ ५
वगार्भा१धी२म्। वाचा२स्ताच्चो२३त्। नओ२३४वा।
४ ५
हा५सो६हाइ॥ ७॥ ६९

हे इन्द्र! "अयम् उ" अयमपि(१) दृश्यमानः सोमः "ते" त्वदर्थं सम्पादितः यं सोमं "समतसि" सम्यक् सातत्येन प्राप्नोषि। तत्र दृष्टान्तः—"कपोत इव" यथा कपोताख्यः पक्षी

* 'शुनः शेफ'-इति वि०-पाठः।

६९ उत्तरार्च्चिकस्य ७,३,१५,१—ऋग्वेदस्य १,२,२८,४।
I आङ्गिरसस्य शौनःशेपम् चावनं वा।

(१)—इह सायण-मते उ अप्यर्थः। विवरण-मते नु पाद-पूरणाय।

अथ दशमी।

वातायन उल्ल ऋषिः।

२ ३ १ २ ३२ ३१२३१ २३२
वातआवातुभेषजꣳशम्भुमयोभुनोहृदे।
२ १ २
प्रनआयूꣳषि* तारिषत्॥ १०॥ ७०

॥ इति चतुर्थ-दशति॥

४र५ ४र ५र ४ ४ १ २ १
I वातआवातु। भा५इषजाम्। शाम्भुमयः। भुनो-
७ १र २ १ र २ २ १
हृदा२३४इ। हाहोइ। प्रनआयूꣳषीꣳता। रिषात्।
४ ५ ४ ५
औ२३होवा। इडा॥ ८॥ ७०

"गर्भधीं"(२) गर्भधारिणीं कपोतीं प्राप्नोति तद्वत्, "तच्चित्"(३) तस्मादेव कारणात् "नः"(४) अस्मदीयं "वचः" "ओहसे" प्राप्नोषि॥ ९॥ ६९

---

* 'प्रणआयषि'-इति ऋग्वेदीय-पाठः।

---

७० उत्तरार्च्चिकस्य ९,२,११,१—ऋग्वेदस्य ८,८,४४,१।
I प्रतीचीनेड़ं काशीतम्।

(२)—गर्भा धीयते यस्यां सा गर्भधिः, ताम्।

(३)—'तन्मम स्तुतं वचः'-इति, 'चिदिति पादपूरणः'-इति च वि०।

(४)—'बहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम्'-इति वि०।

"वातः"(१) वायुः(२) "नः" अस्माकं "हृदे" हृदयाय(३) "भेषजम्"(४) औषधम् [उदकं वा] "आ वातु" आ गमयतु, कीदृग्भूतम्? "शम्भु" रोग-शमनस्य भावयितृ(५) "मयोभु" मयसः सुखस्य च भावयितृ,(६) अपि च "नः" अस्माकम् "आयूंषि" "प्रतारिषत्" प्रवर्द्धयतु(७) ॥ १० ॥७०

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने द्वितीयाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

---

(१)—'वातो वातीति सतः'–इत्यादि नै० द० १०,३४।

(२)—अन्तरिक्षस्थो देवः। तथाहि—'वायुर्वेन्द्रोवान्तरिक्षस्थानः'-इति नै० दै० ७,५। 'अथातो मध्यस्थाना देवताः, तासां वायुः प्रथमागामी भवति'-इति नै० दै० १०,१।

(३)—'हृदयस्य'-इति वि०। एतन्मये 'षष्ठ्यर्थे चतुर्थी (२,३,६२)'-इति वचनादिह चतुर्थी।

(४)—'पथ्यमित्यर्थः'-इति वि० भेषज मित्युदक-नाम स्वनचत्वारिंशत्तमम् पदम् नि०१,१,१२।

(५)—'शम्भु सुखस्य भावयितृ, इदानीं सुखकरमित्यर्थः-इति वि०।

(६)—'कालान्तरे सुखस्य भावयितृ, अथवा मयो बलं तस्य भावयितृ'-इति वि०। शमिति बल-नामसु (नि०२,६) ऊनविंशतितमं पदम्, मयइति तु चयोदशमिति एकार्थयोरुभयोः कालभेदेन व्याख्यानं विवरण-सम्मतम्।

(७)—'वात आवातु भैषज्यानि शम्भु मयोभु च नो हृदयाय प्रवर्द्धयतु च न आयुः' -इति नैरुक्त-व्याख्यानम् दै० १०,३५।

अथाष्टमे खण्डे—

सैषा प्रथमा ।

कण्व ऋषिः ।

२र २र ३ १ २ ३ २ २ ३ १ २ ३ २
यꣳरक्षन्तिप्रचेतसोवरुणोमित्रोअर्य मा ॥

३ १ २ ३ १ २
न किः* सदभ्यतेजनः ॥ १ ॥ ७१

४ ५ ४ ५र ४ १ र र २ १
I यꣳरक्षन्तिप्रचेतसा: । वरुणोमित्रोअर्या२३मा । न ।

२ १ २ १ ३ ५र र
काइःसा२३दा । इम्मायेइ । भ्या२ता२३४औहोवा ।

२ ५
जा२३४ना: ॥ ८ ॥ ७१

"प्रचेतसः"(१) प्रकृष्टज्ञानयुक्ताः वरुणादयो देवाः "यं" यजमानं "रक्षन्ति" "स" यजमानः "न कि र्दभ्यतेः" केनापि न हिंस्यते ॥ १ ॥ ७१

---

* 'नूचित्'-इति ऋग्वेदीय-पाठः ।

---

७१ ऋग्वेदस्य १,३,२२,१ ।

I सौमित्रम् ।

(१)—'प्रकृष्टज्ञानाः—वरुणः, मित्रः, अर्य्यमा च'-इति वि० ।

अथ द्वितीया ।

वत्स ऋषिः ।

३ १उ ३ १२ ३२ ३१र२र३१
गव्योषुणोयथापुराश्वयोतरथया ।
३ २ ३१२
वरिवस्या*मघोनाम्† ॥ २ ॥ ७२

५४ र ५र४ ५र ४५ २ र १ १ २ १
I गव्योषुणोयथापुरा। अश्वयोतरथा। यावरिवस्या।
२ १र र २ ५र र ३ ५
म। घो मा२३। घोना३४औ३होवा। उ२३४पा ॥ १० ॥

५ र र ५ २
II गव्योषुणोयथापुरा६ए। अश्वयो१त। रथा२।
१ २१ १ २१र ३ ५र र
या। वरिवा२स्या। मघो। मघो२ना२३४औ३होवा।
३१ १११
ई२३४५ ॥ ११ ॥ ७२

हे "इन्द्र"! "गव्योषु"(१) गव्या उ सु(२)-इति निपात-द्वय-

---

* 'वरिवस्य मघामघ'-इति ऋग्वेदीय-पाठः ।

† 'मघोनाम्'-इति वि० पाठः ।

---

७२ ऋग्वेदस्य ६,४,२,५ ।

I,II श्यावाश्वे ।

(१)—'सुञषः'(८,३,१०७)-इति लम् ।

(२)—'उ' 'सु' द्वावपि पादपूरणौ'-इति वि० । सायण-मते तु उ अप्यर्थ, सुष्ठ्वि-त्यर्थौ वरिवस्येति क्रियान्वितश्च ।

समुदायस्य एकवद्भावेन निपातवद्भावात्(३) प्रकृतिवद्भावाभावः(४) "नः"(५) अस्माकं गवामिच्छया अस्माकं गां दातुं "यथा पुरा" पूर्वम् अस्माकं सम्बन्धि-यागे गवादि-दानाय(६) वरिवस्यसि तद्दद्यापि सुष्ठु "वरिवस्य"(७) परिचर(८) आगच्छेत्यर्थः। न केवलं गविच्छया किन्तु "अश्वया"(९) अश्व-प्रदानेच्छया "उत" अपिच "रथया" रथेच्छया "मंहोनां"(१०) धनानां [कर्मणि षष्ठी],(११) महान्ति पूजाकराणि धनानि दानाय वरिवस्य परिचर देहीत्यर्थः॥ २॥ ७२

---

(३)—समुदाय एवैक इति स्वीकारादिति भावः, यथा तथा चेत्यादि।

(४)—'निपात एकाजनाङ् (१,१,१४)-इति प्राप्तः एकाज्त्वाभावान्न कृत इत्यर्थः।

(५)—'नः—द्वितीयाबहुवचनमिदं प्रथमाबहुवचनार्थे द्रष्टव्यम्। वय त्वां स्तुम इति वाक्य-शेषः'-इति वि०।

(६)—गोषु इच्छा, गव्या ; तस्मात् तृतीयैकवचनं, तस्य 'सुपां सुलुगिति पूर्वसवर्णदीर्घः। गव्या, गव्यया गविच्छयेत्यर्थः।

(७)—ऋचि 'वरिवस्या'-इति निपातस्य चेति (६,३,१३६) दीर्घः।

(८)—वरिवस्यतिः परिचरणीयः, तस्मात् सम्बुद्ध्येक वचनम्, तस्य स्थाने सुपां सुलुगिति आकारः, वरिवस्य! परिचरणीयेत्यर्थः-इति वि०।

(९)—अश्वशब्दात् "छन्दसि परेच्छायामपि क्यच् (३,१,८)"-इति वचनात् क्यचि, "न च्छन्दस्यपुत्रस्य (७,४,३५)"-इति ईत्वदीर्घयोरभावे रूपम्।

(१०)—'मंहं धनं हविर्लक्षणं तद्येषा मस्ति ते मघवानः हविष्मन्तो यजमानाः, तेषामित्यर्थः'-इति वि०।

(११)—व्यत्ययेनेति(३,१,८५) बोध्यम।

अथ तृतीया।

वत्स ऋषिः।

३ १ २ ३ १ २ ३ १ २ ३ १ २
इमास्त इन्द्र पृश्नयो घृतन्दुहत आशिरम्।
३ २ ३ १ २ ३ १ २
एनामृतस्य पिप्युषीः ॥ ३ ॥ ७३

५ र २ १ र १ २ ३ र १ २
I इमास्तई। द्रपृश्नयोघृतन्दूर्हा। औहोर्हा३।
२ १ ३ ५ ३ र २ ३ २ २ १
हा३इ। ताआ२शा२३४इराम्। एना३४मृता३। स्यपो
५ ४ ५
२३४वा। प्यूषो६हाइ ॥ १२ ॥ ७३

हे "इन्द्र"! "ते" त्वदीयाः "इमाः" "पृश्नयः"(१) प्राष्ट वर्णाः(२) गावः(३) "घृतं" चरणशीलम्(४) "एनाम्" "आशि-

७३ ऋग्वेदस्य ५,८,१२,४।
I शैखण्डिनम्।

(१)—'पृश्नयः स्तुतयः'-इति वि०।

(२)—नाना वर्णा इत्यर्थः। उत्तरार्चिक-द्वितीय-प्रपाठक-द्वितीयार्द्ध-पञ्चदश-सूक्तीय-द्वितीयर्च्-व्याख्याने सायणेनैवानेन स्पष्टाभिहितत्वात्।

(३)—निघण्टौ तु 'पृश्निः'-इति दिव आदित्यस्य च साधारणं नाम (नि०१,४,२)। निरुक्तेऽपि तथैव। तथाहि—'पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरुक्ताः संस्प्रष्टा रसान् संस्प्रष्टा भासं ज्योतिषां संस्पृष्टो भासेति; वाथ द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च'-इति २,१८।

(४)—घृतमिति निघण्टौ प्रथम-द्वादशे उदक-नामसु दृश्यम्।

अथ चतुर्थी ।

श्रुतकक्ष* ऋषिः ।

३ २ ३ १ २ ३ ११ २र

अयाधियाचगव्ययापुरूणामन्पुरूष्टुत ।

१र २र ३ १ २

यत्सोमेसोमआभुवः ॥ ४ ॥ ७४

५ र र ५ १ २ २ २ ५

I अयाधियाचगव्याइया । पुरूणा३ । मन्यू२३४ह्व ।

रम्"(५) आश्रयण-द्रव्यं पयः(६) "दुहते" दुहन्ति चारयन्ति। कीदृश्यः पृश्नयः? "ऋतस्य" सत्यस्य अवितथस्य(७) इन्द्रस्य [यज्ञस्य वा(८)] "पिप्युषीः"(९) वर्धयित्र्यः ॥ ३ ॥ ७३

---

* 'सुकक्ष'-इति वि० पाठः ।

---

७४ ऋग्वेदस्य ६,८,२४,२ ।

I वैतहव्यम् ।

(५)—"अपस्य ऋषेयामानृचुरानृकस्विच्चुषेतित्याजश्रातात्रितमाशीराशीर्त्तः (६,१,३६) -इति श्रीञ् पाके इत्यस्य निष्ठायां रूपम्। "आशिराश्रयणाद्वाश्रपणाद्वा"-इति च नैरुक्तम् ६,८।

(६)—'सोममिश्रं यद् दधि,तत् आशिरम्'-इति वि० ।

(७)—'निघण्टु-तृतीय-दशम-खण्डमिह मानम् ।

(८)—निघण्टु-प्रथम-द्वादश-खण्डमिह मानम् ।

(९)—'द्वितीया-प्रथमैकवचनार्थे'-इति वि० ।

२ १ र ऽर २र ३ २ १ र ऽर १र
ष्टूतौ। वा३२। यशोमे३सोमश्रा। या२मोमे२सो।

२ १ ५ ४ ५
मश्रो२३४वा। भूपूवो६हाइ॥ १२ ॥ ७४

हे "पुरुणामन्"(१)बहुविध-शक्र-वृत्रहादि-नामोपेत(२)! [यद्वा बहु-स्तुतिमन्! नमयति स्तुत्यं देवं वशं नयतीति नाम स्तोत्रम्] अत एव "पुरुष्टुत" बहुभिरभिष्टुतेन्द्र! "सोमे सोमे" मदीयेषु सर्वेषु सोमेषु त्वं "यद्" यदा(३) "आभुवः"(४) तेषां पानार्थं समन्तादभवः तदा वयं "अया" अनया(५) ईदृश्या "गव्यया" गा आत्मन इच्छत्या(६) "धिया"(७) बुध्या युक्ता भवेम। त्वयि सोमं पिबति सति वयं गवादियुक्ता भवेमेत्यर्थः॥

"आभुवः"-"आभवः"-इति च पाठौ॥ ४॥ ७४

(१)—पुरुशब्दो बहुवचनः निघण्टु-तृतीय-प्रथम-खण्डे तृतीय इति दर्शनात् 'पूर्वपदादिति (८,४,३) णत्वम्।

(२)—'पुरुणामन्। बहूनां शत्रूणां प्रह्वीकर्त्तः! इत्यर्थः। अथवा बह्वो यजमानाः प्रह्वीभूताः'-इति वि०।

(३)—'यत्—पञ्चम्या अत्र लुक्, यस्मात्'-इति वि०।

(४)—'आभिमुख्येन भवसि'-इति वि०।

(५)—"'अया'—अनया; 'धिया'—धीरिति प्रज्ञानाम, प्रज्ञया त्वां स्तुम इति वाक्यशेषः। अथवा धीरिति कर्मनाम, अनेन यागाख्येन कर्म्मणा; त्वां यजामह इति वाक्यशेषः"-इति वि०।

(६)—'किमर्थं पुनः स्तुमः? उच्यते—गव्यया गविच्छया'-इति वि०।

(७)—धीरिति प्रज्ञा-नामसु सप्तमम्(नि०३९)कर्म-नामसु एकविंशतिमम्(नि०२,१)।

अथ पञ्चमी ।

मधुच्छन्दा ऋषिः ।

३　२ ३ १ २　३ १ २　３ １ ２
पावकानःसरस्वतीवाजेभिर्वाजिनीवती ।
३ १ २　३ १ २
यज्ञंवष्टुधियावसुः ॥ ५ ॥ ७५

५र　र　४ ५　२ १ २　　१ र २ र
I पावकानइया । सराखा१ती२ । वाजेभिर्वा । जि-
१　२　　१　　१ ३　५र र　२ १र
नाइवा१ती२ । यज्ञा२३म् । वा२ष्टू२३४औहोवा । धिया-
३ १ १ १ १
वस्१२३४पूः ॥ १४ ॥ ७५

"सरस्वती"(१) देवी "वाजेभिः" हविर्लक्षणैः अन्नै निंमित्त-भूतैः [यद्वा यजमानेभ्यो दातव्यै रन्नै निंमित्तभूतैः] "नः" अस्मदीयं "यज्ञं" "वष्टु" कामयताम् [कामयित्वा च निर्वहत्वि-त्यर्थः । तथाचैतरेयारण्यकाण्डे श्रुत्यैव व्याख्यातम्—'यज्ञं वष्टिति

---

७५ ऋग्वेदस्य १,१,६,२ ।

I भारद्वाजम् ।

(१)—'सरस्वती'-इति निघण्टु-प्रथमस्य त्रयोदशे नदी नामसु-एकादशे वाङ्नामसु च दृश्यते । इह च नैरुक्तम्—'सरस्वती त्येतस्य नदीवद् देवतावच्च निगमा भवन्ति (२,२३)'-इत्यादि, 'सरस्वती माध्यमिका वाक्'-इति वि० । 'वागर्थेषु विधीयते, तस्मान माध्यमिका वाचं मन्यन्ते'-इति नैरुक्तं (११,२७) मानम् ।

अथ षष्ठी।

वामदेव ऋषिः।

२ ३१र २र ३ २उ ३ १ २
कद्रू मन्नाङ्गषोघाइन्द्र॑सोमस्यतर्पयात्।
२ ३ २ ३ १ २
सनोवसून्याभरात्॥ ६ ॥ ७६

यदाह, यज्ञं वहत्वित्येव तदाहेति'] कीदृशी सरस्वती? "पावका"(२) शोधयित्री "वाजिनीवती" अन्नवत्-क्रियावती "धिया वसुः" कर्म-प्राप्य-धन-निमित्त-भूता [वाग्देवतायास्तथा-विध-धन-निमित्तत्वमैतरेयारण्यकाण्डे श्रुत्या व्याख्यातम्—'यज्ञं वष्टु धियावसुरिति वाग्वै धियावसुरिति]। 'श्येनः, 'सोमः'-इत्यादिषु पञ्चविंशति-संख्याकेषु देवता-विशेष-वाचिषु पदेषु 'सरमा,' 'सरस्वती'-इति पठितम्(३)॥ एतामृचं यास्क एवं व्याचष्ट (नै०११,२६)—'पावकानः सरस्वती यज्ञं वष्टु धियावसुः कर्म्मवसुरिति'॥ ५॥ ७५

---

(२)—"पावकादीनां छन्दसि (७,२,६९)"-इति वचनादिह इत्वाभावः।

(३)—निघण्टौ दैवतकाण्डे चतुर्थखण्डानन्तरं श्येन इत्यादीनि षट्त्रिंशत्पदानि पठितानि, तत्र सरमेति सप्तदशं सरस्वतीत द्वादशम्। तानि च पदानि अन्तरिक्षस्य देवता-वाचकानि, तथाहि नैरुक्तम्—'अथातो मध्यस्थाना देवताः'-इत्यादि—'सचा मरुद्भिः सहरोदसी'-इत्यन्तम् (१०,१—११,५०)।

अथ सप्तमी ।

इरिमिठ* ऋषिः ।

१ २ ३ २उ ३ २ ३ २ ३ १ २ ३ २
आयाहिसुषुमाहितइन्द्रसोमंपिबाइमम् ।

४ ५ ४ ५ ४ ५ २र १ २ १
I कइमम् । उक्रवाहाइ । नाहु३षाइषू१वा२। आ-
र २ १ २ १ ऽर १२र १ २
इन्द्र्ःसोम । स्यतार्पा१या२त् । सनोर्वहू। नियाभा-
१ र ऽ१२र १ २ १र
१रा२त् । सानोरवहूनि । आ२३ । भराउवा । आ-
२ १र २
गहियेहिताइमे१ ॥ १५ ॥ ७६

"नाहुषीषु" [नहुषइति मनुष्यनाम नि० २,३,८] नहुष-सम्बन्धिनीषु प्रजासु(१) "कः" "इमम् इन्द्रम्" "सोमस्य" सोमेन "तर्पयात्" तर्पयति प्रीणाति (२), "सः" नाहुषीभिस्तर्पयितु मशक्य इन्द्रः "नः" अस्माकं सम्बन्धि-यज्ञे तप्तः सन् "वसूनि" धनानि "आभरत्" आहरत् आहरत्वित्यर्थः ॥ ६ ॥ ७६

---

* 'इरिमिरि'-इति वि०-पाठः ।

---

I अरुणस्य वैतहव्यस्य साम सौभरं वा ।

(१—नहुष इति मनुष्य-नाम, तेषु भवाः ज्योतिष्टोमाद्याः क्रियाः नाहुष्यः । तासु नाहुषीषु ज्योतिष्टोमादिषु क्रियास्वित्यर्थः ।

(२—कः मा मुक्त्वा अन्यः तपयति अहमेव तर्पयामि इत्यभिप्रायः'-इति वि० ।

२ उ १ १ २ ३ १ २
एदंबर्हिःसदोमम ॥ ७ ॥ ७७

५र र २ १ २ १ २
I आयाहिह्व। षुमाह्वा१इते२। षुमाह्वा१इते२।

१ २ १ २ १ २
आइन्द्रसोमम्। पिबाइमम्। पिबाआ१इमा२म्।

३र २ १ २ १र २ १
एदम्बर्हाइ:। सदोमा२३मा३४३। ओ२३४५इडा ॥१६॥७७

हे "इन्द्र"! त्वम् "आयाहि" आगच्छ, वयं "ते" त्वदर्थं "सुषुमा हि"(१) सोममभिषुतवन्तः खलु, तम् "इमम्" अभिषुतं "सोमं" त्वं "पिब," तदर्थं "मम" मदीयम् "इदम्" "बर्हिः"(२) वेद्यामास्तीर्णं दर्भम् "आ(३) सदः" आसीद अभि निषीद ॥७॥७७

---

७७ उत्तरार्चिकस्य १,२,६,१—ऋग्वेदस्य ६,१,२२,१।
I सौभरम्।

(१)—'सुषुमा'-इति षुञोरूपं छान्दसम् अभिषुणुम इत्यर्थः। हि शब्दो हेतौ, यस्मात् षुणुमः तस्मादागच्छेति वि०-सम्मतोऽर्थः।

(२)—"इदं', 'बर्हिः' द्वे अप्येते सप्तम्येकवचनान्ते द्रष्टव्ये। अस्मिन् बर्हिषि। क पुनर्यत् बर्हिः? उच्यते—'सदः' इत्यपि सप्तम्येकवचनान्तं, द्रष्टव्यम् सदस्मिमम ख भूते वेद्याख्ये स्थाने इत्यर्थः"-इति वि०।

(३)—विवरण-नये आ इत्ययं सुषुमेत्यनेनसम्बध्यते।

अथाष्टमी।

वारुणिः सत्यधृति ऋषिः।

१ २ ३ १र २र ३ १ ३ १ २ ३ २
महित्रीणामवरस्तु*द्युक्षंमित्रस्यार्यम्णः।
३ २ ३ १ २
दुराधर्षवरुणस्य॥ ८॥ ७८

३ २ ३ ५ १ १ ३ २ ३
I महाइत्रा२३४इणाम्। अवा२रस्तू। द्युक्षम्मा२३-
५ १ ३ २ ३ ५ २ १र
४इत्रा। स्या२र्यम्णः। दुराधा२३४र्षाम्। वरौहो२३४।
५ ४ ५
वा। णा५स्योऽहाइ॥ १७॥

५ र र ५ २ १ र २ १र
II महित्रीणामवरस्तूऽ६ए। द्युक्षम्मित्रस्यार्यम्णाः। दुरा-
२ १ १ १
धा२३र्षाम्। वरौहो२। हम्मा२। णा। स्यो२।
३ ५र र २र १ २ १ ३ १ १ १ १
या२३४औहोवा। हाओवा। ओवा२३४५॥ १८॥ ७८

---

* 'अवोऽस्तु'-इति ऋग्वेदीयः पाठः।

---

७८ ऋग्वेदस्य ८,८,४४,१—यजुर्वेदस्य ३,३१—
आरण्यगानस्य ३,२,१,२।

I,II इमे द्वे पार्थ्याहे।

अथ नवमी।

वत्स ऋषिः।

१ २ ३ १ २
त्वावतःपुरूवसोवयमिन्द्रप्रणेतः।

१र २ ऽ २ र २ २ऽ २
I त्वावतो३। हौ३हो३१इ। पुरूवसो३। हौ३हो-

२ १ २ २ऽ २ र २ २ऽ
३१इ। वयमिन्द्रा३। हौ३हो३१इ। प्रणेता३ः। हौ३-

"त्रीणां"* त्रयाणां "मित्रस्य" 'अर्यम्णः' "वरुणस्य" च "द्युक्षं" दीप्तम्(१) अतएव "दुराधर्षम्" अन्यै र्धर्षितुं बाधितुमशक्यं "महि" महत् "अवर्" अवः रक्षणम् अस्माकम् "अस्तु" [अवस् इत्यत्र अवः शब्दस्य विसर्जनीयस्य रेफादेशश्छान्दसः। "अवर्"-"अवः"-इति च पाठौ॥ ८॥ ७८

हे "पुरूवसो" बहुधन! इन्द्र! "प्रणेतः" कर्मणां पारं प्रकर्षेण नेतः(२)! "इन्द्र"! "त्वत्सदृशस्य [इन्द्रसमानस्यान्यस्या-

---

* 'तृणाम्'-इति वि०पाठः।

---

I साकमश्वं धुरां साम वा।

(१)—'द्यु'-इति अहर्नाम निघण्टु-प्रथम-नवमे द्वितीयत्वेन दर्शनात्। द्यु-शब्दो दीप्ति वचनश्च 'द्योतत इति सतः'-इति नैरुक्त-वचनात् (१,६)। 'क्षि' निवास-गत्योः। तस्मिन् यत् क्षियति तत् द्युक्षम्। सुतरामागतं दीप्तिमिति।

(२)—'प्रणेतः** अथवा प्रकर्षेण नेतः शत्रूणाम्'-इति वि०।

१ २
स्मसिस्थातर्हरीणाम् ॥ ८ ॥ ७९

॥ इति पञ्चम-दशतिः ॥

२　　२र　　१२ २　　र २
होऽ३१इ। स्मसिस्थाताऽ३ः। हौऽ३होऽ३१इ। हरीणाऽ३म्।
१२ २
हौऽ३होऽ३१२३४५इ। डा ॥ १९ ॥ ७९

भावात् तथेत्यर्थः(१)] तव स्वभूताः "वयम्" "स्मसि"(३) स्मः। हे "हरीणाम्" एतत् सञ्ज्ञकानामश्वानां(४) "स्थातः" अधिष्ठातः! ॥ ८ ॥ ७९

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने द्वितीयाध्यायस्याष्टमः खण्डः ॥ ८ ॥

---

७९ ऋग्वेदस्य ६,४,१,१।

(१)—त्वमिवइति त्वावान्। "युष्मदस्मदोः सादृश्ये वतुब्वाच्यः"-इति (५,१,६१) वचनाद् वतुपि, "प्रत्ययोत्तरपदयोश्चेति" त्वादेशे, "आ च सर्वनाम्नः"-इत्यात्वे रूपम्। तस्य त्वावतः।

(२)—'एतदुक्तं भवति—त्वत्सदृशस्यापि वयं स्तोतारो भवामः, किम्पुनस्तवैवेति'—इति वि०।

(३)—"इदन्तोमसि (७,१,४६)"-इति मसइगागमः।

(४)—'हरी इन्द्रस्य'-इति नि०१,१५,१। 'अश्वः कस्मादश्नुतेऽध्वानं महाशनो भवतीति वा"-इत्यादि नै०२,२७।

---

॥ इति द्वितीयः प्रपाठकः ॥ २ ॥

अथ नवमे खण्डे—

सैषा प्रथमा।

प्रगाथ ऋषिः।

१ २ ३ १ २ ३ १ २ २ १
उत्वामदन्तु सोमाः* कृणुष्वराधोअद्रिवः।
१ २ ३ १ २
अवब्रह्मद्विषोजहि॥ १॥ ८०

५ र २ ४ ५ २ १र २ १र
I उत्वामन्दन्तुसोहोमाः। कृणौहो। ष्वरौहो।
२र १ २ १ २ १
धात्रद्रिवाः। अ। वब्रा२३ह्मा। द्विषा२ः। हा२इ।
५ २ २ १ ३ ५र र २ १ १
औ३हो३१ये३। जा२हा२३४औहोवा। ए३। ययू२-
१ १ १
३४५ः॥ २०॥ ८०

हे इन्द्र! "त्वा" त्वाम् "सोमाः" "उत्"(१) उत्कृष्टं "मदन्तु"

---

* 'स्तोमाः'-इति ऋग्वेदीयः पाठः, उत्तरार्च्चिक-व्याख्यायां सायणाचार्य्य-धृत-पाठस्य।

---

८० उत्तरार्च्चिकस्य ६,१,३,१—ऋग्वेदस्य६,४,४३,१।

I यामम्।

(१)—'उदिति पादपूरणः'-इति वि०। इत्त निगमम् "प्रसमुपोदः पादपूरणे (८,१,६)"-इति पाणिनि-सूत्रम्।

अथ द्वितीया ।

विश्वामित्र ऋषिः ।

१ २ ३ १ २ ३ २ ३ ३ १ २
गिर्वणःपाहिनःसुतंमधोर्द्धाराभिरज्यसे ।
३ १ २ ३ १ २ २र
इन्द्रत्वादातमिद्यशः ॥ २ ॥ ८१

४ ५ २ ४ ५ ४ ५ ४ १
I गिर्वणः पाहिनः सुतम् । गिर्वणःपा । हिनःसु-
१ २ २ २ १ २ १ २
ता२म् । मधोर्द्धाराभिराहो२ । ज्यासे२३ । हाउवा ।
१ २ २ २ १ २ ५२ २
इन्द्रात्वा२३दा । तमाये३त् । या२शा२३४औहोवा ।
२ १ १ १ १ १
हरो३ओ२३४५ः ॥ २१ ॥ ८१

मादयन्तु हे "अद्रिवः"(२) वज्रवन् ! इन्द्र ! त्वमस्मभ्यं "राधः" धनं(३) "कृणुष्व"(४) कुरु प्रयच्छ । किञ्च "ब्रह्मद्विषः" ब्राह्मणद्वेष्ट्रॄन् "अव जहि" विदारयेत्यर्थः(५)॥ १ ॥ ८०

---

८१ ऋग्वेदस्य ३,३,२,१ ।

I आङ्गिरसम् हरिश्रीनिधनम् ।

(२)—"मतुवसोरुसम्बुद्धौ (८,३,१)"-इति रुत्वे रूपम् ।

(३)—राधइति निघण्टु-द्वितीय-दशमे धननामसु सप्तदशम् । "राध इति धन-नाम, राध्नुवन्त्य तेन"-इति नै०४,४ ।

(४)—क्रिया-सामान्य-वचनो दानार्थो द्रष्टव्यः, देहि धनमित्यर्थः ।

(५)—'जहोति च हन्तेर्गत्यर्थस्येदं रूपम् । अवजहि अधोगमम्, नरकं नयेत्यर्थः'-इति वि० ।

अथ तृतीया।

वामदेव ऋषिः।

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ २
सदावइन्द्रश्चर्कृषदाउपोनुससपर्यन्।

३ २ ३ २उ ३ १ २
नदेवोवृतःशूरइन्द्रः॥ ३॥ ८२

"गिर्वणः"(१) गीर्भिः वाग्भिः स्तुतिभिः वननीय! [तथा च यास्कः—'गिर्वणा देवो भवति गीर्भिरेनं वनयन्तीति' (नै० ६, १४)] तादृश! हे इन्द्र! "नः"(२) अस्मदीयं "सुतम्"(३) अभिषुतम् इमं सोमं "पाहि" पिब,(४) यतः "मधोः" मदकरस्य सोमस्य "धाराभिः" "अज्यसे" सिच्यसे। हे "इन्द्र! "त्वादातम् इत्"(५) त्वया शोधितं विशदीकृतमेव "यशः" अन्नम्(६) अस्मासु भवति॥ २॥ ८१

---

(१)—गिर्वणः इति सान्तः। गिरः स्तुतिलक्षणावाचः (नि०१,११), ताभिः या वन्यते सम्भज्यते स गिर्वणाः, तस्य सम्बोधनम्—हे गिर्वणः!।

(२),—(३)—सुतमिति षष्ठ्यर्थे द्वितीया, विशेषणञ्च मधोरित्यस्य वि०-सम्मतम्।

(४)—'नः-अस्मान्'-'पाहि-रक्ष'-इति च वि०।

(५)—'इदिति पदपूरणः'-इति वि०। "अथ ये प्रवृत्तेऽर्थे ऽमिताक्षरेषु ग्रन्थेषु वाक्य-पूरण आगच्छन्ति, पदपूरणास्ते मिताक्षरेष्वनर्थकाः—कमीमिद्विति"-इति न०१,९।

(६)—'यशः'-इति निघण्टौ प्रथम-द्वादशे उदकनामसु पञ्चपञ्चाशत्तमम्पदम्—द्वितीय-सप्तमे अन्न-नामसु अन्तिमम्—द्वितीय-दशमे धन-नामसु त्रयोविंशतितमञ्च।

४ ५ २ २ ३ ४ ५ १ र
I सादा। वइन्द्रा३ः। चर्क्कषादा। उपोनुसा३ः।
१ २ १ २ २र १ २ २ २ ४
सापर्यन्यनदेवा२३ः। वृता३४३ः। शू२४३। रा३आ५

यिन्द्रा६५६ः॥ २२॥ ८२

हे ऋत्विग्यजमानाः(१)! "इन्द्रः" "सदा" सर्वदा "वः" युष्मान् "आ चर्कृषत्" यज्ञानुष्ठानार्थम् आक्षषत् कर्त्तुमिच्छति। किं कुर्वन्? "उपानु" युष्माकं समीप एव "समपर्यन्' पुनः पुनः भृशं वा सपर्यां कुर्वन् [हविर्भोक्तुं मामाह्वयध्वमिति प्रार्थयमान इत्यर्थः, अतएव श्रुत्यन्तरे देवानां यजमान-प्रदत्त-हवि-रुपजीवित्वं श्रूयते-'इतो दानाद्धि देवा उपजीवन्तीति] अतः अस्मत्सपर्या-कर्त्तृत्वात् "इन्द्रः देवः" "नः" "शूरः" यजमानानां बाधक इत्यर्थः(२)॥ ३॥ ८२

I वैरूपम्।

(१)—'आत्मीयं पुत्रपौत्रमाह'-इति वि०।

(२)—'सदा' सर्वदा, 'वः' युष्माकम्, 'इन्द्रः' 'चर्क्कषत्' अत्यर्थं करोतु पुनः पुनर्वा करोतु बलं पुष्टिं धनं हिरण्यं दीर्घञ्च जीवितम्। 'आ,' 'उप', 'उ', 'नु'-चत्वारोऽप्येते पद-पूरणाः। 'स' शब्दो यच्छब्दमन्तरेण न निराकाङ्क्षितां प्रतिपद्यते अतो योग्यार्थ-सम्बन्धो यच्छब्दोऽध्याहर्त्तव्यः। य अधस्तादुक्तगुणः स कथं बलपुष्ट्यादीन् करोति? उच्यते—'सपर्यन्' सपर्य्यतिः परिचरणकर्मा 'नशब्द उपरिष्टादुपमार्थीयः यथा कश्चित् परिचरन् प्रीतिमुत्पादयति तद्वत् प्रीतिमुत्पाद-

अथ चतुर्थी।

श्रुतकक्ष ऋषिः।

१   २   ३ १ २   ३ १ २ ३ १ २

आत्वाविशन्त्विन्दवःसमुद्रमिवसिन्धवः।

२उ   ३ १ २

नत्वामिन्द्रातिरिच्यते॥ ४ ॥ ८३

५र र   ५   २ १ २ १ २   २

I आत्वाविशन्त्विन्दा६वाः। समुद्रमिवसिन्धवः। स-

१   २ १   २   १ र र २ र   २

मुद्रमि। वसिन्धा२३वाः। नत्वामिन्द्रातिरिच्यते। न

१र   २   १   २   १

त्वामा२३यिन्द्रा। तिरिच्या२३ता३४३यि। ओ२३४५ई।

५

डा॥ २३ ॥ ८३

हे इन्द्र! "इन्दवः" स्रवन्तः अस्माभि र्दीयमानाः सोमाः(१)

---

८३ उत्तरार्च्चिकस्य ८,२,२,१—ऋग्वेदस्य ६,६,१८,२—
ऊहगानेऽपि १४,२—१८—१ साम।

I आसितं सिन्धुषाम वा।

पतीत्यर्थः। 'देवः' दानादि-गुण-युक्तः, 'हूतः' अभ्यर्थितः, 'शूरः' विक्रान्तः, 'इन्द्रः' ईश्वर इत्यर्थः इति वि०।

(१)—इन्दु रिति निघण्टौ उदक-नामसु (१,१२) —यज्ञ-नामसु (३,१७) च दृश्यते।

अथ पञ्चमी ।

मधुच्छन्दा ऋषिः ।

३ २३ १ २३२१ २१३१ २ ३२ २
इन्द्रमिद्गाथिनोबृहदिन्द्रमर्केभिरर्किणः ।

३ १ २
इन्द्रंवाणीरनूषत ॥ ५ ॥ ८४

५ ३ २२ ३ ४२ ५ २ १ २ १ २
I इन्द्रमिद्गाथिनोबृहात् । इन्द्रामर्काइ । भिर-

"त्वा" त्वाम् "आविशन्तु" । तत्र दृष्टान्तः—"समुद्रम् इव सिन्धवः" स्यन्दनशीला नद्यो(२) यथा समुद्रं जलाशयं सर्वतः प्रविशन्ति तद्वत् । यत एवं तस्मात् हे "इन्द्र" ! त्वां कश्चिदपि देवः धनेन बलेन वा "न अतिरिच्यते" नातिरिक्तोऽस्ति [सामर्थ्यवान् त्वत्तोऽधिको नास्तीत्यर्थः ॥ ४ ॥ ८३

---

८४ उत्तरार्च्चिकस्य २,१,८,१—ऋग्वेदस्य १,१,१३,१—आरण्यगानेऽपि ३,११ ।

I यमस्य इन्द्रस्य वा अर्कः ।

नैरुक्ते दैवत-काण्डेऽपि व्याख्यातः, तथाहि—'इन्दुरित्येतन्ताँ वा'-इत्यादि, 'इतीमानि सप्तविंशति-देवता-नामधेयान्यनुक्रान्तानि । सूक्तभाञ्जि हविर्भाञ्जि । तेषामेतान्य हविर्भाञ्जि वेनोऽसुनीतिऋर्तइन्दुः'-इत्यन्तम् १०,४२ । इह तु उदकवत् सरण-शीलः सोमो गृह्यते ।

(२)—'सिन्धवः'-इति निघण्टौ नदी-नामसु एकविंशतितमम् पदम् १,१३ ।

१ १ २ २ २ ४

र्क्किणाः । इन्द्रवाणो३ । हा३हायि । अनू५सता ।

४

होऽ५यि । डा ॥ २४ ॥ ८४

"गाथिनः"(१) गीयमान-साम-युक्ता उद्गातारः "इन्द्रम् इत्" इन्द्रमेव "बृहत्" बृहता 'त्वामिद्धिहवामहे'-इत्यस्या ऋच्युत्पन्नेन बृहन्नामकेन साम्ना(२) "अनूषत" स्तुवन्ति । "अर्किणः" अर्चन-हेतु-मन्त्रोपेता होतारः "अर्केभिः" उक्थरूपै र्मन्त्रै रनूषत । ये त्ववशिष्टा अध्वर्यवः ते "वाणीः" वाग्भि र्यजूरूपाभि "इन्द्रम्" अनूषत । अर्क-शब्दस्य मन्त्र-परत्वं यास्केनोक्तम्(५,४) 'अर्को मन्त्रो भवति यदनेनार्चन्तीति(३) ॥ ५ ॥ ८४

(१)—गाथाइति वाङ्नामसु दृश्यते नि०१,११ । 'गाथानि सामानि'-इति वि० ।

(२)—छन्दआर्चिकस्यास्य तृतीय-प्रथम-पञ्चमस्य द्वितीया 'त्वामिद्धिहवामह'-इति । अस्यामुत्पन्नानि एकादश सामानि । तत्र गेयगानस्य चतुर्थ-प्रथमे श्रुते द्वे (२८—२९) आरण्यगानस्य प्रथमे एकम् (२७), द्वितीये एकम् (२२)—ऊहगानस्य द्वाविंशतितमे त्रयोदशं सप्तदशञ्चेति —ऊह्यगानस्य प्रथमे पञ्चमम्, तृतीये षष्ठम्, तृतीय-द्वितीये प्रथमम्, पञ्चमे षोडशं सप्तदशञ्चेति सङ्कलनया पञ्च । तत्र आरण्य-गानस्य प्रथमा-ध्यायीयमेव बृहदिति व्यपदिश्यते । मानमतार्षेयकं ब्राह्मणम् ।

(३)—"अर्को देवो भवति यदेनमर्चन्ति । अर्को मन्त्रो भवति यदनेनार्चन्ति । अर्कमन्नम् भवत्यर्चति भूतानि । अर्को वृक्षो भवति संवृतः कटुकिम्ना"-इति नै०५,४ ।

अथ षष्ठी ।

श्रुतकक्ष* ऋषिः ।

१ २ ३ १ २　　३ २ २ ३ २　३ २
इन्द्र इषे ददातु न ऋभुक्षणमृभुं रयिम् ।
३ १ २　　३ १ २
वाजी ददातु वाजिनम् ॥ ६ ॥ ८५

४ ५　४ र ५ र　　४　　२　　१
I इन्द्रइषेददातुनः । ओहायि । ऋभु । क्षणा-
　३ २ ३　५　२र र　३ २　२र १र
२म् । ऋभुंरा२३४याम् । वाजीददातुवा३ । वाजी-
२र १　५　४　५
ददा । तुवो२३४वा । जा५यिनो६हायि ॥ २५ ॥

५　र　र　५　२　१　२
II इन्द्रइषेददातुनाइए । ऋभुक्षणम् । भू२१२३म् ।
२　　१　२　　　४　५　४
रयो३४३म् । वा२३जा । ददा२उ२३ । तुवोवा । जा
५
५यिनो६हायि ॥ २६ ॥ ८५

---

* 'सुकक्ष'-इति वि०-पाठः ।

---

८५ ऋग्वेदस्य ६,६,२७,४—ऊहगानस्य ५,२,२५-२६ ।
I, II सौमित्रे ।

"इन्द्रः" एवमस्माभिः स्तुतः इष्टः सन् "ऋभुक्षणम्"(४) "[वाघपूर्वस्य(६,४,९ पा०) इति दीर्घाभावः] यागादि-कर्म-करणेन महान्तम् [सर्वेषां भ्रातॄणां श्रेष्ठं सौधन्वनं वा(६)। अथवा तृतीय-सवने प्रजापति-सवित्रोर्मध्ये सोमपानेन महान्तं रयिं(३) दातारं(१)] "ऋभुम्"(२) [सोम-पानेन मर्त्यत्वं विहाय देवत्वं प्राप्तं तादृशम्(५)] एतन्नामकं देवं "नः" अस्मभ्यम् "इषे"(८)

---

(४)—'ऋभुक्षाः' इति महन्नामसु दशमम् नि०३,३।

(६)—"ऋभुर्विभ्वावाजइति सुधन्वन आङ्गिरसस्य त्रयः पुत्राः बभूवुः। तेषां प्रथमोत्तमाभ्यां बहुवन्निगमा भवन्ति, न मध्यमेन'-इति नै०११,१६।

(७)—ऋभरिति मेधावि-नामसु अष्टमं पदम् नि०३,१५। दैवतकाण्डेऽपि निघण्टौ अन्तरिक्षस्थानदेवतास्वन्तरे श्येनादिषु दशमम् पदम्, तच्च बहुवचनात्मम्। तत्र चास्ति नैरुक्तम्—"ऋभवउरुभान्तीति वर्त्तेन भान्तीति यर्त्तेन भवन्तीति वा"-इत्यादि—"तदेतदृभोश्च बहुवचनेन चमसस्य च संस्तवेन बहूनि दशतयीषु सूक्तानि भवन्ति"—इत्यपि—"आदित्य-रश्मयोऽप्यृभवउच्यन्ते"-इति च ११,१६।

(३)—'पुत्र-लक्षणं धनम्'-इति वि०। "रयिरिति धन-नाम, रातेर्दान-कर्मणः"-इति नै०४,१७।

(१)—एषएवार्थो वि०-सम्मतः।

(२)—'ऋभुम् मेधाविनम्'-इति रयिमित्यस्य विशेषणञ्च वि०।

(५)—तदिदमानन्त्यं दीयो मन्त्रोऽयम्—"विष्ट्वी शमी तरणित्वेन वाघतो मर्त्तासः सन्तो अमृतत्वमानशुः। सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः। (१,१०,४,५)"-इति। यास्केनेयमेव व्याख्याता 'कृत्वा कर्माणि क्षिप्रत्वेन वोढारो मेधाविनो वा मर्त्तासः सन्तो ऽमृतत्वमानशिरे सौधन्वना ऋभवः सूरख्याना वा सूरप्रज्ञा वा संवत्सरे समपृच्यन्त धीतिभिः कर्मभिः' इति।

(८)—'चतुर्थ्येक-वचनं द्वितीयार्थे द्रष्टव्यम् इषमन्नम्'-इति वि०।

अथ सप्तमी।

गृत्समद ऋषिः(१)।

१ २ ३ २ ३ २ ३ २ ३ १र २र
इन्द्रोअङ्गमहद्भयमभीषदपचुच्यवत्।
२उ ३ १र २र
सहिस्थिरोविचर्षणिः॥ ७॥ ८६

अन्नार्थं(९) "ददातु" प्रयच्छतु। तथा "वाजी" वलवान्(१०) इन्द्रः "वाजिनं" बलवन्तं(११) [वाज-नामानं(१२) कनीयांसं वा-भ्रातरं सौधन्वनम्] अस्माकमन्नलाभाय ददातु॥ ६॥ ८५

"इन्द्रः" "महत्" अधिकम् "भयं" साध्वसं [भय-कारणं

---

८६ ऋग्वेदस्य २,८,८,३।

(९)—इषमित्यन्न-नामसु चतुर्द्दशम् नि०२,७।

(१०)—'वाजी वेगवान्'-इति वि०। वाजी इति निघण्टौ अश्व-नामसु चतुर्थम् १, १४। "अपि स वाजी वेजनवान् चेपणमनु तूर्णमश्नुतेऽध्वानम्'-इति तत्र नैरुक्तम् २,२८।

(११)—'वाजिनमश्वमिति वि०। वाजइत्यदन्तोऽन्ननामसु (नि०२,७)-सङ्ग्राम-नामसु च (नि०२,१७) दृश्यते। वाजिन् इति नान्तोऽश्वनामसु (नि०१,१४)—वेगवत्सु (नै०२,२८) बुद्ध्यते। वाजिन इति नोपधोऽदन्तः द्युस्थ-देवतानामसु च उपान्त्यम् पदम्, तत्र च नैरुक्तम्—"वाजिन" इत्यादि—"देवाश्वा इति वा"-इत्यन्तम् १२,४४।

(१२)—अस्मिन् पक्षे वाजइति नाम विद्यतेऽस्येति विग्रहः परं नायं रुचिरतमम।

(१)—'गृत्समदोबहूनुत्पातान् दृष्ट्वा इन्द्रमनया ऋचा स्तौति'-इति वि०।

अथाष्टमी।

भरद्वाज ऋषिः*।

३ १ २ ३ १ २ ३ १ २ ३ १ २
इमाउत्वासुतेसुतेनक्षन्तेगिर्वणोगिरः।

१ २ ३ २उ ३ १ २
गावोवत्संनधेनवः॥ ८॥ ८७

५ ८ २ १ २ १ र २ १
I इन्द्रोअङ्गा। मह्द्भा२३याम्। अभीषद्। पच्-

२ ३ २ ३ २ ४ ५ ४
च्या२३वा३४त्। सहा३४यिस्थिरा३ः। विचोवा। षा५-

५
णो६हायि॥ २७॥ ८६

वा] "अङ्ग" क्षिप्रम् "अभीषत्" अभिभवति,(२) "अपचुच्यवत्" अपच्यावयति च [यद्वा अभीषद् अभिभवद् भय-कारणम् अपच्यावयेत्] "हि" यस्मात् कारणात् "स स्थिरः" केनापि चालयितुमशक्यः "विचर्षणिः"(३) विश्वस्य द्रष्टा॥ ७॥ ८६

---

* 'संयोरार्षम्'-इति वि०।

I इन्द्रस्य अभयङ्करम्।

(२)—'आभिमुख्येन सीदत्, पर्युपस्थितम्'-इति वि०।

(३)—एतत् पदं चिक्यदित्यादिष्वष्टसु पश्यतिकर्मसु पठितम् नि०३,११।

अथ नवमी।

भरद्वाज ऋषिः।

२ ३ २ ३ र २ ३ २ ३ र २ ३ १ २
इन्द्रानुपूषणावयꣳसख्यायस्वस्तये।
३ २ ३ १ २
हुवेमवाजसातये ॥ ६ ॥ ८८

५ र २ १ २
I इमाउत्वा। सुतायिसुतायि। नक्षन्ता२३यिगी
५ २ २ १र २ २ २ १
३४ः। वनः। गा३यिराः। गावोवा३त्सा३म्। नधो
५ ४ ५
२३४वा। ना५वो६हायि ॥ २८ ॥ ८७

हे "गिर्वणः" गीर्भिर्वननीयेन्द्र! "सुतेसुते" सोमे ऽभिषुते सति "इमाः" अस्मदीयाः "गिरः" स्तुतयः "त्वा" त्वां "नक्षन्ते"(१) व्याप्नुवन्ति। 'धेनवः'(२) द्रोग्ध्र्यः "गावः न" गाव-इव, वत्सं यथा शीघ्रं(३) व्याप्नुवन्ति तद्वत्(४) ॥ ८॥ ८७

---

८८ ऋग्वेदस्य ४,८,२३,१।

I त्वाष्ट्रीसाम।

(१)—'नक्षति'-इति 'ननक्ष'-इति वा व्याप्तिकर्मसु द्वितीयं पदम् नि० २,१८।

(२)—'अचिर-प्रसूताः'-इति वि०।

(३)—विवरण-मते स्व शांशे दृष्टान्तं गावोनेति।

(४)—अस्यामृचि 'उ'-इति पदपूरणे सायणसम्मतिश्च।

५ र २ १र २ १ र २ २ १
I इन्द्रानुपू। षणावा२३याम्। साख्याय। सुव-
२ १ १ २ १ ५ ४
स्ता२३र्यायि। ह्वे२मावा२३। जसो२३४वा। तापु-
५
योईहायि॥ २९॥ ८८

( इतरेतरयोगादिन्द्रपूषशब्दयोरुभयत्र द्विवचनम् ) "इन्द्रा-पूषणा"(१) देवौ(२) "नु"(३)अद्य च(४)"वयम्" "स्वस्तये सख्याय" शोभनाय सखित्वाय "वाजसातये"(५) वाजस्यान्नस्य (बलस्य वा) सातये सम्भजनाय च "हुवेम"(६) आह्वयामः (स्तवामो-वा(७)॥ ९॥ ८८

---

I पौषम्।

(१)—"देवताद्वन्द्वेच (६,३,२६)"-इति आनङि "सुपां सुलुगित्यादिना (७,१,३९) द्विवचनस्याले रूपम्।

(२)—इह नैरुक्तम्—"अथास्य मंस्तविकादेवाः—अग्निः सोमो वरुणः पूषा बृहस्पति र्ब्रह्मणस्पतिः पर्वतः कुत्सो विष्णुर्वायुः"-इति १,१०।

(३)—'नु क्षिप्रम्'-इति वि०। निघण्टु-द्वितीय-पञ्चदश-खण्डोऽत्र नियामकः।

(४)—"नूच पुराच सदनं रयीणाम्"-इत्येतद्व्याख्यानमाह यास्कः--'अद्य च पुरा च सदनं रयीणाम्'-इति ४,१७। तत्र नू इति दीर्घस्तु "ऋचि तु-नु-घ-मक्षु-तङ्-कुत्रोरुष्याणाम् (६,३,१३३)"-इति। इदमेव यास्कव्याख्यानमिह नियामकम्।—नु इति तु बह्वर्थो निपातः। तथा च नैरुक्तम्—"नु इत्येषोऽनेककर्मेदं। नु करिष्यतीति हेत्व-पदेशे। कथं नु करिष्यतीत्यनुपृष्टे। नन्वेतदकार्षीदिति च। अथाप्युपमार्थे भवति"इत्यादि।१,४॥

(५)—वाजसातिरिति सङ्ग्रामार्थो रूढः (नि०,१७)। वाजमन्नं बलंवा तस्य साति र्लाभः एषोऽर्थो यौगिकः। सातीति षणु दाने इत्यस्य रूपम् "ऊतियूतीत्यादिना (३,३,९७) क्तिनि सिद्धम्।

(६)—सम्प्रसारणं छान्दसम् (६,१,३४)।

(७)—हूयते, हूयति वा अर्चति कर्मस्वपि पठ्यते नि०३,१४।

अथ दशमी।

वामदेव ऋषिः।

१ २ ३ १र २र३ १ २र
नकिइन्द्र*त्वदुत्तरं†नज्यायो‡अस्तिवृत्रहन्।
२ ३ २उ ३ २
नक्येव** यथात्वम्॥ १०॥ ८९

॥ इति प्रथमा-दशति ॥

४ ५ १ २ १र र ऽ
I न। क्येनाकी। आयिन्द्रत्वदुत्तराम्। नज्यायो२।
१ २ ऽ २ ३ ५ १ २र
अस्तार४यिवृ। ऊ ३ऊम्। त्रा२३४हान्। नक्ये।
१ २ २ २ ५
वंया२३था। ऊ ३ऊ२४३म्। त्व३४५वो६हायि॥३०॥ ८९

हे "वृत्रहन्" वृत्रस्य नाशक! "इन्द्र"! इन्द्रलोकेऽपीति

---

* "नकिरिन्द्र"-इति, † "रो"-इति, ‡ "ज्याया"-इति,
** "नकिरेवम्"-इति च ऋग्वेदीयपाठः।

---

८९ ऋग्वेदस्य ३,६,१९,१।
I इन्द्राण्याः साम।

ग्रेषः "त्वत्" त्वत्तः "उत्तरः" उत्कृष्टतरः "नकि(३) अस्ति" न भवति त्वत्तो "ज्यायान्" प्रशस्ततर(१) एकोऽपि नास्ति । हे इन्द्र ! "त्वं" लोके "यथा"(२) प्रसिद्धो भवसि तथाविध एकोऽपि "नकिरेवास्ति" नैव भवति (कश्चिदपि लोके इन्द्रसदृशो नास्तीत्यर्थः ॥ १० ॥ ८८

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने द्वितीयाध्यायस्य नवमः खण्डः ॥ ९ ॥

---

अथ दशमे खण्डे

सैषा प्रथमा ।

त्रिशोक* ऋषिः ।

३ १ २ ३ र २ ३ १र २र २ १ २
तरणिंवोजनानान्त्रदंवाजस्यगोमतः ।

---

* 'विरूपस्यार्षम्'-इति वि० ।

---

(३)—'न कि'-इति हि कमित्यादिषु पठितम् नि०१,१२। तत्र च नैरुक्तम्—"नवोत्तराणि पदानि सर्वपदसमाम्नानाय"-इति । नै०१,१३ ।

(१)—'वृद्धतरो वा'-इति वि० ।

(२)—"यथेति कर्मोपमा"-इति नै०३,१५ । तथाच 'न कश्चित् एवं सर्वोपकार-प्रवृत्तः'-इति विवरणकृद्व्याख्यानं साधुतरं मन्यते ।

३ २ ३ १ २
समानमुप्रशꣳसिषम् ॥ १ ॥ ९०

५ ४ २ २ १ र २ २
I तरणिंवः। जना२३नाम्। त्रदंवाजा३ह्वा३।
१ २ ३ ५ २ १र २ ४
स्यागोमा२३४ताः। समाना२३मू। प्रशा५ꣳसिषाम।
४ ५
हो५इडा ॥ ३१ ॥ ९०

हे अस्मदीयाजनाः! "वः" युष्माकं "जनानां" पुत्रपौत्रादीनां "तरणिं"(१) तारकम् "त्रदं" शत्रूणां तर्दयितारं "गोमतः" पशुमतः "वाजस्य" अन्नस्य दातारं च इन्द्रम् "समानम् उ" साधारणमेव "प्रशंसिषम्"(२) प्रकर्षेण स्तौमि ॥ १ ॥ ९०

---

९० ऋग्वेदस्य ६,३,४७,३ ।
I श्यावाश्वं तारणं वा ।

(१)—'तरणिं' क्षिप्रम् दातारं वा वि०-मतम् । तरणिरिति निघण्टौ क्षिप्रनामसु उपान्त्यं पदम् २,१५ ।

(२)—निघण्टु-तृतीय-चतुर्द्दशे 'शंसति'-इति अर्च्चतिकर्मसु पञ्चविंशतितमम् ।

अथ द्वितीया।

मधुच्छन्दा ऋषिः।

१ २ ३ २ ३ २ ३ १र २र
अस्टग्रमिन्द्रतेगिरःप्रतित्वामुदहासत।

३ १ २ ३ १र २र
सजोषा* वृषभम्पतिम् ॥ २ ॥ ९१

५ र ५र १ १ २र
I अस्टग्रमाइन्द्राइतेगिराः। प्रातीउत्वामू२त्। अहा।

१ २ १ २ १ २ १
सता। सा१जोऽषावा२। षभा२म्पतिम्। ओ२३४५

५
इ। डा ॥ ३२ ॥ ९१

हे "इन्द्र! "ते गिरः" त्वदीयाः स्तुतीः "अस्टग्रं" सृष्टवानस्मि। ता गिरः स्वर्गेऽवस्थितं "त्वां प्रति" "उदहासत"(१) उद्गत्य प्राप्नुवन्। तादृशीर्गिरस्त्वं "सजोषाः"(२) सेवितवानसि।

---

* "अजोषा"-इति ऋग्वेदीयः पाठः।

---

९१ ऋग्वेदस्य १,१,१७,४।
I वैरूपम्।

(१)—'ओहाङ् गतावित्यस्य रूपम्'-इति वि०।
(२)—'जषी प्रीति-सेवनयोरित्यस्येदं रूपम्'-इति वि०।

अथ तृतीया ।

वत्स ऋषिः ।

३ २ ३ २उ३ ३ २ ३ २ ३ १ २ ३ २
सुनीथोघासमर्त्त्योयंमरुतोयमर्यमा ।
३ २उ ३ १ २
मित्रास्पा*न्त्यद्रुहः ॥ ३ ॥ ९२

४ र र ४ १ र ऽ १ २ १र २
I सुनीथोघा५समर्त्तियाः । यम्मरुतो२यमर्यमा । मि-
१र र २ १ २ १ १ २र १ २
त्रास्पान्त्यद्रुहः । ऊ । ऊ । वाहा३१उवा२ । अति-
१ २ १ १ १ १
द्विषा२३४५ः ॥ ३३ ॥ ९२

कीदृशं त्वाम् ? "वृषभं" कामानां वर्षितारं "पतिं" सोमस्य पातारं, यजमानानां पालयितारं वा, "पाता वा पालयिता वेति" (१०,११) यास्केनोक्तत्वात् ॥ २ ॥ ९१

"सः" "मर्त्त्यः" मनुष्यः यजमानः "सुनीथः" सुयज्ञः(१)

---

* "मित्रःपा"-इति ऋग्वेदीयः पाठः ।

---

९२ ऋग्वेदस्य ६,४,१४ ।

I सोमित्रम् कौत्सं वा ।

(१)—'सुनीथः सुप्रशस्तः'-इति वि० । सुनीथ इति निघण्टौ प्रशस्तनामसु सप्तमम् ३,८ ।

अथ चतुर्थी ।

त्रिशोक* ऋषि ।

२ ३ १ २ ३ २ ३ १र २र ३ १ २
यद्वीड़ाविन्द्रयत्स्थिरेयत्पर्शाने पराभृतम् ।

(सुनयनो वा) भवति "घ"-इति प्रसिद्धौ(२)। सइत्युक्तं कमित्याह—"यं" यजमानं "मरुतः" देवाः(३) "पान्ति" रक्षन्ति "अद्रुहः"(४) अद्रोग्धारोमरुतः। तथा "अयम् अर्यमा"(५) पाति। "यं" "मित्रः"(६) पाति स एवं भवतीति ॥ ३ ॥ ९२

* "तृशोक"-इति वि० पाठः।

२)—'घ इति पाद-पूरणः'-इति वि० ।

(३)—मरुत् शब्दोबह्वर्थः। हिरण्यार्थः (१,२)—रूपार्थः(२,७)—ऋत्विग्वाचकश्च (३,१८)। अथ च अन्तरीक्ष-देवगणेष्वपि मरुतः स्मर्यन्ते—तथाहि नैरुक्तम्—"अथातो मध्यस्थाना देवगणाः। तेषां मरुतः प्रथमागामिनो भवन्ति। मरुतो मित-राविणो वा मितरोचिनो वा महद्द्रवन्तीति वा"-इत्यादि।

(४)—अद्रुहइति विशेषणं पदम्। उत्तरार्चिकस्य सप्तम-द्वितीय-त्रयोदशैके अग्निविशेषणत्वेन श्रुतम्—तस्यैव षष्ठ-तृतीयैकादश-द्वितीये मित्र विशेषणत्वेन—एतस्यैवार्चिकस्य षष्ठद्वितीयैकषष्ठे—उत्तरार्चिकस्य तृतीयैक चतुर्दश-द्वितीये-तृतीयैक-षोड़श-तृतीये-तृतीय-द्वितीयोनविंश-द्वितीये च मातृ-विशेषणत्वेन—अस्यामृचि तु मरुद्विशेषणेनेति।

(५)—अहोरात्रस्य विभागकर्त्ता आदित्यविशेषः (नै०११,२६-भाष्ये स्पष्टम्)।

(६)—अहरभिमानीदेवः अयमप्यादित्यविशेषः (नै० १२,२६-भाष्येस्पष्टम्)।

१ २ ३ १र २र
वसुस्पार्हन्तदाभर ॥ ४ ॥ ९३

२र र र र ३ ५ ५ २ र र
I औहोवाऔहोर३४वा । ओ६हा । यद्वीडावी३-
४ २ ३ ५ २र र र र ३ ५ ५ २
द्रा३यस्थिराइ । औहोवाऔहोर३४वा । ओ६हा । य-
र ४ २र २ ५ २र र र र ३ ५ ५
त्पर्शाने३पा३राभृतम् । औहोवाऔहोर३४वा । ओ६-
५ २ र ४ २र २ ५ २र र र र ३ ५
हा । वसुस्पार्हा३न्ता३दाभर । औहोवाऔहोर३४वा ।
५ ४ ५
ओ६हा । हो५इ । डा ॥ ३४ ॥९३

हे "इन्द्र" ! त्वया च "वीडौ" दृढे परैः कम्पयितुमशक्ये "यत्" धनं "पराभृतं" विन्यस्तं,(१) "यत्" च "स्थिरे" स्वयमचले(२) पराभृतं, "यत्" च अपि "पर्शाने"(४) विमर्शक्षमे(५)

---

९३ उत्तरार्चिकस्य ४,१,८,३ = ऋग्वेदस्य ६,२,४८,५ ।

I तौभम् ।

(१)—'पराभृतम् सम्भृतम् संस्थापितमित्यर्थः'-इति वि० ।

(२)—'पर्वतादौ'-इति वि० ।

(४)—'परिशाने'-इति इकारमध्यपाठस्तु प्रातिशाख्यानुशासनात् कौथुमेरव ।

(५)—'कूपादौ'-इति वि० । पर्शान इति तु मेघनामसु सप्तमश्च (नि० १,१०) ।

अथ पञ्चमी।

सुकक्ष ऋषिः

३ १ २ ३ १ २ ७ १र २र ३ २
श्रुतं वो वृत्रहन्तमं प्रशर्द्धं चर्षणीनाम्।
१ २ ३ १ २ ३ २
आशिषे राधसे महे ॥ ५ ॥९४

५ ४ १र २ १
I श्रुताम्। वोवृत्रहन्तमम्। प्रशर्द्धं चर्षणा२३इ-
२ र १ २ ३ र २ १ २ ४ ५
नाम्। आशाइषा२३इरा। धसेमहा। औ३होवा।
४
होपइ। डा ॥ ३५ ॥* ९४

पराभृतं, यद् "वसु" "स्पार्हं" स्पृहणीयं "तत्" धनम् "आ-
भर" आहर ॥ ४ ॥ ९३

---

* "आभूषे"-इति ऋग्वेदीयः पाठः।

---

९४ ऋग्वेदस्य ६,६,२४,१।
I औतम्।

---

* इति ग्रामे गेये पञ्चमः प्रपाठकः ॥

अथ षष्ठी ।

वामदेव ऋषिः ।

१ २      ३ १ २  ३ १ २   ३ १ २
अरन्तइन्द्रश्रवसेगमेमशूरत्वावतः ।

१ २     ३ १ २
अरꣳशक्रपरेमणि ॥ ६ ॥९५

५          २          २ १     २र १र  २
I अरन्तइन्द्रश्रवसेए । ए । गमाइमशूरत्वावताइः ।

"श्रुतं" विख्यातम् "वृत्रहन्तमम्" अतिशयेन वृत्रस्य हन्तारं(१) शर्धं" बलभूतं [वेगवत्तरं वा(२)] एतादृशमिन्द्रं "चर्षणीनां" मनुष्याणां "वः" युष्माकम् "आशिषे" [अश्नोते लेटि(३) उत्तम "आशिषे"-आशुषे"-इति च पाठौ ॥ ५ ॥ ९४

---

I आभीषवम् ।

(१)—"वृत्रो मेघ इति नैरुक्ताः । त्वाष्ट्रोऽसुर इत्यैतिहासिकाः । अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्ष-कर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"-इति यास्कः२,१६ ।

(२)—'उत्साहित बलवत्तरम्'-इति वि० । शर्द्धमिति निघण्टौ बलनामसु उपान्यम्(२,९) ।

(३)—"लिङर्थे लेट् (३,४,७) पा० ।

१ २ २ १ २ १ २ २

होवा३हाइ। अरा७णा१का२३। होवा३हाइ। परा-

२ १

इमा२३णा३४३इ। ओ२३४५इ। डा॥ १ ॥ ९५

इटि सिप् प्रत्ययः,(४)'छन्दस्यपि दृश्यते'-(६,४,७,३,पा०) इत्याडागमः; तमिन्द्रं स्तुतिभिः प्रीणयित्वा युष्मभ्यं प्रकर्षेण अन्नवै प्रयच्छानीत्यर्थः] किमर्थम्? "महे" महते "राधसे" धनाय धनं युष्मभ्यं दातुम्॥

हे "शूर" वीर! "इन्द्र"! "ते" तव "अवसे"(१) अवणीयां त्वदीयां कीर्त्तिं श्रोतुम् "अरम्" अलं पर्याप्तं यथा भवति तथा "गमेम"(२) प्रवृत्ता भवेम। हे "शक्र" शक्तियुक्तेन्द्र! "त्वावतः" त्वत्सदृशस्य(३) "परेमणि"(४) परत्वे उत्कर्षनिमित्तम् "अरं" गमेम [त्वत्कीर्त्तिवदन्यस्यापि त्वत्सदृशस्य देवस्य कीर्त्तिं गच्छेमेत्यर्थः॥ ६ ॥ ९५

---

(४)—"सिब बहुलं लेटि (३,१,३४) पा०।

(१)—'चतुर्थ्येकवचनमिदं द्वितीयैकवचनस्यार्थे द्रष्टव्यम्। अवः अन्नं सोमलक्षणमित्यर्थः'-इति वि०। अव इत्यन्ननामसु चतुर्थम् नि०२,७।

(२)—'गमेम गमयेम दद्यामित्याशास्महे'-इति वि०।

(३)—'त्वत्सदृशस्यापि अवोगमेम किम्पुनस्त्वैवेत्यभिप्रायः'-इति वि०।

(४)—'क्वपुनर्दद्याम? उच्यते—परेमणि'-परमुत्कृष्टं स्वर्गाख्यं स्थानं, तत्र गम्यते येन सः परेमा यज्ञः ज्योतिष्टोमादिः तत्रेत्यर्थः'-इति वि०।

अथ सप्तमो ।

विश्वामित्र(१) ऋषिः ।

२ १ २   २ १ २   ३ १ २   ३ १ २
धानावन्तंकरम्भिणमपूपवन्तमुक्थिनम् ।
१ २ ३ १ २
इन्द्रप्रातर्जुषस्वनः ॥ ७ ॥९६

५ २ २ ३ २ ३ ४ ५   १ २   २ २ २
I धानावन्तङ्करम्भिणाम् । अपूपवन्तमू१क्थो२नाम् ।
३   ५   ३   ५   ४   ५   ४
इन्द्राप्रा२३४ताः । ओ२३४हाइ । जुषोवा । स्वा५नो
५
ईहाइ ॥ २ ॥९६

यजमानो ब्रूते—हे "इन्द्र" ! "धानावन्तं" धाना भृष्ट-यवाः तद्वन्तं "करम्भिणं" करम्भो दधि-मिश्राः सक्तवः तद्वन्तम् "अपूप-

९६ ऋग्वेदस्य ३,३,१७,१ ।

I पौषम् ।

(१)—"तत्रेतिहासमाचक्षत—विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव । विश्वामित्रः सर्वमित्रः । सर्वं संसृतं सुदाः कल्याणदानः । पैजवनः पिजवनस्य पुत्रः पिजवनः पुनः स्पर्द्धनीय-जवो वा मिश्रीभाव-गति र्वा"-इत्यादि । "मित्रे चर्षौ(६,३,१३०)"-इति त्वात्वे रूपम् । इह "सञ्ज्ञायां मित्राजिनयोः" (६,२,१६५)" इति प्राप्तोऽन्तोदात्तः "ऋषि प्रतिषेधो मित्रे (६,२,१६५)"-इति वचनात् तदभावस्य ।

अथाष्टमी।

गोषूक्त्यश्वसूक्तिनावृषी*।

३ १र २र ३ १ २ ३ १ २ ३ १ २
अपाम्फेनेननमुचेःशिरइन्द्रोदवर्त्तयः।
३ १र २र १ १ २
विश्वायदजयस्पृधः॥ ८ ॥९७

५ ४र र ५र ४ ५ ४ १ २ १ ७ ३
I अपाम्फेनेननमुचेः। शिरइ। द्रोत्। अवा२र्त्ता
५ १ १ ३ ५र र २
२३४याः। वाइश्वा२३ः। या२दा२३४औहोवा। जय-
१ ३ १ १ १ १
स्पृधा२३४५ः॥ ३ ॥९७

वन्तं' सवनीय-पुरोडाशोपेतम् "उक्थिनं" स्तोत्रिणं "नः" अस्मदीयमिमं सोमं "प्रातः" सवने "जुषस्व" सेवस्व। करम्भशब्दात् तदस्यास्तीत्यत इनिः तस्य प्रत्ययस्वरः(१)। प्रातः-स्वरादिष्वन्तोदात्तत्वेन पठितत्वादन्तोदात्तः(२)॥ ७ ॥ ९६

पुरा किलेन्द्रोऽसुरान् जित्वा नमुचिमसुरं ग्रहीतुं न शशाक

---

* 'गोषूक्ती वाश्वसूक्ती वा'-इति वि०।

---

९७ ऋग्वेदस्य ६,१,१९,२।

I इन्द्रस्य क्षुरपवि।

(२)—"आद्युदात्तश्च (२.१,३)"-इत्याद्युदात्त इत्यर्थः।

(३)—"स्वरादिनिपातमव्ययम्(१,१,३७)"-इति सर्वोपात्त-स्वरादिगणे 'स्वर्'-'अन्तर'

अथ नवमी ।

वामदेव ऋषिः ।

३ १ २　२ १ २　३ २ ३ २ ३ १ २
इमेतइन्द्रसोमाःसुतासोयेचसोत्वाः ।
१ २
तेषांमत्स्वप्रभूवसो ॥ ८ ॥९८

५ र　२ १र　२ १ २ १र र २
I इमेतआ । द्रसोमाः । होवाइहोइ । सुतासोये३ ।

स च युध्यमान स्तेनासुरेण जगृहे, स च गृहीतमिन्द्रमेवमवोचत्—'त्वां विसृजामि रात्रावह्नि च शुष्केणार्द्रेण चायुधेन यदि मां मा हिंसीरिति, स इन्द्रस्तेन विसृष्टः सन् अहोरात्रयोः सन्धौ शुष्कार्द्र-विलक्षणेन फेनेन तस्य शिर श्चिच्छेद; अयमर्थोऽस्यां प्रतिपाद्यते ।—। "इन्द्रः" त्वम् "अपां फेनेन" वज्रीभूतेन "नमुचेः" असुरस्य "शिरः" "उदवर्त्तयः" शरीरादुद्गतमवर्त्तयः अच्छैत्सीरित्यर्थः । कदेति चेत्-"यद्" यदा "विश्वाः" सर्वाः "स्पृधः" स्पर्द्धमानाः आसुरीः सेनाः "अजयः" जितवानसि । "इन्द्रो वृत्रहन्ता असुरान् पराभ्य नमुचि मसुरं मालभत"-इत्यादिक ग्ंब्राह्मणमनुसन्धेयम् ॥ ८ ॥ ९७

---

I सौमित्रम् ।

'प्रातर्'-इति प्रातः शब्दस्तृतीयः सच प्रकृति एवान्तोदात्तः । तत्र तथा विधगणपाठ एव नियामकः ।

अथ दशमी ।

श्रुतकक्ष ऋषिः ।

१ २ ३ २ ३ १ २ ३ १ ३ १ २
तुभ्यꣳ सुतासः सोमा*स्तीर्णं बर्हिर्विभावसो ।
३ १ २
स्तोतृभ्य इन्द्रमृडय † ॥ १० ॥ ९९

१ २ ३ ५ ३ ५र २ २ १ २१
चासीतूर२३४वाः । ते४षाम् । हाइहाइ । मात्स्वप्रभूर२३-
५ ४ ५
३४वा । वा५सोई२होइ ॥ ४ ॥ ९८

हे "इन्द्र"! "ते" त्वदर्थम् "इमे" पुरतो दृश्यमानाः "सोमाः" "सुतासः" अभिषुताः "ये च" अन्ये सोमाः "सोत्वाः" इत ऊर्द्धमभिषोतव्याः हे "प्रभूवसो(१) प्रभूतधनवन्निन्द्र! "तेषाम्" अभिषुतानाम् अभिषोतव्यानामर्थे "मत्स्व" हृष्टो भव ॥ ६ ॥ ९८

---

* "तुभ्य सोमाः सुता इमे"-इति, † "मावह"-इति च ऋग्वेदीयः पाठः ।

---

९९ ऋग्वेदस्य ६,६,२५,५ ।

(१)—'प्रभुः बहु, वसु धनं, यस्य स प्रभुवसुः । छान्दसं दीर्घत्वम् (६,४,१३७पा०) तस्य सम्बोधनम्-हे प्रभूवसो ! प्रभूत धन ! इत्यर्थः ।

४　५　२१र　र र　र　२
I तुभ्यꣳ३हाउ । सुतासःसोमाः । स्तीर्णावा२३र्ही̐ः ।
१　२　१ २　२　१
विभा२हो१इ । वा२३साउ । स्तोता३उवा३ । भ्यआ-
३ २　५र र　३　५
२इ । इन्द्र३४औहोवा । डा२३४याः ॥ ५ ॥ ९९

॥ इति द्वितीय-दशति ॥

हे "विभावसो"(१) दीप्ति-धन ! [दीप्ति-व्यापक ! वा(२)] इन्द्र ! "तुभ्य" त्वदर्थं "सोमाः" "सुतासः" अभिषुताः तथा "बर्हिः" "स्तीर्णं" प्रसारितम्(३) । अतः हे "इन्द्र" ! त्वं बर्हिषि निषद्य सोमान् पीत्वा "स्तोतृभ्यः" अस्मभ्यं "मृडय" उप दयां कुरु [यद्वा अस्मान्(४) सुखय ] । 'क्रिया-ग्रहणं कर्त्तव्यम्'-इति चतुर्थी ॥ १० ॥ ९९

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने द्वितीयाध्यायस्य दशमखण्डः ॥ १० ॥

---

I सौमित्रम् ।

(१)—'विविधं भाति दीप्यते वसुर्यस्य सः विभावसुस्तस्य सम्बोधनम्—हे विभावसो ! दीप्त-धन ! इत्यर्थः'-इति वि० ।

(२ —'वसु'-इति निघण्टौ द्वितीय-दशके धन-नामसु षोड़शम्, प्रथम-पञ्चमे रश्मि-नामसु 'वसवः'-इति दशमञ्च ।

(३)—'वेद्याख्य प्रदेशे'-इति वि० ।

(४)—अतएव माधवेनोक्तम्-'चतुर्थी-बहुवचनमिदं द्वितीयैकवचनस्थाने'-इति ।

अथैकादशे-खण्डे—

सेयं प्रथमा।

शुनःशेप* ऋषिः।

२ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
आवइन्द्रं क्रिविं* यथावाजयन्तःशतक्रतुम्।

१ २ ३ १ २
मंहिष्ठंसिञ्चइन्दुभिः॥ १॥ १००

५र २ १ र २
I आवइन्द्राम्। क्रिविंयथा। वाजयार२३न्ताः।

१ २ १ ऽ २
शताक्रतुम्। मंहिष्टार२३ंसो। चायाइउवा२इ। दूर

५
३४भोः॥ ६॥ १००

"वाजयन्तः" अन्नमिच्छन्तो(१) वयं शुनःशेपाः हे ऋत्विग्यजमानाः! "वः" युष्माकं सम्बन्धिनम् "इन्द्रम्" "इन्दुभिः"

---

* 'शुनशेफ'-इति वि-पाठः।

* 'क्रिविं'—इति क-पाठः, ऋग्वेदीय-पाठश्च।

---

१०० ऋग्वेदस्य १,२,२८,१।

I कौत्सम्।

(१)—पूजयन्तो वा वि० मतम्। वाजमित्यन्ननामसु द्वितीयम् (नि०२,७)।

अथ द्वितीया ।

श्रुतकक्ष ऋषिः ।

१ २　　　३ १र २र　　३ १ २
अतश्चिदिन्द्रनउपायाहिशतवाजया ।

३ २ ३ १ २
इषासहस्रवाजया ॥ २ ॥ १०१

५　　　　　　５　१　र २　　　१र
I अतश्चिदिद्रन्नउपाइ। आयाहिश। तवाजा२३

सोमैः(२) "आसिञ्चे" [वचन-व्यत्ययः (३,१,८५पा०)] सर्व्वतः सिञ्चामहे सपर्यामः। कीदृशं? "शतक्रतु" शत-सङ्ख्याक-कर्मोपेतम्(२) "मंहिष्ठम्" अतिशयेन महान्तम्(३)। सेचने दृष्टान्तः— "कविं यथा"(४) [कृतीच्छेदने, कृत्यते छिद्यते खन्यते इति] कविः कृषिः तां जलेन पूरयन्ति तद्वत् ॥ १ ॥ १००

---

१०१ ऋग्वेदस्य ६,६,१६,५ ।
I कौत्सम् ।

(२)—'शतमिति बहु-नाम (नि०३,१,९)। क्रतुरित्यपि कर्म-नाम, (नि०२,१,११) यज्ञ-नाम वा। बहु-कर्माणं बहु-यज्ञं वेत्यर्थः'-इति वि०। क्रतुरिति निघण्टौ तृतीय-नवमे प्रज्ञा-नामस्वपि दृश्यते।

(३)—'अतिशयेन दातारम्, अथवा पूजनीयतमम्'-इति वि०। मंहते-इति दान-कर्मसु अन्त्यं पदम् (३,२०नि०)—महयति-इति अर्चति-कर्मसु पञ्चत्रिंशत्तमम्। तयोरन्यतरयोः तजन्तयोः "तुश्छन्दसि (५,३,५९)"-इतीष्ठनि रूपम् विवरण-कारस्य। सायणमते तु महच्छब्दस्य।

(४)—'कविरिति कूप-नाम (नि०३,२३,८)। तत्सामीप्यात् आवाहकोऽपि कवि-

अथ तृतीया ।

त्रिशोक* ऋषिः ।

२ ३१ २ ३ १ २ ३ १ २ ३ २ ३ १ २
आबुन्दंवृत्रहादद्देजातः पृच्छाद्वि*मातरम् ।

२ ३ २ ३ २ २ १ ५ ४ ५
या३४ । दूषा३४सद्दा३ । स्तवोर२३४वा । जा५योई्हा-

इ ॥ ७ ॥ १०१

हे "इन्द्र" ! "अतश्चित्" अस्मात् द्युलोकादेव [यद्वा । अस्मा-च्छत्रु-स्थानात्] "शतवाजया"(१) शत-सङ्ख्याक-बलयुक्तेन तथा "सहस्रवाजया" [वाजोऽन्नम् (नि० २,७)] सहस्र-सङ्ख्याकान्न-वता बहुलान्नेन "इषा"(२) अन्न-रसेन युक्तः सन् "नः" अस्मान् "उपायाहि"(३) अधिकमाभिमुख्येनागच्छ ॥ २ ॥ १०१

---

* 'त्रशोक'-इति वि० पाठः ।

* "पृच्छद्वि"-इति ऋग्वेदीयः पाठः ।

---

च्यते । यथा-शब्द उपमा-वाची (नि०३,१३,२) । छावाहकमिव । * * । एतदुक्तं-भवति-यथा कश्चित्, छावाहकमुदकेन सिञ्चति विभर्त्ति, तद्वत् त्वां हे इन्द्र ! सोमेन सिञ्चाम इत्येतदाशास्महे'-इति वि० ।

(१)—'शतमिति बहु-नाम (नि०३,१,९,) वाजः वेगः (नै० २,२८) । बहुवेगो यस्याः सा शत-वाजा ; तया बहु-वेगया शीघ्रया गत्या'-इति वि० ।

(२)—'इषम्'-इत्यन्न-नामसु चतुर्दशम् नि० २,७ ।

(३)—'समीपमागच्छ'-इति वि० ।

३ १र २र
कउग्राः केह शृण्विरे ॥ ३ ॥ १०२

५र ७ १र २
I आबुन्दम्। वृत्राहा। दाइ। जातःपृच्छाऽइत्।
१ २ ५ २ १ २ १ २ र १
विमाऽरता२३४राम्। कउग्रा२३ःके। हाशृण्विरोइडा
२ १
२३भा३४३। ओ२३४५इ। डा॥ ८ ॥ १०२

"जातः" उत्पन्नः(१) "वृत्रहा" इन्द्रः "बुन्दम्" इषुं [तथा च यास्कः—'बुन्द इषुर्भवतीति'(२)] "आददे" आदाय चेषुम् "उग्राः" उद्गूर्ण-बलाः(३) "के" के च "शृण्विरे" वीर्येण विश्रुता?—इति स्वीयां "मातरं"(४) "वि पृच्छात्" अप्राक्षीत्(५) ॥ ३ ॥ १०२

---

१०२ ऋग्वेदस्य ६,३,४२,४।
I औषसम्।

(१)—'जातमात्रएवेति वि०-व्याख्याने किञ्चिद्विशेषोऽर्थः।
(२)—"बुन्दइषुर्भवति, बुन्दो वा भिन्दो वा भयदो वा भासमानो द्रवतीति वा"-इत्यादि नै० ६,३२,३३।
(३)—'अप्रसह्याः-इति वि०।
(४)—'अनयित्रीम् अदितिम्'-इति वि०। "अदितिरदीना देवमाता"-इति नै० ४,२२। "अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्"-इति ऋ० १,२१,४,४।
(५)—इन्द्रः जात एव इषु मादाय मातरं पृष्टवान् के उग्राः? के च श्रूयन्ते यागादि-कर्मसु विश्रुताः? दुष्ट-शिष्टयोः परिचयमिति यावत्-इत्येवार्थोऽस्या विवरण-सम्मतः।

अथ चतुर्थी ।

मेधातिथिर्ऋषिः ।

३ १ २ ३ १ २ ३ १ २
बृबदुक्थꣳहवामहे सृप्रकरस्नमूतये ।
१ २ ३ २ ३ १ २
साध * कृण्वन्तमवसे ॥ ४ ॥ १०३

५ ५र १ १ र
I बृबदुक्थꣳहा६वामहाइ । साप्रा२कारा२ । स्नमू ।
१ २ १ २१ ५ ४
तयाइ । सा१धा२ः काण्वा२३ । तमो२३४वा । वा५-
५
सो६हाइ ॥ ८ ॥ १०३

"ऊतये"(१) लोकस्य रक्षणाय "सृप्रकरस्नं"(२) प्रसृत-बाहुं

* "साधु"-इति ऋग्वेदीयः पाठः ।

१०३ ऋग्वेदस्य ६,३,२,५ ।
I भारद्वाजम् ।

(१)—"ऊतिरवनात्"-इति (नै० ५,१,)। "ऊतियूतीत्यादिना (३,३,९७पा०) सिद्धम् ।

(२)—'करस्नू बाहू ; सृप्रौ गतौ। प्रलम्बौ बाहू यस्य स सृप्रकरस्नुः। उकारस्याकारापत्याकृपम्। तं सृप्रकरस्नम् प्रलम्बबाहुमित्यर्थः'-इति वि०। इह चिन्त्यमेतत्—अस्ति हि निघण्टौ द्वितीय-चतुर्थे बाहु-पर्याये करस्नौ इति सप्रसम्पदम्, तथा च

अथ पञ्चमी ।

गोतमऋषिः*

२ २ १ १ २ ३ १ २ ३ २
ऋजुनीतीनोवरुणोमित्रोनयतिविद्वान् ।

३ २ ३२ ३ १ २
अर्यमादेवैः सजोषाः ॥ ५॥ १०४

['करस्नौ बाहू कर्मणां प्रस्नातारौ([1],[2]) इति यास्क-वचनात्([3]) "अवसे" लोकस्य पालनाय "साधः" साधकं धनं "कृणवन्तं" कुर्वन्तं प्रयच्छन्तं "हवदुकथं"([4]) महदुक्थम् इन्द्रम् "हवामहे" आह्वयामः । [तथाच यास्कः—'हवदुकथो महदुकथो वक्तव्य मस्माउकथमिति वा (६,४)'-इति ॥ ४ ॥१०३

---

* 'शौनकस्यार्षम्'-इति वि० ।

---

१०४ ऋग्वेदस्य १,६,१७,१ ।

करस्नशब्दोऽदन्त एवेति किम्पुनस्तकारस्याकारापत्तिकथनेनेति, किञ्च अस्ति सर्पति गतिकर्मा (२,१४,७ नि०) तस्य सृप्रेतिरूपे तकारस्य रेफत्वं कथमिह नेङ्गितमिति ।

(३)—तत्रैव सृप्र-शब्दोऽपि व्याख्यातः । तथाहि—"सृप्रः सर्पणात्"-इत्यादि (६.१७) ।

(४)—इहच्छन्द-हकारस्य वकारापत्त्याक्रूपम् । उकथ-शब्दः स्तोत्र-वचनः । इहत् उकथं यस्य स इवदुकथः तं इवदुकथम्'-इति वि० ।

अथ षष्ठी ।

ब्रह्मातिथि ऋषिः ।

१ २ ३ २ ३ २ ३ २ ३ २ ३ १ २

दूरादिहेवयन्तोरुणप्सुरश्वितत्

५ २ ४२ ५२ ४ ५ ४ २ १२ २ १

I ऋजुनीतीनोवरुणः । इहा । मित्रोनयतिविद्वा-

२ १ २ १२ २ १ २ १ ऽ

२३ंसाः । इहा । अर्यमादा२३इवाइ । इहा । सजोषा३

२ २ ५

उवा३ । ई३४हा ॥ १० ॥ १०४

अहरभिमानी देवः "मित्रः", "वरुणः" रात्र्यभिमानी, मित्रश्च वरुणश्च "विद्वान्" नेतव्यमुत्तमं स्थानं जानन् "नः" अस्मान् "ऋजुनीती"(१) ऋजुनीत्या ऋजु-नयनेन कौटिल्य-रहितेन गमनेन "नयति" अभिमतं फलं प्रापयति । तथा "देवैः" अन्यैः इन्द्रादिभिः "सजोषाः" समान-प्रीतिः "अर्य्यमा" अहोरात्र-विभागस्य कर्त्ता सूर्य्यश्च अस्मानृजु-गमनेनाभिमतं स्थानं प्रापयतु । "नयति"-"नयतु"-इति च पाठौ ॥ ५ ॥ १०४

---

I कौत्सम् ।

(१)—"ऋजुरित्यपस्य भवति"-इत्यादि (नै० ६,२१) ।

३ २ ३ १ २
विभानुं विश्वथातनत् ॥ ६ ॥ १०५

२र १र　४र ५　२　१　२ १　२
I दूरादो२३हेवयत्सताः। अरुण प्सुरशिश्वा२३इतात्।

१र　२　१ र २　१　२　१
विभानू२३वी। श्वाथातनत्। इडा२३भा३४३। ओ२३-

४५इ। डा॥ ११ ॥ १०५

"दूरात्" दूरतएव विप्रकृष्टे एव नभसः प्राक् प्रदेशे वर्त्त-माना "इह"(१) "सतः"(२) सती इह समीपे विद्यमाना "इव" समीपे विद्यमानेव "अरुणप्सुः"(३) आरोचमानरूपा ईदृशी उषा(४) "यत्" यदा "अशिश्वितत्" अश्वेतयत् [श्विता वर्णे,

---

* "विश्वथा", विश्वधा" इति च पाठौ।

---

१०५ ऋग्वेदस्य ५,८,१,१।

I औषसम्।

(१)—'पृथिव्याम्'-इति वि०।

(२)—'प्रशस्तान् यजमानान्'-इति वि०।

(३)—'अरुणरूपा' इति वि० 'प्सुः'-इति रूपनामसु सप्तमम् (नि० ३,७) एतदेव विवरण आख्याने नियामकम्।

(४)—अर्थलभ्यएषः। "रात्रेरपरः कालः" इति नै० २,१८: नत्कीलम्तु गर्भ-

अस्मात् ख्यन्तात्(५) लुङि चङि रूपम् 'यद्वृत्तान् नित्यम् (८,१,६६पा०)'-इति निघात-प्रतिषेधः] तदा "भानुं" दीप्तिं "विश्वथा"(६) विश्वधा बहुविधां(७) "व्यतनत्" विस्तारयति [तनोतेर्व्यत्ययेन शप् (१,१,८५पा०)]। प्रातरनुवाके उषस्येन काण्डेन (१,२४,२) उषाः स्तुता सती प्रादुर्बभूव, हे अश्विनौ! शंसिष्यमाणम् आश्विनं क्रतुं श्रोतुं युवामपि प्रादुर्भवत-इत्यध्याहारेण वाक्यं पूरणीयम्(८)॥

"सतः"-"सती"-इति पाठौ॥ ६ ॥ १०५

---

धारण-शीलत्वात्। तथाहि—"इदं श्रेष्ठं ज्योतिषां ज्योति रागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा। यथा प्रसूता सवितुः सवाय सेवारात्र्युषसे योनि मारैक्"-इति ऋ० १,१६,८,१। "इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं प्रज्ञातन ममजनिष्ट विभूततमम् यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनि मरिचत् स्थानम्" -इति यास्क-कृत तद्व्याख्यानम्। "स्त्री-योनिरभियुत एनां गर्भः"-इति च नैरुक्तम् २,१९। 'रुशद्वत्सा रुशती"१,१६,८,२)-इत्यादि चोषसः स्त्रीत्वे लिङ्गम्।

(५)—'नपुंसकलिङ्गमिदं व्यत्ययेन, या उषा'-इति। 'पुरस्ताद् यच्छब्द-श्रुतेर्योग्यार्थसम्बन्धस्तच्छब्दोऽध्याहर्त्तव्यः'-इति च वि०।

(६)—"प्रत्न पूर्व विश्वेमात् थाल् छन्दसि ५,३,१११)"-इति थालि रूपम्।

(७)—मृदु-मन्द-तीव्र-लक्षणामित्यर्थः।

(८)—तथाच श्रूयते—"प्रातर्युजा विबोधयाश्विना वेह गच्छताम्। अस्य सोमस्य पीतये (१,५,२,१)"-इत्यादि "प्रातर्योगिनौ विबोधयाश्विना विहागच्छता मस्य सोमस्य पानाय"-इत्यादि च यास्क-कृतं तद् व्याख्यानम्। "अश्विनौ यद् व्यश्नुवते सर्वं रसेनान्यो ज्योतिषान्यः **तत्कावश्विनौ द्यावापृथिव्या वित्येके ऽहोरात्रा वित्येके सूर्या चन्द्रमसा वित्येके राजानौ पुण्यकृता वित्यैतिहासिकाः"-इत्यादि नै० १२,१।

अथ सप्तमी।

विश्वामित्रो जमदग्नि र्वा ऋषिः।

१ २ ३ १र २र
आनोमित्रावरुणाघृतैर्गव्यूति मुक्षतम्।
१ १ २
मध्वारजाꣳसिसुक्रतू ॥ ७ ॥ १०६

३र ४र ५ र २ २र १ ३र
I आनोमित्रा। वरुणा३। औहोवार३४। घृतै
४ ५ २ १र १ १ २र १ ऽर
र्गव्यूतिमु। क्षता३म्। औहोवा२। माध्वारजाराꣳ
२र १ र १ २ १
सिसू२। औहोवा२। क्रतू। इडार३भा३४३। ओ२३
४५इ। डा ॥ १२ ॥ १०६

"सुक्रतू" शोभन-कर्म्माणौ हे "मित्रावरुणौ!" "नः" अस्माकं "गव्यूतिं"(१) गवां मार्गं गो-निवास-स्थानं "घृतैः"(२) क्षरण-

१०६ उत्तरार्च्चिकस्य १,१,५,१—ऋग्वेदस्य ३,४,११,५।
I मित्रावरुणयोः संयोजनम्।

(१)—'गावो यत्र चरन्ति स गव्यूतिरुच्यते'-इति वि०।

(२)—घृतमिति घृणाते रूपम्। तथाहि फणिभाष्ये—(७,१,९५) "घृणातेस्त्रीणि रूपाणि लोके, घृतं घर्म घृणा"-इति 'उदकस्थिलचणैः,इति वि०। निघण्टौ चोदक-नामसु दृश्यम् १,१२।

अथाष्टमी।

प्रस्कण्व(१)ऋषिः*।

२ ३ २ २ २ ३ २ ३ १ २ ३ १ २
उदुत्येसूनवोगिरःकाष्ठायज्ञेष्वत्नत*।
२ १ २ ३ १ र २ र
वाश्रा अभिज्ञु यातवे॥ ८॥ १०७

साधनैः पयोभिः(२) "आ उक्षतम्" आ समन्तात् सिञ्चतम्, अस्मभ्यं दोग्ध्रीः गाः प्रयच्छतामिति भावः। रजांसि"(३) पारलौकिकान्यस्मदावासस्थानानि "मध्वा"(४) मधुरेण दुग्ध-रसेन सिञ्चतम् [गव्यूतिम्-'गोर्यूतौ छन्दसि(६,१,१२२पा०]-इत्यवादेशः, मध्वा-सर्व-विधीनां छन्दसि विकल्पितत्वादनुमभावः॥ ७॥ १०६

---

* 'हिरण्यस्तूपस्यार्षम्'-इति वि०। "हिरण्यस्तूपो हिरण्मय-स्तूपोऽस्येति वा। स्तूपः स्त्यायतेः सङ्घातः"। इति नै० ४,२२।

* "अज्मेष्वत्नत"-इति ऋग्वेदीयः पाठः।

---

१०७ ऋग्वेदस्य १,३,१३,५।

(१)—"प्रस्कण्वः कण्वस्य पुत्रः, कण्व-प्रसवोयथा प्राग्रम्"-इति नै० ३,१७।

(३)—'त्रीनपि लोकान्'-इति वि०।

(४)—'उदकेन'-इति वि०। मधु-इत्युदक-नामसु एकादशम् १,१२।

(५)—"सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङाञ्च। व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन"-इति (३,१,८५) कात्यायन-वचनात् लिङ्गव्यत्यये "जसादिषु छन्दसि वा वचनम् प्राङ्णौ चङ्युपधायाः"-इति (७,३,९७) कात्यायनीयेन घि-संज्ञाभावे रूपमिति भावः।

५ र र　५र　१ २र　१　७
I उदुत्येसूनाईवोगिराः। काष्ठाय। ज्ञाइ। षुवा-
२　५　२र १र　२　१　४　२
२त्ना२३४ता। वाआआ२३भो२। ज्नू२३या३। ता३४-
५
५वोईहाइ॥ १३ ॥ १०७

"त्ये" ते प्रसिद्धाः "गिरः सूनवः" वाच उत्पादकाः(१) मरुतः(२) [वायवो हि ताल्वोष्ठादिषु सञ्चरन्तो वाचमुत्पादयन्तो(३) "यज्ञेषु" स्वकीयेषु यागेषु वर्त्तमानेषु सत्सु "काष्ठाः" अपः ["आपोऽपि काष्ठा उच्यन्ते क्रान्त्वा स्थिता भवन्तीति" (२,१५) यास्कः(४)] "उत् उ" उत्कर्षेणैव "अन्तत" अतनिषवन्तः विस्तारितवन्तः। उदकं विस्तार्य्य तत्पानार्थं "वाश्राः"(५)

---

I ऋतुषाम।

(१)—सुनवः-इत्यस्यैवार्थः उत्पादक इति। अत्र च सुनोतेः सूनुरित्येव वीजम्।

(२)—इयञ्च मारुती ऋक् इति प्रसिद्धा।

(३)—तथाहि शिक्षा-वचनम्—"आत्मा बुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। मारुतस्तूरसि चरन् मन्द्रं जनयते स्वरम्"-इत्यादि।

(४)—काष्ठाइत्येतदनेकस्यापि सत्वस्य नाम भवति। काष्ठा दिशो भवन्ति, क्रान्त्वा स्थित्वा भवन्ति। काष्ठा उपदिशो भवन्ति, इतरेतरं क्रान्त्वा स्थित्वा भवन्ति। आदित्योऽपि काष्ठोच्यते, क्रान्त्वा स्थितोभवति। आज्यन्तोऽपि काष्ठोच्यते, क्रान्त्वा स्थितो भवति। आपोऽपि काष्ठाउच्यन्ते, क्रान्त्वा स्थित्वा भवन्तीति स्थावराणाम्"-इति नै० २,१५।

(५)—"स्फायि तञ्चि वञ्चि (उ०,द्वि०)"-इत्यादिना शब्दार्थ वाशेः रकि सिद्धम्।

अथ नवमी ।

मेधातिथिर्ऋषिः ।

२ ३उ ३ १ २ ३ १र २र ३ २
इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् ।
१ २ ३ २
समूढमस्य पांसुले* ॥ ९ ॥ १०८

॥ इति तृतीय-दशति ॥

५ ५ १ ३ २ ३ ५ १
I इदा६मे । विष्णू२ः । विचक्रा२३४माइ । त्राइ-

हुम्भारवोपेताः गाः "अभिज्ञु"(६) जान्वभिमुखं यथा भवति तथा "यातवे"(७) गन्तुं प्रेरितवन्त इति शेषः(८) ॥ ८ ॥ १०७

---

* "पांशुरे"-इति ऋग्वेदीयो यजुर्वेदीयश्च पाठः । "स्वाहा"-इत्यन्तेनाधिकश्च यजुर्वेदे ।

---

१०८ उत्तरार्चिकस्य ८,२,५,१ = ऋग्वेदस्य १,२,७,२ = यजुर्वेदस्य ५,१५ = अथर्व-ब्राह्मणस्य १,१७ = ऊहगानस्य १४,७ ।

I विष्णोः साम ।

(६)—जानुनोज्ञः (५,४,१,३०) ।

(७)—"तुमर्थे से सेन् (३,४,९)"-इत्यादिना तवेङ् ।

(८)—'त्ये' ते 'सूनवः' रुद्रस्य अपत्यभूता 'मरुतः' 'गिरः' गर्जितलक्षणा वाचः 'काष्ठाश्च' वृष्टि-लक्षणा अपः 'यज्ञेषु' निमित्त-भूतेषु 'उदत्नत' ऊर्द्धं विस्तारयन्ति । कीदृशा मरुत? 'वाश्राः' वासन-स्वभावकाः । कथं क्षिपन्ति? 'अभिज्ञु' अभिनिपात्य-जानुनी मरुतो दात्यर्थः । किमर्थम्? 'यातवे' पृथिवीं प्रति गमनाय । इत्यर्थो विवरण-निष्पन्नः ।

२ १　　१ २　　　　　　　२
धानि। दधाइपा२दा३म्। समू२ढो१। ढा२३मा३।
१ ३　५र र　　२　२
स्या२पा२३४औहोवा। ए३। सुले१॥ १४॥ १०८

"विष्णुः" त्रिविक्रमावतारधारी "इदं" प्रतीयमानं सर्वं जगत् उद्दिश्य "त्रेधा" त्रिभिः प्रकारैः "पदं निदधे" स्वकीयं पादं प्रक्षिप्तवान्। "अस्य" विष्णोः "पांसुले" पांसुरे धूलियुक्ते पादस्थाने "समूढम्" इदं जगत् सम्यगन्तर्भूतम्(१)। सेयमृग् यास्केनैवं व्याख्याता—"* * विष्णु विंशते वाप्नोते वा * * * यदिदं किञ्च तद्विक्रमते विष्णुः, त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः। समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः। समूढमस्य पांसुरेप्यायनेन्तरिक्षे पदं न दृश्यते। अपिवोपमार्थे स्या पांसुल इव पदं न दृश्यत इति। पांसवः पादैः सूयन्त इति वा। पन्नाः शेरत इति वा। पंसनीया भवन्तीति वा"(११,१८—१९)"-इति॥ ९॥ १०८

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोग्याख्याने द्वितीयाध्यायस्यैकादशमखण्डः॥ ११॥

---

(१) -"तत्र पादत्रयमपि "समूढमस्य" वद्वेरिदं रूपम सम्यक् स्थापितम्। "पांसुरे" लुप्तोपममेतत् द्रष्टव्यम्, पांसुरइव देशे। १। अथवा पांसुलत्व-योगात् पांशुलशब्देन पृथिव्युच्यते। तेषां त्रयाणां पृथिव्यां यत् पदं तत समूढम। २ अथवा विष्णुरादित्यः। स इदं विचक्रमे। त्रेधा निदधे पदम्—उदयगिरौ, मध्ये नभसः, अस्तङ्गिरौ च। ३। अथवा त्रेधा निदधे पदम्—पृथिव्यामग्न्यात्मना, अन्तरिक्षे वैद्युतात्मना, दिवि आदित्यात्मना, तत्र पदत्रयमस्य समूढम् पांसुर इव देशे। ४। अथवा समूढमिति मुहे र्मोहनार्थस्य रूपम्। समूढं संच्छिन्नं यदस्य वैद्युतात्मना पदम तत समूढं सच्छिन्नम॥"-इति वि०।

* * "अथ यद्विषितो भवति तद्विष्णुर्भवति"-इत्यादिभागेनाधिकस्तत्र।

* * * इहैव तत्र मन्त्र स्वरूपः पठितः।

अथ द्वादशखण्डे—

सैषा प्रथमा ।

मेधातिथि ऋषिः ।

१ २ ३ १ २ ३ २ ३ १र २र

अतोहिमन्युषाविणꣳसुषुवाꣳसमुपेरय* ।

३ २ ३ २ ३ १ २

अस्यरातौ†सुतम्पिब ॥ १ ॥ १०९

५ र २ १ १

I अतोहिमा । न्युषा२वाइणा२म् । सुषुवाꣳसा

हे इन्द्र ! "मन्युषाविणं" क्रोधेन सोमं सुन्वन्तम्(१) "अतीहि" अतिगच्छ, तथास्मिन् देशे "सुषुवांसं" सोमं सुन्वन्तम्(२)

* "सुमुपारणे"-इति, † "इमं रातम्"-इति च ऋग्वेदीय पाठः ।

१०९ ऋग्वेदस्य६,३,५,१ ।

I कौत्सम् ।

(१)—दीप्तस्य सोमस्य अभिषोतारम् मेधातिथिं माम् प्रति'-इति वि० । 'मन्यु' -इति क्रोध-नामसु उपान्त्यं पदम् २,१३ नि० । 'मन्यते'-इति कान्ति-कर्मसु त्रयोदशस्य २,६ नि० ।

(२)-'अङ्गिरःप्रभृतिमन्यमृषिम्'-इति वि० ।

अथ द्वितीया ।

वामदेव ऋषिः ।

२ ३ १ २   ३ १र २र ३ १ २
कदुप्रचेतसेमहेवचोदेवायशस्यते ।
१र २र ३ १ २
तदिध्यस्यवर्द्धनम् ॥ २ ॥ ११०

१ २ ३ २र १ १
३म् । होइ । ऊपे१रायार । अस्यराता२३उ । सू२-
३ ५र र ३ ५
ता२३४औहोवा । पो२३४वा ॥ १५ ॥ १०९

३ ४ ३ ४र५ र ३ २ १ ५ ५र र
I कदुप्रचेतसे । महा३इ । वा२३४चो । देवाहाउ ।
४ ५र २ १ २ ३ २ ३ २ २ १
वचोदेवा । यशस्या२३ता३४इ । तदा३४इध्दिया३ । स्यवो
५ ४ ५
२३४वा । धापूनो६हाइ ॥ १६ ॥ ११०

"उपेरय" समीपे प्रेरय । "अस्य" यजमानस्य "राती" यज्ञाख्ये दाने "सुतम्" अभिषुतं सोमं "पिब" ॥ १ ॥ १०९

"महे" महते "प्रचेतसे"(१) प्रकृष्ट-ज्ञानाय "देवाय" द्योत-

---

I काश्यपम् आङ्गिरसं वा ।

(१)—"चेतः"-इति प्रज्ञा-नामसु तृतीयम् ३,९ नि० । "प्रचेताः प्रवृद्ध-चेताः" इति नै० ८,५ ।

अथ तृतीया।

मेधातिथि-प्रियमेधावृषी*।

३ २ ३२३ १२ ३१ २ ३१र २र
उक्थञ्चनशस्यमानंनागोरयिराचिकेत।
१ २ ३ २ ३ १ २
नगायत्रङ्गीयमानम्॥ ३ ॥ १११

५ ४ ५ ४ २ र र र २
I उक्थञ्चनोहाइ। शस्यमानम्। नागोरा२३यीः।

नादि-गुण-युक्तायेन्द्राय "कदु"(२) कुत्सितम् अस्मदीयं "वचः" स्तोत्र-रूप सुतं "शस्यते" यथा प्रशस्तं भवति(३) देव स्तथानुगृह्णातीत्यर्थः। "तदित्" तदेव "अस्य" यजमानस्य 'वर्द्धनं हि"(४) प्रवृत्ति-साधनं खलु॥ २ ॥ ११०

---

* 'मेधातिथेरार्षम्-इत्येव वि०।

---

१११ उत्तरार्चिकस्य ६,१,१५,२ = ऋग्वेदस्य ५,७,१८,४।
I वार्हदुक्थम्।

(२)—'कत्, किम उत्तरस्याः पञ्चम्या अत् आदेशः, कस्मात् कारणात्'। 'उ' इति पाद-पूरणः,-इति वि०।

(३)—'शस्यते उच्चार्यत इत्यर्थः'-इति वि०। 'शंसति'-इति अर्चति-कर्मसु पठ्यते ३,१४ नि०।

(४)—'हि' यस्मात् 'तत्' उच्चारितम् वचनम् 'अस्य' देवस्य 'वर्द्धनम्' वृद्धिकरम् तस्मादुच्चारयेति वि०-सम्मतोऽर्थः। स्तूयमाना हि देवता वीर्येण वर्द्धते इति तत्सिद्धान्तः।

र　र　　२१र　१　　र　१　३
आचिकेता। नगायार३त्राम्। गो। यमा२ना२३४
५र र　　३　५
औहोवा। ऊ२३४पा॥ १७ ॥ १११

गायते गौः(१) "अगोः"(२) अस्तोतुः(३) "अयिः" अरिः [व्यत्ययेन यकारः(३,१,८५पा०) ] शत्रुः इन्द्रः "शस्यमानं" होत्रा पठ्यमानम् "उक्थं च" शस्त्रमपि "आ चिकेत" अभिजानाति [कित ज्ञाने, छान्दसो लिट् (३,४,७पा०)। नेति सम्प्रत्यर्थे] "न" सम्प्रति प्रस्तोत्रादिभि गीयमानं "गायत्रम्" गातव्यं साम(४) [यद्वा गायत्राख्यम्(५)] आचिकेतेत्येव। अतः कारणात् वयमपि तमिन्द्रं स्तुमइत्यर्थः॥

"नागोः"-"अगोः"-इति, "रयिः"-"अरिः"-इति च पाठौ॥ ३ ॥ १११

(१)—तथाहि-"गातेर्वौकारो नाम-करणः"-इति नै० २, ५। गौरिति निघण्टावपि स्तोतृ-नामसु दृश्यते ३, १६।

(२)—'अगोः'-इति पाठस्तु ऋग्वेदीयस्ततोऽत्र न युक्तः, इह पुनर्नागोरिति प्रतीकमुद्धृत्य व्युज्यते।

(३)—'नागोः' कुङ्गुङ् अव्यक्ते शब्दे; गुः अव्यक्तभाषी; न गुः = अगुः = व्यक्तभाषी, न अगुः = न व्यक्त-भाषी = नागुः। तस्य नागोः अव्यक्त-भाषिण इत्यर्थः'-इति वि०।

(४)—"गायत्रं गायतेः स्तुति-कर्मणः"-इति नै० १,८।

(५)—तच्च गानं चतुर्षु गान-ग्रन्थेषु नोपलभ्यते, परमध्ययनारम्भे गुरु-मुखादनुश्रूयते। तदिदम्—"तत्सवितुर्वरेणियोम्। भार्गोदेवस्य धीमाही २। धियोयोनः प्र। चो १ऽ२१ऽ२। ऊम्। आ २। दायो। आ२३४५॥ १॥" अस्या मूलमृक् तु उत्तरार्चिकस्य षष्ठ-तृतीय-दशम-सूक्ते प्रथमेति पठ्यते॥

अथ चतुर्थी ।

विश्वामित्र ऋषिः* ।

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
इन्द्रउक्थेभिर्मन्दिष्ठोवाजानाञ्चवाजपतिः ।

१ २ ३ २ ३ १ २
हरिवान्त्सुतानाꣳसखा ॥ ४ ॥ ११२

५ २ १ २ १ २ ३
I इन्द्रउक्थाइ । भिर्मान्दाइष्ठोइ । वाजानार३४-

५ १र २ १ २ ५ १र ऽर १
ञ्चा । वाजपतिः । हरा२इवार३४न्त्स । ताना२ꣳस ।

२ ४ ५ ४
खा । औ३होवा । होपुइ । डा ॥ १८ ॥ ११२

"वाजानाम्"(१) अन्नानां मध्ये "वाजपतिः" उत्कृष्टान्न-पतिः "हरिवान्" हरि-नामकाश्ववान् "इन्द्रः" "उक्थेभिः" होतृ-प्रयुक्तैः (उक्थ-नामकै र्वा शस्त्रैः) "मन्दिष्ठः" अतिशयेन तृप्तः सन् "सुतानाम्" अभिषुतानां सोमानां "सखा" सखिवत् प्रीति-करः सोमैः प्रीयत इत्यर्थः(२) ॥ ४ ॥ ११२

---

* 'वामदेवस्यार्षम्-इति वि० ।

---

I वार्हदुक्थम् ।

(१)—'दातेति वाक्यशेषः'-इति वि० ।

(२)—अस्यामृचि च-शब्दः पाद-पूरणः सर्व-सम्मतः ।

अथ पञ्चमी ।

मेधातिथि-प्रियमेधावृषी* ।

२ १ २ ३ १र २र ३ १ २
आयाह्युपनः* सुतंवाजेभिर्माहृणीयथा ।
२ १ २ ३ १ २
महाँ३इवयुवजानिः ॥ ५ ॥ ११३

४र ५र ४ १ २ १ २ २ १र १
I आयाही । उपनःसुतम् । हौवा३हाइ । वाजे
५ १र २र १ २ २ १र २ १ १ २
२भिर्माहृणीयया३ःहौवा३हाइ । महाँ३इवयुवा२३ । हौवा-
२ १ २ ५र र २ ५
३हा३इ । जा२ना२३४औहोवा । ऊ२३४पा ॥ १९ ॥ ११३

हे इन्द्र! "नः" अस्मदीयं "सुतम्" अभिषुतं सोमम् "उप याहि" प्रत्यागच्छ, किञ्च "वाजेभिः" अन्यदीयैर्हविरूपैरन्नैः "मा हृणीयथाः" मा क्रियस्व(१)। तत्र दृष्टान्तः—"युवजानिः" यौवनोपेता जाया यस्यासौ युवजानिः ['जायाया निङ्(५,४,१३४ पा०)'-इति समासान्तः] "महान् इव" प्रभुरिव ; यथा रूपवद्-

---

* 'श्रुतकक्षस्यार्षम्'-इति वि० ।

* "आयाह्यद्रिभिः"-इति घ-पाठः ।

---

I कौत्सम ।

(१)—'एत्य च स्तोकेनापराधेन 'मा हृणीयथाः' मा क्रोधक्रमः, मा रोषीरित्यर्थः'-इति वि० । निघण्टौ क्रुध्यति-कर्मसु 'हृणीयते'-इति चतुर्थस्य पदमीह्यते २,१२ ।

अथ षष्ठी।

कौत्सो दुर्मित्र ऋषिः*।

३ १ २ ३ १र २र ३ १र २र ३ १ २ ३ २
कदावसोस्तोत्रꣳहर्यतआअवश्मशा*रुधद्वाः।

३ २ ३ २ ३ १ २
दीर्घꣳसुतंवाताप्याय॥ ६॥ ११४

२र ३ ५र १ २ २ १
I औ२हो१इ। कदावसो। स्तोत्रा३म्। हर्या-

४ ५ ३ २ ३ ५र ३ २ ३ ५
ताआ। औ२हो१इ। अवश्मशा। रुधाद्व२३४वाः।

भार्य्यापतिः प्रभुः अन्याभि र्नापक्रियते किन्तु तामेव युवतिं प्रत्या-
गच्छति तद्वत्(२)॥ ५॥ ११३

हे "वसो" वासयितः(१)! इन्द्र! "स्तोत्रम्" अस्मत्कर्त्तृकं

---

* 'दुर्मित्रस्य सुमित्रस्य वार्षम्'-इति वि०।
* "हर्यतआवश्मशा"-इति ऋग्वेदीयः पाठः।

---

११४ ऋग्वेदस्य ८,५,२६,१।

(२)—विवरणकारस्त्विदेव दृष्टान्तं घटयति—'स यथा तरुणा भार्य्यायाः लोकेऽप-
राधे ऽपि न बध्यति, तद्वन्मा रोषीरित्यर्थः'-इति।

(१)—'प्रशस्त-धनवन्'—इति वि०।

३र २　 ३ ५　　 ३र २　　 २　 ४
औ२हो१इ । दीर्घ७सुतम् । वाता३४३ । पो३यापुया
　 ३१११११
६५६ । ई२३४५ ॥ २० ॥

　 २ १　 ३र ४र ५　 १　　 २　　　 २ ३ ४
II कदा३४औहोवा । वसो । स्तोत्रा३म् । हर्यता
५　 १ २　 ३र ४र ५　 १　　 २ २ ३
आ । अवा३४ । औहोवा । श्मशा२ । रुधादू२३४
५　 ३र २　 ३र ४र ५　 १　　 र २
वाः । दीर्घा३४औहोवा । सुता२३म् । वाता३४३ ।
२　४
पो३यापुया६५६ ॥ २१ ॥ ११४

"हर्यते" कामयमानाय(२) कामयमानं त्वां ['क्रिया-ग्रहणं कर्त्तव्यम्' कर्मणः सम्प्रदानत्वाच्चतुर्थी] "कदा" कस्मिन् काले "अवारुधत्" अवरोत्स्यति, अवरुध्य च कदा "वाः" वारयिष्यति, तादृशः कालः कदास्माकं सम्भविष्यतीत्याशास्ते । तत्र दृष्टान्तः—अश्नुते क्षेत्रमिति "श्मशा"(३) कुल्या [लुप्तोपममेतत्] यथा कुल्या तत उदकान्यवरुणद्धि अवरुध्य च वारयति तथेत्यर्थः । किमुद्दिश्यावरोध इति तत्राह—"दीर्घं" सवन-त्रय-रूपेणायतं "सुतम्" अभिषुतं सोमं प्रति । किमर्थमिति तदाह—"वाता-

I,II इमे द्वे कौत्से ।

(२)—'हर्यति'-इति कान्ति-कर्मसु पाठात् नि० २,६ ।

(३)—"श्मशा शु अश्नुत इति वा श्माश्नुत इति वा"-इत्यादि नै० ५,१२ ।

अथ सप्तमी।

मेधातिथि ऋषिः।

१ २ २ १ २ ३ २ ३ १ २ ३ १र २र
ब्राह्मणादिन्द्रराधसःपिबासोममृतूꣳरनु।
३ २ ३ १र २र
तवेदꣳसख्य*मस्तृतम् ॥ ७ ॥ ११५

५र र २ र १ २ र १ र
I ब्राह्मणादी। द्रराधसाः। पिबासोमा२म्। ऋतू-
१ २ र १ १ ४ २
ꣳरनू। तवेदाꣳसा२३। ख्या२३मा३। स्ता३४५र्त्तो-
५
६हाइ ॥ २२ ॥ ११५

प्याय" [वातेनाप्यते अधस्तान्निपात्यत इति] वाताप्य मुदकं तस्य प्रदानायेत्यर्थः ॥ ६ ॥ ११४

हे "इन्द्र"! "ब्राह्मणात्" ग्रंसिसम्बन्धात् "राधसः" धनभूतात् पात्रात् "सोमं" "पिब"। किं कृत्वा? "ऋतूंरनु"(१)

---

* "तवेद्धिसख्य"-इति ऋग्वेदीयः पाठः।

---

११५ ऋग्वेदस्य १,१,२८,५।

I अर्द्धसद्मनम्।

(१)—"दीर्घादटि समान-पदे (८,३,९)"-नकारस्य रुत्वे साम्प्रतिक-रुडागमे च (७,१,८) रूपम्।

अथाष्टमी ।

मेधातिथि ऋषिः ।

३ १ २   ३ १ २      ३ १ २
वयंघातेअपिस्मसि*स्तोतारइन्द्रगिर्वणः ।
१ २
त्वन्नोजिन्वसोमपाः ॥ ८ ॥ ११६

५ ४ ५र र ४ ५   ४    २र १र
I वयंघातेअपिस्मसाइ । स्तोतारइन्द्रगिर्वणाः । ववा
१     ७      १     १    २ १     १
२३होइ । तूवन्नोजो२ । ववा२३हो । न्वसो२३ । मा
५र र     २    १ २ ११११
२पा२३४औहोवा । ए३ । उपा२३४५ ॥ २३ ॥ ११६

देवाननुसृत्य ऋतवोऽपि(२) पिबन्त्वित्यर्थः । यस्मात् "तव इदं सख्यम् अस्तृतम्" ऋतूना मविच्छिन्नं तस्मादृतुभिः पानं युक्तम्(२) ॥ ७ ॥ ११५

हे "गिर्वणः" गोभिर्वननीय ! "इन्द्र" ! "ते" तवापि "वयं घ"

---

*"अपिष्मसि"-इति ऋग्वेदीयः पाठः ।

---

११६ ऋग्वेदस्य ६,३,२,२ ।

I अर्द्धसद्मनम् ।

(२)—'यस्मात् 'तवेदं सख्यं' यष्टृ-यष्टव्य-लक्षणम् 'अस्तृतम्' अहिंसितम् । यस्मात् त्वं सर्वदा यष्टव्यः तस्मात् पिबेत्यर्थः'-इति वि० ।

अथ नवमी।

विश्वामित्रोगाथिनोभीपाद उदलो वा ऋषिः* ।

१ २ ३ १र २र ३ २ ३ १ २
एन्द्रपृत्तुकासुचिन्नृम्णन्तनूषुधेहिनः।
१ २ ३ १ २
सत्राजिदुग्रपौंस्यम्॥ ८ ॥ ११७

५र र ५ २ र १ २
I एन्द्रपृत्तुकासुचीईदे। नृम्णाम्। तनूषू३धाइहा-
१ र २ १ २
१इना२ः। सात्राजिदु। ग्रपौर३ंसियाउ। वा३।
२ ५
ऊ३४पा ॥ २४ ॥ ११७

वयं खलु "स्तोतारः" "स्मसि" स्मः भवामः। हे "सोमपाः" सोमस्य पातरिन्द्र! "त्वं" "नः" अस्मान् "जिन्व" प्रीणयसि ॥ ८ ॥ ११६

हे "इन्द्र"! "पृत्तु"(१) सम्पृक्तासु "कासु चित्" कास्वपि "नः" अस्माकं "तनूषु" अङ्गेषु "नृम्णं(२) बलम्" "आ धेहि" आ

---

* 'वामदेवस्यार्षम्'-इति वि० ।

---

I अभीपादस्य औदलस्य साम।

(१)—'पृची सम्पर्के-इत्यस्येदं रूपम्, सम्पृच्यन्ते यस्यां याग-क्रियायां यजमाना देवैः सह सा पृक्, तासु पृत्तु याग-क्रियास्वित्यर्थः'-इति वि०।

अथ दशमी ।

श्रुतकक्ष ऋषिः ।

२ १र  १र  ३ १ ३ १र  २र ३ २ ३ २
एवाह्यसिवीरयुरेवाशूरउतस्थिरः ।

३ २ ३र ३ १ २
एवातेराध्यम्मनः ॥ १० ॥ ११८

॥ इति चतुर्थ-दशति ॥

५र र २  ४  ५र  २र १ २  १
I एवाहो३असिवीरयू: । एवाशू१रा २ः । उतार३-

समन्तात् स्थापय । हे "उग्र" उद्गूर्ण-बल ! इन्द्र ! "सत्रा-जित्"(३) द्वादशाहादिभिः सत्रैः जीयमानो वशीक्रियमाणः सन् "पौंस्यम्"(४) पुंसे हितं फलम् "आ धेहि" प्रयच्छेत्यर्थः ॥९॥ ११७

---

११८ उत्तरार्चिकस्य २,१,१८,१ = ऋग्वेदस्य ६,८,२०,२ = ऊहगानस्य २,२ ।

I आमहीयवम् ।

(२)—'नृम्णम् धनम्'-इति वि० । नृम्णमिति निघण्टौ बल-नामसु (२,९) धन-नामसु (२,१०) उभयत्रैव दृश्यते ।

(३)—'सदा शत्रूणां जेतृ इत्यर्थः'-इति वि० ।

(४)—'पौंस्यम् बलम्'-इति वि० । 'पौंस्यानि'-इति बल-नामसु चतुर्विंशति-तमम् २,९ ।

२ १ २र२ १ २र
स्थिराः। आइ्वातेरा। धियार३म्माउ। वा३स्तौषे-

१११
३४५॥ २५॥ ११८

हे इन्द्र! त्वं "वीरयुः"(१) वीरान् युद्ध-कर्मणि समर्थान् शत्रून् हन्तुं कामयमानः "एव असि" भवसि खलु "हि" प्रसिद्धौ अतएव त्वं "शूरः" सामर्थ्यवानेव भवसि "उत" अपिच "स्थिरः" सङ्ग्रामे धैर्यवान् भवसि। [एकत्र स्थित्वैव शत्रून् सम्प्रहरसीत्यर्थः।] एवं सति "ते" तव "मनः" "राध्यं" स्तुतिभिराराधनीयमेव; यतोऽनेन मनसा त्वं शत्रु-वधं सङ्ग्रामे धैर्यादिकं करोषीति तत एव मन एव सर्वैः स्तुत्यमित्यर्थः ॥१०॥ ११८

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः॥ २॥

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने द्वितीयाध्यायस्य द्वादशः खण्डः॥ ७॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिक-मार्ग-प्रवर्त्तक-श्री-वीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दो व्याख्याने ऐन्द्रकाण्डे द्वितीयोऽध्यायः॥

---

(१)—"क्याच्छन्दसि(३,२,१७०)" इति उः। "नच्छन्दस्य पुत्रस्य (७,४,३५)"-इति-दीर्घाभावस्य।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ २ ॥

## अथ तृतीयाध्याय आरभ्यते ।

अस्मिन्नध्यायेऽपि इन्द्रः स्तूयते ।

---

ऋचोऽशीति रभित्वेति(१) बृहत्यः(२) सकला अपि ।
नह्विवो(३) मारुती तत्र प्रमित्रायेति(४) संस्तुतिः ।

---

(१)—'अभित्वाशूरनोनुम'-इत्यारभ्य—'विवचित्रयेत्यन्ताः अष्टसु दशसु पठिताः ।

(२)—बृहतीच्छन्दस्काः । अष्टचत्वारिंशदक्षरा बृहती, छन्दः-सूत्र-प्रसिद्धाः; अक्षरैकस्य न्यूनतायां नियादि-भावेन पादः पर्यते—आधिक्ये तु न दोषो वैदिकानाम् । "बृहती परिवर्हणात् (७,१२)" इति नैरुक्त-निर्वचनम् "गायत्री मेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभतीति ब्राह्मणम्, अत एवोक्तं यास्केन—"अनुष्टुबनुष्टोभनात्"-इति ; सैषा अनुष्टुप् चतुर्भिरक्षरैः परिवृंहिता बृहतीत्युच्यते ।

(३)—'नह्विवस्परमश्चन'-इत्यादि अभित्वेति-प्रथम-खण्ड-गता नवमी ।

(४)—'प्रमित्रायप्रार्यम्णे'-इत्यादि यगध्युक्षिति-तृतीय-खण्ड-गता तृतीया । सेयमादित्यानां संस्तुतिः आदित्य-देवताकेत्यर्थः ।

अथ प्रथम खण्डे—

सैषाप्रथमा।

वसिष्ठ ऋषिः।

३ १ २ ३ १ २ ३ १ २
अभित्वाशूरनोनुमोदुग्धाइवधेनवः।

आदित्यानामथेन्द्राग्नीअपा(५) दिन्द्राग्नि-संस्तुतिः।
अश्विन्यस्ता शचीभिर्नः(६) कुष्ठस्तेमाउवामिति।
यदा कदा(७) वारुणी स्यात्त्वष्टानो(८) बहु-देवता।
उषस्या प्रत्यु(९) इत्येषा श्रद्ध वट्(१०) सूर्य-संस्तवः।
इत्येकादश(११) ताभ्योऽन्या ऐन्द्र एकोनसप्ततिः॥

---

(५)—'इन्द्राग्नीअपादियम्'-इत्यादि योराजेति-पञ्चम-खण्ड-गता नवमी।

(६)—'शचीभिर्नःशचीवसू'-इत्यादि इतऊतीति षष्ठ-खण्ड—गता पञ्चमी। 'कुष्ठः कोवा'-इत्यादि प्रत्युअदर्श्यत्यष्टम-खण्ड गता तृतीया। 'इमाउवान्दिविष्टये'-इत्यादि तत्रैव खण्डे द्वितीया। आसामृक्त्रयाणां अश्विनौ देवता उक्ता कथिता वेदविद्भिरित्यर्थः।

(७)—'यदाकदाचमीढुषे'-इत्यादि इतऊतीति षष्ठ-खण्ड—गता षष्ठी।

(८)—'त्वष्टानोदैव्यं वचः'-इत्यादि इमइन्द्रायेति सप्तम-खण्ड-गता सप्तमी।

(९)—'प्रत्युअदर्श्या'-इत्यादि अष्टम-खण्डीयाद्या।

(१०)—'श्रद्धायुजोहरयइन्द्र'-इत्यादि 'नकिष्टमित्यादि-द्वितीय-खण्डीय—तृतीया; वण्महांअसि'-इत्यादि 'योराजेति-पञ्चम-खण्ड-गता चतुर्थी; अस्यृत्यर्थं मन्त्रः बडित्यर्थं च मन्त्रः सूर्य-संस्तवः सूर्यस्य संस्तुतिः सूर्य-देवताक इत्यर्थः।

(११)—'नहिवो'-इत्यादि कथिता एकादश यथा-कथित-देवताकाः, ताभ्यः एकादशभ्यः ऋग्भ्यः अन्याः एकोनसप्ततिः ऐन्द्राः केवलेन्द्र-देवताकाः इति एतदध्याये अशीतिसङ्ख्याकानामृचां दैवत-सङ्केतः॥

१ २ ३ १र २र ३ २ ३ १ २ ३ १ २
ईशानमस्यजगतःस्वर्दृशमीशानमिन्द्रतस्थुषः ॥ १ ॥ १

५ र २ १ ७ १ २ २ १
I अभित्वाशू। रनोनुमा२ः। ओइनू३माः। आदु-
२र १ ७ १ २ २ १ र २
ग्धाइ। वधाइनवा२ः। ओइना३वाः। आइशानमस्य-
१ २ १ २ २ १ र २
जगतः। सुवार्दृशम्। आर्दृ३शाम्। आइशानमि।
१ २ १ १ २ ५र र
द्रतास्थुषः। आ२३। स्थू२। षा२३४। औहोवा।
२ १ ३ ११११
स्थुषःस्थूषा२३४५ः॥ २६ ॥

५ २ ४र ५ ४र ५ १ २र १
II अभित्वा३शूरनोनुमाः। आदुग्धाइव। धाइना
२ १ र २ १ ० ३
२३वाः। आइशानमस्याजग। ताः। सुवार्दृ२३४-

---

१ उत्तरार्चिकस्य १,१,११,१ = ऋग्वेदस्य ५,३,२१,१ = आरण्यगानस्य २,२१—२८—४,२,२—१५—५१० = ऊहगानस्य १२,१८—२२,१—१२ = उह्यगानस्य १,१—३,५—५,१५ ॥

I,II भरद्वाजस्यार्कौ द्वौ।

५ २र १र २ १ २ १ २
शाम् । ई्शाना२३मो । द्रातस्थुषः । इ्डा२३भा३४३ ।
२३४५इ । डा ॥ २७ ॥ १

हे "शूर !(१) "इन्द्र !" "अस्य" "जगतः" जङ्गमस्य(२) "ईशानम्" ईश्वरं "तस्थुषः" स्थावरस्य चेशानम् [ईशान-पदस्यावृत्तिरादरार्था(३)] "स्वर्दृशं" सर्वदृशं(४) "त्वा" त्वां "अदुग्धा इव धेनवः" यथा अदुग्धा धेनवः क्षीर-पूर्णोधस्त्वेन वर्त्तन्ते—तद्वत् सोम-पूर्ण-चमसत्वेन वर्त्तमाना वयम्(५) "अभिनोनुमः" भृशमभिष्टुमः ॥ १ ॥ १

---

(१)—'शूर ! विक्रान्त !'-इति वि० ।

(२)—विवरणकारस्तु—'अस्य जगतः'-इत्यंशस्य विशेष-व्याख्यान मकुर्वन् 'तस्थुषः' स्थावरस्य इति व्याख्याय 'स्थावर-ग्रहणं प्रदर्शनार्थं जङ्गमस्य चेत्यर्थः'-इत्याह ।

(३ —विवरण-नये एकस्येशान-पदस्य अस्येत्याद्यनेन सम्बन्धः अपरस्य तु पृथग्रूपेश्वरमित्यर्थः ।

(४)—'स्वः आदित्यः तमिव यः पश्यति सः स्वर्दृक् । आदित्यमिव सर्वस्य जगतः द्रष्टारमित्यर्थः'-इति वि० । "स्वरादित्यो भवति ; सु अरणः, सुईरणः स्वृतो रसां स्वृतो भास ज्योतिषां स्वृतो भासेति वा"—इति नै०२,१४ । निघण्टौ दिव आदित्यस्य च साधारणनामसु 'स्वः'-इति प्रथमं पदम् ।

(५)—'अचिर-प्रसूता गावः धेनु-शब्देनोच्यन्ते ; ताः यथा आत्मीय वत्सं स्नेहार्द्रेण मनसा हुङ्कारादिभिरभिनन्दन्ति तद्वत् त्वमित्यर्थः'-इति वि० ।

अथ द्वितीया ।

भरद्वाज ऋषि * ।

१र  २र  ३ १र  २र  ३ १ २
त्वामिद्धि हवामहे साती† वाजस्य कारवः ।
३ १ २  ३ १ २ ३ २ ३ २उ  ३ १ २
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ २ ॥ २

५र  २  १ २र  १  २  रर २
I त्वामिद्धी । हवा२महे । आ । औ३होवाहाउ-
२ ५  २र र र  १२  १
वा३ । ऊ३४पा । सातौवाज । स्या३का२रवः । आ ।
२ र र २  २ ५  १र  २
औ३होवाहाउवा३ । ऊ३४पा । त्वांवृत्रा३इषुइ । द्रसा
१ २  १  २ र र २  २ ५
२त्पतिम् । आ । औ३होवाहाउवा३ । ऊ३४पा ।
१ र र २र  १२ १ २ र र २
नरस्त्वांकाष्ठा । सुआ२र्वतः । आ । औ३होवाहाउवा३ ।
२  ५
ऊ३२३४पा ॥ २८ ॥

---

* 'संयोरार्षम्'-इति वि० ।

† "साता"-इति ऋग्वेदीयः पाठः ।

---

२ उत्तरार्चिकस्य २,१,१२,१ = ऋग्वेदस्य ६,७,२७,१ = आर-
६१क,

४र ५र र र र र ४ ५ १ २
II त्वामिद्धिहवामहे। सातौवाजोवा। स्याका१रा-
२र २ १ ७ १र
वा२ः। त्वांवृत्राइषुइन्द्रसत्। पातिन्नाहा२ः। त्वाङ्का-
२ १ . २ १
२३ष्ठा। सुअर्वा२३ता३४३ः। ओ२३४५इ। डा॥ २९॥ २

"कारवः" स्तोतारो वयं "वाजस्य" अन्नस्य "सातौ" सम् भजने निमित्तभूते सति(१) हे "इन्द्र"! "त्वामिद्धि" त्वामेव "हवामहे" स्तुतिभि र्ह्वयामहे। हे इन्द्र! "सत्पतिं" सतां पालयितारं श्रेष्ठं त्वां "नरो" नेतारोऽन्येऽपि मनुष्याः "वृत्रेषु" आवरकेषु शत्रुषु सत्सु(२) "हवन्ते" आह्वयन्ति भजनार्थम्। अपि च "अर्वतः" अश्वस्य(३) सम्बन्धिनीषु "काष्ठासु" यथाऽश्वः क्रान्त्या तिष्ठति तासु काष्ठासु संग्रामेषु(४) युद्ध-कामाश्च त्वामेवाह्वयन्ति अतो वयं त्वामेवाह्वयाम इत्यर्थः॥ २॥ २

---

एयके प्र०२७—द्वि०२२ = ऊहे द्वा०१३—१७ = ऊह्य प्र०५—ह्र०६-ह्र०द्वि०१--प०१६--१७।

I,II इन्द्रस्य, भारद्वाजे द्वे।

(१)—'साति र्लाभः, तस्मादियं निमित्त-सप्तमी'-इत्यादि वि०।

(२)—'यस्य च भावेन भावलक्षणम्'-इति अत्र सप्तमी। तत्कृतेश्च लक्षणभूत योग्यक्रियापद मध्याहर्त्तव्यम्। तथा च शत्रुषु हन्तव्येषु इत्यर्थः।

(३)—'अर्वा'-इति निघण्टौ अश्वनामसु तृतीयम् (१,१४)। 'अर्वतः ऋ गतावित्यस्य गन्तुर्मेवेत्यादि वि०।

(४)—'काष्ठाशब्देन दृष्टिलक्षण आपउच्यन्ते, तस्मादियं निमित्त-सप्तमी; अप्सु च निमित्त-भूतासु। तदर्थं त्वामाह्वयन्तीत्यर्थः। अथवा'-इत्यादि वि०।

अथ तृतीया ।

वालखिल्या ऋषयः * ।

१ १र २र३१ २ ३ १ २ ३ १ २ ३ २
अभिप्रवःसुराधसमिन्द्रमर्चयथाविदे ।
१ २ ३ १ २ ३ १ २ ३ १ २ २ १ २ ३ १ २
योजरितृभ्योमघवापुरूवसुःसहस्रेणेवशिक्षति ॥ ३ ॥ ३

५ २ १र २ १ २
I अभिप्रवाः । सुराधा२३साम् । इन्द्रमर्च याथा-
१र २ ३ २ १र र २
१विदा२३४इ । योजा३४रितॄ । भ्योमघवापूरू१वाश्वु२ः ।
१ १ २ ५र र १ १ ३ १ १ १ १
सहा२३ । स्रा२इणा२३४औहोवा । वशिक्षती२३४५ ॥३०॥
१ ० २ २ ३ ५ १
II अभाइप्रवा२ः । सुराधा२३४साम् । इन्द्रा-

* 'वामदेवस्यार्षम्'-इति वि० ।

३ उत्तरार्चिकस्य २,१,१३,१ = ऋग्वेदस्य ६,४,१४,१ = ऊह-गानेऽत्र चत्वारि सामानि ; द्वि०३—स०७—द्वा०११—१५ =ऊह्य गाने चतुर्थस्य द्वितीयार्द्धे च चत्वारि सामानि ७-१०-११-१२इति ।

I,II स्रावते द्वे ।

०  १ २  ५र र  २  ५  १र २
मर्च्चा२३। या२था२३४औहोवा। वी२३४दे। योजरि-

१२र १ ऽर र१ २  रर  १ २  १
तृभ्योमघवा२पुरूवसुः। सहा। स्रेणेवा३शाये३। चा२

२  ५र र  २ १ ११११
ता२३४औहोवा। सुभूइतये२३४५॥ २१॥

४ २ ४ ५ र  ३ २  ३र४र ५  १  २
III अभिप्रवःसुरा। धसा२३४औहोवा। आइन्द्रमर्च्च।

१ ०  ५ ५  १र २१ २  १
यथाविदा२३४इ। ओ६हा। योजरितृभ्यः। माघा२३

२  १  २  ५  २१ र  २ २ १ २
वा। पुरू२। वा२३४सूः। सहस्रेणाइवा३शा। ऊम्माये

१ २  ५र र  २  ५
३। चा२ता२३४औहोवा। वा२३४सू॥ ३२॥ ३

"पुरूवसुः" पश्वादि-धनोपेतः यद्वादि-बाहुल्याद्बहु-निवासको वा "मघवान्" "यः" इन्द्रः "जरितृभ्यः" स्तोतृभ्यः(१) अस्मभ्यं "सहस्रेणेव" सहस्र-सङ्ख्याकेन धनेनेव(२) "शिक्षति"(३)

---

I श्यैतम्।

(१)—जरितेति स्तोतृनामसु द्वितीयं पदम् नि०३,१६।

(२)—'सहस्रेणेव प्रकारेणेवेति वाक्यशेषः, बहुभिः प्रकारैरित्यर्थः'-इति वि०।

(३)—शिक्षतीति दान-कर्मसु अष्टमं पदम् नि०३,२०।

अथ चतुर्थी ।

नोधा इन्द्रं स्तौति ।

१ २ ३ १ २ ३ २ ३ १ २ ३ १र २र
तं वोदस्ममृतीषहं वसोमन्दानमन्धसः ।

३ २ ३ २र ३ २ ३१ २ ३ १ २
अभिवत्संनस्वसरेषुधेनवइन्द्रं गीर्भिर्नवामहे ॥ ४ ॥ ४

४ ५ ४ ५ २ र १ २ १
I तंवः । एदास्माम् । ऋतीषहम् । हा२इ । आ

पश्वादि-बहु-धनमस्मभ्यं प्रयच्छतीत्यर्थः । स इन्द्रः "यथा विदे" यथा अस्माभिर्विज्ञायते तथा हे ऋत्विजः ! "वो" यूयं(४) "सुराधसं" शोभन-धनोपेतम् "इन्द्रं" परमैश्वर्ययुक्तं देवम्(५) "अभि" आभिमुख्येन "प्रार्च" प्रकर्षेणार्चत(६) ॥ ३ ॥ ३

---

४ उत्तरार्चिकस्य १,१,१३,१ = ऋग्वेदस्य ६,६,११,१ = ऊहेच नव सामानि प्र०६—ष०द्वि०१४—त्र०५—८—चतुर्द० १०—सप्तद०४—९—१७—अष्टा०१४ = ऊह्यगानस्य चतुर्थद्वितीये नवममित्येकमस्याम् ।

I प्रजापतेः, नाविकम् ।

(४)—वः त्वामिन्द्रमिति वि०-सम्मतोऽर्थः ।

(५)—'समस्ततेजाः परमेश्वरत्व-निमित्तेन्द्र-शब्द-वाच्याः'-इति शबरः ।

(६)—प्रार्च-प्रार्चामीत्यर्थो वि०-सम्मतः ।

२ २ १२ १ र २ र १ २ १
औ३हो। इहा। वासोमन्दानमन्धसा३ः। हा२इ। आ

२ २ १२ १ २र र१ऽर
औ३हो। इहा। अभिवत्सन्नस्वसरेषुधेनवा२ः। हा२इ।

१ २ २ १२ १२ १ २ २
आऔ३हो। इहा। इन्द्रम्। हा२इ। आऔ३हो।

१ २ ३र२ ३ ५र र १र३ १११
इहा। गोर्भिइः। ना२३४औहोवा। वामहे२३४५॥३३॥

५४ २ ४ऽ ५र ४ ५ १ र २ र
II तंवो३दा३स्मामृतीषहोवा। वासोमन्दा। न-

१ २ १ २ ३ ४५र २१
मान्धा१सा२ः। आभिवत्सा३१२३४म्। नस्वसरे। षुधा-

२ १ २ ३२ १
इना१वा२ः। इन्द्राङ्गा१इर्भी२ः। नवा३। मा२३४५।

३ ११११
हा२३४५इ॥३४॥

३४र ४ ४५र १२ ३ ५ १ र र
III तंवोदस्ममृती। षहा ओ२३४वा। वासोमन्दा-

१ र २ ऽ २
नमन्धासा२ः। आभिवत्सन्नस्वसरेषूधे१नावा२ः। ओ३वा।

---

II अभीवर्त्तस्य इन्द्रस्य वा, अभीवर्त्तम्।

III अभीवर्त्तस्य, भागम्।

१　　५　२ १र　　२　१ १ १
इन्द्रङ्गार२३४इर्भीः । नवामा२३४५ह्वा६५६इ । भगा३या२३
१ १
४५ ॥ ३५ ॥

३ ४र　२ ४ ५र　२ २　१　र ५
IV तंवोदस्ममृती । षद्दा३म् । वा२३४ । सोमं-
५ ५　२　र १　२
न्दानम । धासाः । अभिवत्सन्नस्वसरेषू३धाइ । ना२३वाः ।
१ र　२ २　ऽ　२　ऽ २
इन्द्रङ्गीभीइर्ना३वा । हु३म् । हु३म् । हु३म्हुम् । नवा-
३ ५ ४ ५
नवोर३४वा । मा५हो६ह्वाइ ॥ ३६ ॥

१　र ४ ५ र　४ ५　२ १र
V ता२३४म् । वोदस्ममृती । षाद्दाम् । वसोमं-
२ २ २ २　१　२　१ २　१ २
न्दा । ना३मान्धा३साः । आ२३भी । वात्सन्न । स्वस ।
१　२ ३　५　१　२　१　२ १
राइ । षूधेना२३४वाः । आ२३इन्द्राम् । गाइभिर्नवो
५ ३ ५
२३४वा । मा२३४ह्वे ॥ * ॥ ३७ ॥ ४

---

IV अभीवर्त्तः ।
V नौधसम् ।

---

*॥ इति ग्रामे गेय गाने षष्ठस्यार्द्ध-प्रपाठकः ॥

हे ऋत्विग्यजमानाः! "दस्मं" दर्शनीयम्(१) "ऋतीषहम्" ऋतयो बाधकाः शत्रवः तेषा मभिभवितारं(२)। पुनः कीदृशं? "वसोः" वासयितुर्दुःखस्य विवासयितुः (यद्वा, वसोः पात्रं प्रति वसतः(३), तादृशस्य "अन्धसः" सोम-लक्षणस्यान्नस्य(४) पानेन "मन्दानं" मोदमानं "वः" यष्टव्यत्वेन युष्मत्सम्बन्धिनं तं तादृशमिन्द्रं गीर्भिः स्तुति-लक्षणाभि र्वाग्भिः "अभि नवामहे" (नु स्तवने, नु शब्दे) अभिष्टुमः। कुत्र? "स्वसरेषु"॥ [अत्र यास्कः (५,४)—"स्वसराण्यहानि भवन्ति स्वयं सारीण्यपि वा स्वरादित्यो भवति स एनानि सारयतीति सूर्य्य-नेतृकेषु दिवसेषु(५) वय मभिष्टुमः अभितः शब्दयामः] तत्र दृष्टान्तः—"वत्सं न" यथा धेनवो नव-प्रसूता गावः स्वसरेषु (सुष्ठु अस्यन्ते प्रेर्य्यन्ते गावोऽत्रेति स्वसराणि गोष्ठानि तेषु) वत्स मभिलक्ष्य शब्दयन्ति तद्वत्॥ ४॥ ४

(१)—'तसु दसु उपक्षये-इत्यस्येदं रूपम्; उपक्षयितारं शत्रूणाम्'-इति वि०।

(२)—'ऋतयः सेनाः, गन्तृत्वात्'-इति वि०।

(३) वि०-मते क्वचि 'वसो मन्दानं'-इति रेफ-शून्यः पाठः। अतएव तन्मते 'वसो'! प्रशस्तधनवन्नित्यर्थः। 'वः' त्वामिति चार्थः तदभिमतः।

(४)—'अन्धः इत्यन्न-नाम, आध्यानीयं भवति'-इत्यादि नै०५,१।

(५)—'स्वसरेषु यागगृहेषु'-इति वि०। स्वसराणीति गृह-नामसु दशमम् नि०३,४।

अथ पञ्चमी ।

कलिः प्रगाथऋषिः* ।

१२ ३१२३१२ ३१२३१२
तरोभिर्वोविदद्वसुमिन्द्रᳬसबाधऊतये ।

३१२ २२ ३१२ ३२३२उ३२३ १२
बृहद्गायन्तःसुतसोमेअध्वरेहुवेभरन्नकारिणम् ॥ ५ ॥५

४५ १ २२ ५
I ओम् । तरो । भाइर्वोविदा३१उवा२३ । वा२३४द्धम् ।
१ऽ२ १२२२१ऽ२ १ २
इन्द्रा२ᳬसबाधऊतये२ । बृहात् । बृहा३१उ । वा२ ।
१२ २ १२२२ १२ २१२ २ १२२
गायतःसुतसोमे अध्वरे । हुवेभा२३राम् । नाकारिणम् ।
१ २ १
इडा२३भा३४३ । ओ२३४५इ । डा ॥ १ ॥

४५ १२२ ५
II तारो । भाइर्वोविदा३१उवा२३ । वा२३४सुम् ।
१ऽ२ १२२२१ऽ२ १२
इन्द्रा२ᳬसबाधऊतये२ । बृहाद्गा१या२ । ताःसुतसो२ ।

---

* 'कालेयस्यार्षम्'-इति वि० ।

---

५ उत्तरार्चिकस्य १,१,१४,१ = ऋग्वेदस्य ६,४,४७(३०)१ = ऊहेऽस्याम्‌चि द्वे सामनी प्र०७—द०१५ ।

I,II लोशि द्वे ।

र १ २ १र २ १ र २ १
मेऋध्वराइ। ऊवेभा२३राम्। नाकारिणम्। इडा२३

२
भा३४३। ओ२३४५इ। डा॥ २॥

५ र र ४ ५ २
III तरोभिर्वाविदद्वासुम्। इन्द्राम्। इन्द्र०सबाधा३ऊता१या२इ। वृहात्। वृहद्गायन्तःसुतसोमा३आध्वा१रा२इ। ऊवाइ। ऊवेभरन्नकारिणम्। इडा२३भा३४३। ओ२३४५इ। डा॥ ३॥

(svara marks: र १ २ र र; १ २ र र १; २ १)

५ र र ५ २ १
IV तरोभिर्वाविदा४द्वासुम्। इन्द्र०सवा३। धउ२ता२३४याइ। वृहात्। वृहा३१उ। वा२। गायन्तः सुतसोमेऋध्वरे। ऊवेहोइभा२२राम्। नाकारिणम्। इडा२३भा३४३। ओ२३४५इ। डा॥ ४॥

(svara marks: ३ ५ २ १ २ १र र; १ २र र १र २ १र २ १ र २; १ २ १)

---

III धानाकम्।

IV धानाकं चुल्लककालेयं वा।

V तरो३भिर्वो। विदाद्वसूम्। इन्द्र७सवा३धाज-
१तायाइ३। ओ३४वा। ओ२३४वा। वृहद्गायन्तःसुत-
सो३मा अध्वारा३इ। आ३४वा। ओ२३४वा। ऊवा३भराम्।
नाकारा२३४इणाम्। ओ२३४वा। ओ२३४५रइ। डा॥५॥

VI तरोभिर्वोर। विद्वा२३४सुम्। इन्द्र७सवा३धा
ऊ१ताया२इ। औ३हो३वा। औ३हो३वा। वृहद्गायन्तः
सुतसो३मा अध्वारा२इ। औ३हो३वा। औ३हो३वा।
ऊवा३भा१रा२म्। औ३हो३वा। औ३हो३वा। नाका
रिणाम्। इडा२३भा३४३। ओ२३४५इ। डा॥६॥

VII तरोभा३इवाविद्वसुम्। इन्द्रा७सबा। धऊत-

---

V,VI,VII कालेयानि त्रीणि।

१ २ ३ र २ १ ३ ४र ५र २
या२३इ। वृहद्गाया२। ता२३४ः। सुतसोमेत्र। ध्वा-
२ १ ३ २ २ ४ ४
३राइ। ऊवाइभरौ। वा३४३ओ२३४वा। नकारिणाम्।
४
हो५इ। डा॥ ७ ॥५

हे ऋत्विजः! "वः" यूयं "तरोभिः" वेगवद्भिरश्वैरुपेतं वेगै-रेव वा(१) "विदद्वसु" वेदयद्वसु धन-वेदकम् "इन्द्र" "सवाधः" वाधा-सहिताः(२) "ऊतये" रक्षणाय "वृहत्" सामैतत्सञ्ज्ञकं "गायन्तः" सन्तः परिचरतेति शेषः। कुत्रेत्युच्यते? "सुतसोमे" अभिषुत-सोमके "अध्वरे" यज्ञे सोम-यागे। अहं च तदर्थं "हुवे" आह्वयामि। कमिव? "भरं न" भर्त्तारं कुटुम्ब-पोषकं "कारिणं" स्व-हित-करण-शीलं यथा, स्व-हित-करणायाह्वयन्ति पुत्रादयः, तद्वत्(३) तथाभूतमिन्द्रं हुवे इति॥ ५॥ ५

(१)—'तरोभिः आत्मीयैर्वलैः'-इति वि०। तर इति वल-नामसु पञ्चमम्।

(२)—'सबाधः मदीयाः ऋत्विजः'-इति वि०। सबाध इति ऋत्विङ्-नामसु सप्तमं पदम् नि०३,१८।

(३)—वि०-मये 'भरेकारिणमिति पाठः। किञ्च भरे-इत्यस्य सङ्ग्रामे इति, कारिणमित्यस्य सङ्ग्राम-कारिणं, प्रतियोद्धारमित्यर्थः। हुवे-इति उत्तम-पुरुषैकवचनस्य प्रथम-पुरुषबहुवचनस्यार्थे। तथाचोक्तः—'यथा सङ्ग्रामे योद्धा प्रतियोद्धारं महता यत्नेन आह्वयति, तद्वदाह्वयन्तीत्यर्थः'-इति। भरे-इति निघण्टौ सङ्ग्राम-नामसु पञ्चमम् पदम् २,१७।

अथ षष्ठी।

वसिष्ठ ऋषिः।

३ २ ३ १ २　३ २ ३ १ २　३ २
तरणिरित्सिषासतिवाजंपुरन्ध्यायुजा।

३ १ २　३ १ २　३ २　३ १र　२र　३ १ २
आवइन्द्रम्पुरुहूतंनमेगिरानेमिन्तष्टेवसुद्रुवम्* ॥६॥ ६

५　२ २　४ ५　२र १ २ १　२
I तरणिरीत। सिषा३साती। वाजांपुराम्। धि-

र १　२ ४ ५　२ १ २र १　२ र १
यायुजा। आवा३आइन्द्राम्। पुरूहूतम्। नमेगा-

२ ४ ५　२र १　१ १ १ १
इरा। नाइमी३न्ताष्टे। वासुद्रुवा२३४५म्॥८॥

३ ५　२　१ २　१
II तराहाउ। णिरित्सी३षासति। हयाइ। २। वा-

२　१ २र　र　२　१र　र र
जम्पुरम्। धियायुजौ। होवा३हाइ। आवइन्द्रंपुरुहू-

---

* "सुद्रुम्"-इति ऋक्पाठः।

---

६ उत्तरार्च्चिकस्य २,२,१३,१ = ऋग्वेदस्य ५,३,२०,५ = ऊहे द्वितीये उनविंशतितममेकमिह गानम्।

I,II ऐशिरे द्वे।

१ २र र २ र
तम्। नमाइगाइरौ। होवा३हाइ। नेमिन्तष्टेवा३

१ २ रर २ ५रर २ ३ ५
सा। औ३होवाहा३४औहोवा। उप्। इ२३४वाम्॥९॥

४२ ४३ ४५र २ ४ र ५ ४ ५ र ४
III तरणिरित्सिषा। सा३तो। वाजम्पु रन्ध्यायुजा।

१र र र २ र१४५र
वाजम्पु रन्ध्यायुजा। वआ२३इन्द्रा३४म्। पुरुहूतन्नमे।

२ २ र१ २ १२ १ २
गा३इरा। नेमाइन्ता२३ष्टे। वसुद्रुवम्। इडा२३भा-

१
३४३। ओ२३४५इ। डा॥१०॥

४२४ ३५१र ३२ १ ५ र
IV तरणिरित्सिषा। सतो३। वा२३४। जम्पु रन्धिया।

४ ५ १र र र र १
युजा। वाजम्पु रन्ध्यायुजावइन्द्रम्पुरुहूतन्नमा २इगाइरा २।

१ २र१ र २ १ ५ ४
हा २ऊऊवाइ। नेमिन्तष्टेवसोवा३ओ२३४वा। इ५वो६

५
हाइ॥११॥६

"तरणिरित्"(१) युद्धादौ कर्मणि त्वरित एव पुमान् "पुर-

III, IV गौरुङ्गिरे द्वे।

(१)—तरणिरिति चिप्र-नामसु पञ्चविंशतितमम् नि०२,१५। इत् एवार्थः। वि०-मतेतु इत् पादपूरणे।

अथ सप्तमी।

मेधातिथि ऋषिः।

१ २ ३ १ २ ३ २ ३ १　　२ ३ १ २
पिबासुतस्यरसिनोमत्स्वानइन्द्रगोमतः।

३ १ २　　३ १ २ ३ २ऽ १　२　३ १ २
आपिर्न्नोबोधिसधमाद्योवृधेऽस्मा॑ अवन्तुतेधियः॥७॥७

५ ४　२ ३ ४　५　　१ र　　र　　१
I पिबा३सुतस्यरसिनाः। मत्स्वानइन्द्रगोमता२३होइ

म्या" महत्या धिया(१) "युजा" सहाय-भूतया "वाजम्" अन्न "सिषासति" सम्भजते। "पुरुहुतं" बहुभि राहुतम् "इन्द्र" "गिरा" स्तुत्या हे यजमानाः! "वः" युष्मदर्थम् "आ नमे" तमभिमुखं कुर्वे। तत्र दृष्टान्तः-"नेमिं" चक्रस्य वलयं "सुद्रुवं" शोभन-दारु "तष्टेव" यथा वर्द्धकिः दारु-नेमि मानमयति तद्वदित्यर्थः॥६॥६

---

७ उत्तरार्चिकस्य ६,२,१६,१ = ऋग्वेदस्य ५,७,२५,१ = अस्यामृच्यारण्यके प्रथमे चीणि सामानि९—१०—१५ = ऊहे च पञ्च अ०८—न०१५—१६—षो०द्वि०१२—अष्टा०द्वि०१६।

1 पृष्ठम्।

(१)—'पुरन्ध्या पत्न्या'-इति वि०।

२र १ र र र र १ २ १र
या। आपिर्नोबोधिसधमाद्येवृधार२३होइया। अस्माꣳ-

१ २ १
आ२३वा। तुताद्द्धा२३या३४३ः। ओ२३४५इ। डा॥१२॥

५ र र १ र २ १र २
II पिवासुतस्यरसिनोहाउ। मत्स्वानइन्द्रगोमा२तः।

२ २ ५ २र १ र र र २ १र ३र २ ३
हाओ२३४वा। आपिर्नोबोधिसधमादियेवा२३ई। हाओ-

५ २ १र २ १र ३ २ २ ५ ३ १
२३४वा। अस्माꣳअवन्तुतेधा२यः। हाओ२३४वा। इ२

१ १ १
३४५॥ १३॥

५ र र र २
III पिवासुतस्यरसिनोमत्स्वाहाउ। ना२ः। इन्द्रा२-

१र २ र १ २र र १०
गोमता२३ः। हाउ। आपिर्ना२वो। धिसाधमा२।

१ र २ १ ० २ ३ २
दियेवृधा२३। हाउ। अस्माꣳअवा२३। हा। तुते-

१ ३ ५र र २ ३ १ १ १ १
३होर। या२३४औहोवा। धियऊ२३४५॥ १४॥ ७

हे "इन्द्र"! "रसिनः" रसवतः "गोमतः" गो-विकारैः पयः-

---

II शौल्कम्। III जमदग्नेः, अभीवर्त्तः।

अथाष्टमी

भर्ग ऋषिः ।

२उ　　३ १ २　३ २उ　३ १ २
त्वꣳह्येहि चेरवे विदा भगं वसुत्तये ।

१ २　　२ १ ३ १ २ र ३ १ ३ १ २
उद्वावृषस्व मघवन् गविष्टय उदिन्द्राश्वमिष्टये ॥ ८॥ ८

प्रभृतिभिः अपण-द्रव्यै र्युक्तस्य(१) "नः" अस्मदीयस्य "सुतस्य" अभिषुतस्य (क्रिया-ग्रहणं कर्त्तव्य मिति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी) ईदृशं सोमं(२) "पिब"(३) पीत्वा च "मत्स्व" मत्तो भव अपि च "सधमाद्ये" सह माद्यन्ति देवा अत्रेति सधमाद्यो यज्ञः तस्मिन् सहमादयितव्ये यज्ञे त्वम् "आपिः" आपयिता(४) "बन्धुः सन् "नः" अस्माकं "वृधे" वर्द्धनाय "बोधि" बोध्यस्व । "ते" त्वदीयाः "धियः" बुद्धयः अनुग्रहात्मिकाः अस्मान् स्तोतॄन् "अवन्तु" रक्षन्तु ॥

"सधमाद्ये"-"सधमाद्यः"-इति च पाठौ ॥ ७ ॥ ७

---

८ उत्तरार्चिकस्य ७,३,४,१ = ऋग्वेदस्य ६,४,३१(१९),२ = ऊहे ए०१६—ह्राविं०१८=ऊह्ये प०१८ ।

(१)—'गोशब्देनात्र * * * उदकान्युच्यन्ते, तद्वतः तैर्मिश्रितस्येत्यर्थः'-इति वि० ।

(२)—'सुतस्याभिषुतस्य सोमस्य, षष्ठी-निर्द्देशात् एकदेशमिति वाक्यशेषः'-इति वि० ।

(३)—ऋचि पिबा इति दीर्घान्तःपाठः "द्व्यचोऽतस्तिङः (६,३,१३५)"-इति दीर्घः ।

(४)—'आपिः आप्तः'-इति वि० । आपानः-इति आप्ति-कर्मसु षष्ठम् नि०२,१८ ।

५ ४ १ ४र ५र २ १र १
I तुवा३ᳲ ह्योइ३एहिचेरवाइ। विदाभगंवसू२त्ताया-
५ र ४ ५ २र १ १
२३४इ। उद्वावृषस्वमघावान्। ऐहोइ। गा२विष्टयाइ।
र २ १ ५ ४ ५
उदिन्द्राश्वमीवा३ओ२३४वा। ह्याऽ५योऽ६हाइ॥ १५॥

५ र र ५ २ १र १
II त्वᳲ ह्येहिचेरा६वाइ। विदाभगेवसूत्ता१यार२३४इ।
५र ४ ४ १ २१ २ १
उद्वावृषस्व। माऽ५घवान्। आइहियाइ। गविष्टाया२-
१ १ २ ३ ५ ४
इ। उदिन्द्रा२अश्वमी। ओ३१म्। ओ२३४वा। ह्याऽ५यो
५
६हाइ॥ १६॥ ८

हे "इन्द्र"! "त्वं हि" त्वं खलु सामर्थ्याद्दातेति गम्यते। अत "एहि" आगच्छ। आगत्यच "चेरवे" क्रमपराचारवते(१) मह्यं "भगं" भजनीयं धनं विदाः लभस्व दत्स्व। किमर्थम्? "वसुत्तये" अस्माकं वसुदानाय। हे "मघवन्" धनवन्निन्द्र! "गविष्टये"(२) गाइच्छते मह्यम् "उद्वावृषस्व" आसिञ्चस्व(३)

I,II कौल्मलबर्हिषे द्वे।

(१)—'चेरुः चेतयिता, तस्मादियं तादर्थ्ये चतुर्थी, चेरवे ज्ञातुर्मे'-इति वि०।

(२)—इषु इच्छायामित्यस्येदं रूपम्।

(३)—वृषु सृषु मृषु सेचने-इत्यस्येदं रूपम्।

अथ नवमी ।

वसिष्ठः परोक्षेण ब्रूते(१) ।

१र २र ३ २ ३१र २र ३ १ २
नहि वश्चरमञ्चन वसिष्ठः परिमꣳसते ।
३ १ २ ३ २ ३ १ २ ३ २उ ३ १ २ ३ १ २
अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥ ८ ॥९

५ २ ४ ५ ४ ५ २ १ १
I नहिवा२श्चारमञ्चना । हुवेहो२इ । वसिष्ठः परा-
० १र ३ २ ३
इमꣳसाता२इ । अस्माकमद्यमरुता२ः । सुताइसा२३४
५ १ २ १ २ १ २ १ १ २
चा । वाइश्वे३हो इ । पिबा२हो । तुवा२३ । मा२इना
५र र २ १ १११
२३४औहोवा । जनित्रा२३४५म् ॥ १७ ॥

२ ४ ५ ३ २ ४ ५ १
II नहिवश्चरमम् । चना३ । वसिष्ठाः । होइ ।
० ३र ४ ३ ४ ५ ३ २
होइ । पराइमꣳसाता२३४इ । अस्माकमद्यमरुतः । सुता

गामितिशेषः । तथा हे इन्द्र ! "अश्वमिष्टये" अश्वैषणावते मह्यम् अश्वान् "उग्राव्रषत्व" आसिञ्चत्व(४) देहीत्यर्थः ॥ ८ ॥ ८

---

९ ऋग्वेदस्य ५,४,२९,३ ।

I,II वसिष्ठस्य, जनित्रे द्वे ।

(४)—उदिति उपसर्गाभ्यासात् वाहषस्वेति क्रियाभ्यासः ।

(१)—'वसिष्ठनामाहमृषिः'-इति वि० ।

अथ दशमी।

प्रगाथ: काण्वऋषि:।

१ २३१र २र ३१२ ३१२
माचिदन्यद्विशꣳसतसखायोमारिषण्यत।
२३१ २ ३१२३ १२३१र २र३ १ २
इन्द्रमित्स्तोतावृषणꣳसचासुतेमुहुरुक्थाचशꣳसत॥१०॥१०

इति पञ्चम-दशति॥ *

४ ५ १ र२ ५ २ २ १ २
३इसाचा। वाइश्वेपिबन्तुकौ३। द्दो३१ये३। मा२इना-
५र र २ ११११
२३४औहोवा। जनो३त्रा२३४५म्॥ १८॥ ९

हे "मरुत:"! "वसिष्ठ:" एतन्नामा ऋषि: "व:" युष्माकं मध्ये "चरमं चन" जघन्यमपि "न हि परिमंसते"(१) वर्जयित्वा न स्तौति किन्तु सर्वानेव युष्मान् स्तौतीत्यर्थ:। "अद्य" अस्मिन् दिने "अस्माकम्" अस्मदीये "सुते" सोमे अभिषुते सति मरुत: "कामिन:" सोमं कामयमाना:(२) "विश्वे" सर्वे "स'चा' सङ्गत्य "पिबन्तु" पानं कुर्वन्तु॥

"पिबन्तु"-"पिबन्त"-इति च पाठौ॥ ८॥ ९

---

१० उत्तरार्चिकस्य ६,१,५,१=ऋग्वेदस्य ५,७,१०,१= जहे ष०१५।

(१)—'प्रथमपुरुषैकवचनमुत्तमपुरुषैकवचनार्थे'-इति वि०।
(२)—'कामवन्त: श्रद्धावन्तो भूत्वा पिबन्तु इत्यर्थ:'-इति वि०।

---

* ॥ इति तृतीयस्य प्रथमार्द्ध:॥

१र　४ ५　३ २　४ ५　१ र
I माचिदन्यदोहाइ। विशाइ९ साता। सखाया २हो

२ २　१ २　१ २　१
१इ। मा औ३हो। राइषाउवा। ण्यातउवा। इन्द्र-

र र　२ २　१ २　१ २
मित्स्तोतावृषणा औ३हो। साचाउवा। सूताउवा।

२ २　१　२र १　१र　५
मुहुरुक्था औ३हो। चशा। औहो। वाहो२३४वा।

४　५
सा५तो६हाइ ॥ १८ ॥१०

हे "सखायः" समानख्यानाः स्तोतारः(१)! इन्द्र-स्तोत्राद् "अन्यत्" स्तोत्रं "मा चिद्विशंसत" मैवोच्चारयत। "मा रिषण्यत" मा हिंसितारो भवत। अन्यदीय-स्तोत्रोच्चारणेन वृथोपक्षीणा मा भवत। "सुते" अभिषुते सोमे "वृषणं" कामानां वर्षितारम् "इन्द्रमित्" इन्द्रमेव हे प्रस्तोत्रादयः! "सचा" सह सङ्घीभूय "स्तोत" स्तुत। "उक्था च" उक्थानि शस्त्राणि चेन्द्र-विषयाणि यूयं "मुहुः" पुनः पुनः "शंसत" उच्चारयत ॥ १० ॥ १०

इति श्रीसायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने
द्वितीयाध्यायस्य प्रथमः खण्डः ॥

---

I मैधातिथं, दैवातिथं वा।

(१)—'प्रगाथ आशीवान् ऋत्विज आह ० ० ० हे सखायः ऋत्विजः'! —इति वि०।

अथ द्वितीय खण्डे—

सैषा प्रथमा।

आङ्गिरसः पुरुहन्मा ऋषिः।

१ ३ १र २र २ २ ३ १ २ ३ १ २
नकिष्टं कर्मणानशद्यश्चकारसदावृधम्।

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १र २र
इन्द्रं नयज्ञैर्विश्वगूर्त्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥१॥११

५ २ ४ ५ ४र ५ २ १ २र १ २ ३र २
I नकिष्टा३ं कर्मणानशात्। यश्चाकारा। सदावृ-
१ २ ३र २ १ २ १ २र ३ २ ०
धा२३म्। सदावृधाम्। इन्द्रान्नया। ज्ञैर्विश्वग। त-
५र १ २ ३ २ १ २ १ २ ३र
मा२र्भ्वसा२३म्। तमृभ्वसाम्। अधार्ष्णन्धा। ष्णुमो
२ २ ३र २ १
जसा२३। ष्णुमोजसा२४३। ओ२३४५इ। डा॥२०॥

३ ४ ३ ४ ५र २ ५ २ ४
II नकिष्टंकर्म्मणानशात्। हो३४इ। यश्चका३रा-

११ उत्तरार्चिकस्य ४,२,८,१ = ऋग्वेदस्य ६,५,८,३ = ऊहे च०९।

I वैखानसम्।

I पौरुहन्मनम् प्राकर्षं वा।

५ ४र ५ १ १ १र र ०
सदावृधाम्। आइन्द्रा२नाया२। श्चैर्वश्वगूर्त्ताम्भ्वासा-
१ २ ४र ४ ५ २
२म्। अधा२हो१। ष्णा२३४३४। हाओवा*। ष्णु-
१र २ १ १ १ १
मोजसा२३४५॥ २१॥ ११

"तं" यजमानं "कर्मणा" हननादि-व्यापारेण(१) "नकिर्नशत्" नैव(२) व्याप्नोति(३)। यः "इन्द्रं" "चकार" इन्द्रमेवानुकूलं "यज्ञैः" साधनैः कृतवान्। कीदृशमिन्द्रम्? "सदावृधम्" "सर्वदा वर्द्धकं। "विश्वगूर्त्तं" सर्वैः स्तुत्यम्(४)। "ऋभ्वस" महान्तम्(५) "ओजसा" बलेन "अधृष्टं" अन्यै र्धर्षितु मशक्यम्। "धृष्णुं" शत्रूणां धर्षकम्॥

"धृष्णुमोजसा"-"धृष्णवोजसम्"-इति च पाठौ॥१॥ ११

(१)—'रत्यात्मकेन' इति वि०।

(२)—'न कश्चिद्रक्षः पिशाचादिः'-इति वि०।

(३)—'शुद्धोऽप्ययं नशिर्वि-पूर्वो द्रष्टव्यः अन्तर्णीत-ण्यर्थश्च, विनाशयतीत्यर्थः' इति वि०। 'नशत्'-इति व्याप्ति-कर्मसु अष्टमम् पदञ्च २,१८।

(४)—'सर्वशत्रूणां वधाय आद्दतम्' इति वि०।

(५)—ऋभुचाः'-इति महन्नामसु दशमं पदम् नि० ३, ३।

४र ४
* "हाओ३वा"-इति सा०पाठः।

अथ द्वितीया।

मेधातिथि मेंध्यातिथि र्ख्याः(१) परस्याय ऋषो ।

३ १ २ २ १ २ ३ २ ३ १ २ ३ १ २
यच्चतेचिदभिश्रिषःपुराजत्रुभ्यआतृदः ।
१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
सन्धातासन्धिमघवापुरूवसुर्निष्कर्त्ता*विह्रुतंपुनः ॥२॥ १२

५ २ ४ ५ ४ ५ १ १ र
I यच्चताइचिदभिश्रिषाः । पुरा २जात्र २ । भ्यआ-
१ २ १ २ २ १ १ १ २ १
तृदा३ः । होवा३हाइ । सान्धा २ तासा २म् । धाइंमघ-
५र र १ २ १ २ २ १ १ १ २
वा२पुरूवसुः । होवा३हाइ । नाइष्का २र्त्तावी २ह्रुतंपुनः ।
१ ३ ५र र ३ ५
हो । वा२ । हा२३४ । औहोवा । ऊ२३४पा ॥ २२ ॥ १२

"यः" इन्द्रः "अभिश्रिषः" अभिश्लिषः अभिश्लेषणात् सन्धान-

---

* "इष्कर्त्ता"-इति ऋक्पाठः ।

---

१२ ऋग्वेदस्य ५,७,१२,२ ।

I सात्यम् ।

(१)—प्रगाथस्यार्षम् । भग्नस्य सन्धाने रज्ज्वाभिमर्शनेन मनया कृत्वा क्रियते'-इति वि० ।

अथ तृतीया(१)।

१ २ ३ १ ३ २ ३ २ ३ १र २र ३ १ २
आत्वासहस्रमाशतंयुक्तारथेहिरण्यये ।
३ २३ १ २ ३ २ ३ १ २ ३ १ २
ब्रह्मयुजोहरयइन्द्रकेशिनोवहन्तुसोमपीतये ॥ ३ ॥ १३

५र र २ १ २ १ र २र
I आत्वासहा। समाशा१ता२म्। युक्तारथेहि-
र १ २ १ २ १ २
रण्यये। ब्रह्मायु१जा२ः। हारयइ। न्द्रकाइशा१इना२ः।
१ २ १ ३ ५र र ३ ५
वहान्तू१सो२३। मा२पा२३४औहोवा। ता२३४ये ॥ २३॥

इत्यात् "ऋते चित्" विनापि(२) "जत्रुभ्यो ग्रीवाभ्यः सकाशात् "आतृदः" आतर्दनात् आरुधिरनिस्रवणात् "पुरा" पूर्वमेव "सन्धि" सन्धातव्यं तं "सन्धाता" संयोजयिता भवति। "मघवा" धनवान् "पुरूवसुः" बहु-धनः स इन्द्रः "विह्रुतं" विच्छिन्नं तं "पुनः" "निष्कर्ता" संस्कर्ता भवति(३) ॥ २ ॥१२

---

(१)—अत्रापि 'प्रगाथस्यार्षम्'-इति वि० ।

१३ उत्तरार्चिकस्य ६,२,५,१ = ऋग्वेदस्य ५,७,१४,४ = आरण्यके प्रथमे द्वाविंशतितम्=ऊहे स०१५—अष्टौ द्वि०१२ —त्रयोवि०हृ०३ ।

I भारद्वाजम् ।

(२)—'ऋते यन्त्रे, चिदिति पद-पूरणः'-इति वि० ।

(३)—साकाङ्क्षत्वात् तं वयं स्तुमइति वाक्यशेषः।

५र र र र ५ २ १ २ २र
II औहोआत्वासहा६ए। स्रमाश्रा१ता२३४म्। हा-
२ १ र२र र १ २ २र २
होइ। युक्तारथेहिरण्यये। ब्रह्माय्१जा२३४ः। हाहो
१ २ १ २ ३र२ १
इ। हारयइ। इकाइशा१इना२३४ः। हाहोइ। वहा-
२ ३र २ ३ २ १ ५
न्तू१सो२३४। हाहो। मपो३। ता२३४याइ। उऋ-
५
वा६हाउवा ॥ २४ ॥

४र ३र ४ ५ ४र ५ ४ २ १र २ १ २
III आत्वासहस्रमाशतमा। युक्तारथेहिरण्यये। ब्र-
१ र २ १ १ २
ह्मयुजोहरयइन्द्रकेहो२इ। शाइना२३ः। हाउवा।
१ २ ३र २ १ ३ २ १ ५
वहन्तुसोमपीहो३। ऊम्मा२। तया३इ। ओ२३४वा।
ह ११११
उ२३४५॥ २५ ॥

३र ४र ३ ४ ५र ३ २ ३र ४र ५ २ २ १
IV आत्वासहस्रमा। शताम्। आत्वासहा। स्रमा-
२ १ २ ५ १र २र र
शतम्। आ१२इहिया२३४हाइ। यूक्तारथेहिरण्यये।

---

II भारद्वाजम्, कण्वबृहद् वा।

I,II,IV भारद्वाजे द्वे।

१ २ १ ३ ५ १ २
ब्रह्मायू१जार२३ः। आ२इहियार२३४साइ। हारयइ।

१ २ १ ३ ५ १ २
इकाइशा१इना२३ः। आ१२इहियार२३४हाइ। वहान्तू१सो-

१ ३ ५ २ १र २ १
२३। आ१२इहियार२३४हाइ। मपीतार२३या३४३इ। ओ-

२३४५इ। डा॥ २६ ॥१२

हे "इन्द्र"! "त्वा" त्वां "सहस्रं" सहस्र-सङ्ख्याका हरय स्त्वदीया अश्वाः "आ वहन्तु" आ नयन्तु अस्मद्यज्ञम्। तथा "शतं" शत-सङ्ख्याकाश्च भवदीया अश्वा स्त्वा मावहन्तु। (यद्यपि द्वाविव हरी(२) तथापि तद्विभूतयोऽन्येपि बहवोऽश्वाः वहन्ति। ननु युगपदनेकैरश्वैः कथं यातुं शक्यते? इत्यत आह—— "युक्ताः" इति) "हिरण्यये" हिरण्मये स्वर्ण-विकारे (हिरण्य-शब्दाद्विकारार्थे विहितस्य मयटः "ऋत्व्य वास्त्व्य त्यादौ मलोपो निपात्यते(३) तादृशे) "रथे" "युक्ताः" सम्बद्धाः (बहूना मश्वानां शीघ्रगमनाय रथे नियुक्तत्वात् युगपदेव सर्वैं रश्वै र्गन्तुं शक्यत

(२)—'हरी इन्द्रस्य'-इति निरुक्त-शासनात् (१, १५, १)।

(३)—"ऋत्व्य वास्त्व्य-वास्त्व-हिरण्ययानि छन्दसि (६, ४, १०५)।

अथ चतुर्थी।

विश्वामित्रो यथार्थ(१) मिन्द्र माह्वयति।

२ ३ १ २ ३ १ २ ३ २ ३ १ २

आमन्द्रै रिन्द्र हरिभिर्याहि मयूररोमभिः।

३ २ ३ १ २ ३ २उ ३ २उ ३ १ २ ३ १ २

मात्वाकेचिन्नियेमुरिन्नपाशिनोतिधन्वेवता ँ इहि॥४॥१४

इति भावः) कीदृशा हरयः? "ब्रह्मयुजः" ब्रह्मणा परिवृढ़ेनेन्द्रेण युक्ताः (यद्वा। ब्रह्मणास्मदीयेन स्तोत्रेण अस्माभिर्दत्तेन हविषा वा युक्ताः(४) "केशिनः" केशाः ग्रीवाया उपरि वर्त्तमानाः सटाः तैर्युक्ताः। किमर्थमिन्द्रस्यावहनम्? तत्राह-"सोमपीतये"(५) सोम-पानाय। यथास्मदीयं सोमं पिबेत् तथा आवहन्त्वित्यर्थः॥३॥१३

---

(१)—अस्याऋचो ऽर्थमनतिक्रम्य, ऋगर्थानुरूपमित्यर्थः।

१४ उत्तरार्च्चिकस्य ८,३,३,१ = ऋग्वेदस्य ३,३,९,१ = अष्टे अष्टा० द्वि०१९—एकवि०५।

(४)—ब्रह्म अन्नं, तेन निमित्त-भूतेन ये युज्यन्ते, ब्रह्मयुजः; हविर्लक्षणस्यान्नस्य भक्षणाय गन्तुं ये रथे नियुज्यन्ते। अथवा त्रैविध्यलक्षणं ब्रह्म, तेन निमित्त-भूतेन ये युज्यन्ते, ते ब्रह्मयुजः। अथवा ब्रह्मणा प्रजापतिना अनुज्ञातस्येन्द्रस्य ये युज्यन्ते ते ब्रह्मयुजः'-इति वि०।

(५)—"भ-नी-रेत्यादिना क्तिनि रूपम् पीतिरिति।

५र र २ र र १ २
I आमन्द्रैरा । इन्द्रहरिभाइर्याहिमयूरा३रोमाभा३इः ।
४ ५ ४ ५ २ ३ ५ २र १ २
माल्वाकाइचीत् । नियेम् २३४रीत् । नपाशिनाः । अति-
१ २ १ ३ ५र र ३
धान्वे २ । वता५२३ । आ२इन्द्रा२३४औहोवा । वा२३-
५
४याः ॥ २७ ॥

४र ५ ४र ५ ४ ४ २र १ २ १र
II आमन्द्रैरिन्द्र । हा५रिभाइः । याहिमयूररोम-
र र २ १ र २ १र
भाइः । माल्वाकार३इचीत् । नाइयेमुरित् । नपाशार३-
२ १ २ १ १ ३ ५र
इनाः । अताइधार३न्वे । वता५२३ । आर२इन्द्रा२३४औ
र २ १ १ १ १ १
होवा । वयो३भीर३४५ः ॥ २८ ॥

४र ५ ४र ५ ४ ५ २र १ २ १र
III आमन्द्रैरिन्द्र । हा५रिभीः । याहिमयूररोमभा-
१ १र र २ १र
उ । वा२ । माल्वा २ । केचिन्नियेमुरिन्नपाशिनाओ ।
१ १ र १ ५
वा२ । आती २ । धन्वेवता३१ओवा२३ । ई२३४हो ॥ २९ ॥

---

I,II,III अग्नेः, साम्नानि त्रीणि ।

अथ पञ्चमी।

गौतम ऋषिः।

३ १२ २२ ३१ २ ३ १ २
त्वमङ्गप्रशꣳसिषोदेवः शविष्ठमर्त्यम्।
२उ ३ १ २ ३ २ ३ १ २ ३ १ २
नत्वदन्योमघवन्नस्तिमर्डितेन्द्रब्रवीमितेवचः॥ ५ ॥ १५

हे "इन्द्र"! "मन्द्रैः" मादयितृभिः(२) "मयूररोमभिः" मयूर-रोम-सदृश-रोम-युक्तैः "हरिभिः" अश्वैरुपेतस्त्वम् "आयाहि" यज्ञं प्रत्यागच्छ। केचिदपि जनाः "त्वं" त्वां "मा नियेमुः" मा नियच्छन्तु(३)। गमन-प्रतिबन्धं मा कुर्वन्तु-इत्यभिप्रायः। तत्र दृष्टान्तः—"पाशिनो न" पाशिनः इव, यथा पाश-हस्ता व्याधाः पक्षिणं न यच्छन्ति तद्वन्मा नियच्छन्तु। किञ्च। "धन्वेव"(४) यथा पान्थाः धन्वं मरुदेशं शीघ्रमतिगच्छन्ति तद्वद्गमन-प्रतिबन्धकारिणस्तानतीत्य(५) शीघ्रम् "एहि" आगच्छ॥ ४ ॥ १४

---

१५ उत्तरार्च्चिकस्य ८,३,५,१ = ऋग्वेदस्य ३,३,९,१—अष्टा० द्वि०१९—एकवि०५।

(२)—मन्द्रस्वरैः गभीरस्वरैः'-इति वि०।

(३)—यमिरत्र बन्धनार्थः।

(४)—धन्वेव, इव शब्दः उपमार्थस्यासम्भवात् पदपूरणः; धन्वेत्यत्र च तृतीयायाः लुग् द्रष्टव्यः; धन्वना अन्तरीक्षेण, अथवा धन्वना धनुषा अस्त्रैर्विजित्य तान्,-इत्यादि वि०।

(५)—अतीत्ययमुपसर्गः। उपसर्गाश्च पुनरेवमात्मकाः—यत्र क्रियावाची कश्चिच्छब्दः तत्र विशेषमाङ्कः; यत्र न प्रयुज्यते, तत्र स-साधनां क्रियामाङ्कः। न चात्र क्रिया-वाची कश्चिच्छब्दः प्रयुज्यते, अतउपसर्गएव क्रियां ब्रवीति अतोऽतीत्यस्यैवातीत्येत्यर्थो बोध्यः।

५ ४　४ ५ ४　५　१　१ २ २
I त्वमा३०गाप्रश०ंसिषाः । दाइवा २ः । शविष्ठमा३ ।
४ ५　२ १ २　१　२ २ ४ ५
तायाम्* । नत्वदन्योमघवार३नार । स्तिमा३र्डाइता ।
१　२　१　२ २　१　५　४　५
आइन्द्रब्र । वा । औ३हो । मिता२३४वा । वा५चो६ हा-
इ ॥ ३० ॥ १५

(अङ्गेत्यभिमुखीकरणे(१) "अङ्ग" "शविष्ठ" ! हे बलवत्तम ! इन्द्र ! "देवः" द्योतमानस्त्वं "मर्त्यं" मरण-धर्माणं त्वां स्तुवन्तं पुरुषं "प्रशंसिषः" सम्यगनेन स्तुतमिति प्रशंस(२) । हे "मघवन्" धनवन् "इन्द्र" ! "त्वदन्यः" त्वत्तोऽन्यः कश्चित् "मर्डिता" सुखयिता नास्ति । अतः कारणात् तुभ्य मिदं स्तुति-लक्षणं "वचो" "ब्रवीमि" उच्चारयामि ॥ ५ ॥ १५

---

* 'ता३याम्'-इति सा० पाठः ।

---

I गुङ्गोः साम, गौङ्गवं वा ।

(१)—सम्बोधने इति यावत् । 'अङ्ग क्षिप्रम्'-इति वि० ।

(२)—'प्रशस्तं करोषि'—इति वि० ।

अथ षष्ठी।

नृमेध-पुरुमेधावृषी(१)।

१ २ ३ १ २ ३ १२ २२१ १ २
त्वमिन्द्रयशाअस्यृजीषीशवसस्पतिः।

३ १ २ ३२उ ३ २ ३ १ २ ३ १ २
त्वंवृत्राणिहंस्यप्रतिन्येकइत्पुर्वनुत्तश्चर्षणीधृतिः*॥६॥ १६

४ ५ ४ २ १र २ र १र २
I त्वमिन्द्रा। यशाः। असाइ। औजीषीशवसः।

१ २ र २ ३ २ १र १
पताइः। त्वंवृत्राणी३हंसिया। प्रतीनाए२। कइत्पूरू-

१ १ १ २ ५र र २
२। अनूर२हो१। तश्च। षार णार२३४औहोवा। धार-

५
३४र्त्ताः॥ ३१॥

---

* "एकइद्दनुत्ताचर्षनीधृता"-इति ऋक्पाठः।

---

१६ उत्तरार्चिकस्य ६,२,१२,१ = ऋग्वेदस्य ६,६, १३,५=ऊहे स०द्वि०१८—षो०द्वि०७—अष्टा०द्वि०१४=ऊह्य ह०१८।

I इन्द्रस्य, यशःसाम।

(१)—पुरुमेधस्य आर्षम् इत्येव विवरणे दृश्यते।

५२ ४ ५ ४ ५ २१ २र १ ३ २
I त्वमाइइन्द्रायशाअसाइ । ऋजाइषीआ२ । वसा-
३ ५ १ र २ १र र२१२ १
३४५ः । पा२३४तोः । त्वंवृत्राणिहꣳस्यप्रतीन्येकइत्पु । रु ।
२ ३ ५ १ २ ३ ५ ४
आनाओ२३४वा । ताआओ२३४वा । षणा५इधृतोः ।
४
होपइ । डा ॥ ३२ ॥

५र २ ३ ५ ५ २
II हाउत्वमिन्द्रा । याशाआ२३४सोई । हाउऋ-
३ ५ २ ३ ५ ५ २१
जाइषी२३४शा । वासस्पा२३४तोइः । हाउ । त्वंवृत्रा ।
२र १ ५ २ ३ ५ २१ ५
णोहꣳसिया । हाउ । प्रतीना२३४ए । कइत्पू२३४रुइ ।
५ २१ ६ ५ १ ३ ५र र
हाउ । अनुत्ता२३४स्थाइ । हाउ । पा२णा२३४औहो
३ ५
वा । धा२३१र्त्तीः ॥ ३३ ॥

हे "इन्द्र" ! "शवसस्पतिः"(२) बलस्य पालयिता "ऋजीषी"

---

I इन्द्रस्य ; यशःसाम ; साध्रं वा ।

II इन्द्रस्य ; यशःसाम, समीचीनं वा ।

(२)—"षष्ठ्याः पतिपुत्रपारस्योषेषु (८,३,५३)"-इति षष्ठ्या अलुक् ।

५र २१र २ १ २ ५ऽ
III हाउत्वमिन्द्रा । यशा असि । होइ । होये३४ । हा
ऽ ऽ २ र १र ५ १ २ १ २
उहाउहाउ । ऋजीषीशवसस्पतिः । होइ । होइ । होये
५ऽ ऽ ऽ १ र २ १र र १ १ २ १
३४ । हाउहाउहाउ । त्वंवृत्राणिहᳲस्यप्रतीन्येकइत्पूरु ।
२ ५ऽ ऽ ऽ १ २
होइ । होइ होये३४ । हाउहाउहाउ । अनुत्तश्चर्ष-
र १ २ १ २ ५ऽ ऽ ऽ
णीधृतिः । होइ । होइ । होये३४ । हाउहाउहाउ-
१ २ ३ १ १ १ १
वा । सुवर्म्हा२३४५ः ॥ २४ ॥

५र २ १र २ १ २ १ १ १ १
IV होत्वमिन्द्रा । यशाअसि । होये३ । हो२३४५ ।

ऋजीषी अपाजितोऽभिषुतः सोमः, तद्वान्(३) "त्वं" "यशः"(४) यशस्वी "असि" भवसि । कथमस्य यशस्वित्वम्? तदाह—"अप्रतीनि" बलिभिरप्यप्रतिगतानि(५) "पुरु" पुरूणि ("शे छन्दसि-

---

III इन्द्रस्य ; यशःसाम, प्राचीनं वा ।

IV यौक्तास्रुचम् ।

(३)—'यत् सोमस्य पूयमानस्यातिरिच्यते, तत् ऋजीषम् ; तेन तद्वान् । कथं पुनरसौ तेन तद्वान्? उच्यते शवसस्पतिः'-इति वि० ।

(४)—अन्तर्णीत मत्वर्थश्चे द्रष्टव्यम् ।

(५)—प्रतिबन्धं कर्त्तुं न शक्ता बलीत्यर्थः ।

अथ सप्तमी।

एतदादीनां तिसृणां मेध्यातिथि ऋषिः*।

२ १ २ ३१२ ३१२ ३क२र ३२
इन्द्रामिद्देवतातयइन्द्रं प्रयत्यध्वरे।

२र १र २१२ १२ ११११ १र
ऋजीषीशवसस्पतिः। होये३। होऽ२३४५। त्वंवृत्राणि-
२ १र र २ ११ १२ ११११ १ २
हर्ठस्यप्रतीन्यंकइत्पुरू। होये३। होऽ२३४५। अनुत्त-
२र १२ १२ १११५ ५ १
श्चर्षणीधृतिः। होये३। होऽ२३४वा४श्हाउवा। सुवम-
११११
याऽ२३४५ः॥ ३५॥१६ *

बहुलम् (६,१,१०)"-इति शेर्लोपः) बहूनि "वृत्राणि" रक्षांसि(६) "अनुत्तः" न केनापि प्रेरितः(७) "चर्षणीधृतिः" चर्षणीनां यजमान-मनुष्याणां(८) धारकः "एक इत्" अ-सहाय एव त्वं "हंसि" सम् प्रहरसि अत एवास्य यशस्वित्वम्॥ ६ ॥१६

---

* मेधातिथिरिति वि०-पाठः।

---

(६)—'वृत्राणि शत्रुकुलानि, मेघवृन्दानि वा'-इति वि०। वृत्र इति मेघनामसु अष्टाविंशतितमम् नि०१,१०।

(७)—'अनुत्तः अखण्डितः'-इति वि०।

(८)—चर्षणयः-इति मनुष्यनामसु अष्टमं पदम् नि० २, ३।

---

*॥ इति ग्रामे गेय-गाने षष्ठः प्रपाठकः॥ ६ ॥

१ २ ३ २ ३ १ २ १ २ ३ १ २ ३ १ २
इन्द्रꣳसमीके वनिनो हवामह इन्द्रं धनस्य सातये ॥७॥१७

४५ ४५र४ १ ११
ओं। इन्द्रमिद्देवता। तयाइ। इन्द्रंप्रयतियध्वा२-

२ १ र १र र २१र २
३राइ। आइन्द्रा२म्। समीकेवनिनोहवामा२३हाइ।

१ १ २१ ५ ३ ५
आइन्द्रा२म्। धानस्यसो२३४वा। ता२३४ये॥ १ ॥१७

"देवतातये" देवैः स्तोतृभिः तायते विस्तार्यते इति देवतातिर्यज्ञः(१) तदर्थम् "इन्द्रमित्" "देवेषु" मध्ये इन्द्र मेव "हवामहे" आह्वयामहे। "अध्वरे" यज्ञे "प्रयति" प्रगच्छति उपक्रान्ते सति इन्द्रं हवामहे। तथा "समीके सम्यग्जाते सम्पूर्णे च यागे "वनिनः" सम्भजमानाः(२) वयम् इन्द्रमेवाह्वयामहे [यद्वा। समीकमिति सङ्ग्राम नाम-(नि०२,१७,११)। समीके सङ्ग्रामे॥ ७॥ १७

---

१७ उत्तरार्चिकस्य७,३,८,१ = ऋग्वेदस्य ५,७,२५,५ = ऊहे एका० द्वि०१२—त्रयोवि०ल०५ = ऊह्ये द्वि०१५।

I यातसुचम्।

(१)—देवताता-इति निघण्टौ यज्ञनामसु दशमम् पदम् ३,१७।

(२)—'वनम उदकं सोमलक्षणम्, तेन तद्वन्तः सोमवन्त इत्यर्थः' इति वि०।

अथ अष्टमी ।

३ १ २ ३ १२ ३१ २र
इमाउत्वापुरूवसोगिरोवर्द्धन्तुयाममम ।

५ ४र५ र र र ४५ ४ ४ १ २
I इमाउत्वापुरूवसोगिरः । ए५ । गिराः । वार्द्धं
३ र २ १ २र ३ २ ३ २ १ २ २ ऽ
तुयाममा२३ । पावकवर्णाः । शुचयोवी३पा । हू३म् ।
२ ३ ५ १ १ र र २ १
हूम् । चा२३४इताः । अभिस्तोमैरनै२ । ऊवाइ ।
ऽ २ १ २ ४ ५ ४
होइवा । षता । औ३होवा । हो५इ । डा ॥ २ ॥

५ र र र र १ र २ १ २
II इमाउत्वापुरूवसोहाउ । गिरोवर्द्ध । तूया१म-
३ र २र १ १२ ५ २र १ २र १
मा२ । इहाहाहोइ । इहो२३४वा । पावकवर्णाःशु-
२ ३ र २र१ १२ ५ २ १
चयः । इहाहाहोइ । इहो२३४वा । विपश्चि । ते ।
र र ३ र २र१ १२ ५ २१
अभिस्तोमैः । इहाहाहोइ । इहो२३४वा । अनू२३ ।
१ २ ५र र ३ ५
षा२ता२३४औहोवा । ऊ२३४पा ॥ ३ ॥

४ ३र४ ५र र २ २ १ र५
III इमाउत्वापुरू । वसा३उ । गा२३४इ । रोव-

---

I,II,III वात्राणि त्रीणि, वासिष्ठानि वा ।

२ १२ ३ १ २ ३ १ ३ १र २र
पावकवर्णाः शुचयोविपश्चितोऽभिस्तोमैरनूषत ॥ ८॥१८

४र ५ २र १ २र १ २र १
इन्तुयाः । ममा । पावकवर्णाः शुचयोविपश्चि । ता ।
२ १ १ २ २ १ र र २ १
औ३हो । आऔ३हो । अभिस्तोमैरनौ२ । ऊवाइ ।
ऽ २ १ २ ४ ५ ४
हो३वा । षता । औ३होवा । हो५इ । डा ॥४॥ १८

हे "पुरूवसो" बहुधनेन्द्र ! "मम" मदीयाः "इमाः" "गिरः" शस्त्र-रूपा वाचः(१) "त्वा" त्वां "वर्द्धन्तु" वर्द्धयन्तु । तथा "पावकवर्णाः" अग्नि-समान-तेजस्काः अतएव "शुचयः" शुद्धाः "विपश्चितो" विद्वांसः उद्गातारश्च(२) "स्तोमैः" स्तोत्रैर्वहिष्पवमानादिभिः(३) "अभ्यनूषत" त्वामभिष्टुवन्ति (नु स्तुतौ कुटादिः ॥ ८ ॥ १८

---

१८ उत्तरार्चिकस्य ७,३,१८,१ = ऋग्वेदस्य ५,७,२५,२ = ऊहे द्वा०१.०—अष्टा०द्वि०५ ।

(१)—अप्रगीत मन्त्रा इत्यर्थः ।

(२)—विपश्चित्-इति निघण्टौ षोड़शं पदम् ३, १५ ।

(३,—प्रगीतमन्त्रैः "उपास्मै गायता नरः"-इत्येवमादिषु ताण्ड्योक्त-प्रकारैर्गीयमानैः उद्गानारम्भे एव स्तुतेरित्यर्थः । बहिष्पवमानादिभि रित्यादिपदात् 'आज्यस्तोत्रे' 'माध्यन्दिनपवमान'-इत्यादयो ग्राह्याः ।

अथ नवमी ।

२ ३ १र २र　३ २३ १ २
उदुत्येमधुमत्तमागिरःस्तोमासईरते ।
३　१ २　३ १र　२र　३ २ ३ १ २
सत्राजितोधनसाअक्षितोतयोवाजयन्तोरथाइव ॥९॥ १९

५ र　३र१　२　३　५
I उदुत्येमा । धूमत्तमार२३४ । गाइरस्तो२३४मा ।
२र १र　२　२　३　५　२　३　५
साईरताये३ । सात्राजा२३४इता: । धानासार२३४आ ।
२र १र　२　३　५　३२　४
क्षीतोतयार२३: । वाजायार२३४ता: । रथा३आ५इवा६-
५६ ॥ ५ ॥

४ र　४　१ र र　१
II उदुत्येमा५धूमत्तमा: । गिरस्तोमासआ२इराता
र १ र　१र　२ र १　१र
२इ । सत्राजितोधना२साअ । क्षितोताया२: । वा-
र २　५
जयन्तोरथा३१उवा२३ । ई२३४वा ॥ ६ ॥
३ १ १११ १　३ ४ ३र ४ ५　३　५　१
III हाउ२३४५ । उदुत्येमधुम । तमा२३४हाइ । गा-

१९ उत्तरार्चिकस्य ६,१,६,१ ।

I,II,III वासिष्ठानि त्रीणि, आत्ताणि वा ।

१　४　　२ २　　२　　५　२ र १
इरा२ःस्तोमा२। सत्रा३४५इ। रा२३४ते। सत्राजि-
३र　१र　२र ३ १ १ १ १　३ १ १ १ १　४र　३ ४र
तो२धनसाअक्षितोतया२३४५ः। ह्व९२३४५। वाजयन्तोर-
५र　३　५　२र १ २र १ २र　१　२
थाः। इवोर३४हाइ। वाजयन्तोरथाइ। वा। औ-
४ ५　४
३होवा। होपुइ। डा ॥ ७ ॥ १९

"त्ये" ते प्रसिद्धाः "मधुमत्तमाः" अतिशयेन मधुराः "गिरः" अप्रगीताः शस्त्र-रूपा वाचः। "स्तोमासः" प्रगीतानि वहिष्पवमानादीनि स्तोत्राणि च "उदीरते"। इन्द्र! त्वामुद्दिश्योद्गच्छन्ति ऊर्ध्वं प्रसरन्ति (ईर गतौ आदादिकः) तत्र दृष्टान्तः— "सत्राजितः" सदैव शत्रून् जयन्तः अतएव "धनसा" धनानि-सम्भजन्तः [वनु षणु सम्भक्तौ। "जन-सन-खन-क्रम-गमो विट् (३,२,६७)। "विड्वनोरनुनासिकः स्यात् (६,४,४१)"-इत्यात्वम्]"अक्षितोतयः" [क्षियो भावे निष्ठाया मण्वदर्थे (६,४,६०)"–इति पर्युदासाद्दीर्घाभावः अतएव "क्षियो दीर्घात् (८,२,४६)"-इति निष्ठा नत्वाभावश्च। अक्षिताः क्षयरहिताः ऊतयो रक्षा येषां ते तथोक्ताः] "वाजयन्तः" वाजमन्नमिच्छन्तः(१) [क्यचि-'नच्छन्दस्य पुत्रस्येति(७,-४,३) ईत्व-दीर्घयोः प्रतिषेधः] एवं गुण-विशिष्ट-रथाइव, ते यथा विविध मितस्तत उत्तिष्ठन्ति तद्वदुदीरत इत्यर्थः ॥ ९ ॥ १९

(१)—वाजयन्तः पूजयन्तः; अथवा वाजशब्दो वेगवचनः वेगवन्तः-इति वि०।

अथ दशमी ।

देवातिथिः काण्व ऋषिः ।

१ २ ३ २ ३२ ३ २उ ३ १र ४ २र
यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
३ १२ ३ २उ ३ १ २ ३ १ २ ३ २उ ३ १ २
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥१०॥ २०

॥ इति प्रथम-दशति ॥ १ ॥

२ १र ४र ५र १ र २ १र
I यथागौर२३रोअपाकृताम । तृष्यन्नेतियवेरा२३इ
१ र १र र र२ १र २ १
णाम् । आपित्वे नःप्रपित्वे तूयमागा२३हो । कण्वे२षु-
१ १ ३ ५र र ३ ५
हू२३ । सा२चा२३४औहोवा । पी२३४बा ॥ ८ ॥
२ ३ ५ ४ ५ २र र १ ७
II ओवाओ२३४वा । याथा । गौरोआ३पाकृतम् ।
२ ३र २ र १ ७ २
ओ३४ । हाहोइ । तृष्यन्नेतिया३वाइरिणम् । ओ३४ ।

---

२० उत्तरार्चिकस्य ८,३,४,१ = ऋग्वेदस्य ५,७,३०,३ = ऊहे अष्टा० द्वि० १८ ।

I,II गौराङ्गिरसस्य सामनी द्वे ; गौतमस्य मनाज्ये वा ।

१र २ ३ ५ १र रर २ ३ २
हाहोइ। आ२३४पी। त्वे नःप्रपित्वे तूयामा१गहि। ओ-
३र २ १ १ १ ३ ५र र
३४। हाहोइ। कण्वे२षुसू२३। सा२चा२३४औहोवा।
२ १ ११ ११
पिबा३ई२३४५॥ ८ ॥२०

"गौरः" गौर-मृगः(१) "तृष्यन्" पिपासितः सन् "अपा" अद्भिरुदकैः (व्यत्ययेनैकवचनम्। ऊडिदमित्यादिना(६,१,१७१) विभक्तेरुदात्तत्वम्) "कृतं" सम्पूर्णत्वं कृतम् "इरिणं" निस्तृणं तटाक-देशं "यथा" येन प्रकारेण "अवैति" अभिगच्छति (अव-शब्दोऽभिशब्दस्यार्थे) अभिमुखः सन् शीघ्रं गच्छति। तथा "आपित्वे" बन्धुत्वे(२) "प्रपित्वे" प्राप्ते सति, हे "इन्द्र"! त्वं "नः" अस्मान् "तूयं" (क्षिप्र-नामैतत्) शीघ्रम् "आ-गहि" आगच्छ। आगत्य च "कण्वेषु" कण्व-पुत्रेष्वस्मासु "सचा" सह एक-प्रयत्नेनैव विद्यमानं सर्वं सोमं "सु" सुष्ठु "पिब"(३)॥ १०॥ २०

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने तृतीयाध्यायस्य द्वितीयः खण्डः।

---

(१)—'गौरः गौरमृगः सिंहः व्याघ्रो वा'-इति वि०।

(२)—'आपित्वे आपानकाले'-इति वि०।

(३)—'कण्वेषु सप्तम्या बहुवचनमिदम् तृतीया-बहुवचनस्थाने द्रष्टव्यम्, कण्वैर्मेधा-दिभि रस्मदीयैः ऋत्विग्भिः सचा सह पिब सोमम्-इति वि०। कण्वइति निघण्टौ मेधावि-नामसु सप्तमं पदम् ३. १५।

अथ तृतीये खण्डे—

सैषा प्रथमा।

भर्ग ऋषिः।

२ २ ऽ१२ ३ २ ३ १ २ ३ १ २
शग्ध्यू३षुशचीपत इन्द्र विश्वाभिरूतिभिः।

५ र २ १ २ ३ ५ २ र
I शग्ध्यूषु। शचाइपताइ। ई२३४न्द्रा। विश्वाभो-
१ २ ३ ५ २ र १ २
३रूतिभाइः। भार२३४गाम्। नह्वित्वायशा३सावसू।
३ ५ १ १ ३ ५रर १ ऽर १
वी२३४दाम्। अनू२३। शूर्रा२३४औहोवा। चरा२म-
३
सी२३४५॥ १०॥

४ र र र४ १ र र
II शग्ध्यूवौहोवा५इशचीपताइ। आइन्द्रविश्वाभिरूति-
२ २ २ २ २ २
भिः। भगान्ना३ह्वो। त्वायशसाम्। वसू३ह्वाइवाइद२म्।
१ र २ १ ५ ४ ५
अनुशूरचरोवा३ओ२३४वा। मा५सोई ह्वाइ॥११॥

४ ३र ४ ५र ३ २ ३ ४र५ २ १ २र
III शग्ध्यूषूशची। पताइ। शग्ध्यूषु। शचाइपते।

---

I,II,III इन्द्रस्य; हारयणानि, हाराग्रयणानि वा त्रीणि।

३ १ र २र ३ १ २ ३ २ ३ १ २ ३ १ २
भगंनह्वित्वायशसंवसुविदमनुशूरचरामसि ॥ १ ॥ २१

१ २ ५ १ २ र १ २
आ२इहिमा२३४हाः। आइन्द्रविश्वा। भिरूतिभिः। आ२

१ ३ ५ १ २ र १ २ १
इहिमा२३४हाः। भागन्नहित्वायशसम्। वसूविदम्। आ-

३ २ १ २ १ ३ ५
२इहिमा२३४हाः। अनुशू१रा२३। आ२३इहिमा२३४हाः।

१ १र २ १
चरामा२३सा२३४३इ। ओ२३४५इ। डा ॥ १२ ॥ २१

हे "शचीपते"(१)! "इन्द्र"! "शग्धि"(२) देह्यभिमतं। "विश्वाभिः" सर्वाभिः सह हे "शूर"! "भगं न"(३) भाग्यमिव "यशसं" यशस्विनं। "वसुविदं" धनस्य लम्भकं "त्वा" त्वाम् "अनुचरामसि" परिचराम इत्यर्थः ॥ १ ॥ २१

---

२१ उत्तरार्चिकस्य ७,३,२,१ = ऋग्वेदस्य ६,४,३५,१८,५ = ऊहे एका० १८ एका० द्वि० ६—अष्टा० द्वि० ११ ॥

(१)—'शचीति कर्मनाम (नि० २,१,२२) * * * सर्वकर्मणां ज्योतिष्टोमादीनामधिपतिभूत !'-इति वि०।

(२)—शग्धीति याच्ञाकर्मसु पञ्चमम् नि० ३, १९।

(३)—'न शब्द उपरिष्टादुपमार्थीयः, वस्तुपमार्थस्य सम्प्रत्यर्थे प्रयोग इति पदपूरणः। पालन-सहितं धनमित्यर्थः'-इति वि०।

अथ द्वितीया।

रेभः काश्यप ऋषि रिन्द्रं प्रार्थयते।

१ २३ २ ३ १ २क २र ३ १ २
याइन्द्रभुजआभरःसर्वा॑असुरेभ्यः।

३र २ २ ५ २ १ २
I याहोइ। ई२३४न्द्रा। भुजा३आभा१रा२ः।
१ २ र १ २ १ २ २
सुवार३हा। वाँ॑असू३राइभा१या२ः। स्तोता३हा।
१ ७ १ २ २ र १
रमिन्मघवन्नस्यावर्द्धाया२। याइचा३हाइ। त्वेवृक्तब-
२ १
र्हा२३इषा३४३ः। ओ२३४५इ। डा॥ १३॥

५र र ५ २ १र २ १ ३
II याइन्द्रभुजआभाईराः। सुववा॑अ। सुरेभा
५ २ ३र ५ ३र र २ १
२३४याः। हा। औहो२३४हा। स्तोतारमाइत्। मा-
१ ७ ३ ५ २ ३र ५
घवन्ना। स्यवा२र्द्धा२३४या। हा। औहो२३४हा।
२र १ २ २ ३र ५ २ १
येचत्वा२३इवृ३। हा। औहो२३४हा। क्तबर्हा२३-
२ १
इषा३४३ः। ओ२३४५इ। डा॥ १४॥

४र ५ ४ ५ ४र ५ ४ ५ १ २र १
III याइन्द्रभुजआभरः। उहुवाहाइ। सुववाँ॑अ-

---

I,II,III साम्नाणि त्रीणि।

३ ५ ३ १ २ ३ २ ३ २ २ १ २
स्तोतारमिन्मघवन्नस्यवर्द्धययेचत्वेवृक्तबर्हिषः ॥ २ ॥ २२

२र १ २ र १र २ १
सुरेभ्यः। उह्रुवार३हाइ। स्तोतारमिन्मघवन्न। स्या-
७ १ २ र१ २ १
वर्द्धाया२। उह्रुवार३हाइ। येचत्वार३इव। उह्रुवा-
२ १ २ १
२३हा। क्तबर्हा३इषा३४३ः। ओ२३४५इ। डा ॥१५॥२२

हे "इन्द्र"! "स्वर्वान्" सुखवान् स्वर्गवान्वा(१) (अथवा स्वःशब्दः सर्व-पर्यायः(२) सर्वं भूत-जातम् आत्मन एवोत्पन्नत्वात् तद्वान्(३) ) एवं गुणस्त्वं "याः" यानि "भुजो" भोक्तव्यानि धनानि "असुरेभ्यो" बलवद्भ्यो राक्षसेभ्यः "आभरः" आहरः तान् हत्वा आहृतवानसि (हृग्रहोरिति भकारादेशः) अतएव हे "मघवन्"! धनवन्निन्द्र! "अस्य" (अन्वादेशे अशादेशः) एतस्य आहृतस्य धनस्य दानेन "स्तोतारमित्" तव स्तोत्रकारिणमेव "वर्द्धय" वृद्धिमन्तं कुरु। "ये च" अन्ये यष्टारः "त्वे" त्वदर्थं(४) "वृक्तबर्हिषः" स्तीर्ण-बर्हिषो भवन्ति तांश्च "धनेन वर्धय ॥ २ ॥ १२

---

२२ ऋग्वेदस्य ६,६,२६,१।

(१)—स्वःशब्दो निघण्टौ प्रथम-चतुर्थे दिवश्चादित्यस्य च साधारण-नामसु प्रथमं पठितम्। स्वः सुखमिति तु प्रसिद्धम्।

(२ —स्वर्दृशे,-इत्यत्र नैरुक्त तथैव व्याख्यानात्।

(३)—'स्वःशब्दो धन-वचनः, तद् यस्यास्ति स स्वर्वान् प्रथमैक वचनमिदं पञ्चमी बहुवचनस्थाने द्रष्टव्यम्; स्वर्वद्भ्यः धनवद्भ्यः। केभ्यः पुनः स्वर्वद्भ्यः? उच्यते—असुरेभ्यः सकाशादित्यर्थः'-इति वि०।

(४)—त्वे-इति "यस्य च भावेन भावलक्षणम् (२,३,३७)"-इति सप्तमी।

अथ तृतीया।

जमदग्निर्ऋषिः।

२ ३२ ३२३ १ २क २र
प्रमित्रायप्रार्यम्णेसचथ्यमृतावसो।

I प्रमित्रायप्राहाउ। आ२र्यम्णाइ। सचा२हो। थियौ२। ऊवाइ। आर्त्तावसाउ। वरा२हो। थियौ२। ऊवाइ। वरुणेच्छ्रा। दोयंवचाः। स्तोत्रा२ऽ-होइ। राजौ२। ऊवा। षुगायता३१उवा२३। ऊ३४पा॥१६॥

II प्रमित्रायप्रौहोवा। आर्यम्णा। औहो३४इ। औहो३वा। साचथ्यम्। ऋतावासा। औहो३४इ। औहो३वा। वारूथ्यवरुणेच्छ। दियांवाचा। औहो-३४इ। औहो३वा। स्तोत्रऽराजा। औहो३४इ। औहो३वा। षूगायाता। औहो३४इ। औहो३वा३४३। ओ२३४५। डा॥१७॥

III प्रमित्रायप्रार्यम्णेवा। ओवा। साचथ्यम्।

---

I,II,III वरुणसामानि त्रीणि।

३ २ १२३२ ३ १२ ३१र २र
वरूथ्ये३वरुणेछन्द्यं वचःस्तोत्रꣳराजसुगायत ॥ २ ॥२३

१ २ १ २ १ २ १ २र १
ऋतावा१सा२उ। वा२३रू। था२३याइ। वरुणेच्छ।

२ १ ५ २ र १ र २र
दाया२३ꣳहाइ। वचो३आ। स्तोत्रꣳराजसुगायत।

१ २ १ २ ५ २ ५ ४
स्तो२३त्राम्। राजसुगौ३। हो३१२३४। वा। या५तो-

५
ईहाइ ॥ १८ ॥२३

हे "ऋतावसो"(१) यज्ञ-धन! "मित्राय" "सचथ्यं" सेवार्हं "छन्द्य" यज्ञ-गृह-भवम्(२) अभिप्रायानुसारं वा "वचः" स्तोत्रं "प्रगायत" प्रकर्षेण पठत। "अर्यम्णे" च प्रगायत। "वरूथ्ये"

---

* "वरूथ्यं१"-इति ऋक्‌पाठः अत्राप्येव मेव वि०-सम्मतः।

---

२३ ऋग्वेदस्य ६,६,२६,१।

(१)—क्वचि तु ऋतावशो-इति पद्ये। ऋतो यज्ञः, सुए वसुभूतो यस्य स ऋत-वसुः; (ऋतवसुरेव ऋतावसुः छान्दसं दीर्घत्वम्) तस्य सम्बोधनम् ऋतावसो!-इति।

(२)—छर्दिति गृह-नामसु ऊनविंशतिमम् पदम् नि० ३, ४। छन्द्यं छन्दः शब्देन स्तुतिरुच्यते, तस्यां स्तुतौ भवमित्यर्थः। किं पुनस्तत्? वचः वचनम् स्तोत्र-लक्षणम्'-इति वि०। अत्र मानं—छन्दतेरर्चति कर्मसु पाठः (३,१४); स्तोतृ-नामसु छन्द-इति च (३,१६)।

अथ चतुर्थी ।

मेधातिथिऋषिः ।

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
अभित्वापूर्वपीतयइन्द्रस्तोमेभिरायवः ।
३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
समीचीनासऋभवःसमस्वरन्नुद्रागृणन्तपूर्व्यम् ॥४॥ २४

४ ३ ४र र ३ ४र ५ र २ ४र ५ ४र ५ २
I अभित्वापूर्वपीतये । अभित्वाऽपूर्वपीतयाइ । इन्द्र-
र र १ ७ १ १ १र ८ १
स्तोमेभौ३रायवा२ः । भिरायाऽवार३ः । ओमो३वा ।

यज्ञ-गृहावस्थिते(३) वरुणे च प्रगायत (प्रगायतेति बहुवचनं पूजार्थम्) एतदेव दर्शयति "राजसु" राजमानेषु मित्रादिषु स्तोत्रं गायत पठत । मित्रादीन् त्रीन् राज्ञः स्तुतेति समुदायार्थः ॥ ३ ॥ २३

हे "इन्द्र" ! "आयवो"(१) मनुष्याः स्तोतारः "स्तोमेभिः"

---

२४ उत्तरार्चिकस्य ७,२,१,१ = ऋग्वेदस्य ५,७,२६,२ = आरण्यके प्र० १ ३—१४ = ऊहे एका० १६—द्वावि १६ ।

I प्रजापतिः ; वषट्कारणिधनम् ।

(३)—वरूथ्यमिति गृह-नामसु सप्तदशम् पदम् (नि०३,४) तदेवेहार्थे नियामकम् । विवरण-मते तु वरूथ्ये इति सप्तमी द्वितीयार्थे, वरूथ्यं वरणीयम् ।

(१)—आयव इति मनुष्य-नामसु सप्तदशम् पदम् नि० २, ३ ।

२ २ २ १ ७ १ २
समीचीनासऋभवःसा३मास्वरा२न्। समास्वा१रा२३न्।
१२ ऽ २ २ १ ० १ २
ओमो३वा। इन्द्रागृणन्ता३पूर्विया२म्। तपूर्वा१या२३म्।
१२ २ ५२ २ ३ ५
ओम्। ओर२। वा२३४। औहोवा। ऊ२३४पा॥१६॥ १४

स्तोत्रैः "त्वामभि" ष्टुवन्ति। किमर्थं? "पूर्वपीतये" सर्वेभ्यो देवेभ्यः पूर्वं प्रथमतएव सोमस्य पानाय (सवन-मुखे हि चमसगणैः इन्द्रस्यैव सोमो हूयते। तथा "समीचीनासः" सङ्गताः "ऋभवः"(२) प्रथम-वाचकेन शब्देन त्रयोऽप्युपलक्ष्यन्ते ऋभुर्विभ्वावाजइत्येते च(३) "समस्वरन्" त्वामेव सम्यग् स्तुवन् (स्वृ शब्दो

---

(२)—ऋभवो मेधाविन इति वि०। अत्र मानम्—निघण्टौ मेधावि-नामसु ऋभुरिति पद-पाठः (३,१५,८)।

(३)—ऋभव इति पदेऽस्ति त्रिविधं नैरुक्तम्—प्रकृति-प्रत्यय-लभ्यम्, ऐतिहासिकम्, यौगरूढिकञ्च। तथाहि—"ऋभव उरुभान्तीति वा, ऋतेन भान्तीति वा, ऋतेन भवन्तीति वा (२,५,१५)"-इत्येकम्। "ऋभु र्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवु स्तेषां प्रथमोत्तमाभ्यां बहुवन्निगमा भवन्ति न मध्यमेन, तदेतदृभोश्च बहुवचनेन चमसस्य च संस्तवेन बहूनि दशतयीषु सूक्तानि भवन्ति (२,५,१६)"-इत्यपरम्; इह च मानमयं मन्त्रः——

"विष्ट्वी शमी तरणित्वेन वाघतो
मर्त्तासः सन्तो अमृतत्व मानशुः।
सौधन्वना ऋभवः सूरचक्षसः
संवत्सरे सम पृच्यन्त धीतिभिः॥"

(ऋ०१म० १६अ० ५सू० ४मन्त्रः)

"कृत्वा कर्माणि क्षिप्रत्वेन वोढारो मेधाविनो वा मर्त्तासः सन्तो अमृतत्वम् आन-

अथ पञ्चमी।

अस्याः परस्याश्च नृमेध-पुरुमेधौ द्वावृषी(१)।

३ १ २ ३ १र २र३ १ २
प्रवइन्द्रायबृहतेमरुतोब्रह्मार्चत।

पतापयोः) "रुद्राः"(४) रुद्र-पुत्रा मरुतश्च(५) "पूर्व्यं" पुरातनं त्वद्य
त्वामेव "गृणन्ते" अभ्यष्टुवन् (वृत्र-वध-समये प्रहर भगवो जहि-
वीरयस्वेत्येवं रूपया वाचा त्वां स्तुतवन्त इत्यर्थः॥ ४ ॥ २४

---

भिरे सौधन्वना ऋभवः सूरख्याना वा सूरप्रज्ञा वा संवत्सरं समश्नुवन्त धीतिभिः'-इति च यास्क-कृतं तद्व्याख्यानम्।

"आदित्य-रश्मयोऽप्यृभव उच्यन्ते (२,५,१६)"-इति तु तृतीयं नैरुक्तम्। अत्रापि मान-मत्राय मन्त्रः——

"अगो ह्यस्य यदसस्तना गृहे
तदद्येदमृभवो नानु गच्छत।"

(ऋ०१म०२२अ०५सू०११ मन्त्रार्द्धः)

"अगोह्य आदित्योऽगूहनीयस्तस्य यदस्वपथ गृहे यावत्तत्र भवथ न तावदिह भवथेति"-इति च यास्क-कृत-मेतद्-व्याख्यानम्।

तदत्र सायणेन भगवता ऐतिहासिक नैरुक्तयमेवावलम्ब्योक्त मेतत्—प्रथम-वाचकेनेत्यादि॥

(४)—'रोदन-स्वभावकाः स्तुत्युच्चारण-शीलाइत्यर्थः'—इति वि०।

(५)—'मरुतो मितराविणः'-इति नै० २,५,१३।

(१)—"पुरुमेधा आत्मीया ऋत्विज आह"—इत्येकस्यैवर्षे रन्यो विवरणे दृश्यते।

३ १ २ ३ २ ३ १ ३ २ १ २ ३ १ २

वृत्रꣳहनतिवृत्रहाशतक्रतुर्वज्रेणशतपर्वणा ॥ ५ ॥ २५

४ ५ ४ ५र ४र ५ ४ २ र १ २

I प्रवइन्द्रायबृहते। प्रवाः। इन्द्रायाबृहा१तेर३।

१र ऽ २ र १२ १र ऽ २

ओमो३वा। मरुतोब्रह्मा३आर्चा१तार२३। ओमो३वा।

१ र २ १ १र ऽ २ १

वृत्रꣳहाना। तिवृ। त्राहार२३। ओमो३वा। शता-

२ ३ ५ ३ २ २ २ ४

क्रतूः। वार३४ज्रे। णशा३। हा३हा। तपा५र्वणा।

४

हो५इ। डा ॥२०॥ २५

हे "मरुतः"! मितराविणः स्तोतारः(२)! "बृहते" महते "वः" स्तुत्य-स्तोतृत्व-लक्षणेन सम्बन्धेन युष्मदीयायेन्द्राय "ब्रह्म"

---

२५ ऋग्वेदस्य ६,६,१२,२ = आरण्यके प्रथम-द्वितीये५-६ -तृतीये च २७-२८ हे।

I धृषतो मारुतस्य साम।

(२)—मरुतो मितराविणो वा मद्द्रवन्तीति वा'-इति नै० २,५,१३। 'हे मरुतः! मदीया ऋत्विजः'-इति वि०। इह च मानम् निघण्टु-तृतीयाष्टादशे ऋत्विङ्नामसु मरुतइति पदस्य पठत्वेन पाठः।

अथषष्ठी।

३ १र २र ३ १ २ ३ १ २

बृहदिन्द्रायगायतमरुतोवृत्रहन्तमम्।

३ २ ३ १ २ ३ १ २ ३२३ २ ३१२

येनज्योतिरजनयन्नृतावृधोदेवन्देवायजागृवि॥ ६ ॥२६

१ र २ १ २ १ २

I सांत्वाहिन्व। तिधाइताइभीः३। तार२इ। भा२-

५र र १ २ १ र २ १

३४। औहोवा। स॒श्रवमे३। सांत्वारिण। तिधा-

साम-लक्षणं स्तोत्रं "प्रार्चत" प्रोच्चारयत(३)। ततो "वृत्रहा" वृत्रस्य मेघस्य(४) पापस्य वा हन्ता। "शतक्रतुः" शत-विध-कर्मा बहु-विध-प्रज्ञो वा इन्द्रः "शतपर्वणा" शत-सङ्ख्याक-धारेण वज्रेण एतन्नामकेनायुधेन वा "वृत्रम्" अपामावरकं वृत्राख्य मसुरं(५) "हनति" युष्माभिरभिष्टुतः सन् हन्तु (हन्तेर्लेटयड़ागमः(६) ॥५॥२५

---

२६ ऋग्वेदस्य ६,६,१२,१ = आरण्यके प्र० १६— द्वि० द्वि०२।

I संश्रवसः, विश्रवसः, सत्यश्रवसः, श्रवसो वा।

(३)—'अर्च्च सोमलक्षणमन्नम्, प्रार्चत प्रकर्षेण स्तुत इत्यर्थः'-इति वि०। अर्च्चइति-नानार्थः, अन्ननामसु च दृश्यते (नि० २,७,२५)।

(४)—वृत्र इति निघण्टौ मेघनामसु अष्टाविंशतितम् पदम् १,१०।

(५)—असुर इति च निघण्टौ मेघनामसु जनविंशतमम पदम १,१०।

(६)—'लेटोऽडाटौ (३,४,९४)"-इति पा०।

२ १ ३ ५र र १ ३

इताइभोइ। तारइ। भार३४। औहोवा। विश्रव-

१ र २ १ २ १ २

सेइ। सांत्वातत। तुझीइताइभोइ। तारइ। भार-

५र र २ १ र

३४। औहोवा। सत्यश्रवसेइ॥२१॥

१ र २ १ २ १

II सांत्वाशिश। तिधाइता१इभो२:। ताइभो२:।

र १ र १ र १

बृहदिन्द्रायाइगायाश्ता२। याता२। मरुतोवत्राइहा-

२ १ र र १ २

न्ता१मा२म्। तामा२म्। येनज्योतिरजनयन्नृइतावा-

१ र रर १ १

१ड्री२:। वाड्री२:। देवंदेवायाइजागृवी२। गृवी२।

१ र २ १ २ १ ३

सांत्वाशिश। तिधाइताइभोइ। तारइ। भार३४।

५र र १ ३ १ १ १ १

औहोवा। श्रवसेर३४५॥२२॥ २६

हे "मरुतः"! रु शब्दे, मितं रुवन्तीति मरुतः हे मितभाषिणः[१] स्तोतारः! "वृत्रहन्तम्" अतिशयेन पापविनाशनं "बृ-

I वाष्यानाम्, इन्द्रस्य वा।

(१)—'मरुतो मितराविणो वा, मितरोचिनो वा, महद्द्रवन्तीति वा' इति नै० ११,५,१३।

अथ सप्तमी ।

वसिष्ठऋषिः* ।

२ ३१ २ ३१ २ ३१ २ ३ १ २
इन्द्रक्रतुन्नआभरपितापुत्रेभ्योयथा ।

१ २ ३१ २ ३१ २ ३ १र २र
शिक्षाणोअस्मिन्पुरुहूतयामनिजीवाज्योतिरशीमहि ॥७॥२७

हत्" साम "इन्द्राय" इन्द्रार्थं "गायत" अस्मदीये यज्ञे गानं कुरुत । "ऋतावृधः" ऋतस्य सत्यस्य वा वर्धका विश्वेदेवाः अङ्गिरसो वा ऋषयः "देवाय" द्योतमानायेन्द्राय "देवं" देवनशीलं(१) "जागृवि" सर्वेषां जागरण-शीलं(२) "ज्योतिः" सूर्यं "येन" साम्नाम् "अजनयन्(३)" इन्द्रार्थमुदपादयन् तत्साम गायतेति ॥ ६ ॥ २६

---

* 'शक्तिरिन्द्रमाह'-इति वि० ।

---

२७ उत्तरार्चिकस्य ६,२,६,१ = ऋग्वेदस्य ५,२,२१,६ = ऊह्ये २,१७ ।

(१)—'कीदृशं पुनः स्तुतिरूपम् उच्चारयामः ? उच्यते—'देवं' द्वितीया तृतीयार्थे द्रष्टव्या, देवेन सोमेन संयुक्तम् ।

(२)—'अतिप्रीतिकरत्वेन जागरणकरम्, अत्यन्तप्रीति करमित्यर्थः'-इति वि० ।

(३)—'जनितवान्, आरोपितवानित्यर्थः'-इति वि० ।

२ १ २ २ १ २ १ २
I इन्द्राऔ३हो। क्रतुन्ना३आभा१रा२। पिताऔ-
२ २ १ २ १ २ २ २
३हो। पुत्रेभी३योया१था२। शिक्षाऔ३हो। णोअ-
२ १ २ १२ १ ३ ५२
स्मिन् पुरुहृतयामा१नी२। जीवा२३ः। ज्यो२ता२३४औ-
२ २ १२ ३ १ १ १ १
होवा। अशीमही२३४५ ॥२३॥

४ २ ४ २ १२ २ १२
II इन्द्रक्रतूंन्नआभरा। पितापुत्रेभियोयथा। शि-
२ २ १ २२ १ २
क्षाणो२३आ। स्माइन् पुरुहू। तयामा१नी२। औ
१ २ ५ २२ १२
२। हो२। हुवाइ। औ३हो२३४वा। जीवाज्यो-
२ १२ २ १
२३तीः। अशीमा२३हा३४३इ। ओ२३४५इ। डा ॥ २४ ॥

३ ४ ३ ४ ५ २ ३ २ ३ ५ २ २ ४२ ५
III इन्द्रक्रतुन्नआ। भराओ२३४वा। पितापू३त्रेभि-
४२ ५ ३ १ १ १ १ ४ ३२ ४ ३२ ४ ५ १ ५
योयथा। हु९२३४५। पितापुत्रेभियः। याथा२३४हा-

I,II,III वाय्यानाम्, इन्द्रस्य वा; संज्ञानानि, वाम्राणि, वासिष्ठानि वा।

४ ५ ४ ५ ३ ४ ५ र र १
इ। ग्राइश्वाणीआ। स्माइन पुरूहूतया। मानो२३४-
५ ४ ५ ४ ५ २ १ ५ ४ ५
हाइ। जीवाज्योतीः। अशो२३४वा। मापुहो६हाइ॥

॥२५॥ २७

हे "इन्द्र!" "नः" अस्मभ्यं "क्रतु" कर्म वा प्रज्ञानं वा "आभर" आहर। अपिच। "यथा पिता पुत्रेभ्यः" धनं प्रयच्छति तथा "नः" अस्मभ्यं "शिच" धनं देहि। हे "पुरुहूत!" बहुभिराहूतेन्द्र! "यामनि" यज्ञे (१) "जीवा" वयं(२) "ज्योतिः" सूर्यम्(३) "अशीमहि" प्रतिदिनं प्राप्नुयामः। [यद्वा। हे इन्द्र! भूतानि प्रकाशयितरिन्द्र! तथाच यास्कः—"इन्द्रइरां दृणातीति वेरां ददातीति, वेरां दधातीति, वेरां दारयत इति, वेरां धारयतइति वेन्दवे द्रवतीति, वेन्दौ रमत इति, वेन्धे भूतानीति वा तद्यदेनं प्राणैः सर्वैः समैन्धत्तदिन्द्रस्यैन्द्रत्वमिति विज्ञायते"(१०,८)-इति(४)। एवं गुण-विशिष्ट! परमात्मन्! त्वं क्रतुं कर्म स्व-विषय-ज्ञानं वा नः अस्मभ्यम् आभ-

(१)—यान्ति देवा यस्मिन् स यमो यज्ञः।

(२)—'जीवा जीवन्तो वयम्'-इति वि०।

(३)—'ज्योतिः ज्ञानम्'-इति वि०।

(४)—"इदं करणादित्याग्रयणः। इदं दर्शनादित्यौपमन्यवः। इन्दते वैश्वर्यकर्मणः। इन्छत्रूणां दारयिता वा, द्रावयिता वा, दरयिता च यज्वनाम्"-इति च नै० दै० ४,८।

अथाष्टम

रेभऋषिः।

१ २ ३ १ २ ३ १ २ ३ १ २
मानइन्द्रपरावृणक्भवानःसधमाद्ये।

१ २ ३ २उ ३ २ ३ १ २ ३ १ २
त्वन्नऊतीत्वमिन्नआप्यंमानइन्द्रपरावृणक्॥ ८॥ २८

५र १ २ २ १र २ ०
I मानइन्द्रा। परावा३र्णाक्। भवानः सधमा१द्वी-

२ १ रर २ २ १र र १
३याइ। त्वन्नऊतीत्वमिआपि२याम्। मानइन्द्रपरावृ-

२ ५
णा२१उवा२३। ऊ२४पा॥ २६॥

२र ४ ५ ४ ५र ३२ २र४ ५ २१र
II मानइन्द्रपरा। वृणाक्। मानइन्द्रा। परावा-

राहर प्रयच्छेत्यर्थः। तत्र दृष्टान्तः—पिता पुत्रेभ्यो यथा लोके विद्यां धनं वा प्रयच्छति तथा नोऽस्मभ्यं शिच्च विद्यां प्रयच्छ। हे पुरुहूत! बहुभिराहूतेन्द्र! यामनि सर्वैः प्राप्तव्ये अस्मिन् प्रकृते ब्रह्माणि जीवा वयं ज्योतिः परं ज्योति रशीमहि सेवेमहि॥ ७॥ २७

---

२८ ऋग्वेदस्य ६,६,२७,२।

I,II आङ्गिरस्य, अङ्गिरस्य वा सामनी द्वे।

२ १ २ऽ १ २ २ १ २
२३र्णाक् । भवा२नः साधमादा२३याइ । त्वन्नऊती२ ।
१ १२ २२१ २ १२
त्वमिन्ना२आपियाम् । मानाआ२३इन्द्रा । परावा२३
२ १
र्णा३४३क् । ओ२३४५इ । डा ॥ २७ ॥ २८

हे "इन्द्र"! "नः" हविषां प्रदातॄन् अस्मान् "मा परावृणक्" मा परित्याक्षीः (वृजी वर्जने रौधादिकः । लङि रूपं) तदेवाह त्वं नोऽस्माकं "सधमाद्ये" सह मादन-हेतुभूते यज्ञे सोम-पानाय भव । किञ्च । हे "इन्द्र"! नोऽस्मान् त्वमेव "ऊती" ऊत्या स्थापय । यद्वा । ऊती । व्यत्ययेन कर्त्तरि क्तिचा निपातितः त्वमेवास्माकं रक्षिता खलु । तथा "त्वमित्" (इदवधारणे) त्वमेव नोऽस्माकम् "आप्यं"(१) ज्ञातेयं त्वमेव बन्धुरित्यर्थः । अतएव मा न इन्द्रः परावृणगिति गतार्थः ॥

"सधमाद्ये"-"सधमाद्यः"-इति च पाठौ ॥ ८ ॥ २८

---

(१)—'आप्यम् ज्ञातव्यमित्यर्थः'-इति वि० ।

अथ नवमी ।

मेधातिथिर्ऋषिः ।

३ २ २   ३ १ २ ३ २   ३ २ ३ १ २
वयन्त्वासुतावन्तआपोनवृक्तबर्हिषः ।

३ १ २   ३ १ २   ३ १ २ ३   १ २
पवित्रस्यप्रस्रवणेषुवृत्रहन्परिस्तोतारआसते ॥९॥ २९

५ २ ४र ५र ४५   १ र २   १
I वयङ्का३त्वासुतावन्ताः । आपोनवृ । क्तवा२३र्हि-

२   १   १ १ २ १   २ ३ २ १   २ १
षाउ । वा२३ । पविन्नस्या । प्रस्रवणाइ । षुवृत्रा२३४-

५ ४   १   १र र २   १र
हान् । पा२३री । स्तोतारः । आसा२३४५ता६५६इ ।

३ १ १ १ १
आ२३४५ष् ॥ २८ ॥

४र ५र ४   ५ ४ ५ र   र४ ५   ४र ५र ४   १र
II औहोवा । वयन्त्वासुतावन्तः । औहोवा । औ

र र   २ २   १ र
होइ । आपोनवृक्तबर्हिषः । पवाइत्रा३स्या । प्रस्रवणे-

---

२९ उत्तरार्च्चिकस्य २,२,१२,१ = ऋग्वेदस्य ६,३,७,१ ऊहे हि०१८—च०८—न०६—उन०हि०७ ।

I आष्-कार-णिधनं काण्वम् ।

II महावैष्टम्भम् ।

१ २ २ र १र र र
षुवा१त्रा२हान् । औहो३इ । औहोइ । परिस्तोता-
र र २ २ २र २१ २ ४ ५
रआसते । पराइस्तो३ता । रआसता । औ३होवा ।
४
होपुइ । डा ॥ २९ ॥

५र ४ ५ ४ ५ ४ ५ ३
III औहोहोहाइ । आइही । वायाम् । घा२३४-
५ २ ३ ३ २ ३ ५ २र २
त्वा । सुतावा२३४ताः । आपोना२३४वृ । क्तावर्हिषाः ।
२र १ ३ ५ २ ३ ५ २ ३
एहोइ । आ२३४इही । पावित्रा२३४स्या । प्रास्रावा-
५ २र १ २र १ ३ ५ २
२३४णे । षुवृत्रहान् । एहोइ । आ२३४इहो । पा-
३ ५ ३ २ ४ १ २ ३ ५
रिस्तो२३४ता । रआ३सापुता६पु६इ । आ२३४भी ॥ ३० ॥

५ ४ ५ ४ ५ र ४ ५ १ र२
IV वयन्त्वोहाइ । सुतावन्तोवा । आपोनवृ । क्ता-
१ २ १ २ २ १ २ १ २र
वार्हो१इषा२३ः । होवा३हाइ । पवित्रस्यप्रस्रवणे । षु-

---

I,II आभि-निधनं काण्वम् ।

IV महावैष्टम्भम् ।

अथ दशमी।

भरद्वाजऋषिः*।

१ २ ३१ २ ३ १र २र ३ १ २ ३ १ २
यदिन्द्रनाहुषीष्वाओजो†नृम्णञ्च कृष्टिषु।

१ २ १ २ २ १ २ १
वा३ं१हा२३न्। हेोवा३हाइ। पराइस्तो१त्ता२३। हो-

२ २ १ १ २ ५र र २
वा३हा। रश्मा२३। सा२ता२३४औहोवा। दी२३४-

५
ष्पाः ॥२१॥ २९

हे "वृत्रहन्" "त्वा" त्वां वयं "व" खलु "सुतवन्तः"(१) सोममभिषुतवन्तः "आपोन" आपइव प्रवण मभिगच्छामः(२)। "पवित्रस्य" सोमस्य प्रस्रवणेषु "वृक्तबर्हिषः" स्तीर्ण-बर्हिषः स्तोतारश्च त्वां पर्युपासते॥ ८॥ २९

* 'संयुराह'-इति वि०।

† "आ९ ओजो"-इति ऋक्पाठः।

(१)—क्वचित् सुतावन्त-इति दीर्घः श्रूयते।

(२)—"एतदुक्तम् भवति। यथा आपः नदीनिर्झरेण स्थानेषु द्वीपं परिवार्य्य अवतिष्ठन्ते तद्वद् वयं स्तोतारश्च त्वां परिवार्य्य अवतिष्ठाम इत्यर्थः"-इति वि०।

२ १ २ ३ २ ३ १२ २२ ३१२ २२ ३ १ २
यद्वापञ्चक्षितीनांद्युम्नमाभरसत्राविश्वानिपौꣳस्या ॥१०॥३०

॥ इति द्वितीय-दशति ॥

५र र ४ ५ ४र ५ र. ५ १
I औहोइ। यदिन्द्रना। हुषीषुद्दवा। ओजो२-

१
नाम्णा२म्। चक्रुष्टि। षु। ऐ२हौ१आइहो२। हा-

१ २ १ र १
२ऊऊवाइ। या१द्वा२पाञ्चा२। क्षितीनाम्। ए२हौ-

१ ३ १ र २ १
१आइहो२। हा२ऊऊवाइ। द्युम्नमाभ। रा। ऐ२-

हे "इन्द्र"! नाहुषीषु [नहुषइति मनुष्यनाम नि०२,३,९] तत्सम्बन्धिनीषु(१) "कृष्टिषु"(२) प्रजासु (आकारः समुच्चये) यच्च "ओजो" बलं "नृम्णं" धनं च विद्यते। "यद्वा" यच्च "पञ्च" पञ्चानां "क्षितीनां"(३) निषादपञ्चमाश्चत्वारो वर्णाः पञ्च

---

३० ऋग्वेदस्य ४,७,२८,२।

I औष्टीगवम्।

(१)—'नहुषइति मनुष्यनाम नि० २,३,९, तेषु भवो नाहुष्यः, मनुष्य-जातीया-स्तास्तावान्तर-जातीयाभिप्रेता, ते यचरक्षोगन्धर्वादयः, तासु,-इति वि०।

(२)—'कृष्टिषु मनुष्येषु च' (नि०२,३,७)-इति वि०।

(३)—'क्षितय इत्यपि मनुष्यनाम (नि० २ ३,६)। पञ्च च ते क्षितयश्च। कतमे पुनस्ते ? चत्वारो वर्णाः, निषादः पञ्चमः।

१ २ १
हौ१आइहौ२। हा२ऊऊवाइ। सा१ना२वाइस्वा२।
१र १
निपौंऽसि। या। ए२हौ१आइहौ२। हा२ऊऊवा-
३ ५र र ३ ५
२। या२३४औहोवा। ऊ२३४पा॥२२॥ ३०

च्चितयः तथा स्वभूतम् "द्युम्नं" द्योतमानमन्नं तत्सर्व मस्मभ्यम् "आभर" आहर प्रयच्छ। तथा "सना"(४) महान्ति "विश्वानि" सर्वाणि "पौंस्या" पौंस्यानि बलानि(५) चास्मभ्य माहर॥ १०॥ ३०

इति श्रीसायणार्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने तृतीयस्याध्यायस्य तृतीयः खण्डः॥ ३॥

---

अथ चतुर्थे खण्डे—

सैषा प्रथमा।

मेधातिथिर्ऋषिः।

३ २ ३ १र २र३ १ २ ३ २
सत्यमित्थावृषेदसिवृषजूतिर्नोऽविता।

---

(४)—'यद्यपि सनाशब्दः अन्न-नामसु पठितः, तथापीह सर्वदा-शब्द-प्रयोगे द्रष्टव्यः। तथाच सर्वदा इत्यर्थः।

(५)—'पौंस्यानि'-इति निघण्टौ बल-नामसु चतुर्विंशतितम् पदम् (२,९)। सुपां-सुलुगित्यादिना चाले च पौंस्या इति।

क २१　　३ १ २ ३ २ ३ १ २　　३ १ २ ३ १
वृषाह्युग्रशृण्विषेपरावतिवृषोअर्वावतिश्रुतः ॥ १ ॥ ३१

५ ४ ५ ४र　　४　　१ र र
I सत्यमित्थावृ। षापूइदसाइ। बृषजूतिर्नोविता-
१र　०　　र १
र। वृषाह्युग्राशृ। ण्विषा२इ। परावताइ। वृषोर३-
२　१　२　१
र्वा। वताइश्रू२३ता३४३ः। श्रो२३४५इ। डा ॥३३॥ ३१ *

हे "उग्र" उद्गूर्णेन्द्र! त्वं "सत्यम्" "इत्था" इत्थं "वृषेत्" कामानां वर्षक एवासि। "वृषजूतिः"(१) वृषभिः सेक्तृभिः सोम-रसस्य सोढृभिश्चाहूतो "नः" अस्मान् "अविता" रक्षिता भवसि। "वृषाहि" सेचक एव "शृण्विषे" श्रूयसे। "परावति" दूरेऽपि(२) "वृषेव" कामानां सेचक एवासि। "अर्वावति" समीपेऽपि "वृषा" सेचक एव "श्रुतः" अश्रूयत ॥

"अविता" "अवृतः"-"इति च पाठौ ॥ १ ॥ ३१

---

३१ ऋग्वेदस्य ६,३,८,६ = आरण्यके च० द्वि० १८।

I इन्द्रस्य; वृषकम्।

(१)—'वृषजूतिः—जूतिर्गमनं ; (अवति गत्यर्थः) वृषस्येव गमनं यस्य स वृषजूतिः'-इति वि०।

(२)—निघण्टौ 'परावतः'-इति दूरनामसु पञ्चमं पदम्। ३,२६।

---

*॥ इति ग्रामे गेय-गाने षष्ठस्यार्द्ध-प्रपाठकः ॥

अथ द्वितीया ।

रेभऋषिः ।

२ ३ १ २ ३ २ ३ १ २ ३ १ २ १ २
यच्छक्रासिपरावतियदर्वावतिवृत्रहन् । अतस्त्वा-
३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
गीर्भिर्द्युगदिन्द्रकेशिभिःसुतावाꣳआविवासति॥२॥ ३२

५ २ ४ऽ ४र ५ १ २र १ २
I ओम् । यच्छक्रा३सीपरावती । यादर्वाव । तिवार्त्रा-
१ २ ऽ २ २ १र र
१हारन् । अता३ः । औ३हो३वा । त्वागीर्भिर्द्युग-
२ १ १ ३ ४र र
दिन्द्राके१शिभि२ः । सुता२३ । वाꣳ२आ२३४औहो-
२ १ रऽ १ ३ १ १ १ १
वा । ए३ । विवा२सती२३४५ ॥ १ ॥

४ ५ ४र ५ र ४ ५ ४ २र १ ७
II यच्छक्रासिपरावतियदोहाइ । र्वावा३ताइवृत्राहा

---

३२ ऋग्वेदस्य ६,६,२६,४ = आरण्यके ८० १—२इति द्वे ।

I,II द्यौते, हैंगते वा ।

३ २     ३र २          १     २          १ २
२३४न्। अता३४स्त्वागाइ। भाइद्यगदि। द्राके१-

१          १   ३    ५र र       १ र
शिभा२ः। सुता२३। वा७२आ२३४औहोवा। विवा-

१ ३ १ १ १ १
रसति२३४५॥ २॥ ३२

हे "शक्र" शत्रु-हनन-समर्थेन्द्र! "यद्" यदा "परावति" विप्रकृष्टे दूरे द्युलोक-देशे "असि" विद्यसे। हे "वृत्रहन्" वृत्रस्य हन्तरिन्द्र! "यद्" यदि वा "अर्वावति" अर्वाचीने तस्मादधस्तात् स्थिते तदपेक्षया समीपे देशेऽन्तरिक्षे भवसि तस्मादपि। "अतः" अस्माद्भूलोकाद्वा हे "इन्द्र"! "द्युगत्"(१) (गम्लृ, सृपृ, गतौ। क्विपि "गमः क्वा" विति अनुनासिक-लोपः। तुक्। "सुपां सुलुगिति" भिसो लुक्। द्युलोकं प्रति गच्छद्भिः स्वभासा-सर्वतोगच्छद्भिः "केशिभिः" केशवद्भिः हरिभिरिवस्थिताभिः "गीर्भिः" "त्वा" त्वां "सुतवान्" अभिषुत-सोम-वान् यजमानः "आविवासति" आत्मीयं यज्ञं प्रति आगमयति। त्वामेतैः स्तोत्रैः परिचरति वा(२)॥ २॥ ३२

(१)—'द्युगत् क्षिप्रम्'-इति वि०। 'द्युगत्'-इति निघण्टौ क्षिप्रनामसु तयोर्विंशतितमम् पदम् (२, १५।

(२)—'रेभआत्मानमेव परोक्षरूपेण प्रतिनिर्दिशति। रेभोनामायमृषिः परिचरतीत्यर्थः' इति वि०।

अथ तृतीया।

वत्सऋषिः *।

२ १ २ ३ १र २र ३ १ २ २ २ ३ १र २र
अभिवोवीरमन्धसोमदेषुगायगिरामहाविचेतसम्।

३ २ ३ १ २ ३ २ ३ २ ३ १ २
इन्द्रनामश्रुत्यꣳशाकिनंवचोयथा ॥ ३ ॥ ३३

५ ४ ५ र र ४ ५ ४ २र १ १
। अभिवोवीरमन्धसाः। मदेषूꣳगाया२। गिरा-

३ १ २ ३ २ ४ ५ र ४ १ २र
माहा३। वीचेता२३४साम्। इन्द्रनामा। श्रुत्यꣳशा-

१ ३ ५र र २र १ ३ १ १ १ १
कार३इ। ना२३४औहोवा। वचोउपा२३४५ ॥ ३ ॥ ३३

इयं पिपीलिकमध्या(२) बृहतीति बह्वृचाः आद्यन्त्यौ पादौ त्रयोदशाक्षरौ, मध्यमोऽष्टाक्षरइति त्रिपदा। [हे उद्गात्रादयः! "वः" यूयम् (अथवा हे यजमानाः वो युष्माकं) "हिताय" "अन्धसः"

---

* 'वसुर्नाम ऋषिः'-इति वि०।

---

३३ ऋग्वेदस्य ६,४,३,४।

I कात्तीयशं, कात्तविशं वा।

(२)—'पिपीलिकमध्येत्यौपमिकम्, पिपीलिका पेलते र्गतिकर्मणः'-इति यास्कः दै० १, १६।

अथ चतुर्थी ।

भरद्वाजऋषिः* ।

२ २ ३ १ २ ३२ ३१२ ३ १२
इन्द्र त्रिधातु शरणन्त्रिवरूथꣳ स्वस्तये† ।

३१२ ३१२ ३१२ ३१२ ३१२
छर्दिर्यच्छ मघवद्भ्यश्च मह्यञ्च यावया दिद्युमेभ्यः ॥४॥३४

४ ४ २१२ २१
I इन्द्रत्रिधा४तुशरणाम् । त्रिवरूथꣳसुवस्तयाइ ।

सोमस्य "मदेषु" उत्पाद्यमानेषु सत्सु "वीरं" शत्रूणां वीरयितारं । "नाम" शत्रूणां नामकं । "विचेतसं" विशिष्ट-प्रज्ञं "श्रुत्यं" सर्वत्र श्रोतव्यं स्तुत्यं(३) । "शाकिनं" शक्तिमन्तम्(४) ईदृशम् "इन्द्र" ! "मह्रा"(५) महत्या "गिरा" स्तुत्या "वचो" वाग्युक्त-

* 'संयुराह'-इति वि० ।

† "स्वस्तिमत्"-इति ऋग्वेद पाठः ।

३४ ऋग्वेदस्य ४,७,१८,४ ।

I इन्द्रस्य शरणम् ।

(३)—विवरणकारस्त्वेवं व्याचष्टे— कमिव स्तुहि ? उच्यते—'श्रुत्यं वचो यथा' श्रुतौ भवं श्रुत्यं, वचः वचनम् । यथा कश्चित् श्रुतौ भवं वचनं सत्यार्थत्वेन स्तौति तद्वत् स्तुहीत्यर्थः ।

(४)—शकनं शाकः शक्तिः, सा यस्यास्ति, तम् ।

(५)—'मह्यः' इति निघण्टौ महन्नामसु प्रथमं पदम् ३, ३, सुपां सुलुगित्याले-रूपम् ।

२ १ २ १ ७ २ र
छर्दिर्या२३च्छा। माघवद्भ्यः। चामह्या२३च्चा। या-
१ २ १ १ २ ४ ५ ४
वया२३दी। द्यूमे२भिया। औ३होवा। होप्इ।
डा ॥ ४ ॥ ३४

दीया "यथा" येन प्रकारेण प्रवर्त्तते गायत्र्या त्रिष्टुभा वा तथा "गाय" गायत स्तुतिं कुरुत ॥ ३ ॥ ३३

हे "इन्द्र"! "त्रिधातु" त्रिप्रकारं त्रिभूमिकं(२)। "त्रिवरूथं" त्रयाणां शीतातपवर्षाणां वारकं(३)। "स्वस्तये" अविनाशाय "छर्दिः" छर्दिष्मत् आच्छादन-युक्तम्। एवं-गुण-विशिष्टं "शरणं" गृहं(४)। "मघवद्भ्यश्च" मघं हविर्लक्षणं धनं तद्वद्भ्यश्चास्मदीयेभ्यो यजमानेभ्यः "मह्यं" भरद्वाजाय "च" "प्रयच्छ" देहि। अपिच। "एभ्यः" सकाशात् "दिद्युं" शत्रु-प्रेरितं द्योतमान मायुधं(५) "यवय" पृथक्कुरु ॥ ४ ॥ ३४

---

(२)—'धातुशब्देन रसा उच्यन्ते। त्रयो रसाः, देव-पितृ-मनुष्योपभोग्याः। अथवा धातवः, काम-क्रोध लोभादय स्तैर्विमुक्तम्। अथवा सुवर्ण-रजत-माणिक्यैः त्रिभिः धातुभिः युक्तं यत् त्रिधातु-शरणं गृहम्'-इति वि०।

(३)—तत्र ग्रीष्म वर्षा-हेमन्तेषु चन्दनागुरुकुङ्कुमादिरूपम् विवरण-सम्मतम्।

(४)—'छर्दिरिति यद्यपि गृहनामसु (नि० ३,४,१८) पठितम्, तथापि शरणमित्यनेन पौनरुक्त्य-प्रसङ्गात् क्रियानिमित्तं द्रष्टव्यम्। छर्दिर्दीप्तिदेवनयो रित्येतस्य दीप्त्यर्थस्येदं रूपम्। समृद्ध्या दीप्तमित्यर्थः'-इति वि०।

(५)—'दिद्युत्'-इति वज्र-नामसु प्रथमं पदम् (नि० २, २०)। 'दिद्युं देय मस्मभ्यम्'-इति वि०।

अथ पञ्चमी ।

नृमेधऋषिः* ।

१ २ ३ २ ३ १र २र
आयन्तइवसूर्यं विश्वेदिन्द्रस्यभक्षत ।
१ २ ३ १र २र ३ १ २ ३ १ २ ३ १र २र
वसूनिजातोजनिमान्योजसाप्रतिभागन्नदीधिमः† ॥५॥३५

५र ५र ५ १
I आयन्तीयम् । आयन्तइवसू४रायाम् । विश्वा२-

हे अस्मदीयाजनाः ! "आयन्तइव सूर्यं" यथा समाश्रिता रश्मयः "सूर्यं" भजन्ते तथा "इन्द्रस्य" "विश्वेत्" विश्वान्येव धनानि "भक्षत" भजत । स च यानि "वसूनि" धनानि "जाते" उत्पन्ने "जनिमानि" जायमाने जनिष्यमाणे च "ओजसा" बलेन करोति अतो "भागं न" पितुः भागमिव तानि धनानि "प्रति-दीधिमः" प्रतिधारयेमेति [यद्वा । 'आयन्तइव सूर्यं' यथा समा-

* 'नृमेधस्यार्षम्'-इति वि० ।
† "दीधिम"-इत्यपि पाठः क्वचिदृग्वेदीय-पुस्तके दृश्यते ।

३५ उत्तरार्च्चिकस्य ५,२,१४,१ = ऋग्वेदस्य ६,७,३,२ = ऊहे प० द्वि०८—१४ द्०द्वि०२=ऊह्ये द्वि०१६—१८—द्व० द्वि०७ ।

I आयन्तीयम् ।

१ १ १ २ २ २ १२ २२
इदिन्द्रा२। स्वभा२त्ताता। वासूनिजातोजनिमा।

१ २ १ २२ १ ३२ १ २
नियोजा१सा२। प्रतिभागन्नदो२धिमः। प्रा२३तो।

२ २ २ १२ ३ २ १ ५ २ २ १
भागान्ना३दा। ऊम्। धिमा३ः। ओ२३४वा। हे२३-

२ १
४५॥ ५॥ ३५

श्रिता रश्मयः सूर्यमुपतिष्ठन्ते तथा "इन्द्रस्य" "विश्वा" विश्वानि धनानि विभक्तुमिच्छन्तः समाश्रिता मरुतः इन्द्रमुपतिष्ठन्त इति शेषः। उपस्थाय च मरुतो 'वसूनि' उदक-लक्षणानि धनानि "जाते" जायमानाय "जनिमानि" जनिष्यमाणाय(१) मनुष्याय "ओजसा" बलेन "भक्षत(२)" विभजन्ते। तत्र चास्माकं यो भागः तं "भागं" (नेति सम्प्रत्यर्थे) प्रतीत्येषः अनुद्रश्येतस्य स्थाने। "अनु-दीधिमः" वयमनुध्यायेम(३)। [तथाच यास्कः—(नै०६,८) "स-माश्रिताः सूर्यमुपतिष्ठन्तेऽपिवोपमार्थे स्यात्सूर्यमिवेन्द्र मुपतिष्ठन्त

(१)—'जाते'-'जनिमानि' इत्येते प्रथमैकवचने चतुर्थ्येकवचनस्य स्थाने द्रष्टव्ये। जाताय, जनिष्यमाणाय च भूतग्रामस्यार्थाय इति वि०।

(२)—धातोऽयं भक्षि वि-पूर्वो द्रष्टव्यः।

(३)—'यथा कश्चित् पित्र्यस्य चार्थस्य साधारणस्य भागं ध्यायति, तद्वद्वयं तानि विभज्यमानानि उदकानि अनुध्यायामः'-इति वि०।

अथ षष्ठी ।

पुरुहन्मा ऋषिः ।

२　१ २　　३ १र २र　　३ १ २
नसोमदेवआपतदिषन्दीर्घायोमर्त्त्यः ।

१ २　　३ १र २र ३ १ २ ३ २ ३　१ २　३ १ २
एतग्वाचिद्यएतशोयुयोजतइन्द्रोहरी*युयोजते ॥ ६ ॥ ३६

३ ४र ३ ४र ५ र　　२　२　　१
I नसोमदेवआ । हाउहाउइ । पा२३४ । तत्पतो-

५　　१　　१र　　१ ७
वा । इषऽहोरइ । दोर्घाहो२ । योमर्त्तायार: ।

इति सर्वोणेन्द्रस्य धनानि विभज्यमाणाः स यथा धनानि विभजति जाते जनिष्यमाणे च तं वयं भागमनुध्यायामोजसा बलेनेति ॥

"जनिमानि" "जनिमानः"-इति च पाठौ ॥ ५ ॥ ३५

---

* "हरीइन्द्र"-इति व्यतिक्रमपाठश्च ऋग्वेदीयः ।

---

३६ ऋग्वेदस्य ६,५,८,२ ।

I वाम्रम्, आचीलं वा ।

१ २र १ २ ३ ३ २
आइतग्वाचित्। यआइताशो। युपाउवा३। ऊ३४-
५ १ १ १ १ १
पा। जता२इ। आइन्द्रो२हारी२। युयो२३। जा-
२ ५र र २ ५
२ता२३४औहोवा। ऊ२२३४पा॥ ६॥ ३६

हे "दीर्घायो"! नित्येन्द्र! सः "अदेवः" इन्द्राख्य-देव-रहितः "मर्त्यः" मरण-धर्मा मनुष्यः "सीं" सर्वं(१) "इषम्" अन्नं "नापतत्" न प्राप्नोति। "योमर्त्यः" यस्येन्द्रस्य "एतग्वाचित्" एतवर्णाविवाश्वौ भवतोऽभिमत-देश-गमनाय सः "एतशः" एतशौ(२) "युजोजते" योजयति रथे, यज्ञं गन्तुम्। (यश्चेन्द्रो हरी युजोजते न स्तौति स न प्राप्नोतीति समन्वयः।

"आपतत्"-"आपद्"इति च पाठौ। "एतशः"-"एतशाः"-इति पाठौ॥ ६॥ ३६

(१)—'सीमिति पदपूरणः'-इति वि०।

(२)—इषमिति निघण्टौ अन्ननामसु चतुर्दशम् पदम् (२, ७)।

(३)—'एतग्वा'-इति निघण्टावश्वनामसु नवमम् पदम्; 'एतश'-इति च दशमम्।

अथ सप्तमी ।

नृमेध-पुरुमेधावृषी ।

२ ३ १ २ ३ २ ३ १ २ ३ १ २
आनोविश्वासुहव्यमिन्द्रꣳ*समत्सुभूषत ।

४र ५ ४ ५ २ १ १
I आनः । एविश्वा । सुहाव्या२म् । आइन्द्रꣳ
२ १ २ २ ३ ५ २ २ १ २र
सम । त्सुभू१षाता । ऊ२३४पा । हा३हाइ । ब्रह्मा-
२ २र ३ २ १ २ १ २ १ २
णिसवना । निवृत्रहान् । परमा२३ज्याः । आर्चा३-
२ १ २ ४ ५ ४
हाइ । षमा । औ३होवा । हो५इ । डा ॥ ७ ॥

५र र र र ४ ५ १ र र
II आनोविश्वासुहाहाव्याम् । इन्द्रꣳसमत्सुभूषतो ।
२ २ १ २ १ २ १ १
पब्रा२३ह्मा । णिसवना । निवृत्रहान् । परमा२३ज्याः ।
१ २ ३ १ २ ४ ५ ४
आर्चा३हाइ । षमा । औ३होवा । हो५इ । डा ॥ ८ ॥

५र र र ४ ५ २ र
III आनोविश्वासुहाव्याम् । इन्द्राम् । समत्सभूषत ।

---

* "हव्यइन्द्र"-इति च ऋग्वेदीयः पाठः ।

---

I,II,III शाक्राणि वा, वासिष्ठानि वा, वैयश्वानि वा, आ-

३ १ २ ३ १ २ ३ १ २
उपब्रह्माणिसवनानिवृत्रहन्परमज्याऋचीषम* ॥ ॥३७

१ २ र ४ १ २
उपाब्रा१ह्मा२। णिसवनानिवृत्रहन्। परामा१ज्या २:।
१र २ १
ऋचीषा२३मा३४३। ओ२३४५इ। डा ॥९॥ ३७

हे स्तोतारः! "विश्वासु" सर्वासु असुर-युद्धेषु "हव्यं" सर्वैर्देवै रात्म-रक्षार्थं माह्वातव्यम्। एतादृशम् "इन्द्रम्" उद्दिश्य "नः" अस्माकं यज्ञे "ब्रह्माणि" स्तोत्राणि हवीरूपाण्यन्नानि वा "उपभषत" अलङ्कुरुत प्रेरयत। हे "वृत्रहन्" वृत्रस्यासुरस्य पापस्य वा हन्तः! "परमज्याः" युद्धेषु शत्रु-हननार्थं परमा अविनश्वरा ज्या मौर्वी यस्य तथोक्तः। यद्वा परमान् बलेन प्रकृष्टान् शत्रून् जिनाति हिनस्तीति परमज्याः हे "ऋचीषम"(१)! स्तुतिभि रभिमुखीकरणीयेन्द्र! एतादृशस्त्वं सवनानि प्रातः सवनादीनि त्रीणि "ब्रह्माणि" स्तोत्राणि च "उपभूषत" अलङ्कुरुत।

"भूशतः"-"भूशतु"-इति पाठौ। "वृत्रहन्"-"वृत्रहः" इति च ॥ ७ ॥ ३७

---

* "ऋचीषमः"-इत्युत्तरार्च्चिक-व्याख्यायां सायणाचार्य्यः।

---

३७ उत्तरार्च्चिकस्य ७,१,२,१ = ऋग्वेदस्य ६,६,१३,१ = जहे द०३—द्वा०२०।

श्वानि वा, शौल्कानि वा, सुम्नानि वा, द्युम्नानि वा, पृष्ठानि वा, यौक्ताश्वानि वा, सोमसामानि वा इमानि त्रीणि।

(१)—ऋचीषम इति हि ऋच स्तुतावित्यस्य रूपम्।

अथाष्टमी ।

वसिष्ठऋषिः* ।

१र २र　३ ० ३ ३ १ २　३ २
तवेदिन्द्रावमं वसुत्वंपुष्यसिमध्यमम् ।
३ १र २र　३ १ २　३ १ २ ३ १२
सत्राविश्वस्यपरमस्यराजसिनकिष्टागोषु वृण्वते ॥८॥३८

४ र　४　१　२　१　२
I तवेढिन्द्रा५वमंवसु । त्वंपुष्यसिमध्यमम् । सात्रा-
३　५　१ २ १ २ र　१ २ ३　५
वा२३४इश्वा । स्यापरमस्यराजसि । नकिष्टा२३४गो ।
१ ०　२　१ २ १　२र
षूवृण्वा२३ताइ । होवा३होइ । हो । वाद्दा३१उवा-
१ १ १ १
२३४५ ॥ १० ॥ ३८

हे "इन्द्र" ! "अवमम्" अधमं त्रपु सीसादिकं "वसु" धनं। यद्वा । भौमं वसु अवमं "तवेत्" तवैव । "त्वं"त्वमेव "मध्यमं"

---

* 'प्रगाथः इन्द्रमाह'-इति वि० ।

---

३८ ऋग्वेदस्य ५,३,२०१ = आरण्यके प्र०२०—२१—द्वि० ४—५ ।

I प्रजापतेः, निधनकामम् ।

अथ नवमी।

मेधातिथिर्मेध्यातिथिश्च ऋषिः।

१२र ३ १ २ ३ २ ३ २ ३ १ २
कयथक्वेदसिपुरुत्राचिद्धितेमनः।

१ २ ३ १ २ ३ १ २
अलर्षियुध्मखजकृत पुरन्दरप्रगायत्रा अगासिषुः॥९॥३९

५र २ र १ १ १र
I कयथा। कुवेदसा २इ। औहो २। औहोइ।

२ ५ २ १र २र १ १
औ३हो२३४वा। पुरुत्राचाइत्। धितेमना २ः। औहो-

१र २ ५ २ १ २र १
२। औहोइ। औ३हो२३४वा। अलर्षियू। ध्माख-

१ १र २ ५
जकृ २त्। औहो २। औहोइ। औ३हो२३४वा।

वसु रजतहिरण्यादिकम् आन्तरिक्षं वा "पुष्यसि"। "विश्वस्य" सर्वस्य परमस्योत्तमस्यापि रत्नादेर्दिव्यस्य वा वसुनो "राजसि" ईशिषे "सत्रा" सत्यमेव(१)। अपिच। "त्वा" त्वां "गोषु" निमित्तेषु "न किर्दूषवते" केऽपि न वारयन्ति॥ ८ ॥ ३८

---

३९ ऋग्वेदस्य ५,७,११,२।

I इन्द्रस्य।

(१)—'सत्रा'-इति निघण्टौ सत्यनामसु ततीयं पदम् (३,१०)। 'सत्रा सर्वदा'-इति वि०।

२ १　२र१　१　१र　२
पुरन्दरा । प्रगायात्रा२ः । औहो२ । औहोइ । औ-

२११११५　३२　१　३　५र　र　२१
३हो२३४वा । अगा३ । सा२इषू२३४औहोवा । सुम्र९-

१११११
सा२३४५ः ॥ ११ ॥

४५४४　१　२र१　२
II कुवाकुवा । यथा । कुवेदसाइ । ऊवाइ । औ३-

११११　२　१र　२र१　२
हो२३४५ । पुरुत्राचाइत् । हितेमनाः । ऊवाइ । औ-

११११　२　१　२र　१　२
३हो२३४५ । अलर्षियू । धाखजकृत् । ऊवाइ । औ-

११११　२　२　२र१　२
३हो२३४५ । पुरन्दरा । प्रगायात्राः । ऊवाइ । औ-

११११　३२　१　३　५र　र　२
३हो२३४५ । अगा३ । सा२इषू२३४औहोवा । सुम्रा-

१　११११
३९सा२३४५ः ॥ १२ ॥

२र　१　५　५　२र　१
III कयथकू३वाइदा२३४सी । पुरुत्राचित् । हिता-

---

II,III वसिष्ठस्य वा ; प्रियाणि त्रीणि ।

अथ दशमी।

कलिर्ऋषिः।

३१२ ३१र २र ३२३१२
वयमेनमिदाह्योपीपेमेह्वज्रिणम्।

२ १ २ १ २ २
इमा२३ना:। आलर्षि। युध्माखजकृ३त्। हाउवा।

१ २ र१ १ १ ३
पुरन्दा२३रा। प्रगायात्रा२ः। अगा२३। सा२इषूर-

५र र ३११११
३४औहोवा। सु२३४५॥ १३॥ ३९

हे "इन्द्र"! "क्व" कुत्र देशे "इयथ" गतवानसि पुरा? "क्वेत्" कुत्र वा "असि" भवसि इदानीं वर्त्तसे? "पुरुत्राचिद्धि" बहुषु हि "ते" त्वदीयं "मनः" सञ्चरति। हे "युध्मकृत्" युद्ध-कुशल!। "खजकृत्" युद्धस्य कर्त्तः(१) हे "पुरन्दर" असुराणां पुरां दारयितर्हे इन्द्र! "अलर्षि" आगच्छ(२)। "गायत्राः"(३) गान-कुशला अस्मदीयाः स्तोतारः "प्रगासिषुः" प्रगायन्ति स्तुवन्ति। (अलर्षीत्येतत् दाधर्त्यादौ(४)निपात्यते॥ ९॥ ३९

(१)—'खजे'-इति निघण्टौ सङ्ग्रामनामसु ऊनचत्वारिंशत् पदम् (२,१७)।

(२)—'अलर्षति'-इति निघन्तौ गति-कर्मसु दृश्यते (२,१४)।

(३)—'मन्त्राः'-इति वि०।

(४)—दाधर्त्ति दर्धर्त्ति दर्द्धर्षि बोभूतु तेतिक्ते ऽलर्ष्या ऽऽपनीफणत् संसनिष्यदत् करिक्रत् कनिक्रदत् भरिभ्रत् दविध्वतो दविद्युतत् तरित्रतः सरीसृपतं वरीवृजत् मर्मृज्यागनीगन्तीति च (पा० ७।४।६४॥

१ २ ३ १र २र ३ २ ३ २ ३ १ १ ३ २
तस्माउअद्यसवनेसुत *भरानूनंभूषतश्रुते ॥ १० ॥ ४०

॥ इति तृतीय-दशति ॥ ३ ॥

५ र १ ३ ५र र ३
I वयमेनाम्। आ२इदा२३४औहोवा। हो२३४

५ १र२रर१ १ १
याः। अपोपेमेह्वज्रिणम्। तास्मा२उवा२। द्यसव-

७ र१र २ १ २र १
नाइ। सूतम्भारा२। आनूना२३भू। षातश्रुते। इ-

२ १
डा२३भा३४३। ओ२३४५इ। डा॥ १४ ॥

५ र १ १ २ १र २र
II वयमेनाम्। इदा२ह्याया:। अपौहोइ। पे-

१र ३ २र१ २ र १ २र १
मौहोइ। इ। ह्वावज्रिणाम्। तस्माउवा। द्यासव-

"वयं" यजमानाः "एनं" वज्रिणं वज्र-युक्तमिन्द्रं "इदा" इदानीं। "ह्यः" श्वः अतीतेऽह्नि। "इह" यज्ञाहर्गणे "अपीपेम"

---

* "समनासुतम्"-इति ऋग्वेदीयः पाठः।

---

४० उत्तरार्च्चिकस्य ८,२,१३,७=ऋग्वेदस्य ४,४८(३१), २=ऊहे षो० द्वि०५।

I,II इन्द्रस्य, वसिष्ठस्य वा वैरूपे।

२र १ २र १र २ १र २र १ २
नाइ। सूतम्भरा। आनौहो। नम्भौहो। षातश्रुता-

२ ५
३१उवा२३। ऊ३४पा॥ १५॥

४ ३ ४र ५ र ३ २ २ ५ ४ ५
III वयमेनमिदा। ह्यियें। ओ२३४वा। इयाहाइ।

२ १ १ र र र ० १ र
ऊवेहो२इ। अपीपेमे हावज्रिणा२म्। तस्माउअद्य-

७ ८ २ र १र ५
सवनाइ। सूतम्भारा२। ई३या। आनूना२३४भू।

२ १ २ १ १ १ १ १
षताश्रू२३४५ताइ५६इ। अवा३सा२३४५इ॥ १६॥ ४०

आप्यययाम(१) सोमेन। "तस्माउ" तस्मादेव "अद्य" अत्र "सवने" "सुतम्" अभिषुतं सोमं "भर" हर हे अध्वर्यो!। "नूनम्" इदानीं "श्रुते"(२) सति "आभूषत" अलङ्कुरुत॥ १०॥ ४०

इति श्रीसायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने तृतीयाध्यायस्य चतुर्थः खण्डः॥ ४॥

---

III इदश्चेन्द्रस्य वसिष्ठस्य वा वैरूपम्।

(१)—प्यायी श्रो प्यायो इद्वा वित्यस्य रूपम्।

(२)—'श्रुते सप्तम्येकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यं, श्रुताय विख्याताये त्यर्थः'-इति वि०।

अथ पञ्चमी खण्डि—

सैषा प्रथमा ।

पुरुहन्मा ऋषिः* ।

१र　२र　३२उ　३१२　३१२
योराजाचर्षणीनांयातारथेभिरध्रिगुः ।

१२　३१र　२र　३२३१२३२　३२
विश्वासान्तरुतापृतनानांज्येष्ठंयोवृत्रहागृणे ॥ १ ॥ ४१

२५र　२　४　४　५　१र१र　१२
I योराजा३चर्षणाइनाम् । याऽतारथे । भिराध्रा-

१　१　२　१२
१इगू२ः । ध्राइगू२ः । वाइश्वासा३म् । तरुता३ ।

१२　१२ ३　५　१　२र१
तरुता३ । पार्त्तना२३४नाम् । ज्याइष्ट्रयोवा । त्रा-

२ २　५　४　४
हागा२३४णोइ । त्रहापूगृणाइ । होपूइ । डा ॥ १७ ॥

---

* 'पुरुहन्मन आर्षम्'-इति वि० ।

† "ज्येष्ठो"-इति ऋग्वेदीयः पाठः ।

---

४१ उत्तरार्च्चिकस्य २,१,१५,१ = ऋग्वेदस्य ६,५,८,१ = ऊहे द्वि० द्वि०१४—स०द्वि०७—अ०१०द्वि०१२ ।

I पौरुहन्मनम् ।

अथ द्वितीया।

भर्गऋषिः।

१ २ ३ १ २ ३ १ २ ३ १ २
यतइन्द्रभयामहेततोनोअभयंकृधि।

३२ २ ४२ ५ ३ २ ५ १२ २ २ २ १
II योराजाच। षणा३२३४इनाम्। यातारथेभिर-

२ १ २ २ २ २ २ १
ध्रा२३इगुः। विश्वासान्तरुतापृतना२३नाम्। ज्या२३इ-

२ १ २ १ २ १ ५ ४ ५
ष्ठाम्। योवृत्रहोवा३ओ२३४वा। गापृणाँई३हाइ॥१८॥४१

"विश्वासां" सर्वासां "पृतनानां" सेनानां "तरुता"(१) तारकः। यश्च ज्येष्ठः गुणैर्गरीयान्। "यः" च "वृत्रहा" वृत्रं हतवान्। तं "ज्येष्ठं" सर्वैः रतिशयेन प्रशस्यम् अधिकं वृद्धं वा महाभाग मिन्द्रं "गृणे" स्तौमि॥ १॥ ४१

---

II प्राकर्षम्।

(१) — "ग्रसित-स्कभित-स्तभितोत्तभित-चित-विकस्ता विशस्तृ-शंस्तृ-शास्तृ-तरुतृ-तरूतृ-वरुतृ-वरूतृ-वरुत्री-रुज्ज्वलिति-क्षरिति-क्षमिति-वमित्यमितीति च (पा०७।२।३४)"-इति सिद्धम्।

१ २　　३ २उ　३ १ २ ३ २ ३　२उ　३ १र　२र
मघवञ्छग्धि तवतंनऊतये*विद्विषोविमृधोजहि ॥२॥४२

५ २ ४ ५४र ५ १र र २
I यतआ३इन्द्राभयामहाइ। ततोनोअभयङ्का२३इँ।
१ २ १र २ १ २ १
मघवंछग्धितवतन्नऊता२३याइ। विद्वाइषो२३वो। मा-
र २ १ २ १
इँजहि। इडा२३भा३४३। ओ२३४५इ। डा ॥१८॥४२

हे "इन्द्र"! "यतः" हिंसकात् "भयामहे" वयं "ततः" "नः" अस्मभ्यम् "अभय" "कृधि" कुरु। हे "मघवन्"! "शग्धि"(१) शक्तो भवसि "नः" अस्मभ्यमभयं कर्त्तुं। "तव" "ऊतये" रक्षणाय "विजहि" "द्विषः" अस्मद्द्वेष्टॄन्। "मृधः" अस्मद्धिंसकान्(२) "वि" जहि(३) ॥ २ ॥ ४२

---

* "ऊतिभिः"-इति ऋग्वेदीयः पाठः। उत्तरार्च्चिकभाष्ये सायण-सम्मतश्च।

---

४२ उत्तरार्च्चिकस्य ५,२,१५,१ = ऋग्वेदस्य ६,१,२४,४ = ऊहे प० द्वि०१०।

I इन्द्रस्य; अभयङ्करम्।

(१)—'शग्धि याचामहे तव स्वभूतं तत् अभयम्'-इति वि०। 'शग्धि'-इति निघण्टौ याच्ञाकर्मसु पञ्चमं पदम् (३,१९)।

(२)—मृध इति सङ्ग्राम-नाम (नि०२,१७,२)। मृधं करोति, "तत् करोति"-इति णिच्, मृधयति-ण्यन्तात् क्विपि रूपं साध्यम्।

(३)—वीत्युपसर्गश्च तेर्जहीत्याख्यातात्रासः।

अथ तृतीया ।

द्वरिमिठऋषिः* ।

१ २ ३ १र २र ३ १ २
वास्तोष्पते ध्रुवा स्थूणा ऽसत्रꣳ सोम्यानाम् ।

३ २ ३ २ ३ १र २र ३ २ ३ १ २ ३ १ २
द्रप्सः पुरां भेत्ता शश्वतीनामिन्द्रो मुनीनाꣳ सखा ॥ ३ ॥४३

५र र २ १ २ ३ ५ १
I वास्तोष्पताइ । ध्रुवा । स्थूणाओ२३४वा । अꣳ-

२ र १र ५र १ र र २
सत्रꣳसोम्यानार्म् । द्रप्सः पुराम्भेत्ताशश्वता२३इनाम् ।

३ ५ १र ५र
आर२३४इन्द्राः । मुनीर । ना३१उवा२३ । सा२३४

५
खा ॥ =० ॥

३र ४र ५र र ३र २ १ ५ र
II वास्तोष्पतेध्रुवा । स्थुणाइ । आर२३४ । सत्रꣳसो ।

---

* "इरिमिरि"-इति वि०-पाठः ।

† "भेत्तापुरां"-इति व्यतिक्रमेण पाठः ऋग्वेदीयः ।

---

४३ ऋग्वेदस्य ६,१,२४,३ ।

I,II काविषे द्वे ।

४र ५　　　२ १ र र र　　　　२　　१
म्यानाम्। द्रप्सःपुराम्भेत्ताशश्वतार३इनाम्। आर२३-

२　१ ऽर　१　५　३　५
इन्द्राः। मुनीर। नोर३४वा। सार३४खा॥ २१॥ ४३

हे "वास्तोष्पते"(१) गृहपते! "स्थूणा" गृहाधारभूतस्तम्भः "ध्रुवा"(२) स्थिरा भवतु। "सोम्यानां" सोमार्हाणां सोम-सम्पादिनां वास्माकम् "अंसत्रम्"(३) अंसत्राणं अंसोपलक्षितस्य कृत्स्नस्य शरीरस्य त्रायकं बलं भवतु। अपिच। "द्रप्सः" द्रवण-शीलः सोमः तद्वान् [अर्श आदित्वादच् प्रत्ययः(४)] "शश्वतीनां"(५) बह्वीनां "पुराम्" असुर-पुराणां "भेत्ता" विदारयिता एवंभूतः "इन्द्रः" "मुनीनाम्" ऋषीणामस्माकं "सखा" मित्रभूतो भवतु॥ ३॥ ४३

---

(१)—'वास्तोष्पति वास्तु वसते निवासकर्मणस्तस्य पाता वा पालयिता वा'-इति नि० दै०१०,१६।

(२)—'ध्रुवा स्थूणा' लुप्तोपममेतद् द्रष्टव्यम्। ध्रुवा स्थूणा इव यथा गृहस्य ध्रुवा स्थूणा आश्रयभूता तद्वत् त्वमाश्रयभूत इत्यर्थः'-इति वि०।

(३)—'अंसत्रम्' एतदपि लुप्तोपमम्। अंसत्रमिव अंसत्रं धनुः कवचं वा। यथा शत्रूणां जेतृ पालयितृ वा तद्वत् त्वं जेता पालयिता चेत्यर्थः'-इति वि०।

(४)—"अर्शआदिभ्य अच् (५,२,१२७)"-इति पा०।

(५)—'शश्वत्'-इति निघण्टौ बहुनामसु पञ्चमम् पदम् (३,१)।

अथ चतुर्थी ।

जमदग्निर्ऋषिः ।

२ १ २ ३ १ २ ३ १ २
बण्महाँ असि सूर्य्य बडादित्य महाँ असि ।
३ १ २ ३ १ २ ३ १ २ २ ३ १ २ ३ १ २
महस्ते सतो महिमा पनिष्टम मह्ना* देव महाँ असि॥४॥४४

५ २ ४ ५र १ र २ १ २
I बण्महाँ ३ असिसूर्या । बाडादित्य । महाँ आ-
२ ४र २र ४ २र ४ ५ २ २
१सा२३४इ । महस्तेसतोमहिमापनि । ष्टा३मा । म-
१ २ २ १ ५ ४ ५
ह्नादा२३इवा३ । महो२३४वा । आ५सो६हाइ ॥२२॥४४

(अत्र शौनकः—"बण्महामिति दृष्ट्वार्कमुपतिष्ठेदृचो जपन् । वदन्नप्यनृतां वाणीं नानृतेन स लिप्यते"-इति) हे "सूर्य्य" ! (१)प्रेर-

* "अह्ना"-इति च ऋग्वेदीयः पाठः ।

४४ उत्तरार्च्चिकस्य ८,१,९,१ = ऋग्वेदस्य ६,७,८,१ = आरण्यके द्वि०१२ = ऊहे एका० ट० ५ — त्रयो० ट०६ = ऊह्ये द्वि०१४ ।

I सूर्य्यसाम ।

(१)—"सूर्यः सर्त्ते र्वा सुवते र्वा स्वीर्य्यते र्वा"-इति नि०दै०१२,१४ : 'सुष्ठु ईरयिता नाशयिता शत्रूणां सूर्यः'-इति वि० ।

अथ पञ्चमी।

देवातिथिर्ऋषिः।

३ २ ३ १ २ ३ २उ　　३　　१ २　　३ १ २
अश्वीरथीसुरूपइद्गोमाᳬ*यदिन्द्रतेसखा।
३　२ ३ १ २　　३ १ २ ३ १　२　　३ १र २र
श्वात्रभाजावयसासचतेसदाचन्द्रै+र्यातिसभामुप ॥५॥ ४५

केन्द्र! त्वं "महान्" तेजसाधिको "असि"। "बट्" सत्यं(१)। नैतन्मिथ्येत्यर्थः। हे "आदित्य" अदितेः पुत्र! (२)त्वं "महान्" बलेनाप्यधिकः "असि" "बट्" सत्यमेव। "महो" महतः "सतो" भवतः "ते" तव "महिमा" महत्वं "पनिष्टम" पनस्यते(३) स्तोतृभिः स्तूयते। हे "देव" द्योतनादि-गुण-युक्त! सूर्य! त्वं "मह्ना" महत्वेन वीर्येणाप्यधिको "असि" भवसि न संशयइत्यर्थः।

"पनिष्टम"-"पनस्यते"-इति पाठौ ॥ ४ ॥ ४४

---

* "गोमाᳬइदिन्द्र"-इति, †"चन्द्रो"-इति च ऋग्वेदीयः पाठः।

---

४५ ऋग्वेदस्य ५,७,२१,४।

(१)—'वट्'-इति सत्यनामसु प्रथमं पदम् नै०३,१०।

(२)—"आदित्यः कस्मादादत्तेरसानादत्ते भासं ज्योतिषा मादीप्तो भासेति वादितेः पुत्र इति वा। अल्प--प्रयोगं त्वस्यैतदर्चाभ्याम्नाये सूक्तभाक् सूर्यमादितेयमदितेः पुत्रम्। एव मन्यासामपि देवतानामादित्यप्रवादाः स्तुतयो भवन्ति तद् यथा"-इत्यादि वि०।

(३)—'पनस्यति'-इति वि०; पणते पनते वा तच्चैवार्च्चति--कर्मसु द्वात्रिंशत्तमं पदम्।

४ ५ ४ ५ २र १ २ १ र २
I अश्वीअश्वी। रथीसूश्रूपा१ई२त्। गोमा०ंयदिं।

१ २ १ १ १ र २१र
द्रातेश्साखा२। श्वात्रा२भाजा२। वयसासचतेसार३-

२ १ २ २ १ ४ २
दा। चन्द्राइर्या३तीइ। सा२३भा३म। ऊ३४५पोई-

५
हाइ॥ २३॥

५र र र ५ १र र र
II अश्वीरथीसुरूपाईइत्। गोमा०ंयदिन्द्रतेसखाउ-

१ १ २र १र र र र र
वा२३होवा२३हा२ईया। श्वात्राभाजावयसासचतेसदा-

१ १ १ १ र
उवा२३होवा२३हा२ईया। चन्द्राइर्या१ती२। साभा-

२ १ २ १
मुप। इडा२३भा३४३। ओ२३४५इ। डा॥ २४॥ ४५

हे "इन्द्र"! "ते" तव "सखा" मित्रभूतः पुरुषः अश्वयादि-गुण-विशिष्टएव भवति (इच्छब्दः प्रत्येक मभिसम्बध्यते) "अश्वी-इत्" बहुभिरश्वैरुपेतएव भवति न कदाचिदश्वैर्वियुज्यते। "रथी" रथवान् भवति। "सुरूपः" शोभन-रूपः शोभनावयवएव स

---

I,II वैश्वदेवे, आनूपे, वाध्र्यश्वे वा इमे हे।

अथ षष्ठी ।

पुरुहन्मा ऋषिः ।

१र २र ३ २ ३ १र २र ३ २
यद्यावइन्द्रतेशतꣳशतंभूमीरुतस्यूः ।

भवति । "गोमानित्" बह्वीभिर्गोभिर्युक्तएव स भवति न कदाचिदेतैर्वियुज्यतइत्यर्थः । अपिच "श्वात्रभाजा" (श्वात्रमिति धननाम(१) शु(२) आत्रम् अतनीयं शीघ्रं प्राप्तव्यं शोभनं धनं सम्भजता ईदृग्धन संयुक्तेन "वयसा" (अन्ननामैतत्(३) । अन्नेन सदा सर्वदा "सचते" समवैति सङ्गच्छते । अतएव "चन्द्रैः" सर्वेषामाल्हादकैः(४) स्तोत्रैः युक्तः सन् "सभां" जन-संसदम् "उपयाति" उपगच्छति ॥ ५ ॥ ८५

---

(१)—श्वात्रमिति निघण्टौ धन-नामसु षष्ठं पदम् (२,१०) । 'श्वात्रति'-इति गति कर्मसु च पठ्यते (२,१४) । 'श्वात्रमिति क्षिप्रनाम । क्षिप्रं यत् सम्भजते तत् श्वात्रभाक्, तेन श्वात्रभाजा, क्षिप्रं सम्भजतेत्यर्थः-इति वि० । एतच्च वयसेत्यस्य विशेषणम् ।

(२)—'शु'-इति क्षिप्रनामसु पञ्चदशम् ( नि०२,१५ ) ।

(३)—निघण्टौ अन्ननामसु 'वयः', 'सुतः', 'सुतम्'-इति पदत्रयं पाठभेदेन सप्तमम् पदम् (२,७) ।

(४)—'चन्द्रश्चन्दतेः कान्तिकर्मणश्चन्दनमित्यस्य भवति । चारुद्रमति, चिरं रमति, चमेर्वा पूर्वम् । चारुरुचेर्विपरीतस्य'-इति (नै० दै०११,५) ।

१ २ २ ३ ३ २ ३ २ ३ २ ३ १ २ ३ १ २

नत्वावज्रिन्त्सहस्रꣳसूर्या अनु न जातमष्टरोदसी॥ ६॥४६

२ १र ४ ५र २ १ र २ १

I यद्यावा२३इन्द्रतेशताम्। शतंभूमीरुतस्यू२ः। न-

र र र १ १ २ १

त्वावज्रिन्त्सहस्रꣳसूर्या अनू२। नाजा२तामा२३। ष्टरो-

५ ४ ५

२३४वा। दा५सो६हाइ॥ २५॥ ४६

हे "इन्द्र"! "ते" तव प्रतिमानार्थं "यद्" यदि "द्यावः" द्युलोकाः "शतं" शत-सङ्ख्याकाः स्युः तथापि नाप्नुवन्ति(१)। "उत" अपिच "भूमी" भूम्यः तव मूर्त्ति-प्रतिबिम्बाय शतं स्युः तथापि नाप्नुवन्ति। हे "वज्रिन्"! "त्वा" त्वां "सहस्रम्" अगणिता अपि सूर्याः नानुभवन्ति न प्रकाशयन्तीत्यर्थः (न तत्र सूर्यो भातीति श्रुतेः) किं बहुना "जातम्" पूर्वमुत्पन्नं किञ्चिदनु "न अष्ट"(२) नाप्नुते। तथा "रोदसी" द्यावापृथिव्यौ" नाप्नुवाते त्वं सर्वेभ्योऽतिरिच्यतइत्यर्थः ("ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवोज्यायानेभ्योलोकेभ्यः"-इति श्रुतेः॥ ६॥ ४६

---

४६ उत्तरार्च्चिकस्य २,२,११,१ = ऋग्वेदस्य ६,५,८,५—आरण्यके प्र०,१—२—३—६—५—६—७—८=ऊहे द्वावि० १८=प्र०७—प०१८—प०द्वि०१—१८।

I वैरूपम्।

(१)—अनुपदमेव व्याख्यास्यमानाष्टेति पदं नेति पदस्य समस्थानीयोच्यते नाप्नुवन्तीति।

(२)—'आष्ट', 'अष्ट', 'आष्टः', 'आष्टः'-इति पदचतुष्टयमेव निघण्टौ व्याप्तिकर्मसु पञ्चममिति पाठभेदेन पठ्यते (२,१८)। अतएव विवरणे 'नाष्ट' न व्याप्नुवन्तीत्युक्तम्।

अथ सप्तमी ।

देवातिथिर्ऋषिः ।

१ २ ३२उ ३ २क २र ३२३१ २
यदिंद्रप्रागपागुदङ्न्यग्वाहूयसेनृभिः ।
१ २ ३१र २र ३ २ ३ १ २ ३ १०
सिमापुरूनृषूतोअस्यानवेसिप्रशर्द्धंतुर्वशे ॥ ७ ॥ ४७

४ ५ ४र १ र र २ १र
I यदिंद्रप्रागपाक । उदाक । न्यग्वाहूयसनृभा २इः ।
१ र र रर २ १ ७ १ १
सिमापुरूनृषूतोअ । सियानवा २इ । आसी २प्राशा २ ।
१ २ १ ५ ४ ५
धतोवा३ओ२३४बा । वा५शोऽ६हाइ ॥ २६ ॥

५ र र ५ १ २र र १
II यदिंद्रप्रागपागुदा६गे । नायग्वाहू । यसाइनृ-

हे "इन्द्र"! "यद्" यदि "प्राक्" प्राच्यां दिशि वर्त्तमानैः (सप्तम्यन्ताद्दिक्शब्दाद्विहितस्य अस्तातेरञ्चेर्लुगिति लुक् । यदि वा "अपाक्" प्रतीच्यां दिशि वर्त्तमानैः यदि वा "उदक्" उदीच्यां दिशि वर्त्तमानैः । यद्वा "न्यक्" नीच्यां दिशि अधस्ताद्वर्त्तमानैः (न्यधीचेति नेः प्रकृति-स्वरत्वम् । उदात्त-स्वरितयोर्यणइति पर-

---

४७ उत्तरार्च्चिकस्य ५,१,१३,१ = ऋग्वेदस्य ५,७,३०,१ = ऊहे ४.२,१५ ।

I,II नैपातिथे द्वे ।

अथाष्टमी।

वसिष्ठऋषिः।

१र २र ३ १र २र
कस्तमिन्द्रत्वावस*वामर्त्योदधर्षति।

२ २ ३र ५ १ २र र र २रर १
भीइः। हा। औहो२३४हा। सिमा२पुरूनृषुतो।अ।
२ १ ० २ २र ५ १ २
सियानवे२३। हा। औहो२३४हा। असाद्रभ्रा३।
२ ३र ५ २ २ ५र र ३
हा। औहो२३४हा। धा२तू२३४औहोवा। वी२३
५
४शे॥ २७॥ ४७

स्यानुदात्तस्य स्वरितत्वम्। एवं भूतैः "नृभिः" स्तोतृभिस्त्वं "हूयसे" स्व-स्व-कार्यायाहूयसे ("हसिम श्रेष्ठे इसिमइति वै श्रेष्ठमाचक्षत्-इति" वाजसनेयकम्)। यद्यप्येवं बाहुभिराहूयसे तथापि "आनवे" अनु-नाम-राजा(१) तस्य पुत्रे राजर्षौ "पुरु" बहुलं "नृषूतः" नृभिस्तदीयैः स्तोतृभिः प्रेरितः "असि" भवसि। राज्ञो हित-करणे त्वां स्तोतारः प्रेरयन्तीत्यर्थः (षू प्रेरणे। अस्मात्कर्मणि निष्ठा। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वम्।) अपि हे "प्रशर्द्ध!" प्रकर्षेण शर्द्धयितरभिभवितरिन्द्र! "तुर्वशे" एतत्संज्ञे च राजनि "नृषूतः" नृभिः प्रेरितो भवसि॥ ७॥ ३७

---

* "त्वावसु"-इति ऋग्वेदीयः पाठः।

---

(१)—'अनवः' इति मनुष्यनामसु उनविंशं पदम् (नि० २,३)।

२ १र   २र   ३ १ २ ३ २ ३ १र २र
श्रद्धा हि ते *मघवान्पार्ये दिवि वाजी वाजꣳ सिषासति ॥८॥१८

५   १   १र र
I कस्तमिन्द्रा । त्वा २वासा २उ । आमर्त्यौदधर्ष-

२ र १   १ २ १र   २
ताइ । श्रद्धाहाइते २ । माघवन्पा । रियाइदा १इवी-

१र १र १   १   १   ५र र
२ । वाजावाजा २म् । सिषा २३ । सा २ता २३४ औहो-

२   ५
वा । ऊ २३४पा ॥ २८ ॥

३ ४ ५ र   ३ २   १   ५र
II कस्तमिन्द्रत्वा । वसा३ऊ । आ२३४ । मर्त्योदध ।

४ ५   २ र १   १ २ १र   २
षताइ । श्रद्धाहाइते २ । माघवन्पा । रियाइ । दाइवा-

---

* "श्रद्धाइत्ते"-इति च ऋग्वेदीयः पाठः ।

---

४८ उत्तरार्चिकस्य ८,२,९,१ = ऋग्वेदस्य ५,३,१९,४ = ऊहे १५,१८ !

I,II बृहतः कौमुदस्य सामनी द्वे ।

अथ नवमी।

भारद्वाज*ऋषिः।

१ २ ३ २ ३ १र २र ३ १ २
इन्द्राग्नीअपादियंपूर्व्वागात्पद्वतीभ्यः।
३ १र २र ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
हित्वाशिरोजिह्वयारारपच्चरत्त्रिꣳशत्पदान्यक्रमीत॥८॥४९

३ ५ ३ ५ ३र २र १ १
ओ२३४वा। ऊ२३४पा। वाजीवाजा२म्। सिषा२३।
१ ३ ५र २ ३ ५
सा२ता२३४औहोवा। ऊ२३४पा॥ ॥२९॥४८

हे "वसो" वासक! व्यापक! वा हे "इन्द्र"! तं प्रसिद्धं "त्वा" त्वां "कः" मर्त्यः "आदधर्षति आधर्षयेत्(१)। हे "मघवन्," "ते" त्वदर्थं यः "श्रद्धा" श्रद्धया युक्तः सन् "वाजी" हविष्मान् यजमानो भवेत्। "पार्य्ये दिवि" सोत्येऽहनि सः "वाजं"(२) हविर्लक्षणमन्नं "सिषासति" दातुमिच्छति(३)॥८॥४८

---

* "भरद्वाज"-इति वि०-पाठः।

---

४९ ऋग्वेदस्य ४,८,२६,१।

(१)—"कः तं यजमानं हे इन्द्र! 'त्वावसो' त्वमेव वसु धनं यस्य स त्वावसुः, त्वद्धन मित्यर्थः। आदित्ययं दधर्षतीत्याख्यातेन सम्बन्धयितव्यः। मर्त्यः मनुष्यः शत्रु रित्यर्थः। आदधर्षति, अभिभवति? न कश्चित् तमभिभवतीत्यर्थः"-इति वि०।

(२)—'वाजः'-इति अन्ननामसु द्वितीयम् पदम् (नि० २,७)।

(३)—'वाजं अन्नं सोमयागं करोतीत्यर्थः'-इति वि०।

५ र र र ५ १र ३ २

I इन्द्राग्नी अपादियाईमे। पूर्वागा२त्। पद्वताइभा-

१र ३र १ र र ७

१या२ः। हित्वाशिरो२जिह्वयारा। रापच्चारा२त्।

१ २ १ १ ३ ५र र ३

त्रिंशत्पदा। निया२३। क्रा२मा२३४औहोवा। ऊ२-

५

३४पा॥ ३०॥ ४९

हे "इन्द्राग्नी !(१)" "अपात्" पाद-रहिता "इयम्" उषाः(२) "पद्वतिभ्यः" पाद-युक्ताभ्यः" "सुपाङ्गाः" प्रजाभ्यः "पूर्वा" प्रथम-भाविनी सती "आगात्" आगच्छति। तथा प्राणिनां "शिरो" "हित्वा"(३) त्यक्त्वा स्वयं मशिरस्कापि "जिह्वया" प्राणिस्थया तदीयेन वागिन्द्रियेण(४) "राराणत्" भृशं शब्दं कुर्वती(५) "चरत्" एवं चरन्ती(६) उषाः त्रिंशत्पदानि" अवयव-भूतान् त्रिंशन्मुह-

---

I वाचःसाम।

(१) इन्द्रो वायुः स च, तत्सहचरितो वैद्युताग्निश्च इन्द्राग्नी, तथाहि—"वायुर्वेन्द्रो-वान्तरिक्षस्थानः (नै० दै० १,५)"—इति "अथैतानीन्द्रभक्तीनि * * * अथास्य कर्म * * * अथास्य संस्तविका देवाः अग्निः सोमो वरुणः (नै० दै० १,.१०) इत्यादि च।

(२)—"उषाः कस्मादुच्छतीति सत्याराव रपरः कालः (नै० नै० २,१८)" इति।

(३)—'शिरः आदित्यं विना, आदित्यादपि पूर्वमुदितेत्यर्थः' इति वि०।

(४)—'जिह्वेति वाङ्नाम (नि० १, ११) तया, जिह्वया वाचेत्यर्थः' इति वि०।

(५)—यदग्रे उषसः उदयवेलायां पक्षिणः शब्दं कुर्वन्ति तदुषस्युपचर्य्यते' इति वि०।

(६)—'चरत, इदमपि व्यत्ययेन लिङ्गं प्रति द्रष्टव्यम्, चरती आदित्योदयं प्रति गच्छन्तीत्यर्थः'—इति वि०।

अथ दशमी।

बालखिल्या ऋषयः*।

२ ३ १ २ ३ १ २   ३ १ २   ३ १ २
इन्द्रनेदीयएदिहिमितमेधाभिरूतिभिः।

४ ५ ४र५र ४र५   ४   ५ ४५र   र   २१र
I इन्द्रनेदीयएदि। हाइ। मितमे। धा। भिरू-

र   २   १ र २ १   र
तिभिः। आशन्ता२३मा। शन्तमाभिरभिष्टिभिः। आस्वा

२   १ २   ४   २ ३
२३पे। स्वाऔ३हो३। पिभिरो२३४५इ। डा॥ २१॥

त्रीन् "न्यक्रमीत्" एकेन दिवसेनातिक्रामति (एतच्च युवयोः कर्मेति स्तुतिः),

"छित्वा शिरो", "छित्वा शिरः' इति पाठौ। "रार-पत्", "वावदद्"-इति च॥ ८॥ ४९

हे "इन्द्र!" "नेदीयः" "अन्तिकतममस्माकं यज्ञस्थानं "एदिहि" आगच्छैव। काभिः साकमिति? उच्यते। "मित-मेधाभिः" परिमित-प्रज्ञाभिः(१) "ऊतिभिः" रक्षाभिः। यद्वा। निर्मित-यज्ञाभिर्मरुद्भिः सह। हे "शन्तम" सुखतम! "शन्तमाभिः"

---

* 'मेधातिथेरार्षम्'—इति वि०।

---

I,II वाम्रे, आशीले वा इमे द्वे।

(१)—'मितः प्रक्षिप्तो मेधो यज्ञो यासु ऊतिषु ताः मितमेधाः, ताभिः यज्ञसहितैः पालनैर्निमित्तभूतैः, यज्ञान् पालनानि च अस्माकं सम्पादयितुमित्यर्थः—इति वि०।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
आशन्तमशन्तमाभिरभिष्टिभिरास्वापेस्वापिभिः ॥ १० ॥५०

॥ इति चतुर्थ-दशति ॥

४ ५ ४र ५र ४ ५ ४ ५ ४ ५र र र ४
II इन्द्रनेदीयएदि । हाइ । मितमे । धा । भिरुति-

२र १ १ ० १र
भाइः । आशन्तमशन्तमा २भाइः । आभिष्टिभिः । आ-

१ ४ २ ३
स्वा २पाइस्वा२३ । हा३ । पिभिरो२३४५इ । डा ॥ ३२ ॥५०

सुखतमाभिः "अभिष्टिभिः" प्राप्तिभिः अभिमताभिर्वा(१) आग-च्छेति शेषः (उपसर्गश्रुते र्योग्य-क्रियाध्याहारः) तथा हे "स्वापे"! अस्माकं बन्धु-भूत-सुखस्य आपयितर्वा । "स्वापिभिः" बन्धुभूताभिः सुखस्य प्रापयितृभिः "अभिष्टिभिः" आगच्छेति शेषः ॥ १० ॥ ५०

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने तृतीयाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

---

५० ऋग्वेदस्य, ६, ४, २३, १ ।

(१)—'आभिमुख्येन इष्यन्ते यासु देवताभिरभिष्टयः इष्टय इत्यर्थः, ताभिश्च शिमि-तभूताभिः ताश्च सम्पादयितु मित्यर्थः'-इति वि०

अथ षष्ठे खण्डे—

सैषा प्रथमा।

नृमेधऋषिः।

३२ ३१ २३ १२ ३२३१२
दूतऊतीवोअजरं प्रहेतारमप्रहितम्।
३ १२ २२३ १ २ ३१२३१२ ३ १२
आग्नुञ्जेतारꣳहोतारꣳरथीतममतूर्त्तन्तुग्रियावृधम्*॥१॥१५

५ र २ १२ २ ऽ २ २ र
I दूतऊती। वो३ओजा३राम्। औ३हो३वा। प्रहे-
र १ २ २ ऽ २ २ र र र
तारमप्राही३ताम्। औ३हो३वा। आग्नुञ्जेतारा३ꣳ-
१ २ २ ऽ २ २ १ र ५
होइता३राम्। औ३हो३वा। रथाइतममतूर्त्ता२३४न्तू।
३ २ १ २ ५र र २
ग्रिया३। वा२र्द्धा२३४औहोवा। स्तुषे१॥ ३२॥

५ र र र ५ २ र१र
II दूतऊतीवोअजा६राम्। प्रहेतारमप्रहितमुहूवार३-

---

* 'तुग्यावृधम्'-इति ऋ० पाठः।

---

५१ ऋग्वेदस्य ६,७,२,७।

I,II गौरीवीतेः प्रहितौ द्वौ। वासुक्रे वा इमे द्वे।

अथ द्वितीया।

वसिष्ठऋषिः।

१र २र २ १ १ २ २उ २ १र २र
मोषुत्वावाघतश्चनारेअस्मन्निरीरमन्।

१ २ १ र र र १ २ र १
होइ। आशुञ्जेतारꣳहोइतारमुहुवा२३हो। रथी। त-

र २ २ २ ५ २ २ १ २ ५र र
मा२म्। अतूर्त्ता२३४न्तू। ग्रिया२। वा२र्द्धा२३४औहो

२ १ १ ११
वा। स्तौ३षा२३४५इ॥ ३४॥ ५१

हे अस्मदीया जनाः! "वो" यूयम् "अजरं" जरा-रहितं "प्रहेतारं" शत्रूणां प्रेरकं "अप्रहितं" केनाप्यप्रेषितं "आशुं" वेगवन्तं-"जेतारं" शत्रूणां। "होतारं" गन्तारं। "रथीतमं" रथिनां श्रेष्ठं "अतूर्त्तं" केनाप्यहिंसितं। "तुग्र्यावृधं" उदकस्य(१) वर्धयितारमिन्द्रम् "ऊती" ऊत्यै रक्षणाय "हूतः" कुरुत पुरुस्कृतेति यावत्॥ १॥ ५१

---

(१)—तुग्र्यादिति उदकनामसु एकविंशतितमं नैघण्टुकम् (१,१२) बह्वृक्पाठ-स्वरूपमवलम्ब्येदं प्रतीकमत्रोद्धृतम्, सामवेदीयपाठे तु तुग्रिया इति ध्येयम्।

३ १ २ ३ १ २ ३ १ २ ३ २ ३ १र २र
आरात्ताद्दासधमादन्नागह्रीदवासन्नुपश्रुधि ॥ २ ॥५२

५र र १ ३ ५ २र१र
I मोषुत्वावा। घाता२३४५ः। वा२३४ना। आरेअ-

१र १ २ १ ७ . १
स्मन्निरो२रमन्। आरा१त्ताद्दा२। साधमादा२म्। ना-

र २ १ ७ १ २ १ २
आगहि। आद्दहवासा२न्। ऊपश्रुधि। इडा२३भा३-

१
४३। ओ२३४५इ। डा ॥ ३५ ॥

५र र र ५ २र१र र
II मोषुत्वावाघतश्चना६ए। आरेअस्मन्निरीरमा२न्।

१ १ २र१र र र र
हा२ऊऊवा२इ। ऊ। आरात्ताद्दासधमादा२म्। हा

हे इन्द्र ! "त्वा" त्वां "वाघतश्चन" यजमाना(१) अपि "अस्मद्" अस्मत्तः "आरे" दूरे(२) "मो निरीरमत्" नितरां मा रमयन्तु।

---

५२ उत्तरार्च्चिकस्य ८,२,६,१ = ऋग्वेदस्य ५,३,१७,१ = ऊहे१५,१८।

I,II आत्रे द्वे।

(१)—वाघत इति मेधाविनामसु पठितम् नैघण्टुकम् ३,१५।

(२)—'आरे अदूरे'-इति वि०।

अथ तृतीया ।

वसिष्ठऋषिः ।

३ १ २   ३ २ ३ २ ३ १ २ ३ १ २
सुनोतसोमपावनेसोममिन्द्रायवज्रिणे ।
१ २ ३ १र २र ३ २उ ३ १र २र३ १र २र
पचतापक्तीरवसे कृणुध्वमित् पृणन्नित् पृणते मयः ॥३॥५३

१ १ २ ५ १
२ऊऊवा२इ । ऊ॒ऽ२ । नआगा२३४ही । आइह ।
२ ३ ५ २ १ २ १
वासौवाओर२३४वा । उपश्रू२३धा२३४३इ । ओ॒र२३४५इ ।
डा ॥ ३६ ॥ * ५२

अतस्त्वम् "आरात्ताद्वा" दूरेऽपि वर्त्तमानः "नः" अस्मदीयं "सधमादं" यज्ञम्(२) "आगहि" आगच्छ । "इह वा" यत्रापि वा "सन्" विद्यमानः "उपश्रुधि" अस्मदीयं स्तोत्र मुपश्रृणु ॥

"आरात्ताद्वा", "आरात्ताच्चित्" इति च पाठौ ॥ २ ॥ ५२

---

५३ ऋग्वेदस्य ५,२,१८,२ ।

(२)—'सह माद्यन्ति यत्र देवताः स सधमादो यज्ञः तं प्रति'-इति वि० ।

---

* इति ग्रामे गेये सप्तमः प्रपाठकः ॥

I ओं सुनोतसोमपाव्नाइए। सोममिन्द्रा२३। होवा
३हा। यवज्रा२३इणाइ। पचतापक्ताइ२वसेक्ठ। ए। ध्वा
१मी२३ह्वाइ। पृ। णान्। आइत्पृ३हा। णताइमा-
२३या३४३:। ओ२३४५इ। डा॥ १॥

II सुनोतसोमपा। आव्नाओ२३४वा। इयाहाइ।
सोममिन्द्रा२। ऊवे२। ऊवे२हो। यावज्रिणा२इ।
पचतापक्ताइ२वसेक्ठ। ए। ध्वा१मी२३ह्वाइ। पृ।
णान्। आइत्पृ३हा। णताइमा२३या३४३:। ओ२३४५इ।
डा॥ २॥ ५३

हे मदीयाः पुरुषाः! "वज्रिणे" वज्रवते "सोमपाव्ने" सोमस्य पात्रे "इन्द्राय" "सोमं" "सुनोत" अभिषुणुत। "अवसे"-इन्द्र-

---

I, II गौरीवीतेद्वे।

अथ चतुर्थी ।

भरद्वाजऋषिः ।

१　२ ३ १र　२र　३ २ ३ १　२　३ २
यः सत्राहाविचर्षणिरिन्द्रन्तꣳहूमहेवयम् ।
१ २　　　　　　　　　३ १ २ ३ १ २　३ २
सहस्रमन्योतुविनृम्णसत्पतेभवासमत्सुनोवृधे ॥ ४ ॥ ५४

३ ४ र २र　४५　　　　२　४र ५ ४र ५
I यःसत्राहाविचर्षणिः ।　इन्द्रंता३ꣳहूमहेवयाम् ।

त्तर्पयितुं "पक्तीः" पक्तव्यान् पुरोडाशादीन् पचति । "कृण्वमित्" इन्द्रप्रियकराणि कर्माणि च कुरुतेव । इन्द्रो हि "मयः" सुखं(१) "पृणन्नित्" यजमानाय प्रयच्छन्नेव "पृणते" हवींषीति-शेषः ॥ ३ ॥ ५३

यः इन्द्रोह "सत्राहा" महतां शत्रूणां हन्ता । "विचर्षणीः" विशेषेण सर्वस्य द्रष्टा तमिन्द्रं वयं "हूमहे" स्तुति-पदै राह्वयामः ( उत्तरार्धः प्रत्यक्ष-कृतः(१) हे "सहस्रमन्यो" बहुविधं शत्रु-

---

५४ ऋग्वेदस्य ४,७,२७,३ ।

I वामदेव्यम् ।

(१)—मयइति सुखनामसु'सप्तमं नैघण्टुकम् ३,६ ।

(१)—"तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृताः आध्यात्मिक्यश्च । तत्र परोक्ष-कृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य * * * अथ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना *** अथापि प्रत्यक्षकृता स्तोतारो

अथ पञ्चमी।

परुच्छेप* ऋषिः।

१ २ ३ २ ३ १ २
शचीभिर्नः शचीवस्तु दिवा नक्तन्दिशस्यतम्।

१ २२१२ २ १ २ २ १
इन्द्रं तञ्चमहे वा२३याम्। सहस्रमन्यो तुविनृम्णसत्पा२३-

२ १२ २ १२२२ १ २
ताइ। भवासा२३मा। त्सूनोवृधे। इडा२३भा३४३।

१
ओ२३४५इ। डा॥ ३॥ ५४

नाभार्थ सहस्र-सङ्ख्याक-कोप-युक्त! यद्वा। मन्युः क्रतुः, सहस्र-सङ्ख्याकैः क्रतुभिः पूज्येन्द्र!। हे "तुविनृम्ण" बहु-धन(२)! "सत्पते" सतां पालयितरिन्द्र! "समत्सु" सङ्ग्रामेषु(३) "नः" अस्माकं "वृधे" वर्द्धनाय "भव"॥

"सहस्रमन्यो", "सहस्रमुष्क"-इति च पाठौ॥ ४॥ ५४

---

* 'पुरुच्छेप'-इति वि० पाठः।

---

भवन्ति परोक्षकृतानि स्तोतव्यानि * * * अथाध्यात्मिक्य उत्तमपुरुषयोगा अहमिति चैतेन सर्वनाम्ना"-इत्यादि नै० दै०१,१—३।

(२)—'तुविनृम्ण' बहुबल इति वि०-सम्मतोऽर्थः। तुवीति बहुनामसु द्वितीयं पदम् (नि० ३,१)।

(३)—'समत्सु'-इति सङ्ग्रामनामसु द्वाविंशतितमम् पदम् (नि०२,१७)।

१ २　३ १ २र　१ २ ३ २उ　३ २ ३ २ ३ २
मावा ऽ रातिरुपदसत्कदाचनास्मद्रातिःकदाचन ॥५॥ ५५

४ र　र ४　१ र　२ १
I शचीभिर्नाः५ शचीवसू। दिवानक्तन्दिशस्यताम्।

र १　२ १र
मावा२म्। रातिरुपदसत्कदाचना। आस्मा२त्।

१　२ १　५　४　५
रातिःकदो२३४वा। चा५नोई३हाइ ॥ ४ ॥ ५५

हे "शचीवसू"! (शचीति कर्म-नाम(१) अस्मदनुष्ठितज्योतिष्टोमादि-कर्म-धनौ! (२) युवां "शचीभिः" अस्मदीयैः कर्मभिर्यागादिभिर्निमित्तभूतैः "दिवानक्तम्" अहनि रात्रौ च "दिशस्यत" विसृजतं अभिमतं दत्तमित्यर्थः(३)। अस्मद्दत्तं हविः सर्वदा भक्षयन्तं वा। "वां" युवयोः "रातिः" दानं "कदाचन" सर्वदा याग-कालेऽपि अ-याग-कालेऽपि "मोपदसत्" मोपक्षीणं भूत् (दसु उपक्षये। लुङि पुषादि-द्युतादीति च्लेरङ्) न केवलं युष्मदीयम्, अपितु "अस्मद्" अस्माकमपि "राति" दानं हविरादि-

---

५५ ऋग्वेदस्य २,२,३,५।

I अश्विनोः साम।

(१)—'शची'-इति कर्मनामसु द्वाविंशतितमं पदम् (नि०२,१)।

(२)—'अश्विनौ'-इति वि०।

(३)—'दाशति'-इति दानकर्मसु द्वितीयं पदम (नि०३,२०)। मतेनेतद्रूपम् दिशस्यन्तमिति।

अथ षष्ठी।

वामदेवऋषिः ।

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
यदाकदाचमीढ्षेस्तोताजरेतमर्त्त्यः ।
१र २र ३ १ २ ३ २ ३ २ ३ २ ३ १ २
आदिद्वन्देतवरुणंविपागिराधर्त्तारंविव्रतानाम् ॥ ६ ॥ ५६

५ र १ ३ ५र र २ ५ २र
I यदाकदा। चा२मा२३४औहोवा। दू२३४षे। स्तो-
१र २र १ २ १ २ १ ७ ३
ताजरेतमर्त्तियाऽ। आदिद्वन्दे। तावरुणा२३४म्। वि-
२ ३ २ १ २र १ १ ३ ५र र
पा३४गिरा। धार्त्तारांवी२३। व्रा२ता२३४औहोवा।
३ १ १ ११
ना२३४५म् ॥ ५ ॥

प्रदानं सर्व-विषयं दानं वा, अर्थिभ्यः "कदाचन" सर्व्वावस्थायामपि "मोपदसत्" उपक्षीणं माभूत् सर्वदा वर्त्तताम्। अहमपि सर्वदा युष्मानुद्दिश्य दद्याम्। युवामपि मदभिमतं सर्वदादत्तमित्यर्थः।

"दिशस्यत", दशस्यतम्"-इति च पाठः ॥ ५ ॥ ५५

---

*"मीड़्हुषे"-इति ऋग्वेदे दीर्घोच्चारणम्।

---

I, II, III वशिष्ठस्य वासिष्ठस्यवा सफस्यवा, पाजस्यवा, पज्रस्यवा; पज्राणि त्रीणि।

५ र र र १ १
II यदाकदाचमाढ्वाउ। ढूषा२इस्तोता२। जराइ।

१ र २ ३र ५ २ २ १
तमर्त्तियः। आदिद्दन्दा। औहोऽ३हा३। हा३इ। ता-

३ ५ २र १ र २ ३र ५
वा२रू२३४णाम्। विपागिरा। धर्त्तारंव्यौ। औहो३-

२ २ १र २र १ २ १
हा३। हाइ। व्रतानाम्। इडा२३भा३४३। ओ२३४५इ।

डा॥ ६ ॥

४ २ ५ ३ ५र ३ २ ४ ५
III यदा४क। दा४चमी। ढूषा३इ। स्तोता।

२ १ २ १ २ १ २
जराइ। तमार्त्तीया३ः। आदाइदन्दा३इ। तावा२रू-

५ र ३१ ३ ५ र ३ २
२३४णाम्। विपा। गिरौवा३ओ२३४वा। धर्त्ता। रंव्यौ

३ ५ ४ ४
वा३ओ२३४वा। व्रतापूनाम्। होपूइ। डा॥ ७ ॥ ५६

"यदा कदा च" यस्मिन् काले "मीढुषे" सेक्त्रे हविः-प्रदाते यजमानाय तस्य यागार्थं "मर्त्यो" मरण-धर्मा "स्तोता" स्तुति-

अथ सप्तमी।

मेध्यातिथि ऋषिः*।

२ १र २१ ३ २ ३.१ २
पाहिगाअन्धसोमदइन्द्रायमेध्यातिथे।

कर्त्ताह्नाता "जरेत" स्तूयात्। "आदित्" अनन्तरमेव तस्मिन्-काले इत्यर्थः। "वरुणं" पापस्य वारकं(१) "विव्रतानां" विविधानां कर्म्मणां(२) "धर्त्तारं" धारकं वरुण-नामानं देवं "विपा" विशेषेण रचिकया "गिरा" स्तुत्या "वन्देत" स्तूयात्। यदा यजमानार्थं सुह्नाता स्तौति तदा वरुणमेव स्तौतीत्यर्थः। अथवा "मीढुषे" अभिमत-वर्षिणे वरुणाय तत् प्रीतये "यदा कदा च" यस्मिन् कस्मिंश्चित् काले स्तुत्यर्हे "मर्त्यः" स्तोतृह्नाता "जरेत" स्तूयात्(३)। "आदिदनन्तरमेव" यजमानोऽपि उक्त-लक्षणं स्वयमपि "विपा गिरा" "वन्देत" नमस्कुर्य्यात् स्तूयाद्वा ॥ ६ ॥ ५६

---

* 'वत्सइन्द्रमाह'-इति वि०।

---

(१)—'वरुणः वृणोतीति सतः'-इत्यादि नै० १०, ३।

(२)—'व्रतम्'-इति कर्म-नामसु सप्तमं पदम् (नि०२,१)।

(३)—'जरते'-इति अर्च्चति-कर्मसु सप्तमं पदम् (नि०२,१४)।

१र　२र ३　२ ३　१　२ ३　२३१२　३१　२३१२
यःसम्मिश्लो हर्य्योर्य्यो हिरण्ययइन्द्रोवज्री हिरण्ययः ॥ ७ ॥५७

४र ५ र ४　२१र　२　१　८ २ र
I पाहिगाम्ना। धसोमा२३दाइ। आइन्द्रायमे।

१र　२　१　२र १　२र१　७
धियाता२३इथाइ। यःसम्मिश्लोहरियोयः। हाइरण्या-

१　२　२　२ १　५　४
या२ः। आइन्द्रोवा३ज्री३। हिरो२३४वा। एयापू-

५
योइहाइ ॥ ८ ॥

५र　४　५　२र　१र　२　१　र
II पा। ह्यौपाही। गान्धसोमा२३दाइ। आइन्द्रा-

२ र　१र　२　१　५र　१　र
यमे। धियाता२३इथाइ। यःसम्मिश्लो२हरियोयः।

इन्द्रायेति चतुर्थ्येकवचन मिदं सम्बुद्ध्येकवचनस्य स्थाने द्रष्टव्यम्। हे "इन्द्र"! "मेध्यातिथे"! मेधो यज्ञं तस्मिन् भवो मेध्यः मेध्यश्चासौ अतिथिश्चेति मेध्यातिथिः, तस्य सम्बोधनं हे मेध्यातिथे! यज्ञे भव अतिथि-भूत इन्द्र! "अन्धसः" पीतस्य

---

५७ ऋग्वेदस्य ६,२,७,४।

I,II सौभरे द्वे।

अथाष्टमी ।

भर्गऋषिः ।

३ १ २ ३ १ २ ३ १ २ ३ २ ३ १र २र
उभयᳪशृणवच्चनइन्द्रोअर्वागिदंवचः ।

३ १ २ ३ २ ३ १ २ ३ १र २र ३ १ २
सत्राच्यामघवात्सोमपीतयेधियाशविष्ठआगमत् ॥ ८॥ ५८

७ १ २ २ २ १ ५
हाउ२ण्याया २ः । आइन्द्रोवा३ज्री३ । हिरो२३४वा ।

४ ५
ण्यापूयो६हाउ ॥ ८ ॥ ५७

सोमस्य "मदे" सति त्वमस्मदीयाः "प्रजाः" "पाहि" रक्ष । "यः" इन्द्रः "हर्योः" अश्वयोः(१) "संमिश्लः" स्व-रथे संमिश्रयिता "इन्द्रो वज्री हिरण्ययः" हित-रमणीयः यस्य रथो हिरण्मयो हिरण्मयः ।

"हर्यो र्यो हिरण्यय इन्द्रो वज्री हिरण्ययः"-इति छन्दोगाः । "हर्योर्यः सुते सचा वज्री रथो हिरण्ययः"-इति बह्वृचाः ॥ ७ ॥ ५७

---

५८ उत्तरार्चिकस्य ५,१,१४,१ = ऋग्वेदस्य ६,४,२५(१८)१ = ऊहे ४,२,१६—१८,२,७ ।

(१)—'हरी इन्द्रस्य'-इति नि० १,१५,१ ।

५ ५ १ ३र १र
I उभयꣳशृणवच्चना६ए। आइन्द्रो२अर्वागिदंवचा

१ २ २ १र २र १ ३र १
२३ः। होवा३हाइ। सत्राचियामघवा२न्। सो। मा

२ २ ३ ५ २१र १
पा३हाइ। ता२३४याइ। धियाशविष्ठआ२३होइ।

२ १ ४ ५ ४
गमात्। औ२३होवा। होपूइ। डा॥१०॥ ५८

"उभयं" स्तोत्रात्मकं शस्त्रात्मकं चोभय-विधम्(१) "इदं वचो" "अर्वाग्" अस्मदभिमुखं "इन्द्रः" "शृणवत्" शृणोतु। श्रुत्वा च "सत्राच्या" अस्माकं यज्ञं पूजयन्त्या(२) "धिया" युक्तः सन् "मघवान्" धनवानिन्द्रः "शविष्ठः" अतिशयेन बलवान् "सोमपीतये" सोम-पानाय "आगमत्" आगच्छतु॥

"मघवान्", "मघवा"-इति च पाठौ॥ ८॥ ५८

---

I इन्द्रस्य, वैयश्वम्।

(१)—'उभयं स्तुतिं प्रार्थनाञ्च'-इति वि०।

(२)—'सदागत्या'-इति वि०।

अथ नवमी।

अस्याः परस्याश्च मेधातिथि-मेध्यातिथी ऋषी*।

३ २ ३ १ २ ३ १ २ ३ १ २
मह्रेचनत्वाद्रि†वःपराशुल्कायदीयसे‡।

२ ३ १ २ ३ १र २र ३ २ ३ १ २
नसहस्रायनायुतायवज्रिवोनशतायशतामघ॥ ८॥ ५८९

५ र ४ ५ २ ३ ५ १र र
I मह्रेचनोवा। त्वाअद्रा२३४इवाः। पराशुल्का।

१ २ ४ ५ ३ २ १ र २र १
या३दायासा३इ। नस। हस्रा३। यानायुता। यवा-

२ ४ ५ २र२ १ ४ २
ज्राइवो३। नश। ताया३। शा२३ता३। मा३४५घो-

५
६हाइ॥ ११॥

५ र २ ४५र ४ ५ १ र २ र १ २
II मह्रेचा३नत्वाअद्रिवाः। पाराशुल्का। यदाया१

* 'प्रगाथइन्द्रमाह'-इति वि०।

†"त्वामद्रि"-इति, "त्वाअद्रि"-इति,‡"देयाम्"-इति च ऋग्वेदीयः।

५८९ ऋग्वेदस्य ५,७,१०,५।

I,II सहस्रयुतीये; प्रजापतेः महोविशीये वा।

१   १२ २ ०   १
सा२इ। नसहस्रा२। यनायुतायावज्रिवा२ः। नशा-

२   १   १ ३   ५२ २   २ १२
तार३या। शता२३। मा२घा२३४औहोवा। मघो-

२
निश्चे१॥ १२॥ ५९

हे "अद्रिवः"(१) वज्रवन्निन्द्र! (च नेति निपात-द्वय-समुदायो विभज्य योजनीयः) "महे च" महतेऽपि "शुल्काय" मूल्याय नाहं त्वां "परादीयसे" न विक्रीणामि (ददातेरुत्तम-पुरुषस्य कर्त्तर्येव व्यत्ययेन रूपम्।

"परा शुल्काय देयाम्"-इति बह्वृचा आमनन्ति।

हे "वज्रिवः"(२) वज्रहस्तेन्द्र! "सहस्राय" सहस्र-सङ्ख्याकाय धनाय "च न" "परादीयसे" "अयुताय" दशसहस्राय शुल्काय न परादीयसे। हे "शतामघव" बहुधनेन्द्र! "शताय" (बहुनामैतत्) अपरिमिताय धनाय च न परादीयसे न विक्रीणासि। उक्त-सङ्ख्याकाद्धनादपि त्वां न परित्यजामि। किन्तु बहुभिर्हविर्भिः परिचरामीत्यर्थः॥ ९॥ ५९

---

(१)—'अद्रिवः'।
(२)—'वज्रिवः'-इति च "मतुवसोरुः सम्बुद्धौ छन्दसि" रूपम्।

अथ दशमी ।

१ २ ३ १ २ ३उ ३ १ २
वस्याꣳइन्द्रासिमेपितुरुतभ्रातुरभुञ्जतः ।
३ १ २ ३ १ २ ३ २ ३ १ २
माताचमेछदयथःसमावसोवसुत्वनायराधसे ॥ १० ॥ ६०

॥ इति पञ्चम-दशति ॥ *

४ ५र र र ४ ५ ३ २ ३ ५
I वस्याꣳइन्द्रासिमे । हाउपितूः । उताभ्रा२३४तूः ।
२ १ २ २ ५ २र १ २ २
अभूञ्जातौ । वाओ२३४वा । माताचामौ । वाओ२३४
५ २ १ २ २ ५ २ १
वा । छदयथः । सा३मावासौ । वाओ२३४वा । वसू-

हे "इन्द्र" ! त्वं "मे" मदीयात् "पितुः" जनकादपि "वस्यान्" वसीयान् वसुमत्तरोऽसि । "उत" अपिच "अभुञ्जतः" अपालयतो मम "भ्रातुः" अपि त्वं वसीयानधिकोऽसि । हे "वसो" ! वासकेन्द्र "मे" मदीया "माता च" त्वं च "समासमौ" समानौ सन्तौ (पुमान् स्त्रियेति पुंसः शेषः) "छदयथः"

---

६० ऋग्वेदस्य ५,७,११,१ ।

I इन्द्राण्याः साम ।

---

* ॥ इति तृतीयः प्रपाठकः ॥

२ ३ ५ २ १ ५ ४
त्वानौ। वाओ२३४वा। यरो२३४वा। धापुसोई-
५
हाइ॥ १३ ॥६०

(अर्चतिकर्मायं)(१) मां पूजितं कुरुथः। किमर्थं? "वसुत्वनाय" व्यापनाय "राधसे"(२) धनाय च उभयोर्लाभायेत्यर्थः॥ १०॥ ६०

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने तृतीयस्याध्यायस्य षष्ठः खण्डः॥ ६॥

---

अथ सप्तमे खण्डे—

सैषा प्रथमा।

वसिष्ठऋषिः।

३१२ ३२ ३१ २ ३ १ २
इमइन्द्रायसुन्विरेसोमासोदध्याशिरः।
१२ ३२ ३२३१२ ३ २ ३ २
ताँआमदायवज्रहस्तपीतयेहरिभ्यांयाह्योकआ॥१॥६१

---

६१ ऋग्वेदस्य ५,३,१७,४।

(१)—'ऋदयति', 'ऋदयते' वा अर्चतिकर्मसु एकविंशतितमं पदम् नि०३,१४।

(२)—'चतुर्थ्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम्'-इति वि०।

अथ द्वितीया।

वामदेवऋषिः।

३ १र ३ १ २ ३ १ २ ३ १ २
इमइन्द्रमदायतेसोमाश्चिकित्रउक्थिनः।
१ २ ३ १र २र३ १ २ ३ १ २ ३ १ २
मधोःपपानउपनोगिरःशृणुरास्वस्तोत्रायगिर्वणः॥२॥ ६२

३ २ ५र ५ १र र
I इमा३४इ। इमइ। द्रायसुन्वा६इराइ। सोमा-
र र २र १र र र
सोदध्याशिराः। ताꣳआमदायवज्रहस्तपीतायाइ। ह-
१ र १ २ १ १ ३ ५र
रा२३हो। भ्यांया२३हो। हियो२३। का२आ२३४औ-
र ३ ५
होवा। ऊ२३४पा॥ १४॥

४ र ४ १र र
II इमइन्द्रा५मदायताइ। सोमाश्चिकित्रउक्थिनाः।

हे "वज्रहस्त"! "दध्याशिरः" दधि-मिश्रणाः "इमे" "सोमासः" सोमाः "इन्द्राय" तुभ्यं "सुन्विरे" सुताबभूवुः। "तान्" सोमान् "मदाय" मदार्थं "पीतये" पानाय "ओको" यज्ञ-सदनम् "आ" अभि "हरिभ्याम्" अश्वाभ्याम् "आयाहि" आगच्छ॥ १॥ ६१

---

I, सौभरम्। II गार्त्समदम्।

अथ तृतीया।

मेधातिथि-मेध्यातिथी ऋषी* ।

एके विश्वामित्र इत्याहुः ।

२ ३२ १ २ ३ १ २ ३ १ २ ३ १ २
आ त्वा३†घसवर्दुघा॒ऽहुवेगायत्रवेपसम् ।

२ १ १ २ २ २ १
मा१धोरःपापा२। नउपनोगिराःशा१र्णु२। रास्वस्तो-

२ १ २ १
२३त्रा। यगिर्वा२३णा३४३ः। ओ२३४५इ। डा ॥ १५ ॥६२

हे "इन्द्र"! "ते" तव "मदाय" मदार्थम् "उक्थिनः" स्तोत्र-युक्ताः "इमे" सोमाः "चिकित्रे" ज्ञायन्ते दृश्यन्ते (कित ज्ञाने। कर्मणि लिट्। इरयोरे-इति रे-इत्यादेशः) किञ्च। "मधोः" मदकरस्य (कर्मणि षष्ठी) मदकर सोमं "पपानः" अत्यर्थं पिबन् अस्माकं "गिरः" स्तोत्र रूपा वाचः "उपशृणु" सम्यक् शृणु। "गिर्वणो" गीर्भिर्वननीय हे "इन्द्र"! स्तोत्राय स्तोत्र कर्त्रे मह्यं "रास्व" अभीष्टं देहि(१)। २ ॥ ६२

---

* 'सोमार्षम्'-इति वि० ।

† "त्वा१"-इति ऋग्वेदीयः पाठः ।

---

(१)—'राति'-इति दानकर्मसु चतुर्थं पदम् । नै०२,२० ।

१ २ ३ २ ३ १ ३ २ ३ १ २ १ १ २ ३ १ २
इन्द्रं धेनुꣳसुदुघामन्यामिषमुरुधरामरंकृतम् ॥ ३ ॥६३

५र र ५ २ १ ५र १ ५र
I आत्वद्यासा६वर्दुघाम्। ऊवाइगा२यत्रवे२पसम्।

१ २ २ १ २र १ ७ २
आइन्द्रान्धे३नूम्। सुदुघाम्। आ। नियार्मा२३४इ-

५ २ १ २ १ २ १
षाम्। उरुधा२३राम्। अरङ्का२३र्त्ता३४३म्। ओ२३४

५इ। डा ॥ १६ ॥ ६३

अनयेन्द्रं धेनु-रूपेण वृष्टिरूपेण च निरूपयन् स्तौति।

"अद्य" इदानीं "धेनुं" धेनुरूपमिन्द्रं "नु" क्षिप्रं "आहुवे" आह्वये। कीदृशीं धेनुं? "सवर्दुघां" पयसोदोग्ध्रीं "गायत्रवेपसं प्रशस्यवेगां। "सुदुघां" सुखेनदोग्धुं शक्यां। "अन्यां" उक्त-विलक्षणां "उरुधारां" बहूदकधारां "इषम्" एषणीयां वृष्टिं (लिङ्गव्यत्ययः) एतद्रूपेण वर्त्तमानं। "अरङ्कृतं" अलङ्कर्त्तारं पर्याप्तकारिणं वेन्द्रं चाह्वये॥ ३ ॥ ६३

---

६३ ऋग्वेदस्य ५,७,११,५।

I वाचः साम।

अथ चतुर्थी।

नोधाऋषिः।

१ २ ३२३ १२ ३ १२ ३१२
न त्वा बृहन्तोअद्रयोवरन्त इन्द्र वीडवः*।
१२ २२ ३१२ १२३२३१ ३१२ २२
यच्छिक्षसिस्तुवतेमावतेवसुनकिष्टदामिनातिते ॥ ४ ॥ ६४

४ ५२ ४ ४ १ २१२ २
I नत्वाबृह। तोऽ५द्रयाः। वरन्तइन्द्रवीडा२३वाः।
२ ७ १ ७ १२ २
याक्षित्वासी२। स्तूवताइमा२। वतेवसू। नकिष्टा२३दा।
१२ २ १
मिनाता२३इता३४३इ। ओ२३४५इ। डा ॥ १७ ॥ ६४

हे इन्द्र! "बृहन्तो" बलेन महान्तः अतएव "वीड़वः"(१)। "यच्छिक्षसि" "स्तुवते" "मावते" सर्वतो दृढ़ा अपि "अद्रयः" पर्वताः "त्वा" त्वां "न वरन्त" बलेन न निवारयन्ति(२)। अनिवारणमेवोत्तरार्द्धेन विवृणोति—'स्तुवते' त्वद्विषयं, स्तोत्रं

---

* "वीलव"-इति च ऋग्वेदीयः पाठः।

---

६४ ऋग्वेदस्य ६,६,११,३।

I बार्हदुक्थम्।

(१)—'वीड़व इत्यस्यैवार्थमनुपदं वक्ष्यति दृढाइति।

(२)—'शुद्धोऽप्ययं दृणोतिर्वारणार्थी द्रष्टव्यः'-इति वि०।

अथ पञ्चमी।

मेधातिथिर्ऋषिः।

१ २ १२उ ३ १२३१र २र
कईंवेदसुतेसचापिबन्तङ्कद्वयोदधे।

३ १र २र ३ १र २र ३ २ ३ १ २
अयंयःपुरोविभिनत्त्योजसामन्दानःशिप्र्यन्धसः॥ ५॥ ६५

५ र र २ १ २ १ २
I कईंवेहा। सुताइसा१चा२। पिबन्तङ्कहायो१

कुर्वते 'मावते' मत्सदृशाय माहशाय स्तोत्रे यद् "वसु" धनं "शिक्षसि" ददासि(१)। ते तव(२) तदेतद्धनं "नकि" र्न कश्चित् "आ मिनाति" आभिमुख्येन हिनस्ति। [मीञ् हिंसायां। मीनातेर्निगमे(७,३,८१) इति ह्रस्वः। मावते। युष्मदस्मदोः सादृश्ये वतुब्वाच्य(५,१,६१) इति वतुप्॥

"शिक्षसि" "दित्ससि"-इति च पाठौ॥ ४॥ ६४

६५ उत्तरार्चिकस्य ८,२,१५,१ = ऋग्वेदस्य ६,३,८,२ = जहे १६,२,२०—१८,२,९।

I वाग्नम्।

(१)—'शिक्षति' इति दानकर्मसु पठितं पदम् नै०३,२०।

(२)—'प्रसादेनेति शेषः'-इति वि०।

१ र २ १र
दाधा२इ। अयंयःपुरोविभिनत्त्वाओ१जासा२। मन्दाना

२ १ २ ५र र ३ ५
२३:ओ३। प्रा२या२३४औहोवा। धा२३४सा:॥१८॥ ६५

"सुते"(१) अभिषुते सोमे "सचा" ऋत्विग्भिः सह(२) सोमं "पिबन्तम्" एनमिन्द्रं "कोविद" वेत्ति न कोपि वेत्तीत्यर्थः। "कत्" किंवा(३) "वयः" अन्न(४) "दधे" धारयति(५)। "योऽयम्" इन्द्रः "शिप्री" हनुमान्(६) "अन्धसः" सोमेन "मन्दानः" मन्दमानः(७) "ओजसा" बलेन "पुरो(८)विभिनत्ति"॥ ५॥ ६५

---

(१)—'सुते, सप्तम्येकवचन मिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्, सुतम् अभिषुतं सोमं, सचा मरुद्भिः सह, पिबन्तम्'-इति वि०।

(२)—'मरुद्भिः सह'-इति वि०।

(३)—'कत्, प्रथमायाश्चयम् अदादेशः कोवा, यस्य इन्द्राय मर्त्योऽन्यः'-इति वि०।

(४)—'वयः इत्यन्ननामसु पाठान्तरेण सप्तमं पदम् नै० २,७।

(५)—'दधे ददातीत्यर्थः'-इति वि०।

(६)—'शिप्री, हनू नासिके वा, तद्वान् शिप्री' इति वि० "शिप्रे हनू नासिके वा"-इति नि० नै० ६,१७।

(७)—मदी तृप्तावित्यस्येदं रूपम्, तृप्यन्नित्यर्थः।

(८)—'पुरः, असुरपुरः असुरदुर्गाणीत्यर्थः'-इति वि०।

अथ षष्ठी।

अस्याः परस्याश्च वामदेवऋषिः।*

१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
यदिन्द्र शासोअव्रतं च्यावयासदसस्परि।
३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
अस्माकमाꣳशुम्ममघवन्पुरुस्पृहं वसव्ये अधिबर्हय॥६॥६६

२ १ ४ र र ५ २र र
I यदिन्द्रा२३शासो अव्रताम्। च्यावयास। दा३-
१ २ १ २ १ २
सास्पारी। वा३२। अस्माकामौ। वा३२। शुम्ममघवन्।
१ २ १ २ २ १
पुरुस्पृहौ। वा३२। वसाव्यायौ। वा३२३। धिबो२३४
५ ४ ५
वा। हाउयोई्हाइ॥१८॥६६

हे "इन्द्र"! "यद्" यस्मात् कारणात् "शासः"(१) शिक्षणीयानां यज्ञविरोधिनां शिक्षकस्त्वं तस्मात् कारणात् "सदसः" अस्मद्याग-गृहस्य "परि" परितो वर्त्तमानम् "अव्रतम्" अकर्माणं यागविरोधिनमित्यर्थः। "च्यावय" दूरं निःसारय। अपिच—

* "तौरश्रवस आर्षम्"-इति वि०।

६६ आरण्यके ३,५—६।

I तौरश्रवसम्।

(१)—'शासयति'-इति वि०।

अथ सप्तमी ।

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।

३ १ २ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः ॥ ७ ॥ ६७

I त्वष्टा३४ । नोदैवियम् । वचाः । पर्जन्योब्रह्मण-
स्पार२३तीः । पुत्रैर्भ्रातृभिरदितिर्नुपातू२३नाः । दुष्टारा-
२३न्त्रा । मणंवार२३चा३४३ः । ओ२३४५इ । डा ॥ २० ॥ ६७

हे "मघवन्" धनवन्निन्द्र ! "पुरुस्पृहं" बहुभिः स्पृहणीयम् "अस्मा-
कम्" अस्मदीयम् "अंशुं" सोमं "वसव्ये" वस्तव्ये निवासयोग्ये
स्थाने "अधि बर्हय" अधिकं वर्द्धय । यज्ञ-गृहे याग-विरोधिनो
राक्षसादीन्निःसार्य्य सोमं प्रवर्द्धयेत्यर्थः ॥ ६ ॥ ६६

"त्वष्टा" एतन्नामकः रूपाभिमानी देवः(१) "नः" अस्मदीयं

I त्वाष्ट्रीसाम ।

(१)—'त्वष्टाऋषिः' इति वि० । "त्वष्टा तूर्णमश्नुत इति नैरुक्तास्त्विषेर्वा स्याद् दीप्ति-कर्मणस्त्वक्षते र्वा स्यात् करोतिकर्मणः । * * * अग्निरिति शाकपूणिः"-इति नि० दै० २,१३-१४ ।

अथ षष्ठी।

अस्याः परस्याश्च वामदेवऋषिः। *

१ २ ३ १ २ ३ १ २ २ ३ १ २ ३ १ २
यदिन्द्र शासोअव्रतं च्यावयासदसस्परि।
३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
अस्माकमाꣳशुम्मघवन्पुरुस्पृहं वसव्ये अधिवर्हय॥६॥ ६६

२ १ ४र र ५ २र र
I यदिन्द्रा२३शासो अव्रताम्। च्यावयास। दा३-
१ २ १ २ १ २
सास्पारी। वा३२। अस्माकामौ। वा३२। शुम्मघवन्।
१ २ १ २ २ १
पुरुस्पृहौ। वा३२। वसाव्यायौ। वा३२३। धिबो२३४
५ ४ ५
वा। हापूयोई्हाइ॥ १८॥ ६६

हे "इन्द्र"! "यद्" यस्मात् कारणात् "शासः"(१) शिक्षणी-यानां यज्ञविरोधिनां शिक्षकस्त्वं तस्मात् कारणात् "सदसः" अस्मद्याग-गृहस्य "परि" परितो वर्त्तमानम् "अव्रतम्" अकर्माणं यागविरोधिनमित्यर्थः। "च्यावय" दूरं निःसारय। अपिच—

---

* "तौरश्रवस आर्षम्"-इति वि०।

---

६६ आरण्यके ३, ५—६।

I तौरश्रवसम्।

(१)—'शासयति'-इति वि०।

अथ सप्तमी ।

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
त्वष्टानोदैव्यंवचःपर्जन्योब्रह्मणस्पतिः ।
३ १र २र ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
पुत्रैर्भ्रातृभिरदितिर्नुपातुनोदुष्टरन्त्रामणंवचः ॥ ७ ॥ ६७

३ २ र र ५ ४ ५ २ १ र २ १
I त्वष्टा३४ । नोदैवियम् । वचाः । पर्जन्योब्रह्मण-
३ १र र २ १र २ १
स्पार३तीः । पुत्रैर्भ्रातृभिरदितिर्नुपातू२३नाः । दुष्टारा-
२ १ २ १
२३न्त्रा । मणंवार३चा३४३ः । ओ२३४५इ । डा ॥ २० ॥ ६७

हे "मघवन्" धनवन्निन्द्र! "पुरुस्पृहं" बहुभिः स्पृहणीयम् "अस्माकम्" अस्मदीयम् "अंशु" सोमं "वसव्ये" वस्तव्ये निवासयोग्ये स्थाने "अधि बर्हय" अधिकं वर्द्धय । यज्ञ-गृहे याग-विरोधिनो राक्षसादीन्निःसार्य्य सोमं प्रवर्द्धयेत्यर्थः ॥ ६ ॥ ६६

"त्वष्टा" एतत्संज्ञको रूपाभिमानी देवः(१) "नः" अस्मदीयं

---

I त्वाष्ट्रीसाम ।

(१)—'त्वष्टाऋषिः'इति वि० । "त्वष्टा तूर्णमश्नुत इति नैरुक्तास्त्विषेर्वा स्याद् दीप्तिकर्मणस्त्वक्षतेर्वा स्यात् करोतिकर्मणः । * * * अग्निरिति शाकपूणिः"-इति नि०दै०२,१३-१४ ।

"वचः"[२] पातु। "ब्रह्मणस्पतिः एतन्नामको मन्त्राभिमानी देवः[३] अस्मदीयं वचः पातु। किञ्च। "अदितिर्नु"[४] अखण्डनीया अदीना वा एतन्नाम्नी देवमाता च[५] "पुत्रैर्भ्रातृभिः" स्वकीयैः सहिता "नः"[६] अस्माकं सम्बन्धि "दुस्तरं"[७]

---

(२)—'दैव्यं देवानां भवं, वचः वाक्यं, पर्जन्यः'-इति वि०। एतन्मये दैव्यमित्यपि कर्तृपदम्, 'नः' अस्मान् इत्येव सर्वत्र कर्मपदम्।

(३)—'ब्रह्मणस्पतिर्बृहस्पतिः'-इति वि०। "ब्रह्मणः (अन्नस्य) पाता वा पालयिता वा इत्यादि" नि०दै०४,१२-१३। एषच पर्जन्यः मन्त्रलिङ्गात्, तथाहि—

"अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभियमोजसातृणत्।
तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम्॥
(ऋ०५म०२अ०१८सू०१मन्त्रः)।

"अश्मनवन्तमास्यन्दनवन्तमवातितं ब्रह्मणस्पतिर्मधुधारमभियमोजसा बलेनाभ्यतृणत्तमेव सर्वे पिबन्ति रश्मयः सूर्यदृशो बहु नं सह सिञ्चन्त्युत्समुद्रिणमुदकवन्तम्"-इति च यास्ककृतं तद्व्याख्यानम्।

(४)—'नु इति पादपूरणः'-इति वि०।

(५)—"अदितिरदीना देवमाता। ***। इत्यदितेर्विभूतिं माचष्ट एतान्यदीनानीति वा"-इति नि० दै०४,२२—२२।

"अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः।
विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्॥
(ऋ०१म०८अ०४सू०१०मन्त्रः)।"

(६)—'नः अस्मान्'-इति वि०।

(७)—'द्वितीयैकवचने द्वे दुस्तरं नामणम्, पञ्चम्येकवचनस्य स्थाने द्रष्टव्यम् दुस्तरात् नामणात् वचसः सकाशादुत्तरित्यर्थः'-इति वि०।

अथाष्टमी।

वालखिल्या ऋषयः*।

२ २ ३ २२१ २ ३ १ २    ३ १ २
कदाचनस्तरीरसिनेन्द्रसश्चसिदाशुषे।

३ १२ २२ २ १ २ २उ ३ १ २ ३ १ २
उपोपेन्नुमघवन्भूयइन्नु तेदानं देवस्यपृच्यते ॥ ८ ॥ ६८

५ २ २ ५२ २ ३ ५ २
I कदाचनास्ता६रीरसाइ। नेन्द्रासा२३४श्चा। साइ-
कर्म विरोधिभि स्तरीतु मम्मकं "वामार्ण"(८) रक्षणीयं "वच:" पातु ॥ ७ ॥ ६७

हे "इन्द्र!" त्वं "कदाचन(१)"कदाचिदपि "स्तरीः" हिंसको "नासि"। यद्वा। स्तरीर्निवृत्त-प्रसवा गौ स्तथाविधो न भवसि। सा यथा वत्साभावात् गृहं प्रति नागच्छति न तथा करोमीत्यर्थः।

---

* 'वामदेवस्यार्षम्'-इति वि०।

---

६८ ऋग्वेदस्य ६,४,१८,२= यजुर्वेदस्य ३,२४—८,२।

I अदितेः साम।

(८)—वामणं मनुष्यकर्मेति वि०-सम्मतः।

(१)—विवरणमते 'कदा, च, न' इति पदत्रयम्, भाष्यमते 'न शब्द अपिशब्दार्थे, कदाचिदपि'।

अथ नवमी।

मेध्यातिथिऋर्षिः*।

३ १र २र ३ १ २ ३ १ २
युङ्क्ष्वा*हिवृत्रहन्तमहरीइन्द्रपरावतः।
२ १ २ ३ १ २ ३ २ ३ २ ३ १ २
अर्वाचीनोमघवंत्सोमपीतयउग्रऋष्वेभिरागहि ॥ ९ ॥ ६९

२ ५ ३ ४र२र ४ ५ २र ४५ १ २ ५
दाशूर२३४षाइ। उपोपेन्नुमघवन्भूयइत्। हार२इनूर२३४ताइ।
२ ३ ५ २ १ ५ ४ ५
दानन्दार२३४इवा। स्यपोर२३४वा। च्यापृतो६हाइ ॥२१॥६८

किन्तु, "दाशुषे" हविर्दात्रे यजमानाय "सश्चसि"(२) सञ्चच्छसि अस्मान्। हे "मघवन्" धनवन्निन्द्र! "देवस्य" द्योतनादि-गुणकस्य तव भूयः प्रभूतं दानं "उपोपेत् पृच्यते" (अपर उपशब्दः पूरणः) उपपृच्यत(३) एव अस्माभिः संपृच्यत इत्यर्थः ॥ ८ ॥ ६८

---

* 'मेधातिथिरिन्द्रमाह'-इति वि०।

* "युक्ष्वा"-इत्यननुनासिकः पाठो बह्वृचाम्।

---

६९ ऋग्वेदस्य ५,७,२८,२।

(२)—'सश्चति गतिकर्मसु पठितः, तथापि दाशुष इति सम्प्रदानश्रुतेर्दानार्थो द्रष्टव्यः'-इति वि०।

(३)—'उपपृच्यते, उपेत्य भवति, यावत् पूर्वंदानं नैव क्षीयते तावदेव ददासीत्यर्थः'-इति वि०।

१ १ २ १ २ र ४ २
I आइहीर। आइहिहाइ। यंत्वाहिवा३र्त्राइह-
३ ४ १ र २ १ २ ३ २ २र २
न्तम। हारोइन्द्र। परावा१ता२३४ः। अर्वा३४चीनाः।
१ २ १र २ ३ २ ३ २
माघवंत्सो। मपाइता१या२३४इ। उग्रा३४ऋष्वा३इ।
२ १ ५ ४ ५
भिरो२३४वा। गा५ह्वो६हाइ॥ २२॥ ६९

हे "वृत्रहन्तम!" वृत्रं हतवान् वृत्रहा अतिशयेन वृत्रं हतवान् वृत्रहन्तमः यथा पुनर्नोत्तिष्ठति तथा हतवानित्यर्थः(१) (अनो नुट् (८,२,१६) इति तमपो नुट्) हे तादृशेन्द्र! "हरी" त्वदीयावश्वौ "युङ्क्ष्व" (हिरवधारणे) आत्मीये रथे योजयैव। हे "मघवन्!" धनवन् "उग्रः" उद्गूर्णबलस्त्वं "सोमपीतये" सोमस्य पानार्थं (दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्(२)) "अर्वाचीनो" ऽस्मदभिमुखः "ऋष्वेभि" ऋष्वैर्दर्शनीयै "र्मरुद्भिः" सार्द्धं "परावतः" (दूरनामैतत्) दूरे वर्त्तमानात् द्युलोकात् "आगहि" आगच्छ॥ ९॥ ६९

---

I आजीगर्त्तम्।

(१)—'मर्चोर्मे घस्य वा हन्तरित्यर्थः'-इति वि०।

(२)—निघण्टु-तृतीय-षड्विंशोऽन्तिमं पदम्।

अथ दशमी।

नृमेधऋषिः।

२ ३ १र २र ३ १ २
त्वामिदाह्योनरोपीप्यन्वज्रिन्भूर्णयः।
१२ ३ १ २ ३ २ ३ २ ३ १ २ ३र २
सइन्द्रस्तोमवाहस*इहश्रुध्युपस्वसरमागहि॥ १०॥ ७०

३र ४ ५र २ ३ ४र ५ ५ २१ २ १
I त्वामिदा। ह्योइ। ह्वियोनरा३ए। अपाइप्यन्वा।
२ ३ ५ १ २ १र २र १ २
आइन्भूर्णा२३४याः। सइन्द्रस्तोमवाहसः। इहाश्रूधा।

हे "वज्रिन्!" इन्द्र! त्वां "भूर्णयो" हविर्भरणशीला(१) "नरः" कर्मणां नेतारो यजमानाः(२) "इदा" अद्य "ह्यः" पूर्वेद्युश्च(३) "अपीप्यन्" सोममपाययन्(४)। हे इन्द्र! स त्वं

---

* "स्तोमवाहसाम्"-इति ऋक्पाठः।

---

७० उत्तरार्चिकस्य २,१,१४,१ = ऋग्वेदस्य ६,७,३,१ = ऊहे२,४—१८,२,८।

I माधुच्छन्दसम्।

(१)—'तस्मिन्नेव वेदिप्रदेशे कर्मकरणार्थं भ्रमणशीलाः'-इति वि०।

(२)—'ऋत्विग्लक्षणा मनुष्याः'-इति वि०।

(३)—सर्वकालमित्यर्थः।

(४)—'प्यायी ओप्यायी वृद्धा वित्यस्येदं रूपम् वर्द्धयन्तीत्यर्थः'-इति वि०।

३२२ ३२२ १ २ ३२ २ ३२ २ १२
औहोऽ३४वाहाइ । उपास्वासा । औहोऽ३४वाहा । रमा-
२ १
गाऽ२३हाऽ३४३इ । ओऽ२३४पुइ । डा ॥ २३ ॥ ७०

"स्तोमवाहसः" (षष्ठ्यर्थे प्रथमा) स्तोमवाहसां स्तोत्रवाहकाना-मस्माकं स्तोत्रम् "इह" यज्ञे "श्रुधि" शृणु "स्वसरं" गृहं च । (दुर्याः स्वसराणीति (नै० ३,४,१०) गृहनामसु पाठात्) "उपाह्यु" उपागच्छ ॥ १० ॥ ७०

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने तृतीयाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

---

अथाष्टमे खण्डे—

सैषा प्रथमा ।

द्वयोर्वसिष्ठऋषिः ।

१ २ ३ २ ३ १ २ ३ २ ३ २
प्रत्युअदर्श्यायत्यू३च्छन्ती* दुहितादिवः ।
१ २ ३ १ २ ३ १ २३ २ ३ १ २ ३ १ २
अपोमहीवृणुतेचक्षुषातमोज्योतिष्कृणोतिसूनरी ॥ १ ॥७१

---

* "व्यु१च्छन्ती"-इति ऋग्वेदीयः पाठः, इहत्योपि सायण-सम्मतः परं न क्वापि पुस्तके तथोपलभ्यते ।

---

७१ उत्तरार्च्चिकस्य १,२,१४,१ = ऋग्वेदस्य ५,६,१,१ = ऊहे२१,२,८—१२—१५ = ऊह्ये१,२—५,२ ।

२ १ ३ २ १ ३ २
I प्रताइ। इद्दा। आइ। इद्दा। उवद। शीइ-
१ २ १ ३ २ १ ३ १ र
आयती। उक्था। इद्दा। आ। इद्दा। तीदु। द्दो-
१ ७ १ ७ १ ३ २ १ ३ २
३ताद्दिवा२ः। आद्दिवा२ः। अपो। इद्दा। ओ। इद्दा
१ र१ र १ ७ १ ७ र १
माद्दोवृणुते च। तुषातमा२ः। आतमा२ः। ज्योताइ।
३ २ १ ३ २ र १ ७ १
इद्दा। आइ। इद्दा। क्कणो। तीइसूनरी२। ओनरी-
१
२३४३। ओ२३४५इ। डा॥ २४॥ ७१

"आयती" आगच्छन्ती "व्युच्छन्ती" तमांसि विवासयन्ती वर्जयन्ती "दिवो" द्युलोकस्य सूर्यस्य(१) "दुहिता" पुत्री(२) एवंभूताउषाः "प्रत्यदर्शि" सर्वैः प्रतिदृश्यते (उद्गति पूरणः)

---

I उषसः।

(१)—'यद्यपि द्यौर्नहि सूर्यपर्यायः तथापि द्युवाचक-स्वादि-पदस्य तत्पर्यायत्वाद्-स्यापि तत्वमचतम्। तथाहि—"स्वः, पृश्निः. नाकः, गौः, विष्टप्, नभः-इति षट् साधारणानि"-इति नि० नै०१,४। "साधारणान्युत्तराणि षट् दिवश्चादित्यस्य च"-इति च यास्ककृतं तद्व्याख्यानम् नै० नै०२,१३। वस्तुत आदित्यस्य द्युस्थत्वात् द्युवाचक-शब्देन द्युशब्देन चोपचारात् सुग्रहः। तदुक्तम् "सूर्यो द्युस्थानः" नै० दै० १,५।

(२)—'द्युलोके जायमानत्वात् दिवः दुहिता'-इति वि०। अतएव प्रजापत्यपर-पर्यायस्यादित्यस्य प्रतिदिन मुषसः पश्चात् धावमानत्वात कन्या बलात्कारापवादः।

अथ द्वितीया ।

३१ २३ १२ ३१२
इमाउवान्दिविष्टयउस्राहवन्तेअश्विना ।
३१२३१२ ३१२ ३ ३र ३र
अयंवामह्वेवसेशचोवसूविशंविशᳫंहिगच्छथः ॥ २ ॥ ७२

२र र ३ ५र २र र ३
I इमाउवान्दिविष्टया२३४ऐही । उस्राहवन्तेअश्विना

सैषा "मही" महती । यद्वा मही महत्तमो नैशं तमोन्धकारं (अप उ इति निपातद्वयसमुदायः । अपेत्यस्यार्थे) "अपोवृणुते" अपवृणोति । कथं? "चक्षुषा" दर्शनेन । एवं कृत्वा "सूनरी" । जनानां सुष्ठु नेत्री(३) "उषाः" "ज्योतिः" प्रकाशं "कृणोति" करोति।

"अपो मही वृणुते चक्षुषा"-इति छन्दोगाः । अपो महि व्ययति चक्षसे"-इति बह्वृचाः ॥ १ ॥ ७१

"इमाः" "दिविषृयः" दिवमिच्छन्त्यः प्रजाः ऋत्विजोपि

---

७२ उत्तरार्च्चिकस्य १,२,१५,१ = ऋग्वेदस्य ५,५,२१,१ = आरण्यके ४,१,१५—१६ = ऊहे २१,२,१० = ऊह्ये १,४-५,३ ।

I अश्विनोः साम ।

(३)—'शोभनाः नरः यस्याः स्तावकत्वेन सा सुनरी, शोभनैः स्तावकैर्नरैः सम्बध्येत्यर्थः'-इति वि० ।

अथ तृतीया।

अश्विनौ वैवस्वतावृषी।

२ ३ १ २ ३ १ २ ३ १ २
कुष्ठः कोवामश्विनातपानोदेवामर्त्त्यः।

५र २ र र र ५र २
२३४ऐ ही। अयंवामह्वेवसेशचीवसू२३४ऐ ही। विशंवि-

३ ५र ४
शꣳहिगच्छथा२३४ऐ ही। होपूइ। डा॥२५॥७२

(उद्गतितु चार्थे। हे "अश्विना" अश्विनौ!(१) उस्रौ! वासकौ!(२) "वां" युवां "हवन्ते" आह्वयन्ति। अयमहं वसिष्ठोपि हे "शचीवसू" कर्मधनौ! "वां" युवां "अवसे" ऽस्मद्रक्षणाय युवयोस्तर्पणाय वा "अह्वे" आह्वयामि। किमर्थमेवं प्रजामप्यय अपीत्यादरोक्तिरिति तत्राह। "विशंविशं हि गच्छथः" हि यस्मात् सर्वाः स्तुतिकर्त्रीः प्रजाः प्रति युवां गच्छथः खलु, तस्मादेव मुच्यत इति॥२॥७२

---

(१)—"अश्विनौ यद् व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्यः। अश्वैरश्विनावित्यौर्णवाभः। तत्कावश्विनौ द्यावापृथिव्या वित्येकेऽहोरात्रावित्येके सूर्याचन्द्रमसावित्येके राजानौ पुण्यकृता वित्यैतिहासिकाः। तयोः काल ऊर्द्ध्वमर्धरात्रात् प्रकाशीभावस्यानुविष्टम्भमनुतमोभागो हि मध्यमो ज्योति र्भाग आदित्यः।"-इति नै० दै० ६,१।

(२)—'उस्रेति गोनाम। लुप्तोपमं चेदं दृष्टव्यम् उस्रा इव। यथा गावः स्वान् वत्सकान् हवन्ते आह्वयन्ति तद्वत्' इति वि०।

३ १ २ ३ १र २र ३ २ ३ २ ३ १ ३ १ २
घ्नतावामस्नयाक्षयमाणोंऽशुनेत्थमुत्राद्दन्यथा ॥ ३ ॥७३

४ ५ ४र ५र र ४ १ र २रर १ ७ २
I कुष्ठःकोवामश्विनात्रा । तापानोदे । वामर्त्तीयाः३ ।

१ २ २ ३ २ ३र २ २ १ २ २
होवा३हा३४इ । घ्नता३४वामा१ । स्नाया३ । होवा३हा

३ २ ३र २ १ २ १ २ २
३४इ । क्षपा३४माणाः । आंऽशूना३ । होवा३हा३४इ ।

२ २ ३ २ १ ३ २ ५र र ३
इत्था३४मुवा३त् । उवा२न् । यथा३४औहोवा । ऊ२-

५
३४पा ॥ २६ ॥ ७३

"अश्विना" अश्विनौ ! हे देवा देवौ द्योतमानौ ! "वां" युवां "कुष्ठः" कौ पृथिव्यां वर्त्तमानः "को" मर्त्यः मरण-धर्मा-मनुष्यः स्तोता "तपानः" तापनः प्रकाशको भवति इति शेषः । न कश्चिच्छक्नुयादित्यर्थः । "वां" युवयोरर्थाय "अस्नया" (अस्न-शब्दाङ्गिसो यादेशः(१) व्याप्तैरभिषवसाधनैरश्मभिः(२) "घ्नता" हन्यमानेन अभिषूयमाणेन "अंशुना" सोमेन । यद्वा । अस्मा-

I अश्विनोः संयोजनम् ।

(१)—"सुपांसुलुक् पूर्वसवर्णाच्छेयाडाडाड्यायाजालः । (७,१,३९)

(२)—'अस्नया चुधा' इति वि० ।

अथ चतुर्थी।

प्रस्कण्वऋषिः*।

२ ३ २ ३ १ २ २ ३उ ३ १ २

अयंवाम्मधुमत्तमःसुतःसोमोदिविष्टिषु।

१ २ ३ १ २ ३ १र २र ३ १ २

तमश्विनापिबतन्तिरोअन्ह्यंधत्तꣳरत्नानिदाशुषे॥ ४ ॥७४

३ २ ५र ४ ५ ५ २ १

I अया२४म्। अयंवाम्म। धुमत्ता६माः। सुतः

र ५र १ २ ५ २ ५ २ ३र २

सोमो२दिविष्टिषु। ओ३हा। ओ३हा३४। ओहा।

भिरभिषुतेन "घ्नता" युवामभिगच्छता "अंशुना" सोमेन "क्षय-माणः" क्षीयमाणो यजमानः "इत्थम्" इत्थमेव भवति अत्यन्तं समृद्धो भवतीत्यर्थः। "आदन्" यथा अभिमतान्नरसादिभक्षण-वान् राजादिरिव। स यथा प्रवृद्धा दृष्टान्तविषयो भवति तद्वदयमपि भवतीत्यर्थः॥ ३ ॥ ७३

हे "अश्विना" अश्विनौ! "वां" युवयोः "दिविष्टिषु" दिवएषणेषु यज्ञेषु "अयं" पुरोवर्त्ती सोमः "सुतो" अभिषुतः। की-

---

* 'कुत्सस्यार्षम्'-इति वि०।

---

७४ ऋग्वेदस्य १,४,१,१।

I अश्विनोः साम।

अथ पञ्चमी ।

मेधातिथि-मेध्यातिथी ऋषी* ।

२　३ १ २　३१ २ ३　२ ३ १ २ ३ १ २
आ*त्वासोमस्यगल्दयासदायाचनहञ्जगा† ।
१　२ ३ १र　२र　　३ १र　२र ३ १ २
भूर्णिंम्मगन्नसवनेषुचुक्रुधंकईशानंनयाचिषत् ॥ ५ ॥७५

१　र　र　२　५　१　५　२
तामश्विनापिबतन्तिरोअह्नियम् । ओ३हा । ओ३हा३४ ।
२र २　१　२　५　२　५　१　३र १
ओहा । धत्ता५रा१त्ना २ । ओ३हा । ओ३हा३४ । ओहा ।
१　१　२　५र र　३　५
निदा२३ । पूर्२षा२३४औहोवा । ऊ२३४पा ॥ २७॥ ७४

इयः ? "मधुमत्तमः ।" अतिशयेन माधुर्य्यवान् । "तिरोअन्ह्यं"(१) तिरोभूते पूर्वस्मिन्दिनेऽभिषुतं तं सोमं "पिबन्त" । "दाशुषे" हविर्दत्तवते यजमानाय "रत्नानि रमणीयानि धनानि "धत्त" प्रयच्छतं ।

"दिविष्टिषु" "ऋतावृधे"-इति च पाठौ ॥ ४ ॥ ७४

---

* 'प्रगाथस्यार्षम्'-इति वि० ।

* "मा"-इति । † "गिरा"-इति च ऋग्वेदीयः पाठ ।

---

७५ ऋग्वेदस्य ५,७,१२,५ ।

(१)--अहनिभवम् अन्ह्यम । 'तिरो अन्ह्यं तृतीयसवनिकम् । अथवा तिर इति प्राप्तनाम, प्राप्ते यागाहनि भवः । तिरो अन्ह्यः, तं तिरो अन्ह्यम्' इति वि०

५र र र २ १ ३ ५र र १ ५र
I आत्वासोमा। स्य। गल्दा२या२३४ औहोवा। सदा-
१र २१ १ २ ३ ५ २ १ २र
२याचन्नहञ्जिया२३। भूर्णी ओ२३४वा। मृगन्नसवनेषुचु-

हे "इन्द्र!" "त्वा" त्वां "सवनेषु" यज्ञेषु "सोमस्य" "गल्दया"(१) गालनेन आस्रावणेन। "ज्या" जयशीलया स्तुत्या च (अतएव गिरेति बह्वृचाः पठन्ति(२)) तया युक्तो "अहं" "सदा" सर्वदा "याचन्" याचमानः सन् "आचुक्रुधं" मा चुक्रुधं क्रोधयानि (आ इति प्रतिषेधार्थः, निपातानामनेकार्थत्वात्। अतएव बह्वृचाः मात्वेत्यामनन्ति) बहुशो याच्यमाने त्वयि क्रोधो जायते तं सोमगालनेन स्तुत्या चापनयामीत्यर्थः। कीदृशं त्वां? "भूर्णिं" भर्त्तारं(३) "मृगं न" सिंहमिव भीमं (स्वामिनः इन्द्रस्य

---

I सोमसाम।

(१)—'गल्दा'-इति वाङ्नामसु चतुःपञ्चाशत्मेषु घट्‌कम् (१,११)। 'गल्दा धमनयो भवन्ति गलन मासु धीयते'-इति नैरुक्तम् (६,२४)।

"आत्वा विशन्त्विन्दव आगल्दा धमनीनाम्"—

(ऋ०८म०१अ०१सू०२०मन्त्रार्द्धः)

आगलना धमनीनाम्-इति तु नैगमम्। मात्वा सोमस्य गल्दयेति बह्वृकपठितमन्त्र-व्याख्यानावसरे 'सोमस्य गालनेनेति यास्कश्च।

(२)—ज्याशब्दोऽत्रगिर्वाचीत्यत्र गिरेति बह्वृकपाठ एव मानम्।

(३)—'भ्रमणशीलम्'-इति वि०।

अथ षष्ठी।

देवातिथि* ऋषिः।

१ २ ३ २ ३ २उ ३ १ २
अध्वर्यो द्रावया त्वꣳ सोममिन्द्रः पिपासति।
१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २
उपो नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥ ६ ॥ ७६

१र २ १ र २ १ २
क्रुधम्। कई३शा२३नाम्। नायाचिषत्। इडा२३भा
१
३४३। ओ२३४५इ। डा ॥ २८ ॥ ७५

४ र र ४ १र १
I अध्वर्यो द्रा५वयातुवाम्। सोममिन्द्रा२ः। पिपा-

याचने लौकिकं न्यायं दर्शयति)—लोके को वा पुरुषः "ईशा-नम्" ईश्वरं स्वामिनं न "याचिषत्" न याचेत सर्व एव हि याचते। अतोऽहमपि त्वां स्वामिनं याचे इति भावः ॥ ५ ॥ ७५

हे "अध्वर्यो!" अध्वरस्य नेतस्त्वं "सोमं" द्रावय उत्तरवेदि-लक्षणं स्थानं प्रापय। यद्वा। रसात्मना द्रवण-शीलं कुरु।

* 'देवनातिथिरिति वि॰ पाठः।

७६ ऋग्वेदस्य ५,७,३२,१।

I आजमायवम्।

अथ सप्तमी।

द्वयोर्वसिष्ठऋषिः।

३ २ ३ २उ ३ २ ३ २ ३ १ २
अभीषतस्तदाभरेन्द्र ज्यायः कनीयसः।

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
पुरूवसुर्हि मघवन्बभूविथभरेभरे च हव्यः॥ ७॥ ७७

२ १ ऽर २ १ २ र १ २ र
सा१ती२। उपो२नूनं युयुजे२। षणा१ हारी२। आ-

१ २ ३ २ १ २ ४ ५ ४
चाजा२३गा। मवृत्रहा। औ३होवा। हो५इ। डा॥

॥ २८॥ ७६

अभिषुण्वित्यर्थः। किं कारणमिति चेत्? "इन्द्रः" "पिपासति" सोमं पातु मिच्छति (त्वयैतत्कथमवगतमितिचेत्तत्राह-"वृषणा" वर्षितारौ युवानौ वा। "हरी" अश्वौ "नूनं" अद्य "उपो युयुजे" उपगम्यैव सारथिर्योजितवान् रथे। "वृत्रहा" वृत्रस्य हन्ता(१) इन्द्रश्च "आ जगाम" आगतवान्॥

"उपोनूनं" "उपनूनम्"-इति पाठौ॥ ६॥ ७६

७७ ऋग्वेदस्य ५, ३, २१, ४।

(१)—'वृत्रहा मेघस्य हन्ता'-इति वि०।

५ र　र　१　र　२ १र
I अभीषतस्तदाहाउ । भरा । इन्द्रज्यायः कनीया

२　र १　२ १र　२　१
२३साः । पुरूवसुर्हिमघवन्बभूवार३इथा । भराइभार३-

२　१ २　१　२
रे । चहव्यः । इडा२३भा३४३ । ओ२३४५इ । डा ॥

॥ ३० ॥ ७७

हे "ज्यायो" ज्यायन्निन्द्र ! ("आमन्त्रितं पूर्वं मविद्यमानवदि-तीन्द्रपदस्याविद्यमानवद्भावात् ज्यायइत्यस्य सर्वानुदात्तत्वाभावः । नकारस्य रुत्वं(१) व्यत्ययेन नुमभावो वा(२) "कनीयसः" सतो मम "तत्" प्रसिद्धम् । "अभ्याभर" अभ्याहर । हे "मघवन्" धनवन्निन्द्र ! "पुरूवसुः" बहुभिर्वननीयो "बभूविथ" असि । "भरे भरे" सङ्ग्रामे(३) "च" "हव्यो" ह्वातव्यश्च बभूविथ(४) ॥

"मघवन् बभूविथ"-इति छन्दोगाः । "मघवन्सनादसि"-इति बह्वृचाः ॥ ७ ॥ ७७

---

I समुद्रप्रैयमेधम् ।

(१)—"समस्खुक्तौ (८,३,१)"-इति ।

(२)—"व्यत्ययोबहुलम् (३,१,८५)"-इति ।

(३)—'भरे' इति सङ्ग्रामनामसु पठितं नैघण्टुकम् (२,१७) ।

(४)—'एतदुक्तं भवति—यस्मात् ईश्वरः प्रभुश्च तस्मादाभर्त्तार्थः'-इति वि० ।

अथाष्टमी।

१ २ ३ १ २ ३ २ ३ १ २ ३ १र २र
यदिन्द्र यावतस्त्वमेतावदहमीशीय।
३ २ ३ १ २ ३ १ २ ३ १ २
स्तोतारमिद्दधिषेरदावसोनपापत्वायरꣳसिषं ॥ ८ ॥ ७८

२ १ ४र ५ २र १र र र
I यदिन्द्रा२३यावतस्तुवाम्। एतावदहमीशीया।
र र २ २र १ २ १र
स्तोतारा२३मीत्। दोधिषे। रदावा१सा२उ। नपापार३
५ १ २ ३ ५ ४ ५
४त्वा। यारौवाओ२३४वा। सा५इषो६हाइ ॥ २१ ॥
५ २ २र ३ ४ ५ १ २ १ २ ४ ५
II यदिन्द्रयावतस्तुवाम्। आइता२। वादा३हामी।

हे "इन्द्र!" "यद्" यतो(१) "यावतो" धनस्य "ईशिषे" "एतावत्" (षष्ठ्यालुक्(२)) एतावतो धनस्य "अहमीशीय" ईश्वरो

---

७८ उत्तरार्चिकस्य ८,१,१२,१ = ऋग्वेदस्य ५,३,२०,३ = ऊहे २२,२० = ऊह्ये ५,२०—५,२२।

I,II वैरूपे द्वे।

(१)—'यच्छब्दो यदिशब्दस्यार्थे'-इति वि०।

(२)—सुपां सुलुगित्यादिना।

अथ नवमी ।

नृमेधऋषिः ।

१ २ ३ १ २   ३ १र २र   ३ १ २
त्वमिन्द्र प्रतूर्त्तिष्वभि विश्वा असि स्पृधः ।

१ २   १ २र १   ४ ५र   १ २
शाया३ऽ१२। स्तोतारामी२३त्। दधिषेरदा। वासा३

१ २र १   १ २ १ २ ५   ४
ऽ१२३। नापापात्वा२३। यारौवाओ२३४वा। सा५

५
इषो६हाइ ॥ ३२ ॥ ७८

भवेयम् । हे "रदावसो !" रदति ददाति वसूनीति रदवसुः(३) तादृश हे इन्द्र ततोऽहमस्मदीयं "स्तोतारम्" "इत् दधिषे" धनप्रदानेन धारयेयमेव । "पापत्वाय" चीणत्वाय(४) "न रंसिषं न दद्याम् ।

"स्तोतारमिद्दधिषेरदावसोनपापत्वायरंसिषम्"-इति छन्दोगाः । "दिधिषेयरदावसोनपापत्वायरासीय"-इति बह्वृचाः ॥ ८ ॥ ७८

---

(३)—रदावसो इति दीर्घमध्यपाठोऽस्ति क्वचित् । "द्व्यचोऽतस्तिङः"-( ६,३,१३५,)"-इति तत्साध्यम् ।

(४)—'पापभवाय पापात्मानः'-इति वि० ।

२ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
अशस्तिहाजनितावृत्रतूरसि* त्वं तूर्य तरुष्यतः ॥ ९ ॥ ७९

४ ५ ४ ५ २ ४ ५ १ २ २
I त्वमिन्द्रोहाइ। प्रतूर्तिष्वोवा। अभिविश्वाः।

१ २ १ २ २ २ १ २
असाइस्पा१र्द्धा२ः। अशस्तिहाजनितावृ। त्रातू१रा-

१ २ ३ २ १ २ ४ ५ ४
सा२इ। त्वां तू१र्या२। तरुष्यता। औ३होवा। हो-

५इ। डा ॥ २२ ॥ ७९

हे "इन्द्र!" "त्वं" "प्रतूर्त्तिषु" सङ्ग्रामेषु(१) "विश्वाः" सर्वाः "स्पृधो" युद्धकारिणीः शत्रुसेनाः(२) "अभ्यसि" अभिभवसि किञ्च। हे "तूर्य!" शत्रूणां बाधक इन्द्र! त्वम् "अशस्तिहा" देवानामशस्तीनां हन्तासि। "जनिता" असुरेभ्यः अशस्तीनां

---

* "विश्वतूः"-इत्यपि पाठः क्वचिदृग्वेदीयपुस्तके दृश्यते।

---

७९ उत्तरार्च्चिकस्य ८,१,८,१ = ऋग्वेदस्य ६,७,२,५ = आरण्यके ८,१,२४।

I वैश्वदेवम्।

(१)—प्रकर्षेण तूर्यन्ते हिंस्यन्ते यत्र, स प्रतूर्त्तिः सङ्ग्रामः।

(२)—'स्पृधः'-इति सङ्ग्रामनामसु जनविंशतितमं नैघण्टुकम् (२,१७)। स्पर्धं कुर्वन्ति इति स्पृधयतेः क्विपि स्पृधः सङ्ग्रामकारिणीः सेनाः।

अथ दशमी ।

नोधाऋषिः* ।

१र २र ३ १र २र ३ १र २र ३ १ २
प्रयोरिरिक्त*ओजसादिवःसदोभ्यस्परि† ।
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २
नत्वाविव्याचरजइन्द्रपार्थिवमतिविश्वंववक्षिथ‡ ॥ १० ॥८०

॥ इति द्वितीय-दशति ॥

जनयिता चासि । "तूतुः"(३) सर्वस्य शत्रुवर्गस्य हिंसिता चासि । "तरुषतः" बाधकांश्च(४) बाधमानोसि ॥ ९ ॥ ७९

---

* "मेधसआर्षम्"-इति वि० ।

---

* "प्ररिरिक्त"-इति
† "दिवोअन्तेभ्यस्परि"-इति
‡ "पार्थिवमनुस्वधांववक्षिथ"-इति च
} ऋग्वेदीयाः पाठाः ।

---

८० ऋग्वेदस्य ६,६,११,५ ।

(३)—तूरिति तूर्यतेर्हिंसार्थस्य रूपम् ।

(४)—तरुषतिर्बधकर्मा तस्येदं रूपम्, तथाहि—"वनुष्यतिर्हन्तिकर्मा"-इत्यादि "तरुष्यतिरप्येवं कर्मे"ति नैरुक्तं द्रष्टव्यम् ५,२ । विवरणकारस्तु 'तरुषतिर्वधकर्मा, तरुषन्तु हिंसन्ति ताम् तरुष्यतः (ये त्वां शत्रु हिंसन्ति तान्) प्रतिहिंसेत्यर्थः'-इति व्याचष्टे ।

५ २ २ ५ २ १ ३१ १
I प्रयोरिरिच्चओजसा६ए। दिवः सदोऽभ्यस्परि। न

७ ३१ ६ १ १ ३१ ६ २
त्वाविव्या। औहो३वा। चा। रजः। औहो३वाइ।

१२ २ १ २ १
इपार्थिवाम्। अतिवार३इ३श्वाम्। वावक्षिथ। इडा२-

२ १
३भा३४३। ओ२३४५इ। डा॥ २४ ॥८०

हे "इन्द्र!" यस्त्वं "दिवो" द्युलोकस्य "सदोभ्यः" स्थानेभ्यः(१) परिपर्यन्तेभ्यः "ओजसा"बलेनैव "प्र रिरिचे" प्रकर्षेणातिरिक्तो भवसि(२) (रिचेर्लटि बहुलञ्छन्दसीति श्लुः। प्रत्ययस्वरः) किञ्च। हे इन्द्र! "पार्थिवं" पृथिव्यां भवं "रजो" लोकः "त्वा" त्वां महता स्व-शरीरेण "न विव्याच" न व्याप्नोति (द्यावापृथिवीभ्यामपि स्वतः स त्वं बलेन समर्थोऽसीत्यर्थः) एवम्भूतः स त्वम् अस्मान् "विश्वम्" "अति" अतिक्रम्य "ववक्षिथ"।

---

I पुरीषम्।

(१)—'दिवः अवयवभूतानि सदःस्थानानि तेभ्यः। पञ्चमीनिर्द्देशात् आगत्येति वाक्यशेषः'-इति वि०।

(२)—'रिष हिंसायामित्यस्य मध्यमपुरुषैकवचने एतद्रूपं, यस्त्वं प्रकर्षेण हिंससीत्यर्थः। कान् सामर्थ्याच्छत्रून्'-इति वि०।

वोढुमिच्छ(१) (वहेः सन्नन्तस्य छान्दसे लिटि रूपं मन्त्रत्वादाम-भावः ॥

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने तृतीयस्याध्यायस्याष्टमः खण्डः ॥ ८ ॥

॥ इति बार्हतमैन्द्रम्(१) ॥

असाविदेवमेकोनत्रिंशत्तासु प्रवोमहे ।
त्रिपदोक्तविराडन्यास्त्रिष्टुभोऽष्टोर्ध्वविंशतिः(१) ।
ऐन्द्रीषु तासु तार्क्ष्यस्य स्तुति रेषा त्यमुष्विति ।
पर्वतेन सहेन्द्रस्य गीरिन्द्रापर्वतेत्यपि(२) ॥

---

(१)—'ववक्षिथ'-इति महन्नामसु चतुर्द्दशं नैघण्टुकम् (३,३) अतएव 'महान् भवसी त्यर्थः'-इति वि० ।

(१)—इन्द्रदेवताका बृहतीच्छन्दस्काः सन्तिये मन्त्रास्तेषां प्रकरणं समाप्त मित्यर्थः ।

(१)—असावि देवमित्यारभ्य कोषयेति ऋक्पर्य्यन्ता एकत्रिंशत्, तत्र असावीत्या-रभ्य ततनुरित्यन्तास्तृतीयदशदात्मका नवमखण्डात्मका वा ऋचो दश, ततः अवद्रप्सो इत्यारभ्य ओषधीष्वित्यन्ताश्चतुर्थदशदात्मका दशमखण्डात्मका वा ऋचो नव, ततः त्यमूष्वित्यारभ्य सजीवादित्यन्ताः पञ्चमदशदात्मका एकादशखण्डात्मका वा ऋचो दशेति सङ्कलनयोनत्रिंशत् । तासु ऋक्षु प्रवोमहे-इति तु षोडशतमा, त्रिपदा इयं विराट् इत्युक्ता त्रिपाद्विराट्छन्दस्का इति पूर्वाचार्य्यैः कथितेत्यर्थः । 'अन्याः अष्टो-र्द्धविंशतिः अष्टाविंशत्यृच ऋचः त्रिष्टुभः । इति सम्प्रति व्याख्यास्यमानानामृचां छन्दः-सङ्केतः ।

(२)—ऐन्द्र-पर्व-गतानान्तु प्रकरणफलादैन्द्रत्वं सिद्धमेव, तासु ऐन्द्रीषु ऋक्षु त्यमुषु-इति विंशतितमा ऋक्, एषा तार्क्ष्यस्य मध्यमस्थानाग्निविशेषस्य [तदाह यास्कः—"तार्क्ष्यः त्वष्ट्रा व्याख्यातः (दै०४,२७)"-माध्यमिकस्त्वष्टेत्याऊर्म्मे.के च स्थाने समाम्ना-

तत्र नवमखण्डे—

सैषा प्रथमा।

द्वयोर्वसिष्ठऋषिः।

१२ ३१र २र ३२क२र ३ १२ ३१२
असाविदेवंगोऋजीकमन्धोन्यस्मिन्निन्द्रोजनुषेमुवोच।
१ २ ३१र २र३ २ ३१२३ १२
बोधामसित्वाहर्यश्वयज्ञैर्बोधानःस्तोममन्धसोमदेषु॥१॥८१

२ र र २ ३ ५ १ र २
I असौहोवा३हाइ। वो२३४दे। वाङ्गोऋ। जो-
३ ४ ५ २र र २ ३ ५ १
कमन्धाः। न्यौहोवा३हा। स्मी२३४नी। द्रौजनु।
२ ३ ४ ५ २र र र २ ३ ५ १
षेमुवोचा। बोधौहोवा३हाइ। मा२३४सी। त्वाहरि।

"देवं" दीप्तं(१) "गोऋजीकं" गोभिः संस्कृतं गव्येन मिश्रित-मित्यर्थः(२)। "अन्धः" सोमरूप मन्नम् "असावि" अभिषुतम्।

---

८१ ऋग्वेदस्य५,३,२,१=आरण्यके ३,२९—३०।

I प्राकर्षम्।

तोऽग्निरिति प्राकपूर्णाः (दे०२,१२)] स्तुतिः; किञ्च 'इन्द्रस्यगौरिति सप्तविंशति तमा ऋपिच 'इन्द्रापर्वता'-इति षड्विंशतितमा ऋक्, इयमपि पर्वतेन सह इन्द्रस्य स्तुतिः न केवलेन्द्रस्येत्यर्थः।

(१)—'देवं द्वितीयैकवचन मिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यं, देवस्य इन्द्रस्यार्थाय' -इति वि०।

(२)—गो-शब्देनेह गोविकारं गव्यम्, ऋजीकं च मिश्रम्।

२ ३ ४ ५　२र र र　२　३　५　२ १
अस्वयज्ञैः । वोधौहोवा३हाइ । नार३४स्तो । ममन्ध ।

२　२ ४
सो३४३ । मा३दा५इषुई५६ ॥ २५ ॥

१ २　१ २　२र २　३　५
II आइही३ । आइही । एहिया । ओ२३४वा ।

२　र र　र　१ २　१ २
हाइ । असाविदेवङ्गोऋजीका३मान्धा३ः । आन्धाः ।

३ २　३　५　२　र र
अन्धा । ओ२३४वा । हाइ । न्यस्मिन्निन्द्रोजनुषेमू३-

१ २　१ २　३र २　३　५　२　र
वोचा३ । वोचा । वोचा । ओ२३४वा । हाइ । वो-

र　र　१ २　१ २　२ २　२
धामसित्वाहयंस्था३याज्ञ३ः । याज्ञैः । यज्ञा । ओ२३

५　२　र र र　र　१ २　१
४वा । हाइ । वोधानस्तोममन्धसे।मा३दाइषू३ । आ-

२ ३ २　३　५　२　१ २　१ २
इषु।एषुवा।ओ२३४वा। हाइ । आइही३ । आइही ।

---

II निहवः ।

अथ द्वितीया।

१ २ ३१२ ३१र २र ३१२
योनिष्टइन्द्रसदनेअकारितमानृभिःपुरुहूतप्रयाहि।
३र २ ३ ५ २ ५र र २ १११११
एहिया। ओ२३४वा। हा३४। औहोवा। ई२३४५॥

॥ ३६ ॥ ८१

"ईम्" अयम्(३) "इन्द्रः" "अस्मिन्" अभिषुते सोमरूपेऽन्धसि "जनुषा"(४) स्वभावत एव "न्युवोच" नितरां सङ्गतो भवति(५) (उच समवाये) [अथ प्रत्यक्षस्तुतिः(६)-हे "हर्यश्व!"(७) "त्वा" त्वां "उक्थैः" स्तोत्रैः हविर्भिर्वा "बोधामसि" बोधयामः। "अन्धसः" सोमस्य "मदेषु" "नो" अस्माकं "स्तोमं" स्तोत्रं "बोध" बुध्यस्व॥ १ ॥८१ *

(३)—निरुक्ते तु 'ईम्'-इति पदपूरार्थे व्यवस्थितम्, तथाहि—"अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति" नै०१,९। अत एव ईमिति पादपूरणः'-इति वि०।

(४)—'जनुषेति तृतीयैकवचनमिदं पञ्चम्यर्थस्य स्थाने द्रष्टव्यम्, पञ्चमी-निर्देशाच्च प्रभृतीति वाक्यशेषः, जन्मनः प्रभृति'-इति वि०।

(५)—'उवोच उक्तवान्'-इति वि०।

(६) बोधेति मध्यमपुरुषयोगादित्यर्थः। तथाहि—"अथ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना"-इत्यादि नि०७,२।

(७)—हरी हरिद्वर्णौ अश्वौ यस्य, हे तादृश!।

*॥ इति अष्टमः प्रपाठकः॥

३ १२　३२ १२ ३२३ १२　३१२ ३१ २
असो यथा नो ऽविता वृधश्चिद्दो वसूनि ममदश्च सोमैः ॥२॥८२

४ ५　१　२ १　२र ३ ४ ५
I योनोः । तआइ । द्राइसद । नाअकारी ।

४ ५　१　२　२र ३ ४ ५　४ ५
तामा । नृभाइः । पुरुहूइ । ताप्रयाही । आसाः ।

१　२ १　२र ३ ४ ५　४ ५　१
यथा । नोइअवि । तावृधश्चोत । दादाः । वसू ।

२ १　२　२ ४
नीइमम । दाइ४इः । चाइसो५माई५६इ ॥१॥

१ २ ३ २र　३ ४ ५　४ ५　१ २
II योनिष्टआइ । इसदनाइ । होवा । आकाइ ।

२र ३ ४र ५　४ ५　१　२　२र ३ ४र ५
राइतमानृभीः । होवा । पू । रुहूइ । ताप्रयाही ।

हे "इन्द्र !" "ते" तव "सदने" "सदनार्थं "योनिः" स्थानम् "अकारि" । हे "पुरुहूत" बहुभिराहूतेन्द्र ! "नृभिः" नेतृभिर्मरुद्भिः(१) सार्द्धं "तं" योनिम् "आ प्रयाहि" । "नो"ऽस्माकं "यथा"

---

८२ ऋग्वेदस्य ५,३,८,१ ।

I,II योनिनी द्वे ।

(१)—'नृभिः ऋत्विग्भिः'-इति वि० ।

अथ तृतीया ।

गातुर्ऋषिः* ।

१ २ ३ २ २ १ २ ३ २उ २ १ २ ३ १ २ ३ १ २
अरहं त्समहजोविश्वानित्वमर्णवान्बद्बधानाꣳअरम्णः ।
३ १ २ ३ १ २ ३ २उ ३ २उ ३ २ ३ १ २ ३ १
महान्तमिन्द्रपर्वतंवियद्वःसृजद्धाराअवयद्दानवान्हन् ॥ १ ॥ ८२

४ ५ १ २र ३ २ ३र ४ ५ ४ ५ १ २
होवा । आसोयथा । नोअविता । होवा । वाद्धीः ।
२ ३ ४र ५ ४ ५ १ २ ३ २ ३ ४र ५ ४
चाइहदोवहा । होवा । नाइममदः । चसोमैः । हो-
५ ४
वा । होऽइ । डा ॥ २ ॥ ८२

"असः" भवसि । नोऽस्माकं "वृधस्वित्" वृधे वर्द्धनाय चासः । ("वृधेच"-इति बह्वृचाः) तथा "वसूनि" "ददो" ऽस्मभ्यं देहि । "सोमैः" अस्मदीयैः "ममदो" मादय च ॥ २ ॥ ८२

---

* "गृत्समदो नाम ऋषिः"-इति वि० ।

---

८३ ऋग्वेदस्य४,१,२२,१ ।

४ ५ ४ २ र १ २ १
I अदर्द्दरुत्। समसृजोविखानि। त्वमर्णा२३-

५ २ र र १ २ १र ५ २
४वान्। बद्बधानाँ३अरामणः। महान्ता२३४मी। द्रप-

१ २ १ ५ १ २ १ २र १
र्वतंवियाद्वः। सृजाद्धा२३४राः। अवयद्दान। वा२३न्-

२ १
हा३४३न्। ओ२३४५इ। डा॥ २ ॥

हे "इन्द्र!" "त्वम्" "उत्सम्" उत्स्यन्दमानं मेघं "अदर्दः" विदारितवानसि। तदनन्तरं "खानि" मेघस्योदकनिर्गमनद्वाराणि(१) "व्यसृजः" विशेषेण सृष्टवानसि। किञ्च। "बद्बधानान्" "अर्णवान्" उदकवतो मेघान् "अरम्णाः" "विसर्जयसि" त्वारयसीत्यर्थः (अत्र रम्णातिर्विसर्जनकर्मा(२)) हे इन्द्र! "यत्" यस्त्वं (यदिति लिङ्गव्यत्ययः) "महान्त" प्रभूतं "पर्वतं" मेघं(३) विवृत-

(१)—'खानि आकाशानि उदकाभिगमनशीलानीत्यर्थः।

(२)—अन्यत्र संयमनकर्मेत्याह माधवः।

(३)—पर्वतमिति मेघ-नामसु नवमम्।

४५ ४५ ४५ ४ १र र
II, अदद्‌ उत्समसृजाः। विखानि। त्वमर्णवान्बद्ध-

र र २१ २ १र २१ २
धानाᳩअरा२३म्णाः। महान्तमिन्द्रपर्वतंविया२३द्वाः।

१ २र १२र १२र १ ३ ५र र
सृजाद्धारा२ः। अवा२यद्दान। वा२। या२३४औहो-

३ ११११
वा। हा२३४५न्॥४॥८३

वानसि। "धारा" अपां "वि सृजत्" व्यसृजः विसर्जितवानसि। "यद्" यदा "दानवान्" दनोः पुत्रान्। यद्वा। उदकस्य दातॄन् मेघान् "अवहन्" अभिहतवानसि। [अत्र निरुक्तम्—"अदृणा उत्समुत्सउत्सरणाद्वोत्सदनाद्वोत्स्यन्दनाद्वोनत्तेर्वाव्यसृजोऽस्य खानि त्वमर्णवानर्णस्वत एतानित्यादि(४)]।

"वियद्वः सृजद्धारा अवयद्दानवान्"—"वियद्वः सृजो विधारा अवदानवं हन्—इति च पाठौ॥३॥८३

---

I,II औरुक्षये द्वे।

(४)—इत्यादि पदेनास्यापरांशो ग्राह्यः, तथाहि—(एतानित्यस्यानन्तरम्) "माध्यमिकान्त्वस्यायान् बाबध्यमानानरम्णाः। रम्णातिः संयमनकर्मा विसर्जनकर्मा वा। महान्तमिन्द्र पर्वतं मेघं यद् व्यवृणोर्व्यसृजो ऽस्य धारा अवयन्नेनं दानवं दानकर्माणम्"-इति।

अथ चतुर्थी ।

पृथीवैन्यऋषिः ।

२ १ २ ३ १ २ ३ १ २ ३ १ २
सुष्वाणासइन्द्रस्तुमसित्वासनिष्यन्तश्चित्तुविनृम्णवाजम्।
१ २ ३ १ २र ३ २उ ३ १ २ ३ १ २
आनोभरसुवितंयस्यकोनातनात्मनासह्यामात्वोताः ॥४॥८४

४ ५ ४ ५ ३ २ ३ २ ३ ५ ४ ३
I सुष्वाणासाः । इन्द्रस्तु । मसित्वा । सनिष्य-
४ ५ ३ र र २
न्तश्चित्तुवि । नृ । म्णवा२३४जाम् । आनः । भरा-
३ ५ ४ ५ र ४ ५ ४ ५ २
ओ२३४वा । सुवितंयस्यको । ना । तानात्माना । सह्वि-
र २ २ ४
या । मा३४३ । तू२वोपुता६५६ः ॥ ५ ॥

२ २ २ ३ ५ १र ३ २ ३
II औ२होवा२होइ । सु२३४ष्वा । णासाः । इन्द्रस्तु ।

हे "इन्द्र !" "सुष्वाणासः" सोममभिषुतवन्तो वयं त्वां "स्तुमसि" स्तुमः । हे "तुविनृम्ण" बहुबल बहुधन वा इन्द्र ! "वाजं" चरु-पुरोडाशादि-लक्षणमन्नं "सनिष्यन्तः" दत्तवन्तः सम्भक्तवन्तो वा वयं त्वां स्तुमः । यत एवं अतो हेतोः "नो" ऽस्मभ्यं "सुवितं" सुष्ठु प्राप्तव्यं शोभनं धनम् "आभर" आहर प्रयच्छ । "यस्य" यद्धनमतिप्रियत्वेन "कोना" (कनेः कान्तिकर्मण

८४ ऋग्वेदस्य ८,८,६,१ ।

I,II पार्थे द्वे ।

२ ३ ५ २ २ २ ३ ५ १
मसित्वा । औ३हो२हो३ । सा२३४नी । ष्यन्ताः ।
२ १ २ ३ ४ ५ २ २ २ ३
चौ३त्तुवि । नृम्णवाजाम् । औ३हो३हो३ । आ२३४
५ १ २ २ ३ ४ ५ २ २
नाः । भरा । सुविता३म् । यस्यकोना । औ३हो३
२ ३ ५ १ २ १२ २ २ ४
हो३ । ता२३४ना । त्मना । सह्यिया । मा३४३ । तू३वोपु
ताई५६ः ॥ ६ ॥ ८४

इदं रूपं । पचाद्यच् । अकारस्य व्यत्ययेन ओकारः । प्रथमैक-वचनस्याकारः) कामयमानो भवसि तद्धनमाभरेत्यर्थः(१) । वयं च "त्वोताः" त्वया रक्षिताः सन्तः । "तना" (धननामैतत्(२) विस्तृतानि धनानि "त्मना"(३) आत्मना स्वयमेव अन्य-नैरपेक्ष्येणैव "सह्याम" (सह अभिभवे । धातूनामनेकार्थत्वात्) त्वत्प्रसादाल्लभेमहि ।

"सनिष्यन्तश्चित्तुविनृम्णवाजम्"-इति छन्दोगाः । "ससवांसश्च"-इति बह्वृचाः ।

"कोनातनात्मनासह्याम"-"चाकन्त्मनातनासनुयाम"-इति पाठौ ॥ ४ ॥ ८४

(१)--"किं पुनरभि भवेम ? कोनाः, कुत्सितास्च ते जनाश्च कोनाः । छान्दसत्वात् कु-शब्दस्य क-भावः । पञ्चम्येकवचनस्य छान्दसत्वान्नादादेशः । कोनात् । कुत्सितात् जनाच्च शत्रोरित्यर्थः"-इति वि० ।

(२)—तनेति धननामसु ऊनविंशतितमं नैघण्टुकम् २,१० ।

(३)—"मन्त्रेष्वाङ्यादेरात्मनः । ६ । ४ । १४१ ।"-इत्यात्मन आकारलोपः ।

अथ पञ्चमी ।

सप्तगुर्ऋषिः* ।

३　२ ३ १ २　３ १ २　१ २　३ १ २　३ २उ
जगृह्मा*तेदक्षिणमिन्द्रहस्तंवसूयवोवसुपतेवसूनाम्। विद्मा

३ १ २　३ १ २ ३ १ २ ३ १र २　३ १ २
हित्वांगोपतिꣳशूरगोनामस्मभ्यंचित्रंवृषणꣳरयिन्दाः॥५॥ ८५

५ र र　र र र　५　१　२
I जगृह्मातेदक्षिणमोहाओहाइए। इन्द्रहा२३स्ता-

र १　२　२ ३५　२
म्। वसूयवो। वसूपा३। ताइवसू। नाम्। ओ३।

२　२ २　१र　र २
हा। ओ३। हा३ए। विद्माहित्वा। गोपती३म्।

२ ३ ५　२　२　२ २
शूरगो। नाम्। ओ३। हा। ओ३। हा३ए। अ-

१　२ १　२ ३ ५　२
स्मभ्यञ्चाइ। चा३०वृष। णꣳरयिम्। दाः। ओ३।

२　२ २　१　ऽ　२　२ ५
हा। ओ३। हा३ए। रयाइन्द्रा२३उवा३। ऊ२३४पा।

२र १र २र १र　१ १ १ १　३ १ १ १ १
औहोऔहोवा२३३५उ। वा। ई२३४५ ॥ ७॥

---

* "सहगोरार्षम्"-इति वि० ।

---

* "जगृम्भा"-इति ऋग्वेदीयः पाठः ।

---

८५ ऋग्वेदस्य८,१,३,१ ।

५ ४र ५र ४ ५ र ४र ५ २

II जगृह्मातेदक्षिणम्। औहौहोवाहाइ। इन्द्रा

३ ५ २र१ २ २ २५ २

हार३४स्ताम्। वसूयवो। वसुपा३। ताइवसू। नौ।

३ ५ २ २ १र र २

वाओर३४वा। हाइहाइ। विद्माहित्वा। गोपतीइ

२ ३ ५ २ ३ ५ २ २ १

म्। शूरगो। नौ। वाओर३४वा। हाइहाइ। अस्मभ्य

२ १ २ ३५ २ ३ ५

श्चाइ। चाइ०वृष। णᳲरयिम्। दौ। वाओर३४वा।

२ ५र र ३१ १ १ १

हा३४। औहोवा। ई२३४५॥ ८॥

१ १ १ १र २र १ २

III होई२। होई२। होई२। जगृह्मातेदक्षिणम्।

१ १ १ र१ ५र

इन्द्रहास्ता२म्। हास्ता२म्। हास्ता२म्। वसूयवोर

र १ १ १

वसुप। तेवसूना२म्। सूना२म्। सूना२म्। वि-

१र २र १र २ र १ १ १

द्माहित्वागोपतिम्। शूरगोना२म्। गोना२म्। गो-

१ २ १ २ १ १

ना२म्। अस्मभ्यञ्चित्रवृष। णᳲरयाइन्दा२। आइ-

१ १ १ १

न्दा२ः। आइन्दा२। होई२। होई२। होया२।

३ ५र र ३ १ १ १ १

वा२३४औहोवा। ई२३४५॥ ९॥

---

I, II सौपर्णे द्वे।

४ ५र ४ ५र ४ ५र ५ ऽ
IV आ३औहोइ। आ३औहोइ। आ३औहो६वा। औ-

२ ऽ १ र २ १र २
३होइ। औ३होइ। औ२३होवा। जयूह्माताइ। दक्षिणा३म्।

२ ३ ४ ५ ४ ५ ४ ५ २र१ २
इन्द्रहस्तम्। द्रहस्ताम्। द्रहस्ताम्। वसूयवो। वसुपा३।

१ ३४५ ४ ५ ४ ५ २ १र र
ताइवसूनाम्। वसूनाम्। वसूनाम्। विद्माहित्वा। गो

२ २ ३ ४ ५ ४ ५ ४ ५
पती३म्। भूरगोनाम्। रगोनाम्। रगोनाम्।

२ १ २ १ २ ३ ४ ५ ४ ५
अस्मभ्यञ्चाइ। चा३०वृष। णऽ्रयिन्दाः। रयिन्दाः।

४ ५ ४ ५र ४ ५र ४ ५र ५
रयिन्दाः। आ३औहोइ। आ३औहोइ। आ३औहो६वा।

ऽ २ ऽ २ १ र २ ५र र
औ३होइ। औ३होइ। औ२३होवा३४। औहोवा।

३ १ १ १ १
ई२३४५॥ १०॥

५र र र १ २ १
V हाउहाउहाउ। ओ। होहोवा। ओ। हो

हे "वसुपते"! वसूनां धनानां स्वामिन्निन्द्र! "ते" तव

---

III,IV,V वामप्राणि त्रीणि।

२ १र २ २ ३ ४ ५
होवा। जगृह्माताइ। दक्षिणा३म्। इन्द्रहस्तम्।

४ ५ ४ ५ २र१ २ २
द्रहस्तम्। द्रहस्ताम्। वसूयवो। वसुपा३। ताइ-

३ ४ ५ ४ ५ ४ ५ २ १र
वहूनाम्। वहूनाम्। वहूनाम्। विद्माहित्वा।

र २ २ ३ ४ ५ ४ ५ ४ ५
गोपती३म्। शूरगोनाम्। रगोनाम्। रगोनाम्।

२ १ २ १ २ ३ ४ ५ ४ ५
अस्मभ्यञ्चाइ। त्रा३०वृष। णा२३रयिंन्दाः। रयिन्दाः।

र र र १ २ १ २
हाउहाउहाउ। ओ। होहोवा। ओ। होहोवा।

१ ३ ५र र ३ १ १ १ १
ओ। हो। होर। वार३४। ओहोवा। ई२३४५॥

॥ ११ ॥ ८५

"दक्षिणं" हस्तं(१) "वसूयवो" धनकामा वयं "जगृह्म" गृह्णीमः

---

(१)—यद्यपीन्द्रस्य तेजोरूपत्वात् हस्ताद्यभाव एव सिद्धान्तः तथाप्येव आरोपितत्वेन समाधेयम् ग्रावादीनामचेतन-प्रसिद्धानामपि तथा स्तुति-दर्शनात्। तथाच यास्कः—"अथापि पौरुषविधिकैरङ्गैः संस्तूयन्ते—

"ऋष्वा त इन्द्र स्थविरस्य बाहू।
यत् सं गृभ्णा मघवन् काशिरित्ते ॥"

*** यथो एतत् पौरुषविधिकैरङ्गैः संस्तूयन्त इत्यचेतनेष्वप्येतद् भवति "अभिक्रन्दन्ति हरितेभि रासभिः"-इति "ग्रावस्तुतिः"-इत्यादि नै० दै०१,७।

अथ षष्ठी।

वसिष्ठऋषिः।

३ १ २ ३ १ २ ३ १र २ २र ३ १ २ ३ २ ३ २
इन्द्रंनरोनेमधिताह्वन्तेयत्पार्यायुनजतेधियस्ताः।
३ १ २ ३ १ २ ३ २ ३ १र २र ३ १ २ ३ १ २
शूरोनृषाताश्रवसश्चकामआगोमतिव्रजेभजात्वनः॥६॥८६

२ ३ ५ २ ३ ५ २ १
I इन्द्रन्ना२३४रो। नेमाधा२३४इता। ह्वन्ता-
२ ३ ५ २ ३ ५ २ १
२३इ। यत्पारा२३४याः। यूनाजी२३४ताइ। धिया-

(यथा बहुप्रद अर्थिनोऽस्मभ्यमदत्वा न गन्तव्यमिति हस्तं गृह्णन्ति तद्वत्) हे "शूर" विक्रान्तेन्द्र"! त्वां "गोपतिं" (अत्र वृत्यवृत्तिभ्यां स्वामित्वं बहुत्वं च प्रतिपाद्यते) बह्वीनां गवां गोपतिं "विद्म" जानीम। अतोऽस्मभ्यं "चित्रं" पूजनीयं "वृषणं" वर्षकं "रयिं(२)"धनं "दाः" धेहि॥ ५॥ ८५

---

८६ ऋग्वेदस्य ५,३,११,१ =यजुर्वेदस्य २८,१ =आरण्यके १,२,१—२—१४—१५—२,२,१—२—३—४—५—६—७—८—४,१४—४,२,१-१४-१६—१८-२०-५,४—५,२,१८।

I गौरीवितम्।

(२)—'रयिं गो-लक्षणं धनम्' इति वि०।

२ ३ ५ २ ३ ५ २ १
स्तार३ः। शूरोनार३४र्षा। ताश्रावार३४साः। चका-

२ ३ ५ २ ३ ५ १ ऽ
मार३इ। आगोमार३४ती। व्रजाइभार३४जा। त्वन्ना-

२ २ १ ३ ११११
३उवा३। ए३। उपार३४५* ॥ १२ ॥ ८६

"यद्" यदा(१) "पार्य्याः(२)" युद्धे भरण-निमित्तभूतास्ताः प्रसिद्धाः "धियः" कर्माणि "युनजते" प्रयुज्यन्ते। तदा "नरो" नेतारो "यज्ञानां" सङ्ग्रामाणां वा "नेमधिता" नेमधितौ यज्ञे सङ्ग्रामे वा(३) यमिन्द्रं "हवन्ते" ह्वयन्ति। हे "इन्द्र!" स त्वं "शूरः" "नृषाता" नृणां सम्भक्ता(४)। "श्रवसो" बलस्य अन्नस्य(५) वा "चकामे" चकाने काम्यमाने सति "गोमति" गोयुते "व्रजे" गोष्ठे "नो" अस्मान् "भज" भागिनः कुरु।

"श्रवसश्चकाम"-"श्रवसश्चकाने"--इति पाठौ॥ ६ ॥८६

---

(१)—'यत् यस्मात्'-इति वि०।

(२)—'पार्य्याः पालयितव्याः प्राप्तव्याः'-इति वि०।

(३)—'नेमधितिः' सङ्ग्राम-नामसु त्रयोदशं नैघण्टुकम् (२,१७), यज्ञ-नामसु तु न दृश्यते। विवरणकारस्तु सङ्ग्रामार्थ एव स्वीकृतः।

(४)—'नृषाता—नरो मनुष्याः ऋत्विग्लक्षणास्ते सन्यन्ते सम्भज्यन्ते यत्रेति नृषाति र्यज्ञः। वन षण सम्भक्ताविव्यस्येदं रूपम्। तस्मात परस्य सप्तम्येकवचनस्य आदादेशः। नृषाता—नृषातौ यज्ञ इत्यर्थः'-इति वि०।

(५)—हविर्लक्षणस्येत्यर्थः।

अथ सप्तमी।

गौरिवीतऋषिः।

१ २   ३ १र  २र  ३ १ २  ३ १ २  ३ १ २ ३  १ २
वयःसुपर्णाउपसेदुरिन्द्रम्प्रियमेधाऋषयोनाधमानाः।

१ २ ३  १ २ ३ २ ३ १र   २र  ३ २ ५ २ ३ १ २  ३ २
अपध्वान्तमूर्णुहिपूर्द्धिचक्षुर्मुमुग्ध्या३स्मान्निधयेवबद्धान्॥७॥८७

५ र र   १ र र   २   १ र
I वयोहाहाउ। सुपर्णाउपसेदुराइन्द्रम्। प्रियमे-

र  र ७   २  १ र  र  र २ १  २
धाऋषयोनाधमा२३नाः। अपध्वान्तमूर्णुहिपूर्द्धिचा२३क्षूः।

"वयो" गन्तारः(१) "सुपर्णाः" सुपतनाः आदित्य-रश्मयः "इन्द्रम्" "उपसेदुः" उपसन्नाअभवन्। कीदृशाः? "प्रियमेधाः" प्रिययज्ञाः(२) "ऋषयो" द्रष्टारः(३) "नाधमानाः" प्रज्ञां याच-

८७ ऋग्वेदस्य ८,३,४,५।

I वैदन्वतम्।

(१)—'वयः पक्षिसदृशाइत्यर्थः'-इति वि०।

(२)—मेधइति यज्ञ-नामसु चतुर्थं नैघण्टुकम् ३,१७। प्रियमेधवद्त्रिवदित्यस्य व्याख्यानावसरे तु 'प्रियमेधः प्रिया अस्य मेधा'-इत्यादि यास्कः (३,१७)।

(३)—ऋषिरिति द्रष्टृरूपमिति नैघण्टु-भाष्यादौ। "साक्षात्कृतधर्माण ऋषयो बभूवुः"-इत्यादि नि० नै०१.२०।

१ ऽ २ २ १ २
मुमुग्धि। औ३होऽ३इ। आ२१। स्मा३न्निध। ये३-

२ ४
४३। वा३बा५द्धा६५६न्॥ १८॥ ८७

माना:(४) (याचनप्रकारउच्यते)—हे इन्द्र! "ध्वान्तम्" अन्धकारम् "अपोर्णुहि" परिहर ("अपध्वान्तमूर्णुहीति येन तमसा प्रावृतो मन्येत तन्मनसा गच्छेदपहैवास्मात्तल्लुप्यत"-इत्यैतरेयब्राह्मण-मत्रानुसन्धेयम्) "पूर्द्धि" पूरय(५) "चक्षुः" तेजश्च(६)। "मुमुग्धि" मोचय च "अस्मान् निधयेव बद्धान्"। "निधा" पाश्या भवति पाश्या पाश-समूहः(७)। पाश-समूहेन बद्धान् यथा मुञ्चन्ति तद्वत्। (अत्र "वयो वेर्बहुवचन मित्यादि निरुक्तं(८) द्रष्टव्यम्॥

॥७॥ ८७

---

(४)—नाधमानाः इत्यस्य याचमानाः इत्यर्थः कृतो यास्केनैव नै०४,३।

(५)—"पूर्द्धि पूरय"-इति नि० नै०४,३।

(६)—"चक्षुः ख्यातेर्वा चष्टेर्वा"-इति नि०नै०४,३।

(७)—"निधा पाश्या भवति, यन्निधीयते। पाश्या पाशसमूहः। पाशः पाशयतेः, विपाशनात्"-इति नि० नै०४,३।

(८)—नैगमकाण्डीय तृतीयखण्डम्।

अथाष्टमी ।

वेनोभार्गवऋषिः ।

१ २ ३ २उ ३ १र २र २ १र २र ३ १ २
नाकेसुपर्णमुपयत्पतन्तꣳहृदावेनन्तोअभ्यचक्षतत्वा ।
१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २
हिरण्यपक्षं वरुणस्यदूतंयमस्ययोनौशकुनंभुरण्युम् ॥८॥८८

१ ३ २र १ ५ २
I आ२याम् । अयायम् । औ३हो३इ । आ२इ ।
१र र ३ २ १ ३ १ १ ५ २
ऊ२ । नाकेसुपार्णमुपयात्पतन्ताम् । पतन्तम् । औ३हो३इ ।
१ ३ २र १ ५ २
आ२इ । ऊ२ । आ२याम् । अयायम् । औ३हो-
१ २र र ३ २ १
३इ । आ२इ । ऊ२ । हृदावेनान्तोअभ्यचाक्षतत्वा ।
३ २ ५ २ १
क्षतत्वौ३ । हो३इ । आ२इ । ऊ२ । आ२याम् ।
३ २र १ ५ २ १
अयायम् । औ३हो३इ । आ२इ । ऊ२ । हिर-

---

८८ उत्तरार्चिकस्य ८,२,१३,१ = ऋग्वेदस्य ८,७,८,३ = आरण्यके ३,२,३ ।

I यामम् ।

३ २र १ ३ २र१ २ २
एथपाक्षंवरुणास्यदूताम्। स्यदूतम्। औ३हो३इ।
१ ३ २र १ ऽ २
आ२इ। ऊ२। आ२याम्। अयायम्। औ३हो-
५ र र १ र र ३ २ १
३इ। आ२इ। ऊ२। यमस्ययोनौशकुनांभुरण्यूम्।
३ २ १ ऽ २
भुरण्युम्। औ३हो३इ। आ२इ। ऊ२। आ२-
१ ३ २र १ ऽ २ १
याम्। अयायम्। औ३हो३इ। आ२इ। ऊऽ२।
र २ १ २ १ २
वाहा३१उवा२३। ए३। दिवम्। ए३। दिवम्। ए३।
१ २ १ १११
दिवम्। ए३। दिवा२३४५॥ १४ ॥ ८८

हे "वेन!"(१) "त्वा" त्वां "हृदा" हृदयेन मनसा "वेनन्तः" कामयमानाः स्तोतारः "नाके" अन्तरिक्षे "अभ्यचक्षत" अभि पश्यन्ति तदानीं त्वम् उपगच्छसीति शेषः। कथंभूतं? "सुपर्णं" शोभन-पतनं "पतन्तं" अन्तरिक्षं गच्छन्तं। "हिरण्यपक्षं" हिरण्मयाभ्यां पक्षाभ्या मुपेतम्। "वरुणस्य" जलाभिमानिनो

(१)—'वेनति'-इति कान्तिकर्मसु चतुर्थं नैघण्टुकम्, (२,६) अर्चतिकर्मसु च द्विचत्वारिंशत्तमम् (३,१४)।

अथ नवमी ।

बृहस्पति र्नकुलो वा ऋषिः ।

१ २ ३१ २३२ ३२३ १ २ ३२३ १२ ३ ६ २
ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ।

क २र ३१२ ३ २ ३२३ २ ३१२ ३१ २
सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविव ॥९॥८९

देवस्य(२) "दूतं" चारम् । "यमस्य" नियामकस्य वैद्युताग्नेः(३) "योनौ" स्थाने अन्तरिक्षे अन्तरिक्षे "शकुनं" पक्षिरूपेण वर्त्तमानम्(४) । "भुरण्युं" भर्तारं वृष्टि-दानादिना सर्वस्य जगतः पोषकं(५) (भुरण् धारण-पोषणयोः कण्ड्वादिः । अस्मादौणादिक उ प्रत्ययः ॥ ८ ॥ ८८

---

८९ अथर्ववेदस्य ५,४,१ ।

(२)—वरुणो मेघ-वर्षण-हेतु-भूतो वायु विशेषः "वरुणो वृणातीति सतः"-इत्यारभ्य "वृष्टिर्व्युनत्ति भूमिम्"-इत्यन्तेन यास्कोक्तेः।

(३)—यमशब्दस्य तु नियामकत्वं योगार्थ-लभ्यम् "अग्निरपि यमउच्यते (नि०दै०४, २०)"-इति "तृतीयो अग्निः (नि०दै०४,२१)"-इति च यास्कोक्तेः वैद्युताग्नित्वञ्च लभ्यते तृतीयो अग्निः-इत्युक्तेः तृतीयस्थानो द्युलोकः, तत्स्थः सूर्यरूपोऽग्निरिति च लभ्यते। अतएवाह विवरणकृत्—'यमस्य योनौ, यमः आदित्यः, तस्य योनिः स्थानं मण्डलं, द्युलोके यदा आदित्यमण्डलं तत्र व्यवस्थितम्'-इति ।

(४)—'शकुनं शक्तं योमितः आत्मसात् कर्त्तुं समर्थ मित्यर्थः'-इति वि० ।

(५)—'भुरण्युं भ्रमणशील मित्यर्थः'-इति वि० । 'भुरण्युः'-इति क्षिप्रनामसु चतुर्दशमम नैघण्टुकम २,१५ ।

१ २ २ १ २
I ब्रह्मा । ब्रा२२ह्मा । जज्ञानंप्रथमंपुरास्तात् ।
१ २ २ २ १ २ १
विसाइ । वा२३इसो । मत सुरुचोवेनआवः । सबू ।
२ २ २ १ २ १
सा२३बू । धियाउपमाअस्यवाइष्ठाः । सताः । सा२३-
२ २ १ २ १
ताः । चयोनिमसतश्चवाइवा३४३ः । ओ२३४५इ । डा॥

॥ १५ ॥ ८९

१ ऽ २ १ ऽ २ १ ऽ २ १ २
II ऊवे३हा३इ । ऊवे३हो३इ । हिषा३या । ब्रह्मज-
१ २ १ २ ३ ४ ५ १ १र २ १
ज्ञा । ना३०प्रथ । मंपुरस्तात् । विसीमताः । सुरु-
२ ३ ४ ५ २ १ २ १ र २ ३ ४
चः । वेनआवाः । सबुधियाः । उपमाः । अस्यवि-
५ २ १ २ १ २ ३ ४ ५ १ ऽ २
ष्ठाः । सतश्चयो । नी३मस । तश्चविवाः । ऊवे३हा-

---

I,II ऋतसामनी द्वे ।

१ ५ २ १ २ ५र
इइ। ऊवेइहाइइ। हि। षारैः। आ२३४। औ-

र २ २१ २ २ २१ ३११११
होवा। ए३। ऋतमम्तम् ए३। ऋतमम्तार२३४५म्॥

॥ १६ ॥ ८८

वेनो नाम कश्चित् कमनीयो(१) गन्धर्वः। तथाच शाखान्तरे—"वेनस्तत्पश्यन्नित्यारभ्य गन्धर्वो नाम नित्याम्नातम्।

स च "वेनः" "पुरस्तात्" पूर्वस्मिन् काले "जज्ञानम्" उत्पन्नम् "अभिन्नं" वा "ब्रह्म" ब्राह्मण-जातिरूपं(२) "प्रथमम्" आद्य-शरीरम्। अतोऽस्याः सर्वैं दृश्यमानायाः "सुरुचः" शोभनायाः कान्तेः "आवो" रचितवान् (वसुमित्यनुग्रहसूचकः कश्चिदनुकरणशब्दः तथाविधं शब्दं मुखेनाभिव्यञ्जयन्। ब्राह्मण-शरीर-महत्या कान्त्या योजितवानित्यर्थः) स वेनः "बुध्न्याः" मूलं अन्तरिक्षं वा बुध्नः, तत्र भवाः, अस्योपमाः एतदीय-शरीर-कान्ति-सदृशाः, आदित्य-प्रकाशादि-रूपाः कान्तीः(३) "विष्ठाः" विशेषेण स्थापितवान् तथा "सतश्च" इदानीं विद्यमानस्य च "असतश्च" भविष्यद्रूपत्वेदानीमविद्यमानस्य च "योनिम्" उत्पत्तिकारणं निवास-स्थानं वा "विवः" विवृतवान् निष्पादितवानित्यर्थः ॥ ८ ॥ ८८

(१)—"वेनो वेनतेः कान्तिकर्मणः"-इति नि०१०४,३८।

(२)—'ब्रह्म-शब्देनादित्याख्यं च सूयते'-इति वि०।

(३)—'बुध्न्याः दिशः'-इति वि०।

अथ दशमी।

सुहोत्रऋषिः।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २

अपूर्व्या पुरुतमान्यस्मै महेवीराय तवसेतुराय।

२ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २

विरप्शिने वज्रिणे शन्तमानि वचांस्यस्मै स्थविराय तक्षुः॥१०॥९०

इति तृतीय-दशति॥ ३॥

५ र र र ४ ५ ३ १ २ २ ३ ४ ५ २

I अपूर्व्या औहोहोहाइ। पूरुत। मानियस्मै। म-

१र र २ १ २ ३ ४ ५ २

हेवीरा। याइतव। साइतुराया। विरप्शि। नाइ-

३ ४ ५र २ २ १र ५ २ १र २ १

वज्रिणे। शाइ४३०तमानि। वचांसिया। स्माइस्थ-

"अपूर्व्या" अपूर्व्याणि पूर्वैरकृतानि नूतनानि "पुरुतमानि" बहुतमानि "शन्तमानि" सुखकृत्तमानि "वचांसि" स्तुतिरूपाणि वाक्यानि "अस्मै" इन्द्राय "तक्षुः" ततक्षुः (तक्षतिः करोतीत्यर्थः। कुर्वन्ति स्तोतार इति शेषः। कीदृशाय ?

९० ऋग्वेदस्य ४,७,४,१।

I वारवन्तीयम्।

२ ३ ४ ५　३ ४ ५र　२
वि। रायतन्त्रूः। स्थविरायतन्त्रुः। स्थवि। रा३४३।
२ ४　१ २र ३ १ १ १ १
या३ताप्नुदु६५६ः। स्थविरायतन्त्रू२३४५ः॥ १७॥ ९०

"महे" महते। "वीराय" विविध-शत्रूणां मारयित्रे। "तवसे" तवस्विने बलवते(१)। "तुराय" त्वरमाणाय "विरप्शिने" विशेषेण स्तुत्याय "वज्रिणे" वज्रवते। "स्थविराय" प्रवृद्धाय।

इति श्रीसायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने तृतीयस्याध्यायस्य नवमः खण्डः॥ ९॥

---

अथ दशमे खण्डे—

सैषा प्रथमा:

अस्याः परस्याश्च द्युतानऋषिः*।

१ २ ३ १ २　३ १ २　३ २　३ २　३ १　२　३ १ २
अवद्रप्सअꣳशुमतीमतिष्ठदायानः†कृष्णोदशभिःसहस्रैः।
३ २उ　३ २　३　१ २ ३ २ ३ १　२　३ १ २　३ २
आवत्तमिन्द्रःशच्याधमन्तमपस्नीहितिंनृमणाअधद्राः‡॥ १॥ ९१

---

* 'तिरश्चेफतानस्यार्षम्'-इति वि०।

† "इयानः"-इति,　‡ "स्नीहितीनमणाअधत्त"-इति च ऋग्वेदीय पाठः।

---

९१ ऋग्वेदस्य ६,६,२४,३।

(१)—'तवः' इति बलनामसु चतुर्थं नैघण्टुकम् २,९.

२ ३ ५ २ ३ ५ १
I अवद्रा२३४प्साः। आ ःशूमा२३४तीम्। आ-
२ १ १ ११ २ ३ ५ २ ३
तीइ। ष्ठा२३४५त्। ईयाना२३४ःक्र। ष्णोदाशा२३४
५ १ २ १ १ ११ २ ३ ५
भीः। साह्वाइ। स्वा२३४५इः। अवत्ता२३४मो।
२ ३ ५ १ २ १११ १ २ ३
द्रःशाचीर२३४या। धामाइ। ता२३४५म्। आपःस्नो२३-
५ २ ३ ५ १ ३ २ ५र र
४ह्वी। तिनृमा२३४णाः। अधार्द्रा२३४औहोवा।
२ १ ११ ११
अधाइद्रा२३४५ः॥ १८॥

५ ५ १ २२र २ १ १र २
II अवद्रप्साह्वए। आःशूमतीमतिष्ठा२३त्। ईयां-
३ ४ ५ १ २ ३ २ १ ३ २ ३ ४ ५
नःकृष्णाः। दाशभिःसहस्रा२३इ। आवत्तमिन्द्राः।
१ २ ३र २ १ ३ १ ३र ४ ५ १
शाचियाधमन्ता२३म्। अपास्नोहितीम्। नृमणा२३।
४ ४
अधा५द्रा होप्रइ। डा॥ १९॥

I,II सुरपर्विणी द्वे।

३ ४ ३र ४ ५ ४ ५र ५ २ ३र ४र
I अवद्रोप्सअ॒ᳪशुमतीम् । औ३हो३४इ । औहो-
५ १ २ २ ५ २ ३र ४र ५ ३र
वा । आती३ष्ठात् । औ३हो३४इ । औहोवा । ई-
२ ३ ४ ५ ५ २ ३र ४र ५ १ २
यानःकृष्णाः । औ३हो३४इ । औहोवा । दाश । भा-
३ ४ ५ ५ २ ३र ४र ५ ३र २ ३ ४ ५
इःसहस्रैः । औ३हो३४इ । औहोवा । आवत्तमिन्द्राः ।
५ २ ३र ४र ५ १ २ ४ ५
औ३हो३४इ । औहोवा । शचि । याधमन्ताम् ।
५ २ ३र४र५ ३ २ ३र ४ ५ ५ २
औ३हो३४इ । औहोवा । अपास्नीहितीम् । औ३हो३४इ ।
३र ४र ५ १ २ ५र र २ १ १ १ १ १
औहोवा । नृमा२णा२३४औहोवा । अधा३द्रा२३४५ः ॥२०॥

३ ४ ३र ४ ५ ४ ५र २ २ ४
II अवद्रप्सअ॒ᳪशुमतीम् । ए३ । औ३होपुवा ।
१ २र र १ २ १र २ १ २ १ २र
आता२३४५इषा६५६त् । ईयानःकृष्णोदशभिःसहस्रैः ।
१र २ १ २ ३ ४ ५ ४ ५
आवत्तम् । आइ । द्रा३शचि । याधमन्ताम् । अप-
४र ५ ४ ५र ४ ५ २ १ १ १ १
स्नीहितिनृमणाः । ओवा । अधद्रा३आ२३४५ ॥ २१ ॥९१

I,II स्तोमरश्मि हे ।

(अत्रेतिहास माचक्षते—पुरा किल कृष्णो नामासुरः दश-सहस्र-संख्याकै रसुरैः परिवृतः सन् अंशूमतीनामधेयाया नद्या-स्तीरे अतिष्ठत्। तत्र तं कृष्ण मुदक-मध्ये स्थितम् इन्द्रो बृहस्पति-सहागच्छत्। आगत्य तं कृष्णं तस्यानुचरांश्च बृहस्पति-सहायो जघानेति केचिदन्यथा वदन्ति। तेषां कथा-हेतुः—द्रप्स इत्युदक-कणोऽभिधीयते। स तु सोमः 'द्रप्सश्चस्कंदेत्यादिषु-सोमपरत्वेनोक्तत्वात्(१)। एतत्पदमाश्रित्याहुः—

"अपक्रम्य तु देवेभ्यः सोमो वृत्रभयार्दितः।
नदी मंशुमतीं नाम अभ्यतिष्ठत् कुरुं प्रति।
तं बृहस्पतिनैकेन सोऽभ्ययात्तत्र वृत्रहा।
योत्स्यमानः सुसंहृष्टै र्मरुद्भि र्विविधायुधैः।
दृष्ट्वा तानागतान् सोमः स्व-बलेन व्यवस्थितः।
मन्वानो वृत्रहायान्तं जिघांसु मरिसेनया।
व्यवस्थितं धनुष्मन्तं त मुवाच बृहस्पतिः।
मरुत्पतिं रयिं सोम प्रेहि देवान् पुनर्विभो!।
सोऽब्रवीन्नेति तं शक्रः खड्ग एव बलाद्बली।
इन्द्राय देवानादाय तं पुनर्विधिवत्पुरा।
जघ्नुः पीत्वा च दैत्यानां समरे नवतीर्नव।

---

(१)—निरुक्ताविदश्च। तथाहि—"द्रप्सं स्कन्नं ब्रह्मणा दैवेन, द्रप्सः सम्भृत-प्सानीयो

तदवद्रप्सइत्यस्मिन्नृचे सर्वं निगद्यते। एतदनार्षत्वेऽनादरणीयं भवति। एषोऽर्थः क्रमेण ऋचि वक्ष्यते। तथाचास्य ऋचोऽयमर्थः—

द्रप्सो द्रुतं सरति गच्छतीति "द्रप्सः"(पृषोदरादिः) द्रुतं गच्छन् "दशभिः सहस्रैः" दशसहस्र-सङ्ख्याकै रसुरैः "इयानः" इयमानः "कृष्णः" एतन्नामकोऽसुरः अंशुमतीं नाम नदी मनु "अवातिष्ठत्" अवतिष्ठते। ततः "शच्या" स्व-कर्मणा प्रज्ञाने न वा(२) "धमम्" उदकस्यान्तश्छसन्तम्। यद्वा। जगद्भीतिकरं शब्दं कुर्वन्तं "तं" कृष्णासुर"मिन्द्रो" मरुद्भिः सह "आवत्" प्राप्नोत्। "अध" अनन्तरं पश्चात् "तं" कृष्णासुरं तस्यानुचरांश्च हतवान् इति वदति। "नृमणाः" नृषु मनो यस्य सः। यद्वा। कर्मनेतृषु ऋत्विक्षु एकविधं मनो यस्य स तथोक्तः। तादृशो भूत्वा "स्नीहितिं" (स्नीहितिर्वधकर्मसु पठितः (नि० नै० ३,१९) हिंसित्रीं तस्य सेनाम् "अपद्राः" (द्राति: कुत्सित-गति-कर्मा। स इन्द्रः "अपगमयत्" अवधीदित्यर्थः। तस्यानुचरान् हत्वा तम् असुरं हतवानित्यभिप्रायः॥ १॥ ९१

---

भवति। सर्वे देवा पुष्करे लाधारयन्त। पुष्करमन्तरीचं पोषति भूतानि। उदकं पुष्करं पूजाकरं पूजयितव्यम। इदमपीतरत् पुष्करमेतस्मादेव पुष्करं वा पुष्पं पुष्यतेः"-इति नि० नै०५,१४॥

(२)—शचीति कर्म-नामसु द्वाविंशतितमं पदम् (नै०२,१) प्रज्ञा-नामसु च नवमम् (नै०३,९)।

अथ द्वितीया।

३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १र २र
वृत्रस्यत्वाश्वसथादीषमाणाविश्वेदेवाअजहुर्येसखायः।
३ १ २ ३ १ २ ३ २ ३ २उ ३ १२
मरुद्भिरिन्द्रसख्यन्तेअस्त्वथेमाविश्वाःपृतनाजयासि ॥ २ ॥९२

I हा३। ओ३हा३। ओ३हा३। हाइ। वृत्रस्यत्वा।
श्वसथात्। ईषमाणाः। विश्वेदेवाः। अजहू३ः। येस-
खायाः। मरुद्भिराइ। द्रा३सखि। यन्तेअस्तू। अथे
मावाइ। श्वा३:पृत। नाजयासी। हा३। ओ३हा३।
ओ३हा३। हा३४। औहोवा। आ औ३हो२३४५ ॥२२॥

II होये३। हयाये३। हया। औहो२३४वा।
हाइ। वृत्रस्यत्वा। श्वसथात्। ईषमाणाः। विश्वे-

९२ ऋग्वेदस्य ६,६,२३,२।

I,II घृषतो मारुतस्य सामनी द्वे।

र  — १  २ ३ ४ ५  २१  २
देवाः। अजहू३ः। येसखायाः। मरुद्भिराइ। द्वा३-

१  २ ३र ४ ५  २ १र र  २ १  २ ३
सखि। यन्तेअस्तू। अथेमावाइ। श्वा३ःपृत। नाज-

४ ५  १ २  २ १ २  २  ३र  ५
यासी। होये३। हयाये३। हया। औहोर३४वा।

२  र५ र  १ २ २  १ २  १ १ १ ११
हा३४। औहोवा। आऔ३हो। आऔ३हो३३४५॥

॥ २३ ॥ ९२

हे इन्द्र! तव ये "विश्वदेवाः" प्राक् सखायः सङ्ग्रामे सखित्वं कुर्यामेति मित्राण्यभवन्। सर्वे देवाः "वृत्रस्य" वृत्रासुरस्य "श्वसथात्" (श्वसेरौणादिकोऽथप्रत्ययः ( , , )। सर्वान् आगच्छतो दृष्ट्वा तेषां भीत्युत्पादनाय वृत्रासुरः श्वास मकार्षीत्) श्वासाद्भीताः सन्तः अतएव "ईषमाणाः" सर्वतः पलायमानाः "त्वा" त्वाम् "अजहुः" सङ्ग्रामे त्यक्तवन्तः। एव सति हे इन्द्र! "मरुद्भिः" सह "सख्यं" सखिभावः "ते" तवास्तु। ये मरुतस्त्वां न परित्यजन्ति तैः सहेति। "अथ" अनन्तरम् "इमाः" विश्वाः सर्वाः "पृतनाः" शत्रुसेनाः "जयासि" स्व-बलेनाभि-

अथ तृतीया।

बृहदुक्थऋषिः।

३ १ २ ३ १२ २२ ३ १२ २२ ३ १ २ ३ १ २
विधुन्दद्राणꣳसमने बहूनांयुवानꣳसन्तंपलितोजगार।
३ १ २ ३ १ २ ३ २उ ३ २ ३ १२ २२
देवस्यपश्यकाव्यंमहित्वाद्याममारसह्यःसमान ॥ ३ ॥ ९३

४ ५ १ ७ २ १ २ ३ ४
I वीधूम। दद्रादद्रा। णा३ꣳसम। नाइबहु-
५ ४ ५ १ ७ २ १ २ ३
नाम्। यूवा। नꣳसानꣳसा। ता३०पलि। तोज-
४ ५ ४५ १ ७ २ १२ २ ३ ४
गारा। देवा। स्यपास्यपा। श्या३कावि। यम्महि-

भवसि(१) (अनेन वृत्रघ्नं तमिन्द्रमाह(२)। अत्र मन्त्रे "इन्द्रो वै वृत्रं हनिष्यन्"-इत्यादि ऐतरेय-ब्राह्मण मनुसन्धेयम्॥२॥ ९२

---

९३ उत्तरार्चिकस्य ९,१,७,१=ऋग्वेदस्य ८,१,१९,५=अथर्ववेदस्य १४,२६,९।

(१)—'वृत्रस्य' मेघस्य (क) 'श्वसथात्' आमर्षणात् गर्जितशब्दादेवेत्यर्थः 'ईषमाणाः' पलायन्तः 'विश्वे देवाः' सर्वे देवाः 'अजहुः त्यक्तवन्तः, के? उच्यतेऽत्र—'सखायः' ये तव सखीभूता आसन्; केवलैर्मरुद्भिः (ख) हे इन्द्र! 'सख्यं' 'ते' तव 'अस्तु' (लोडयं लडर्थे द्रष्टव्यः)'-इत्यादि वि०।

(क)—वृत्रः इति मेघ-नामसु अष्टाविंशति पदम् नै०१, १०।

(ख)—"मरुतः मितराविणो वा मितरोचिनो वा महद्द्रवन्तीति वा"-इत्यादि नि०दै०५,१३।

(२)—एष एव मन्त्रः पौराणिक-वृत्रोपाख्याने वीजमिति भावः।

५　४ ५　१ ७　२ १　२
त्वा । आद्या । ममाममा । रा३सद्दि । या३४३: ।

२ ४
सा३मा५ना६५६ ॥ २४ ॥

२　३　३ ११११　२ १
II हा‍उ४ । आ४५ । हा‍उ । हा‍उ२३४५ । विधुं-

२　१　२ ३ ४ ५　२ १र
दद्रा । णा३उसम । ना३बहूनाम् । युवान‍उमा ।

२　१　२ ३ ४ ५　२र १　२　१र
ता३०पलि । तीजगारा । देवस्यपा । श्या३कावि ।

२ ३ ४ ५　३　३　३ ११ ११
यम्माहित्वा । हा‍उ४ । आ४५ । हा‍उ । हा‍उ२३४४ ।

२ १र　२ १　२　२ ४
श्रद्यामममा । रा३सद्दि । या३४३: । सा३मा५ना६५६॥

॥ २५ ॥ ९३

अनया कालात्मक इन्द्रः स्तूयते—“विधुं” विधातारं सर्वस्य युद्धादेः कर्त्तारं(१) (वि-पूर्वो दधातिः करोत्यर्थे) तथा “समने” (अनन मनः प्राणनं। सम्यगनोपेते) सङ्ग्रामे(२) “बहूनां” शत्रूणां

---

I,II सोमसामनी द्वे ।

(१)—‘दृष्टि-प्रदानादिना उपकरणेन सर्वजगतः धारयितारम्’-इति वि० ।

(२)—‘समनम्’ इति सङ्ग्राम-नामसु षोडशं नैघण्टुकम् २,१७ ।

अथ चतुर्थी।

द्युतानऋषिः।

२ ३ २३१२३ १ २ ३ १ २ ३ १२
त्वᳪँ ह्यत्यशत्रुभ्योजायमानोशत्रुभ्योअभवःशत्रुरिन्द्र।
३१२ २२ ३ १२ २२ ३ २ ३ १ २ ३ १ २
गूढेद्यावापृथिवीअन्वविन्दोविभुमद्भ्योभुवनेभ्योरणन्धा॥४॥९४

"दद्राणं" द्रावकम्। ईदृक्सामर्थ्योपेतमपि "युवानं" सन्तम्। "पलितोजगार"(३) निगिरतीन्द्र-कृपया। एव मुक्त-लक्षणं वक्ष्यमाण-लक्षणं च "देवस्य" कालात्मकस्येन्द्रस्य "महित्वा" महत्त्वेनोपेतं "काव्यं" सामर्थ्यं(४) पश्य हे बृहदुक्थ! (ऋषिःस्वात्मानमामन्त्र्य वदति—) तथा यो जरां प्राप्तोऽद्य "ममार" म्रियते "स" "ह्यः" परेद्युः "समान" सम्यग् जीवति पुनर्जन्मान्तरे प्रादुर्भवतीत्यर्थः(५)॥ ३ ॥ ९३

---

९४ ऋग्वेदस्य ६,६,३५,१।

(३)—'पलितः, पलितत्वं वृद्धत्वस्योपलक्षणम्. वृद्धः सन् जगार, गृ स्तुताविन्दस्य उत्तमपुरुषस्यैकवचनमिदम् स्तौमीत्यर्थः'-इति वि०।

(४,—'कविर्मेधावी, तस्य भावः काव्यं कवित्व मित्यर्थः, कीदृशं पुनः कवित्वम्? उच्यते—महित्वा महत्त्वेन स्वमाहात्म्येनेत्यर्थः'-इति वि०।

(५)—यास्कस्त्विम मेवं व्याचष्टे—" 'विधुं' विधमनशीलं 'दद्राणं' दमनशीलं 'युवानं' चन्द्रमसं 'पलितः' आदित्यो 'जगार' गिरति स ह्यो म्रियते स दिवा समुदित त्यधिदैवतम्। अथाध्यात्म—'विधुं' विधमनशीलं 'दद्राणं' दमनशीलं 'युवानं' महान्तं 'पलितः' आत्मा गिरति रात्रौ म्रियत रात्रिः समुदितेत्यात्मगतिमाचष्टे"-इति नि० पू०२,१८।

५र र ४ २ १ २ १ २र १र २र ३ ५र
I औहोइतुवाम् । हत्यत्सप्तभ्योजायमानार३४: । औ-
र ४ १ १र १ २ ३ ५र र र ४
होअशा । त्रुभ्योअभवः शत्रुरिन्द्रा२३४ । औहोइगढे ।
१र र २ १र २ ३ ५र र ४ १ २र
द्यावापृथिवीअन्वविन्दा२३४: । औहोइविभू । मद्वगो-
१ र र १ ३ ११ ११
भुवनेभ्योरणन्धा२३४५: ॥ २६ ॥

४ ३ २ ३ ५ २ १ २र १र २र
II त्वोहाइ । हत्यौवाओ२३४वा । सप्तभ्योजायमा ।
१ २ १ २ ११११ ४ ३ २ ३ ५
नोवा३ । औवा२३४५ । ओणोहाइ । त्रुभ्यौवाउ२३४वा ।
१ २ १ २ १ २ ३ २ १११ र ४
अभवःशत्रुरि । द्रोवा३ । ओवा३४५ । गढोहाइ ।
२ ३ ५ २ १र २ १ २ १ २ १११
द्यौवाओ२३४वा । पृथिवीजन्ववि । दोवा३ । ओवा३४५ ।
४ ३ २ ३ ५ १ २र १ २
विभोहाइ । मद्वयौवाओ२३४वा । भूवने । भ्योवा३ ।
१ २ १११ ४ ४
ओवा३४५ । रणापुन्धाः । होपुइ । डा ॥ २७ ॥ ९४

---

I,II इन्द्रवज्रे द्वे ।

अथ पञ्चमी।

वामदेवऋषिः।

३ १र २र३ १ २ ३ १ २ ३ १ २ ३२ ३ १ २

मेडिन्नत्वावज्रिणम्भृष्टिमन्तम्पूरुधस्मानंवृषभꣳस्थिरप्स्नुम्।

३ २र ३ १ २ ३ १र २र ३ १ २ ३ १ २

कराण्यर्यस्तरुषीर्दुवस्युरिन्द्रद्युक्षंवृत्रहणंगृणीषे॥ ५ ॥९५

हे "इन्द्र!" "त्वं ह" त्वं खलु "त्यत्" तदेतत् कर्म कृतवानसि। किं तदुच्यते? "जायमानः" त्वं प्रादुर्भवन्नेव "अशत्रुभ्यः" शत्रु-रहितेभ्यः "सप्तभ्यः" कृष्ण-वृत्र-नमुचि-वराहादिभ्यः सप्तभ्यो बलवद्भ्यः प्राणिभ्यः "शत्रुः" "अभवः" सप्तभ्यः पूर्भ्यः शत्रुः शातयिता दारयिता अभवः (सप्त यत्पुरः शर्म-शार-दीर्दर्त इति हि निगमः) अथवा सप्तभ्यः सप्त होतृ-प्रभृतयो होत्रकाः, तदर्थं यज्ञेषु प्रादुर्भवन्नेव कर्म-विघ्नकारिभ्यः शत्रुरभवः। किञ्च। हे इन्द्र! त्वं "गूढे" संवृते द्यावापृथिव्यौ सूर्यात्मना प्रकाश्य अनुक्रमेण ते "अविन्दः" अलभथाः तथा "विभुमद्भ्यो" महत्त्व-युक्तेभ्यः "भुवनेभ्यो" लोकेभ्यः "रणं" रमणं "धाः" धारयसि विदधासीत्यर्थः॥ ४॥ ९४

I मेडीम् । नत्वावज्रिणम्भृष्टिमा२३न्ताम् । पुरु-
धस्मानंवृषभꣳस्थिरा२३प्स्नुम् । करोष्यर्यस्तरुषाइर्दुवार३-
स्यूः । आइन्द्रद्युत्तम् । वृत्रा२३ । हा२णा२३४औहो-
वा । गृणीश्षे२३४५ ॥ २८ ॥

II मेडिन्नत्वा । वा३४औहो । ज्राइ । णम्भाष्टीइ-
मौ । वा३२३४ । ताम् । पुरा३४औहो । धस्मान
वृ । षभꣳस्थाइरौ । वा३२३४ । प्स्नूम् । करा३४-
औहो । षिअर्यस्त । रुषाइर्दूवौ । वा३२३४ । स्यूः ।
इन्द्रा३४औहो । द्युत्तम् । वृत्रा२३ । हा२णा२३४
औहोवा । गृणीषे२३४५ ॥ २९ ॥ ९५

---

I,II भृष्टिमतः सूर्य्यवर्चसः सामनी द्वे ।

हे "इन्द्र!" "दुवस्युः" दुवः परिचरणं स्तुत्यादि-लक्षणं(१) तदिच्छुस्त्वं यतः "अर्यः" अरीन् अस्मद्विरोधिनः(२) "तरुषीः"(३) तारकान् जेतॄनस्मान् करोषि (यद्वा। तरुषीः तरण-स्वभावात्। पक्ष-द्वयेऽपि लिङ्ग-व्यत्ययः। अर्यः अरीनस्माकं शत्रून् करोषि उपक्षीणानिति शेषः) अतः "मेडिं न" (मेड़िरिति-वाङ्नाम) [नै०१,११,१८] माध्यमिकीं वृष्टि-प्रदां वाचमिव तां यथावृष्ट्यर्थं स्तुवन्ति तद्वत्(४) "त्वा" त्वां "गृणीषे" स्तोत्र मुच्चारयामि स्तौमि(५) कीदृशं त्वां? "वृत्रहणं" वृत्रस्यासुरस्य मेघस्य वहन्तारं। "द्युक्षं"(६)द्युलोके वर्त्तमानम्। "पुरुधस्मानं" बहुना मुदकानां धारकं(७) (यद्वा। वर्ण-व्यत्ययः(८)। पुरूणां बहूनां दासयितारं शत्रूणां क्षपयितारं) "वृषभं" कामानां वर्षकम्(९)। "स्थिरप्स्नं" स्थिररूपं। न ह्यीन्द्रस्य रूपं कदाचिदपि प्रच्युतं भवति (यद्वा। स्थिराणां शत्रूणां भक्षकं विघातिन

---

(१)—'दुवस्यति'-इति परिचरण-कर्मसु पञ्चमं नैघण्टुकम ३,५।

(२)—'अर्यः'-इति ईश्वर-नामसु द्वितीयं नैघण्टुकम् २,२२। अतएव 'अर्यः ईश्वरः'-इति वि०।

(३)—'तरुषमिति वधकर्म वधेन सङ्ग्रामो लक्ष्यते, सङ्ग्रामिमित्यर्थः'-इति वि०।

(४)—'चन्तर्णीत-मत्वर्थञ्च द्रष्टव्यम्, वाग्मिन मित्यर्थः'-इति वि०।

(५)—'गृणीषे मध्यमपुरुषैकवचनमिदम् उत्तमपुरुषैकवचनैकस्य स्थाने द्रष्टव्यम्' इति वि०।

(६)—दिवि द्युलोके क्षियति निवसति इति द्युक्षः, तम्।

(७)—'पुरुइति धननाम, धस्मान मिति धसे हसने इत्यस्येदं रूपम्'-इति वि०।

(८)—दस्मानमित्येवं दकारवर्णे पठितव्ये धस्मानमिति धकारवर्णपाठो वर्णव्यत्ययः

(९)—'वर्षणाद् वृषभः'-इत्यादि नैरुक्तम् दै०३,२२।

अथ षष्ठी।

वसिष्ठऋषिः।

१ २ ३ १ २ ३ १ २   ३ १ २ ३ १ २ ३ १ २
प्रवोमहेमहेवृधे*भरध्वम्प्रचेतसेप्रसुमतिंकृणुध्वं।

१ २ ३ १र २र   ३ २
विशःपूर्वीःप्रचरचर्षणिप्राः॥ ६ ॥ ९६

५ ४  १ र २ र र  १ २ २  १
I प्रवाः। माहेमहेवृधे। भराधू३वाम्। प्रचोइ-

२ १  २ ३  ५  १  ३
तसाइ। प्रासूमार३४तोभ्। कृणुध्वम्। इहा२वा२३-

मित्यर्थः।) "वज्रिणं" वज्रवन्तम् "भृष्टिमन्त" ग्रच र्णां भर्जनवन्त(९) ॥ ५ ॥ ९५

---

* "महिवृधे"-इति, "चरा चर्षणि प्राः"-इति च ऋग्वेदीय पाठः।

---

९६ उत्तरार्चिकस्य ८,१,११,१ = ऋग्वेदस्य ५,२,१६,४ आरण्यके ४,२,१३।

(९)—'भृष्टिशब्देन शिखराण्युच्यन्ते, तानि चात्र बहुशिखराणि परिगृह्यन्ते, तैरुद्दन्तम्'-इति वि०।

५ १ २ १ २ १
४इ्श्रा:। पूर३वीं:। प्रचा। रार३चा। षणाइ।

२ ४ ५ ४
प्रा। औ३होवा। होपुइ। डा॥ २०॥

३ ११११ २र ३ ५ ३ २
II हुं२३४५। प्रवोमहाइमार२३४हे। वृधा३४३इ।

२ २ ५ ३ ११११ २ ३ ५
भरार३४ध्वाम्। हुं२३४५। प्रचेतसाइप्रार३४ह्व।

३ २ २ ३ ५ ३ ११११ २ र
मता३४३इम्। कृणू२३४ध्वाम्। हुं२३४५। विश्रःपू-

३ ५ ३ २ २ २ ५ २ १
र्वीइःप्रार३४चा। रचा३४३। षणा२३४इप्राः। हुं२

१ ११ र र ४ ५ ५ ३ ११११
३५। हाउहौहोवाई। हाउवा। ई२२४५॥ २१॥ ९६

हे अस्मदीयाः पुरुषाः! "वो" यूयं "महेवृधे" महतां धनानां वर्द्धयित्रे "महे" महत इन्द्राय "प्रभरध्वं" सोमान् प्रणयत। "प्रचेतसे" प्रकृष्ट-ज्ञानाय इन्द्राय "सुमतिं" सुष्टुतिं च[१] "प्रकृणुध्वं" प्रकुरुत।

---

I,II अङ्कुशे द्वे।

(१)—'मन्यते इत्यर्चतिकर्मणः (नै० ३,१४,१८) सुशब्दः स्तुत्यर्थः; शोभनां स्तुतिमित्यर्थः'-इति वि०।

अथ सप्तमी ।

विश्वामित्रऋषिः ।

२ १ २ २ १ २ ३ १ २ ३ २उ ३ १ २ ३ १ २
शुनꣳहुवेममघवानमिन्द्रमस्मिन्भरेनृतमंवाजसातौ ।
३ १ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ ३ १ २
शृण्वन्तमुग्रमूतयेसमत्सुघ्नन्तंवृत्राणिसञ्जितंधनानि*॥७॥ ९७

५ ४ ५ र ४ ५र ४ २ १ र
I शुनꣳहुवेममघवानमिन्द्राम् । अस्मिन्भरेनृत-
र २ १ २ १ र र २ १ २
मंवाचसा२३ताउ । शृण्वन्तमुग्रमूतयेसमा२३त्सू ।

अथ प्रत्यक्ष-स्तुतिः(१) । हे इन्द्र ! "चर्षणिप्राः"(२) कामैः प्रजानां पूरयिता त्वं "पूर्वीः" हविषां पूरयित्रीः "विशः" प्रजाः "प्रचर" अभिगच्छ ॥ ६ ॥ ९६

---

* "धनानाम्"-इति ऋग्वेदीयः पाठः ।

---

९७ ऋग्वेदस्य ३,२,४,६ ।

I भारद्वाजम् ।

(१)—प्रचरेति मध्यमपुरुषयोगात् ।

(२)—चर्षणयो मनुष्याः नै०१,२,८ ।

१ २ १ २ २ १ २
घ्न। तंवार२३र्वा३। होवा३हा। णिसञ्जितम्।

१ २ १ २ २ १
धना२३नी३। होवा३हा३४३इ। ओ२३४५इ। डा॥

॥ ३२ ॥ ९७

हे "इन्द्र!" "वाजसातौ" वाजस्यान्नस्य साति र्लाभो यस्मिन् सोऽयं वाजसातिः तस्मिन् "भरे" (बिभ्रति जय-लक्ष्मी मनेन योद्धार इति भरः संग्रामः तस्मिन्) सङ्ग्रामे "शून" शूनम् उत्साहेन प्रवृद्धं(१) "मघवान" धनवन्तम् अतएव "इन्द्र" निरतिशयैश्वर्य्यसम्पन्नं "नृतमं" सर्वस्य जगतोऽतिशयेन नेतारं त्वां "हुवेम" कुशिकावयं यज्ञार्थं मावहयेमा। तथा "शृण्वन्तम्" अस्माभिः क्रियमाणां स्तुतिं शृण्वन्तम्। "उग्र" शत्रूणामुद्गूर्णं। "समत्सु" सङ्ग्रामेषु(२) "वृत्राणि" वृत्रोपलक्षितानि सर्वाणि रक्षांसि "घ्नन्त" हिंसन्तं। "धनानि" शत्रु-सम्बन्धीनि सञ्जितं सम्यग् जेतारं त्वाम् "ऊतये" रक्षणाय वय मावहयेम॥ ७॥ ९७

---

(१)—'शूनं सुखं (नै० ३,६,११), सुखकरमिन्द्र मिति वि०।

(२)—'समत्सु'-इति सङ्ग्रामनामसु द्वाविंशतितमं नैघण्टुकम् २,१७।

अथाष्टमी ।

वसिष्ठ ऋषिः ।

२ ३ १ २   ३ १ २ ३ १ २
उदु ब्रह्माण्यैरत श्रवस्येन्द्रꣳ समर्यें मह्या वसिष्ठ ।
१र   २र ३ १ २   ३ १ २   ३ २ ३ १ २ ३ १ २
आ यो विश्वानि श्रवसा* ततानोपश्रोता म ईवतो वचाꣳसि ॥ ८ ॥ ९८

१ २र १ २ ५ २ २ १ २
I दिवया । ओवा । औ३होइवा । उदुब्रह्मा । णी३-
१र २ ३ ४ ५ २ १ २ २ २ ३ ४
ए र । तश्रवस्या । इन्द्रꣳसमा । र्यें३मह्य । यावसि-
५ २र १र २ १ २ ३ ४ ५ १
ष्ठा । आयोविश्वा । नी३श्रव । सांतताना । दिव-
२र १ २ ५ २ २ २ १ २ १र
या । ओवा । औ३होइवा । उपश्रोता । मईव ।
२ २ ४
तो३४३ । वा३चा५ꣳसा६५६इ ॥ २२ ॥ ९८

---

* "शवसा"-इति ऋग्वेदीयः पाठ ।

---

९८ ऋग्वेदस्य ५,२,७,१ = आरण्यके ४,२,८-१० ।

I वैश्वदैवम् ।

अथ नवमी।

गौरिवीतिर्ऋषिः।

३ १र २र३ १र २र ३ १र २र३ १र २र
चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्चच्छद्यात्।

"अवस्या" अन्नेच्छया(१) "ब्रह्माणि" स्तोत्राणि हवींषि च इन्द्रार्थम् "उदैरत" सर्वे ऋषय इति शेषः(उदितिपूरणः(२) हे वसिष्ठ! त्वमपि "समर्ये" यज्ञे(३) "इन्द्र" "महय" स्तोत्रेण हविषा च पूजय। अपिच "यइन्द्रो" "विश्वानि" भुवनानि "अवसा" अन्नेन कीर्त्या वा "आततान" सः "ईवतः"(४) उपगमनवतो "मे" मम "वचांसि" स्तुति-रूपाणि वाक्यानि "उपश्रोता" भवतु॥ ८॥ ९८

(१)--अवोऽन्नमिति नरुक्तम्। 'अवस्या अवणीयाणि उत्कृष्टानीत्यर्थः'-इति वि०।

(२)—'अथ ये प्रवृत्तेऽर्थे मिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति, पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति'-इति नै०१,९।

(३)—'समर्ये सङ्ग्रामस्थानीये यज्ञे'-इति वि०। 'समर्ये' इति सङ्ग्रामनामसु चयोविंशतितमं नैघण्टुकम् २,१७।

(४)—'ईवतः ईन्वतेर्व्याप्तिकर्मणः, एतद्रूपं व्याप्तिमतः, अशेष-गुणप्रकाशनस्येत्यर्थः। कस्य पुनर्व्याप्तिमतः उपश्रोता! उच्यते—वचांसि, प्रथमाबहुवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम्, वचसः वचनस्येत्यर्थः। यो विश्वानीति पुरस्ताच्छन्दसाध्याहृत्यैक-वाक्यता योजयितव्या'-इति वि०। 'ईन्वति' 'इन्वति' च पाठभेदेन व्याप्तिकर्मसु प्रथमं नैघण्टुकम् २,१८।

३ १र २र ३ २र ३ २ ३ १र २र ३ १ २
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु॥ ९॥९९

॥ चतुर्थं-दशति॥

५ ४ ५ र ४ र ५ ४ २ १र र २
चक्रं यदस्याप्स्वा निषत्ताम्। उतो तदस्मै मध्विच्च-

१ २ १र २१ २ १ र
क्षार्२३द्यात्। पृथिव्यामतिषितं यदू२३धः। पयोगो२३-

"अस्य" इन्द्रस्य "चक्रम्" आयुधं(१) अप्सु" अन्तरिक्षे "आ" सर्वतो "निषत्त" निषसामासोऽन्मेघ-हननार्थम्। "उतो" तत् अपिच "अस्मै" इन्द्राय "मध्वित्" उदकमपि(२) "चच्छद्यात्"

---

९९ ऋग्वेदस्य ८,३,४,३।

I पुरीषम्।

(०)—"चक्रं चकते वा चरते वा क्रामते वा"-इति नि० नै०४,२७।

(१)—'आप'-इति अन्तरीक्षनामसु अष्टमं नैघण्टुकम् १,४।

(२)—इच्छन्दोऽप्यर्थः। 'मधु' इति उदकनामसु एकादशं नैघण्टुकम् १,१२। मध्वी-दिति ऋचि दीर्घत्व छान्दसः।

२ १ २र १र २र १ २ १
षू । आदधाओषधीषु । इडा२३भा३४३ । ओ२३४पूइ ।
डा * ॥ ३४ ॥९९

वशं नयति । "पृथिव्याम" अतिषितं" अतिषितं" विमुक्तं यद्धः" उदकमस्ति तत् "पयोगोष्वोषधीषुच "आदधा" आदधाति ॥ ८ ॥ ९९

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने तृतीयस्याध्यायस्य दशमः खण्डः ॥ १० ॥

---

अथैकादशे खण्डे—

सैषा प्रथमा ।

तार्क्ष्यपुत्रोऽरिष्टनेमिर्ऋषिः ।

३ २ २ ३ १ २ ३ १ २ ३ १ २ २ २ १ २ १ २
त्यमूषुवाजिनन्देवजूतꣳसहोवानं*तरुतारꣳरथानाम् ।
१ २ ३ १ २ २ २ २ २ २ १ २ २ १ २
अरिष्टमिन्नेपृतनाजमाशुꣳस्वस्तयेतार्क्ष्यमिहाहुवेम ॥ १ ॥ १००

---

॥ * इतिग्रामेगेये अष्टमः प्रपाठकः ॥

---

* "सहावानम्"-इति ऋग्वेदीयः पाठः ।

१०० ऋग्वेदस्य ८,८,३६,१ ।

५ र  २र  १ १ १ १  २र र २
I ओम् । त्वमूषू । वाजि । ना३४५म् । देवजूता२३-

५ र ३र २ १  १  २ ३ ४ ५  २
४म् । सद्योवानन्ता । रूता३ । र८ृरथानाम् । अरि

२  ५  २  २ ०र ५  २ १
ष्टना२३४इमीम् । पृतना३४३जमाशुम् । स्वस्त । याइ ।

र २ ३ २  २ ४
तार्च्यमिहा३४३ । हु३वा५इमा६५६ ॥ ॥ १ ॥

२र  २ २  र र  ४ ३ ३र ५
II ईयइया३हाइ । त्वमूषुवाजिना३०दे३वजूतम् ।

३ ५ ४ ५र  ३  ५ र ३र २ १  २
ई४यइया । हा२३४इ । सद्योवानन्ता । रूता३ ।

२ ३ ४ ५  २र  २  १  २
र८ृरथानाम् । ईयइया३हाइ । अरिष्टा३ । नाइ । मी-

१  २ ३ ४ ५  ३ ५ ४ ५र  २ १ १ १ १
३०पृत । नाजमाशूम् । ई४यइया । हा२३४५इ ।

२ १  र २ ३ २  २ ४
स्वस्त । याइ । तार्च्यमिहा३४३ । हु३वा५इमा६५६ ॥

॥ २ ॥ १००

---

I,II तार्च्यसामनी द्वे ।

८५क,

"त्यमु"(१) तं प्रसिद्धमेव "तार्क्ष्यं" तृक्ष-पुत्रं "सुपर्णं" (तृक्ष-पुत्रो गर्गादिः(२) "स्वस्तये" क्षेमाय "इह" अस्मिन् कर्मणि "हुवेम" भृशं माह्वयेमहि ("बहुलं छन्दसीति (६,१,३४) ह्वयतेः संप्रसारणं। "लिङ्याशिष्यङ् (३,१,८६)"। यद्वा। प्रार्थनायां लिङि व्यत्ययेन शः(३,१,८५)। कीदृशं? "वाजिनम्" अन्नवन्तं बलवन्तं वा "देवजूतं" देवैः सोमाहरणाय प्रेरितं (जु इति गत्यर्थः; सौत्रो धातुः; अस्मात् क्तः पूर्वपद-प्रकृति-स्वरत्वम्) [यद्वा। देवैः प्रीयमाणं तर्प्यमाणं। यदाह यास्कः—"जूतिर्गतिः प्रीतिर्वा(३)देवजूतं देवप्रीतं वेति] "सहोवानं" सहस्वन्तं (सहश्शब्दाद्वनिप् मत्वर्थीयः) बलवन्तं वा। अतएव "रथानाम्" अन्यदीयानां "तरुतारं" सङ्ग्रामे तारकं। यद्वा। रंहणशीला अमी इमे लोका रथाः(४) तान् सोमाहरण-समये शीघ्रं तरीतारं (श्रूयते हि—"एष हीमान् लोकान् सद्यस्तरतीति"। तरते स्तृचि "ग्रसित-स्कभितेत्यादौ (७,२,३४) उडागमो निपात्यते) "अरिष्टनेमिं" अहिंसित-रथं (यद्वा। नेमि र्नमन-शील मायुधम्(५) अहिंसितायुधम्। अथवा उपचारा ज्जनके जन्यशब्दः।

(१)—ऋचि "त्यमूषु"-इति "निपातस्य च (६,३,१३६)"-इति दीर्घः।" सुञः (८,३,१०७)"-इति षत्वं च।

(२)—तथाच गर्गादित्वात् यञ् (४,१,१०५,)।

(३)—तथाहि,—तदाद्यन्तसमुदितमिदं "तीर्णेऽन्तरिक्षे क्षियति, तूर्णमर्थं रक्षत्यश्नोतेर्वा तस्यैषा भवति 'त्यमूषु वाजिनं' तं भृशमन्नवन्तं जूतिर्गतिः प्रीतिर्वा, देवजूतं देवगतं देवप्रीतं वा सहस्वन्तं तारयितारं रथाना मरिष्टनेमिं पृतनाजितमाशुं स्वस्तये तार्क्ष्य मिह ह्वयेमेति"-इति दै०४,२८।

(४)—"रथो रंहतेर्गतिकर्मणः स्थिरते र्वा स्याद्विपरीतस्य रममाणोऽस्मिं स्तिष्ठतीति वा रपते र्वा रसते र्वा"-इति नि० ९०३,११।

(५)—'नेमिः'-इति वज्र-नामसु द्वितीयं नैघण्टुकम् २,२०।

अथ द्वितीया ।

भरद्वाज ऋषिः* ।

२ २ ३१ २　३ २ ३ २ ३　१ २　२ २३　२ ३ १ २
त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ।

३ २उ ३　२ ३ १र　२र ३ २　३ २ ३ १ २ ३ १ २
ह्वेनुशक्रं† पुरुहूतमिन्द्रमिदꣳहविर्मघवावेत्विन्द्रः ॥२॥१०१

२र १र　७　२　१ र र
I त्रातारमिन्द्रमविता । रमीर२३०द्राम् । हवेहवे-

७　२　१
सुहवꣳशू । रमी२३०द्राम् । ह्वाइनुशक्रंपुरुहू ।

अरिष्टनेमि मम जनक) "पृतनाजं" पृतनानां शत्रुसेनाना माजि-तारं प्रगमयितारं जेतारंवा (अज गति-चेपणयोः । अस्मात् क्विप् । "वलादावार्द्धधातुकेविकल्पइष्यते" (२,४,५६वा०) इति वचनात् वी-भावाभावः । यजते वाँ ङिण्प्रत्ययः) "आशु" शीघ्रगामिनम् ॥ १ ॥ १००

---

* "गर्गस्यार्षम्"-इति वि० ।

† "ह्वयामि शक्रम्"-इति ऋग्वेदीयः पाठः ।

---

१०१ ऋग्वेदस्य ४,७,२२,१ ।

I इन्द्रस्य च तातम् ।

अथ तृतीया।

वसुक्रो विमदो वा ऋषिः।

१ २ ३ २ ३ १ २ २ १ २ ३ २ऽ १ २
यजामह इन्द्रं वज्रदक्षिणꣳ हरीणाꣳ रथ्या३०*विव्रतानाम्।
१र २र ३ १ २ ३ १ २ ३ १र २र ३ १ २ ३ १र २र
प्रश्मश्रुभिर्दोधुवदूर्द्ध्वधा भुवद्वि सेनाभिर्भयमानो विराधसा।३।१०२

७ २ १ २ १ २ १ र २
तमीर२३०द्राम्। इदꣳह। वाइः। मघवा। वा३-
२ ४
४३इ। नूरवा५इन्द्राई५ईः॥ २॥ १०१

"त्रातारं" शत्रुभ्यः पालयितारम् "इन्द्रं" "हुवे" आह्व-यामि। तथा "अवितारं" कामैस्तर्पयितार मिन्द्र माह्वयामि। "आ हवे हवे" सर्व्वेष्वाहवनेषु "सुहवं" सुखेनाह्वातुं शक्यम्। "शूरं" शौर्य्यवन्तं "शक्रं" सर्वकार्य्येषु शक्तं "पुरुहूतं" पुरुभि-र्बहुभिः पालनार्थं माहूतम्। एवंविध मिन्द्रम् "आहुवे" आह्वयामि। एव माहूतो 'मघवा' धनवान् स "इन्द्रः" "इदं" पुरोवर्त्ति हविः "वेतु" भक्षयतु॥ २॥ १०१

---

* "रथ्यम्"-इति ऋग्वेदीयः पाठः।

---

१०२ ऋग्वेदस्य ७,७,८,१।

५ र　४ ५　१　२　१　२
I यजामहोवा। आइन्द्रंवज्र। दक्षा२३इणाम्।
१ र २र　१　२　१　२　१र २
हरीणाꣳरथ्यंवि। व्रता२३नाम्। प्रश्मश्रुभिर्दोधुवत्।
१　२　३　५　१　२　१
ऊ। ध्वाधाभू२३४वात्। विसाइ। ना। भिर्भयमा-
१　२　२　५
ना२३ः। वा२३इरा३। धा३४५सोइहाइ॥ ४॥ १०२

वयं "इन्द्रं" "यजामहे" सोमलक्षणैर्हविर्भिः पूजयामः। कीदृशं? "वज्रदक्षिणं" शत्रु-बधाय सततं "वज्रो दक्षिणे हस्ते यस्य तम्। "विव्रतानां" रथ-वाहनादि-विविध-कर्मणां(१) "हरीणाम्" एतत्संज्ञकाना मश्वानां(२) "रथ्यम्" आनेतारम्। स इन्द्रः सामपानानन्तरं "श्मश्रुभिः(३)" स्वकीयैः "दोधुवत्" पुनः पुनः धून्वानः सन् "ऊर्ध्वधाः" "वि भुवत्(४)" विशेषेण प्रादुर्भवति। किञ्च। "सेनाभिः" मरुदादिभिः स्वकीयैः सैन्यैः "भयमानः" शत्रून् कम्पयन् "राधसा" [द्वितीयार्थे तृतीया (३,१,८५)]राधो धनं (वील्युपसर्ग-श्रुते योग्य-क्रियाध्याहारः) विविधं स्तोतृभ्यो ददाति॥ ३॥ १०२

---

I वार्त्रतुरम्।

(१)—वि वै विध्यर्थे। व्रतमिति कर्म-नामसु सप्तमं नैघण्टुकम् २,१।

(२)—"हरी इन्द्रस्य"-इति नैघण्टुकम् १,१५,१।

(३)—'श्मश्रुभिः तृतीया-बहुवचनमिदं द्वितीया-बहुवचनस्य स्थाने द्रष्टव्यम्, श्मश्रु-ग्रहणं चात्र प्रदर्शनार्थम्, सर्वरोमाणि शत्रूणां दोधुवत्' इति वि०।

(४) भवदिति लेटोरूपम् (३,४,७ किञ्च ३,४,९४)।

अथ चतुर्थी।

एतदादि-तिसृणां वामदेवऋषिः।
६

२ २ ३ १ २ ३ २ ३ १ २ ३ १ २३१ २ ३ २ ३ १ २
सत्राहणंदाधृषिंतुम्रमिन्द्रं महामपारंवृषभꣳसुवज्रम्।
२ २ ३ १२ २२ ३ २उ ३ १ २ ३१ २ ३ १ २ ३ १ २
हन्तायोवृत्रꣳसनितोतवाजन्दातामघानिमघवासुराधाः॥४॥
१०३

५ २ ३ २ ३२ ४२ ५ १ २ १
I सत्रा। हणा३४औहोवा। दाधृषिन्तू। म्रमि-
२ ३ ५ २ १२ २२ १ २ १ २ १ १
न्द्राओ२३४वा। महामपारंवृषभꣳसुवज्रा२३म्। हन्ता
३ ५ १ २ २ ४
२योर३४वृ। त्राꣳसनि। तो३४३। ता३वा५जा६५
१२ २२ १२ १ २ ५२ १२ ३ १ १ १ १
६म्। दातामघानिमघवा२सुराधा२३४५ः॥ ५॥

४ २ ३ ४ ३२ ४ ५ २ २ ३ ५ २ १२
II सत्राहणंदाधृषिम्। तू३४३म्रमिन्द्रम्। महा-
२२ १ २ १ २ १ २ ३ ५ १
मपारंवृषभꣳसुवज्रा२३म्। हन्तायो२३४वृ। त्राꣳसनि।

---

१०३ ऋग्वेदस्य ३,५,२२,३।

I,II वृषतो मारुतस्य सामनी द्वे।

२ २ ४ १र २र १र २ १ २र
तो३४३। ता३वापूजा६५६म्। दातामघानिमघवा२

१र ३ १ १ १ १
सुराधा२३४५ः॥ ६ ॥ १०३

"सत्राहणं" बहूनां शत्रूणां हन्तारं(१) "दाधृषिं" अतिशयेन धर्षकम्। "तुम्रं" (तुमिः प्रेरण-कर्मा) शत्रूणां प्रेरकं। "महां" महान्तम्। "अपारम्" अपरिमाणं विनाश-रहितमित्यर्थः। "वृषभं" कामानां वर्षितारं। "सुवज्रं" शोभनेन वज्रेणोपेत-मिन्द्रं वयं स्तोतारः स्तुम इति शेषः। "यः" इन्द्रो "वृत्रं" वृत्र-नामानमसुरं "हन्ता" हिंसिता भवति। उतापिच। यः इन्द्रो "वाजम्" अन्नं "सनिता" दाता भवति। "सुराधाः" शोभन-धन-युक्तो यो मघवेन्द्रः "मघानि" धनानि(२) दाता भवति तमिन्द्रं स्तुम इति पूर्वेण सबन्धः। (अत्र सर्वत्र तृन्नन्त-त्वात् "न लोकाव्ययेत्यादिना(२,३,६८) षष्ठी-प्रतिषेधे सति द्वितीयैव भवति॥ ४ ॥ १०३

(१)—'सत्रा-शब्दः सदा-शब्द-पर्यायः'-इति वि०। 'सत्रा' इति सत्य-नामसु च तृतीयं नैघण्टुकम् ३,१०।

(२)—'मघम्'-इति धन-नामसु प्रथमं नैघण्टुकम् २,१०।

अथ पञ्चमी।

१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
योनोवनुष्यन्नभिदातिमर्त्तउगणावामन्यमानस्तुरोवा।
३ २ ३ १र २र ३ १ २ ३ १ २ ३ १ २
त्तिधीयुधाशवसावातमिन्द्राभीष्यामवृषमणस्त्वोताः ॥५॥ १०४

३र ४र २ ४ ५ र ३ २ ५ १ र
I योनोवनुष्यन्नभिदा। तिमा३२३४र्त्ताः। उगणा
र र २ १ २ १र र र र २ १
वामन्यमानस्तुरो२३वा। त्तिधीयुधाशवसावातमा२३इ
१ १ २ ३ १ २ २ १ २
न्द्रा। अभाइष्या३मा। वृषामा२णा३ः। त्वो२३ता३४
१
३ः। ओ२३४५इ। डा॥७॥ १०४

हे इन्द्र! "यो" "मर्त्तो" मनुष्यः "नः" अस्मान् "वनुष्यन्" हन्तुमिच्छन्(१) "अभि दाति" आभिमुख्येनागच्छति(२)। यो वा "मन्यमानः" आत्मानं बहु मन्यमानो मर्त्तः "उगणा वा" उत्कृष्ट-

---

१०४ आरण्यके ५,२,१४।

I आत्रम्।

(१)—'वनुष्यन् हन्ति-कर्म'-इति वि०।

(२)—'अभिदाति आभिमुख्येन ददाति योऽस्माकमदत्वा अन्येभ्यो ददातीत्यर्थः'-इति वि०। 'दाति'-इति दान-कर्मसु प्रथमं नैघण्टुकम् ३,२०।

अथ षष्ठी ।

२ ३ १ २ २ २ ३ १ २　　३ २ ३ १ २ ३ १ २ ३ १ २
यंवृत्रेषुक्षितयस्पर्द्धमानायंयुक्तेषुतुरयन्तोहवन्ते ।

१र　२र　३ २ ३ १र२र३ १र २र　३ १ २ ३ १र २र
यᳰ शूरसातौयमपामुपज्म*न्यंविप्रासोवाजयन्तेसइन्द्रः॥६॥

१०५

गणाः उरूगणाः(३) "तुरो(४)" हिंसितो रस्मदीयाः प्रजाः अभि-गच्छति । केन साधनेन हिंसिषन् ? "क्षिधी" [क्षिः क्षयो धीयते क्रियते अनेनेति क्षिधिः तृतीयैकवचनस्य पूर्वसवर्णः(५)] क्षयकरणेन "युधा" आयुधेन (६) "शवसा" वेगेन बलेन वा आयाति । "त्वोताः" त्वया रक्षिताः(७) "वृषमणः" वृषा इवाच रन्तो वयं "तम्" "अभिष्याम" अभिभवेम(८) ॥ ५ ॥ १०४

---

* "मुपज्म"-इति मुद्रितपुस्तकपाठः सायणाचार्य्यादि-धृतश्च ।

---

(३)—'उरु गणयतीत्युरुगणाः, उरुगणाः उगणाः उच्यन्ते ; एतदुक्तं भवति—योऽ-ल्पमल्पं दत्वा बहु गणयति जनेभ्यः कथयति बहुत्वं मन्यमानः वाचा पूजयन्"-इति वि० । "उरु"-इति बहु-नामसु प्रथमं पदम् (नै० ३,१) ।

(४)—'तुर्वतेर्वधकर्मण ( नै० २, १९ ) एतद्रूपम् ; वाचा पूजयन् हृदयेन हिन-स्तीत्यर्थः'-इति वि० ।

(५)—"सुपां सु-लुक्-पूर्वसवर्णाच्छेयाडाड्यायाजालः (७,१,३९) ।

(६)—'युधा युद्धेन'-इति वि० ।

(७)—'त्वया ऊताः'-इति त्वोताः । ऊताः रक्षिताः ।

(८)—इत्येतदाशास्महे इति भावः । "निपातस्य च (६,३,१३६)"-इति मन्त्रे दीर्घः-अभीष्याम इति ।

५र र २ १ २ ४ ५ १ र
I हाउयंवृत्रेषू। चितयाइः। स्पर्द्धमानाः। धमा-
२ १ र ५र र २
नाइः। ई२३४यइया। हाउयंयुक्तेषु। तुरयाइ।
२ ३ ४ ५ १ २ १ र ५र
तोह्वन्ताइ। ह्वन्ताइइ। ई२३४यइया। हाउयं
र ४ २ ३ २ ३ ४ ५ १ २
शूरसा। ताइउयम। पामुपस्मान्। उपस्माइन्।
१ र ५र र ४ २ ३ २ ३४
ई२३४यइया। हाउयंविप्रासाः। वाइजय। ताइसइ
५ १ २ १ ऽ ५ ५
न्द्राः। स इन्द्राइः। ई२३४य। इयाई। हाउवा।
२ १ १ १ १
ई२३४५॥ ८॥

५ र र र २ २ ३ ४
II यंयंया। हाउयंवृत्रेषू। चितयाइः। स्पर्द्धमा
५ १ र २र १ ऽ १ ५ र र र
नाः। धमानाः। यंयंय२०याम्। यंयंया। हाउयंयुक्तेषू।
२ २ ३ ४ ५ १ २र १ ऽ १
तुरयाइ। तोह्वन्ताइ। ह्वन्ते। यंयंय२०याम्।

I,II गार्त्समदे द्वे।

५ र र र ४ २३ २ ३४५
यंयंया। हाउयꣳशूरसा। ता३उयम। प्रामुपस्मान्।

१ २ १ ऽ १ ५ र र र
उपस्मन्। यंयंयर०याम्। यंयया। हाउयंविप्रासाः।

४ २ २ २ ३४५ १ २ १ ऽ १
वा३जय। ताइसइन्द्राः। सइन्द्रः। यंयंयर०याम्।

५ ५ ३ ११११
यंयंया६। हाउवा। ई२३४५॥ ८॥ १०५

(०)"वृत्रेषु" वरकेषु युद्धेषु(१) "स्पर्द्धमानाः" क्रोधयुक्ताः "क्षितयो" मनुष्याः(२) (क्षयन्ति निवसन्त्यत्रेति क्षितयो मनुष्याः) "यम्" इन्द्रं "हवन्ते" आह्वयन्ति "युक्तेषु" सन्नद्धेषु आयुधैर्युक्तेषु सङ्ग्रामेषु "तुरयन्तः" परस्परं हिंसन्तो जनाः(३) यमाह्वयन्ति। "शूरसातौ" शूराणां सम्भजने(४) यमाह्वयन्ति। युद्धजयार्थमिति शेषः। किञ्च। "अपाम्" उदकानां "सातौ" लाभे "यम्" "उ-

(०)—'वामदेव इन्द्रस्यातिभक्ततया इन्द्ररूपमास्थितः, असुरैर्गृहीतो हन्यमान आह—यं वृत्रे ष्विति'-इति वि०।

(१)—'वृत्रेषु' शत्रुषु, हन्तव्येष्विति वाक्य-शेषः'-इति वि०।

(२)—क्षितयइति मनुष्य-नामसु षष्ठं नैघण्टुकम् २,३।

(३)—'तुरयन्तः त्वरमाणाः' इति वि०। "तूर्णिः"-इति क्षिप्र-नामसु द्वादशं नैघण्टुकम् (२,१५) तदेवैवं व्याख्याने बीजम्।

(४)—'शूरसातौ सङ्ग्रामे'-इति वि०। शूरसातौ-इति सङ्ग्राम-नामसु पञ्चविंशं नैघण्टुकम् २,१७।

अथ सप्तमी ।

विश्वामित्रः स्तौति ।

१ २ ३ १र २र ३ २उ ३ १ २ ३ १ २
इन्द्रापर्वताबृहतारथेनवामीरिषआवहतꣳसुवीराः ।
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १र २र ३ १ २
वीतꣳहव्यान्यध्वरेषुदेवावर्द्धथाङ्गीर्भिरिड़यामदन्ताम् ।७॥१०६

४ ५ २र १ र ३
I इन्द्राहाउ । हाहोइ । पर्वताबृहतारथाऽ२इना

पज्मन्" वृष्टिप्रदानार्थं(५) यमुपगच्छन्ति आह्वयन्तीत्यर्थः(६)। विप्रासो(७) विप्राः मेधाविनो यजमानाः य मिन्द्रं "वाजयन्ते"(८) वाजिनं कुर्वन्ति हविर्भि र्बलिनं कुर्वन्ति स तादृश इन्द्रः ॥ ६ ॥ १०५

---

I वैश्वामित्रम् ।

१०६ ऋग्वेदस्य ३,३,१८,१ ।

(५)—"सुपां सुलुगिति (७,१,३९) चतुर्थ्या लुक् ।

(६)—'अपामुपज्मन्—उप पूर्वस्याज गति-क्षेपणयो ( भ्वा० ) रित्यस्येदं रूपम् । आपः समीपे यस्मिन् काले आगच्छन्ति स अपामुपज्मा वर्षाकालः ; तस्मिन् अपामुपज्मन् । उदकार्थं वर्षाकाले यमाह्वयन्तीत्यभिप्रायः'-इति वि०-अत्र नये "सुपां सु लुक्(७,१,३९)"-इत्यादिना सप्तम्येकस्य लुक् ।

(७)—"आज्जसेरसुक् (७,१,५०)"-इत्यसुकि रूपम् । "विप्रः"-इति मेधावि-नामसु प्रथमं नैघण्टुकम् ३,१५ ।

(८)—'वाजयन्ते पूजयन्ति'-इति वि० । वाजयतीति अर्चति-कर्मसु षट्चिंश-त्तमं नैघण्टुकम् ३,१४ ।

२ २ ५ ४र ५ २र १ र
उवा३ । ऊ३४पा । वामीहाउ । हाहोइ । इषआ-

२ र २ ५ ४र ५
वहतꣳसुवीरइराउवा३ । ऊ३४पा । वीतꣳहाउ ।

२र १ र र २ २ २ ५
हाहोइ । हव्यान्यध्वरेषुदारइवाउवा३ । ऊ३४पा ।

४ ५ २र १ र र र ३ २
वर्द्धाहाउ । हाहो । थाङ्गीर्भिरिड़यामदा०रताउवा३ ।

२ ५
ऊ३२३४पा ॥ १० ॥ १०६

"इन्द्रापर्वता" [इन्द्रश्च पर्वतश्च(१)] हेइन्द्रापर्वतौ ! "बृह-ता" महता रथेनागत्य "वामी" वननीयाः(२) "सुवीराः" शोभन-पुत्रोपेताः "इषः" अन्नानि "आवहन्तम्" अस्मदर्थं धारयन्तं(३) प्रयच्छन्तमित्यर्थः । किञ्च । हे "देवा" देवौ द्योतमानौ ! हे इन्द्रापर्वतौ ! "अध्वरेषु" अस्मत्-सम्बन्धि-यज्ञेषु "हव्यानि" हवन-योग्यानि पुरोडाशादीनि हवींषि "वीतं" भक्षयन्तम् । तथा "इड़या" अस्माभि र्दत्तेनान्नेन(४) "मदन्ता" हृष्यन्तौ युवां "गीर्भिः" स्तुतिलक्षणाभि रस्मदीयाभिर्वाग्भिः "वर्द्धथां" प्रवृद्धौ भवतौ ॥ ७ ॥ १०६

(१)—"देवता द्वन्द्वे च (६,३,२६)"-इत्यात्वे, "सुपां सु लुक् (७,१,३९)"-इत्यात्वे च रूपम् ।

(२)—सम्भजनीया इत्यर्थः ।

(३)—‘आवहन्त मानयन्त’ मिति वि० ।

(४)—‘इड़ा’-इत्यन्न-नामसु पथोदशं नैघण्टुकम् २,७ ।

अथाष्टमी।

रेणुऋषिः*।

१ २ ३ २ ३ १ २ ३ १र २र ३ १ २ ३ १ २
इन्द्राय गिरो अनिशितसर्गा अपः प्रेरयं† सगरस्य बुध्नात्।

१र २र ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ २
यो अक्षेणेव चक्रियौ‡ शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥८॥
१०७

२ २ १र २ १ २
I हा३। हाइ। इन्द्रायगाइ। रा३अनि। शी-

३ ४ ५ २ १र २
तसर्गाः। १। असाउ। असाउ। इन्द्रायगाइ। रा३

१ २ ३ ४ ५ २ १र
अनि। शीतसर्गाः। २। कुवा। कुवा। इन्द्रायगाइ।

२ १ २ ३ ४ ५ २ १
रा३अनि। शीतसर्गाः। ३। अयाम्। अयाम्। अपः

---

* 'गिरिणोरार्षम्'-इति वि०।

† "प्रेरयं"--इति ऋग्वेदीयः पाठः, "प्र। ईरयम्।"-इति च ऋग्वेदीय-पद-पाठः।

‡ "चक्रिया"-इति च ऋग्वेदीय-पाठः।

---

१०७ ऋग्वेदस्य ८,४,१४,४।

I सावित्रम्।

२ ३ १ २ ३ ४ ५ १ २ १
प्रैरा । या३त्सग । रस्यबुध्नात् । अविदा३त् । अवि-

२ २ १ २ २ १ २ ३ ४ ५ २ १
दत् । योअक्षेणाइ । वा३चक्रि । यौशचीभीः । ई्वा

२ ५ २१ २ १ २
२३ । ई३४वा । विष्वक्तस्ता । भा३पृथि । वी३४३म् ।

२ ४
ऊ३ताप्द्याइ५६म् ॥ ११ ॥ १०७

"इन्द्राय" इन्द्रार्थम् "अनिशितसर्गाः" अतनूकृत-विसर्गाः उपर्युपरि वर्त्तमानाः(१) याः "गिरः" स्तुतयः ताभिर्गीर्भिः "सगरस्य" अन्तरिक्षस्य(२) "बुध्नात्" प्रदेशात् "अपः" उदकानि(३) "प्रैरयत्" प्रेरयति । यः इन्द्रः "शचीभिः" कर्मभिः(४) "पृथिवीम्" "उत" अपिच । "द्यां" दिवं च "चक्रियौ"(५) रथचक्राणि(६), "अक्षेणेव" यथा रथाक्षेण तद्वत् "विष्वक्" सर्वतः "तस्तम्भ" अस्तम्भात् ॥ ८ ॥ १०७

(१)—अनिशितसर्गाः—शित इति 'शो तनूकरणे'-इत्यस्य निष्ठायां रूपम् । सर्गः संसर्गः सङ्घातः । शितः सर्गो यासां ताः सितसर्गाः तनूकृत-सङ्घाः । न शितसर्गा अशित-सर्गाः, बह्वीरित्यर्थः ।

(२)—"सगरः" इति अन्तरीक्ष-नामसु चतुर्दशं नैघण्टुकम् १,३ ।

(३)—वृष्टि-लक्षणानि ।

(४)—शचीति कर्म-नामसु द्वाविंशतितमं नैघण्टुकम् २,१ ।

(५)—"इयाडियाजिकाराणामुपसङ्ख्यानम् (७,१,३९)"-इति इय्-भावे, लिङ्ग-व्यत्यये च (३,१,८५) रूपं चक्रियाविति ।

(६)—चक्रे इति द्विवचनान्तेन व्याख्यातम विवरणकृता ।

अथ नवमी।

वामदेवऋषिः*।

३ १ २ २ १ २ ३ २ ३ १ २ ३ १ २
आत्वासखायःसख्यावदृत्युस्तिरःपुरूचिदर्णवाञ्जगम्याः†।

३ १र २र ३ १ २ ३ २ ३ १र २र ३ १र २र
पितुर्नपातमादधीतवेधाअस्मिन्क्षयेप्रतरां‡दीद्यानः॥९॥१०८

४र ५र ४ ५र ४र ५ ४ २ १ र र
I आत्वासखायःसख्यावदृत्यूः। तिरःपुरूचिदर्णवांज-

र र २ १ र र र र
गा२रम्यौ। हौहोश्वा। पितुर्नपातमादधीतवा२इधौ।

---

* 'वसुराह'-इति वि०।

† "आ चित् सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान्"-इति ऋग्वेदीय-पाठः।

‡ "अधि क्षमि प्रतरं"-इति, "अधि ग्रमि मतरं"-इति च ऋग्वेदीय-पाठः।

---

१०८ ऋग्वेदस्य ७,६,६,१।

। कृतीपादवैरूपस्य साम।

२ १ २ २ २ २ २
हौहोइवा। अस्मिन्त्वये प्रतरान्दीदियाऽ२नौ। हौहो-
२ २ १ ३ २ १ १ १
इवा। औहो२। इडा२३४५॥ १२॥ १०८

हे इन्द्र! "त्वा" त्वां "सखायः" स्तोतारः "सख्या" सख्येन-स्तुतिभिरित्यर्थः। ताभिः "आ ववृत्युः" अभिमुखं कुर्वन्ति। यत-स्त्वं "तिरः" तिर्यग्भूत्वा "पुरु" विस्तीर्णम् "अर्णवम्" अन्त-रिक्ष(१) "जगम्याः" अगच्छः। चिच्छब्दः कारण-परः(२) [अथ-परोक्षकृतः(३)—"वेधा" विधाता(४) इन्द्रः "पितुः" मदीयस्य "नपातं" पौत्रं मम पुत्रमित्यर्थः(५)। त मादधीत प्रयच्छतु।

---

(१)—यद्यप्यर्णवम् इत्यन्तरीक्ष-नामसु न दृश्यते, तथापि समुद्र इति तु दृश्यत एव (१,३)।

(२)—तथा च यत एवं मत इदं ब्रूम इति भावः। "चिदित्येषोऽनेक-कर्मा; आचार्यश्चिदिदं ब्रूयादिति पूजायाम्, ( * * * ) दधिचिदित्युपमार्थे, कुल्माषांश्चि-दाहरेत्यवकुत्सिते, ( * * * )।"-इति नि०१,४।

(३)—"परोक्षकृताः—सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य"-इति नि० दै० ६,१।

(४)—'वेधा मेधावी भवान्' इति वि० "वेधा"-इति मेधावि-नामसु षष्ठं नैघण्टु-कम् १,५३।

(५)—"पितुरित्यन्न-नाम; पाते र्वा पिबते र्वा प्यायने र्वा"-इति दैवत-निरुक्तम् ६,२४॥ विवरणकारस्तु 'पितुः', 'न', 'पातम्'-इति पदत्रयं विच्छिद्य व्याचख्यौ; तथाहि—'पितुर्न न-शब्द उपरिष्टादुपचारादुपमार्थीयः, पितु रिव : पातं पा रक्षणे-इत्यस्य "नपुंसके भावे क्तः (३,४,११४ उ०)"-इति क्त-प्रत्यये एतद्रूपम्, पातं रक्षणम्। यथा कश्चित् पितुः रक्षणमाधत्ते, तद्वत् भवानपि अस्माकम् आदधीत आदधानं करोत्वित्यर्थः-इति।

अथ दशमी ।

गौतमऋषिः ।

२ ३ १ १ ३ २ उ ३ २ ३ १ २ ३ १ २ ३ २
कोअद्ययुंक्ते धुरिगाऋतस्यशिमीवतोभामिनोदुर्हृणायून् ।
३ १ २ ३ १ २ ३ १र २र ३ २ ३ २ ३ १ २
आसन्नेषामप्सुवाहोमयोभून्यएषांभृत्यामृणधत्सजीवात्॥ १०॥ १०९

॥ पञ्चम-दशति ॥*

५र र र ५ १ र र र
I कोअद्ययुक्ते धुरिगाऋतस्याइए । शिमीवतोभामि-
र २१ २ र १ र र र र २ १ २
नोदुर्हृणा२३यून् । आसन्नेषामप्सुवाहोमयो२३भूत् ।
१ र र र ऽ २ २ ५
यएषाभृत्यामृणधत्सजाइवा३उवा३ । ऊ३४पा॥ १३॥ १०९

कीदृशः? अस्मिन् "क्षये"(६) निवास-भूते यज्ञे "प्रतरां" प्रकृष्टं "दीद्यानः"(७) तेजसा दीप्यमान इन्द्रः पुत्रं ददातु ॥ ९ ॥ १०८

---

१०९ ऋग्वेदस्य १, ६, ८, १ ।

I आमहीयवम् ।

(६)—निवासार्थ-क्षि-धातो रूपमिदं क्षयइति ।

(७)—दीधिङो रूपम् ।

---

*॥ इति चतुर्थस्यार्द्धः प्रपाठकः ॥

"अद्य" अस्मिन् कर्मणि "ऋतस्य" यज्ञस्य(१) गच्छत इन्द्र-सम्बन्धिनो रथस्य "धुरि" अश्व-वहन-प्रदेशे "गाः" गतिमतोऽश्वान्(२) एषा मश्वानां सम्बन्धिनः प्रग्रहान्वा "आसन्" आस्येन तज्जनितेन स्तोत्रेण "को युङ्क्ते" को नाम नियोक्तुं शक्नोति(३) न कोपीत्यर्थः । कीदृशानश्वान् ? । "शिमीवतः" वीर्यकर्मोपेतान्(४) । "भामिन्" तेजसा युक्तान्(५) "दुर्हृणायून्" परै र्दुःसहेन क्रोधेन युक्तान् (हृणीयतिः क्रुध्यति-कर्मा (नै०२, १३) । "अप्सुवाहः" आपः कर्माणि(६) तेषु इन्द्रं वहन्तीति तान्(७) "मयोभून्" मयसः सुखस्य भावयितॄन्(८) । स्वकीयानां सुखप्रदानित्यर्थः । "यो" यजमानः "एषाम्" ईदृशाना मश्वानां "भृत्यां" भरण-क्रियां रथ-वहन-क्रियां "ऋणधत्" समर्धयति स्तौतीति यावत्(९) "स" ह यजमानो "जीवात्" जीवनवान् भवेत् ॥

---

(१)—'ऋतस्य सत्यस्य सर्वगतस्य वा इन्द्रस्य'-इति वि० ।

(२)—'गाः गो-शब्देनात्र समय-योगात् अश्वा उच्यन्ते'-इति वि० ।

(३)—'आदित्य-स्तुति-करण-द्वारेणेति विवरणे विशेषः ।

(४)—"शिमी"-इति कर्म-नामसु चतुर्विंशतितमं नैघण्टुकम् २,१ ।

(५)—'भामिनः-शत्रूणां पुरः क्रुद्धान्'-इति वि० । "भामते"-इति क्रुध्यति-कर्मसु (नै०२,१२) पठित मित्येव तत्र बीजम् । 'भामिनः कुत्सित-क्रोधान्'-इति वि० ।

(६)—"अपः"-इति कर्म-नामसु प्रथमं नैघण्टुकम् २,१ ।

(७)—'अप्सु निमित्त-भूतासु ये वहन्ति ते अप्सुवाहः, उदकस्य पातयितारः; तान्'-इति वि० ।

(८—"मयः"-इति सुख-नामसु सप्तमं नैघण्टुकम् ।

(९)—ऋणधदिति "ऋणद्धि"-इति परिचरण-कर्मणो रूपम् ३,५ ।

यद्वा। "कः" इति प्रजापति रुच्यते ("कोह वै नाम प्रजापति" रिति श्रुतेः) "ऋतस्य" यज्ञस्य "धुरि" निर्वाहे "गाः" वेदरूपान् वाग्विशेषान्(१०) "अद्य" इदानीं "युङ्क्ते" संयोजयति कीदृशान्? "शमीवतः" प्रतिपाद्यैः कर्मभिर्युक्तान् "भामिनः" उज्ज्वलान् "दुर्हृणायून्" हृणीयति हानि-कर्मा। हातु मशक्यान् वेदाध्ययनस्य नित्यत्वात् एषां शब्दानां आत्म-प्रतिपादकानाम् "आसन्" आस्यानि मुखवदाकरभूतानित्यर्थः। "अप्सु वाहः" अप्सु अन्तरिक्षे तदुपलक्षिते स्वर्गे वहन्ति यजमानं प्रापयन्ति तान्। "मयोभून्" मयसः अध्ययन-प्रभवस्य सुख-साधनस्यादृष्टस्य भावयितॄन्। "यो" यजमानः 'एषां" वचसां "भृत्यां" भरण-क्रियां "ऋधत्" ऋद्धिमतीं करोति "स जीवात्"(११) स एव जीवति। अन्ये जीवन्मृता इत्यर्थः॥

"आसन्नेषामप्सुवाहः"-इति, "आसन्निषून् हृत्स्वसः"-इति पाठौ॥ १०॥ १०९

इति श्रीसायणाचार्य्यविरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने तृतीयस्याध्यायस्यैकादशः खण्डः॥ ११॥

॥ इति त्रैष्टुभमैन्द्रम्॥

(१०)—"गौः"-इति वाङ्नामसु पठितम् नैघण्टुकम् १,११।

(११)—लेटि आडागमे रूपम् (३,४,९४)।

इहाष्टाविंशति ऋचो गायन्तित्वेत्यनुष्टुभः (क) ।
यदीवहन्तीत्यनया स्तूयन्ते मरुतोऽत्र हि (ख) ।
ईडितोऽग्निर्दधिक्रावा दधिक्राव्णो इति ह्यृचा (ग) ।
वयश्चिदित्युषस्येयं वैश्वदेवीत्यमी इति (घ) ।
ऋक्सामयोः स्तुति ऋचंसामेत्यैन्द्रोऽपरा ऋचः (ङ) ।
समाख्या प्राणभृन्न्यायादिति पूर्वमुदीरितम् (च) ।

---

(क)—"गायन्ति त्वा"-इत्यारभ्य"ऋचंसामयजामहे"-इत्युगन्ताः दशत्त्रयात्मका अष्टाविंशति ऋचः अनुष्टुप्छन्दस्का इत्यर्थः । इति व्याख्यायमानाष्टादशर्चु छन्दः-सङ्केतः ।

(ख)—अत्र अष्टादशसु ऋचु "यदीवहन्ती"-इति पञ्चदशी ऋक्, अनया मरुतो देवताः स्तूयन्ते ।

(ग)—"दधिक्राव्णः" इति हि सप्तदशी ऋक्, ऋचा अनया, दधिक्रावा नामकः अग्निः, ईडितः स्तुतः ।

(घ)—"वयश्चित्"-इति विंशतितमा ऋक्, इयं, उषस्या उषोदेवताका । "अमी" इति एकविंशतितमा ऋक् वैश्वदेवी अस्याः विश्वेदेवा देवताः इत्यर्थः ।

(ङ)—"ऋचंसाम"-इति अन्तिमा ऋक्, अनया तु ऋक्-सामयोः देवतयोः स्तुतिः प्रकाश्यते । अपराः एतत्-पञ्चातिरिक्ताः त्रयोविंशति ऋचः ऐन्द्राः इन्द्रदेवताकाः। इति दैवत-सङ्केतः ।

(च)—ननु मरुदादि-देवतानामृचां साहित्येऽप्यस्य पर्वस्य ऐन्द्रेति व्यपदेशः कथमित्याह—समाख्या तु प्राणभृन्न्यायात् सिद्ध्यति, गौण्या वृत्त्येति भावः । प्राणभृन्न्यायस्तु मीमांसा-शास्त्र-प्रसिद्धः । तथाहि, जैमिनी-सूत्रम्—"तत्सिद्धि-जाति-सारूप्य-प्रशंसा-भूम-लिङ्गसमवायात् (१,४,१९) ।"-इति, तत्सिद्ध्यादि-हेतुतो गौणी वृत्ति राश्रयणीयेति तदर्थः । एतच्च स्फुटं भट्टकारिकायाम्—"तत्सिद्धि-जाति सारूप्य-प्रशंसा-लिङ्ग-भूमभिः षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पिता ॥"-इति ; तथा च 'अयं पुरोभवस्तस्य प्राणो भौवायनः'-इत्यस्य एकस्यैव मन्त्रस्य प्राणभृत्त्वेऽपि लिङ्ग-समवाय-हेतुतः तत्सहचरिताः सर्व एव मन्त्रा गौण्या वृत्त्या प्राणभृच्छब्देन लक्ष्यन्ते गृह्यन्त एव "प्राणभृत उपदधाति"-इत्यादि विधौ—तथैवात्रापि यदीवहन्तीत्यादीनां इन्द्र लिङ्गकत्वाभावे-

अथ द्वादशे खण्डे—

सैषा प्रथमा।

मधुच्छन्दा ऋषिः।

१ २ ३ १र २र ३ २ ३ १ २
गायन्तित्वागायत्रिणोर्चन्त्यर्कमर्किणः॥

३ १ २ ३ २ ३ १ २
ब्रह्माणस्त्वाशतक्रतउद्वꣳशमिवयेमिरे॥ १॥ ११०

२र २ ३ २ र ५ २ २
I गाया३१। तित्वा३१२३४। गाय। त्रा३इणाः।

३ २ ३ २ ५ २ २ ३ २
अर्चा३१। तिया३१२३४। कम। का३इणाः। ब्रह्मा-

३ २ ५ २ २ ३ २
३१। णस्त्वा३१२३४। शत। क्रा३ताउ। उद्वा३१।

---

११० उत्तरार्च्चिकस्य ५,२,२३,१ = ऋग्वेदस्य १,१०९,१ = ऊहे ६,८—२२,२,५—२३,१—५।

I,II शेखण्डिने द्वे।

---

ऽपि ऐन्द्र-समुदाय-मध्य-पतितत्वेन इन्द्र-लिङ्ग-साहचर्य्यात् गौणा ऐन्द्रत्व मित्यस्य पर्वस्यै-न्द्रत्व मचलम्। किञ्च नैतदिह नूतनमुक्तं उदीरितञ्चैवं पुरस्तादिति स्मारितम्; तत्राग्नेयैकादश-खण्डारम्भे द्रष्टव्यम् (२५८पृ०२प०) छत्रि-न्यायो ऽप्येषएव, स तु लौकिक इत्येव विशेषः; अतएव माधवेन "एकस्येव मन्त्रस्य प्राणभृत्त्वे ऽपि छत्रिणो गच्छन्तीति-वत् तत्-सहचरिताः सर्वे मन्त्राः प्राणभृत्त्वेन लक्ष्यन्ते (न्या०टी०१,४,१८)" इति।

३ २　　　　　　　　　　　　　　४
श्रमा३१२३४इ । वयापूइमिराइ । ह्वोपूइ । डा ॥ १४॥

५र　　४ ५　　३र २ ३　　५　　१
II गायन्तित्वोहाइ । गायात्रीर२३४णाः । अर्चन्त्यर्क-

२　२ २　　　　　　२　　५　　२ २ ३　　५
मा२र्कीइणाः । अर्चन्तियो२३४हा । कमार्की२३४णाः ।

२ १र　र　२ २ २　　　　　　र　३　५
ब्रह्माणस्त्वाशता१क्रा३तो । ब्रह्माणस्त्वो२३४हाइ ।

३ २ ३　　५　　　१　　　२ २ २
शताक्रा२३४ताउ । उद्वं१शमिवया१इमी३रे । उद्वं१

३　५　　३ २　४
शमो२३४हाइ । वयाइइमापूइराइ५६इ ॥ १५ ॥

४र ५　र र　४ ५ ४　१
I,II,III गायन्तित्वागायत्रिणआ । अर्चन्त्यर्कमर्का

२　　१र　　　　　　　　　　　२　१
२३इणाः । ब्रह्माणस्त्वा२हो ऽ१इ । शतक्रा२३ताउ । उद्वं१

२ २ २　　　३　५　　१ ऽ　२
शमिवया१इमी३रे । उद्वं१शा२३४मो । वाया३उवा३ ।

२　　१　　२
उप् । मा ऽ२इरो३पूहाइ ॥ १६ ॥ ११०

हे "शतक्रतो" बहुकर्मन् बहुप्रज्ञ वेन्द्र ! "त्वा" त्वां "गायत्रिणः"(१)

---

III औहंशीयम् ।

(१)—'गायत्रं साम, तद् येषामस्ति तद् गायत्रिणः, उद्गातार इत्यर्थः'-इति वि० । गायत्रीछन्दस्का सावित्र्यामृचि गीतं गायत्रं स्वरसङ्घम्, गेयं भवति तदन्यास्वपि ऋक्षु ,

उद्गातारः "गायन्ति" स्तुवन्ति(२)। "अर्किणो" ऽर्चनहेतु-मन्त्र(३)-युक्ता होतारः "अर्कम्" अर्चनीय मिन्द्रं "अर्चन्ति" शस्त्र(४)-गतै र्मन्त्रैः प्रशंसन्ति। "ब्रह्माणो" ब्रह्मप्रभृतयः इतरे ब्राह्मणाः(५)। "त्वा" त्वाम् "उद्येमिरे" उन्नतिं प्रापयन्ति। तत्र दृष्टान्तः—"वंश मिव" यथा वंशाग्रे नृत्यन्तः शिल्पिनः प्रौढं वंशं उन्नतं कुर्वन्ति। यथा वा सन्मार्ग-वर्त्तिनः पुत्राः स्वकीयं कुलं उन्नतं कुर्वन्ति तद्वत्॥

एतामृचं यास्कएवं व्याचष्टे—"गायन्ति त्वा गायत्रिणः प्रार्चन्ति तेऽर्क मर्किणो ब्राह्मणा स्त्वा शतक्रत उद्येमिरे वंशमिव वंशो वनशयो भवति वननाच्छ्रूयत इति वेति(५,४,) ॥१॥ ११०

---

न तदक्षरान्वित-स्वरसङ्घस्य नाम गायत्रं प्रत्युत गानमात्रस्यैवेति तु ध्येयम्। अत एव मीमांसा-न्यायमालायां सप्तमाध्यायस्य प्रथमपादारम्भे निर्णीतम्—"अतिदेशं विनिश्चेतुं कवतीषु रथन्तम्। गायतीत्यृग् गानयुक्ता शब्दार्थो गान मेव वा"-इत्यादि। गायत्रादि लक्षणन्तु ताण्ड्य-ब्राह्मणादिभ्योऽवगन्तव्यम्; तथाहि, तदीय-षष्ठ-तृतीय-खण्डे "अष्टाक्षरा गायत्री नवमो हिङ्कारः"-इत्येव मादि।

(२)—गायतीत्यर्चति-कर्मसु द्वितीयं नैघण्टुकम् ३,१४।

(३)—"अर्को देवो भवति यदेन मर्चन्ति। अर्को मन्त्रो भवति यदनेनार्चन्ति अर्कमन्नं भवत्यर्चति भूतानि। अर्को वृक्षो भवति स वृत्तः कटुकिम्ना"-इति नि० नै० ५,४।

(४)—प्रगीताप्रगीतभेदेन स्तोत्रशस्त्रेति नामभेदः, द्वोचैव शस्त्रमन्त्राः पठ्यन्ते अत उक्तम्—"शस्त्रयाज्यानुवाक्याभिर्होतालङ्कुरुतेऽध्वरम्। आज्यपृष्ठादिभिः स्तोत्रै रुद्गातालङ्करोत्यमुम्"-इति (२पृ०)।

(५)—'इत्यादिबहुवचनान्ता गणस्य सूचकाः'-इति नियमात् सदस्यादीनामपि ग्रह इति भावः।

अथ द्वितीया।

जेता माधुच्छन्दसऋषिः*।

२ ३ १ २　　३ १ २　३ १ २
इन्द्रं विश्वा अवीवृधंत्समुद्रव्यचसङ्गिरः।
२ १ २　३ १ २ १ २ ३　१ २ ३ १ २
रथीतमꣳरथानांवाजानाꣳसत्पतिंपतिम् ॥ २ ॥ १११

५　　१　　१　　१ २ १
I, इन्द्रं विश्वाः। आवी २वृधान्। सामुद्रव्या।
२ १　२ २　　१　　२
चासङ्गिराः। राथीतमा३१उवा २। रथाइना २म्। वा
१२ ०　१ २　१ २　१
जाना२३ꣳसात्। पातिंपतिम्। इडा२३भा३४३। ओ२
३४५इ। डा ॥ १७ ॥

२ ३ ४ ५　　२२　१　　२
II, ओइन्द्रं विश्वाः। अवी। वृधान्। सा१मू २

---

* 'यता नाम ऋषिः तस्येदमार्षम्'-इति वि०।

---

१११ उत्तरार्चिकस्य २,१,१९,१ = ऋग्वेदस्य १,१,२१,१ = यजुर्वेदस्य १२,५६—१५,६१ = ऐतरेय-ब्राह्मणस्य ५,७ = ऊहे २,१२—७,११—२१,३—२१,२,३ ।

१ १ २ १
द्राव्या२। चसम्। गिराः। रा१था२तामा२म्।
२ १ १ १ २
रथी। नाम्। वाजा२ना७सा२त्। पतिंपा२३ती३४
१
३म्। ओ२३४५इ। डा॥ १८॥

३ ४ ३ ४र ५ र २ २ ५ २
III, इन्द्रं विश्वाअवीवृधन्। समूद्रा२३४व्या। चाइ-
१ २ २ १ २र
साङ्गीरा:। राथीतमा२म्। ऊ२। हा२इ। ऊ२।
१ २र र
रथाइनाम्। वाजाना७सा२त्। ऊ२। हा२इ।
१ २ १
ऊ२। पतिं पा २ ३ ती ३ ४ ३म्। ओ २ ३ ४ ५ इ।
डा॥ १९॥

४ ५ ४ ५र ८ ४ ५ २ १ २
IV इन्द्रं विश्वाअवीवृधन्। ऐयाहाइ। समूद्रा-

---

I,II,III गैरखण्डनानि त्रीणि।

IV पूर्वमादᳫंष्ट्रम्।

१ १ १र २ १
१व्या२। चर्षांगा१इरा२३ः। ऐया२३हाइ। रथाइ-
२ १ १र २ र १
ता१मा२म्। रथाइना२३म्। ऐया२३हाइ। वाजा-
२ १ २ १र २
ना१ऽसा२त। पताइंपा१ती२२म्। ऐया२३हा३४३इ।
१
ओ२३४५इ। डा॥२०॥

४ ५ ४ ५र र ४र ५र ४र ५ ५ १
V इन्द्रं विश्वाअवीवृधन्नैयादौ। होइवा। समु-
२ १ १र १ र १
द्रव्यचसम्। गाइरा२३ः। ऐया२३त। औ२३होवा।
१ २ १ १र १ र
रथाइतमऽर। थाइना२३म्। ऐया२३त। औ२३हो-
२ १र र १र १ २ १ १र
वा। वाजानाऽसत्पतिम्। पाती२३म्। ऐया२३त।
१ र २ १
औ२३होवा३४३। ओ२३४५इ। डा॥२१॥

---

V उत्तरमादऽष्ट्रम्।

VI, हयाइ। हयाउ। ओहाओहा। हयाइ। हयाउ। ओहाओहा। हयाइ। हयाउ। ओहा ओहा। इन्द्रं विश्वाः। अवीवाधा२न्। समुद्रव्या। चसंगाइरा२ः। रथीतमम्। रथाइना२म्। वाजानाᳬसात्। पतिंपाती२म्। हयाइ। हयाउ। ओहा ओहा। हयाइ। हयाउ। ओहाओहा। हो४इडा। हो४इडा। हो२३४५इ। डा॥ २२॥

VII हयायेउ। हयायेउ। हया२३४५। हᳬ२ ३। आ२३४इ। द्रंविश्वाअवी। वृधा३न्। सा२३४। मुद्रव्यचसम्। गिरा३ः। रा२३४। थीतमᳬरथी।

VI;VII महावश्वामित्रे द्वे।

अथ तृतीया।

गौतम* ऋषिः।

३ १ २ ३ १ २ २ २ ३ १ २ १ १ २
इमेमिन्द्रसुतम्पिबज्ये ष्ठममर्त्यं मदम्।

२ १ २ २ ३ ४ ५ १ २ २
नाऽ३म्। वा२३४। जानाऽसत्यतिम्। पताऽ३इम्। ह

१ १ २ १ २ ११११ ३ ११११ २
याये३। हयाये३। हया२३४५। ह२३४५। हो४इ

५ २ ५ ३
डा। हो४इडा। हो२३४५इ। डा॥ २३॥ १११

"विश्वाः" सर्वाः "गिरः" अस्मदीयाः स्तुतयः "इन्द्रम्" "अवीवृधन्"(१) वर्द्धितवत्यः। कीदृशमिन्द्रं? "समुद्रव्यचसं"(२) समुद्रव्याप्तवन्तं। "रथीनां" रथयुक्तानां योद्धृणां मध्ये "रथीतमम्" अतिशयेन रथयुक्तं "वाजानाम्" अन्नानां "पतिं" सन्मार्गवर्त्तिनां पालकम्॥ २॥ १११

---

* 'गोतम'-इति वि० पाठः।

---

(१)—"नित्यं छन्दसि (७,४,८)"-इति अभ्यासस्य...।

(२)—'समुद्रव्यचसं—समुद्रव्यचसा समुद्रस्य प्राप्तिरुच्यते समुद्रस्येव व्यचः प्राप्तिर्यस्य स समुद्रव्यचाः, तं समुद्रव्यचसं समुद्रव्याप्तिमित्यर्थः'-इति वि०।

२ १ २ ३क १र ३ १ २ ३२ ३ १ २
प्रुक्रस्यत्वाभ्यक्षरन्धाराऋतस्यसादने ॥ ३ ॥ ११२

२ १ ५ २ १ ३ ५र र
I इममा२३४इन्द्रा। सुतम्। पा३इबा२३४औहो

१र २ १ ५र १ २ र १
वा। ज्येष्ठममार्त्तियम्मदम्। प्रुक्रा। स्यत्वाभी३या२

१ ३ र५ र १र ५र १ २१र २ १ ११
३। क्षा२रा२३४औहोवा। धारा२ऋतस्यसादने२३४

२
५ ॥ २४ ॥

५ ३ २ ३ ३ ५ २र १ २ १ २ १
II, इममिन्द्रसुतंपिबा। ज्येष्ठाममा। तियम्मदा

३ २ ३र ५ २ र १ २ ३र
२म्। प्रुक्रा। औहो२३४वा। स्यत्वाभ्यक्षरन्। धा-

२ ३र ५ ३ २ ३र ५ ४
रा। औहो२३४वा। ऋता। औहो२३४वा। स्यसा

४
५दनाइ। होप्पइ। डा ॥ २५ ॥

---

११२ उत्तरार्चिकस्य ३,१,२१,१ = ऋग्वेदस्य १,६,५,४। = ऊहे ३,१—२२,२,१७—२३,२।

४ ४ २र १ ०
III, इमिमन्द्रा५सुतंपिबा । ज्येष्ठममा३र्त्तायम्मादा२
१ २ ५
म । औ२ । हौ२ । ऊवाइ । औ३हो२३४वा ।
२ ऽर १ ०
प्रुक्रस्यत्वा३भायच्चारा२न । औ२ । हौ२ । ऊवाइ । औ
५ १ २ १
३हो२३४वा । धारा१क्तता२ । औ२ । हौ२ । ऊवा-
२ ५ २ १र २ १
इ । औ३हो२३४वा । स्यसादा२३ना३४३इ । ओ२३४
५इ । डा ॥ २६ ॥

२ १ ४ ५ ४ ५ ४ ५ २ १
IV इममी२३ । द्रसुतंपिब । ज्येष्ठाम । अमा३र्त्ता-
० १ २ १ ३ ५
यम्मादा२म । प्रुक्रास्यत्वा३ । भिया२च्चा२३४रान ।
२ २ ३ ५ १ २ २ ५ ४ ४
धाराओ२३४वा । आर्त्ताओ२३४वा । स्यसा५दनाइ । हो-
५इ । डा ॥ २७ ॥ ११२

---

I,II,III,IV वसिष्ठस्य प्रियाणि चत्वारि ।

अथ चतुर्थी ।

अत्रिॠषिः ।

१ २          ३ १उ    ३ १ २
यदिन्द्रचित्रमइहना*स्तित्वादातमद्रिवः ।

३ १ २              ३ १ २
राधस्तन्नोविदद्वसउभयाहस्त्याभर ॥ ४ ॥ ११३

हे "इन्द्र!" "सुतम्" अभिषुतं "इमं" सोमं "पिब"। कीदृशं? "ज्येष्ठ" अतिशयेन प्रशस्यं "मदं" मदकर "अमर्त्यम्" अमारकं (सोम-पान-जन्यो मदो मदान्तरवन्मारको न भवतीत्यर्थः) तथा "ऋतस्य" यज्ञस्य सम्बन्धिनि "सदने(१)" गृहे वर्त्तमानस्य "शुक्रस्य"(२) दीप्तस्यास्य सोमस्य "धाराः" "त्वा" "अभ्यचरन्"(३) आभिमुख्येन सञ्चलन्ति त्वां प्राप्तुं स्वयमेवागच्छन्तीत्यर्थः ॥ ३ ॥ ११२

---

* "यदिन्द्र चित्र मेहना"-इति वहृकपाठः।

---

११३ उत्तरार्च्चिकस्य४.२,१४,१ = ऋग्वेदस्य४,२,१०,१ = ऊहे४,१८—२२,२,१८ = ऊह्ये ५,२,७।

(१)—सदने वेद्याख्यस्थाने, धाराः, अभ्यचरन् चरन्तु, इति वि०-सम्मतोऽर्थः।

(२)—'शुक्रस्य, शुक्रसंज्ञकस्य ग्रहस्य'-इति वि०।

(३)—'अभि, अभिशब्दः "अभिरभागे (१,४,९१)" इत्येवं कर्मप्रवचनीयः, प्रतिशब्देन समानार्थः। त्वां प्रति अचरन् चरितवन्तः चरन्तु। काः? धाराः' इति वि०।

४ ५ ४ २ १
I यदिन्द्रोहाइ। चित्रमइहना२३। आ२३४। स्ति

२र ५२र २ २ १ १ ३ ४ २र
त्वादा। हा३इ। तमद्राइवा२३ः। रा२३४। धस्तन्नो-

५ २ १ २र २
विदा। हा३। वा। साउ। उभयाहा२३। स्तिया-

२ ५
उवा३४३। भा३४५रो६हाइ॥ २८॥

५ २र ४ ५ ३ ५ १ २र २र
II यदिन्द्रचित्रमौहोवा। हा२३४ना। अस्तित्वादा-

२ १ २ २ ५ १२र २र
तमोवा३। ओवा। द्रा२३४इवाः। राधस्तन्नोविदो-

२ १ २ ३ ५ १ २र २
वा३। ओवा। वा२३४साउ। उभयाहस्तियोवा३।

१ २ २ ५
ओवा३४३। भा३४५रो६हाइ॥ २९॥

---

I,II वीके ह।

८८क,

२ १ ४ ५ २ ३ ५ १
I यदिन्द्रा२३चित्र। मइच्छा२३४ना। अस्ता२इ-
१र २ १ र२ १ र १
त्वादा। तमद्राइवो। राधस्तान्ना२ः। विदद्वसाउ।
२ १ १ ४ २ ५
उभयाच्चा२३। स्ता२३या३। भा३४५रोईच्चाइ॥ ३०॥

३ ४ ५ ३ २ ४ ५ १र र
II यदिन्द्रचित्रमइ। च्छना३। आस्ती। त्वादात-
र २ १ १
मद्रिवः। राधस्ता२३न्नाः। वीवौ२। ददद्वसाउ। उ-
२ १ १ २ १
भया२३च्चा। स्ताया२३। भा२३रा३४३। ओ२३४५इ।
डा॥ ३१॥ ११३*

हे "अद्रिवो"(१) वज्रवन्! "चित्र" चायनीयेन्द्र! "यद्" इदं "त्वादातं" त्वया दातव्यं यद् "राधो" धनम् "इह" अस्मिन्

I आकूपारमनादेशम्।

II वीङ्कम्।

(१)—'मतुवसोरिति (८,३,१) रुत्वे रूपम्।

* ॥ इति ग्रामे गेये नवमस्यार्द्धः प्रपाठकः॥

अथ पञ्चमी ।

तिरश्ची आङ्गिरसऋषिः ।

३ १र २र ३ २उ ३ १ २ ३ १ २
श्रुधीहवन्तिरश्चाइन्द्रयस्त्वासपर्यति ।
३ १ २ ३ १ २ ३ १ २ ३ १ २
सुवीर्यस्यगोमतोरायस्पूर्द्धिमहाँऽअसि ॥ ५ ॥ ११४

लोके "मे" मम नास्ति तद्धनं हे "विद्वसो" लब्धधनेन्द्र ! "नः" अस्मभ्यम् "उभया हस्त्या"(२) उभाभ्यां हस्ताभ्याम् "आ-भर" आहर ॥

अत्र निरुक्तं—"यदिन्द्र चित्रं चायनीयं मंहनीयं धनमस्ति-यन्म इह नास्तीति वेति द्रष्टव्यम्(३) ॥ ४ ॥ ११३

---

११४ उत्तरार्चिकस्य२,२,१८,१ = ऋग्वेदस्य६,६,३०,५ = ऊहे २,२,७—१३,१४ ।

(२)—आलं (७,१,२९) रूपम् ।

(३)—तथाच—"यदिन्द्र चित्रं चायनीयं, मंहनीयं धनमस्ति । यन्मइह नास्तीति वा (त्रीणि मध्यमानि पदानि) त्वया न स्तद् दातव्यम् । अद्रिवन् (अद्रिरादृणात्येने-नापि वात्तेः स्यात् । ते सोमाद इति च विज्ञायते । राध इति धन नाम राध्नु वन्त्ये-नेन) तन्नस्त्वं वित्तधनोभाभ्यां हस्ताभ्यामाहर उभौ ममुञ्चौ भवतः"-इति ४,४ ।

I ओम् ॥ श्रुधी। हावा२उहावा२म्। तिरश्चिया:। इन्द्रया२३त्वा। सपौ३हो। यंती३या। सुवीर्यस्य-गोमता:। रायास्पू२३र्द्धी। महा उ२३। असिया३४३। औ२३४५इ। डा॥ १ ॥

II श्रुधीहा३वन्तिराश्चया:। इन्द्रायत्वा। सपर्य-तायेइ४। सुवी। रिया स्या२३४गो। माता२:। रा-यास्पूर्द्धी३। हा३हाइ। महा उ५असी। हो ५ इ डा॥ २॥ ११४

हे इन्द्र! य: "त्वा" त्वां "सपर्य्यति" (सपर-शब्द:([1]) कण्ड्वादि:)

---

I,II तैरश्चेद्वे।

(१)—"सपर्यति"-इति परिचरण कर्मसु तृतीयं नैघण्टुकम् ३,५।

अथ षष्ठी ।

गौतमऋषिः ।

१ २ ३ १ २ २ १ २ ३ १ २
असाविसोमइन्द्रतेशविष्ठधृष्णवागहि ।

१ २ २ २उ २ २३ २३ १ २
आत्वापृणक्त्विन्द्रियꣳरजःसूर्योनरश्मिभिः ॥ ६ ॥ ११५

हविर्भिः परिचरति तादृशस्य "तिरश्चा" एतन्नामकस्य ऋषेर्मम "हवं" स्तुतिं "श्रुधि"(२) शृणु । श्रुत्वा च हे इन्द्र ! त्वं "सुवीर्य्यस्य" शोभनवीर्योपेतस्य । यद्वा (वीरे पुत्रे भवं वीर्यं) सुपुत्रवतः । "गोमतः" गवादि-पशुमतः(३) । "मघो" धनस्य दानेन "पूर्द्धि" अस्मान् पूरय(४) । एतत्सामर्थ्यं कुत इत्यत आह— त्वं "महान्" गुणाधिकः देवानां श्रेष्ठश्च "असि" भवसि खलु ॥ ५ ॥ ११४

---

११५ उत्तरार्च्चिकस्य ३,२,२३,१ = ऋग्वेदस्य १,६,५,१, = ऊहे ३,१८,—२२,२ १८—२३,४ ।

(२)—"श्रु-शृ-णु कृ-वृभ्यश्छन्दसि (६,४,१०२)"-इति सिद्धम् । मन्त्रे तु दीर्घः पाठः 'श्रुधी'-इति, स च "द्व्यचोऽतस्तिङः (६,३,१३५)"-इत्यत्र अत इत्यविवक्षया साध्यः ।

(३)—'गो-शब्देनात्र सोम उच्यते सोमवन्त इत्यर्थः'-इति वि० ।

(४)—"'पूर्द्धि''-इति याच्ञा-कर्मसु षष्ठं नैघण्टुकम् ३,१९ । "श्रु-शृ-णु-पृ-कृ-वृभ्यश्छन्दसि (६,४,१०२)"-इति सिद्धम् । "पूर्द्धि पूरय देहीति वा"-इति नि० नै०४,२ ।

३ ४र ३र ५ ५ र २ ३ ५ ३ १
I असाविसोमइन्द्रते। शाविष्ठा२३४धृ। ष्णो३आ-
२ १ १ २र २ २ १ २ ५
गा३हो। आत्वापृणा२३हा३। क्तुइं२०द्रा२३४याम्।
१ २ ३ ५ ४ ४
रजाः। सूर्यौवा ओ२३४वा। नरा५श्मिभीः। हो ५ इ

डा॥ २॥ ११५॥

हे "इन्द्र"! "ते' त्वदर्थं "सोमः" "असावि" अभिषुतोऽभूत्। हे "शविष्ठ" अतिशयेन बलवन्! अतएव "धृष्णो" शत्रूणां धर्षयितरिन्द्र! "आ गहि"(१) देव-यजन-देश मागच्छ। आगतञ्च "त्वा" त्वां "इन्द्रियं" सोम-पानेनोत्पन्नं प्रभूतं सामर्थ्यम्(२) "आ पृणक्तु"(३) आ पूरयतु। "रजः" अन्तरिक्षं(४) "रश्मिभिः" किरणैः "सूर्यो न" यथा सूर्य्यः पूरयति तद्वत्॥ ६॥ ११५

---

I महावैश्वामित्रम्।

(१)—"वा छन्दसि (३,४,८८)"-इति सिद्धम्।

(२)—'इन्द्रियं, ग्रन्तणो'त-मत्वर्थमिदं द्रष्टव्यम्, इन्द्रियवन्तम्, ग्रविकलेन्द्रिय-मित्यर्थः-इति वि०।

(३)—पृच सम्पर्के-इति रुधादेरूपमिदम्, अर्थान्तरत्वात।

(४)—'रजसी'-इति द्यावापृथिवी-नामसु अष्टमं नैघण्टुकम् ३,३०। अतएवाह विवरणकृत्--'रजः-शब्दो लोकवचनः। * * *। यथा पृथिवी-लोके अन्तरीक्ष-लोके च सूर्य्यः'-इति।

अथ सप्तमी।

कण्वो नीपातिथिर्ऋषिः*।

१२　२१ २३२३१२　३२
एन्द्र†याहि हरिभिरुप कण्वस्य सुष्टुतिम्।
३२ २३ ३१ २३ १२३१२
दिवो अमुष्य शासतो दिवं यय दिवावसो॥७॥ ११६

५र२ ३४र ५४ ५　२　१ २३
I एन्द्रा३याहि हरिभाइः। उपाकण्वा३। स्यासुष्टू२३४
५　२र　१२२　५　१२
तीम्। दिवो अमू३। ष्याशासा२३४ताः। दाइवंयया
१　४　२　५
३१उवार३। दा२३इवा३। वा३४५सोई हाइ॥४॥
४र५र　४२　४५　१　२१
II एन्द्रयाहि हरिभिः। उऊवा हाइ। उपकण्वस्यसु-

* 'मेधातिथिराह'-इति वि०।
† "ऐन्द्र"-इति ऋग्वेदीयः पाठः।

११६ उत्तरार्चिकस्य ८,१,१६,१=ऋग्वेदस्य ६,२,२,१।

I.II काण्वे द्वे।

२ १ २ १र २ १ २ २
ष्टुतिम्। उङ्कवा२३हाइ। दिवोअमू३। ष्याशासा२३-

५ १ ३ २ ५ ४
४ताः। दाइवंययाउ। वा३। दे२३४वा। वसोपुहा।

४
होपुइ। डा॥ ५॥ ११६

हे "इन्द्र!" "कण्वस्य" एतन्नामकस्य ऋषेः(१) "सुष्टुतिं"(२) शोभनां स्तुतिं प्रति "हरिभिः" अश्वैः "उपायाहि" आगच्छ। "दिवो" द्युलोकं [द्वितीयार्थे षष्ठी(३,१,८५)] "अमुष्य" अमुष्मिन्निन्द्रे "शासतः" शासति [विभक्ति-व्यत्ययः(३,१,८५)] तत्र वयं सुखमास्महे। हे "दिवावसो" दीप्त-हविष्केन्द्र! "दिवं" स्वर्गं "यय" यूयं गच्छत (बहुवचनं पूजार्थम्)।

यद्वा। हे "दिवावसो" दिवो द्यु-नामकं "अमुष्य" अमुं लोकं "शासतः" शासनं कुर्वन्तो यूयं "दिवं" स्वर्गं "यय" गच्छत (अत्र बहुवचनं पूजार्थमित्यर्थः ॥ ७ ॥ ११६

---

(१)—'कण्वस्य सुष्टुतिं, लुप्तोपममेतद् द्रष्टव्यम्—कण्वस्य स्तुतिमिव'-इति वि०।
(२)—"पूर्वपदात् (८,३,१०६)"-इति षत्वम्।

अथाष्टमी।

अस्याः परस्याश्च तिरश्ची ऋषिः।

२　३　१२３२　３१　२　३१२
आत्वागिरोरथीरिवास्थुःसुतेषुगिर्वणः।

२　२३　१२　　३१　२　३२उ　३१२
अभित्वासमनूषतगावोवत्संनधेनवः * ॥ ८॥ ११७

५र र २　४र५४र　५　　२　　८र १　७　८
I आत्वागा३इरोरथीरिवा। अस्थुः सुते३षूगिर्वाणा

२　५　२　५　२　र　१२　२
३ः। ओ३४वा। ओ२३४वा। अभित्वासा३मानू१षाता३।

२　४　३　५　१र　२　२　२१　५
ओ३४वा। ओ३४वा। गावोवा३त्सा३म्। नधो२३४वा।

४　५
नापूवोई३हाइ ॥ ६ ॥ ११७

"गिर्वणः" गीर्भिर्वननीय हे इन्द्र! "सुतेषु" सोमेषु अभिषुतेषु सत्सु "गिरः" अस्माकं स्तुतिलक्षणा वाचः "त्वा" त्वाम्

---

* "समनूषतेन्द्र वत्सं न मातरः"-इति ऋग्वेदीय-पाठः।

---

११७ ऋग्वेदस्य ६,६,२०,१।

I वैश्वामित्रम्।

अथ नवमी।

विश्वामित्र ऋषिः।

२ ३ २ ३ १ २ ३ २ ३ २ ३ १ २
एतोन्विन्द्रꣳस्तवामशुद्धꣳशुद्धेनसाम्ना।

३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
शुद्धैरुक्थैर्वावृध्वाꣳसꣳशुद्धैराशीर्वान्ममत्तु ॥९॥ ११८

"आ स्थुः"(१) आभिमुख्येन शीघ्रं गच्छन्ति तिष्ठन्तीत्यर्थः। तत्र दृष्टान्तः—"रथीरिव" यथा रथवान् रथेन गच्छन् वीरः प्राप्यं देशं क्षिप्रं गच्छति तद्वत्। किञ्च। हे इन्द्र! अस्मदीया गिरः "त्वा" त्वाम् "अभि" लक्ष्य "समनूषत" सम्यक् शब्दायन्ते स्तुवन्तीत्यर्थः (नु स्तवने। कुटादिः(२)। तस्य लुङि रूपं) तत्र दृष्टान्तः—"वत्सन्न" यथा "धेनवः" प्रीति-युक्ता गमन-शीला वा "गावः" वत्स मभिलक्ष्य हम्भा-रवादि-शब्दं कुर्वन्ति तद्वत् ॥ ८ ॥ ११७

---

* 'विश्वमना आह आत्मीयान् ऋत्विजः'-इति वि०।

---

११८ उत्तरार्चिकस्य ६,२,९,१ = ऋग्वेदस्य ६,६,११,२ = ऊहे ७,२,१२।

(१)—"छन्दसि लुङ् लुङ् लिटः (३,४,६)"-इति सार्वकालिके लिटि रूपम्।

(२)—तथाच—"गाङ् कुटादिभ्योऽञ् णिङ्त् (१,२,१)"-इति ङित्तो ऽणितश्च ञित्वे गुणभावः फलम्।

४र५र ४ ५ ४ ५र ४ २ १ र २ १ २
I एतोन्विन्द्र ऽस्तवामा । शुद्ध ऽ शुद्धेनसा२३म्ना ।

१र र र २ १ २ १र २ १
शुद्धैरुक्थैर्वावृध्वा२३ऽसाम् । शुद्ध रा२३शी३ । वा२न् ।

१२ ५र र ३ १ १ १ १
ममा३४औहोवा । त्व२३४५ ॥ ७ ॥

५रर ५ २ १ २ १
II एतोन्विन्द्र ऽस्तवाइमा । शुद्ध ऽ शुद्धे । न । साम्ना-

१ २ २ १र ३ ५ २
२ । शुद्धाइरु३क्था२इः । वावा२र्ध्वां२३४ऽसाम् । शु-

१र २ १ २ १ २ १
द्वै रा२३शी । वान्ममत्तु । इडा२३भा३४३ । ओ२३४५इ ।

डा ॥ ८ ॥ ११८

अत्रेतिहास माचक्षते—पुरा किलेन्द्रो वृत्रादिकानसुरान् हत्वा ब्रह्महत्यादि-दोषेणात्मान मपरिशुद्ध मित्यमन्यत । तद्दोषपरिहाराय इन्द्र ऋषीनवोचत्——यूयं अपूतं मां युष्मदीयेन साम्ना

---

I शुद्धाशुद्धीयम् ।

II शुद्धाशुद्धीयोत्तरम् ।

शुद्धं कुरुतेति। तत स्ते च शुद्धात्यादकेन साम्ना शस्त्रैश्च परिशुद्ध-मकार्षुः। पश्चात्पूतायेन्द्राय यागादि-कर्मणि सोमादीनि-हवींषि च प्रादुरिति। एषोऽर्थः शाट्यायनक-ब्राह्मणे प्रतिपादितः—"इन्द्रो वा असुरान् हत्वा पूत इवामेध्यो अमन्यत असौ अकामयत शुद्धमेव मासन्तं शुद्धेन साम्ना स्तुयुरिति। स ऋषीनब्रवीत् स्तुत मेति। त ऋषयः सामापश्यन् तेनास्तुवन् एतोन्विन्द्रमिति ततो वा इन्द्रः पूतः शुद्धो मेध्यो भवदिति"।

तथाच अस्या ऋचोऽयमर्थः—

ऋषयः परस्परं ब्रुवन्ति। "नु" क्षिप्रम्(१) "एतो" आगच्छतैव। आगत्य च "शुद्धेन" शुद्धात्यादकेन साम्ना। तथा शुद्धैः शुद्धि-हेतुभिः "उक्थैः" शस्त्रैश्चेन्द्रं "शुद्धम्" अपापिनं कृत्वा "स्तवाम" स्तुयाम। ततः "साम्ना" शस्त्रैः "वावृध्वांसं" पाप-राहित्येन वर्द्धमानं "शुद्धैः" शुद्धात्यादकैः स्तोत्रैः क्रियाविशेषैः "आशीर्वान्" आश्रयणवान्(२) गव्यादिभिः संस्कृतः सोमः "ममत्तु" इन्द्रं मादयतु (माद्यतेश्छान्दसः श्लुः(३)॥

"शुद्धैराशीर्वान्"-"शुद्ध आशीर्वान्"—इति पाठौ॥८॥११८

---

(१)—""नु-इति क्षिप्र-नामसु प्रथमं नैघण्टुकम् २,१५।

(२)—'सोममिश्रितं दधि आशिरमुच्यते, तद् यस्यास्ति सः आशीर्वान्'-इति वि०।

(३)—द्वितीयाध्यायीय-बहुल-वचनात् (२,४,७६)।

अथ दशमी।

शंयुर्बार्हस्पत्य ऋषिः।

२ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
योरयिंवो*रयिन्तमोयोद्युम्नैर्द्युम्नवत्तमः।

१ २ ३ १ २र ३ १ २ ३ १ २
सोमःसुतःसइन्द्रतेऽस्तिस्वधापतेमदः॥ १० ॥ ११९

॥ प्रथम-दशति ॥

५र र र ३ ५ १र र
I योरयिंवोरयाह्वाउ। ता२३४माः। योद्युम्नैर्द्युम्नव-

२ १र १ ० १ र
त्तमः। सोमःसुतःसआ२३होइ। द्रता२इ। अस्तिस्वधा-

१ २
पता२३होये३। मदो२३४५इ। डा॥ ८॥

२र ४ ३ ४र ५ ३ ५ ३र ४ ३र ४ ५
II योरयिंवोरयि। तमो२३४हाइ। योद्युम्नैर्द्युम्नव।

---

* "योरयिवो"-इति निरनुस्वार ऋग्वेदीय-पाठः।

---

११९ ऋग्वेदस्य ४,७,१६,१ = आरण्यगाने ३,२,१४।

I,II रयिष्ठे द्वे।

२ ५ ३र ४ ३ ४ ५ ३ ५ २
तमो२३४वाइ। सोमःसुतःस इ। इतो२३४वाइ। अ-

४ ५ र र २ ५ ४
स्तिस्वधापते। मदो२३४वा। वो५इ। डा॥ १० ॥११९

हे इन्द्र! "वः" (वचन-व्यत्ययः—(३,१,८) तव परिचारकेभ्यः स्तोतृभ्यः "यः" सोमः "रयिं" धनं प्रयच्छतीति शेषः। कीदृशः "रयिन्तमः" अतिशयेन रयिमान्। यश्च "द्युम्नैः" द्योतमानैर्यशोभिः(१) "द्युमत्तमः" अतिशयेन यशस्वी। हे "स्वधापते" स्वधाया अन्नस्य(२) सोमलक्षणस्य पालकेन्द्र! स "सोमः" अभिषुतः सन् "ते" तव "मदः" मदकरः "अस्ति" भवति॥ १० ॥ ११९

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्*।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वर-वैदिकमार्ग-प्रवर्त्तक-श्री-वीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दो-व्याख्याने तृतीयाध्यायस्य द्वादशः खण्डः॥ १२ ॥

---

(१)—"द्युम्नैः सवनीय-पुरोडाशादिभिः"-इति वि०।

(२)—"स्वधा"-इति अन्न-नामसु सप्तदशतमं नैघण्टकम् २,७।

* "निरामयन्"-इति रा० शा० पु० पाठः।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

## अथ चतुर्थाध्याय आरभ्यते ।

तत्र प्रथम-खण्डे—

मैषा प्रथमा ।

भरद्वाजऋषिः ।

१ २ ३ १ २ ३ १ २ ३ १ २
प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
३ २ ३ १ २ ३ ३ २ ३ १ २
अरङ्गमाय जग्मयेऽपश्चादध्वने नरः ॥ १ ॥ १२०

---

१२० उत्तरार्चिकस्य ६,३,२,१ = ऋग्वेदस्य ४,७,१४,१ = ऊहे १०,१—१६,१—२ = ऊह्ये २,२ = ८ ।

५ र र १ २ २ १ २र
I प्रत्यस्मैपिपाद्दाउ। आइषाइताइ। वाइश्वानि-

१ २ २ २ २ १ ऽर १
वाइ। दूषेइहाइहाइइ। भाइरा। आरा२०गमा। या-

२ २ २ २ २ १ ३ ५र
जाइहाइ। ग्माइयाइ। अपा२३। श्वा२दा२३४औ-

र १ ऽर १ ३ १ १ ११
होवा। ध्वने२नरा२३४५ः॥ ११॥

५ र ५र १ २र १ २र१
II प्रत्यस्मैपी६पीषताइ। वाइश्वानिवाइ। दूषेभा-

१ ऽर १ र
रा२। आरा२०गमा। यजग्मा। याइ। अपश्वाद्-

१ २१ २ ४ ५ ४
ध्वना२३होइ। नरा। औ३होवा। हो५इ। डा॥१२॥

३ ४ ५र ४ ५र २ २ १ र ५
II प्रत्यस्मै पिपी। षता३इ। वा२३४इ। श्वानि-

---

I,II कौल्मलबर्हिषे द्वे।

II नानदम्।

र  ४ ५  ४  ३र४ ५  २  ५
विदुषे। भारा। अरङ्गमायज। ग्मयोर२३४हाइ।

४ ५ ४ ५  २ १  ५  ४  ५
आपश्वादा। ध्वनोर२३४वा। नापूरो६हाइ॥ १३ ॥१२०

हे अध्वर्यो! "नरः" कर्मणि नेतस्त्वं "अस्मै" इन्द्राय प्रति-भर"(१) प्रतिहर सोमं प्रयच्छेत्यर्थः। कीदृशायेन्द्राय? "पिपीषते" पातुमिच्छते(२)। "विश्वानि" सर्वाणि वेद्यानि "विदुषे" जानते। "अरङ्गमाय" पर्याप्त-गमनाय। "जग्मये" यज्ञेषु गमनशीलाय। "अपश्चाद्दघ्वने" [दघि गति-कर्मा(३)] अपश्चाद्गमनाय सर्वेषा मग्रगामिने (नरः नृ-शब्दाच्चतुर्थ्यर्थे षष्ठी(४)। ङरि ऋतो गुणश्छान्दस(५)) नरे कामणानेत्रे(६)। अतएव बह्वृचा "अपश्चाद्दघ्वने नरे" इति चतुर्थ्यन्तत्वेनामनन्ति॥ १ ॥ १२०

---

(१)—भरति "हृग्रहोर्भश्छन्दसि"-इति वचनाद् हरतेर्भत्वेन रूपम् अतो व्याचष्टे प्रति हरेति।

(२)—ग्रह-चमसादीनि पात्राणीति शेषः।

(३)—निघण्टौ "दघ्नति"-इत्य गति-कर्मसु एकषष्ठितमत्वेन पाठात् (२,१४)।

(४)—"चतुर्थ्यर्थे बहुलं छन्दसि (२,३,६२)"-इति पा०।

(५)—"बहुलं छन्दसि (७,३,९,७)"-इति पा०।

(६)—'नरः प्रथमैकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम्, नराय मनुष्याकाराय'-इति वि०।

अथ द्वितीया।

वामदेवः शाकपूतो वा*ऋषिः।

१ २ ३ १ २ १ २ ३ २ ३ १ २ ३ १
आनोवयोवयःशयंमहान्तंगह्वरेष्ठांमहान्तंपूर्विनेष्ठाम्।

३ २उ ३ १ २
उग्रंवचोअपावधीः ॥ २ ॥ १२१

५र र र ५ २ र ३ ५
I आनोवयोवयःशाईयाम्। महान्तङ्गह्वरा२३४इष्ठा-

२र र ३ ५ २ १ २ ३
म्। महान्तंपूर्विना२३४इष्ठाम्। उग्रंवा२३चाः। अ-

२ ४
पा३वापुधा६५६ः ॥ १४ ॥ १२१

हे "वयस्य"(१) मित्रभूतेन्द्र! "अयम्" ईदृशस्त्वं "महान्तं" महत्प्रभूतं "गह्वरेष्ठां" गिरि-गुहादौ वर्त्तमानं "नः" अस्म-

---

* 'वामदेवस्यार्षम्' इत्येव वि०।

---

१२१ यजुर्वेदस्य ५,८।

I शाकपूतम्।

(१)—मूले "वयः शयम्"-इति यद् दृश्यते, तत्रैव 'वयस्य!'—'वयस्'-इत्येवं छेदः स्वीकृतो भाष्यकृतेति बध्यते। विवरणकारेण तु नास किमपि व्याख्यातम।

अथ तृतीया ।

प्रियमेधऋषिः ।

२　३ १ २ २ ३ १ २ ३ १ २
आत्वारथंयथोतयेसुम्नायवर्त्तयामसि ।

२　१ २ ३ २ २ १ १　३ १ २
तुविकूर्मिमृतीषहमिन्द्रंशविष्ठसत्पतिम्* ॥ ३ ॥ १२२

दीयं "वयः" सोम-लक्षण मन्नम्(१) "आ" हर [उपसर्ग-श्रुतेर्योग्य-क्रियाध्याहारः(२) ] आहृत्य "महान्तं" महत्-प्रभूतं "पूर्विनेष्ठां" पूर्वमादौ संसारे प्रवर्त्तमानम् । "उग्रं" क्षुत्पिपासा-निमित्तेन भयङ्करं । "वचः" अस्मदीयं वचनं ("अशनायापिपासे ह वा उग्रं वचः"—इति श्रुतेः ) "अपावधीः" अपजहि, देवत्वं प्रापये-त्यर्थः ("तत् प्राप्नोत्यशनायापिपासे निवर्त्तते । न वै देवा अश्नन्ति न पिबन्ति"—इति श्रुतेः ॥ २ ॥ १२१

---

* "इन्द्र शविष्ठ सत्पते"-इति ऋग्वेदीय-पाठः ।

---

१२२ उत्तरार्चिकस्य ८,१,३,१ = ऋग्वेदस्य ६,५,१,१ = ऊहे २१,१८ ।

(१)—वय इति सुत इति च अन्न-नामसु पाठ-भेदेन सप्तमं नैघण्टुकम् २,७ ।

(२)—"आनो वयो"-इति मूले आ-इत्युपसर्ग-श्रवणात् हरार्थाभरेति क्रिया अध्याहार्येति भावः ।

५र र र ४ ५ १ २ ३ ५ १
I आत्वारथंयथौहोवा। तायाइस्र२३४ना। यवर्त्त-

र २ ३ ५ १२ १ २
यामसितुविकूर्मोम्। आ२३४र्त्ती। षहम्। आइन्द्रा-

४ ५ २१ १ १
३ऽशावी। छसत्या २ ३ ती ३ ४ ३ म्। ओ २ ३ ४५इ।

डा॥ १५॥

३र ४र ३ ४ ५र ३ २ ३र ४र ५ २१
II आत्वारथंयथो। तयाइ। आत्वारथाम्। यथो

२ ३र ५ ३ ५ २र १
तायं। औहो२३४वा। ई२३४हा। सुम्नायवर्त्ता३या-

२ ३र २ १ ३ ५ २ र १
मसी। औहो३१इ। औ२हो२३४वा। तुविकूर्मिमृ३ता-

२ ३र २ ३ ५ २
इषहभ्। औहो३१इ। औ२हो२३४वा। इन्द्रऽशवि-

१ २ ३र २ ३
ष्ठा३सात्पतिम्। औहो३१इ। औ२हो२३४५वा६५६।

३ ५
ई२३४हा॥ १६॥ १२२

---

I,II कौल्मलबर्हिषे द्वे।

अथ चतुर्थी ।

प्रगाथऋषिः ।

२ ३ २ ३ १ २ ३ १र २र
सपूर्व्योमहोनांवेनःक्रतुभिरानजे ।

३ २ ३ २र २ ३ २ ३ २ ३ १ २ ३ २
यस्यद्वारामनुःपिता* देवेषुधियआनजे ॥ ४ ॥ १२३

हे इन्द्र! "त्वा" त्वां "आवर्त्तयामसि" आवर्त्तयामः। किमर्थम्? "ऊतये" अस्माकं रक्षणाय "सुम्नाय" सुखाय च(१)। किमिव? "रथं यथा" ऊतये सुखाय चावर्त्तयन्ति तद्वत्। हे "शविष्ठ"(२) बलवत्तमेन्द्र! "तुविकूर्मि" बहु-कर्माण(३) "ऋती-

---

* "मनुष्पिता"(क) -इति सायणाचार्य्य-धृतपाठः, ऋ पाठश्च।

---

१२३ ऋग्वेदस्य ६,४,४१(२४)१ ।

(१)—"सुम्नम्"-इति सुख-नामसु षोड़शतमं नैघण्टुकम् ३,६ ।

(२)—'सम्बुध्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्, शविष्ठम् अतिशयेन बलवत्तम्'-इति वि० ।

(३)—'तुवीति बहु-नाम (नै०३,१,२), कूर्मिः कर्त्ता; बहूनां वृत्रवधादीनां कर्मणां कर्त्तारम्'-इति वि० ।

(क)—"छन्दसि वाऽप्राम्रेडितयोः (८,३,४९)"-इति विसर्गस्य सत्व-विकल्प-विधानात् ।

५ २ र र ५ २र १ र २ २
I सपूर्व्योमहोनाई्मे। वेनःक्रतु३भाइरानजे२। हा

२ ऽ २ २ १ र ऽर १
३हा। औ३हो३वा। आइही२। यस्यद्वारा३मानुः-

२ २ २ ऽ २ २ १ १ र
पिता३। हा३हा। औ३हो३वा। आइही२। दाइवेषू-

२ २ २ ऽ २ २ १ १
धा३। हा३हाइ। औ३हो३वा। आइही२। यआ२-

१ ३ ५र र २ १ २ ११ ११
३। नार्जा२३४औहोवा। मधुस्रु ता२३४५ः॥ १७॥ १२३

षहम्" हिंसकाना मभिभवितारं। "सत्पतिं" सतां पालकमिन्द्रं त्वामिति समन्वयः॥ ३॥ १२२

"स" इन्द्रः(१) "पूर्व्यो" मुख्यः(२) "महोनां"(३) पूज्यानां यजमानानां "क्रतुभिः" यज्ञैर्निमित्तभूतैः "वेनः" कान्तः(४)

---

I मधुस्रुन्निधनम्।

(१)—'स मनुष्यः'-इति वि०।

(२)—'पूर्व्यः प्रथम इत्यर्थः'-इति वि०।

(३)—'महोनां घकारस्य हकारापत्तिश्छान्दसः, मघोनां मघवतां धनवतां मध्ये, वेनः कान्तः'-इति वि०।

(४)—"वेनति"-इति कान्तिकर्मसु चतुर्थं नैघण्टुकम् २,६।

अथ पञ्चमी ।

श्यावाश्व आत्रेयऋषिः* ।

३ १ २ ३ २ ३ १ २ ३ २ ३ २
यदीवहन्त्याशवोभ्राजमानारथेष्वा ।

१ २ ३ २उ ३ २ ३ १ २
पिबन्तोमदिरंमधुतत्रश्रवाꣳसिकृण्वते ॥ ५ ॥ १२४

तेषां हविः कामायमानः "आनजे" आगच्छति(५)। "यस्य" इन्द्रस्य "द्वारा" द्वाराणि प्राप्यपापानि "धियः" कर्माणि देवेषु" एतेषु मध्ये "पिता" सर्वेषां पालकः "मनुः" 'आनजे' प्रापयति [नजिः प्राप्ति-कर्मा(६) ]।

"मघोनां"-"मघानाम्"-इति पाठौ ॥ ४ ॥ १२३

---

* वामदेवस्यार्षम्'-इति वि० ।

---

(५)—आनजे इति अञ्जेरूपम् 'व्यक्तीकरोति'-इति वि० ।

(६)—निघण्टौ व्याप्ति-कर्मसु नजतेः पाठात् (२,१८)। विवरणकारस्त्वेव माह—'आनजे-अजु व्यक्ति-म्रक्षण-गतिषु इत्येतस्य गत्यर्थस्य अन्तर्णीत-ण्यर्थस्य चेदं रूपम्, आगमयति उत्पादयति इत्यर्थः। एतदुक्तं भवति—यस्य यागद्वारभूतानि आधाना-दीनि यागविषयाश्च बुद्धीः सर्वस्य ज्ञाता इन्द्र उत्पादयति स प्रथमं यागं करोतीति समस्तार्थः'-इति ।

४ ५र ४ ५ र ४ ५ ४ ५ १
I यदीवहंत्याशवः । य । द्येयादो । ओइवहंता-
१ १ र र र र २ १
आ१शावा२ः । ओइभ्राजमानारथाइषू१वा२ । ओइपि-
र २ १ र २ १
बन्तोमदिराम्मा१धू२ । ओइ । तत्रश्रवा॑ऽसिकोवा३ओ२-
५ ४ ५
३४वा । एवा५तोई्हाइ ॥ १८ ॥ १२४

हे इन्द्र! "यदि" यत्र यस्मिन् यज्ञे "रथेषु" "भ्राजमानाः" दीप्यमानाः(१) "आशवः" चिप्र-गामिन स्त्वदीया मरुतः "आ वहन्ति"। यत्र आभिमुख्येन त्वां प्रापयन्ति "तत्र" तस्मिन् यज्ञे "मदिरं" मदकरं "मधु" उदकादि-रस-विशेषितं सोम-लक्षण मन्नं वा 'पिबन्तः "श्रवांसि" अन्नानि "कृण्वते"(२) वृष्टि-द्वारा कुर्वन्ति । [यद्वा । अस्मिन्यज्ञे "भ्राजमानाः" दीप्यमानाः "आशवः" शीघ्रगामिनः "मदिरं" मदकरं "मधु" सोमं "पिबन्तः" पास्यन्त ऋत्विग्यजमानाः "रथेषु" सोम मावहन्ति "तत्र" तस्मिन्यज्ञे "श्रवांसि" अभिषवादि-कर्मभिः प्रशस्तान्यन्नानि "कृण्वते" कुर्वन्ति ॥ ५ ॥ १२४

---

I उषःसाम ।

(१)—'भ्राजमानाः रथेषु नियुक्ताः, सन्तइति वाक्यशेषः-इति वि० ।

(२)—'कृञ् हिंसायाम्'-इत्यस्य लटि रूपम्, अर्थस्तु करोतेरेव । अथवा विकरण-व्यत्ययेन रूपम् (३,१,८५) ।

अथ षष्ठी ।

शंयुर्ऋषिः* ।

१ २ ३ १ २    ३ १र २र३ १ २
त्यमुवो अप्रहणं गृणीषे शवसस्पतिम् ।
१ २  ३ २ ३ १ ३ १ २  ३ १ २
इन्द्रं विश्वासाहं नरꣳ शचिष्ठं विश्ववेदसम्† ॥६॥२१५

३ ४ ५र    ३२    ३    ५    २ ३ १र
I त्यमुवो अ । प्रहा । हा२३४णाम् । गृणीषे शव-
२ १    २ ४ ५    १२ १ २
सः । पताइम् । आइन्द्रा३०वाइश्वा । सहा२ꣳ होये-
५ ३२    २ १    ५    १ २ १
३४ । नारमो३इ । शचिष्ठा२३४०वी । श्ववा३हो२३४ ।
५ ४ ५
वा । दा५सो६हाइ ॥ १८ ॥१२५

* संयुरिति दन्त्यादि-पाठो विवरणे ।

† "नरं मꣳहिष्ठं विश्वचर्षणिम्"-इति ऋग्वेदीय-पाठः ।

---

१२५ ऋग्वेदस्य ४,७,१६,४ ।

I भारद्वाजम् ।

अथ सप्तमी।

वामदेव ऋषिः।

२ १ २ ३ १र २र ३ १ २
दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः।

४ ५ ४र ५र र ४ १
I ओहाइ। दधिक्राव्णोअकारिषम्। ओहाइ। ओ-

हे ऋत्विग्यजमानाः! "वो" युष्मदर्थं "त्यमु" तमेवेन्द्रं "गृणीषे" स्तौमि [यद्वा। "वो" यूयं "गृणीत" स्तुत वचन-व्यत्ययः(१)] कीदृशमिन्द्रम्? "अप्रहणं"(२) अप्रहर्त्तारं भक्ताना मनुग्राहकं। "शवसो" बलस्य"पतिं" पालकं। "विश्वासाहं"(३) विश्वस्य शत्रो रभिभवितारं "नरं" नेतारं "शचिष्ठं" यज्ञादि-कर्म-स्थितं(४)। "विश्ववेदसं" विश्वं वेदो धनं(५) यस्यासौ विश्ववेदाः तम्॥ ६॥ १२५

---

I दधिक्राव्णाम्।

(१)—"व्यत्ययो बहुलम् (३,१,८५)"-इति। विवरणकारस्त्वेवं व्याचष्टे—'शृ-स्तुता वित्यस्येदं रूपम्, मध्यम-पुरुषैकवचनस्योत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम्; गृणे स्तौमीत्यर्थः'-इति।

(२)—'केनचित् प्रहर्त्तुं मशक्यम्'-इति वि०।

(३)—"विश्वस्य वसु-राटोः (६,४,१२८)"-इति सूत्रस्य-वार्त्तिक-वचनात् साहेऽपि दीर्घः।

(४)—"शची"-"शचि" च पाठभेदेन कर्म-नामसु द्वाविंशतितमं नैघण्टुकम्(२,१) तत्र तिष्ठन्तमित्यर्थः।—"शविष्ठम्"-इति विवरण-सम्मतः पाठः, अतएव तत्र 'शविष्ठम् अतिशयेन अन्नवन्तम्'-इति व्याख्यातम्। शव इत्यन्न-नामसु दृश्यते हि निघण्टौ२,७।

(५)—"वेदः"-इति धन-नामसु चतुर्थं नैघण्टुकम् (२,१०)।

३ २ ३ १ २ ३ २ ३ १ १
सुरभिनोमुखाकरत्प्रन*आयूꣳषितारिषत् ॥७॥ १२६

२ २ १ २ १ २ २ १२
ह्वाइ। जिष्णोरश्वस्यवाजिना२३ह्वोइ। सुरभिनोमुखाका-

२ १ १ २ १ २१२
२३रात्। प्रना२३ह्वोइ। आयू२३ह्वो। षितारा२३इ-

२ १
षा३४३त्। ओ२३४५इ। डा ॥ २० ॥ १२६

दधिक्रावाऽग्नि-विशेषः। स चाश्वरूपः(१) "अग्निर्देवेभ्यो-निलीयत अश्वो रूपं कृत्वा यदश्वेत्यतिष्ठदि" त्यादिरध्वर्यु-ब्राह्मण-मनुसन्धेयम्।

---

* "प्रण"-इति मूर्द्धन्य-पाठः ऋग्वेदीयः।

---

१२६ ऋग्वेदस्य ३,७,१२,६।

(१)—अत्र यास्कः—"दधिक्रावा इत्येतद् दधत् क्रामतीति वा दधत् क्रन्दतीति वा दधदाकारी भवतीति वा। तस्याश्ववद् देवतावच्च निगमा भवन्ति (२,२७)"-इति। तस्य चोदाहरणे द्वयोरेव, तथा हि अश्व-रूपस्योदाहरणम्—

"उतस्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपि-

"दधिक्राव्णो" देवस्य स्तुतिम् "अकारिषं" करवाणि। "जिष्णोः" जयशीलस्य "अश्वस्य" तद्रूपस्य "वाजिनो" वेगवतः। स देवो "नो" ऽस्माकं "मुखा(१)" मुखानि चक्षुरादीनीन्द्रियाणि "सुरभी" सुरभीणि "करत्"(२) करोतु। "नो" ऽस्मभ्यम् "आयूꣳषि" "प्र तारिषत्" प्रवर्द्धयन्तु (प्र-पूर्वस्तिरतिर्वर्द्धनार्थः ॥७॥ १२६

---

कक्ष आसनि। क्रतुं दधिक्रा अनु सन्तवीत्वत्पथामङ्काꣳस्यन्वापनीफणत्॥" (ऋ० ४म० ४अ० ८सू० ४ऋ०ऋक्)

"अपि स वाजी वेजनवान् क्षेपणमनु तूर्णमश्नुते ऽध्वानं ग्रीवायां बद्धो (ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वापि कक्ष आसनीति व्याख्यातम्)। क्रतुं दधिक्राः कर्म वा प्रज्ञां वा अनुसन्तवीत्वत्। तनोतेः पूर्वया प्रकृत्या निगमः। पथा मङ्कांसि पथां कुटिलानि (पन्थाः पततेर्वा पद्यतेर्वा पन्थतेर्वा) अङ्कोऽश्वतेरापनीफणदिति फणतेश्चर्करीतवृत्तम्"-इति च तद्भाष्यम्।

देवता अपस्योदाहरन्तीदम्—

"आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषा पस्तान। सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांꣳसि॥" (ऋ० ४म० ४अ० ६सू० १० ऋक्)

"आ तनोति दधिक्राः शवसा बलेनापः सूर्य इव ज्योतिषा पञ्च मनुष्य-जातानि सहस्रसाः शतसा वाजी वेजनवानर्वेरणवान्सम्पृणक्तु नो मधुनोदकेन वचनानीमानीति। (मधु धमतेर्विपरीतस्य)"-इति च तद्भाष्यम्।

(२)—"सुपां सु-लुगिति (७,१,३९)"-इत्याले रूपम्।

(३)—लेटो रूपम् (३,४,७)।

अथाष्टमी।

जेता माधुच्छन्दस ऋषिः।

३ २ ३ १२ २र३ १र २र
पुरांभिन्दुर्युवाकविरमितौजा अजायत।

२ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २
इन्द्रोविश्वस्यकर्मणोधर्त्तावज्रीपुरुष्टुतः ॥ ८ ॥ १२७

द्वितीय-दशति ॥ २ ॥

५र ३ २३४र५ १ २र २र २१र
I पुराम्भिन्दर्युवाक। वीः। अमितौजा अजाया२-

२ १ र २ १ २ ३ ५ १
३ता। आइन्द्रोविश्वा३। स्याकर्मा२३४णाः। धर्त्ता। वा-

२ ३ ५ ४ ४
ज्रौवाओ२३४वा। पुरु५ष्टु ताः। होपुइ। डा ॥२१॥ १२७

अयम् "इन्द्रः" उच्यमान-गुण-युक्तः "अजायत" सम्पन्नः। कीदृशगुणक इति? तदुच्यते—"पुरां" पुराणां "भिन्दुः" भेत्ता "युवा" कदाचिदपि बली-पलितादि-वार्द्धक्य-रहितः। "कविः" मेधावी "अमितौजाः" प्रभूत-बलः "विश्वकर्मणः" कृत्स्नस्य ज्योतिष्टोमादेः

---

१२७ उत्तरार्चिकस्य ५,१,२०,१ = ऋग्वेदस्य १,१,२१,४ = ऊहे ५,१२—२२, २,२०।

I मारुतम्।

"धर्त्ता" पोषकः(१) "वज्री" यजमान-रक्षणार्थं सर्वदा वज्रयुक्तः "पुरुष्टुतः" बहुभिर्होत्रादिभि स्तत्तत्-कर्मणि स्तुतः ॥ ८ ॥ १२७

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दो व्याख्याने चतुर्थस्याध्यायस्य प्रथमः खण्डः ॥ १ ॥

---

अथ द्वितीय-खण्डे—

सैषा प्रथमा।

प्रियमेधा ऋषिः।

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
प्रप्रवस्त्रिष्टुभमिषंवन्दद्वीरा*येन्दवे।

३ १ २ ३ १ २ ३ २ ३ १ २
धियावोमेधसातयेपुरन्ध्याविवासति ॥ १ ॥ १२८

---

* "मन्दद्वीरा"-इति ऋग्वेदीय-पाठः।

---

१२८ ऋग्वेदस्य ६,५,५,१।

(१)—'धर्त्ता धारयिता, कथं सर्वस्य कर्मणः ? इष्टायतलात्, इष्टस्य इन्द्रायतलात्—इति वि०।

५ २ २ २ ५ २१ २
I प्रप्रवस्त्रिष्टुभमिषमोहाओहा६ए। वन्दद्वीरा। य-

१ ० ऽ २ ऽ २ २ २२ २२ २
आइन्दवे२। ओ२हा। ओ२हा३ए। धियावोमेधसा-

२ १ ऽ २ ऽ २ २ १ २ २
१ता२याइ। ओ२हा। ओ२हा३ए। पुरान्धी२या३।

२१ ५ ४ ५
विवो२३४वा। सापुतो६हाइ॥ २२ ॥ १२८

हे अध्वर्य्वादयः! "वो" यूयं [प्रथमाय द्वितीया(१)] "त्रिष्टुभं" स्तोभ-त्रयोपेतम्(२) "इषम्" अन्नं(३) "प्र प्र" [अपरः प्र-शब्दः

---

I वामदेव्यम्।

(१)—'वः युष्मभ्यम्' इति वि०।

(२)—साम-मन्त्रान्वितमित्यर्थः सामसु एव स्तोभादेः श्रवणात्, तत्सम्पादनार्थं एव विकार-विश्लेष-विकर्षण-विरामाभ्यास-लोपागम-स्तोभादयः क्रियन्ते; अतएवैवं साम-विधानं ब्राह्मणम्—"एतस्य साम्न ऋगेवास्थीनि, स्वरो मांसानि, स्तोभा लोमानि"-इति (१,१) स च स्तोभः त्रिविधः—पद-वाक्याक्षर-भेदात्। पद-स्तोभाः हाउ-कारादयः पञ्च-दश, मन्त्र-ब्राह्मण-तृतीय-प्रपाठकीय-त्रयोदश-खण्ड-परिगणिताः, श्रुताश्च ते सर्वत्र गान-ग्रन्थे, विशेषत आरण्ये। वाक्यस्तोभाः पुनराशीस्त्रयादि-भेदान्नव, तथाहि—"आशीःस्तुतिः संख्यानं प्रलयः परिदेवनम्। प्रैष मन्वेषणञ्चैव सृष्टिराख्यान मेव च"-इति, इमाश्च स्तोभाः ग्रन्थे श्रुताः आरण्यादौ च गीयन्ते। वर्णस्तोभ-लक्षणन्तु विकल्पे त्वगृविलक्षणत्व-मिति, तदुक्तम् माधवेन—"स्तोभस्य लक्षणं नास्ति किं वास्ति न विवर्णता। आधिक्य मप्यतिव्याप्तं विशिष्टं लक्षणं भवेत् (८अ० २पा० ११ अधि०)"-इति तदुदाहरणन्तु

पूरणः(४)।] भरतेति शेषः। उपसर्ग-श्रुते योग्य-क्रियाध्याहारः। कस्मै? "वन्दद्वीराय" यो वीरान् स्तौति स वन्दद्वीरः(५) तस्मै "इन्दवे" इन्द्राय। [इन्दते ऐश्वर्य-कर्मण(६) इदं रूपम्। [अथवा(७) फलैरिष्टिभिर्वा उनत्तीतीन्दुरिन्द्रः तस्मै। स चेन्द्रो "वो" युष्मान् "मेधसातये" यज्ञ-सम्भजनाय(८) "पुरन्ध्या" बहु-प्रज्ञया(९) "धिया" कर्मणा(१०) "आ विवासति" परिचरति(११)। अभिमत-फल-योजनेन सत्करोतीत्यर्थः॥ १॥ १२८

सर्वत्रैव गानग्रन्थे, प्रायः सर्व-सामस्वेवेत्युक्तोऽपि नात्युक्तिः इहैव ऋचि गीतं यत् साम तत्रापि श्रूयते। तथाहि—

'मेधसातये'-इत्यत्र 'मेधसा १ ता इयाइ'-इत्यादि।

(३)—"इषम्"-इत्यन्ननामसु चतुर्दशतमं नैघण्टुकम् २,७।

(४)—'प्रसमुपोदः पादपूरणे'-इति छन्दःशासनादित्यभिप्रायः।

(५)—"वीरो वीरयत्यमित्रान् वेतेर्वा स्याद् गति-कर्मणो वीरयते वा इति यास्कः(१,७)।

(६)—'इदि परमैश्वर्ये (भ्वा० प०)।

(७)—"इन्दुः"-इति उदक-नामसु चतुरशीतितमं नैघण्टुकम(१,१२)—यज्ञ-नामसु च त्रयोदशतमम् (३,१७)—दैवतकाण्डे नैरुक्ते चान्तरिक्षस्थ देवतानाम-धेय गणनासु चान्तिमम्,तथाहि यास्कः—"इन्दुरिन्धेरुनत्तेर्वा"-इत्यारभ्य "तेषामेतान्यन्तरिक्षस्थानि वेनोऽसुनीतिरृतइन्दुः"-इति ४,४१—४२।

(८)—"मेधः"-इति यज्ञ-नामसु चतुर्थं नैघण्टुकम् ३,१७। विवरणकारस्त्वेवमाह—'मेधसातये चपठितमपि यज्ञ-नामैतद् द्रष्टव्यम्, चतुर्थ्येकवचनमिदं सप्तम्येकवचनस्थस्थाने द्रष्टव्यम्, मेधसातौ यज्ञे इत्यर्थः'-इति।

(९)—"पुरन्धिः बहुधी स्तत्कः पुरन्धिर्भगः पुरस्तात् तस्यान्वादेश इत्येकमिन्द्र इत्यपरम्, सबहुकर्मतमः, पुरांच दारयितृतमो वरुणइत्यपरम्, तं प्रज्ञया स्तौति"-इति नि० नै० ६,१३।

(१०)—"धीः"-इति कर्म-नामस्वेक विंशतितमं नैघण्टुकम् २,१।

(११)—"विवासति"-इति परिचरण-कर्मसु दशमं नैघण्टुकम ३,५।

अथ द्वितीया।

वामदेव ऋषिः*।

३ १ २ ३ २ ३ २ ३ २ ३ २ ३ १ २
कश्यपस्यस्वर्विदोयावाहुःसयुजाविति।

१ २ २ ३ १ १ २ ३ २ ३ १ २ २ २ ३ १ २
ययोर्विश्वमपिव्रतंयज्ञंधीरानिचाय्य॥ २ ॥ १२९

५ ५ १ २ २ १ १
I कश्यपस्यसुवर्विदा३ए। यावाहुःस। युजावा१-

२ ४र २ ४ ५ ३१ १ २ २
इती२३४। ययोर्विश्वमपि। व्रता३म्। यज्ञंधी३राः।

१ १ १ ५र २ २ ५
निचा२३। आ२या२३४औहोवा। ऊ२३४पा॥२३॥२२९

पश्यतीति कश्यपः। "कश्यपः पश्यको भवती" तिश्रुत्यन्तरम्। तस्य "कश्यपस्य" सर्वज्ञस्येन्द्रस्य सम्बन्धिनो "यौ" अश्वौ। "ययोः" च "विश्वं" सर्वम् "अपि" "व्रतं" कर्म "यज्ञं" प्रति

---

* "कश्यपस्यार्षम्"-इति वि०।

---

१२९ आरण्यगानस्य ४,१८,२०।

I काश्यपम्।

८३क,

अथ तृतीया।

प्रियमेध ऋषिः।

१ २ ३ १ २ ३ १ २ ३ १ २
अर्चतप्रार्चतानरःप्रियमेधासोअर्चत।

यजनीय-देशं प्रतीत्येवं "निचाय्य" निश्चित्य "सयुजौ" (सहैव युञ्जाते-इति) "स्वर्विदः" स्वर्गं लब्धवन्तो "धीराः" जनाः आहुः(१)।

अथवा "कश्यपः" प्रजापतिः ("कश्यपोऽष्टमः स महामेरुं न जहातीति" श्रुत्यन्तरात्) तस्य "स्वर्विदः" सर्वं पश्यतः "यौ" देवौ "सयुजौ" सहचरौ जना आहुः वेदविद स्तौ मित्रावरुणौ। ("अहर्वै मित्रो रात्रिर्वरुणः" इत्यैतरेय-ब्राह्मणम्। सर्वस्य कार्यस्य तयोरेवान्तर्भावात् (इन्द्राग्नी वा देवौ तयो रेव सर्व-निर्वाह-कत्वात्) तदभिप्रायेय मृक् मैत्रावरुणी ऐन्द्राग्नी वेति पूर्व-मभिहितम्॥ २ ॥ १२९

---

१३० ऋग्वेदस्य ६,५,६,२,।

(१)—विवरण-मते स्वर्विद इति षष्ठ्यन्तं कश्यपस्येत्यस्य विशेषणं, धीरा इति च द्विवचन-स्थानिकं बहुवचनम् यावित्यस्य विशेषणम्।

१ २　　३ २　१२उ　१ २　　३क २र
अर्चन्तुपुत्रकाउतपुरमिद्*धष्णुर्चत ॥ ३ ॥ १३०

२　र　१　५　२　र　४　२　३५
I अर्चतप्रार्चतानार२३४राः। प्रियमेधा३सो१२अर्चत।

२ १　४　२र३५　१　२　४
अर्चन्तुपू२३त्रा३काउत। पुरमिद्वा२३। ष्णुवा३र्चा५ता

६५६ ॥ २४ ॥ १३०

हे "नरः" कर्मणां नेतारोऽध्वर्य्वादयः! यूयं इन्द्रम् "अर्चत" पूजयत स्तुत्या "प्रार्चत" प्रकर्षेणार्चतेन्द्र मेव। हे "प्रियमेधासः!" प्रियमेध-सम्बन्धिनस्तद्गोत्रा यूयं अर्चतेन्द्रम्। "पुत्रकाः" पुत्रा अप्यर्चन्त्विन्द्रम्। "उत" अपिच "पुरमित्" पुरमेव(१) स्तोतॄणा मभिमतस्य पूरकं। "धृष्णु" धर्षणशीलं तादृश मिन्द्रम् "अर्चत" ॥ ३ ॥ १३०

---

* "पुरं न"-इति ऋ० पाठः।

---

I प्रैयमेधम्।

(१)—'इवशब्द इव-शब्दस्यार्थे, पुरमिव धृष्णु म्। यथा कश्चित् पुमान् धृष्णु दृढ़ म् अभिभवनं परकीयानां सेनानाम् अर्चति तद्वदित्यर्थः'-इति वि०।

अथ चतुर्थी।

मधुच्छन्दा ऋषिः।

३ १२ २२ ३ २ २ १ २ २ १ १
उक्थमिन्द्राय शंस्यंवर्द्धनंपुरुनिष्षिधे*।

३ १२ २२ २ ११ २ १ २ १ १ २
शक्रोयथासुतेषुनो†रारणत्सख्येषुच॥ ४ ॥ १३१॥

१ २ १ २ १ २ १
I उक्थमिन्द्रा। यशंसार२याम। वार्द्धनंपु। रुनिः

२ १ २ १ ११ २ ५ २२ १
षार२इधाइ। शक्रोर्या३था३। सूतेषू२३४नाः। रार-

२ १ २ १
णा२३त्सा। खियाइषू २ ३ चा ३ ४ ३। ओ २३४५ इ।

डा॥ २५॥१३१

---

* "निः षिधे"-इति ऋ०—पाठः, इहापि च सायण-धृतः।

† "सुतेषुणो" इति ऋ०-पाठः, जर्मन्मुद्रित-पाठश्च।

---

१३१ ऋग्वेदस्य १,१,१,८ ५।

I बार्हदुक्थम्।

अथ पञ्चमी ।

प्रियमेध ऋषिः ।

२ १ २   ३२ ३१२   ३ १ २
विश्वानरस्यवस्पतिमनानतस्यशवसः ।

१२   ३ २३१ २३१२
एवैश्चचर्षणीनामूतीहुवेरथानाम् ॥ ५ ॥ १३२ ॥

५ र   २ १   १ र २
I विश्वानरा । स्यवा २स्पाती २म । आनानत ।

१ २   १ र२ २र   १   १   १
स्यशावा१सा २ः । एवैश्वा । चर्षणा २इनाम् । ऊ २ती ।

२ १ २   १   ५ ५
हुवाइर । था२३४नोई्हाइ ॥ २६ ॥

"इन्द्राय" इन्द्रार्थं "वर्द्धनं" वृद्धि-साधनं "उक्थं" शस्त्रं "शस्यम्" अस्माभिः शंसनीयम् । कीदृशायेन्द्राय ? "पुरु निःषिधे" पुरूणां बहूनां शत्रूणां निषेध-कारिणे । "शक्रः" इन्द्रो "नो" ऽस्मदीयेषु "सुतेषु" पुत्रेषु "सख्येषु च" सखित्वेष्वपि "यथा" येन प्रकारेण "रारणत्" अतिशयेन शब्दं कुर्यात् तथा शंस्य मिति पूर्वत्रान्वयः । ( अस्मदीयेन शस्त्रेण परितुष्ट इन्द्रः नो ऽस्माकं पुत्रान् अस्मत्सख्यानि च बहुधा प्रशंसन्त्वित्यर्थः ॥ ४ ॥ १३१

---

१३२ ऋग्वेदस्य ६,५,१,४ ।

२ २ २ र ४ ५ २ १र २
II विश्वा३४। नरस्यवौहोस्यातीम्। अनानता३।
१ २ ३ ५ १ र २र १ ५ २र
स्याशावा२३४सा:। एवैश्वा। चर्षणा२३४इनाम्। ऊ
१र २ १ २ १ ५ ५
तीइवा२र। था२३४नोह्वाइ॥ २७॥ १३२

"विश्वानरस्य"(१)विश्वान् शत्रून् न्यतस्य "अनानतस्य" शत्रूणा-मप्रह्वस्य "शवसो" बलस्य "पतिं" स्वामिन मिन्द्रं "व:" (अत्र इन्द्र-सम्बन्धिनो मरुतोऽपि सङ्कीर्त्यन्ते) हे मरुत:! "वो" युष्माक मित्यर्थ: (यद्यपि मरुत्त शब्दनं नास्ति तथापि व इति सामर्थ्या लभ्यते)युष्माकं"चर्षणीनाम्"सैनिकानाम्(२) "एवै:" गमनै(३) सह (यद्वा। चर्षणीना मिन्द्रस्य सेना-रूपाणां वो युष्माकं गमनैरिति सामानाधिकरण्यम्) युष्माकं "रथानां" च "ऊती"(४) ऊतिभि

---

I,II वैश्वानरस्य सामनी द्वे।

(१)—"नरे संज्ञायाम् (६,४,१२९)"-इति विश्वस्याकारो दीर्घ: विश्वानर-पदस्य यास्क-कृतं व्याख्यान मिह विस्तृतं विद्यते—"वैश्वानर: कस्मादित्यारभ्य—"अयमेव सोऽग्निर्वैश्वानरो निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजते"-इत्यध्याय शेषान्त्यन्येकादश-खण्डानि द्रष्टव्यानि (नै० दै० १,२१—३१)।

(२)—"चर्षणय इति मनुष्य-नामसु अष्टमं नैघण्टुकम् २,३।

(३)—एवैरिति गति-कर्मण एते रूपम् (२,१४,१२०)।

(४)—"ऊती"-इति पूर्वसवर्णदीर्घे (७,१,३९) रूपम्। "ऊतिरवनात्"-इति यास्क: (५,३)। अतएव 'ऊती-ऊतये रक्षणाय'-इति वि०।

अथ षष्ठः ।

भरद्वाज ऋषिः ।

३ १२ ३ १ १२ ३१२ १२ ३ १ २
सघायस्तेदिवोनरोधियामर्त्तस्यशमतः* ।

३ १२ १२ ३ २ ३ २ ३ २उ ३ १ २
ऊतीस† बृहतोदिवोद्विषोअंऽहोनतरति ॥६॥ १३३॥

र्गमनैश्च सह "हुवे"(५) आह्वयामि। गन्तृभी रथैर्गन्तृभि र्मरुद्भिश्च स हेन्द्रं हुवे इत्यर्थः ॥

यद्वा। हे यजमानाः! युष्मदीय-सैनिकानां रथा यदा प्रविशन्ति युद्धाय स्व-सङ्ग्रामं, तदानीं तेषां साहाय्यायेन्द्रं हुवे इत्यर्थः(६) ॥ ५ ॥ १३२

---

*"ऋधद् यस्ते सु दानवे धिया मर्त्तः शशमते"-इति ऋ० ।
†"ऊतीष"—इति मूर्द्धन्य-पाठः ऋ० ।

---

१३३ ऋग्वेदस्य ६,५,१,५ ।

(५)—अत्र ऊः सम्प्रसारणं छान्दसम् (६,१,३४) ।

(६)—"विश्वानरस्यादित्यस्यानानतस्य शवसो महतो बलस्यैवैश्च कामै रथनै रथनैर्वा चर्षणीनां मनुष्याणामूत्या च यथा रथानामिन्द्र मस्मिन् यज्ञे ह्वयामि"-इति यास्कः (दै० ११,२१) ।

२ १र २ २ १र २ २
I मघायस्ता३इ। ए। दिवोनरा३ः। ए। धि-
१र २ २ १ ५ २ र १ २ २
यामर्त्ता३। ए। स्यशमता३ः। ए। ऊताइसवृ३। ए।
१र २ २ १र २ २ १ २
हतोदिवा३ः। ए। द्विषोअंऽहा३ः। ए। नातरति।
१ २ १
इडा२३भा३४३। ओ२३४५इ। डा॥ २८॥
५ र २ र १ २ र १
II मघायस्ताइ। दिवोनराः। धियामार्त्ता२। स्य
१ २र र १ र १ २ र १
शमताः। ऊतीसावृ२। हतोदिवाः। द्विषोआंऽहा-
१ २ १ २ १
२ः। नातरति। इडा २ ३ भा ३ ४ ३। आ २ ३ ४५ इ।
डा॥ २९॥ १३३

“शमतः” कर्मानुष्ठानेन शान्तस्य वृत्तस्य निज-मार्ग-वर्तिन इत्यर्थः। “मर्त्तस्य” मनुष्यस्य मध्ये [जात्येक-वचनं(१)] “दिवो”

---

I,II शाकपूते द्वे।

(१)—“जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्”-इति पा० १,२,५८ सू०

द्योतनादि-गुणकस्य(२) "ते" तव "धिया" कर्मणा स्तुत्या(३) "नरः" मनुष्यः "सखा" स्तोता(४) भवति "सः" नरः । "यः" "बृहतो" महतो "दिवो" दीप्तस्य तव सम्बन्धिन्या "ऊती"(५) ऊत्या रक्षया "द्विषो" द्वेष्टॄन् "अंहो न" आहनन-शीलं पापमिव "तरति" अतिक्रामति ॥ ६ ॥ १२३

(२)—'दिवु, क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु' -इति दि० प० ।

(३)—"धीः"-इति कर्म-नामसु एकविंशतितमं नैघण्टुकम् (२,१) इह च स्तुत्याख्यं कर्म । स्तुतिक्रिययेत्यर्थः ।

(४)—स्तुत्य-स्तोतृत्वरूपं सखित्वमिह गृह्यते । मूले तु सर्वपुस्तके "सघा"-इत्येव पाठः ; तत्र घ-इत्यनर्थकं "निपातस्य च (६,३,१३६)"-इति दीर्घान्वितञ्च । परमिह तदतीव चित्रं यत् सखेति भाष्यकृता कुत आसादितमिति ।

(५)—पूर्वसवर्णदीर्घः (७,१,३९) ।

(६)—अंहः पापम् अतएव ऋग्वेद-प्रथम-मण्डलान्तर्गत-पञ्चदशानुवाकीय-द्वादश-सूक्तस्य सप्तदश्या ऋचो व्याख्याने यास्कः—

("सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात्")

"सप्तैव मर्यादाः कवयश्चक्रुस्तासामेकामप्यभिगच्छन्नंहस्वान् भवति । स्तेयं(१) तल्पारोहणं(२) ब्रह्महत्यां(३) भ्रूणहत्यां(४) सुरापानं(५) दुष्कृतस्य कर्मणः पुनः पुनः सेवां(६) पातके नृतोद्यं(७)मिति"-इति ६,२७ ।

अथ सप्तमी।

अत्रि ऋषिः।

३ १ २ ३ १ २ १ २ ३ १ २
विभोष्ट*इन्द्रराधसोविभ्वीरातिःशतक्रतो।

१ २ ३ १ २
अथानो†विश्वचर्षणेद्युम्न‡ꣳसुदत्र¶मꣳहय ॥७॥ १३४

५ र र ५ २ १र२र १ १ र
I विभोष्टइन्द्रराधा६सा। विभ्वीरा२तिःशतक्रतो।

१ १ र २र र १
शता२क्रातोउ। आथानोविश्वचर्षणे। ऋचा२र्षणाइ।

१ १ २ ३ २ ४
द्युम्नꣳसुदत्रमꣳहयं। त्रमा३ꣳहा५या६५६ ॥ ३० ॥१३४

---

* "उरोष्ट"-इति,
† "अधानो"-इति,
‡ "द्युम्ना"-इति,
¶ "सुक्षत्र"-इतिच

} ऋग्वेदीयाः पाठाः।

---

१३४ ऋ ४,२,९,१।

I वरुणान्याः साम।

अथाष्टमी ।

प्रस्कण्व ऋषिः ।

१ २　　　३ १ २ ३ १२　 २२
वयश्चित्तेपतत्रिणोद्विपाच्चतुष्पादर्जुनि* ।

हे "शतक्रतो" बहुकर्मन्निन्द्र ! "विभोः" प्रभूतस्य "राधसो" धनस्य "ते" तव "रातिः" दानं "विभ्वी" महती "अध" अतः कारणात् हे "विश्वचर्षणे !"(१) सर्वस्य द्रष्टः "सुदत्र" कल्याण-दानेन्द्र !(२) "नो" ऽस्मभ्यं "द्युम्नं" धनं "मंहय" प्रयच्छ(३) ॥ ७ ॥ १३४

---

* "द्विपच्चतुष्पदर्जुनि"-इति ऋग्वेदीय-पाठः ।

---

(१)—"विश्वचर्षणिः"-इति पश्यति-कर्मसु दशमं नैघण्टुकम्, 'विचर्षणिः"-इति च नवमम् (३,११) । चर्षिणेति (ऋ० १म० ९अनु० ३सू ४ ऋक्) मन्त्र-व्याख्यानावसरे यास्कश्चर्षणिरितिपदस्य चायितेत्यर्थमाह । तथाहि—

"हविषा जारो अपां पिपर्त्ति पपुरिर्नरा ।
पिता कुटस्य चर्षणिः ॥"

"हविषापां जरयिता पिपर्त्ति पपुरिरिति पृणातिनिगमौ वा प्रीणातिनिगमौ वा । पिता कृतस्य कर्मणश्चायितादित्यः"-इति (५,२४) ।

(२)—"सुदत्रः कल्याण-दानः"-इत्येव नै०६,१४ ।

(३)—"मंहते"-इति दान-कर्मसु दशमं नैघण्टुकम् ३,२० ।

१ २ १ २ ३ १ र २ र ३ १ र २ र ३ १ १
उषःप्रारन्नृतूँरनुदिवोअन्तेभ्यस्परि ॥ ८ ॥ १३५

५ २ ४ र ५ २ १ र र २
I वयश्चा३इत्तेपतत्रिणाः । द्विपाच्चतुष्पादर्जुनाये३ ।

४ ५ ४ ५ २ र १ २ र १ १ ४
उषःप्राारान । ॠतूँरनू । दिवोआन्ते२३ । भा२३या३ः ।

२ ५
पा३४५रो६हाइ ॥ २१ ॥ १३५

हे "अर्जुनि"(१) शुभ्रवर्णे "उषः" उषोदेवते "ते" तव "ऋतून्‌ अनु" गमनान्यनुलक्ष्य "द्विपात्" मनुष्यादिकं "चतुष्पाद्" गवादिकं तथा "पतत्रिणः" पतत्रवन्तः पक्षोपेताः "वयश्चित्" पक्षिणश्च(२) "दिवोअन्तेभ्यः" आकाशप्रान्तेभ्यः "परि" उपरि "प्रारन्"(३) प्रकर्षेण गच्छन्ति (रात्रावन्धकारेणाभिभूताः सर्वे प्राणिनस्त्वदागमनानन्तरञ्चेष्टावन्तो भवन्तीत्यर्थः ॥ ८ ॥ १३५

---

१३५ ऋग्वेदस्य १, ४, ६, ३ ।

I उषसम ।

(१)—"अर्जुनी"-इति उषोनामसु षष्ठं नैघण्टुकम् १,८।

(२)—'वयश्चित्, चिच्छब्द इव-शब्दस्यार्थे ; वयइव-पक्षिण इव'-इति वि० । अत्र मते पतत्रिण इति ननु विशेषणम् पदम् ।

(३)—गतिकर्मणो ऋच्छतेरूपम (नै० २,१४,३५) ।

अथ नवमी

आप्त्यस्त्रित* ऋषिः(०) ।

३ १र २र ३ २ ३ २ ३ १ २ ३ १ २ २
अमी ये देवा स्थन मध्य आरोचने दिवः ।
१ २ ३ २उ ३ २ ३ २ ३ २ ३ २ २
कद्व ऋतं कदमृतं† का प्रत्ना‡ व आहुतिः ॥ ९ ॥ १३६

---

* "त्रितः"-इति वि० पाठः ।

---

* "त्रिष्वा रो"-इति
† "कदनृतम्"-इति } ऋग्वेदीयाः पाठाः ।
‡ "कप्रत्ना"-इति च

---

१३६ ऋग्वेदस्य १,७,२०,५ ।

(०)—बृहत्-विवरण-ग्रन्थे इतिहास-द्वयम्। तद्यथा——आप्तस्य ऋषेः त्रयः पुत्राः एकत-द्वित-त्रिता इति। ते यष्टुकामाः याज्यान् यजमानानष्टौ गाः आयाचिरे, लेभिरे च ताः। आयान्तो गृहं जग्मुः। तद्गच्छतो मेधा सरस्वत्यास्तीरेण परस्मिन् काले निषण्णो गवोदकः। ददर्श, दृष्ट्वा चोत्थाय अभिमुखः सरस्वती-तीर मवतीर्य रात्रौ वामायमानाः। तेषां त्रासात्त्रस्यतां त्रितः कूपे निर्जले तृणैर्वल्लिभि श्चावकीर्णे प्रपात। तस्य तत्रस्थस्यैवं मनः प्रादुरभूत्—कृत-याग-सङ्कल्पस्य अकृत-यागस्य मम मृत्यु-र्निःश्रेयसे। तत् कथ मिहस्थ एवाहं सोमं पिबेयम् ?-इति—अन्ये तु पुनरेतदेवेति-हास मन्यथा व्याचक्षते—एकत-द्विताभ्यां स्वल्पा गावो लब्धा स्त्रितेन बह्वः ; तत ईर्ष्यया ताभ्यां कूपे वीरुध मुत्तीर्णं ददर्श। स ता मादाय सोमोऽयमिति मनसा निश्चित्य यागैश्वर्यस् अन्यान्यपि याग-साधनानि मनसा सङ्कल्प्य शर्करा अभिषवग्रावस्त्र कृत्वा तां वीरुध मभिषुषाव अभिषुत्य च देवानाजुहाव। ते देवा आहूताः सन्त आह्वान-

५ र र र र ४ ५ १ र र र २
I अमीयेदेवास्थाना। मध्यआरोचनेदिवाः। कद्ध-

१ २ १ १र र २ १र २
ऋताम्। कदमार्त्तारम्। काप्रत्नावआहूर२३तौ३४३।

२
ओ२३४५इ। डा॥ ३२॥ १३६

हे "देवाः!" इन्द्रादयः "ये" ऽमी यूयं "दिवो" दीप्तस्य सूर्यस्य(१) "आरोचने" दीप्तिविषये "मध्ये" अतरिक्षलोके "स्थ"

---

I देवानां रुचिः।

कारण मननुबुध्यमाना उद्विग्ना बभूवुः। तद् बृहस्पतिः शुश्राव। श्रुत्वा च देवानुवाच, त्रितस्य यज्ञो वर्त्तते, तत्र गच्छाम इति। तत्र ते देवा आ जग्मुः। स तानागतान् कूपादुत्तरणार्थी तुष्टाव, उपायं लब्धवांश्च="अमी ये देवाः स्थ"-इति॥

इम मेवेतिहासं "सम्मातपन्त्यभितः"-इति मन्त्र-व्याख्यानावसरे यास्कोऽप्यवततार। तथाहि——— (ऋ०१म०१५अनु०१२सू०८ऋक्)

"सम्मा तपन्त्यभितः सपत्नीरिव पर्शवः। मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी॥"

"सन्तपन्ति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवो मूषिका इवास्नातानि सूत्राणि व्यदन्ति। स्वाङ्गाभिधानं वा स्याच्छिश्नानि व्यदन्तीति। सन्तपन्ति माध्यः। कामाः स्तोतारं ते शतक्रतो। वित्तं मे अस्य रोदसी। जानीतं मेऽस्य द्यावापृथिव्याविति। त्रितं कूपेऽवहितमेतत् सूक्तं प्रतिबभौ। तत्र ब्रह्मेतिहासमिश्रमृङ्मिश्रं गाथामिश्रं भवति। त्रितस्तीर्णतमो मेधया बभूवापि वा संख्या-नामैवाभिप्रेतं स्यादेकतो द्वितस्त्रित इति त्रयो बभूवुः"-इति ४,६।

(१—यद्यपि निघण्टावादित्य-नामसु "स्वः"-इत्यादि षट्कमेव गणितं तथाप्यत्र

अथ दशमी ।

वामदेव ऋषिः ।

३ १ २ ३ २ ३ १ २ ३ १ २
ऋच७ँसामयजामहेयाभ्यांकर्माणिकृण्वते ।
१र २र ३ २ ३ १ २
वितेसदसिराजतोयज्ञन्देवेषुवक्षतः ॥ १० ॥ १३७

॥ तृतीय-दशति ॥

भवथ (सूर्य-प्रकाश्य-स्थाने) इत्यर्थः । तेषां "वो" युष्माकं सम्बन्धि स्तोत्र-विषयं "ऋतं" सत्यं "क्व" कस्मिन्देशे वर्त्तते? "अनृतं (न-कारस्य स्थाने मकारः) अमृतं "क्व" कुत्रास्ति? "वो" युष्मदीया "प्रत्ना" पुराणी "आहुतिः" "का" कीदृशी? युष्मदीयं दानं किमभूदित्यर्थः (ईदृग्भूत-दुःखानुभवेन मया पूर्व्व मनुष्ठितो याग-समूहो युष्मान्न प्राप्नोदित्यनुममे(२) ॥ ८ ॥ १३६

---

"स्वः"-पर्याय-दिव्शब्दस्यापि आदित्य-वाचकत्वम्, तथाहि यास्कः—"स्वरादित्यो भवति सु अरणः सु ईरणः स्वृतो रसान् स्वृतो भासं ज्योतिषां स्वृतो भासेति वैतेन द्यौर्व्याख्याता"-इति २,१४ ।

(२)—'एतदुक्तं भवति । ऋतमन्नं तदत्र नास्ति कूपे निर्जले, तत् क्व । अमृतं सोमाख्यम् । हविः, धानाः, करम्भः, पुरोडाशः, प्रतीवापः, पयस्यापरस्वग्नीषोमीयः पशुः सवनीयः एव मादिकं ऋतम् अमृतं च कुत्र विद्यते?"-इति वि० ।

I ऋच७सामयजा। महाइ। याभ्यांकर्माणिकृण्वा२३ताइ। वितेसदसिराजा२३ताः। यज्ञंदा२३इवे। षूवक्षतः। इडा२३भा३४३। ओ२३४५इ। डा॥ ३३॥

II ऋच७सा३मायजामहाइ। याभ्यांकर्मा। णिका-र्ण्वा१ता२इ। ण्वाता३२इ। वाइतेसद। सिराजा१ता-२ः। जाता२ः। यज्ञांदा१इवे२। षूवक्षतः। इडा-२३भा३४३। ओ२३४५इ। डा॥ ३४॥ १३७

"याभ्याम्" ऋक्सामाभ्यां "कर्माणि" शस्त्र-स्तोत्र-प्रमुखानि "कृण्वते" होतार उद्गातारः कुर्व्वन्ति। ताम् "ऋचं" "तत् साम" च "यजामहे" वयं पूजयामः "ते" ऋक्सामे "सदसि" ऋत्विक्स-मूहे सदोमण्डपे "विराजतः" स्तोत्र-शस्त्र-रूपेण विशेषेण प्रका-

---

I,II ऋक्साम्नोः सामनी द्वे।

गयतः । ते च ऋत्विजः मे देवते "देवेषु" इन्द्रादिषु "यज्ञं" "वक्षतः"(१) प्रापयतः ॥ १३७

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्य द्वितीयः खण्डः ॥ २ ॥

इत्यानुष्टुभमैन्द्रम ॥

---

सन्त्येकादश या विश्वाः पृतना इति संमताः ।
जगत्य ऐन्द्रयो रोदस्योः स्तुतिर्घृतवती इति ॥
उभे यदिन्द्ररोदसी महापङ्क्ति रितीरिता(क) ॥

---

(१)—प्रापणार्थस्य वहते (भ्वा० उभ०) रूप मिदम् ।

(क)—अनन्तरमिह "विश्वाःपृतना"-इत्यारभ्य "प्रमन्दिने"-इत्यन्ताः चतुर्थ-दशदात्मकाः या एकादश ऋचः सन्ति, तत्र "घृतवती"-इति नवमी ऋक् रोदस्योः द्यावापृथिव्योः स्तुतिः, अन्याः दश ऐन्द्रः ; किन्तु "उभे यदिन्द्र रोदसी" इति दशमी ऋक महापङ्क्ति च्छन्दस्काः, अपरा जगत्यः । इति छन्दोदैवत-सङ्केतः ।

कैषा प्रथमा।

रेभ ऋषिः*।

२ ३ १ २ २ १ २३१२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
विश्वाः पृतना अभिभूतरं नरः† सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे।
३ १२३ २३ १ २ ३ १२ २२ ३ १ ३ १
क्रत्वे वरे स्थेमन्यामु‡रीमु¶तोग्रमोजिष्ठं तरसं§ तरस्विनम्॥१॥
१३८

५ ४ १ २२ १ २ २ ३ १ १ २ १२
I विश्वोहाइ। पृतनाअभिभू। तरन्नराः। सजू-
२ १ २ १ २२ १ ५ २ १२
स्ततक्षुराइन्द्रंजजनूः। चराजासोर२३४हाइ। क्रत्वौहोइ।

---

* "वृशोकस्यार्षम्"-इति वि०।

† "नरं"-इति ऋग्वेदीयः पाठः।

‡ "क्रत्वा वरिष्ठं वर आमु०"--इति ऋग्वेदीयः, सायण-
मतोत्तर भाष्ये च।

¶ "आमुरिम्"-इति ऋग्वेदीय-पाठः।

§ "तवसं"-इति च ऋग्वेदीयः पाठः।

---

१३८ उत्तरार्चिकस्य ३,१,१४,१=ऋग्वेदस्य६,६,३७,५=
ऊहे २,२,१३।

I वैशोकम्।

२ १र　र　३ ५　४　२ १
वरौहोइ । स्थेमन्या२मू२३४रीम् । उतोहाइ । उग्र-
५　२ ३　५　२　३ २
मो२३४जौ । ष्टन्तारा२३४साम् । होइ । तरा३४ ।
५ ५　२ ३　५
स्विनम् । ओ६वा । ओइदो२३४वा ॥ ३५ ॥* १३८

"विश्वाः" सर्व्वाः व्याप्ता वा "पृतनाः" [पृङ् व्यायामे (तु० आ०)] व्याप्रियन्त इति पृतनाः सेनाः(१) "नरो" नेतारः "सजूः" परस्परं सङ्गताः सत्यः "अभिभूतरं" शत्रूणा मत्यर्थमभिभवितारम् "इन्द्रं" "ततक्षुः" आयुधादिभि स्तीक्ष्णीचक्रुः आयुधवन्तं चक्रु-रित्यर्थः [यद्वा पृतना इति सङ्ग्रामनाम (नि०२,१७,) व्याप्रियन्ते अत्रेति "पृतनाः" सङ्ग्रामाः सर्व्वानेव संग्रामानभिभावुक मिन्द्रं "नरो" नेतारोऽन्ये स्तोतारः अन्योन्यं सङ्गताः स्तुतिभि स्तीक्ष्ण म-कुर्वन्। [यद्वा । यष्टारो हविः-प्रदानेन वीर्य्यवन्तं कुर्वन्तीति ।] किञ्च स्तोतारः "राजसे" [राजते स्तुमर्थे असे प्रत्ययः(२)] आत्मनो विराजनार्थं सूर्थात्मनमिन्द्रं "जजनुः"(३) जनयामासु स्तोत्र-शस्त्रैः

---

(१)—"पृतनाः"-इति निघण्टौ मनुष्य-नामसु(२,३) सङ्ग्राम-नामसु च(२,१७) दृश्यते ।

(२)—"तुमर्थे से-सेन-ऽसेन्-क्से-कसेन-ऽध्यै-अध्यैन्-कध्यै-कध्यैन्-शध्यै-शध्यैन्-तवै तवेङ्-तवेनः (३,४,९)"-इति पा० ।

(३)—"छन्दस्युभयथा (३,४,११७)"-इति सिद्धम् ।

---

* ॥ इति ग्रामे गेये नवमः प्रपाठकः ॥

अथ द्वितीया।

सुवेदः शैलूषिर्ऋषिः* ।

१ २ ३ १ २ ३ २उ ३ २उ ३ १ २ ३ २ ३ २
श्रत्तेदधामिप्रथमायमन्यवेहन्यद्दस्युन्नर्यं †विवेरपः ॥
२ १उ ३ १ २ ३ १ ३ २ ३ १ २ ३ २ ३ १ २
उभेयत्त्वारोदसीधावतामनुभ्यसात्तेशुष्मा‡त्पृथिवीचि
दद्रिवः ॥ २ ॥ १३९

स्व-यज्ञे प्रादुरभावयन्नित्यर्थः । "उत" अपिच "क्रत्वे" स्वकीय-वृत्र-वधादि-कर्मणे "वरे" श्रेष्ठे "स्थेमनि" (स्थिर-शब्दादिमनिच् ५,१,१२२) स्थैर्य-युक्ते स्थाने स्थितम् "आमुरिं" शत्रूणां मारयितारमिन्द्रम् आत्मनां धन-लाभार्थं स्तोतारः स्तुवन्तीत्यर्थः। कीदृशम्? "उग्रम्" उद्गूर्णबलम् अतएव "ओजिष्ठम्" ओजस्वितमं "तरो" बलं तद्वन्तं "तरस्विनं" सङ्ग्रामे शत्रु-बधार्थं बलवन्तं वेगवन्तं वा ॥ २ ॥ १३८

---

* "सुमेधस आर्षम्"-इति वि० ।

† "यद्वृत्रं नर्यं"-इति ऋग्वेदीयः पाठः ।

‡ "यत्त्वा भवतो रोदसी अनु रेजते शुष्म०"--इति ऋग्वेदीयः पाठः ।

---

१३९ ऋग्वेदस्य ८,८,५,१ ।

२ २ १ ३ २ १ ५ ४र ५
I ओं ॥ अत्ते३ह्वोइ । दधा३ह्वो२३४ । मिप्रथमायम ।
४ ५ ४ ५ २ २ १ ३ २ १ ५
न्यवाइन्यवाइ । अह्वा३न्होइ । यद्दा३ह्वो२३४ । स्युनयं
४र ५ ४ ५ २ २ १ ३ २ १
विवेः । अपाअपाः । उभे३ह्वोइ । यत्वा३ह्वो२३४ ।
र ५ र ४र ५ र ४ ५ ४ ५ ३ २ १ ३र २ १
रोदसीधावताम् । अनूअनू । भ्यसा३ह्वोइ । तेशू३ह्वो-
र ५ ४र ५ ४ ५ ४ ५ ४ ५ ४
२३४ । ष्मात्पृथिवीचिद् । द्रिवोद्रिवाः । द्रिवआ ।
५र र ५ ३ १ १ १ १
अह्वोवा६ । हाउवा । ई२३४५ ॥ १ ॥

३ २ ३ १ ५ ४र ५ ४ ५
II अत्ता३१इ । दधा३१२३४ । मिप्रथमायम । न्यवाइ-
४ ५ ३ २ ३ २ ५ ४र ५
न्यवाइ । अह्वा३२न् । यद्दा३१२३४ । स्युनयं वीवेः । अपा-
४ ५ ३ २ ३ २ र५ र ४र ५ र
अपाः । उभा ३१इ । यत्वा३१२३४ । रोदसीधावताम् ।
४ ५ ४ ५ ३ २ ३र २ र ५ ४र ५
अनूअनू । भ्यसा३१त् । तेशु३१२३४ । ष्मात्पृथिवीचिद् ।
४ ५ ४ ५ ४ ५ ४ ५ ५ ४
द्रिवोद्रिवाः । द्रिवए । हियाइहा । हो५इ । डा ॥ २ ॥

३ ५ ३ २ ३ ५ ४ ५ १
III अयो२३४वा । अयायो२३४वा । आत्ताइ । दा-
र ५ ४र ५ ४ ५ ४ ५ २
२३४धा । मिप्रथमायम । न्यवाइन्यवाइ । अयो२३४

I,II शैखण्डिने द्वे ।

५ ३२ ३ ५ ४५ १ ५४५ ४र
वा। अग्नायो२३४वा। आहान्। या२३४इ। स्युन्नयंविवः।
५४५ ३ ५ ३२३ ५ ४५
अग्नाअग्नाः। अयो२३४वा। अयायो२३४वा। ऊभाइ।
१ र र५र४र५र ४५४५ ३
या२३४त्वा। रोदसीधावताम्। अनूअनू। अयो२३४
५ ३२३ ५ ४५ २ ४र
वा। अयायो२३४वा। भ्यासात्। ता२२४इष्मा। क्ष्मात्पृ-
४र५ ४५४५ ४५४ ५रर ५
थिवीचिद। द्रिवोद्रिवाः। द्रिवआ। औहोवाइ। हा-
२ र २
उवा। द्रिवइहो३ह७१॥ ३॥

३ ५ ३२३ ५ ४५
IV इयो२३४वा। इयायो२३४वा। आत्ताइ।
१ र ५ ४र५ ४५ ४५ ३
दा२३४धा। मिप्रथमायम। न्यवाइन्यवाइ। इयो२३४-
५ ३२३ ५ ४५ १ ५४
वा। इयायो२३४वा। आहान्। या२३४इ। स्युन्न-
५ ४र ५४५ ३ ५ ३२३ ५
यंविवेः। अपाअपाः। इयो२३३वा। इयायो२३४वा।
४५ १ र र५र४र५र ४५४५
ऊभाइ। या२३४त्वा। रोदसीधावताम्। अनूअनू।
३ ५ ३२३ ५ ४५ १
इयो२३४वा। इयायो२३४वा। भ्यासात्। ता२३४इष्मा।

---

III,IV अत्रेर्विवर्त्तौ द्वौ।

४र  ४र ५  ४ ५ ४ ५  ४ ५ ४  ५र र
षमात्पृथिवीचिद । द्रिवोद्रिवाः । द्रिवआ । औहोवाई ।
५  २  २
हाउवा । द्रिवइहोरहऽ१ ॥ ४ ॥

१ २  ४ ५  १ र  ५
V आर२याइम् । आत्ताइ । दार३४धा । मिप्र-
४र ५  ४ ५ ४ ५  १ २  ४ ५
थमायम । न्यवाइन्यवाइ । आ२याइम् । आहान् ।
१  ५ ४ ५  ४र  ५ ४ ५  १ २
या२३४इ । स्यूनर्यं विवेः । अपाअपाः । आ२याइम् ।
४ ५  १ र  र ५र ४र ५ र  ४ ५ ४ ५
ऊभाइ । या२३४त्वा । रोदसीधावताम् । अनूअनू ।
१ २  ४ ५  १  ५र
आर२याइम् । भ्यासात् । ता२३४यिश् । ष्मात्पृथि-
४र ५  ४ ५ ४ ५  ४ ५ ४  ५र र  ५
वीचिद । द्रिवोद्रिवाः । द्रिवआ । औहोवाई । हा-
२  १  १ १ १ १
उवा । द्रिवोइद्रिवा२३४५ः ॥ ५ ॥

२  ४ ५  १ २  ५
VI अयंयाइः । आत्ताइ । दधा३१२३४ । मिप्र-
४र ५  ४ ५ ४ ५  २  ४ ५
थमायम । न्यवाइन्यवाइ । अययाइः । आहान् ।
१ २  ५ ४र  ५ ४ ५  २
यद्दा३१२३४ । स्युनर्यं विवेः । अपाअपाः । अयंयाइः ।
४ ५  १ २  र ५र ४र ५ र  ४ ५ ४ ५
ऊभाइ । यत्वा३१२३४ । रोदसीधावताम् । अनूअनू ।

---

V,VI महासावैतसे द्वे ।

अयंयाऽ३:। भ्यासात्। ताइभूऽ३१२३४। भ्रात्पृथि-
वीचिद। द्रिवोद्रिवाः। द्रिवआ। औहोवा६। हा-
उवा। द्रिवा३ई२३४५॥ ६॥

VII औहोहोहाइ। आत्ताइ। दा२३४धा।
मिप्राथा२३४मा। यमन्या२३४वे। यमन्या२३४वाइ।
अहा३१२न्। या२३४दा। स्पुनारी२३४याम्। विवेरा-
२३४पो। विवेरा२३४पाः। उभा३१२इ या२३४त्वा।
रोदासो२३४धा। वतामा२३४न्। वतामा२३४न्।
भ्यसा३१२त्ता२३४इभू। भ्रात्पृथी२३४वी। चिदद्री२३-
४वः। चिदद्रा२३४इवाः। द्रिवआ। औहोवा६। हा-
उवा। ए३। द्रिवइहा२३४५॥ ७॥

VIII अत्ताऔहोहोहाइ। दधा३१२३४। मिप्रथमा-
यम। न्यवाइन्यवाइ। अहाऔहोहाइ। यद्दा३१२३४।

VII,VIII. महाशैरीषे द्वे।

५ ४र ५ र ४ र ५ १ २
स्युन्नर्यविवेः। अपाअपाः। उभाऔहोहोहाइ। यत्वा-

र ५ र ४र ५ र ४ ५ ४ ५ र
३१२३४। रोदसीधावताम्। अनूअनू। भ्यसाऔ-

४ ५ १ २ र ५ ४र ५ ४
होहोहाइ। ताइभ्रू३१२३४। आत्पृथिवीचिद्। द्रि-

५ ४ ५ ४५ ४ ५र र ५ १ १
वोद्रिवाः। द्रिवआ। औहोवा६। हाउवा। द्रिवए-

१ १ २१
३द्रिवा२३४५ः॥ ८ ॥१३९

हे "अद्रिवः" वज्रवन्निन्द्र! "ते" तव "मन्यवे" कोपाय तेजसे वा "प्रथमाय" मुख्याय "श्रद्दधामि" श्रद्धामादरातिशयन्तद्विषयं-करोमि(१)। "यत्" येन मन्युना "दस्युं" कर्माण्युपक्षपयितारम् असुरम् "अहन्" अवधीः (नर्यमिति क्रिया-विशेषणम्) नरहितं यथा भवति तथा तेन हत्वा च मेघेनावृताः "अपः" उदकानि च "विवेः" इमं लोकं प्रत्यागमयः (तस्मै मन्यवइत्यन्वयः) "यद्"

(१)—'अत् सत्यं, ते तुभ्यं, दधामि ददामि'-इति वि०। "अत्"-इति सत्य-नामसु द्वितीयं नैघण्टुकम् ३,१०।

अथ तृतीया ।

वामदेव ऋषिः ।

१ २ ३ २ ३ १ २ ३ १ २ ३ २उ ३१र १ २र ३ १ २
समेतविश्वाओजसापतिं दिवोयएकइद्भूरतिथिर्जनानाम् ।
३ १र २र ३ १ २ ३ १ २ ३ १र २र ३१ २२
सपूर्व्योनूतनमाजिगोषन्तंवर्त्तनीरनुवावृतएकइत् ॥३॥१४०

४ ५ २ र र १ १ २
I समाहाउ । आइतविश्वाओजसा३ । पतिमा३इ ।
१ ३र २ १ २ १
दिवा२३४ः । हाहोइ । यआइका१ई२त् । भूर-

यदा "उभे" "रोदसी" द्यावापृथिव्यौ "त्वा" त्वाम् "अनुधावताम्" गच्छतां त्वदधीने भवत इत्यर्थः । तदानीं "पृथिवी चित्" पृथिवीत्यन्तरिक्षनाम (नि० १,३,९) प्रथितं विस्तीर्णमन्तरिक्षमपि(२) "शुष्मात्" त्वदीयाद्बलात्(३) "भ्यसाते" बिभेति [भ्यस भये (भ्वा० आ०) पञ्चम-लकारे(४) रूपम्] बिभीयात् भयेन कम्पतइत्यर्थः ॥ २ ॥ १३९

(२)—अप्यर्थश्छन्दः, विवरणे तु पादपूरणार्थः । किञ्च 'अन्तरीक्ष-ग्रहणं प्रदर्शनार्थम्, त्रयोऽपि लोका इत्यर्थः'-इति विवरणे विशेषः ।

(३)—"शुष्मम्"-इति बल-नामसु एकादशं नैघण्टुकम् २,९ ।

(४)—लेटीति भावः । तथाच "लिङर्थे लेट्(३,४,७)"—"लेटोऽडाटौ(३,४,९४)"—"इतश्च लोपः परस्मैपदेषु (३,४,९७)"-इति सूत्र-त्रयं विशेषेण स्मर्त्तव्यम् ।

तिथिः । जनार२३ना३४म् । हाहोइ । सपूर्विया२ः । नूतनमा । जिगा२३इषा३४न् । हाहोइ । तंवार्त्ता१नी२ः । अनुवावृते । आये३ । कयाउवा३ । वृधे१ ॥ ॥ ९ ॥

II समेतविश्वाओजसापतिम् । एपातीम् । दिवया । हौ२ । हौ३हो३वाई३या । यआइका१ई२स् । भूरतिथिः । जना२३नाम् । हौ२ । हौ३हो३वाई३या । सपूर्विया२ः । नूतनमा । जिगा२३इषान् । हौ२ । हौ३हो३वा । ई३या । तंवार्त्ता१नी२ः । अनुवावृते । आये३ । कया३उवा३ । महे१ ॥ १० ॥

III समेतविश्वाओजसापतिम् । एपातीम् । दाइवा१या२ । औ२ । हौ३हो३वा । ओमोवा । यआइ-

---

I, II, III इन्द्रस्य प्रियाणि त्रीणि ।

२ १२ २ १ २ ५
का१इ२त्। भूरतिथिः। जना२३नाम्। औ२। हो-
२ २ १ २ १२ १२ २२
२होइवा। ओमोवा। सपूर्वा१या२ः। नूतनमा।
२ २ ५ २ २ १ २
जिगा२३इषान्। औ२। होइहोइवा। ओमोवा।
१ २ १ २२ २ १ २ २
तंवार्ता१नो२ः। अनुवावृते। आये३। कयाउवा३।
१ ३ १ १ १ १
धर्मणे२३४५॥ ११॥ १४०

हे "विश्वाः" सर्वाः प्रजाः! "दिवः" स्वर्गस्य "ओजसा" बलेन-"पतिं" स्वामिन मिन्द्रं(१) "समेत" स्तोत्रेण हविषा वा सम्यक् प्राप्नुत। इन्द्रः "एकइत्" एक एव सन् "जनानां" यजमानानां "अतिथिः" अतिथिवत् प्रियो "भूः" भवति। "पूर्व्यः"(२) पुरातनः "स" इन्द्रः "आजिगीषन्तं" स्व-शत्रून् जेतु मिच्छन्तं "नूतनम्" अद्यतनं स्तोतारं प्रति "एकइत्" एकएव वर्त्तनिर्मार्गः सन् "अनुवावृते"(३) अनुवर्त्तयति॥ ३॥ १४०

---

(१)—'द्यु लोक-ग्रहणं चात्र प्रदर्शनार्थम्, त्रयाणा मपि लोकानां स्वामिन मित्यर्थः'-इति वि०।

(२)—"पूर्वैः कृत मिनि-यौ च (४,४,१३३)"-इति य-प्रत्यये रूपम्।

(३)—सार्वकालिको लिट् (३,४,६)—"तुजादीनां दीर्घोऽभ्यासस्य (६,१,७)"-इति दीर्घस्येति विशेषः।

अथ चतुर्थी ।

सव्य आङ्गिरस ऋषिः* ।

३१ २ ३ २ ३ ४ २ ३ २ ३ २ ३ २ १ २
इमेत इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
२३ ३ २ १ २ २ ३ १ २ ३ २ १ २ २ ३ १ २ ३ २ १
नहि त्वदन्यो गिर्वणो गिरः सघत् क्षोणीरिव प्रति तद्धर्य नो व

चः† ॥४॥ १४१

५ २ २ १र १ १२र र
I इमेतआ । इन्द्रतेवयंपूरू २ ष्टूता २ । येत्वारभ्यचरा-
१ १ र र १
मसिप्रभू २ वासा २ उ । नहित्वदन्योगिर्वणोगिरा २ः सा-
र १र १ १ २ ३
घा २ त् । क्षोणीरिवप्रतितद्धर्यनो २ वाचा २ः । वचा ३ ओ-
५ ४
२३४वा । हो ५ इ । डा ॥ १२ ॥

५ र १ १र २ १ २
II इमेतआ । इन्द्रतेवयंपूरु । ष्टुता । या१इत्वा २
१ १ र २ र १ २ १
राभ्या २ । चारामसिप्रभू । वसाउ । ना१ही २ त्वादा-

* "सत्यस्यार्षम्"-इति वि० ।

† "प्रति नो हर्य तद्वचः"-इति ऋग्वेदीयः पाठः ।

१४१ ऋग्वेदस्य १,४,२२,४ ।

I,II,III वैरूपाणि त्रीणि ।

१ २र १ २ २
२न्। योगिर्वणोगिरः। सघात्। चो१णी२राइवा-

१ १ १ २ १र २ १
२। प्रतितद्ध। यनोवा२३चा२४३ः। औ२३४५इ।

डा॥ १३॥

२ १र ४ ५ ४ ५ ४ ५ ४ ५ १र र
III इमेता२३इन्द्रतेवयंपुरुष्टुतोवा। येत्वाराभ्या२।

१र ४ २र३ ५ २ १ १र
चरामसी२३प्रा३भूवसाउ। नहित्वादा२न्। योगिर्व-

४ २ १ ५ १र र १
णा२३गी३रःसघत्। चोणीरिवा२। प्रतितद्धा२३।

४ ४
यनो५वचाः। हो५इ। डा॥ १४॥१४१

"प्रभूवसो" प्रभूतधन हे इन्द्र! अतएव "पुरुष्टुत" पुरुभिर्बहुभिर्यजमानैः स्तुत! "ये" वयं "त्वा" त्वाम् "आरभ्य" आश्रयतया "बल" "व्यचरामसि"(१) चरामः यागे वर्त्तामहे। "ते" इमे वयन्ते तव स्वभूताः हे "गिर्वणो" गीर्भिर्वननीयेन्द्र! "त्वदन्यः" त्वत्तोन्यः कश्चिदपि "गिरः" स्तुतीः "न हि सघत्" न हि

(१)—"इदन्तोमसि (७,१,४६)"-इति मस इगागमः।

अथ पञ्चमी ।

विश्वामित्रस्तौति ।

३　१ २ ३ र २　३ २　२ ३ १ २　३ २ ३क २र
चर्षणीधृतंमघवानमुक्थ्या३*मिन्द्रंगिरोबृहतीरभ्यनूषत ।
३　१ २ ३ १　२ ३ २ ३ १ २ ३ १ २　३ १
वावृधानम्पुरुहूतꣳसुवृक्तिभिरमर्त्यञ्जरमाणन्दिवे
२
दिवे ॥ ५॥ १४२

५ र　२ १ र २ १　२　१
I चर्षणीधृतꣳहाउ । मघवानमुक्थार३याम् । इन्द्र
र　र　२ १र　२　१ ०　१ ०
ङ्गिरोबृहतीरभ्यनूषार३ता । वावृधाना२म् । पूरुहूता-

प्राप्नोति । अतस्त्वं "नो" ऽस्माकं वचः" स्तुति-लक्षणं "प्रति-हर्य"(१) कामयस्व "क्षोणीरिव" यथा क्षोणी पृथिवी स्वकीयानि भूतजातानि कामयते ॥ ४ ॥ १४१

---

* "उक्थ३"-इति ऋग्वेदीयः पाठः ।

---

I वार्हदुक्थम् ।

१४२ ऋग्वेदस्य ३, ३, १५, १ = आरण्ये २, १-२-३ ।

(१)—"हर्यति"-इति वष्टि-पर्याये दशमं नैघण्टुकम् २, ६ ।

१ २ ५ १ १ २ १

२३म्। सुवा२क्ताँ२३४इभीः। अमा२र्त्तियाम्। जर-

१ ४ २ ५

माणा२३म्। दा२३इवे३। दा३४५इवो६हाइ ॥१५॥१४२

"बृहतीः" प्रभूताः "गिरः" अस्मदीयाः स्तुति-लक्षणा वाचः "चर्षणीधृतं" चर्षणीनां मनुष्याणा(१) मभिमत-फल-प्रदानेन धारकं पोषकं [यद्वा आकर्षत्यनेन सर्वमिति चर्षणि बलं(२) तद्धारकं "मघवानम्" "उक्थ्यम्" उक्थैः शस्त्रैः शंसनीयं(३) "वावृधानं" बल-धनादि-सम्पत्त्या प्रतिक्षणं वर्द्धमानं "पुरुहूत" बहुभिः स्तोतृभि राहूतम् "अमर्त्य" मरण-धर्म-रहितं "सु-वृक्तिभिः" शोभन-स्तुति-वाक्यैः "दिवे दिवे"(४) प्रत्यहं "जर-माणं" स्तूयमाणं तम्(५) इमम् "इन्द्रम्" "अभ्यनूषत"(६) अभितः सर्वे स्तुवन्तु ॥ ५ ॥ १४२

---

(१)—"चर्षणयः"-इति मनुष्य-नामसु अष्टमं नैघण्टुकम् २,३।

(२)—यौगिकार्थ एष न तु निघण्टु-लभ्यः। चर्षणिः "चायिता आदित्य"-इति च नै०५.२४।

(३)—"उकथ्यः"—इति प्रशस्य-नामसु सप्तमं पदम् ३,८।

(४)—"दिवे दिवे"-इत्यहर्नामसूपान्त्यं नैघण्टुकम् १,९।

(५)—"जरते"-इत्यर्चति-कर्मसु सप्तमं नैघण्टुकम्।

(६)—"नोति"-इत्यर्च्चति-कर्मसु जनन्त्यं प्रथमं नैघण्टुकम् ३,१४।

अथ षष्ठी ।

कृष्ण आङ्गिरस ऋषिः* ।

१ २　३　१ २ ३ १ २ ३ १ २　३ २　३　१ २　३ १ २
अच्छाव इन्द्रं मतयः स्वर्युवः‡ सध्रीचीर्विश्वा उशतीरनूषत ।

१ २　२ १ २ ३ २ ३　२ ३ २ ३ २　३ २ ३ १ २　३ १ २
परिष्वजन्त जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये ॥ ६ ॥ १४३

५ र　५　२ १ र र　र
I अच्छावइन्द्रम्मतयः सुवर्युवाईए । सध्रीचीर्विश्वाउ-

१　१　र　१
शतीरनूं२षाता२ । परिष्वजन्तजनयोयथा२पाती२म् ।

१　२　१ २　१　३ २　५ र र
मर्यन्ना२३ः शु । ध्युम्म । घवा२ । नमू३४औहोवा ।

२　१ ११११
तया३ई२३४५ ॥ १६ ॥

---

* "कृष्ण आत्मीयान् ऋत्विज आह—" इति वि० ।

† "आच्छाम"
‡ "स्वर्विदः"　} इति च ऋग्वेदीयौ पाठौ ।

---

१४३ ऋग्वेदस्य ७,८,२४,१ ।

१ २ ५ ४ ५ ४ ५ २२ १
II आ२३४। च्छावइन्द्रम्म। तयाः। सूवयुवा२३ः।

१ २ ५२ ४ ५२ ४ ५ २२ १२
सा२३४। ध्रीचीर्विश्वाउ। शतीः। आनूषता२३।

१ ५ ४ ५ २२ १२
पा२३४। विघ्नजन्तज। नयाः। याथापता२३इम्।

१ ५ ४ ५ ४ ५ २२ १२ २
मा२३४। र्यन्नप्रु ध्युम्म। घवा। नामूतया२१उ। वा-

१ १ १ १
२३४५॥ १७॥ १४३

"स्वर्युवः"(१) स्वर्गेण मिश्रयित्राः "सध्रीचीः" सङ्गताः विश्वा व्याप्ताः "उशतीः" कामयमानाः "मतयः" स्तुतयः(२) "इन्द्रम्" ईश्वरम् "अच्छानूषत" अभिष्टुवन्ति(३)। किञ्च।

---

I,II वासदस्यवे द्वे।

(१)—'यु मिश्रणे'-इति यौतेरूपम् (अदा०प०)। विवरणे तु 'स्वर्गं याः गन्तुमिच्छन्ति ताः स्वर्युवः स्वर्ग-गमन-शीला इत्यर्थः'। एतन्मते इच्छत्यर्थे क्यचि "क्याच्छन्दसि (३,२,१७०)"-इति उ प्रत्यये स्वर्युः, तस्य बहुवचनान्तस्येदं रूपम्।

(२)—मतय इति "मन्यते"-इति स्तुतिकर्मणो रूपम् (नि० ३, १४, ३८)।

(३)—"अच्छ अभेः, आप्तुमिति शाकपूणिः" (नि० ५, २८)। "निपातस्य च (६,३,१३६)"-इति ऋचि दीर्घः।

अथ सप्तमी ।

सव्य ऋषिः* ।

३ २उ　३ १ २　३ २ ३　२ ३ १　२ ३　१ २　३ १ २　३ २
अभित्यंमेषंपुरुहूतमृग्मियमिन्द्रंगीर्भिर्मदतावस्वोअर्णवम् ।
३ २　३ २　३१२　३ १ २　३ १र　२र　३ १र २र
यस्यद्यावोनविचरन्तिमानुषं†भुजेमंहिष्ठमभिविप्र

मर्चत ॥७॥ १४४

५　१　४र५४　५　२　१　र
I अभित्याउम्मेषंपुरुहू । तम्रग्माया २म । इन्द्रंगी-

"जनयो" जायाः यथा "पतिं" भर्त्तारं "मर्यं न" यथाच "शुन्ध्युं" शुद्धं दोष-रहितं "मघवानं" धनवन्तम् "ऊतये" रक्षणाय "परिष्वजन्त" आलिङ्गन्ति [छान्दसो लोट्(४)] तद्वदिन्द्रं मे स्तुतयः परिष्वजते ।

"परिषजन्त"-"परिषजते"-इति च पाठौ ॥ ६ ॥ १४३

---

* "अङ्गिरा नाम ऋषिः"-इति वि० ।

† "मानुषा"-इति ऋग्वेदीयः पाठः ।

---

१४४ ऋग्वेदस्य १, ४, ९, १ ।

I सोमसाम ।

(४)—व्यत्ययेनेति (३, १, ८५) भावः । "पूर्वपदात् (८, ३, १०६)"-इति षत्वम् ।

र १ ७ २ ३र २
भोइ । मदतावस्वा३आर्णवम् । ओ३४ । हाहोइ ।

र र १ ७ २ ३र २
यस्यद्यावोनविचरन्तो३मानुषम् । ओ३४ । हाहोइ

र १ २ र ५र र
भुजेमꣳहिष्ठमभिविप्रमर्चत । दुरा२ । तिना३४औहोवा ।

२ ५
ऊ२३४पा ॥ १८ ॥ १४४

"त्वं" तं प्रसिद्धं "मेषं" शत्रुभिः स्पर्द्धमानं। [यद्वा। कण्वपुत्रं मेधातिथिं यजमानमिन्द्रो मेषरूपेणागत्य तदीयं सोमं पपौ। स ऋषिस्तं मेष इत्यवोचत् अत इदानी मपि मेष इन्द्रोऽभिधीयते। मेधातिथेर्मेषेति सुब्रह्मण्या मन्त्रैकदेशस्य व्याख्यानरूपं ब्राह्मणमेव माम्नायते—"मेधातिथिं ह काण्वं मेषो भूत्वा जहारेति"। आगत्य सोमं अपहृतवानित्यर्थः।] "पुरुहूतं" बहुभिर्यजमानै राहुतम् "ऋग्मियम्"(१) ऋग्भिर्विक्रियमाणं स्तूयमानमित्यर्थः। स्तुत्या हि देवता विक्रियते (यद्वा ऋग्भिर्मीयते ऋग्मीः तं) "वस्वो अर्णवं" धनाना मावासभूमिम्। एवं शब्दात इति गुणविशिष्ट मिन्द्रं हे स्तोतारः! "गीर्भिः" स्तुतिभिः "अभिमदत" आभिमुख्येन हर्षं प्रापयत। "यस्य"-

(१)—'ऋचः स्तुतयः, ताभिः यः स्तूयते स ऋग्मियः, तम् ऋग्मियं स्तुतिवन्तं स्तुत्य मित्यर्थः'-इति वि०।

अथाष्टमी ।

सव्यऋषिः* ।

२उ　३ १ २　३ १ २ ३ १र २र ३ १ २ ३ १र २र
त्यꣳसुमेषंमहयास्वर्विदꣳशतंयस्यसुभ्वः†साकमोरते ।
३ १र २र　३ २ ३ २३ १ २ ३ १ २ ३ १ २
अत्यंनवाजꣳहवनस्यदꣳरथमेन्द्रंववृत्यामवसेसुवृक्तिभिः ॥८॥
१४५

५ २ ४र५ ४ ५ २ १
I त्यꣳहुइमेषम्महया । सुवर्वाइदा२म् । शतंयस्य

इन्द्रस्य "कर्माणि" मानुषं [जात्येकवचनं(२)] "मानुषाणि" मनुष्याणां हितानि "विचरन्ति" विशेषेण वर्त्तन्ते । अत्र दृष्टान्तः—"द्यावो न" यथा सूर्यस्य(३) रश्मयः सर्वेषां हितकराः "भुजे" भोगाय "मंहिष्ठम् अतिशयेन प्रवृद्धं "विप्रं" मेधाविनं(४) । तथाविधमिन्द्रम् "अभ्यर्चत" अभिपूजयत ॥ ७ ॥ १४४

---

* "सत्यस्यार्षम् । अन्तरात्मन एवायं प्रैषः"-इति वि० ।

† "सुभ्वः"-इति ऋग्वेदीयः पाठः ।

---

१४५ ऋग्वेदस्य १,४,१२,१ ।

I सौभरम् ।

(२)—"जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम (१,२,५८)"-इति पा० ।

(३)—यथा "स्वः"-इति दिवः अन्तरीक्षस्य च नाम (१,४,१)—द्यौ रपि तथा अथवा द्युस्थत्वादादित्योऽपि द्यौरुच्यते ।

(४)—"विप्रः"-इति मेधाविनामसु प्रथमं नैघण्टुकम् ३,१५ ।

सुभ्व:साका३मा३इरा१ता२३। अत्यन्नवाज(ं)हवनस्या३दा(ं)रा१था२म्। आइन्द्रं ववृत्याम। वसायेऽ। सूर-वू२३४औहोवा। क्तो२३४भीः॥ १८॥ १४५

"त्वं" तं प्रसिद्धं "मेषं" शत्रुभिः सह स्पर्द्धमानं "स्वर्विदं" स्वरादित्यो द्यौर्वा(१) तस्य "वेदितारं" लब्धारं वा। [यद्वा। स्वः सुष्ठु अरणीयं धनं तस्य लम्भयितारम्।] एवं गुणविशिष्टमिन्द्रं हे अध्वर्यो! "सुमहय" सम्यक् पूजय। "यस्य" इन्द्रस्य "शतं" शतसंख्याकाः(२) "आववृत्यां" प्रति आवर्त्तयामि। कीदृशं? "रथं" "हवनस्यदं" हवनमाह्वानं यागं वा प्रति वेगेन गच्छ-

---

(१)—निघण्टौ साधारण नामसु पठितत्वात् (१,४,१)।

(२)—इतः परं मिह भाष्यपुस्तके किञ्चित् (सुभुवः साकमीरते इत्यस्य व्याख्यानं) त्रुटितं दृश्यते। विवरणे त्वस्या एवं व्याख्यानम्—'त्यम्' तम् इन्द्रं, 'मेषं' मेषरूपम्, 'सुमहया' सुष्ठु पूजया स्तुतिभिः, हे मदीया ऋत्विजः! कीदृशम् इन्द्रम्? उच्यते—'स्वर्विदम्' (स्वःशब्दः स्वर्गपर्यायः, विदल्लु लाभार्थः ज्ञानार्थो वा) स्वर्गस्य लब्धारं ज्ञानं वा यस्य। किम्? उच्यते—'शतं' यस्य (शतमिति बहुनाम (३,१,९) 'सुभ्वः' अपठितमपि मरुन्नामैतद्द्रष्टव्यम् बहवो यस्य मरुतः, के? सामर्थ्यात् स्तोतारः, 'साकं' सहभूतः, 'ईरते' प्रेरयन्ति, किम्? सामर्थ्यात् स्तुतीः सहभूतोऽयं स्तुवन्तीत्यर्थः। अहमपि 'अत्यन्न' अश्वमिव 'वाजं' हविर्लक्षणमन्नम्, 'हवस्यदं' स्यन्दति गतिकर्मा आह्वानं प्रति गन्तारं, केन? उच्यते—'रथं' द्वितीयैकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम्, रथेन इन्द्रम् 'आववृत्याम्' आवर्त्तयेयुरित्येतदाशास्महे, किमर्थम्? उच्यते—'अवसे तर्पणाय, सोमेन 'सुवृक्तिभिः' सुष्ठु वर्जित-दोषाभिः स्तुतिभिः"-इति।

अथ नवमी ।

भरद्वाज ऋषिः ।

३ १ २ ३ १ २ २ २ ३ २ ३ १ २ ३ १ २ ३ १ २
घृतवतीभुवनानामभिश्रियोर्वी पृथ्वीमधुदुघेसुपेशसा ।
१ २ ३ १२ २२ ३ १ २ ३ १ २ ३ २ ३ १ २
द्यावापृथिवीवरुणस्यधर्मणाविष्कभितेअजरेभूरि
रेतसा ॥ ९ ॥ १४६

४ ३ ५ ४ २ ३ ४२ ५२ २ १२
I घृतव । ता३इ्भुवनानाम् । अभिश्रिया । उर्वी-
२ २ २ १ २ २ २ २२
पृथ्वीमधुदुघेसुपेशसा२३होइ । द्यावापृथिवीवरुणा । स्या-
१ १ २ १ २ १ २२ १२
धर्मणा२३ । होइ । विष्काभा२३ते । आजरे । भूरि ।
१ २ २ १ २ १ २ १२ २२
रायेइ । तसाउवा३ । ए३ । इन्दुःसमुद्रमुर्वियाविभा-
३ १ १ १ ११
ती२३४५ ॥ २० ॥

५ ४ ५ २ ४ ५ २ २ ४ ५ २ १२ २
II घृतवतीभुवनानाम् । आ५इ्श्रिया । उर्वीपृथ्वी-

न्तम् । गमने दृष्टान्तः—"अत्यन्नवाजं" गमन-साधन मश्वमिव
"महय" पूजय ॥ ८ ॥१४५

---

१४६ ऋग्वेदस्य ५,१,१४,१ ।

I,II वरुणसामनी द्वे ।

२ २ १ २ २ २ २र १
मधुदुघेसुपेशा२सा। द्यावापृथिवीवरुणा। स्याधर्मणा।

१ २ १ २११र १र २ २
वाइष्कभिताइ। अजरे२भूरि। राये३। तसाउवा३।

१ २ १ २१र २र ३ १ १ १ १
इन्दुःसमुद्रमुर्वियाविभातीर३४५॥ २१ १४६॥

"द्यावापृथिवी"(१) द्यावापृथिव्यौ "घृतवती"(२) दीप्तिमत्यौ(३) उदकवत्यौ(४) वा भवत इति शेषः "भुवनानां" भूतानाम् "अभिश्रिये" अभिश्रयणीये भवत इति सर्वत्रानुसन्धेयम्, "उर्वी"(६) विस्तीर्णे "पृथ्वी" बहुकार्य्यरूपेण प्रथिते च, "मधुदुघे" मधुन उदकस्य दोग्ध्र्यौ(७), "सुपेशसा"(८) सुरूपे,

(१), (२)—पूर्व्वसवर्णे रूपम् ७,१,३९।

(३)—"तेजो वै घृतम्"-इत्यादि-श्रुति रेवैवमर्थे नियामकम्।

(४)—"घृतम्"-इत्युदकनामसु दशमं नैघण्टुकम् १,१२।

(५)—आले रूपम् ७,१,३९।

(६)—'उर्विति बहुनाम (३,१,१) अवयवभूतत्वाद्य बहु-व्यपदेशः, बह्ववयवे'-इति वि०।

(७)—'द्यौस्तावत् साक्षादेव उदकं चरति, पृथिव्यपि उदकस्य हेतुभूताया आकृतितत्प्रदान-द्वारेण'-इति वि०। "मधु"-इत्युदक-नामसु एकादशतमं नैघण्टुकम् (१,१२)।

(८)—"पेशः"-इति रूपनामसु दशमं नैघण्टुकम् (३,७)। आ-प्रत्ययस्याले रूपम् ७,१,३९।

अथ दशमी।

मेधातिथि ऋषिः ।

महापङ्क्तिच्छन्दः ।

( षड़ष्टाक्षराः पादा, द्वौ चार्द्धर्चौ वधीमहे )

३ १२ २२ ३ १ २  ३ २ ३ १ २
उभेयदिन्द्ररोदसीआपप्राथोषाइव।

३ १ २  ३ १ २  २ १ २  ३ २
महान्तंत्वामहीना९संम्राजञ्चर्षणीनाम् ॥

३ १२ २२  ३ १२ २२
देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत् ॥ १० ॥ १४७

५ ४२ ५ ४२ ५ ४  १ २ १ २
I उभेयदिन्द्ररोदसाइ। आ२३पा। प्राथउषा३१उ-

"वरुणस्य" सर्वनियामकस्य(९)" धर्मणा" धारणे "विष्कभिते" पृथक् धारिते "अजरे" नित्ये "भूरि रेतसा" बहु-रेतस्के बहु-कार्य्ये वा भवतः (अत्र साक्षात् द्यावापृथिव्योः स्तुतिः, प्रसङ्गाद् वरुणस्येति द्रष्टव्यम् ॥ ८ ॥ १४६

---

I श्येनम् ।

१४७ उत्तरार्चिकस्य ४,१,१८,१ = ८,७,२२,१ = आरण्ये ३,१८ = ऊह्ये १,१८ ।

(९)—वरुणो मेघ-सञ्चालक-वायु-विशेष एवेति दैवत-काण्डीय-नैरुक्त पर्यालोचनया गम्यते। विवरणकृता तु 'वरुणो मध्यमस्थानः, सलिल एव'-इत्युक्तम्।

२ ३ २ १ र २ १ ऽ २
वा२३। इवा। महान्तंत्वामहाइनाम्। संम्रौ३हो।
१ २ २ २ २ २ १ र २
जस्वर्षणा३१उवाये३। ना३मा। देवीजनित्र्याजी१-
१ ऽ २ १ २ २
जाना२त्। भद्रौ३हो। जानित्रियजा३१उवा२३। ए३।
२
जनदा३२॥ २२॥ १४७॥

हे "इन्द्र !" "उभे" "रोदसी" द्यावापृथिव्यौ "यत्" यस्त्वम् "आ पप्राथ" स्व-तेजसा आ पूरयसि [प्रा पूरणे आदादिकः (प०)। छान्दसो लिट्(१)] "उषा इव" यथा उषाः स्वभासा सर्वं जगदा पूरयति तद्वत्। "तं" "महीनां" महतां देवानामपि "महान्तम्" नायकम्। "चर्षणीनां" मनुष्याणामपि "सम्राजम्" ईश्वरम् "इन्द्रम्" "त्वा" त्वां "देवी" देवनशीला(२) "जनित्री" साधु-जनयित्री(३) अदितिः(४) "अजीजनत्" अजनयत् (जनेर्ण्यन्तात्

(१)—"छन्दसि लिट् (३,२,१०५)"-इति पा०।

(२)—'दानादि-गुण-युक्ता'-इति वि०। यास्कस्त्वाह—"देवो दानाद्वा दीपनाद्वा द्यु-स्थानो भवतीति वा यो देवः सा देवता"-इति ७,१५।

(३)—साधुकारिणि तृणीति (३,२,१३५)-भावः।

(४)—"अदितिरदीना देवमाता"-इत्यादि नैरुक्तोक्तेः (४,२२-२३)।

अथैकादशी ।

एषा गर्भस्राविण्युपनिषत्* ।

२ ३ १ २ २ ३ १ ३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
प्रमन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तꣳ सख्याय हुवे-

महि † ॥११॥ १४८

॥ इति चतुर्थ-दशति ॥

२ ३ ५ १ ४ २र ३ ५ १ २
I प्रमन्दा२३४इने । पितुमदा३र्चा३ता वचः । यःका-

लुङि चङि रूप मेतत्) यस्मादेषा जनयित्री ईदृशं पुत्र मजी-
जनत् अतः कारणात् सा "भद्रा" कल्याणी प्रशस्ता जाता
[जनेर्ण्यन्तात् साधुकारिणि तृन् (३,२,१३५) । "जनिता मन्त्रे
(६,४,५३")-इति इडादौ णि-लोपो निपात्यते । "ऋन्नेभ्य
(४-१,५)"-इति ङीप् ॥ १० ॥ १४७

---

* 'कुत्स आत्मीयान् पुत्रान् पौत्रांश्चाह—"-इति वि० ।
† "हवामहे"-इति ऋग्वेदीयः पाठः ।

---

१४८ ऋग्वेदस्य १,७,१२,१ ।

1 वैरूपम् ।

२ ५ २ २र १२ १ २ २ ३
इओर२३४वा। ष्णागर्भानिरहन्नृजिश्वना३। अवस्या२३-
५ १ २ १ २ ३ ५ १ २ ३
४वा:। वृषणंवा। आदक्षा२४४इणाम्। मारौवाओर-
५ ४ र
३४वा। त्वन्तꣳसख्यायहृवाप्रइमहाउ। वा। २३॥ १४८

हे ऋत्विजः! "मन्दिने" स्तुतिमते(१) स्तोतव्यायेन्द्राय "पितुमत्" हविर्लक्षणेनान्नेनोपेतं(२) "वचः" स्तुतिलक्षणं वचनं "प्रार्चत" प्रकर्षेणोच्चारयत। "यः" इन्द्रः "ऋजिश्विना" एतत् संज्ञकेन राजर्षिणा सख्या सहितः सन् "कृष्णगर्भाः" कृष्णोनाम कश्चिदसुरः, तेन निषिक्तगर्भाः तदीया भार्य्याः "निरहन्" नितरामवधीत् [कृष्णमसुरञ्च तत्पुत्राणामनुत्पत्त्यर्थं गर्भिणीस्तस्य भार्य्या अपि अवधीदित्यर्थः(३)। "अवस्यवः(४)" रक्षणेच्छवो वयं "वृषणं" कामानां वर्षितारं "वज्रदक्षिणं" वज्रयुक्तेन दक्षिण-हस्तेन

---

(१)—"मन्दते"-इति स्तोतृकर्मसु अष्टादशतमं पदम् ३,१४। अत्र यास्कः—"मन्दी मन्दतेः स्तुति-कर्मणः * * * प्रार्चत मन्दिने पितुमद्वचः"-इति ४,२४।

(२)—पितुरित्यन्ननामसु षष्ठं पदम् २,७।

(३)—अत्र विवरण-कार-व्याख्यान मुत्कृष्टतरम्, तथाहि—'कृष्णगर्भः—कृष्णो-मेघः, तस्य गर्भभूता आपः, निरहन्निति (गत्यर्थोऽन्तर्णीत-ण्यर्थश्च द्रष्टव्यः) निर्गमितवान् पातितवानित्यर्थः'-इति।

(४)—रक्षणार्थावशब्दात् क्यचि 'क्याच्छन्दसि (३,२,१७०)'-इति उ-प्रत्यये रूपम्।

उपेतं "मरुत्वन्तम्" इन्द्र "सख्याय" सख्युः कर्मणे(१) "हुवेमहि" आह्वयामः ।

"हुवेमहि"-"हवामहे"-इति च पाठौ ॥ ११ ॥ १४८

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्य तृतीयः खण्डः ॥ ३ ॥

॥ इति जागतम् ॥

—)०(—

---

अष्टाविंशतिरिन्द्रेति मुख्याः(अ) सप्तदशोष्णिहः ।
आद्या(क) दशान्याः ककुभः(च) पिबेत्यष्टादशी विराट्(ट)॥

---

(१)—"सख्युर्यः (५,१,१३६)"-इति कर्मणि यः ।

(अ)—इन्द्रेति "इन्द्रसुतेषु"-इत्यारभ्य "वयमुत्वेत्यृगन्ताः दशत्रयात्मकाः अष्टादश ऋचः मुख्याः साम्प्रतं व्याख्यातुं गृहीतत्वेन प्रधानाः ।

(क)—तत्र आद्याः सप्तदश "इन्द्रसुतेष्वित्यारभ्य "अपामीवेत्यन्ताः उष्णिहः उष्णिक्-छन्दस्काः ।

(च)—अन्याः दश "अभ्रातृव्यो"-इत्यारभ्य "वयमुत्वेत्येतदृगन्ताः अन्तिमदशदात्मकाः दश ऋचः ककुप्-छन्दस्काः ।

(ट)—पिबेति "पिबा सोम मिन्द्र"-इति द्वितीय-दशदन्तिमा ऋक् तु विराट्-छन्दस्का । इति छन्दः-सङ्केत;

तुचे वेत्था ह्यपामीवामित्यादित्यपरिष्टुतिः(त)।
आगन्त गाव इत्येते मरुता(प) मिन्द्रदेवताः॥
अन्या ऋचो(य) ऽभिधीयन्ते ऋषयस्तत्र तत्र हि(श)॥

तत्र चतुर्थे खण्डे—

सैषा प्रथमा।

नारद ऋषिः।

१ २ ३ २ ३ १ २ ३ १ २ ३क२र
इन्द्र* सुतेषु सोमेषु क्रतुम्पु† नीष उक्थ्यम्।

(त)—"तुचे तुनाय"-इति पञ्चदशी, "वेत्था हि निर्ऋतीनां"-इति षोड़शी, "अपामीवामपस्निध"-इति च सप्तदशी ऋक्—आदित्यस्य देवस्य परिष्टुतिः सर्वतः स्तवनं यथा तादृशी, आदित्य-देवताका इत्यर्थः।

(प)—"आगन्ता मा रिषण्यत"-इत्येकविंशतितमा ऋक्, "गावश्चिद्घा"-इति चतुर्विंशतितमा ऋक् च इत्येते द्वे मरुद्देवतानां स्तुत्यर्था इति शेषः।

(य)—अन्याः अवशिष्टाः त्रयोविंशति ऋचः इन्द्रदेवताः ज्ञेया इति यावत्। इति दैवत-सङ्केतः।

(श)—आसामष्टाविंशत्यृचामृषयस्तु तत्र तत्रैव व्याख्यानमुखेनैव अभिधीयन्ते कथितुमारभ्यते इत्यर्थः।

* "इन्द्र" } इमौ ऋग्वेदीयौ पाठौ,
† "पुनीत" } सायण-सतीत्तर-भाष्ये च।

३ २ ३ २ ३ १ २   ३ २
विदेवृधस्यदत्तस्य*मचाꣳहि†षः ॥ १ ॥ १४९

५ ४   २ १र र र   २   १   १   २र १
I इन्द्रा। सुतेषुसोमे। षु। चोई२। चो। वाहोइ।

र   २ १ २   २ १ २
क्रतुम्पुनीषउक्थियाम्। विदाइवा१र्द्धा२३। स्याउदाचा-

२   १   २   १
३स्या। मचाꣳ२३हिषा३४३ः। ओ२३४५इ। डा॥ २४॥

३ २ १   ३ २ १   २ १र र र
II इन्द्रा३चोइ। चवे३चोइ। सुतेषुसोमेषुक्रतुम्पु-

र   २ १ २   १   २
नीषउक्थियाम्। विदाइवा१र्द्धा२। स्यदक्षस्या। मा-

४र   ५   ३ १ १ १ १
३चाꣳहि। षा२३४५ः॥ २५॥

---

* "दक्षसो"
† "मचान्हि"
} इमौ च ऋग्वेदीयौ पाठौ।

---

१४९ उत्तरार्चिकस्य १,२,१२,१ = ऋग्वेदस्य६,१,७,१ = ऊहे१,२,१०—१९,२।

I क्रोशम्।

II अनुक्रोशम्।

५ २ २ ४ ५ १ १ २ १
III इन्द्रसुतेषुसोमेषू। क्रतू२०पुनाइ। षउक्थि-

२ २ १ १ २ २ १
याम्। विदेवाद्धा२। स्यदक्षस्या। महाꣳहाइषा२ः।

१ २ १
महाꣳ२३हिषा३४३ः। ओ२४४५इ। डा॥ २६॥ १४९॥

हे "इन्द्र!" "सोमेषु" सुतेष्वभिषुतेषु सत्सु तान् पीत्वा "क्रतु" कर्म-कर्त्तारं "उक्थ्यं" स्तोतारं च(१) "पुनीषे" शोधयसि(२)। [यद्वा सोमेष्वभिषुतेषु उक्थ्यं(३) क्रतुं यागं तैः सोमैः पुनीषे यजमानैः पूतङ्कारयसि] किमर्थं? "वृधस्य" वर्द्धकस्य "दक्षस्य" बलस्य(४) "विदे" लाभाय। स तादृश "इन्द्रः" "महान् हि" महान् खलु (अत एवं कर्त्तुं शक्नोतीति भावः॥ १ ॥ १४९

---

I,II कौसम्।

(१)—क्रतुरिति कर्मनाम (२,१,११)—उक्थ्यमिति स्तोत्रविशेषस्य नाम, गौण्या वृत्त्या इह तत्तत्कर्त्तरि व्यपदेश इति भावः।

(२)—विवरणकारस्त्वेवं व्याख्यातम्—'क्रतुं प्रति पुनीषे, पुनातिरत्र गत्यर्थो द्रष्टव्यः गच्छतीत्यर्थः। कीदृशं प्रति गच्छति? उच्यते—उक्थ्यम् प्रशस्यमधिगुणमित्यर्थः -इति। एतन्मये तु पुनीषे-इति "पवते"-इत्यस्य गति-कर्मसु पठितस्य (नै०२,१४,१०८) विकरण-व्यत्ययेन३,१,८८ रूपम्। किञ्च उक्थ्यमिति प्रशस्य-नामसु (३,८,६)पठितस्येति।

(३)—अत्र पक्षे उक्थ्यमिति क्रतुमित्यस्य विशेषणम्; उकथस्तु सप्तानां सोम-संस्थानामन्यतमम्, तथाहि लाट्यायन-सूत्रम्—"अथ सोमसंस्थाः, अग्निष्टोमो(१) ऽत्यग्निष्टोमो(२) उक्थः(३) षोड़शी(४) तिरात्रो(५) वाजपेया(६) प्तोर्यामः(७)"-इति (५प्र० ४ख०)।

(४)—"दक्षः"-इति बल-नामसु षयोदशतमं नैघण्टुकमम् ( २,९ )।

अथ द्वितीया।

इयोर्गोषूक्त्यश्वसूक्तिनाम्रषी* ।

१ २ ३ १र २र ३ १ २ ३ २
तमुअभिप्रगायतपुरुहूतंपुरुष्टुतम् ।

५र र २ र १ ५र २ ३
I हाउतमूवभी । प्रगायता । हाउ । पुरुहूर२३४-

५ २ १ ५र २ ३ ५ २
ताम् । पुरुष्टुताम् । हाउ । इन्द्रङ्गार२३४इर्भीः । त-

१ २ ५र ३ १ ४ ३
वाइषार२३मा३४ । हाउ । विवा३साय्यूता६५६ । दी-

५
२३४वौ ॥ २७ ॥

३ ५र २ २ ४र ५ ५ २ १ २
II ता४मूवभि । हो३इ । प्रगायता६५ए । पुरुहू३-

---

* 'गोपुक्ती वाश्वसूक्ती वा आत्मीयान् ऋत्विज आह'-इति वि० ।

---

I,II दैवोदासे द्वे ।

१ २ ३ १ २ ३ १ २ ३ २ ३
इन्द्राग्नीभिस्तविषमाविवासत ॥ २ ॥ १५०

२ १ २ २ १ २ ५ २ १ २
ताम् । पुरुहू३ता३म् । पुरु२हू२३४ताम् । इन्द्राग्नी-

२ १ २ २ १ २ २ १ २
३भीः३ः । तवाइषा३मा । विवासा३ता३ । विवा२सा-

५ १ २ ३२ १ १
२३४ता । आइन्द्रा२४म् । गीर्भा३इः । तविषम् ।

७ २ १ २ ३ ५ २ १ १ १ १
आ । विवा२३हा३ । साताओ२३४वा । ऊ२३४५ ॥२८॥

५ ४ २ ३ ४ २ ५ २ १ २ १
III तमू३अभिप्रगायता । पुरु । हूतम्पुरु२हू-

१ १ १ ५ २ १
ता२म् । इन्द्रा२०गाइभी२ः । तविषा२३४मा । विवा-

१ २ ५ २ २ २ ५
२३ । सा२ता२३४औहोवा । ओ२३४का: ॥ २९ ॥

---

१५० ऋग्वेदस्य ६,१,१७,१ ।

III प्रहितोः संयोजनम् ।

५४ २ ३४ र ५ र   २ १ र   १
IV तमू३अभिप्रगायतेदाम् । पुरू । हूतम्पुरू२ष्टूता-

१ १र र १ २ १
२म् । आइन्द्रङ्गीर्भिस्तविषमा । विवासा१ता२ । आ-

२ २ ११११ २ १ २ १
इन्द्रङ्गा२४५इ । भा२३४५इ: । तवाइषा२३मा३ । वा-

३ ५र र २ ३११११
२इवा२३४औहोवा । सतए२३४५ ॥ ३० ॥ १५०

"पुरुहूतं" बहुभिराहूतं "पुरुष्टुतं" बहुभिः स्तुतं "तमु" तमेव इन्द्रं हे स्तोतारः ! "अभिप्रगायत" अभिमुखं प्रकर्षेण स्तुध्वम् । एतदेव स्पष्टयति—"तविषं" महान्तम्(१) इन्द्रं "गीर्भिः" वाग्भिः "आविवासत" परिचरत(२) ॥ २ ॥ १५०

---

IV ओकोनिधनम् ।

(१)—"तविषः"-इति महन्नामसु सप्तमं नैघण्टुकम् ३,३ ।

(२)—"विवासति"-इति परिचरण-कर्मसु चन्तिमं पदम् ३,५ ।

अथ तृतीया ।

२ ३ १ २ ३ १ २ ३ १ २ ३ २
तन्तेमदङ्गृणीमसिवृषणम्पृत्सु*सासहिम् ।

३ १ २ ३ १ २
उलोककृत्नुमद्रिवोहरिश्रियम् ॥ ३ ॥१५१

४ ४ २ १ र
I तन्तेपुमदम् । गृणीपुमसि । वृषा । णम्पृत्सुसा-

१ २ १र र २
सा२हाइम् । उलोका । कृत्नुमद्राइ । वोहा२३री३ ।

१ २ १
आ३४३या३४३म् । ओ२३४५इ । डा ॥ २१ ॥

२ ५ २ ३ ४ र ५ ५ २ १
II ता४न्ते । होइ । मदङ्गृणीमसी६ए । वृषाहो२ ।

२ १ र र र १
णम्पृत्सुसा१साहो२म् । उलोककृत्नुमद्रिवोहा१री२ ।

१ ४ ५ ४
श्रियाम् । औ२३होवा । हो५इ । डा ॥ २२ ॥

---

* "पृत्सु"-इति ऋग्वेदीय-पाठः, सायणकृतोत्तरभाष्ये च ।

---

१५१ उत्तरार्चिकस्य २,२,१८,१ = ऋग्वेदस्य ६,१,१७,४ = ऊहे २,२,६—८,१३—१८,१९ ।

III तन्तेमदङ्गृणीमसीइए । वृषाऔ३हो३४ । पृ-णम्पृ तुसासहीम् । उलाऔ३हो३४ । कक्कन्नुमद्रिवाः । हरो२३४वा । आ५युयोई३हाइ ॥ ३३ ॥

IV तन्तेमदा५ङ्गणीमसाइ । वार्षणं । तुसासा३ही-३म् । होवा३हाइ । उलोका३कृ३ । होवा३हा । तुमा-२३ । द्रा२द्रिवार३४औहोवा । हरिश्रिया२३४५म् ॥ ३४ ॥ १५१ ॥*

हे "अद्रिवः" वज्रवन्निन्द्र ! "ते" त्वदीयं "तं" "मदं" सोम-पान-जनितं हर्षं "गृणीमसि" गृणीमः प्रशंसामः (गृ शब्दे क्र्यादिः "प्वादीनां ह्रस्वः(७,३,८०)" । "इदन्तोमसि(७,१,४६)"-इति मस इकारागमः ।) कीदृशं ? "वृषणं" वर्षितारं कामानां ।

---

I,II,III,IV हारिवर्णानि चत्वारि ।

---

*॥ इति अर्द्धः प्रपाठकः ॥

अथ चतुर्थी।

पर्वतऋषिः।

१र २र ३ १२ ३१२ ३२३ २
यत्सोममिन्द्र विष्णवि यद्वाघ त्रित आप्त्ये।
१ २ ३ २ ३ १ २ ३ १र २र
यद्वा मरुत्सु मन्दसे समिन्दुभिः॥ ४॥ १५२

५ र ४ ५ १ र र
I ओम्। यत्सोममिन्द्रविष्णावी। यद्वाघत्रितआप्तियाइ।
२ र १ ५ १ ३ ५र र
यद्वामरुत्सु माऽ२न्दासो२३४हाइ। सा२मा२३४औहोवा।
२ १ ३ २ १ १ १
ए३। दुभी२३४५ः॥ १॥

"पृत्सु" वैरि-सम्पर्क-जनितेषु संग्रामेषु(१)। (अतएव बह्वृचाः पृत्स्विति पठन्ति। पृत्सु समत्स्विति संग्रामनामसु (नि०२,१७,-२१-२२)पठितम्। "सासहिं"(२) शत्रूणामभिभवितारं "लोककृत्नु" लोकस्य स्थानस्य कर्त्तारं "हरिश्रियं" हरिभ्यामश्वाभ्यां श्रयणीयं सेव्यम्। "उ" शब्दः सर्वेषां समुच्चये पाद-पूरणे वा॥ ३॥ १५१

---

१५२ ऋग्वेदस्य ६,१,४,१।

(१)—ननु "पृत्सु"-इत्यस्य सङ्ग्रामेषु इत्येव सर्वस्वेत् कथं तत्पर्य्यायेषु न पठितं निघण्टौ? अतएव विनिगमकमावश्यकमित्याह—अतएवेत्यादि। अस्ति पाठः सङ्ग्रामनामसु "पृत्सु"-इति पदस्य (२,१७,२१) श्रूयते च तथा पाठो बह्वृचि, तदेवं निघण्टावपि "पृत्सु"-इति च पाठभेदेन ग्राह्यमिति भावः।

(२)—तुजादित्वादभ्यासदीर्घः (६,१,७)।

४ र   ४   २ १र र   र
II यत्सोममापूइन्द्रविष्णवाइ । यद्वाघात्रितआप्ता२-
१   २१र   १   २   २ ३
याइ । यद्वामा२रुत्सुमा । दासाये३ । सा२मा२३४-
५र र   ३   ५
औहोवा । द२३४भीः ॥ २ ॥

५र र र र   १ ३   ५र र   ३
III हाउहायत्सोममा । द्रा२वा२३४औहोवा । ष्णा-
५   १ ऽर   १ ऽर   १र   र   १
२३४वी । यद्वा२घत्रितआ२प्तिये । यद्वामरुत्समा२३हो ।
७   १   १ २   २ ३
दसा२इ । समा२३होये३ । दुभिरो २ ३ ४ ५ इ ।
डा ॥ ३ ॥

३र २   ३   ५   २ र   ४
IV औहो३१इ । औ२हो२३४वा । यत्सोममी३न्द्रा-
२ ३ ५   ३र २   ३   ५   २ र
३विष्णवाइ । औहो३१इ । औ२हो२३४वा । यद्वाघ-
४   २र ३ ५   ३र २   ३
त्री३ता३आप्तियाइ । औहो३१इ । औ२हो२३४वा ।
१ र   ४   २ ३ ५   ३र २   ३
यद्वामरु३त्सु३मन्दसाइ । औहो३१इ । औ२हो२३४५वा-
१   ३ ११११
६५६ । समिन्दुभी२३४५ः ॥ ४ ॥ १५२ ॥

---

I,II,III,IV त्रैतानि चत्वारि ।

अथ पञ्चमी।

एतद्वादि-तिसृणां विश्वमना वैयश्व ऋषिः।

२ ३ १ २ २ १ २ ३ १ ३ ३ २ १
एदुमध्वो*र्मदिन्तरꣳसिञ्चाध्वर्यो† अन्धसः।
३२उ २ १र २र २ १ २
एवाहिवीरस्तवतेसदावृधः॥ ५॥ १५३

हे "इन्द्र!" "विष्णवि"(१) विष्णौ सोमपानार्थं मागते सति अन्यदीये यागे "यद्" यदि तेन विष्णुना सार्द्धं पिबसि। "यद्वा" यदि वा "आप्त्ये" अपाम्पुत्रे "त्रिते" एतत्संज्ञके राजर्षौ यजमाने सोमं पिबसि (वेतिपूरणं) "यद्वा" यदि च "मरुत्सु" च सोमपानायागतेषु अन्यदीये यज्ञे "मन्दसे" माद्यसि तथाप्यस्मदीयैरेव "इन्दुभिः" सोमैः सम्यक् माद्य॥ ४॥ १५२

---

* "मध्वो"
† "सिञ्च वाध्वर्यो" } इति-ऋग्वेदीय-पाठौ।

---

१५३ उत्तरार्चिकस्य ८,२,१०,१ = ऋग्वेदस्य ६,२,१८,= ऊहे १५,२,९।

(१)—"ह्रस्वस्य गुणः (७,३,१०८)-"जसि च (१०९)"-इति सूत्रे "जसादिषु छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः"-इति कात्यायनोक्तेरिह गुणः। विवरणे तु—'सप्तम्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यं, सहयोगे च तृतीया, विष्णुना सह'-इति व्याख्यानम्।

३र ४ ५र २ १ ३ ५ २ १र र
I एदुमधोः । मदा२३इन्ता२३४राम् । सिञ्चाध्वर्यो-

३ ५ २र १र र ३
अन्धसा२ः । धा२३४सा । एवाहिवीरस्तवया२इ । वा-

५ १ २ ४
२३४ताइ । सदा२वा५र्द्धो६४६ः ॥ ५ ॥

४र र ४ २ १ १
II एदुमधौ हो५र्मदिन्तराम् । सिञ्चा हो २इ । अध्वर्यो-

२ १ २ १
अन्धासा २ः । आइवा१इहिवी २ । रा २स्तवताइ ।

२ १र २ ४ ५ ४
सदावृ । धा । औ२होवा । हो५इ । डा ॥ ६ ॥१५३॥

हे "अध्वर्यो" अध्वरस्य नेतः ऋत्विक्! "मधोः"(१) मदकरस्य "अन्धसः" सोमलक्षणस्यान्नस्य "मदिन्तरं" अत्यर्थं मादयितृतमं(२) सोमरसमेव " आसिञ्च " इन्द्रार्थमभिक्षर(३) । [इदु-इत्यव-धारणे(४)] "वीरः" समर्थः "सदावृधः" सर्वदा हविर्भिर्वर्द्ध-

---

I,II सुराधसे इ ।

(१)—लिङ्गव्यत्ययेन रूपम् (३,१,८५) ।

(२)—मदं कर्त्तृत्वेन यस्यास्ति स मदी अतिशयेन मदी, मदितरस्तम् । अतिशयेन मदकरमित्यर्थः । अत्र मते "मदितर"-इति नकारहीन-दकारान्वित-पाठ एव बुध्यते ।

(३)—यद्दत्तमस्तादाविति भावः ।

(४)—"इत्"-"उ" द्वावपि पदपूरणौ इति वि० । "पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति"-इति नि० नै० १,९ ।

अथ षष्ठी।

२ ३ १ २ ३ १ २ ३ १र २र
एन्दुमिन्द्रायसिञ्चतपिबातिसोम्यंमधु।
१र २र ३ २
प्रराधाꣳसिचोदयते*महित्वना॥ ६ ॥ १५४

२ ४ २ ४ ५ १ २र र १
I एन्दु५ऽमि। द्रा३या३सिञ्चता। पिबा२तिसोम्य-
२ १र २ १र १ २ १
म्मधु। प्रराधा२३ꣳसी। चोदयता२इमा२ही। त्वना।
२ ४ ५ ४
औ३होवा। हो५इ। डा॥ ७॥ १५४॥

नीयः। यद्वा। सर्वदा स्वबलस्य वर्द्धकोऽयमेवेन्द्रः "स्तवते(५)हि" स्तोतृशस्त्रादिभिः स्तूयते खलु (स्तुतायेन्द्राय सोमो दातव्यः तस्मादासिञ्चेति समन्वयः॥ ५॥ १५३

हे ऋत्विजः! "इन्दुं" स्यन्दनशीलं(१) सोमम् "इन्द्राय"

---

* "राधसा चोदयाते"-इति ऋग्वेदीय-पाठः, सायणीयोक्तभाष्ये च।

---

१५४ उत्तरार्च्चिकस्य ७,१,८,१ = ६,२,१७,३ = ऊहे १०,२,८।

I आक्रतम्।

(५)—विकरण-व्यत्यये रूपम् (३,१,८५)।

(१)—यदाह यास्कः—"इन्दुरिन्धे रुनत्ते र्वेति(१०,४१)"-तदिन्दोनत्ते रूपमिष्टमिति भावः। 'उन्दी क्लेदने (रु० प०)'। क्लेदनत्वादीभावः सुतरां स्यन्दनशीलमित्यर्थो ऽवाप्यते।

अथ सप्तमी।

२ ३ २ ७ १ २ ३ १ २ ३ २ ३ १ २
एतोन्विन्द्रꣳस्तवामसखायःस्तोम्यन्नरम्।
२ १र २र ३ २उ ३ २
कृष्टीर्योविश्वाअभ्यस्त्येकइत्॥ ७ ॥ १५५

५र र ५ १ २र १ ३ २
I एतोन्विन्द्रꣳस्तवाईमा। साखायस्तोर। मिया३४-
१ २१र र २र १ २ १ २
पुम्। नरमाकृष्टीर्योविश्वाअभि। आ। स्तियाये।
२ ३ ५र र ३ १ ११२
काईरदा२३४औहोवा। ऊ२३४पु॥ ८ ॥ १५५ ॥

इन्द्रार्थम् "आसिञ्चत" आभिमुख्येन प्रत्याचारयत (आश्रयण-द्रव्येण सेचनं कुरुत तमभिषुणुतेत्यर्थः) ततः "सोम्य"(२) सोममयं "मधु" मदकरं सोमरसं "पिबाति"(३) पिबतु। पीत्वा च स इन्द्रः "महित्वना" स्व-महत्वेनैव "राधांसि" अन्नानि स्तोतृभ्यः "प्रचोदयते" प्रकर्षेण चोदयतु॥ ६ ॥ १५४

---

१५५ ऋग्वेदस्य ६,२,१८,४।

I वैश्वमनसम्।

(२)—"सोममर्हति यः (४,४,१३७)"—"मये च (४,४,१३८)"—इति मयडर्थे यः।

(३)—लेटि (३,४,७)—बाहुलकात्(२,१,३४) सिबभावे—इतोल्लोपस्यापि वैकल्पिकत्वात् (३,४,९७)—आडागमे (३,४,९४) रूपम्।

अथाष्टमी ।

नृमेधऋषिः ।

१२ ३१ २ ३ १२ ३ २ ३ २
इन्द्रायसामगायतविप्राय बृहतेबृहत् ।
१ १२ ३ १ २ ३ १ २
ब्रह्मकृते*विपश्चितेपनस्यवे ॥ ८ ॥ १५६

५ र १ र २ १ २ १ १
1 इन्द्रायसा । मागायत । वाइप्रा१याबृ२ । हा-
र २ १ ० १ १ ३ ५र
तेबृहत् । ब्राह्मकृते२ । विपा२३ः । चा२इता२३४औ-
र २ १ १११ १
होवा । पनस्यवे२३४५ ॥ ८ ॥

हे "सखायः" समानख्याना मित्रभूता ऋत्विजः ! "नु" क्षिप्रम् "एतो" आगच्छतैव । किमर्थं ? तदाह—"स्तोम्य" स्तोमार्हं "नरं" सर्वस्य नेतारं "तम्" इन्द्रं "स्तवाम" स्तोत्रं करवाम । य इन्द्रः "एकइत्" एकाकी असहायएव सन् "विश्वाः" सर्वाः

---

* "धर्मकृते"-इति ऋग्वेदस्य, सायणीयोत्तरभाष्ये च ।

---

१५६ उत्तरार्चिकस्य ३,२,२२,१ = ऋग्वेदस्य ६,७,१,१ = ऊहे ३,१७ ।

II इन्द्रा३४। यसाम। गायाइता। वाइप्राय-
बृ२। हता३४५इ। बृ२३४हात्। ब्रह्मकृते२विपश्चि-
ते२। ओयेइ। पा२ना२३४औहोवा। स्या२३४वे ॥१०॥

III औहौहोइ। औ३होइ। ओ३२३४५वाई५६।
इन्द्रा२यसाममगायत। विप्रा२यबृहतेबृहत्। ब्रह्मकृ-
ते२विपश्चिते२। औहौहोइ। औ३होइ। ओ३२३४-
५वाई५६। ए३। पनस्यवे२३४५ ॥ ११ ॥ १५६ ॥

"कृष्टीः"(१) मनुष्येनाः "अभ्यस्ति" अभिभवति तं स्तवामेति शेषः ॥ ७ ॥ १५५

हे उद्गातारः! "विप्राय" मेधाविने(१) "बृहते" महते "ब्रह्मकृते" ब्रह्मणः अन्नस्य(२) कर्त्रे "विपश्चिते" विदुषे "पनस्यवे"

---

I,II,III सोमिनानि त्रीणि।

(१)—"कृष्टयः"-इति मनुष्य-नामसु सप्तमं नैघण्टुकम् (२,३)।

(१)—"विप्रः"-इति मेधावि-नामसु प्रथमं नैघण्टुकम् (३,१५)।

(२)—"ब्रह्म"-इत्यन्ननामसु चतुर्विंशतितमं नैघण्टुकम् (२,७)।

अथ नवमी ।

गौतमऋषिः ।

२उ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
यएकइद्विदयतेवसुमर्त्तायदाशुषे ।
१ २ ३ १ २ ३ १ २ ३ २
ईषानोअप्रतिष्कुतइन्द्रोअङ्ग ॥ ९ ॥ १५७

५ र र २१ १
I यएकइदिहाहाउ । विदयताइ । वसुमार३र्त्ता ।
१र र र २ र १ २
यदाशुषाइ । ईशानोर३हा । प्रातिष्कुता३१उवा२३ ।
५ १ २ २ ४ ५ ४
ई२३४न्द्राः । अङ्गा । औ३होवा । होपुइ । डा ॥१२॥

३ ५ ३ ५ २ २ ५
II यार३४ए । का२३४ईत् । वीदाया२३४ताइ ।
१ २ १ २ १ २ ३ ५ १ २र र १
वासुमर्त्ता२३हा३ । यादाशू२३४षाइ । आइशानोअ ।

स्तुतिमिच्छते(३) "इन्द्राय" "बृहत्" बृहन्नामकं साम "गायत" पठत ॥ ८॥ १५६

---

१५७ उत्तरार्च्चिकस्य ५,२,२२,१ = ऋग्वेदस्य १,६,६,२, = आरण्ये २,१४ = ऊहे ६,७ ।

(३)—"पनस्यति"-इति अर्च्चति-कर्मसु पञ्चविंशतितमं नैघण्टुकं, तस्मादुपलप्स्ये (३,२,१७०) क्यच् ।

२   २   ५   १   १र   १
प्रता२३हाइ। ष्कू२३४ता:। आइन्द्रो३। गा२।

२   ५र र   २   ५
या२३४औहोवा। ई२३४न्द्राः॥ १३॥

५र   र   ५   १   २   २   १
III यएकइद्विदायाइताइ। वासुमर्त्तायाइदा। ऊम्।

२   ५   १   १र र १   २   १   १र   २र
शू२३४षाइ। आइशानोअप्रतिष्कुतः। आइशा३। नो-

११   २   ५   १   १र   १   २
अप्रताइ। ष्कू२३४ताः। आइन्द्रो३। गा२। या-

५र र   २   ५
२३४औहोवा। ई२३४न्द्राः॥ १४॥ १५७॥

"यः" इन्द्रः "एकइत्" एकएव "दाशुषे"(१) हविर्दत्तवते "मर्त्ताय" मनुष्याय यजमानाय "वसु" धनं "विदयते" विशेषेण ददाति [अङ्गेति क्षिप्र-नाम(२)] "अप्रतिष्कुतः" परैरप्रतिशब्दितः [प्रति-कूल-शब्द-रहित इत्यर्थः(३)] एवम्भूतः स "इन्द्रः" क्षिप्रम् "ईशानः" सर्वस्य जगतः स्वामी भवति॥ ९॥ १५७

---

I,II,III वैकङ्कुभानि त्रीणि।

(१)—"दाश्वान् साकान् मीढ्वांश्च (६,१,१२)।

(२)—"अङ्गेति क्षिप्रनामाञ्चितमेवाङ्कितं भवति"-इति नि० नै०५,१७।

(३)—'स्कु, आवरणे (स्वा०उ०)'-इति स्कुनोते रूपम्।

अथ दशमी।

विश्वमना ऋषिः ।

१ २ ३१ २ ३ १२ २२ ३ १ २
सखाय आशिषामहे* ब्रह्मेन्द्राय वज्रिणे ।

३ २३२३ १ २ ३ १ २
स्तुष ऊषुवो नृतमाय धृष्णवे ॥ १० ॥ १५८

॥ पञ्चम-दशति ॥*

५ र र ३ र ४ ५ ३ र ४
I सखायआहाउ । शिषा३महेहाउ । ब्रह्मा३इन्द्रा-

५ १ र र र १ ०
हाउ । यवज्रिणाइ । स्तूषऊषू२हाइ । वोनृतमार-

२ १ १ १ ५ र र २
३हा । यधा२३ । ष्णाया२वा२३४औहोवा । ऊ२३-

५
४पा ॥ १५ ॥

४ ५र ४र ५ र ४ ५ र र
II सखायआशिषाम । हाइ । ब्रह्मेन्द्रायवज्रि-

* "आशिषामहि"-इति ऋग्वेदस्य ।

१५८ ऋग्वेदस्य ६,२,१५,१ ।

* ॥ इति चतुर्थः प्रपाठकः ॥

४ ५ १— २ २ १ २ २ २ ३
णोवा। आईतोरवा२। होवा२हा३। हाइ। स्तुष-
२र १ ५ १ २ ५ १ २ २
ऊषू२३४। वोहोहाइ। नाम्नो२मा३। होवा२हा३।
२ १ १ ३ ५र र ३ १ १ १ १
हा। यधा२३। षण्यो२वा२३४औहोवा। ई२३४५॥१६॥

३ ५र २र ४ ४र २ ४ र
III सा४खायः। आशिषा। मा२हाइ। ब्रह्मे-
५र ४ २ र ३र २ २ ३
न्द्रायवज्रिणो। हाइ। स्तुषऊषुवो२नाम्नोमा। या२-
५ २ १ र १ २ ३ ५ २
३४धृ। हा२हाइ। वोनाम्नोमा। या२३४धृ। हा-
१ १ ऽ २ २ ३र र १ ऽ
२हा। षण्वा२इ। औ२हो। औहोवा। त्मघा२इ।
२ २ ३र र २ ५र र २ ५
औ२हो। औहोवा३४। औहोवा। ऊ२२३४पा
॥१७॥१५८॥

"सखायः" मित्रभूता हे ऋत्विजः! "वज्रिणे" वज्रहस्तायेन्द्राय "ब्रह्म" स्तोत्रम् "आशिषामहे" वयमाशास्महे च [यद्वा। ब्रह्म अस्माभि र्दीयमानं हवीरूपमन्नम् आशास्महे। शास्य अनु-

---

I, II, III औच्चो नियाननानि त्रीणि।

शिष्टौ (अदा०प०)। व्यत्ययेनात्मनेपदम्(३,१,८५)। अतएव "आशिषामहि"-इति बह्वृचा आमनन्ति) तत्र "वः" सर्वेषा मेवं युष्माकमर्थाय "नृतमाय" सर्वेषां नेतृतमाय। यद्वा सङ्ग्रामे आयुधानां नेतृतमाय "धृष्णवे" शत्रूणां धर्षण-शीलाय तस्मै इन्द्राय अहमेव "सुस्तुषे" सुष्ठु स्तौमि(१) ॥ १० ॥ १५८

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

---

अथ पञ्चमे खण्डे—

सैषा प्रथमा।

प्रगाथ ऋषिः।

१ २र २र ३ १ २ ३ २ ३ १ २
गृणेतदिन्द्रतेशवउपमान्देवतातये*।

३र २र३ १ र २र
यद्धंऽसिवृत्रमोजसाशचीपते ॥ १ ॥ १५९

---

* "उपमं भद्रा इन्द्रस्य रातयः"-इति ऋग्वेदीय-पाठः।

---

(१)—ऋचि "उषु"-इति "सुञः (८,३,१०७)"-इति षत्वं रूपम्।

१५९ ऋग्वेदस्य ६,४,४०(२३),२।

४ ५ ३ १ ४ ५ १
I हाउगृणाइ। तदा३इन्द्रातोइ। शवा२३१२३ः।

२ ४ ५ ११र २ ३ २
उपा३मान्देवतातयाइ। यद्धꣳसा२३इवाँ। त्रमो३-

४ ५ ४ ५ १ २र २ र २ ५र र
जासा। शचौ। पते। औ२३होवा३४। औहोवा।

२ ५
ह्यु२३४भौः॥ १८॥

५ र ३ २ ३र ४ र ४ १
II गृणे। तदा३४। औहोपइन्द्रतेशवाः। उप-

र र २ १र २ ३ २ ३ २ र १
मान्देवताता२३या३४इ। यद्धा३४ꣳसिवा। त्रमोजसा।

२ ४र ५ १ ११११
शा३चीप। ता२३४५इ॥ १९॥

४ र र र ५ १ र ५र ५र
III गृणेतदौहोपइन्द्रतेशवाः। उपमान्दे२वतार-

र १ २र र १र २ १ २ १
तये। उपमान्देवताता२३याइ। यद्धꣳसिवृ। त्रमो-

I, प्रयस्वत्, II, आद्यावम्, III प्रयस्वत्।

अथ द्वितीया।

भरद्वाज ऋषिः।

२ ३ १र २र२ २ ३ १ २ ३ १ २
यस्यत्यच्छम्बरंमदेदिवोदासायरन्धयन्*।

२ ५ २ ५ २
२३जसाउ। वा३। शा२३४ची। पा२३४ता३। वो-

२३४५इ। डा॥२०॥१५९

हे "इन्द्र!" "ते" तव "तच्छवो" बलं "उपमा" अन्तिकं(१) "देवतातये(२)" यजमानाय यज्ञार्थं वा(३) "गृणे" स्तुवे। "यद्" यस्मात् हे "शचीपते!(४)" "वृत्रम्(५)" "ओजसा" बलेन "हंसि" [तस्मात् ते शवो गृण इति सम्बन्धः॥१॥१५९

---

* "रन्धयः"-इति ऋग्वेदीयः पाठः।

---

(१)—"उपमा"-इत्यन्तिक-नामसु पठितं (नैघण्टुकम् २,१६)।—'सर्वबलानामुपमा-भूतम् अत्यन्तोत्कृष्टमित्यर्थः'-इति वि०।

(२)—"सर्वदेवात् तातिल् (४,४,१४२)"-इति स्वार्थे तातिलि रूपम्।

(३)—"देवताता"-इति यज्ञनामसु दशमं नैघण्टुकम् (३,१७)।

(४)—'शचीति कर्म-नाम (नै०२,१,२३) तस्य पतिः शचीपतिः, तस्य सम्बोधनं [हे शचीपते! ज्योतिष्टोमादि-कर्मणामधिपति-भूतइत्यर्थः'-इति वि०।

(५)—'वृत्रं मेघम्'-इति वि०। "वृत्र"-इति मेघनामसु अष्टाविंशतितमं नैघण्टु-कम् (१,१०)।

३ १र　२र　३ १र　२र
अयꣳससोमइन्द्रतेसुतःपिब ॥ २ ॥ १६०

३ २　३ २　५　२ २
I यस्याऽ३१। त्यच्छाऽ३१२३४म्। बरम्। माऽ३दाइ।

३ २　३र २　५　२ २　३ २
दिवोऽ३१। दासाऽ३१२३४। यर। धाऽ३यान्। अया-

२२　५　२ २　३ २
ऽ३१म्। ससोऽ३१२३४। मई। द्राऽ३ताइ। सुताऽ३१ः।

३ २　२　५　३　५
पिबाऽ३। औऽ२३४वा। ऊऽ२३४पा ॥ २१ ॥

४　४　१ र र र
II यस्यत्यच्छाऽ५म्बरम्मदाइ। दिवोदासायरन्धयन्।

० २　४ ५　२ २　१ ३　५र र
आयꣳससोऽ३। मइ। द्रताऽ३इ। सुताऽ२३४औहोवा।

३ ५
पीऽ२३४वा ॥ २२ ॥

५ २　४ ५ ४ ५　१ ८ र र १र २ १
III यस्यत्याऽ३च्छाम्बरम्मदाइ। दिवोऽ२दासायरन्धयन्।

---

१६० ऋग्वेदस्य ४,७,१५,१।

७ २ ४५ ३२ १२१ १
आयꣳससो३। मइ। इता३इ। सूतआ२३ः। पा

२ ५२ २ ३ ५
२इबा२३४औहोवा। इ२३४ती॥ २३॥

२ ५ २ ३ ४ ५ ५ २ २
IV या४स्यत्यत्। हाइ। शम्बरम्मदा६ए। दिवो-

२ २ २ ४ ५ ३२ ५२
दासायरन्धयन्नयाꣳसा३सो। मई। इता३४। औ-

२ २ ५ ३
होवा। सू२३४ताः। पिबो२३४५इ। डा॥ २४॥ १६०

हे "इन्द्र!" "त्वं" "यस्य" सोमस्य "मदे" पानेन जनिते हर्षे सति "शम्बरम्" असुरं(१) "दिवोदासाय" राज्ञे "रन्धयन्" [रध हिंसा-संराद्धयोः (दि०प०)] हन्ता भवसि [त्यदिति क्रिया विशेषणं(२)] तत् प्रसिद्धं यथा भवति तथा हे "इन्द्र!" "सः" "अयं" "सोमः" "ते" त्वदर्थं "सुतः" अभिषुतः। अत एव(३)॥ २॥ १६०

---

I, II, III, IV दैवोदासानि चत्वारि।

(१)—"शम्बरम्"-इति निघण्टौ मेघ-नामसु (१,१०)—उदक-नामसु (१,१२)—बल-नामसु च (२,९) पठितम्। असुरमित्यपि मेघ-नामसु (१,१०) दृश्यते तत्रैव।

(२)—'त्यच्छब्दस्तच्छब्द पर्यायः * * * तं शम्बरम्'-इति वि०।

अथ तृतीया।

नृमेधऋषिः।

१ २ ३ १ २
एन्द्रनोगधिप्रिय*सत्राजिदगोह्य†।
१ २उ ३ १ २ ३१र २र ३ २
गिरिर्नविश्वतःपृथुःपतिर्द्दिवः॥ ३ ॥ १६१

४र ५ ५ २ १ २ १ र २ १र
I एन्द्रनाः। गधिप्रा२३या। सात्राजित्। अगो-
२ ३ १ ३ २ १ १ १
ह्या२३या३४। गिरा३४इर्नवाइ। श्वताःपार्थूइ। पा।
१ ५र र ३ ५
रतार३४औहोवा। दीर३४वाः॥ २५॥
४ ४ १ र २ १ २र
II एन्द्रनो५गधिप्राया। सात्राजित्। अगोह्यायौ।

---

* "प्रियः"-इति,
† "दगोह्यः"-इति, } ऋग्वेदीयाः पाठाः।
‡ "विश्वतस्पृथुः"-इति च,

---

१६१ उत्तरार्चिकस्य ५,१,१९,१ = ऋग्वेदस्य ६,७,१,४ = ऊहे ५,१२।

I,II साम्वर्त्ते द्वे।

अथ चतुर्थी ।

पर्वतऋषिः ।

१२ ३१ २३ १२ ३१२
यइन्द्रसोमपातमोमदःशविष्ठचेतति ।

३२ ३२ ३२३ १२
येनाहꣳसिन्याऽत्रिणꣳन्तमीमहे ॥ ४ ॥ १६२

२ १ २र २ १ १
होइवा । गिराइर्नवौ । होइवा । श्वतारइः । पाइ-

३ ५र ५ १२३२
र्थूइ२३४ओहोवा । पतिर्दिवा१ः ॥ २६ ॥ १६१ ॥

हे "प्रिय!" सर्वेषां प्रियतम! हे "सत्राजित्" महतां शत्रूणां जेतः! हे "अगोह्य" तिरस्कर्त्तुमशक्य इन्द्र! "गिरिर्न" पर्वत इव "विश्वतः" सर्वतः "पृथुः" पृथुतमः "दिवः" स्वर्गस्य "पतिः" ईश्वरस्त्वं "नो" ऽस्मान् "आगधि"(१) आगच्छ। ॥ ३ ॥ १६१

---

* "न्यऽत्रिणं"-इति ऋग्वेदीयः पाठः ।

---

१६२ ऋग्वेदस्य ६,१,१,१ ।

(१)—"अहितस्य (६,४,१०३)"-इति वेधिः ।

४ ५   १ २   ४ ५   २ १   २ १   २ र
I यइन्द्रसो। मापा३तामाः। मदाःशवाइ। ष्ठचे-
१   २ ४ ५   २ १   २ ४र ५
तताइ। याइना३ह्वाऽसी। नियत्रिणाम्। ता३मीम।
३ १ १ १ १
ह्वा२३४५इ ॥ २७ ॥ १६२ ॥

हे "इन्द्र!" "यः" त्वं "सोमपातमः" अतिशयेन सोमस्य पाता हे "शविष्ठ" बलवत्तम! [शव इति बलनाम (नि०२,९,३) तस्माद्विमत्वा(१) दातिशयनिक इष्टन् (५,३,५५) विन्मतोर्लुक् टि-लोपः (६,४,१५५)] हे ईदृशेन्द्र! तस्य तव सोम-पान-जनितो यो "मदः" "चेतति" सम्यग् जानाति [वृत्रवधादीनि कार्य्याणि कर्त्तुं। य इत्यस्य चेततीत्यनेन सम्बन्धाद् "यद्वृत्तान्नित्यम्(८,१,६६)" -इति न निहन्यते। अथवैतदेक मेव वाक्यम्—हे बलवत्तमेन्द्र! सोमपातमः सोमस्य पातृतमो यस्त्वं मदः सोमैर्मादयितव्यस्तर्पयि-तव्यः सन् चेतति। पुरुष-व्यत्ययः(३,१,८५) चेतसि सम्यग् जाना-सि। "मदोनुपसर्गे (३,३,६६)"-इति मदेः कर्मण्यप् प्रत्ययः] "येन" सोम-पान-जनितेन मदेन "अत्रिणम्" अत्तारं राक्षसादिकं "निहंसि" निहिनस्सि निकृष्टां हिंसां प्रापयसि "तं" मदं तादृक्-

I आचारम्।

(१)—प्राश्वमिक(५,२,१२२)-बहुल-वचनान्मलर्थे विनिः।

अथ पञ्चमी।

इरिमिठ* ऋषिः।

२ १र २र १ १उ ३ १ २ ३ १ २ ३ १ २
तुचेतुनाय† तत्सुनोद्राघीयआयुर्जीवसे।

१ २ ३ १ २
आदित्यासःसमन्यसः‡कृणोतन ॥ ५ ॥ १६३

४ ३र४ ५र २र ३ ५ २ ३ ५
I तुचेतुना। यता३२त्सर३४ना:। द्राघीया२३४यू:।

मद्देपेतं त्वां वा "ईमहे" [याच्ञा-कर्मायं(नि०३,१९,१] याचामहे [यद्वा। ई गतौ दैवादिकः(प०)। छान्दसो विकरणस्य लुक् (२,४,७३)। ईयामहे उपगच्छामः स्तुतिभिः सम्भजामहे इत्यर्थः ॥ ४ ॥ १६२

---

* 'इतिमिठि'-इति वि० पाठः।

† "तुचे तनाय" } इमौ ऋग्वेदीयौ पाठौ।
‡ "सुमन्यसः" }

---

१६३ ऋग्वेदस्य ६,१,२८,२।

I दीर्घायुष्यम्।

२र १ᐧ　१　१　१ २ १　३
जीवासा२इ । आदीरत्यासा२ः । समहसा:२ । कृ-
२ ४　३ १ १ १ १
णोउता५ । नाउ३४५ ॥ २८ ॥ १६३ ॥

हे "सुमहसा:" शोभन-तेजस्का:(१) हे "आदित्यास:" अदितेः पुत्राः! "नो" ऽस्माकं "तुचे" पुत्राय(२) "तुनाय" [तनोतेर्लुक्(३)। तनोति कुलमिति तुनः पौत्रः। उकारोपजनश्छान्दसः(४)। अत एव बह्वृचा "तनाय"-इति पठन्ति। तस्मै तुनाय] पौत्राय च(५) "जीवसे(६)" जीवनाय "द्राघीयो" दीर्घतमं तत् प्रसिद्धम् "आयुः" जीवितं "सु" सुष्ठु "कृणोतन" कुरुत ॥ ५ ॥ १६३

---

(१)—विवरण-नये महस इति मह पूजायामित्यस्य रूपम्। अतएवोक्तं तत्र 'सुमहसः सुपूजाः कृणोत् कुरुतेत्यर्थः'-इति।

(२) —"तुक्"-इत्यपत्य नामसु प्रथमं नैघण्टुकम् (२,२)।

(३)—लुकि किल "तनिपत्योश्छन्दसि (६,४,९९)"-इति उपधा-लोपः फलम् अन-न्तरञ्च तत्र उकारोपजनः।

(४)—उपजनोऽत्र वर्ण-वृद्धिः, आगम इति भावः। तत्र च अत्ययवचनं शरणम्।

(५)—'तनायेति धन-नाम (नै०२,१०,१९)। तस्मादियं तादर्थ्ये चतुर्थी, धनस्य चार्थायेत्यर्थः'-इति वि०।

(६)—'जीवसे" इति "तुमर्थे सेऽसे (३,४,९)" नित्यादिना सिद्धम्।

अथ षष्ठी।

विश्वमना ऋषिः।

३ १र २र ३ १२ २१२
वेत्थाहिनिर्ऋतीनांवज्रहस्तपरिवृजम्।
१२ ३ १ २३१२
अहरहःशुन्ध्युःपरिपदामिव ॥ ६ ॥ १६४

४र५र ४ ५ र ४ १ २ १
I वेत्थाहिनिर्ऋतीनाम्। वाज्रहस्तपरिवृ। जाम्।
२ १ २ १ २ १२ ४
अहर। हाः। शुन्ध्युःपरि। पदा३मापुइ३पूना ६५६
॥ २९ ॥ १६४

इदानीं ऋषिरिन्द्रं सम्बोध्याह—हे "वज्रहस्त" वज्रयुक्त-हस्तेन्द्र! निर्ऋतीनाम्" उपद्रवकारिणां रक्षसां(१) परिवर्जनं (हिरवधारणे) त्वमेव "वेत्थ" जानीषे। तत्र दृष्टान्तः—अह-रहरित्यादिः। "शुन्ध्युः" (अस्मिन्नुदिते सति ब्राह्मणा आत्मीयं कर्म्म कृत्वा शुद्धा भवन्तीति शोधन-हेतुत्वाच्छुन्ध्युरादित्यः) आ-दित्यः "परिपदामिव" परितः पद्यमानानां यजमानानां [यद्वा।

१६४ ऋग्वेदस्य ६, २, १९, २।

I शुन्ध्युः साम।

(१)—'निर्ऋतिर्मृत्यु-देवता, तस्याः स्वभूतानां प्रवृत्तीनां मारणात्मिकानाम्'-इति वि०।

अथ सप्तमी ।

इरिमिठ ऋषिः ।

१र २र३ २ ३ २ ३ १ २   ३ २
अपामीवामप स्त्रिधमपसेधत दुर्मतिम् ।
१ २   ३ १ २ ३ १   २
आदित्यासो युयोतना नो अꣳहसः ॥ ७ ॥ १६५

४ र ४र र ४   १   र २ १
I अपामीवामपा । स्त्रिधाम् । अपसेधतदुर्मा२३-
२ १ १ १र र २ १ ५
तीम् । आदी२त्यासा२ः । युयोतन । नओवा३ओ२३४वा ।
४ ५
हा५सो६हाइ ॥ ३० ॥ १६५ ॥

परितः पततां पक्षिणां वर्जनं स्व-स्थान-त्यागम्] "अहरहः" प्रतिदिनं यथा वेति ।

उदिते सूर्ये पक्षिणः स्वस्थानं परित्यज्य सर्वतो गच्छन्ति खलु। एवं त्वयोन्द्रे स्वबलेन प्रकाशमाने सति शत्रवः स्वपुराणि त्यक्त्वा पलायन्त इत्यर्थः ॥ ६ ॥ १६४

हे "आदित्यासः" आदित्याः! "अमीवां" रोगम् "अपसेधत" अस्मत्तोपगमयत। "स्त्रिधं" बाधकं शत्रुं च अपसेधत ।

---

१६५ ऋग्वेदस्य ६,१,२६,५ ।

I अपामीवम् ।

अथाष्टमी।

वसिष्ठऋषिः।

२ ३ १ २ ३ १ २ ३ १ २ ३१ २ ३ १ २
पिबासुसोममिन्द्रमन्दतुत्वायन्तेसुषावहर्यश्वाद्रिः।
३ २ ३ १ २ ३ १ २ ३ १ १ २
सोतुर्बाहुभ्याꣳसुयतोनार्वा॥ ८॥ १९६

॥ प्रथम-दशति॥

५ ४ १र १र र
I पिबा। सोममिन्द्रमन्दतुत्वा२। यन्तेसुषावह-
२ १ २ १र २ २
रिया। श्वा२३द्रीः। सो२३तूः। बाहुभी३या३म्।
१ २ ५र र २ १र १११
सुयो२ता२३४औहोवा। ए३। नार्वा२३४५॥ ३१॥

"दुर्मतिम्" अस्माकं दुःखस्य मन्तारञ्च अपसेधत। अपिच हे आदित्याः! "नो" ऽस्मान् "अंहसः" पापात् "युयोतन"(१) पृथक्कुरुत॥ ७॥ १९५

---

१९६ उत्तरार्चिकस्य ३,१,१३,१ ऋग्वेदस्य ५,६,५,१= आरण्ये १,२,२० —११,२१ —३,२५= ऊहे २२,२,१ —३= ऊह्ये १,१०—५,२,३।

I वैराजम्।

(१)—"तप्तनप्तनथनाश्च (७,१,४५)" इति तस्य तनादेशे रूपम्।

५ ५ १ २ १ २
II हाउपिबा । सोममिन्द्र । मा । दतुत्वा३ ।
१ २ १२ २ २
दतुत्वा । यन्ते सुषावहरिया । श्वा१द्री२ः । श्वाद्री२ः ।
२ १ २ २ १ २ १ ३
सोतुर्बाहुभ्याम् । सुयता३ः । सुयता३ः । नार्वा२३४
५२ २ ३१ १ १ १
औहोवा । ई२३४५ ॥ ३२ ॥ १६६ ॥

हे "इन्द्र !" "सोमं" "पिब" । सोमः त्वां "मन्दतु" मादयतु हे "हर्यश्व !" "ते" त्वदर्थं "सोतुः" अभिषवकर्त्तुः "बाहुभ्याम् अर्वा न" रश्मिभ्यामश्वइव "सुयतः" -सुष्ठु परिगृहीतः(१) "अद्रिः"(२) ग्रावायं "सोमं" "सुषाव" ॥ ८ ॥ १६६

इति श्रीसायणाचार्य्य-विरचिते माधवीये-सामवेदार्थप्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्य पञ्चम-खण्डः ॥ ५॥

---

II महादैर्घतमसम् ।

(१)—'कथं पिबामि ? उच्यते—सुयतः सुबद्धः'-इति वि० ।

(२)—'अद्रिः प्रथमैकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम्, अद्रिभिः अधिषवभिरित्यर्थः'-इति वि० ।

अथ षष्ठे खण्डे—

सैषा प्रथमा।

सौभरिर्ऋषिः।

३ २ ३ १र २र ३ १ २ ३ १ २
अभ्रातृव्योअनात्वमनापिरिन्द्रजनुषासनादसि।

३ १२ ३१ २
युधेदापित्वमिच्छसे॥ १ ॥ १६७

४ र र ४ २ १र २ १
I अभ्रातृव्योऽ५अनातुवाम्। अनापिराइन्द्रा२।

१ ३ २ ३ ५ १ १र,र
ज। नुषा२। सना३४५त्। आ२३४सी। युधेदा२-

१ २र ३ २
पित्वमिच्छसे। युधा१॥ ३३ ॥ १६७ ॥

हे "इन्द्र !" त्वं "जनुषा" जन्मनैव "अभ्रातृव्यः" ["व्यन् सपत्ने (४,१,१४५)"-इति व्यन् प्रत्ययः) सपत्न-रहितः "अना" अनेतृकः ["ऋतश्छन्दसि (५,४,१५८)"-इति कपः प्रतिषेधः] अनियन्तृक इत्यर्थः। "अनापि" बन्धु-वर्जितश्च "सनादसि" चिरादेव भ्रातृव्यादि-वर्जितोऽसि। यत्र त्वम् "आपित्वं" बान्धवम्(१) "इच्छसे"

---

१६७ उत्तरार्चिकस्य६,२,४,१=ऋग्वेदस्य ६,२,३,४= आरण्ये२,१६=ऊहे७,१०।

I अभ्रातृव्यम्।

(१)—'ज्ञातित्वम्'-इति वि०।

अथ द्वितीया ।

सौभरिर्ऋषिः ।

१ २ ३ १ २ ३ १र २र ३ २ ३ १ २
योनइदमिदंपुराप्रवस्यआनिनायतमुवस्तुषे ।
१ २ ३ १ २ ३ १ २
सखायइन्द्रमूतये ॥ २ ॥ १६८

४र ५ २ १ २ १
I योनोवाउ । इदाम् । इदंपुरा२३वाउ । प्रवा ।
२ १ र २
प्रवस्यआ२३वाइ । निना । निनायतमुवा२३वाउ ।
१ र २ १र २
स्तुषाइ । सखायआ२३वाइ । द्रमूता२३या३४३इ ।
१
ओ२३४५इ । डा ॥ ३४ ॥

५र ४ २ ३ ४ ५ १र २ २ २ १
II योना३इदमिदंपुरा । योनइदमिदा१०पू३रा । प्र-
र २ ४ २ ३ ५ १ २ ४
वस्यआनिना । यता३मू३वस्तूषाइ । निना । यता३मू-

इच्छसि तत्र "युधेत्"-युद्धेनैव(१) युद्धं कुर्वन्नेव स्तोतृणामर्थाय सखा भवसीति ॥ १ ॥ १६७

---

१६८ ऋग्वेदस्य ६,२,२,४ ।

I,II ग्रामगेये द्वे ।

(१)—इच्छन्द इव एवार्थः ।

अथ तृतीया।

सौभरिर्ऋषिः।

१ २३ १ २ ३१२ ३१ २
आगन्तामारिषण्यतप्रस्थावानोमापस्थात*समन्यवः।

३१ २
दृढाचिद्यमयिष्णवः†॥ ३ ॥ १६९

२ १ ५ २ १ १ २ ४
इवस्तुषाइ। सखाया २ः। आ२३इ। इमूइतापुयाइ-

पुईइ ॥ ३५ ॥ * १६८

"सखायः" समान-ख्याना हे ऋत्विग्यजमानाः! "यः" इन्द्रः "पुरा" पूर्वम् "इदम् इदम्" दर्शनीयतया विद्यमानं "वस्यः" वसीयः (वसोरीयसुनीकारलोपश्छान्दसः) प्रशस्तं वसुनोऽस्मान् "प्राणिनाय" प्रकर्षेणानीतवान्। "तमु" तमेव धनस्य नेतारम् इन्द्रं "वो" युष्माकं धन-लाभार्थम् "ऊतये" रक्षणाय च "स्तुषे" सौभरि रहं स्तौमि ॥ २ ॥ १६८

---

* "स्थाता"-इति, † "स्थिराचिन्नमयिष्णवः"-इति च ऋ०।

---

१६९ ऋग्वेदस्य ६,१,३६,१।

---

* ॥ इति ग्रामे गेये दशमः प्रपाठकः ॥

४ऱ ५ ४ २र १ २ १ र
I ओम् ॥ आगन्ता । मारिषण्या२३ता । प्रास्था-

२र र १र २र १ ७ १ २ २ ४ ५
वानोमापस्थात् । सामन्यावा२ः । हृढाचीइ्या३ । मयोवा ।

४ ५
ष्णाधूवोईहाइ ॥ १ ॥ १६९

हे "प्रस्थावानः" प्रस्थातारः प्रगन्तारो(१) "मरुतः" ! "आगन्त" अस्मानागच्छन्त । "मारिषण्यत"(२) अनागमनेन नोऽस्मान्मा हिंसिषत । हे "समन्यवः" समान-तेजस्काः समान क्रोधाः ! वा "हृढ़ाचित्(३)" हृढ़ान्यपि पर्वतादीनि हे "यमयिष्णावः" नियमयितृत्वशीलाः ! नियमयितारः ! "मापस्थात" अस्मत्तोन्यत्र मातिष्ठत अस्मास्वेवावतिष्ठध्व-मित्यर्थः ॥ २ ॥ १६९

---

I बृहत्कम् ।

(१)—'शत्रूणामुपरि-युद्धार्थं गन्तार इत्यर्थः'-इति वि० ।

(२)—"दुरस्युर्द्विनास्युर्वं, षण्यतिरिषण्यति (७,४,३६)"-इति सिद्दम् ।

(३)—इह चिच्छब्दोऽप्यर्थः । "चिदित्येषोऽनेककर्मा"-इत्यादि नै०१,४ ।

अथ चतुर्थी ।

सौभरिर्ऋषिः ।

१ २ ३ १उ ३ १ २ ३ १ २ ३ १ २
आयाह्यमिन्दवे*श्वपतेगोपतउर्वरापते ।

१ २
सोमꣳसोमपते पिब ॥ ४ ॥ १७०

४र ५र ४ २ १ र २ १
I आयाही । अयमिन्दवे । श्वपा२३ताइ । गोप-

२ १ २ ३र २ १र
तउ । वीरा१पाता२३४इ । सोमा३म् । सोमा२३ ।

१ ३ ५र र २ ५
पा२ता२३४औहोवा । पौ२३४वा ॥ २ ॥

४र ५र ४ २ १ २ २ १ २र १र
II आयाहिया । या३माइन्दा३वे । आश्वपतेगो-

२र १ ७ १ २ २ १
पते । ऊ । वरा२३हा३इ । पा३ताइ । सो२३४मꣳ

---

* "याहीमइन्दवो"-इति ऋग्वेदीय-पाठः ।

---

१७० ऋग्वेदस्य ६,२,१,३ ।

अथ पञ्चमी।

सौभरिर्ऋषिः*।

१ २    ३ २ ३ १२ २३३ १ २
त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि।

५ १ २ २ १ ऽ ५र
हाइ। सो। म। पते३हा३इ। पा२३४इवा। एहि-
५ ४
या६हा। हो५इ। डा॥ ३॥

५र र ५ २ १ २ र
III आया३ह्यमिन्दा६वाइ। अश्वापा१ता २इ। गो
२ १ ३ ४ १ २ २
पाताऊ३। वरा२पा२३४ताइ। सोम९सोमा३१। प-
१ २ १ ५ २ ५ ४ ५
ताइ। पिबा३ओ२३४वा। ऊ२३४पा। ऊपा॥ ४॥ १७०

"अश्वपते" अश्वानां स्वामिन्! "गोपते" गवां पालयितः "उर्वरापते" सर्व-शस्याढ्या भूमिरुर्वरा तस्याः पते हे इन्द्र! "इन्द्वे" दीप्ताय तुभ्यम् (अयं सोमोभिषुत इति शेषः) तस्मात् "आयाहि" सोमं प्रत्यागच्छ, आगत्य "सोमपते" हे इन्द्र! "सोमं" "पिब"॥ ४॥ १७०

---

* "प्रयोगोनाम ऋषिः"-इति वि०।

---

I,II,III सौधवसानि त्रीणि।

३ १२ २२ ३१ २
सं᳚स्थेजनस्यगोमतः ॥ ५ ॥ १७१

५ २ १ २ २ १ ०
I त्वयाह्स्वीत्। यूजावयम्। प्रातिश्वासा२।

१ २ १ २ ३ २ १ १
तंवृषभ। ब्रुवी१माहा२३४इ। सं᳚स्था२इ। जानस्य-

१ ५ ३ ५
गो२३४वा। मा२३४ताः ॥५ ॥१७१

"वृषभ" वर्षितः! हे इन्द्र! "गोमतः" गवादि-युक्तस्य जनस्य "संस्थे" स्थाने युद्धे(१) "श्वसन्तम्" अस्मान् प्रति क्रोधातिशयेन श्वास-कारिणं शत्रुं "युजा"(२) सहायेन "त्वया ह स्वित्" त्वयैव खलु(३) वयं "प्रति ब्रुवीमहि" प्रतिवचनं कुर्मः निराकरिष्यामइत्यर्थः ॥ ५ ॥ १७१

---

१७१ ऋग्वेदस्य ६,२,३,१ = यजुर्वेदस्य ३१,६ ।

I धेनुसाम।

(१)—'सन्तिष्ठन्ते यत्र योद्धारः स संस्थः सङ्ग्रामः, तस्मिन् संस्थे'-इति वि०।

(२)—युज्यत इति युक् सहायः, तेन युजा।

(३)—स्विदर्थः खल्विति। 'स्विदिति-पदपूरणः' इति वि०।

अथ षष्ठी* ।

१ २　　　　　　　　　　　　क२र २ ३१ २　 १ २
गावश्चिद्घासमन्यवःसजात्येनमरुतः†सबन्धवः ।

३ १ २　३ १ २ ३ १
रिहते‡ककुभोमिथः ॥ ६ ॥ १७२

५र　　र　　५　　　　　२ र १र
I गावश्चिद्घासाईमन्यवाः । सजात्येनमरुतःसबन्ध-

१　　　२ १ र　२ १　　१　　२ ४ ५
वार३होइ । रिहतेकाकू३भो । मिथा । औ३होवा ।

४
होपुइ । डा ॥ ६ ॥ १७२

"समन्यवः" समान-तेजस्काः-समान-क्रोधा वा हे मरुतः ! "गावश्चित्" गावश्च युष्मन्मातृभूताः(१) "सजात्येन" समान-जाति-

---

* 'मारुतीयम्‌ण् । सौभरेरार्षम्'-इति वि० ।
† "मरुतः"-इति ।　　　‡ "रिहते"-इति च ऋग्वेदे स्वरभेदेन पठ्यते ।

---

१७२ ऋग्वेदस्य ६,१,४०,१ ।

I सवेश्मीयम् ।

(१)—'गौ शब्देनात्र आदित्यरश्मय उच्यन्ते । चिच्छब्द उपमायाम् । आदित्यरश्मयइव, * * *,आदित्यरश्मय इव सर्वे सदीप्ता इत्यर्थः'-इति वि० । "गावः"-इति रश्मिनामसु तृतीयं नैघण्टुकम् (१,५) ।

अथ सप्तमी ।

द्वयोर्नृमेधऋषिः ।

१ २-३१ २३१२ ३१ २
त्वन्नइन्द्राभरओजो*नृम्णᳬंशतक्रतोविचर्षणे ।

त्वेन एकस्माद्भजत इति(२) एवं "सबन्धवः" समान-बन्धुकाः सत्यः "ककुभो" दिशः(३) प्राच्यादि-दिग्भागान् प्राप्य "मिथः" परस्परं "रिहते" लिहन्ति (घेति पूरकः ॥ ६ ॥ १७२

---

* "नृमेधस आर्षम्"-इति वि० ।

† "भरँओजो"-इति ऋग्वेदीय-पाठः, सायणीयोत्तर-भाष्ये च ।

---

(२)—'सर्वेषां कथं समानजातित्वम् ? एकस्मात् पृश्नेः सकाशाज्जायमानत्वात्'-इति वि० ।

(३)—'ककुभः प्रधानभूताः, आदित्यरश्मयः, * * *, अथवा ककुभो दिशः, दिक्-शब्देनात्र दिग्वासिनो यजमानालक्ष्यन्ते, तान् आस्वादयन्ति उपजीवन्तीत्यर्थः । कथमुपजीवन्ति ? उच्यते—मिथः सहभूताइत्यर्थः । अथवा गाव एव समन्यवो दोग्ध्र्यः, सजात्यः सपत्न्यः पुत्र-पौत्र-भ्रात्रादि-सहिताः'-इति वि० ।

(४)—अत्र विवरणकृत्—'आ-इत्युपसर्गश्रुते भरेत्याख्यात मनुकृष्यते, आभर । वीरं पुत्रम् । कीदृशं पुत्रम् ? पृतनाषहं पृतना इति सङ्ग्राम-नाम, तस्मिन् शत्रूणा मभिभवितार मित्यर्थः'-इति ।

३ १ २ ३ १ २
आवीरंपृतनासहम्* ॥ ७ ॥ १७३

४ ५ ४   २ १र   २   १ र २   २
I त्वन्नइ । द्रआभार२३रा । ओजोनृम्णाम् । शात-

२   १ २ ३   ५   १ र २ २   २ १
क्रता३उ । वीचर्षा२३४णाइ । आवीरंपा२ह्वा२ । तार-

३   ५र र   २   ५
ना२३४औ होवा । सा२३४हाम् ॥ ७ ॥

४ ५   ४   १र   २   १ र २   १
II त्वन्नइन्द्रा । आभार२३रा । ओजोनृम्णाम् । शात-

२   १ २ ३   ५   २र१र   २   ३ र
क्रता३उ । वीचर्षा२३४णाइ । आवीरा२३म्या । तना-

२ १   ४ ५   ४
सहाम् । औ२३होवा । होपुइ । डा ॥ ८ ॥ १७३

हे "शतक्रतो" बहु-कर्मन् ! "विचर्षणे" विविध-द्रष्टरिन्द्र ! "त्वं" "नो" ऽस्मभ्यम् "ओजो" बलं "नृम्णं" धनञ्च "आ भर"

---

* "पृतनाषहम्"--इति ऋग्वेदीयः पाठः ।

---

१७३ उत्तरार्चिकस्य ४,२,१३,१ = ऋग्वेदस्य ६,७,२,४ = ऊहे ४,१८ ।

I,II आभरे हे ।

अथाष्टमी।

क २र ३ १ २ ३ १ २ ३ १ २ ३ १ २
अधाहीन्द्रगिर्वणउपत्वाकामईमहेसस्टग्महे*।

३ १ ३ १ २ ३ १ २
उद्देवग्मन्त† उदभिः॥ ८॥ १७४

४ ५र ४ २ १ २ १ २र र १र
I अधाहिया। द्रगिर्वा२३णाः। उपत्वाका। मई-

२ १ २ १ १ २
मा२३हाइ। सस्टग्मा२२हाइ। ऊदे२। वग्मा२३ताः।

१ २ ४ ४
उदा२३भाइः। इडा५भीः। हो५इ। डा॥ ८॥

५ र र ५ १ २र र १ २
II अधाहीन्द्रगिर्वाईणाः। ऊपत्वाका। माई१मा-

आहर। "वीरं" वीर्योपेतं "पृतनासहं" सेनानामभिभवितारं त्वाम् "आ" ह्वयामह इति शेषः(४)॥ ७॥ १७३

---

* "कामान्महःसस्टज्महे"-इति ऋग्वेदीय-पाठः।

† "उद्देवयन्त"-इति ऋग्वेदीय-सायणीयोत्तरभाष्ये च।

---

१७४ उत्तरार्चिकस्य १,१,२३,१ = ऋग्वेदस्य ६,७,२,१ = ऊहे १,१७, = १०,२,८।

१ ७ १ २ ४ ५
हा२इ। साह्मभाहा२इ। ऊदे१वाम्मा२३। तन्नोवा।
४ ५
दापूभोई हाइ ॥ १० ॥

५ ८ ८ ५ १ २८ ८ १ २
III अधाहीन्द्रगिर्वणाईए। उपत्वाका। माई१मा-
२ १ १ ३ ५ २ ऽ २ २ २
हा२इ। साह्मा२३४हाइ। उदौ३हो२। वा३हा२।
१ ३ २ ५८ ८ २ १ १ १ १ १
म्मा२। तऊ२४औहोवा। दभी३रे२३४५ ॥ ११ ॥१७४

हे "गीर्वणः" गीर्भिर्वननीयेन्द्र! "अधा हि"(१) सम्प्रति "त्वा" त्वां "कामो" काम्ये निमित्ते। [यद्वा। काम इति सुपां सु(७,१,३९) कामान्(२)] "ईमहे" याचामहे(३)। किञ्च। याचमानाः सन्तः "उपसृज्महे" उप सृजामः स्तुतिभि स्त्वां संयोजयाम इत्यर्थः। तत्र दृष्टान्तमाह—"उदेव" यथो-

---

I.II,III ऐषिराणि त्रीणि।

(१)—'अध इत्ययं पदपूरणः। हीत्ययं हेतौ'-इति वि०।

(२)—'कामः-प्रथमैकवचन मिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्, कामं— कामशब्देनात्र काम्यमानत्वात् धनमुच्यते कामं धनम्'—इति वि०।

(३)—"ईमहे"-इति याञ्चा-कर्मसु प्रथमं नैघण्टुकम् ३,१९।

अथ नवमी।

द्वयोः सौभरिः।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
सीदन्तस्ते वयोयथा*गोश्रीतेमधौमदिरेविवक्षणे।
३ १२ २र
अभित्वामिन्द्रनोनुमः॥ ९॥ १७५

२ ५ र ४ ५र ५ २र१ २र१
I सा३४इ। दन्तस्तेव। योया६था। गोश्राइतेम।
२र १ २ ४५ ३ १ १ १ १ २ १ र
धौमदिराइ। वा३इवक्ष। णा२३४५इ। अभित्वामा-
२ ४ २ ३ १ १ १ १
इन्द्रा३नो३। नू३४५। मा२३४५ः॥ १२॥

दकेन "ग्मन्तो"(४) गच्छतः पुरुषाः "उदभिः" अञ्जलिना उत्-क्षिप्योदकैः समीपस्थान् क्रीड़ार्थं संसृजन्ति तद्वदित्यर्थः।

"ससृजमहे"-इति बह्वृचाः पठन्ति॥८॥ १७४

---

* "यथा"-इति ऋग्वेदीयः; स्वरे भेदः।

---

१७५ ऋग्वेदस्य ६,२,१,५।

(४)—"छन्दस्युभयथा (३,४,११७)"-इति सिद्धम्।

३र ४ ५ र ४ ५　　२ र　　१　　र ५ र४ ५र
II सीदन्तस्ते वयः। यथा३। गो२३४। औतेमधौम-
४ ५ ५　　२ र　　२　　१　　५　　१ २
दिराइ। विवा३। हा३। चा२३४णाइ। अभौ३।
२　　१　　५　　२ २　　१　　ऽ　　५
हो३इ। त्वा२३४मौ। इनो३। नू२३४माः। उ-
५
ह्वा६हाउ। वा॥ १३ ॥ १७५

हे "इन्द्र!" "गोश्रोते" (श्रीञ् पाके। गोर्विकारो दधि पयश्च गोशब्देनोच्यते। तेन) दध्ना पयसा च श्रीते मिश्रिते "मदिरे" मदकरे "विवक्षणे"(१) स्वर्ग-प्रापण-शीले त्वदीये "मधौ" सोमे "सीदन्तो" निवसन्तः। सदने दृष्टान्तः—"वयो-यथा पक्षिणो यथा एकत्र सङ्घीभूय तिष्ठन्ति तद्वत् सीदन्तो वयं "त्वाम्" "अभि" आभिमुख्येन "नोनुमः" पुनः पुनः भृशं वा स्तुमः॥ ८ ॥ १७५

---

I,II सौदन्तीये द्वे।

(१)—'वक्तमिच्छतें'-इति वि०।

अथ दशमी।

३ २ ३ १ २ २ ३उ ३ १२ ३ १ २
वयमुत्वामपूर्व्यस्थूरंनकच्चिद्भरन्तोवस्यवः।
१ २ ३ १ २
वज्रिञ्चित्रꣳ* हवामहे॥ १०॥१७६

॥ द्वितीय-दशति॥

५ २ २र ३ ४र ५ २र १ ७
I वयमुत्वामपूर्विया। स्थूरन्नकच्चिद्भरन्तआवस्यावा
५ ३ २ १ ४ २
२३४ः। वज्रिन्। चित्राइम्। हा२३वा३। मा३४५
५
हो६हाइ॥ १४॥

५ ४ ५ ४र ५ र र ४ ५ ४ ५ २
II वयमुत्वामपूर्व्यस्थूरन्नकच्चिद्भरन्तः। ओवा। हाइ-
१ २र १ २ १ १ १ २ २ ३ २ १ १
हाइ। अवस्यावा२३४५ः। हा३हाइ। वज्रिञ्चित्रा२-

---

* "वाजेचित्र"--इति ऋ० सायणीयोत्तर-भाष्ये च।

---

१७६ उत्तरार्चिकस्य १,१,२२,१ = ऋग्वेदस्य ६,२,१,१ = ऊहे १,१८-२१,१०।

I पक्थसाम। II सौभरम्।

१११ २—२ ३ २ २ ५

३४५म्। हाउहाइ। हवाऽ। मा२३४हाइ। उहु-

५

वाईहाउ। वा॥ १५ ॥१७६

हे "वज्रिन्" वज्र-युक्त! "अपूर्व्य" त्रिषु सवनेषु प्रादुर्भूतत्वादभिनव! "भरन्तः" सोम-लक्षणै रन्नैस्त्वां पोषयन्तो वयं "चित्र" चायनीयं विविधरूपं वा "त्वाम्" त्वामेव "अवस्यवः" अवो रक्षणमात्मन इच्छन्तः सन्तः "हवामहे" त्वामाह्वयामः तत्र दृष्टान्तः—"स्थूरं न"(१) यथा भरन्तो ब्रीह्यादिभिरन्नैः पूरयन्तो जनाः "स्थूरं" स्थूलं गुणाधिकं "कच्चित्" कञ्चिन्मानवं यथा ह्वयन्ति तद्वत् ॥ १० ॥ १७६

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्य षष्ठः खण्डः ॥ ६ ॥

॥ इत्यौष्णिहं काकुभम् ॥

---

स्वादोरष्टादशर्क्षु चरमा नतमित्यसौ।
उपरिष्टाद्बृहत्याम्नाताः सप्तदश पङ्क्तयः(क) ॥

---

(१)—'स्थूरच्छब्दर्द्दीर्घरवचनः'-इति विवरणकारः। अत्र मते "स्थूरन्न"-इति पाठः।

(क)—"स्वादोरित्था"-इति तृतीयदशत्यारभ्य "नतमंहो"-इति चतुर्थदशत्यन्तिमान्ता अष्टादश ऋचः, तत्र "नतम्"-इति असौ अन्तिमा ऋक् उपरिष्टाद्बृहती-

चन्द्रमानतमित्येते वैश्वदेव्यौ(ख) प्रतीत्यसौ।

आश्विनी(ग) तिस्रआग्नेय्यआतेअग्नइधीमहि॥

आग्नीं नाग्नोन्ततमित्येता(घ)महेनोअद्य चौषसी।

सोमी भद्रन्नइत्येषा(च) शिष्टाऐन्द्रउदीरिताः(छ)॥

तत्र सप्तमे खण्डे—

सैषा प्रथमा।

आङ्गिरोगोतमोनामऋषिः सम्परिकीर्त्तितः।

३ २ ३ १ २ ३ २३ १ २ क २र

स्वादोरित्थाविषूवतोमधोः*पिबन्तिगौर्यः।

---

* "मध्वः" इति ऋग्वेदीय-पाठः।

---

छन्दस्का। अपराः सप्तदश ऋचः पंक्तयः पंक्ति-च्छन्दस्काः। इति छन्दः-सङ्केतः।

(ख)—"चन्द्रमा"-इति नवमी, "नतम्"-इति अष्टादशी एते ऋचौ वैश्वदेव्यौ-अनयोः विश्वेदेवा देवताः।

(ग)—"प्रतिप्रियतमं"—असौ दशमी ऋक् आश्विनी अश्वि-देवताका।

(घ)—"आतेअग्नइधीमहि"-इति एकादशी, "अग्निं न"-इति द्वादशी, "अग्निन्तम्"-इति सप्तदशी एताः तिस्र ऋचः आग्नेय्यः।

(ङ)—"महेनो अद्य"-इति त्रयोदशी ऋक् औषसी उषोदेवताका।

(च)—"भद्रं नो"-इति चतुर्द्दशी इयमृक् सौमी सोम-देवताका।

(छ)—शिष्टाः दश ऋचः ऐन्द्राः इन्द्र-देवताकाः उदीरिताः मन्त्रदृष्टिभिरित्यर्थः। -इति दैवत-सङ्केतः।

१र २र ३ १ २३ २ ३ १ २ ३ २ ३ १ ३ १ २ ३ १ २
याइन्द्रेणसयावरीवृष्णामदन्तिशोभथा*वस्वीरनुस्वराज्य-
म् ॥ १ ॥ १७७

४र ३र ४ ३र ४५र ३ १ १ ५र
I स्वादोरित्थाविषू । वताः । मा२३४ । धोःपि-

र ४ ५ १र र २ १र २ १ २र
बन्तिगौ । रियाः । याइन्द्रे ण सयावा२३रीः । वृष्णा-

१ २ १र २ १ २ १ र २
मद । तिशोभा२३था । वस्वाइरा१नू२ । स्वाराजियम् ।

१ २ १
इडा२३भा३४३ । ओ२३४५इ । डा ॥ १६ ॥ १७७

"स्वादोः" स्वादुभूतस्य रस-युक्तस्य "इत्था विषूवतः" इत्थमनेन प्रकारेण सर्वेषु यज्ञेषु व्याप्तियुक्तस्य(१) "मधोः" मधुर-रसस्य सोमस्य ("क्रियाग्रहणं कर्त्तव्यमिति" कर्म्मणः सम्प्रदानत्वा-च्चतुर्थ्यर्थे षष्ठी) एवं विधं सोमं "गौर्य्यो" गौरवर्णा गावः

---

* "शोभसे"-इति च ऋ० ।

---

१७७ उत्तरार्च्चिकस्य ३,२,१५,१ = ऋग्वेदस्य १,६,६,५ = आरण्ये १,२,२१—२,८,१०—३,१५—१७-१८ ।

I साम ।

(१)--विषुवत इति विपूर्व्वाद्याप्नोतेत्यस्य (सा० उ०) ।

अथ द्वितीया।

३ २उ ३ २उ ३ १ २ ३ २ ३ १ २
इत्था हि सोम इन्मदो ब्रह्म* चकार वर्द्धनम्।

१ १ ३ १ २ ३ १र २र३ २ ३ २ ३ १ २ ३
शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्व-

१ २
राज्यम् ॥ २ ॥ १७८

५ र २ १ २ १ २ १र २१
I इत्थाहिसो। मइन्मा२३दाः। ब्रह्मचका। रवर्द्धा-

२ १ २ १र २ १र
२३नाम्। शविष्ठव। ज्रिन्नोजा२३सा। पृथिव्यानिः-

"पिबन्ति"। या गावः "वृष्णा" कामाभिवर्षकेणेन्द्रेण "सयावरीः" सह गच्छन्त्यः सत्यः "मदन्ति" हृष्टा भवन्ति। ताः "इन्द्रपीतस्य" सोमस्यावशेषं पिबन्तीत्यर्थः। "शोभथाः" [वचनव्यत्ययः (३, १, ८५)] इन्द्रेण सह शोभन्ते। "वस्वीः" पयः-प्रदानेन निवास-कारिण्यः(१) ता गावः "स्वराज्य" स्वस्य स्वकीयस्येन्द्रस्य यद्राज्यं राजत्वन्तद् "अनु" लक्ष्य अवस्थिता इत्यर्थः ॥ १ ॥ १७७

---

* "मदेब्रह्मा"-इति ऋ०।

---

१७८ उत्तरार्चिकस्य १, ५, २९, १।

(१)—'वस्विति धन-नाम (नि० २, १०, १५) धनवन्त्यः'-इति वि०।

२ ३ १ १ १ १ १
अभ्राश्चिहिम्। अर्चानार्‍ऩू२। खरौहो२। जियमो-
२३४५इ। डा॥ १७॥

४ ८ ४ १ १ १८ २ १
II इत्थाहिसोमइमदाः। ब्रह्मचका। रवर्द्धा२३-
१ ३ ५ २ १ ५ २ १८
नाम्। शाविष्ठा२३४वा। ज्जिन्नोजा२३४सा। पृथिव्या-
२ ८ १ २ १ २ १ ० १ ८ २
निःशशाश्चिहिम्। अर्चा३ह्रोइ। अनू२३हो। स्वाराजि-
१ २ १
यम्। इडा२३भा३४३। श्रो२३४५इ। डा॥ १८॥१७८

हे "शविष्ठ" अतिशयेन बलवन्! "वज्रिन्" वज्रवन्निन्द्र! "इत्था हि" इत्थम् एव अनेन शास्त्रोक्तप्रकारेणैव(१) "सोमे" त्वया गृहीते सति "मदः" [मदेः स्तुति-कर्मणः(२)] स्तोता(३) "वर्द्धनं" तव वृद्धिकरं "ब्रह्म" स्तोत्र(४) "चकार"। अनेन कृत-वान् (इदित्येतत् पद-पूरणम्) अतस्त्वम् "ओजसा" बलेन "पृथिव्याः

---

I,II गृत्समदस्य मदौ द्वौ।

(१ —"चिं शब्दो यस्मादर्थे। 'इत्था सत्यम्' इति वि०। "इत्था"-इति सत्य-नामसु पञ्चमं नैघण्टुकम् (३,१०)।

(२)—"मदति"-इति अर्चति-कर्मसु ऊनचत्वारिंशत्तमं नैघण्टुकम्(३,१४)।

(३)—"मदे सप्तमी चेयं "यस्य च भावेन भावलक्षणमिति, *** सोमे उपकल्पिते'-इति वि०।

(४)—'ब्रह्म शब्दो ब्राह्मण-शब्द-पर्यायः। गौतमस्य परोक्ष-कथेण ब्राह्मणं

अथ तृतीया*।

२ ३ १ २ ३ १२ ३ १र २र
इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः।
१उ १ २ ३ २ ३ १र २र ३ १र २र ३ १ २
तमिन्महत्स्वाजिषूति†मर्भे हवामहे स वाजेषु प्र नो-
विषत् ॥ ३ ॥ १७९

सकाशात्(५) "अहिम्" आगत्य हन्तारं वृत्रं(६) "निःशशाः" निःशेषेण शशाः(७) मा बधस्वेति शासनं कृत्वा पृथिव्याः सकाशान्निरगमयद्रित्यर्थः। किं कुर्वन्? "स्वराज्य" स्वस्य राज्यं राजत्वम् "अनु" लक्ष्य "अर्चन्" पूजयन् स्व-स्वामित्वं प्रकटयन्नित्यर्थः ॥ २ ॥ १७८

---

* 'गौतमस्यार्षम्'-इति वि०।

† "षूते"--इति ऋग्वेदीयः पाठः, उत्तराग्रन्थीय-सायणधृतश्च।

---

१७९ उत्तरार्चिकस्य ३,२,१४,१—ऋग्वेदस्य १,६,१,१ = आरण्यके ३,१८ = ऊहे १८,२,४ = ऊह्ये १,१२—१३।

निर्हृमति—गोतम-नामा ब्राह्मणः चकार करोति; किं? सामर्थ्यात् स्तोत्रम्'-इति वि०।

(५)—'पृथिवीत्यन्तरिक्ष-नाम, अन्तरिक्षात्'-इति वि०। "पृथिवी"-इति अन्तरिक्ष-नामसु नवमं नैघण्टुकम् (१,३)।

(६)—'अहिम् मेघम्, वृष्टिमित्यर्थः'-इति स्पष्टम् वि०। "अहिः"-इति मेघ-नामसु एकविंशतितमं नैघण्टुकम् (१,१०)।

(७)—'शश प्लुतगतौ (भ्वा० प०)'-इत्यस्य रूपम्, अन्तर्णीतस्य ण्यर्थः।

२ र　र　　　४ ५　　　२ र
I इन्द्रोमदायवा३ । वाह्नाइ । शवसेवृत्रहा३ ।

४　२　　　४ ५　१र　र
नृभीः । तमिन्महत्स्ववा३ । जाइषू । ऊतिमर्भेहवा३ ।

४ ५　४ ५　१　२१　५　४　५
माहाइ । सावा । जाइषुप्रनो२३४वा । वा५इषो६हाइ

॥ १९ ॥

४र　र४　　१ २र　　१　२
II इन्द्रोमदा५यवा३धाइ । शवसेवृ । त्रहानृभी-

५　२　३　५　５　४ ५
३४ः । ताम् । इन्माहा२३४त्सवा६ । हाउ । जाइषू ।

१र　र २　२ ४र　५　१　२१
ऊतिमर्भेहवा१ । मा३हाइ । सावा । जाइषुप्रनो२३-

५　४　५
४वा । वा५इषो६हाइ ॥ २० ॥

४ र　र ४　१ १र　१ २
III इन्द्रोमहा५यवावुधाइ । शवसेवृ । त्रहा२नृभिः ।

१ १ २　र १　११११　१ ११११　२ १
आऔ३हो । औहोवा२३४५ । ह२३४५ । तमिन्म-

I,II आभीके हे ।

२ १२ १ २ १ ८१ ११११

ह। त्सुवा२जिषु। आ३औ३हो। औ३होवा२३४५।

२ ११११ १२१ २८ १२८ १ २ २

ह५२३४५। ऊतिमर्भे। हवा२मह्वे। आ३औ३हो।

८१ ११११ २ ११११ २८१८ २ ४ २

औ३होवा२३४५। ह५२३४५। सवाजेषूप्रा३नो३। वा-

५

३४५इषो६हाइ॥ २१॥

४५८ ४५८ ८ ८४ ५८४ २११ १

IV इन्द्रोमदायवावृधेशवसेवृ। त्रहानृ१भी२ः। तमि-

२ १ २ २ १२ १ ५ २ १

न्मह। त्सुआ१जिषू३। ऊतीमा२३४र्भाइ। हवा२मा-

८ ८ २ ४ २ ५

हाइ। सवाजेषूप्रा३नो३। वा३४५इषो६हाइ॥ २२॥

३२ १८ ८ ३

V इन्द्रो३१२३४। मदा। यवावृधेशवा२सा२३४-

५ २ ५ २८ २ ५ २ ३ ५

इ। त्रहा३। औ३होवा। आ३। औ३हो२३४वा।

४ १ ८ ८ २ ५ २८

नृभाइः। तमिन्महन्त्साजिषूतिमा२३र्भाइ। हवा३। औ

III,IV आभीशवे द्वे।

२　　５　　२ ३　　५　　४　　१ र र
होइवा । आ३ । औहोर३४वा । मद्दाइ । सवाजेषु

５　　२ ३ २　　５　　२ ३　　५　　४
प्रना३ । औहोइवा । आ३ । औहो२३४वा । वा५इ

५
योइहाइ ॥ २३ ॥

३ १　　र　　५र　　५　　१ २र
VI इन्द्रो३४ । मदाय । वावाईदृद्धाइ । शवसेवृ ।

१　　२　　४र ५र　　३र १　　१　　२　　१
त्रहानृभीइः । हाउहौ । होवा । तामिन्मह । स्नू-

२　　२　　४र ५र　　३र २　　१　　२र　　१
आश्जिषूइ । हाउहौ । होवा । ऊतिमर्भे । हवा-

२　　४र ५र　　३र २　　१र र १ ४　　१
माहेइ । हाउहौ । होवा । सवाजेषूप्राइनोइ । वा३४-

५ ५
५इयोइहाइ ॥ २४ ॥

५र र　　३ १　　र　　५र　　५
VII ओहाइ । इन्द्रो२४ । मदाय । वावाईधौइ ।

१　२र　　१　　२　　४र ५र　　३र १　　१
शवसेवृ । त्रहानृभीइः । आउहौ । होवा । तामि-

---

V, VI, VII बार्हद्गिराणि त्रीणि ।

२　　　१ २　　　२　　४र ३र　　३र २　　र १
न्मह। त्सुआ१जिषू३। आउहौ। होवा। ऊतिम
　　२ र　　ऽ २　　१　　　१ र र १ २
र्भाइ। हवौ। हो३वा। माहा२इ। सवाजेषूप्रा३नो
२　　　४ ५　　४
विषात्। औ२३होवा। होपुइ। डा ॥ २५ ॥ १७९

"वृत्रहा" वृत्रस्यावरकस्य वृष्टिनिरोधकस्य मेघस्यासुरस्य वा हन्ता(१) [यद्वा। आवरकाणां(२) शत्रूणां हन्ता इन्द्रः "मदाय" हर्षार्थं "शवसे" बलार्थञ्च "नृभिः" यज्ञस्य नेतृभिः ऋत्विग्भिः "वावृधे" स्तोत्र-शस्त्र-रूपाभिः स्तुतिभिः प्रवर्द्धितो बभूव स्तुत्या हि देवता प्राप्तबला सती प्रवर्द्धते। "तमित्" तमेव इन्द्रं "महत्सु" प्रभूतेषु "आजिषु" सङ्ग्रामेषु "ऊतीम्" अस्माकं रक्षकम्(३) "हवामहे" आह्वयामहे। तथा "तम्" इन्द्रम् "अर्भे" अल्पे सङ्ग्रामे "हवामहे"। अस्माभिराहूतः "स" चेन्द्रः "वाजेषु" सङ्ग्रामेषु "नो" ऽस्मान् "प्राविषत्"(४) प्रावतु प्रकर्षेण रक्षतु ॥३॥ १७९

---

(१)—"वृत्रो मेघ-इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः; अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"-इति यास्कः (नि० २,१६)।

(२)—"विद्धं भरं भवति बिभर्तेः ईवं जघ्निवानपववार। तद् वृत्रो वृणोतेर्वा वर्त्तते वा वर्धते वा। यदवृणोत् तद् वृत्रस्य वृत्रत्वमिति विज्ञायते"-(नि० २,१७) इति यास्कोक्ति-द्वैविध्यात्।

(३)—'ऊतिम्, द्वितीयैकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम्; ऊतये पालनाय'-इति वि०।

(४)—अवतेर्लेटि रूपम्।

अथ चतुर्थी * ।

२ ३ २ ३ १ २ ३ १ २ क २र
इन्द्रतुभ्यमिदद्रिवोनुत्तंवज्रिन्वीर्यम् ।
१र ३२र३ १ २ ३२उ ३ १ ३ १र २र३ २ ३ १ २ ३
यद्धत्यंमायिनंमृगन्तवत्यन्मायया वधीरर्चन्ननुस्व-
१ २
राज्यम् ॥४॥ १८०

५ ५ १ २ र १
I इन्द्रतुभ्यमिदद्रिवा३ए । आनुत्तंवज्रिन्वीरियम् ।
२ १ २ १ २
यद्धात्या१म्मा२ । याइनंमृगम् । तवात्या१न्मा२ ।
१ र २ र १ २ १ र २ १
यायावधीः । अर्चाना१नू२ । स्वाराजियम् । इडा२-
२ १
३भा३४३ । ओ२३४५इ । डा ॥ २६ ॥ १८०

---

* 'गौतमस्यार्षम्'-इति वि० ।
"मृगंतमुत्वं मायया"-इति ऋ० ।

---

१८० ऋग्वेदस्य१,५,३०,२ ।

I स्वाराज्यम् ।

अथ पञ्चमी*।

२ १ २ ३ २उ ३१२ ३ १ २
प्रेह्यभीहिधृष्णुहिनतेवज्रोनियंसते।

[अद्रिरिति मेघनाम (नै० १,१०,१)]। हे "अद्रिवन्" वाहन-रूप-मेघ-युक्त[1] "वज्रिन्" वज्रवन्निन्द्र! "तुभ्यमित्" तवैव [षष्ठ्यर्थे चतुर्थी[2]] "वीर्य्यं" सामर्थ्यम् "अनुत्त" शत्रुभिरतिरस्कृतम्। "यद्ध"[3] येन वीर्य्येण खलु "मायिनं" मायाविनं "मृगं" मृग-रूपमापन्नं[4] "त्यं" तं "वृत्रम्" असुरं[5] त्वमपि माययैव "अवधीः" हतवानसि। अतः कारणात् तव वीर्य्यं "यत्" तत् प्रसिद्धं भवति। "अर्चन्ननु स्वराज्यमिति" पादोव्याख्यातः[6] ॥ ४ ॥ १८०

---

* 'गौतमस्यार्षम्'-इति वि०।

---

(१)—'अद्रयः आभिषवाः ग्रावाणः, तैः तद्वान्; अथवा अद्रिर्मेघः, तेन हन्तव्येन तद्वान्; अथवा अद्रिर्वज्रस्तेन तद्वान्'-इति वि०।

(२)—"षष्ठ्यर्थे चतुर्थीति वाच्यम् (२,३,६२)"-इति कात्यायनीयोक्तेरिति भावः।

(३)—द्वितीया चात्र तृतीयार्थे द्रष्टव्या, व्यत्ययेन (३,१,८५)।

(४)—"मृगो मार्ष्टेर्गतिकर्मणो"-इति यास्कः(१,२०)। अतएव विवरणे मार्गणीयं वेत्युक्तम्।

(५)—असुरइत्यपि मेघ-नामसु नैघण्टुकं दृश्यते १,१०,२९।

(६)—अव्यहित-पूर्वस्यामृचीति भावः।

१ २ ३ १ २ उ   ३ २ ३  १ २  ३ १ र   २ र ३ २  ३  १ २ ३  १
इन्द्र नृम्णꣳ हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वरा-
२
ज्यम् ॥ ५ ॥ १८१

I प्रइहीऽ२। अभीहिधृष्णाहाऔ२हो। नाताऽ२इ।
वज्रोनियꣳसयाऔ२हो। आइन्द्राऽ२। नृम्णꣳहिते-
शवाऔ२हो। हानाऽ२ः। वृत्रंजयाअपाऔ२हो। आ-
र्चाऽ२नानूऽ२। स्वाराजियम्। इडाऽ२३भाऽ३४३। ओऽ२३४-
५इ। डा ॥ २७ ॥ १८१

हे "इन्द्र!" "प्रेहि" प्रकर्षेण गच्छ। "अभीहि" हन्तव्यान् शत्रून् आभिमुख्येन प्राप्नुहि। प्राप्य च "धृष्णुहि" तान् शत्रून् अभिभवति तव "वज्रो" "न नियंसते" शत्रुभिः न नियम्यते अप्रतिहतगतिरित्यर्थः। तथा "ते" तव "शवः" त्वदीयं बलं "नृम्णं" नृणां पुरुषाणां नामकम् अभिभावकम्।

---

१८१ ऋग्वेदस्य १,५,२८,२।

I सवेशीयम्।

अथ षष्ठी*।

३ १ २ ३ १२ ३ १२ ३ १२
यदुदीरत आजयो धृष्णवे धीयते धनम्†।

३१ १२२ २३२उ ३१२ २२ ३ १ २३१२
युङ्क्ष्वा‡मदच्युता हरी कꣳ हनः कं वसौ दधोऽस्माꣳ इन्द्र वसौ-

दधः॥ ६॥ १८२

४ ५ ५ ४ २१ ५२ ५ १ २
I यदुदीरा५त आजयाः। धृष्णवे२धी। यताइधा१

"हि" यस्मादेवं तस्मात् "वृत्रम्" असुरं मेघं वा "हन" जहि। तदनन्तरं तेन निरुद्धा "अपः" उदकानि "जयाः" जय, वृत्रं हत्वा तेनावृत मुदकं लभस्वेत्यर्थः(१)। शिष्टं स्पष्टम्॥ ५॥ १८१

---

* 'गौतमस्यार्षम्'-इति वि०।

† "धना"-इति, ‡ "युङ्क्ष्वा"-इति च ऋग्वेदीयौ।

---

१८२ उत्तरार्चिकस्य ३,२,१४,३ = ऋग्वेदस्य १,६,१,३ = ऊहे १८,२,४ ऊह्ये १,१,१—१२,३,—१३,३।

I सर्वेणीयम्।

(१)—केचिदिदानीन्तना ऋग्भ्यः पूर्वतनानां क्षेत्र-जल-हरणाय समुद्भृतेत्यनुमीयन्ते। तत्तु तत्सदसत्, "अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति (नि० २,१६)"-इत्यादिना एवमादीनां कल्पितार्थत्वस्य स्पष्टत्वात्; "असद्‌दृष्टान्तान्याख्यानम्"-इत्यादि मीमांसा-सिद्धान्तात्चेति दिक्।

१र          २          ४ ५          २ १          २
ना२म्। युक्ष्वामदच्युता२। हारी। क०ह्नःकंवसा-

४ ५          २ १र          २          १र          २
३उ। दाधाः। अस्मा०आ२३इन्द्रा। वसौदा२३धा२-

१
४३:। ओ२३४५इ। डा॥ २८॥ १८२

अत्रेदमाख्यानम्-रहूगण-पुत्रो गौतमः कुरु-सृञ्जयानां राज्ञां पुरोहित आसीत्। तेषां राज्ञाम्परैः सह युद्धे सति स ऋषिरनेन इन्द्रं स्तुत्वा स्वकीयानां जयं प्रार्थयामासेति। तस्य च तत् पुरोहितत्वं वाजसनेयिभिराम्नातम्—"गौतमो ह वै राहूगणः उभयेषां कुरु-सृञ्जयानां पुरोहित आसीत्"-इति।

"यद्" यदा "आजयः" सङ्ग्रामाः "उदीरते" उद्गच्छन्ति उत्पद्यन्ते तदानीं "धनं" "धृष्णवे" यो धृष्णुः धर्षयिता शत्रूणां जेता भवति तस्मै धीयते निधीयते। जयतो धनं भवतीत्यर्थः। हे "इन्द्र!" त्वां तादृशेषु युद्धेषु प्रवृत्तेषु "मदच्युता" शत्रूणां "मदस्य" गर्वस्य च्यावयितारौ "हरी" त्वदीयावश्वौ(१) "युक्ष्व" रथे त्वदीये योजय। योजयित्वा च "कं" चिद्राजानं तव परिचरणमकुर्वन्तं "हनः" हन्याः। "कं" चन त्वां परिचरन्तं "वसौ" धने "दधः" स्थापयसि (अतो जयाजयौ त्वमेव कारयितासि। तस्मात् हे इन्द्र! अस्मान् अस्मदीयान् राज्ञः वसौ धने "दधः" स्थापय॥ ६॥ १८२

---

(१)—'हरी इन्द्रस्य'-इति नैघण्टुकम् १,१५,१।

[ अथ सप्तमी* ।

२ ३ १ २ ३ १ २ ३१ २
अक्षन्नमीमदन्त ह्यवप्रिया अधूषत ।

१ २ २ ३ २ ३ १ २ ३ २उ क २र ३
अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्र-

१ २
तेहरी ॥७॥ १८३

३ ४ ३ ४र ५ ३ २ १ ५ ४र ५ र
I अक्षन्नमीमद । तहो३ । आ२३४ । वप्रियाअधू ।

४ ५ १ २र १ २र १ र २ १ र
षता । अस्तोषतस्वभानवः । विप्राना२३वी । ष्ठाया-

२ र १र २ २ १ ३ ५र र
मती । योजानूश्वा३इ । द्रा२ता२३औहोवा ।

३ ५
हा२३४री ॥ २९ ॥ १८३

हे "इन्द्र !" त्वया दत्तान्यन्नानि "अक्षन्" यजमाना भुक्तवन्तः भुक्त्वा च "अमीमदन्त हि" हृष्टा आसन् खलु । "प्रियाः" तनूः "अवाधूत" अकम्पयन् अतिशयित-रसास्वादेन वक्तुमशक्नुवन्तः शरीराण्यकम्पयन् । तदनन्तरं "स्वभानवः" स्वायत्तदीप्तयः

* 'गौतमस्यार्षम्'-इति वि० ।

१८३ ऋग्वेदस्य १,६,२,२ ।

I यामम् ।

अथाष्टमी* ।

३ १ २ ३ २उ ३ १ २ ३ १ २
उपोषुशृणुहीगिरोमघवन्मातथाइव ।
३ १ २ ३ १ २ ३ २ ३ २ ३ १ १र ३ २उ क २र ३
कदा†नःसूनृतावतःकरइदर्थ‡यासइद्योजान्विन्द्रते
१ २
हरी ॥ ८ ॥ १८४

३ ४र ३ ४ ३र ४ ५ २ २ ४ १
I उपोषुशृणुहीगिरः । ए३ । औ३होपुवा२ । मा-

"विप्राः" मेधाविनः ऋत्विजः "नविष्ठया" अतिशयेन नूतनया "मती"(१) मत्या स्तुत्या "अस्तोषत" अस्तुवन् । अतः हे "इन्द्र!" ते त्वदीयौ "हरी" एतत्सञ्ज्ञावश्वौ "नु" क्षिप्रं(२) "योज" रथे योजय ॥ ७ ॥ १८३

---

* 'गौतमस्यार्षम्'-इति वि० ।

† "यदा"-इति, ‡ "आदर्थ"-इति च ऋग्वेदीय-पाठौ ।

---

१८४ ऋग्वेदस्य १,६,३,२ ।

(१)—मतिः-इति 'मन्यते'-इति स्तुति-कर्मसु पठितस्य रूपम् (३,१४,१८ नै०) । तृतीयायास्तु "इयाडियाजीकाराणामुपसङ्ख्यानम्"-इति (७,१,३९) कातीय-वचनाद्दीकारः ।

(२)—"नु"-इति क्षिप्र-नामसु चाद्यं नैघण्टुकम् (२,१५) ।

२ १र २ ३ २ ३ १ १ २
घवन् मा। तथाआ१इवा२३४। कदा३४नःइ। नात्ती
२ १ २ १ २ ३र २ ३ २
वत.। करइद्। थाया१साई२३४त्। योजा३४नुवा
१ ३ ५र र ३ ५
३इ। द्रा२ता२३४औहोवा। हा२३४री॥ २०॥ १८४

हे "मघवन्" धनवन्निन्द्र! "गिरः" अस्मदीयाः स्तुतीः "उपो" उपैव "सुशृणुहि" उपगम्य सम्यक् शृणु। "तथाइव"(१) पूर्वं यथाविधस्त्वं तद्विपरीतो माभूः (अस्मासु पूर्वं यथा अनुग्रह-बुद्धि-युक्त तथाविधएव भवेत्यर्थः) अपिच "नो" ऽस्मान् "सूनृतावतः" (प्रियसत्यात्मिकावाक् सूनृता) तया स्तुति-रूपया वाचा-युक्तान् "करः" करोषि। त्वमपि "अर्थयासइत्" अर्थयास एव नतदास्मे। अस्माभिः प्रयुक्ताः स्तुतीस्त्वमपिस्वीकरोषीत्यर्थः। अतो हे "इन्द्र"! "ते" "हरी" त्वदीयावश्वौ "नु" क्षिप्रं "योज" रथे योजय। "कदा" यदेतिकर इत्यर्थः।

"करइदर्थ"-इति, "करआदर्थ"-इति च पाठौ॥ ८॥ १८४

---

(१)—'तथा, "तनु विस्तारे (त०,प०)"-इत्यस्येदं रूपम्, मा विस्तारं कार्षीः, मा विलम्बिष्ठाः, शीघ्रमागच्छेत्यर्थः। इवेत्ययमुपमार्थः, स्वल्पमार्थस्य सम्भत्यर्थे प्रयोग इति पदपूरणः-इति वि०।

अथ नवमी ।

त्रितऋषिः ।

३ १ २ ३ २ ३ १र २र३ १ २ ३ १
चन्द्रमा अप्स्वा३न्तरा* सुपर्णो धावते दिवि ।
१ २ ३ १ २ ३ १ २ ३ १
नवो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य
२
रोदसी ॥ ९ ॥ १८५

२ १ र २ १ २ १र २
I चन्द्रमाआउवा । प्सवान्ताराउवा । सुपर्णोधाउ-
१र र २ १ २
वा । वतेदिवि । नवोहिराउवा । एयनाइमायाउवा ।
१ २ १ २ १र
पदंविन्दाउवा । तिविद्युताः । वित्तम्माआउवा । स्यरोदा-
२ १
२३सा३४३इ । ओ२३४५इ । डा ॥ ३१ ॥

४ ५ र ४ २ १ २ २ १ २र र
II चन्द्रमाआ । प्सू३आन्ता३रा । सुपर्णोधाव ।

---

* "अप्स्व१न्तरा"--इति ऋग्वेदीय-पाठः ।

---

१८५ ऋग्वेदस्य १,७,२०,१ ।
१०७क,

तार३इ। दिविया। नवो२हिरण्यनेमयःपदंविन्द।
तिविद्युतो२३४हाइ। वित्तꣳहोइ। मआ२३हो। स्य-
रोदा२३सा२३सा३४३इ। ओ२३४५इ। डा॥ २२॥

III चन्द्रमा३आप्सु वन्तरा। सुपर्णोधा। वताइ-
दा१इवी२। नवो२हिरण्यनेमयः पदं विन्द। तिवि-
द्यु तार३ः। वित्तंहोइ। मआ२३हो। स्यरोदा२३सा-
३४३इ। ओ२३४५इ। डा॥ २३॥

IV चन्द्रमाअप्स्वा। तरा। सुपर्णोधावतेदा२३इ-
वी। नवा२३होइ। हिरण्यनेमयःपदंविन्द। तिवि-
द्यूता२३ः। वित्तꣳहोइ। मआ२३इहो। स्यरो२३।
दा२सा२३४औहोवा। ऊ३२३४पा॥ २४॥

---

I,II,III त्रैतानि त्रीणि।

५ ४र ५र र ४ ५४र ५ ५ २ १र र र
V चन्द्रौहोमाप्स्वन्तरा। ओ६वा। सुपर्णोधावते-
२ २ २ १ २ २ १ १ १ १ र
दाइवायेइ। होवाइहोरइ। ऊवा३४५इ। नवोहाइरण्य-
१ २ १ २ २ १ १ १ २ १
नाइमायार३ः। होवाइहोरइ। ऊवा३४५इ। पदं-
१ २ २ २ २ १ १ १
विन्दन्तिवाइद्यु तार३ः। होवाइहोरइ। ऊवा३४५इ।
२ १ र १र १ २ १ २ २ ४
वित्तंमे अस्यरोदासा येइ। होवाइहोरइ। ऊवा३ओ
२ ५
५वा६५६। ऊ२३४पा॥ २५॥१८५

"अप्सु" आन्तरिक्ष्यासु(१) उदकमये मण्डले "अन्तरं" मध्ये वर्त्तमानः "सुपर्णः" शोभन-पतनः [यद्वा। सुपर्णइति रश्मिनाम(नै० १,५,१५)]सुषुम्णाख्येन सूर्यरश्मिना युक्तः "चन्द्रमाः(२)" "दिवि" द्युलोके "आधावते" आश्चर्यादायाम्। एकेनैव प्रकारेण धावतेशीघ्रं गच्छति। तादृशस्य चन्द्रमसः सम्बधिनः। हे

---

IV,V सौपर्णे द्वे।

(१)—"आपः"-इति अन्तरीक्ष-नामसु अष्टमं नैघण्टुकम् (१,३)॥

(२)—"चन्द्रमाश्चायन्द्रमति चन्द्रो माता चान्द्रं मानमस्येति वा। चन्द्रश्चन्दतेः कान्तिकर्मणश्चन्दनमित्यप्यस्य भवति चारु द्रमति चिरं द्रमति चमेर्वा पूर्वम्। चारु रुचे र्विपरीतस्य"-इति नि० दै० ५,५।

अथ दशमी।

अवस्युर्ऋषिः।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
प्रतिप्रियतमꣳरथंवृषणंवसुवाहनम्।
३ १ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३
स्तोतावामश्विनावृषिस्तोमेभिर्भूषति*प्रतिमाध्वीममश्रुतꣳ
१ २
हवम्॥ १०॥१८६

॥ तृतीय-दशति ॥

"हिरण्यनेमयः" सुवर्ण-सदृश-पर्यन्ताः! [यद्वा। हित-रमणीय-(३) प्रान्ताः] "विद्युतो" विद्योतमानाः रश्मयः "वो" युष्माकं "पदं" पदस्थानीयम् "अग्र" "विन्दन्ति" मदीयानीन्द्रियाणि कूपेनावृतत्वात् न लभ्यते। अतइदं नोचितं तस्मात् कूपात् मामुत्तारयतेत्यर्थः। अपिच हे "रोदसी" द्यावापृथिव्यौ! "मे" मदीयं "अस्य"(४) इदं स्तोत्रं "वित्तं" जानीतम्॥ ८॥१८५

---

* "स्तोमेनप्रतिभूषति"-इति ऋग्वेदीय-पाठः।

---

१८६ उत्तरार्चिकस्य ८,३,१२,१ = ऋग्वेदस्य ४,४,१५,१ = ऊहे ११,१,३६ = ऊह्ये ४,१८।

(३)—"हिरण्यं कस्मात् ह्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हित-रमणं भवतीति वा हृदय-रमणं भवतीति वा हर्यतेर्वा स्यात् प्रेप्सा कर्मणः"-इति नि० २,९।

(४)—'द्वितीयार्थे षष्ठी'-इति वि०।

१ ५ ४५ ४ ५ १ २
I प्रा२३४। तिप्रियतमम्। राथोम्। वार्षणव।

१र २ १र २ २ १ २ ५
सुवाह्वा२३नाम्। स्तोतावा३मा३। श्विना२वा२३४षीः।

१र २ २ २ २ २ ५ १र २
स्तोमाइभो३र्भू३। षातिप्रा२३४तो। माध्वाइमा३-

२ १ ४ २ ५
मा३। अ२३ताम्। हा३४५वो६हाइ॥ ३६॥ १८६*

हे "अश्विनौ!" (१)(एकः प्रति-शब्दोऽनुवादः) "वां" युवयोः "प्रियतमं" "रथं" "स्तोता" "ऋषिः"(२) "स्तोमेभिः" स्तोमैः

---

I त्वौशम्।

(१)—"अश्विनौ यद् व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्यः। अश्वैरश्विनावित्यौर्णवाभः। तत्कावश्विनौ द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्याचन्द्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकाः। तयोः काल ऊर्ध्वमर्धरात्रात् प्रकाशीभावस्यानुविष्टम्भमनु तमोभागो हि मध्यमो ज्योतिर्भाग आदित्यः"-इति नि० दै० ६, १।

(२)—'ऋषिः अवस्युर्नाम, आत्मानमेव परोक्षरूपेण प्रथमपुरुषेण निर्दिशति'-इति वि०।

---

*॥ इति अष्टमः प्रपाठकः॥

"प्रतिभूषति" अलङ्करोति। कीदृशं रथं? "वृषणं" फलानां वर्षितारं। "वसुवाहनं"(३) धनानां वाहकं (ईदृशं रथमागमनाय स्तोतोत्यर्थः) तस्मात् हे "माध्वी"! मधुविद्या-वेदितारौ(४) "श्रुतं" शृणुतम् ॥ १० ॥ १८६

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्य सप्तमः खण्डः ॥ ७ ॥

---

अथाष्टमे खण्डे—

सैषा प्रथमा।

वसुश्रुतऋषिः*।

१ २ २ १ २ ३ १ २
आ ते अग्न इधीमहि द्युमन्तं देवाजरम्।
३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ २ ३ ३ १ २
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीष४ँ स्तोतृभ्य-
१ २
आभर ॥ १ ॥ १८७

---

* 'वत्सस्यार्षम्'-इति वि०।

---

१८७ उत्तरार्च्चिकस्य ३, २, २१, २ = ऋग्वेदस्य ३, ८, २२, ४ = ऊहे ३, १६—१७, ६।

(३)—'वसु धनम् उह्यते प्राप्यते नीयते येन स वसुवाहनस्तं' वसुवाहनं धनस्य नेतारम्'इति वि०।

(४)—'मधुपूर्णौ'-इति वि०। 'इकारोमत्वर्थीयः'-इति च वि०।

१　　　२५　२　४५　　२
I ओम् ॥ आ२३४। तेअग्नइधी। माहाइ। द्युमन्तं

२　१　२३२　१　१　२　१　३
देवा३। आ२३। जरमा। यद्धास्या३ता३इ। पानीरया-

५　२१८२　१　　　१३२　१
२३४सी। समिद्दीरदय। ता१३इ। द्यविया। इषा-१

२　२　१　४　२　५
स्तोरतृ३। भ्यार२३आ३। भा३४५रो६हाइ ॥ १ ॥

३८४८५　२　२४　५　१४२५४५
II आतेअग्नइधी। मा३हाइ। द्युमन्ता३देवअजरम्।

३४३८४८३४८५२　४३४८१४५　२१२
यद्धस्यातेपनीयसी। समिद्दीदयताइ। ऊ३म्हुम्।

१　५　१　२२　२　१　२
द्या२३४वी। इष१स्तोतृभ्या३आ। हुं३म्हं३४३म्।

२　५
भा३४५रो६हाइ ॥ २ ॥ १८७

हे "अग्ने" देव! "द्युमन्तम्" दीप्तिमन्तम् "अजरम्" अजीर्णम् "ते" "आ" सर्वतः "इधीमहि"(१) दीपयामः। "यद्ध" खलु

I,II सत्वजये द्वे।

(१)—'ञिइन्धी दीप्तौ' इत्यस्य रूपम्।

अथ द्वितीया।

विमद ऋषिः।

१ र २र ३ १ २
अग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे।

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २ १
शीरं पावकशोचिषं वि वो मदे यज्ञेषु स्तीर्णबर्हिषं

१ २
विवक्षसे*॥ २ ॥ १८८

२ ३ ५ १र २ ३ १ १
I हाउ। औहोऽ२३४वा। अग्निन्नस्ववृक्तिभीर३-

११ २ ३ ५ १र१र र र ३
४५ः। हाउ। औहोऽ२३४वा। होतारन्त्वावृणीमहे-

"ते" त्वदीया "स्या" सा "पनीयसी" स्तुत्यर्हा(२) "समिद्" दीप्तिः "दीदयति" दीप्यते "द्यवि" द्युलोके। किञ्च। "स्तोतृभ्यो" ऽस्मभ्यं "इषम्" अन्नम्(३) "आभर" आहर ॥ १ ॥ १८७

---

* "यज्ञायस्तीर्णबर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे"-इति ऋग्वेदीय-पाठः।

---

१८८ ऋग्वेदस्य ७,७,४,१ ॥

I उक्षिधम्।

(२)—"पणते"-इति अर्चति-कर्मणो रूपम् (नै० ३,१४,२१)।

(३)—"इषम्"-इत्यन्न-नामसु चतुर्दशतमं पदम् ( नै० २,७, )।

१२ ११        २          ३     ५        २ ८१ २४   १ १८
२३४५ । हाउ । औहो३४वा । शोरंपावकशोचि-

     ३ २ ३        ५        २         ३    ५
षम् । विवोमार२३४दाइ । हाउ । औहो३४वा ।

२ १   २ ८ १ २   ३ १ १ १ १       २       ३    ५
यज्ञाइषुस्तीर्णवर्हिषार३४५म् । हाउ । औहो३४वा ।

१   २ ३ १ ११ १
विवक्षसे२३४५ ॥ ३ ॥

५ र                          र      १ र २ र  र  र
II अग्निन्नस्ववृक्तिभिर्हइहाहाइ । होतारंत्वावृणीम-

१ २ १ २         २        र १ २र १ २र      १ २ १ २
हइहइहा३ । हाइ । शोरंपावकशोचिषमिहइहा३ ।

२        ३ २ ३      ५        २ १   २ र १ २     १ २ १
हाइ । विवोमार३४दाइ । यज्ञाइषुस्तीर्णवर्हिषमिहइ-

२      २        १   ३    ५ ॅर र        ३   ५
हा३ । हा३इ । वारइवार३४औहोवा । त्सार३४से

॥ ४ ॥ १८८

हे अग्ने ! तव स्वभूते "विमदे"(१) एतदाख्ये ऋषौ मयि "इयं" स्तुतिः प्रवृत्तास्ति (नेति सम्प्रत्यर्थे) न आतोवयमिदानीं "स्वृ-

---

II निषेधम् ।

(१) —अस्य हि भाष्यकृतोनये 'विमदे'-इत्येव पाठः अथवा वः इत्यस्य व्याख्यानं न कृतम् । विवरण-ग्रन्थे तु 'विवोमदे' इत्येव पाठः, तथाच—तत्र 'विवः', -'मदे'-इति च पृथक् व्याख्यातम् ।

अथ तृतीया।

सत्यश्रवा ऋषिः।

३ १२ ३ १ २ ३ १ २ ३ २ ३ १ २
महेनोअद्यबोधयोषोरायेदिवित्मती।

१ २ ३ १ २ ३ १ २ ३ १र २र ३ १ २
यथाचिन्नोअबोधयःसत्यश्रवसिवाय्ये सुजाते अश्व-

सूनृते ॥ ३ ॥१८९

क्तिभिः" स्वयङ्कृताभिः दोष-वर्जिताभिः स्तुतिभिः "होतारं" देवानामाह्वातारं होम-निष्पादकं वा "अग्निं" "त्वा" त्वाम् "आवृणीमहे" आभिमुख्येन सम्भजामहे। कीदृशं? "यज्ञेषु" यागेषु "स्तीर्णबर्हिषम्" आसादितबर्हिष्कम्। "शीरम्" ओषध्यादिषु सर्वत्रानुशायिनम्(२)। "पावकशोचिषं" शोधक-दीप्तिं(३)। "विवक्षसे" (महन्नामैतत्) हे अग्ने! त्वमपि महान् भवसि। [यद्वा। "विमदे" यज्ञस्य सम्बन्धिनः सोमस्य पान-जन्य-विविध-मदार्थं "त्वामावृणीमहे" इति योज्यम्]॥

"शीरम्पावकशोचिषंविवोमदेयज्ञेषुस्तीर्णबर्हिषंविवक्षसे"-इति छन्दोगाः। "यज्ञार्थंस्तीर्णबर्हिषोविवोमदेशीरम्पावकशोचिषंविवक्षसे"-इति बह्वृचाः॥ २॥ १८८

---

१८९ उत्तरार्चिकस्य ८,३,११,१ = ऋग्वेदस्य ४,४,२१,१ = ऊह्ये ४,१७।

(२)—"अनुशायिनमिति वा शिननमिति वा"-इति नि० १०,१४।

(३)—"पावक-दीप्तिम्"-इति नि० १०,१४।

२ १   २५र ४   ५र ५   १ २र
I मह्वा२३४इ। महेनोअद्य। बोधा६या। उषो-
र र   १   २   १ १ १   १ २ २
राये। दिवित्मा२३ती। यथाचौ२न्ना३ः। आबोधा-
५   १ २ २   १ ३ ५   १
२३४याः। सत्याश्रा३वा३। सिवा२या२३४याइ। सु-
२ २   १ ४   २   ५
जाता३आ२। आ२३सु२। ना३४५नृतौ६हाइ। ५ ॥१८८

"अद्य" अस्मिन्यागदिने हे "उषः" उषोदेवि!(१) "दिवित्मती" दीप्तिमती(२) त्वं "नो" ऽस्मान् "महे" महते "राये" धनप्राप्तये "बोधय" प्रज्ञापय प्रकाशयेत्यर्थः। सति प्रकाशे क्रतु-द्वारा द्रव्यस्योपार्जयितुं शक्यत्वात्। "यथाचित्" यथैव पूर्वं नोऽस्मानबोधयः, अतीतेषु यथा बोधितवती तद्वदद्यापीत्यर्थः। हे "सुजाते"(३) शोभनं जातं जन्माविर्भावो यस्यास्तत्सम्बुद्धि! हे "अश्वसूनृते",

---

I सत्यश्रवसश्च वाय्यस्य साम।

(१)—अश्विनोः परस्तात्, उदयात् पुरस्ताच्च यः कालः, तदात्मिका देवी उषाः देवी, सूर्येत्यपीत्युच्यते सूर्या-दुहितेत्यपि वर्ण्यते (नैरुक्तं द्रष्टव्यम्)।

(२)—'दिवो दुहिता'-इति वि०।

(३)—अत्र हि षडेकारौकारोच्चारणं पारिषत्कृतिः श्रूयते। तथाचोक्तं भगवता पतञ्जलिना प्रथमाध्यायीय-प्रथमपाद-द्वितीयाह्निके—"ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्द्धमेकारमर्द्धमोकारञ्चाधीयते—सुजाते अश्वसूनृते"-इत्यादि, "पारिषदकृतिरेषा"-इत्यादि च। क्वचि "सुजाते अश्व"-इत्यत्र हि सन्ध्यभावस्तु "प्रकृत्यान्तःपादमव्यपरे (६,१,११५)"-इति सिद्धम्।

अथ चतुर्थी।

विमद ऋषिः।

२ ३र ३ १ २ ३ २ ३ १ २ ३ १र २र

भद्रन्नोअपिवातयमनोदक्षमुतक्रतुम्।

१ २ ३ १र २र ३ २ ३ १ ३ २ ३ २ ३ १र २र ३ १ २

अथातेसख्येअन्धसोविवोमदेरणागावोनयव*सेविव-

क्षसे॥ ४॥ १९०

२ १ ४ ५र १ ५र १ २

I भद्रन्नोऽ२३अपिवातया। मनो२द। क्षाम्। क्रत-

३ ५ १ २र र १ २र ३ २ १ ३

क्रा२३४तूम्। आथाते। सा। ख्येअन्धसा३:। वि-

२ ३ ५ १ ५र १र ५र १ २ १

वोमा२३४दाइ। रणा२गावा२नय। वसाये२। वा२-

२ ५र र २ ५

इवा२३४औहोवा। क्षा२३४से। ६॥ १९०

प्रियसत्यात्मिका स्तुतिवाग्यस्याः सा हे तादृशि देवि!(४) "वाय्ये" वय-पुत्रे "सत्यश्रवसि" मयि(५) अनुग्रहार्थेः॥ ३॥ १८९

हे सोम! त्वं "नोऽस्मदीयं "मनः" "भद्रं" कल्याणं "प्राप" शुभ-सङ्कल्प-लक्षणं "वातय" गमय (अस्माकं परः शुभसङ्कल्पं

---

* "रणन्गानयव"—इति ऋग्वेदीयः पाठः।

---

१९० ऋग्वेदस्य ७, ७, २, १।

I पौषम्।

(४)—'अश्वसूनृते-आदित्यभार्ये'-इति वि०।

(५)—'सत्यश्रवोनाम राजा वाय्यः'-इति वि०।

अथ पञ्चमी ।

गोतमऋषिः ।

१ २ ३१ २ ३२३ १२ २२ ३ १ २
ऋत्वा महाँ अनुष्वधं भीम आ वावृते* शवः ।
३ २ ३ १ २ ३ २ ३ २ ३१२ २२ ३१ २३१२
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवां दधे हस्तयोर्वज्र-
३ २
मायसम् ॥ ५ ॥१९१

कुर्वित्यर्थः) तथा "दक्षं" दक्षमपि सर्वव्यापिनमन्तरात्मानमपि(१) "भद्रं" शुभ-कारित्व-लक्षणं प्रापय (अस्माकमन्तरात्मानं शुभ-कारिणं कुर्वित्यर्थः) "उत" अपिच "क्रतुं" प्रज्ञानं भद्रं "शुभा-ध्यवसाय" लक्षणं प्रापय(शुभाध्यवसायिनं कुर्वित्यर्थः) "अथ" अनन्तरं स्तोतारः "ते" तव "सख्ये" स्तुत्यस्तोतृत्वे(२)ज्य-यष्टृत्व-लक्षणे सखि-कर्मणि रमतामिति शेषः ॥ तत्र दृष्टान्तः—"यवसे" घासे "रणाः" प्रीति-युक्ता गावो "न" गाव इव (ता यथा प्रीतिं कुर्वते तद्वत् । कस्मिन् सति ? "अन्धसः" सोमाख्यस्यान्नस्य सम्ब-न्धिनि वस्तुनि "विमदे"(२) विविध-सोम-जन्य-मद-निमित्ते सति । कस्मादेवं ? यस्माद् "विवक्षसे" महान् भवसि ॥ ४ ॥ १९०

---

* "वावृधे"—इति ऋग्वेदस्य ।

---

१९१ ऋग्वेदस्य १,६,१,४ ।

(१)—'दक्षं प्रीयम्'-इति वि० ।
(२)—'विवो मदे' इत्यंशस्यास्य 'विमदे'-इति व्याख्यातम्, 'वो'-इत्यस्य व्याख्यानं क्वापि नोपलभ्यते ।

५ र र ५ २र र र १ २

1 क्रत्वामहा॑ऽ॒अनुष्वधाईमे। भीमआवावृ३ताइश्रा-

१ २ १ २ ३ ५ २ र

१वा॒२ः। श्रियऋष्वा३ः। ऊपाकाऽ२३४योः। निश्चिप्री-

१ १ १ २ २ १ १ ५

हिरी३वांदा१धा॒२इ। वस्तायो३र्वा३। जूमो२३४वा।

४ ५

याऽ५मोऽ६हाइ। ७॥ १९१॥

"क्रत्वा" कर्मणा प्रज्ञया वा "महान्" सर्वाधिकः "भीमः" शत्रूणां भयङ्कर इन्द्रः "अनुष्वधं" "स्वधेत्यन्न-नाम (नै० २,७, १७)। स्वधायां [विभक्त्यर्थेऽव्ययीभावः(१) ] सोम लक्षणस्यान्नस्य पाने सतीत्यर्थः। "शवः" आत्मीयं बलं "आवावृते" आभि-मुख्येन प्रावर्त्तयत्। तदनन्तरम् "ऋष्वो" दर्शनीयः(२) "शिप्री" हनुमान्। नासिकावान्वा(३)। "हरिवान्" हरि-भ्यामश्वाभ्यमुपेतः इन्द्रः "उपाकयोः" समीप-वर्त्तिनोर्हस्तयो

I औषसम्।

(१)—"अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावात्ययासम्प्रति-शब्द-प्रादुर्भाव-पश्चाद्-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्त वचनेषु"-इति (पा० २,१,६) अनेनैवेति भावः।

(२)—"ऋष्वः"-इति महन्नामसु तृतीयं नैघण्टुकम् (३,२)।

(३)—"शिप्रे हनू नासिके वा" इति नै० १२,१७।

अथ षष्ठी ।

गोतम* ऋषिः ।

३ १र २र३ २ ३ १ २　　३ १२
सघातंवृषणꣳरथमधितिष्ठातिगोविदम् ।

१र २र　　३ २ ३ १ २ ३ १ २　३ २क २र
यःपात्रꣳहारियोजनम्पूर्णमिन्द्राचिकेततियोजान्वि-

३ १ २
न्द्रतेहरी ॥ ६ ॥१९२

३ ४र ३ ४ ५　　३ २　३र ४र ५　　१　२र
I सघातंवृषणम् । रथा३४औहोवा । आधितिष्ठा ।

१ २　　१र २ १　　　१
तिगोवा१इदा२म् । यःपात्रꣳहा । रीयो२जा२२४-

बाह्वोः(४) "आयसं" अयोमयं वज्रं "श्रिये" सम्पदर्थं "निदधे" निदधाति स्थापयति (सोम-पानेन हृष्टः प्रबलइन्द्रः शत्रूणां हननाय हस्ते वज्रं गृह्णातीत्यर्थः ॥ ५ ॥ १९१

---

* 'गौतम'-इति वि० पाठः ।

---

१९२ ऋग्वेदस्य ६,३,४ ।

I लौगम् ।

(४)—"उपाके"-इति अन्तिक-नामसु सप्तमं पदम् (२,१६) ।

अथ सप्तमी।

वसुश्रुत ऋषिः।

३ १र २र ३ २उ ३ २ १र १र २र ३ १ २
अग्निं मन्ये यो वसुरस्तं यं यन्ति धेनवः।
३ १ २ ३ २उ ३ १ ३ २ ३ १ २ ३ २ ३
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य
१ २
आभर॥ ७॥ १९३

५ १र १ २ ३ ५ १र २
नाम्। पूर्णमि। द्रा। चीकेता२३४ती। योजानू३-
२ १ ३ ५र र ३ ५
वा३इ। द्रा२ता२३४औहोवा। हा२३४री। ८॥ १९२॥

"सघा"(१) स खल्विन्द्रः "वृषणं" कामाभिवर्षकं "गोविदं" गवां लम्भयितारं(२) "रथम्" "अधितिष्ठाति" इदृशे रथेऽधितिष्टतु आरूढो भवतु। हे इन्द्र! "यो" रथः "हारियोजनं" एतत्सञ्ज्ञं धाना-मिश्रितं "पूर्णं" सोमेन पूर्णं "पात्र" "चिकेतति" ज्ञापयति (तं रथमधितिष्ठेति पूर्वत्रान्वयः) अधितिष्ठाय "ते" त्वदीयौ "हरी" अश्वौ "नु" क्षिप्रं "योज" रथे योजय॥ ६॥ १९२

१९३ उत्तरार्चिकस्य ८,२,१०,१ = ऋग्वेदस्य ३,८,२२,१ = ऊहे ४,१६।

(१)—'घा'-इति दीर्घपाठः। तत्र "निपातस्य च (६,३,१३६)"-इति दीर्घः।
(२)—'गोविदं गाः येन लभ्यन्ते'-इति वि०।

I अग्निन्ता३म्मन्येयोवद्धः। अस्तंयंया३। तोधेना-
२३४वाः। अस्तमर्वा३। ताः२शा२३४वाः। अस्तन्नि-
त्या३। सोवा२जा२३४इनाः। इषा७स्तोस्तृ३४। हा-
होरे२३४हा। भ्या२३भा३। भा३४पुरोऽइहाइ॥ ८॥१९३

"तम्" अग्निं "मन्ये" स्तौमि। "यः" अग्निः "वसुः" वासकः। "यम्" "अस्तं" सर्वेषां गृहवदाश्रयभूतं(१) "धेनवः" गावः "यन्ति" गच्छन्ति प्रीणयितुम्। "अस्तम्" उक्तलक्षणम् "अर्वन्तः" अरणवन्तोऽश्वाः "आशवः"(२) शीघ्रगामिनः यन्ति। तथा "नित्यासः" नित्यप्रवृत्ताः "वाजिनः"(३) हविर्लक्षणान्न-वन्तो यजमानाः "यमस्तं" 'यन्ति' तम् मन्ये। "इषम्" अन्नं "स्तोतृभ्यः" अस्मभ्यम् "आभर" आहर इति॥ ७॥ १९३

---

I निषेधः साम।

(१)—"अस्तम्"-इति गृहनामसु पञ्चमं नैघण्टुकम् (३,४)।

(२)—"आशुः","आशु"-इति द्विलिङ्गमेव पदं पाठभेदेन निघण्टौ दृश्यते(२,१५,१६)

(३)—'वेगवन्तः'-इति वि०।

अथाष्टमी।

अंहोमुग्वामदेव्य ऋषिः।

२उ ३ १२ ३ १२ ३१२ ३ १२
नतमꣳहोनदुरितंदेवासोअष्टमर्त्यम्।
३ १ २ १ २ ३ २ ३ १२ ३२ २ ३ १ २ ३ १ २
सजोषसोयमर्यमामित्रोनयति*वरुणोअतिद्विषः॥८॥ १९४

॥ चतुर्थ-दशति॥

४ ५२ ४ ५ ४ ५ ४ ५ १ ३२ २
I नतमꣳहोनदुरितम्। इयद्याहाइ। दाइवा२सो-
१ २ १ २ १२ १ १ २ १२ १२ १ २ १२ २
अष्टमर्त्तियमी। यइया२३हाइ। सजोषसोयमर्यमाई।
२ १ २ १ २ १ ३
यइया२३हाइ। माइत्रोनायाइ। तिवा२रू२३४५णा-
१ २ १ २ १ १ १ १
ई५६ः। अतिद्विषा२३४५ः॥ १०॥ १९४

हे "देवासः" देवाः! [आज्जसेरसुक् (७,१,५०)] "तं" मर्त्यं

* "नयन्ति"--इति ऋग्वेदीयपाठः।

१९४ ऋग्वेदस्य ८,७,१३,१।

I गौराङ्गिरसस्य साम।

मनुष्यम् "अंहः" पापं दुरितं तत्फलरूपं दुर्गमनश्च "नाष्ट"(१) न प्राप्नोति (अश्नोतेर्लङि, झलोझलीति सिचोलोपः, अड़भावश्छान्दसः) "अर्यमा" अरीन् नियच्छति इति एतल्लक्षकोदेवः। (नयन्ति भवन् एते) "मित्रः" (प्रमीतेः) त्राता देवश्च नयति। "वरुणः" पापानां निवारको देवः "यं" "नयति"। एते त्रयो देवाः "सजोषसः" सङ्गताः समानाः प्रीयमाणा वा भवन्तः "द्विषः" द्वेष्टॄन् अतिक्रम्य "य" स्तोतारं नयन्ति (प्रत्येकविवक्षया एकवचनम्) तन्नाष्टेत्यन्वयः ॥ ८ ॥ ९९४

इति श्रीसायणाचार्य्यविरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्याष्टमः खण्डः ॥ ८ ॥

॥ इति पाञ्चम् ॥

परिप्रधन्वप्रभृतिऋचस्तिंस्रद्भवन्ति(क) हि ।
एतासान्तु ऋषिच्छन्दोदेवतास्तु पृथक् पृथक् ।
वक्ष्यन्ते सायणार्येण(ख) तत्र तत्र परिस्फुटम् ॥

(१)—"नाष्टः", "नाष्ठः", "नाष्ट"—इति वा निघण्टौ व्याप्तिकर्मसु पञ्चमं पदं पाठभेदेन पठ्यते (२,१८)।

(क)—तत्र, "परिप्रधन्वेन्द्रायेत्यादि दशर्चं प्रथमं दशत्, "विश्वतोदावन्विश्वतो" इत्यादि दशर्चं द्वितीयम्, "अचेत्यग्निः"-इत्यादि "इन्द्रोविश्वस्यराजतीत्यन्तं दशर्चं तृतीयमिति विवेकः।

(ख)—एषा पूर्वाचार्य-लेख-शैली यदाम्नानाम परोक्षेण निर्दिशति सायणाचार्येणेति।

अथ नवमखण्डे—

सैषा प्रथमा।

आद्यानां षसां ऋषि-त्रसदस्यू सहितावृषी,

पवमानो देवता। तत्रादिर्द्विपदा(॰)।

२३११ २ २ २३ १ २३१२ १२
परिप्रधन्वेन्द्रायसोमस्वादुर्मित्रायपूष्णेभगाय ॥१॥ १९५

४ ५ ४५ ४ १२ २ २ ५
I परिप्रधन्वा। इन्द्रायसोमास्वा१दू२३४:। हाइ।

२ १२ २२१२ ५ १ ५
मित्राया। पूष्णेभा२३४हाइ। गा२३४यो६हाइ॥ ११ ॥

४ ५ ४ ५ ४ १२ २ ५ २ ५ २
II परिप्रधन्वा। इन्द्रायसोमा। ओ२हा। ओ३हा।

---

१९५ उत्तरार्चिकस्य ६,१,८,१=ऋग्वेदस्य ७,५,२०,१=ऊहे ६,२०—१,५,१,५,१,८,२,१०—१०,८—१२,७—१४,४ १७,२,६—२१,१८=ऊह्ये ३,२,१४।

I,II इन्द्रस्य सङ्क्रमे द्वे।

(०)—"पङ्क्तिः पञ्चिनी पञ्चपदा"-इति दैवतब्राह्मणानुशासनम् (३,१३)॥ "पङ्क्तिः पञ्चपदा"-इति नैरुक्तम् (७,१२)। सर्वं ह्येतत् बह्वाक्षरपदाभिप्रायेण, गायत्र्या-स्तथैव दर्शनात्। वस्तुतस्तु "गायत्र्यावसवः, चत्वारि क्रमात् वर्द्धन्ते"-इति पिङ्गला-नुशासनात् चत्वारिंशदक्षरा पङ्क्तिः, दशाक्षरं च तस्याः पादमेकम्। सा च छन्दः-शास्त्रानुशासनात् (६ष०) त्रिविधा। प्रस्तारपङ्क्तिः, विष्टारपङ्क्तिः, संस्तारपङ्क्तिः, अक्षरपङ्क्तिः, पदपङ्क्तिरिति नामलक्षणयोर्भेदात्। सेयं द्विपदा, पङ्क्तौ गण्यते।

र १ र ५ र ५ र ३र २ ५र र
स्वादुर्मित्राया । ओ३हा । ओ२हा । पूष्णा३४औहोवा ।
२ १११११
भगा३या२२४५ ॥ १२ ॥

३२ १ ३ ५ ३ २ १
III परी३होइ । प्रधा२३४न्वा । इन्द्रा३हो । य-
३ ५ ३र २ १ ३ ५ ३र २ १
सो२३४मा । स्वादु३होइ । मित्रा२३४या । पूष्णो३होइ ।
३ ५ ४र ३र ४र ५ ३र २ १
भगा२३४या । पूष्णोभगाय । पूष्णो२४३ । हो२४३इ ।
२ ४ २ १ २ ३ ११११
भा३गा५या६५६ । ए३ । सुवर्वते२३४५ ॥ १३ ॥

२ २ १ २ ३ ५ २
IV हा३हाइ । परिप्रा३धान्वा । ए२३४हिया । हा-
२ २ र १ २ ३ ५
३हाइ । हा३हाइ । इन्द्राया३सोमा । ए२३४हिया ।
२ २ २ २ र १ २ ३ ५
हा३हाइ । हा३हाइ । स्वादुर्मी३त्राया । ए२३४हिया ।

---

III स्वर्निधनश्सौहविषम् ।

IV सौहविषम् ।

२ २ १ २ २र १ २ ३
हा३हाइ। हा३हाइ। पूष्णेभा३गाया। ए२३४-
५ २ १ १
हिया। हा३हा३४३इ। ओ२३४५इ। डा॥ १४॥

४ ५ २१ २ १ र
V प। र्यैपारो। प्रधन्वा। होवा३होइ। इन्द्रा-
र २ १ २र १ र २ १
यसोमा। होवा३होइ। स्वादुर्मित्राया। होवा३हो-
२ र १ ३ ५ ४
ये३। पूष्णौवाओ२३४वा। भगापूयाउ। वा॥१५॥१९५

हे "सोम!" "स्वादुः" स्वादुरसस्त्वं "इन्द्राय" "पूष्णे"(१) "भगाय"(२) एतेभ्यो देवेभ्यः "परिप्रधन्व" परितः पात्रेषु प्रचर॥ १ ॥१९५

---

V वाङ्निधनं सौहविषम्।

(१)—"पूषा"-इति निघण्टावन्तरीक्षदेवतासु सूर्यात् परं गणितम् (५,६)। व्याख्यातश्चैवं यास्कः—"यद्रश्मिपोषं पुष्यति तत् पूषा भवति"-इति।

(२)—"भगभादित्यः"-इति नै०३,१६। "भगोव्याख्यातः (३,१६) तस्य कालः प्रागुत्सर्पणात्"-इति च नै०१.१३।

अथ द्वितीया।

त्रिपदा अनुष्टुप् पिपीलिकमध्या(०)।

३ १र २र ३ १ २　३ १ २ ३ १ १ २ १ २
पर्यु षुप्रधन्ववाजसातयपरिवृत्राणिसक्षणिः।

३ २ ३ १ २　३ १ २
द्विषस्तरध्याऋणयानईरसे ॥ २ ॥ १९९

२र र र १ १ १ २
I पर्यू षुप्रधन्वावाजा३सा। तायाइ। ओइ। पारी।
१ २र १ ७ १
ओइ। वृत्राणि। सक्षणिः। द्वाइषस्तारा२। धि-
१ १र १
या२इ। ऋणाया२ः। ना२ः। ईरासा२३इ। ओ-
२ २ २
ये३। रसा३४३इ। ओ२३४५इ। डा ॥ १६ ॥

५ २ १ र २ १ २ ३ ५
II पर्यूषु। प्रधन्वावा३। जासाता२३४याइ।
२ र १ २ २ १र २ २
परिवृत्राणिसक्षणिः। द्विषास्ता३रा। धियाऋणया१ना-
२ १ २ ५
३ई। इम्। रा३४४सो६हाइ ॥ १७ ॥

---

१९९ उत्तरार्चिकस्य ६,१,७,१ = ऋग्वेदस्य ७,५,२२,१ = ऊहे ३,१,७।

(०)—"पिपीलिका—पेलतेर्गतिकर्मणः, पिपीलिकमध्येत्यौपमिकम्"-इति दैवत-ब्राह्मण-तृतीयखण्डे। एतदेव पाठभेदेन निरुक्तावपि, तद्यथा "पिपीलिकमध्ये-त्यौपमिकं, पिपीलिका—पेलतेर्गतिकर्मणः"-इति (दै० १,१३)।

४ ५ १र र र र र र
III प। यंपारौ। ऊषुप्रधन्वावाजसातयेपरिवृत्रा-

२ १ १ १र र
णिसक्षणिर्वार२३इषाः। ता२३रा। धियाऋणयानओ

२ १ ५ ४ ५
वा३ओ२३४वा॥ रा५सोऽदाइ॥ १८॥१९६॥

हे "सोम!" सुष्ठु "वाजसातये" अस्मभ्यमन्नदानायैव "परि-प्रधन्व" परितः प्रगच्छ। [यद्वा। "वाजसातये" अन्नलाभाय(१) सङ्ग्रामं प्रगच्छ।] किञ्च। "सक्षणिः" सहनशीलस्त्वं "वृत्राणि" शत्रून् "परि" गच्छ। तदेवोच्यते—"नः" अस्माकं "ऋणया"(२) "ऋणानां यापयिता विनाशयिता त्वं "द्विषः" शत्रून् "तरध्यै"(३) तरीतुं हन्तुम् "ईरसे"(४) परिगच्छसि।

"ईरसे"—"ईयसे"-इति पाठौ॥ २॥ १९६

---

I,II,III वाक्यानि त्रीणि।

(१)—'अन्नसम्भजनाय'-इति वि०।

(२)—'ऋणया'-इति तु "सुपां सुलुगित्यादिना (७,१,३९) सुपोऽयाचि साधितुं बहु सुकरं यथा कौमुद्यां दर्शितं च सम्यगेति।

(३)—'तरध्यै'-इति "तुमर्थे से सेनऽसेन्"-इत्यादिना (३,४,९) सिद्धम्।

(४)—"ईरसे'-इति, निघण्टौ (२,१४)गति-कर्मसु पठितस्य "ईर्त्ते"-इत्यस्य लेटि (३,४,७) अड़ागमे (३,४,९४) रूपमिदम्।

अथ तृतीया।

द्विपदा(°)।

१ २ ३ १ २ ३ २ ३ २ ३ २ ३ २ ३ १र २र
पवस्व सोम महांत्समुद्रः पिता देवानां विश्वाभिधाम ॥२॥ १८७

४५ र ४ १ २र १ २ १र ५र १र
I पवस्व सोमा। माहांत्समुद्राः। पिता दे२वाना-
१ २ ५र र २ १र १ १ १ १
२३म्। वा२इश्वा२३४औहोवा। भिधामा२३४५॥ १८॥

५र ५ २र ५ र १ ३ ५र
II औहो३वा। औहो३वा। औहो२वा२३४औ-
५ १ २ र १र २ १ २ १र ५र १र ५र
हो६वा। पवस्व सोम। महांत्समुद्रः। पिता दे२वाना-
१ २र १ र ५र ५ २र २
२म्। विश्वाभिधामा२३४। औहो६वा। औहो३वा।
र १ ३ ५र ५ २ १ १ १ १ १
औहो२वा२३४औहो६वा। ए३। धर्मा२३४५॥२०॥ १८७

---

१८७ उत्तरार्चिकस्य ५,१,१७,१ = ऋग्वेदस्य ७,४,२०,४ = ऊहे ५,१,८—२१,२,८।

I धाम साम। II धर्म साम।

(°)—द्विपदा, पङ्क्तिरिति शेषः, विंशत्यक्षरदर्शनात्।

अथ चतुर्थी।

१ २ ३२उ ३ १ ३ २ ३ २ ३ १र २र
पवस्वसोममहेदक्षायाश्वोननिक्तोवाजीधनाय ॥ ४ ॥ १९८

५र ५ २र २ १र ५ १ २ र
I औहोइवा। औहो३वा। औहोइवा। पवस्वसो-

१र २र १ २र १ २ १ ऽर १र ऽर ३
म। महेदक्षाय। अश्वोननिक्तः। वा२जीधना२या-

हे "सोम!" "महान्" देवेभ्यो दीयमानत्वेन महत्त्वयुक्तः। "समुद्रः" समुन्दनः यस्मात् समुद्रवन्ति रसास्तादृशः([१])। "पिता" सर्वेषां पालयिता([२]) त्वं 'देवानां" "विश्वा"([३]) विश्वानि सर्वाणि "धाम"([४]) धामानि शरीराण्यभिलक्ष्य "परि पवस्व" परिक्षर ॥ ३ ॥ १९७

---

१९८ उत्तरार्चिकस्य ५,२,१८,१ = ऋग्वेदस्य ७,५,२०, १० = ऊहे ६,१,४।

(१)—"समुद्रः—इत्येतत् पार्थिवेन समुद्रेण सन्दिह्यते। समुद्रः—कस्मात्? समुद्द्रवन्त्यस्मादापः, समभिद्रवन्त्येनमापः, सम्मोदन्तेऽस्मिन् भूतानि, समुदको भवति समुनत्तीति वा"-इति नि० २,१०।

(२)—"पिता—पाता वा पालयिता वा"-इति नि० ४,२१।

(३)—आर्वे रूपम् (७,१,३९)।

(४)—सुपि रूपम् (७,१,३९)।

५र　२　१र　२　र १ ३　५र
२३४। औहोइवा। औहोइवा। औहोरवा२३४उहोइ-

५　१　१ २२ २१११
वा। ए३। विधर्मा२३४५॥ २१॥

४५ र ४　१र　१　१र
II पवस्वसोमा। महेदा३क्षाया२। अश्वोननिक्तो-

र २　५रर　२　१ २१११
२३। वाजा४। औहोवा। धना३या२३४५॥ २२॥ १९८

हे "सोम!" "अश्वोन" अश्वः(१) इव "नक्तः" वसतीवरीभि-रद्भिर्विनिर्णिक्तः। "वाजी" वेगवान्(२) त्वं "महे" महते "दक्षाय" बलाय(३) "धनाय" धनार्थञ्च "पवस्व" क्षर।

'महे'—"क्रत्वे"-इति पाठौ॥ ४॥ १९८

---

I, विधर्म साम।　　II धनसाम।

(१)—"अश्वः—कस्मात्? अश्नुतेऽध्वानं महाशनो भवतीति वा"-इत्यादि नि० २,२७।

(२)—'वेगवान् अन्नवान् वा'-इति वि०।

(३) —"दक्षः"-इति बलनामसु नवोदशं नैघण्टुकम् (२,९)।

अथ पञ्चमी ।

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ २ २
इन्दुःपविष्टचारुर्मदायापामुपस्थेकविर्भगाय ॥ ५ ॥ १९९

४ ५ ४ १ १ २ १ १ २ १
I इन्दु :पविष्टा । चा२३रूः । मदाया । अपामुपा-

२ १ १ ५ ९ २ २ १ १ १ १ १
२३स्था३इ । का२वा२३४औहोवा । भगा३या२३४५ः ।

॥२२॥ १९९

"चारुः" कल्याणरूपः "कविः" क्रान्तप्रज्ञः(१) "इन्दुः" सोमः । "अपाम्" उदकानाम् "उपस्थे" उपस्थाने अन्तरिक्षे पवित्रे वा "मदाय" मदार्थम् । "भगाय" भजनीयाय(२) धनार्थञ्च "पविष्ट" पवते(३) ॥ ५ ॥ १९९

---

१९९ ऋग्वेदस्य ७,५,२१,२ ।

I भागम् ।

(१)—'कविः मेधावी'-इति वि० । "कविः"-इति निघण्टौ च मेधावि-नामसु दशमं पदम् (३,१५)। "मेधावी—कस्मात्? मेधया तद्वान् भवति"-इति, "मेधा? मतौ धीयते"-इति नैरुक्तम् (३,१९) । इत्यत्रापि प्रतिपन्नं कविः क्रान्तप्रज्ञ इति ।

(२)—"भगोभजतेः"-इति नि०१,७। निघण्टौ धननामसु च इष्यते भगइति (२,१०,१०)।

(३)—'पविष्ठ जातः'-इति वि० ।

अथ षष्ठी।

त्रिपदा अनुष्टुप्। पिपीलिकमध्या।

ऋषिर्देवते पूर्ववत।

२ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अनुहित्वासुतꣳसोममदामसिमहेसमर्यराज्ये।

१ २ ३ १ २ ३ १ २
वाजाꣳअभिपवमानप्रगाहसे॥ ६॥ २००

४ ५ ४ १ १र १ २र १२र२
I अनु। अनू। हाइत्वासुतꣳसोममदामसि। म-

र ११ २ २ २ ५ २१र२र १र
दामसायेर। महा३४३इ। सा३४मा। यंराज्ये। वा-

१र १ १र२ २र १ २र १ २ ४
जाꣳअभिपवमान। पवमाना। प्रागाहसा। औ३हो-

५ ४
वा। हो५इ। ४ डा॥ २४॥ २००

हे "सोम!" "सुतम्" अभिषुतं "त्वा" त्वां वयम् "अनुमदा-
मसि(१)हि" अनुमदामः अनुक्रमेणाभिष्टुमः खलु। हे "पव-

---

२०० उत्तरार्चिकस्य ६,१,७,२=ऋग्वेदस्य ७,५,२२,२
ऊहे ६,१,१८—१६—८,२,८=ऊह्ये २,१,७।

I वाजिनाꣳसाम।

(१)—"इदन्तोमसि (७,१,४६)"-इति मस इगागमे रूपम्।

अथ सप्तमी।

वासिष्ठी। द्विपदा। मारुती।

२क२र३ २३ १२ ३२३ २३ २३ १२
कई व्यक्ता नरः सनीडा* रुद्रस्य मर्या अथा† स्वश्वाः॥ ७॥ २०१

४५र४ ४ २ १ १
I कई व्या५क्ताः। नरःसा३ना२इडा२ः। रुद्रस्यमर्या-

१ ३ ५र र २ १११११
२३ः। आ२था२३४औहोवा। सुवा३श्वा२३४५ः॥२५॥

मान" पूयमान साम! स त्वं "महे" महति "समर्थराज्ये"(२) महत् समनुरूपं त्वदीयं राज्यमनुपालयितुं "वाजान्"(३) अन्नबलान्यभिलक्ष्य "प्रगाहसे" प्रगच्छसि॥ ६॥ २००

---

* "सनीका"--इति, † "अधा"-इति च ऋग्वेदीय-पाठौ।

---

२०१ ऋग्वेदस्य ५,४,२३,१।

I ह्रिकं साम।

(२)—'समर्थराज्ये विप्रराज्ये यज्ञे'-इति वि०।

(३)—'वाजान् अन्नानि'-इति वि०। वाजइत्यन्ननामसु (२,७,२) बलनामसु च पाठभेदेन (२,९,२) दृश्यते निघण्टौ।

२ २　　२ १ ५र　　२ २　　२ ३र ५र　　२ १
II कई२ ४३वियक्ताः । नरा३४३:सनीडाः । रुद्र-

७　　१　२　५रर　　२　१　१ १ १ १
स्यमर्या२३ः । आ२था२३४औहोवा । सुवा३स्वा२३४५ः

॥ २६ ॥

४ ५　　१　　१ २　　४ ५
III काईम् । वियार३ । औवा३ । आक्ताः ।

४ ५　　१　　१ २　　४　५　　४ ५　　१
नाराः । सना२३ । औवा३ । आइडाः । रुद्रा । स्य

१ २　　४ ५　　४ ५　　१　　१ २
मा२३ । औवा३ । आर्याः । आथा । सुवा२३ । औवा३ ।

४ ५　　४
आस्वाः । होध्इ । डा ॥ २७ ॥ २०१

"व्यक्ताः" कान्तियुक्ताः "नरः" नेतारः "सनीड़ाः" समानौ-नौकसः "रुद्रस्य" रोदनशीलस्य(१) एतन्नामकस्य "मर्य्याः" मर्य्य-

---

II विक्तं साम । III निक्तं साम ।

(१)—"रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा । यदरुदत् तद्रुद्रस्य रुद्रत्वमिति काठकम् । यदरोदीत् तद्रुद्रस्य रुद्रत्वमिति हारिद्रविकम्"-इत्यादि नि० दै०४,६ ।

अथाष्टमी ।

पदपङ्क्तिः(१) । आग्नेयी । वामदेवऋषिः ।

३ २ ३ ३ ३ २ उ ३ १ ३ २ ३ २ ३ ३ १ २
अग्नेतमद्याश्वनस्तोमैःक्रतुन्नभद्रᳫंहृदिस्पृशम् ।

३१ २ ३ १ २
ऋध्यामातऔहैः ॥ ८ ॥ २०२

५ २ ४ ५ १ १२ २ १
I अग्नेतमाद्या । अश्वन्नस्तोमाइः । क्रतुन्नाइभा-

१ २ १ २ १ ३ ५ २ २
द्रा२म् । हार्दिस्पृशाम् । ऋद्ध्या२मा२मा२३४औहोवा ।

२ १ २ २ १ १ १ १ १
तऔहा२३४५इः ॥ २८ ॥

नृभ्यो हिताः(२) । अथापि च "स्वश्वाः" शोभनवाहाः "इमम्" एवभूताः(३) "के" भवन्ति ? रूपातिशयात् ऋषिः(४) आश्चर्यं वाहेति ॥ ७ ॥ २०१

---

२०२ उत्तरार्चिकस्य ८,१,५,१ = ऋग्वेदस्य ३,५,१०,१ यजुर्वेदस्य १५,४४—१७,७७ = ऊहे २१,२,७ ॥

(१)—गायत्रीपादसदृशाक्षरैरस्याक्षयः पादाः अयन्तोऽतः पदपङ्क्तौ गण्यते ।

(२)—"मर्या—इति मनुष्यनाम, मर्यादाभिधानं स्यात्"-इति नि०४,२ ।

(३)—"मिताक्षरेष्वनर्थकाः कमीमिद्विति"-इति (१,९) निरुक्तवचनादवमेम् इति अनर्थकम् विवरणमतम् ।

(४)—"ऋषिर्दर्शनात्"-इति नि० २,११ ।

५ ‍र  २  २ ३ ५  १  १र
II अग्ने । वो३४३इ । तमद्य । अश्वन्नस्तोमाइः ।
२  १  १ २ १  २  १
क्रतुन्ना३भाद्रा२म । व्हार्दी३ओइ । स्पृशम् । ऋध्यामा२-
३  ५र र  २२र ३ १११
मा२३४औहोवा । तओहा२३४५ ॥ २६ ॥ २०२

हे "अग्ने!" "अद्य" अस्मिन्नहनि, वयमृत्विगादयः "ओहैः"(१) इन्द्रादि-प्रापकैः "स्तोमैः" स्तोत्र-समूहैः(२) "तं" प्रसिद्धं त्वाम् "ऋध्याम"(३) समर्द्धयामः। कीदृशं त्वाम्? "अश्वं न" वोढारमश्वमिव तथा "हविषः" वाहकम्। "क्रतुं न" कर्त्तारमिव उपकारिणमित्यर्थः। तथा "भद्रं" भजनीयम्(४)। "हृदिस्पृशं" हृदयङ्गम्(५) अतिशयेन प्रियमित्यर्थः ॥ ८ ॥ २०२

---

I,II आश्विहे ।

(१)—ओहैरिति श्रुतेः ऊहगानैर्येरित्यर्थस्तु सुलभः, एवं नास्य भाष्यकृतः सम्मतः, एतन्मये ऊहगानस्य यौनिगानमूलकत्वेनानादित्वाभावात् ।

(२)—बहिष्पवमानादिभिरित्यर्थः ।

(३)—निघण्टौ परिचरण-कर्मसु पठितस्य ऋध्नोतीत्यस्य रूपम् (३,५,७) ।

(४)—'भद्रं दीप्तम्'-इति वि० ।

(५)—'हृदयं स्पृशति, हृदयेन वा स्पृश्यते'-इति वि० ।

अथ नवमी।

पुरउष्णिक्। वाजिनां स्तुतिः।

३ १ २ ३ १२ १ ३ १ २ १२ ३ १ २ ३ २ ३२
आविर्मर्या आ वाजं वाजिनो अग्मन्देवस्य सवितुः सवम्।

३ १ २
स्वर्गं३ अर्वन्तो जयत॥ ९॥ २०३

I आविर्म्मा२३४र्य्याः। आवाजंवाजिनोअग्मान्। देवस्यस। वितुःसा२३४वाम्। स्वर्गा३ अर्वा२३४५न्ता६५६ः। जयता२३४५॥ ३०॥ २०३

"मर्य्याः" मनुष्येभ्यो हिताः "आविः" प्रकाशमानाः "वाजिनः" देव-विशेषाः(१) वाजिन-भाजः(२) "सवितुः" प्रेरकस्य देवस्य(३) "सवम्" अभिषोतव्यं "वाजम्" अन्नरूपं सोमं "अग्मन्" अगमन्। ततो हे यजमानाः! "स्वर्गं" "जयत" तथा "अर्वन्तः" अर्वतोऽश्वान् जयत॥ ९॥ २०३

---

I वाजिनां साम।

(१)—वाजिन इति निघण्टौ द्यु-देवत-विभागे त्रिंशत्तमो देवगणः (५, ६,) "वेजनवान्" इति च तत्रैवोक्तम् (२, २८। १०, ३१)।

(२)—तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, आमिक्षा-निःसृतं च जलं वाजिनम्।

(३)—"सविता सर्वस्य प्रसविता"-इत्यादि च नै० १०, ३२-३३।

अथ दशमी ।

ऐश्वरयोधिंष्ण्या ऋषयः । द्विपदा ॥

१२　　३ १　१ ३ १ ३ १र　　२र३　१ २ ३ २
पवस्वसोमद्युम्नीसुधारोमहा३ँअवीना*मनुपूर्व्यः ॥१०॥ २०४

॥ पञ्चम-दशति ॥†

४ ५　र ४　　३ २　　१ ३र५　　१ २र　१ र
I पवस्वसोमा । द्यु॒म्ना३४२सुधारः । माहा३ँअवी

१　२र　　३ २
नाम् । अनुप । र्व्वियो२३४५इ । डा ॥ ३१ ॥ २०४

हे "सोम!" "द्युम्नी" [द्युम्नं द्योततेः, यशो वान्नं वेति यास्कः (नि० नै० ५,५)] अन्नवान् यशस्वी वा । "सुधारः" शोभन-धारा-युक्तः "पूर्व्यः" पुरातनः "महान्" त्वम् "अवीनां" "रोम्णां" रोमभ्यः सकाशात् "अनु" क्रमेण "पवस्व" चर ॥ १० ॥ २०४

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने
चतुर्थस्याध्यायस्य नवमः खण्डः ॥ ९ ॥

---

* "महामवीना"-इति ऋग्वेदीयपाठः ।

---

२०४ ऋग्वेदस्य ७,५,२० ।

I पवित्रम् ।

---

† ॥ इति पञ्चमस्यार्द्धः प्रपाठकः ॥

अथ दशमे खण्डे —

सैषा प्रथमा।

ऐन्द्री।

१ २ ३ १ २ ३ १ १ ३ २ ३ १ २ ३ १ २

विश्वतोदावन्विश्वतोनआभरयंत्वाशविष्ठमीमहे ॥ १ ॥ २०५

५ र २र १ २ २ २

I विश्वतोदाउ। दावन्विश्वतोनाः। ओ३। हा।

३ ५ २र २ र १ २ १ २र १

ओ२३४हायि। आ। भरा। भा२३रा। यौत्वाशवि-

२१ १ १र ३र ५ २र र ३र २

ष्ठमायि। माहा। औहो२३४वा। ए हीयैही ऽ१ ॥ ३२॥

४ ५ र र ४ ५र ४ २ र १ २

II विश्वतोदावन्विश्वतोनआ। भरा। भार३रा।

१ २र १ २ १ १ १ २ ४ ५

यांत्वाशविष्ठमायिम। हा। औ३होवा। होऽ५इ।

डा ॥ ३३ ॥ २०५

हे "विश्वतोदावन्" सर्वतश्छेदनवन्(१) सर्वत्र दानवन् वा(२) इन्द्र! स त्वं "विश्वतः" सर्वतः "नः" अस्मभ्यम् अभीष्टम् "आभर"

---

I, II आभरे हे।

(१)—दावन्निति 'दो अवखण्डने'-इत्यस्य रूपमिति स्वीकृते इति भावः।

(२)—दावन्निति ददातेरिति स्वीकारे इति भावः।

अथ द्वितीया।

ऐन्द्री।

३ २३ २उ　३ २ ३ १ ३ १ २ ३ २ ३ २
एषब्रह्मायऋत्वियइन्द्रोनामश्रुतो गृणे ॥ २ ॥ २०६

४ ५　१ र २　२　२ ३ २
I एषाः। ब्राह्मायआ३१उवा२३। ए३। त्वियआ।

२　२　१ २　२　२ ३ २
आ२३यिन्द्राः। नामश्रुता३१उवा२३। ए३। गृणआ

॥ ३४ ॥

४ ५ ४ ५　१　१　२ १　२
II एषाएषाः। ब्राह्मा२ब्राह्मा२। यऋत्वियोवा।

१ २　१　१　१र　२　१ २
ओवा। आयिन्द्रा२आयिन्द्रा२ः। नामश्रुतोवा। ओवा।

२ १　२ ४ ५　४
गृणा। औ३होवा। हो5५इ। डा ॥ ३५ ॥

आहर। किञ्च। "शविष्ठम्" अतिशयेन बलवन्तं "यं" त्वाम्" "ईमहे" अभीष्टं याचामहे(१) ॥ १ ॥ २०५

---

२०६ उत्तरार्चिकस्य ८,१,१,१ = ऊहे २१,१,८।

I,II वासुमन्दे हे।

(१)—"ईमहे"-इति याच्ञा-कर्मसु प्रथमं नैघण्टुकम् (३,१९)।

४५ ४ ४५ १२र १ ७
III एषाः। ओ। ओवा। ब्रह्मायाः। क्षत्रिया२ः।
१ २ २ २ १ १ २ २ १
आयिन्द्रो३हा३यि। ना३मा। श्रू२३तो। गृणा।
२ ४ ५ ७
औ३होवा। हो५इ। डा॥ ३६॥

४ २ २ ५ २र१ २ ३
IV ओ३हा३४३। ओ३४हा। एषाब्राह्मा३४३। या-
५ ४ ऽ २ २ ५ २१ २
३४ः। क्षत्रियाः। ओ३हा३४३। ओ३४हा। इन्द्रोनामा
२ ५८ ४ ऽ २ २
३४३श्रू३४। तोगृणायि। ओ३हा३४३। ओ३४५हा६५६।
२ १ २ ३ १ १ १ १ १
ए३। सुवर्वर्त २३४५॥ ३७॥

२८ १र २र १ २र १रर
V एषब्रह्मौहो। याक्षत्रियाः। इन्द्रोनामौहो।
२र१र २ २ २
श्रूतोगृणा३१उवा२३। ऊ३४पा॥ ३८॥ * २०६

---

III,IV,V काव्यानि त्रीणि।

---

*॥ इति ग्रामे गेये एकादश-प्रपाठकः॥

अथ तृतीया ।

त्रसदस्युऋषिः ।

३ १ ३ १ २ ३ १ २ ३ १र २र ३ १ २ ३ २ ३ १ २
ब्रह्माणइन्द्रं महयन्तोअर्कैरवर्द्धयन्नहयेहन्तवाउ ॥३॥ २०७

५ र २ १ १
I ओम् ॥ हाउस्वरता। ब्रह्माणा २ः। इन्द्रम्। आ-

१ २ १ १ २ २ र २
महया२न्तो२३४कैः। अवा २र्द्धयान्। अहयेह। तवा२३-

५ २र १ १११
४पूयि। ऊ६पू६। श्लोकयता२३४५ ॥ १ ॥

५र ५ २१८
II हाउ। सभी। स्वरता। ब्रह्माणआयिन्द्रा २म्।

"ऋत्वियः" ऋतौ वसन्तादि-समये भवः "यः" इन्द्रः "नाम-श्रुतः" विश्रुतः "एषः" "ब्रह्मा" स्तोतॄणामभीष्टस्य वर्द्धयिता(१) तमहं "गृणे" स्तौमि ॥ २ ॥ २०६

---

२०७ ऋग्वेदस्य ४,१,२८,४ ।

I,II श्लोके द्वे ।

(१)—ब्रह्मेति वृद्धि-इत्यस्य रूपमित्यभिप्रेत्योक्तमेवम्।

अथ चतुर्थी।

ऐन्द्री।

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ १
अनवस्तेरथमश्वायतक्षुस्त्व*ष्टावज्रम्पुरुहूतंद्युमन्तम् ॥४॥ २०८

२ १ ३ ५ २ १ २ र १
मह्वया२न्तो२३४। कैः। अवर्द्धाया२न्। अह्वयेहन्तवार-
४ ५
३४५ऊ६५६। स्नो२३४का: ॥ २ ॥ २०७

"अहये" वृत्राय(१) [क्रियाग्रहणं कर्त्तव्यमिति कर्मणः सम्प्रदानत्वात् हनन-क्रियायां वृत्रस्य सम्प्रदानसंज्ञा] "हन्तवै" [तुमर्थे सेऽसेनिति (३,४,९) तवै(२) प्रत्ययः] हन्तुम् "अर्कैः" अर्चनीयैः स्तोत्रैः मन्त्रैः हविर्लक्षणैरन्नैर्वा "महयन्तः" पूजयन्तः(४) "ब्रह्माणः" ब्राह्मणाः "इन्द्रम्" अवर्द्धयन्" वर्द्धयन्ति प्रीतं कुर्व्वन्तीत्यर्थः ॥ ३ ॥ २०७

---

* "तक्षत् त्व"-इति ऋग्वेदस्य।

---

(१)—'अहये—दानवाय'-इति वि०। निघण्टौ मेघ-नामसु अहिरिति एकविंशतितमं पदम्, वृत्र इति तु अष्टाविंशतितमम् (१,१०)।

(२)—क्वचि "तवै', 'उ'-इति छेदः।

(३)—"अर्कोदेवोभवति यदेनमर्चन्ति। अर्को मन्त्रो भवति यदनेनार्चन्ति अर्कमन्नं भवत्यर्चति भूतानि। अर्को वृक्षोभवति स वृत्तः कटुकिम्ना"-इति नि० ५, ४।

(४)—"महयति"-इत्यर्चति-कर्मसु पठितं एतमं नैघण्टुकम् (३ १४)।

५र  २ ऽ १ २  १ २ र
I हाउस्वरता। स्वरतस्वरा२३ता। आनवस्ते-
१२ २र १ २ ५र २ऽ १
रथम्। आयाता१च्च२३४ः। हाउस्वरता। स्वरतस्वरा
२ १२र १२ १ २ १ ५र
२३ता। त्वष्टावज्रं पुरुहू। ताद्युमान्ता२३४म्। हा-
२ ऽ १ २ ५रर २
उस्वरता। स्वरतस्व। रा२ता२३४औहोवा। स्वराऽ३ता
१११.१
२३४५॥ ३॥ २०८

हे इन्द्र! "अनवः" मनुष्याः(१) "ऋभवः"(२) "ते" त्वत्सम्बन्धिने "अश्वाय" वाहनाय(३) तदर्थं "रथं"(४) "ततक्षुः" कृतवन्तः(५)

---

I आनुस्तोकम्।

(१)—अनवः-इति मनुष्य-नामसु नविंशतितमं नैघण्टुकम् (२,३)।

(२)—"ऋभुर्विभ्वावाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुस्तेषां प्रथमोत्तमाभ्यां बहुवन्निगमा भवन्ति न मध्यमेन। तदेतदृभोश्च बहुवचनेन चमसस्य च संस्तवेन इति दशतयीषु सूक्तानि भवन्ति। आदित्यरश्मयोऽप्यृभव उच्यन्ते"-इति नि० ११, १६।

(३)—"अश्वो वोढा (१अ, ६स, ७अतु, ८सू, ४हक्) " इत्यादिश्रुतेरश्वस्य वाहनत्वम्।

(४)—"रथो रंहतेर्गतिकर्मणः स्थिरतेर्वा स्याद्विपरीतस्य रममाणोऽस्मिंस्तिष्ठतीति वा, रपते र्वा, रसते र्वा" इति नि० ९,११।

(५)—"तक्षतेर्वा स्यात् करोति-कर्मणः"-इति नि० ८, १३। सार्वकालिक-लिडि रूपम् (३,४,६)।

अथ पञ्चमी।

ऐन्द्री।

२ ३ १ ३ १ २ ३ २ ३ १ २८ ३१ २ ३ २ २
शग्ध्यद्‌मंघ०ँरयीषिणेनकाममव्रतोहिनोतिनस्पृश-

३ २
द्रयिम् ॥ ५ ॥ २०९

३८ २ ३ ४ ५ २ १ २
I औहोयि। शग्ध्यदाम्। मघ०ँरया ऽ१२३४यि।

४ १ २ २ २ २ २ ४
षिणायि। नकाममव्रतोहिनोतिनस्पृशत्। रयिमो२३४५

डा ॥ ४ ॥ २०८

हे "पुरुहुत" बहुभिराहुतेन्द्र! "त्वष्टा" विश्वकर्मा च(१) त्वदीयं "वज्रं" "द्युमन्तं" दीप्तिमन्तमकरोत् ॥ ४ ॥ २०८

---

I आनुस्तोकम्।

(१)—"विश्वकर्मा सर्वस्य कर्त्ता इति नि० १०,२५। तथाच ऋग्वेदीया श्रुतिः—

"य इमे द्यावापृथिवी जनित्री रूपैरपिंशद् भुवनानि विश्वा।
तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान्॥"
(ऋ० १० म० १० अनु० ९सू० ९ऋ०)

अथ षष्ठी ।

इयं वैश्वदेवी ।

२ ३ २ ३ १ २ १ २ १ १ ३ १ २ ३ १ २ ३ १ २
सदागावःशुचयोविश्वधायसःसदादेवाअरेपसः ॥६॥ २१०

४ ५ २र २ २१र २ ३
I सादा । गावःशुचयोविश्वधायार२३सा: । सार-

५ १ २ २ १ ५ ३ ५
३४दा । दायिवाअरोर२३४वा । पार२३४सा: ॥ ५ ॥ २१०

"रयीषिणः" रयिं धनं हविर्लक्षणं प्रेषयन्तो जनाः "शं" सुखं "पदं"(१) स्थानं "मघं" धनं च लभन्ते इति शेषः । "अव्रतः" इन्द्र-विषय-यागादि-कर्म-रहितः(२) पुरुषः शं सुखादिकं "न हिनोति" न प्राप्नोति, दातुं समर्थो न भवतीत्यर्थः । स्वयमपि "कामम्" अभीष्टं "रयिं" रमणीयं धनं "न स्पृशत्"(३) न स्पृशति ॥ ५ ॥ २०९

"गावः" गन्तारः स्तोतारो वा(१) "सदा" इन्द्रं पर-रणादिभि-

---

I, वाचः साम ।

(१)—'शं सुखं, तस्य पदम्,-सम्पदम्' इति वि० ।

(२)—व्रतमिति कर्म-नामसु पठितं नैघण्टुकम् (२,१) ।

(३)—स्पृशदिति लेटोरूपम् ।

(१)—गच्छन्ति, गातेर्वा कारीनामकरणः"-इत्यादि द्विविध-नैरुक्त-दर्शनादित्यभि-

अथ सप्तमी।

सम्पातऋषिः।

द्विपात्। उषस्या।

१ २ ३१२ ३१ २र ३१र २र
आयाह्विवनसासद्दगावःसचन्तवर्त्तनिंयदूधभिः ॥ ७ ॥ २११

३र २ ४ ५ १ १र
I औहोइयि। आयाही। वना२सासद्दा।

१ २ १० १ १ ऽ २ ३
गावःसच। तावर्त्तानी२म्। यात्। ऊर। धभिरोरइ-

४५ई। डा ॥ ६ ॥ २११

रुपगच्छन्ति ते "शुचयः" निर्मलाः "सदा" सर्वदा "विश्वधा-यसः" विश्वं धारयन्ति पुष्णन्तीति विश्वधायसः बहुन्नाः भवन्तीत्यर्थः। "सदा" सर्वदा "देवाः" दानादि-गुण-युक्ताः "अरेपसः" पाप-रहिताश्च(२) भवन्ति ॥ ६ ॥ २१०

---

२११ ऋग्वेदस्य ८,८,३०,१।

I वाचः साम।

प्रायः २,५। अथवा गावः आदित्य-रश्मयः ( नै० १,५,३) अमेध्येऽपि पतमानाःशुद्धाः। अथवा गावः आपः, भूमि-गताः (नै० १,१,१,) अथवा गावः वाचः ( नै०१,११,४ )।— 'ऋग्यजुः'सामलक्षणाः'-इति वि०।

(२)—'अरेपसः- अ-लेपिताः अ-पापाः; रेपइति पाप-नाम' इति वि०।

अथाष्टमी ।

१ २ ३ १र २र　　३ १ २ १ २　　३ १ ३ १ २
उपप्रक्षेमधुमतिक्षियन्तःपुष्येम*रयिन्धीमहेतइन्द्र ॥८॥ २१२

४　　४ ५　४र ५　　४ ५　४　१
I औवा । उपप्रक्षेमधुमतिक्षियन्तः । औवाऔयि ।

१ र　　र र २ १　　२　१　　२　१
पुष्येमरयिन्धामहेतआ२३यिन्द्रा । औ । वाऔवा । औ ।

२र　　२　५
वाहा३१उवा२३ । ऊ३४पा ॥ ७ ॥ २१२

हे "उषः !" "वनसा" वननीयेन तेजसा "सह" सार्द्धम् "आयाहि" आगच्छ । उषसो वाहनभूताः "गावः"(१) "वर्त्तनीं" रथं "सचन्त" सेवन्त(२) अनश्वेन रथेनायाहीत्यर्थः । "यत्" याः गावः "ऊधभिः" उपलक्षिताः प्रभूताः पीना इत्यर्थः । ताः गावः इति सम्बन्धः ॥ ७ ॥ २११

---

* "पुष्यन्तो"-इति ऋग्वेदीयपाठः ।

---

२१२ उत्तरार्च्चिकस्य ४,१,२,४ ।

I माधुच्छन्दसम् ।

(१)—अत्र गावइति रश्मयइत्यर्थः (नै० १,५,३) उषसश्चन्द्रवात् रैव अपुर्व्वा- त्वाद् वाहकत्वेनोपवर्च्यते ।

(२)—"षच सेवने सेचने च (भ्वा० आ०)" ।

अथ नवमी।

१ २ ३ २ ३ १ २ ३ १र २र ३ २उ ३ १ २र
अर्चन्त्यर्कं मरुतः स्वर्का आस्तोभति श्रुतो युवा स इन्द्रः ॥९॥२१३

४ ५ ४ १ २ १ २ १ २र २
I अर्चन्तिया । कम्मरुतः सुवा२३र्काः । आस्तोभता-

२ १र २ ५ २ २ ५
यि । श्रुतोयुवासया । येन्द्रा३उवा३ । ऊ३४पा ॥ ८ ॥२१३

"हे इन्द्र" परमैश्वर्ययुक्त! (१) त्वं "मधुमति" माधुर्योपेते "प्रचे" राज-कर्त्तृक-न्यग्रोध-चमसे "ते" त्वदीये "चीयन्तः" समीपे स्थिताः वयं "रयिं" रमणीयमन्नं "पुष्येम" पोषयेम। किञ्च। त्वां "धीमहे" वयमनुध्यायेम ॥ ८ ॥ २१२

"स्वर्काः" शोभन-स्तोत्राः(१) शोभनान्नावा(२) "मरुतः"(३)

---

२१३ उत्तरार्च्चिकस्य ४,१,२४ = ऊहे ३,२,१८ ।

I मारुतम् ।

(१)—"इन्दतेवैश्वर्य्यकर्म्मणः"-इत्यादि नि ४,८। "समस्ततेजः परमेश्वरत्व-निमित्तेन्द्र-शब्द-वाच्यः इति मीमांसा-भाष्ये शबरः ।

(१)—"अर्को मन्त्रो भवति, यदनेनार्च्चन्ति" इति नि० नै० ५, ४ ।

(२)—"अर्कमन्नं भवति, अर्च्चति भूतानि" इति नि० नै० ५,४ ।

(३)—"अथातो मध्यस्थाना देवगणाः——तेषां मरुतः प्रथमागामिनो भवन्ति" इत्यादि नि०११,१३ ।

अथ दशमी ।

२ ३ १ २   ३ १ २   ३ १ २   ३ १ २   ३ २ ३ १

प्रवइन्द्रायवृत्रहन्तमायविप्रायगाथंगायतयंजुजो-

२

षते* ॥१०॥ २१४

॥ प्रथम-दशति ॥

५ ४   १   ८   ७   २   १

I प्रवाः । आयिन्द्रायवृत्रहान्तमा२३या । वायि-

र र २ २ १ १ २ २ १

प्रायगाथंगा॒ऽ१या४ता । याञ्जजौवा३ । उप् । षा॒ऽ२तो४५-

२

हायि ॥ ८ ॥ २१४

"अर्कम्" अर्चनीय(४)मिन्द्रम् "अर्चन्ति" स्तोत्रैर्ह विर्भिः । "युवा" नित्य-तरुणः "श्रुतः" विख्यातः "इन्द्रः" "आस्तोभति" तेषां सम्बन्धीनि शत्रुजातान्याभिमुख्येन हिनस्ति(५) ॥ ८ ॥ २१३

---

* 'जुजोषत'-इति वि० पाठः ।

---

२१४ उत्तरार्चिकस्य ४,१,२५=ऊहे ३,२,२० ।

I उहांशं साम ।

(४)—"अर्कोदेवोभवति यदेनमर्चन्ति" इति नि० नै० ५,४ ।

(५)—विवरणकृता तेषान्यथैव व्याख्याता । तद्यथा—"अर्चन्ति । पूजयन्ति । 'अर्कं' देवम्, 'मरुतं' ऋत्विजः, 'सर्वाः' शोभनमन्त्राः । 'आस्तोभति' शब्दते ; 'श्रुतः' व्याख्यातः । 'युवा' तरुणः । कोऽसौ ? इन्द्रः"-इति ।

अथ चतुर्थखण्डे—

सैषा प्रथमा।

१ २ ३ १ २र ३ २उ ३ १ २
अचेत्यग्निश्चिकितिर्* हव्यवाड् नसु† मद्रथः ॥१॥२१५

हे "विप्राः" मेधाविनः! (१) "वृत्रहन्तमाय" अतिशयेन वृत्रस्य हन्तमः, तस्मै इन्द्राय "तं" "गाथं" स्तोत्रं(२) "प्रगायत" प्रकर्षेण पठत। हे उद्गातारः! स इन्द्रः "यं" स्तोत्रं "जुजोषते" सेवते। १० ॥ २१४

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थ प्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्य दशमः खण्डः ॥ १० ॥

---

* "श्चिकितु"-इति
† "हव्यवाट् स सु"-इति } इति ऋग्वेदीयपाठौ।

---

२१५ ऋग्वेदस्य ६,४,२७,५।

(१)—"विप्रः" इति मेधावि-नामसु प्रथमं नैघण्टुकम् (३,१५)।

(२)—"गाथा" इति वाङ्नामसु षट्त्रिंशत्तमं पदकम् (१,११)।

४ ५र ४   १ १   १   २   १   २
I अचेतौ। अग्निः। चिका२३यितौ३ः। हा२३व्या

१ ३   ५र र   २   ३ १ १ १ १
३। वा२डा२३४औहोवा। सुमद्रथा२३४५ः॥ १०॥

४ ५र   ४   १   १र
II अचेतिया। अग्यिआइकायिती२३ः। हौ। होयि

२   १ १ १ १   १   १   ३   ५र र
औ२हो२३४५। हव्या२३। वा२डा२३४औहोवा।

२   २   ३ १ १ १ १
ए३। सुमद्रथा२३४५ः॥ ११॥ २१५

“हव्यवाट्” हविषां वोढारं “चिकितिः” विशिष्ट-प्रज्ञः(१) “सुमद्रथः” सुष्ठु-हविर्युक्त-रथोऽग्निः “अचेति” चेत्यते सर्वैर्ज्ञायते। यद्वा। [व्यत्ययेन कर्त्तरि प्रत्ययः (३,१,८५)] हविः-प्रदातारं यजमानं जानाति॥ १॥ २१५

---

I,II आग्ने द्वे।

(१)—“चिक्यत्” इति पश्यति-कर्मसु प्रथमं नैघण्टुकं, तस्य रूपं चिकितिरिति, अथवा प्रज्ञा-नामसु पठितं “केतः”-इति तस्यैवेति।

अथ द्वितीया।

वन्धुर्ऋषिः। आग्नेयी।

२ ३ २ ३ १ २ ३ २ ३ १ २ १ २ ३ क २र
अग्ने त्वन्नो अन्तम उत त्राता शिवो भुवो* वरूथ्यः ॥२॥ २१६

४ १ २ १ २ ५
I ओग्नायि। त्वन्नोर२३आ। ऽन्ताऽ२३। ता२३४माः।
२ १ २र १र २ १र २ २ २र ४ ५ ४
उतत्राताशिवोभुवः। शिवोभुवा२३ः। वरोवा। था५
५
योई२हायि ॥ १२ ॥

४ र ५ ४र ५ २र १ २
II अग्नौ। होयि। त्वौहोयि। नोअन्तमा ३१ उवा
३ ५ २र २ ३ ५
२३। ऊ२३४ता। त्राता ओ २३४ वा।
२ १र २ ३ १ १ १ १
शिवोभुवा २३४५ ॥ १२ ॥

---

* "भवा"-इति ऋग्वेदीयपाठः।

---

२१६ उत्तरार्चिकस्य ४,१,२२,१ = ऋग्वेदस्य ४,१,१९,१ = यजुर्वेदस्य ३,२५—१५,४८ = ऊहे ३,२,१८—१२,२,१५।

I गूदम्। II अत्यर्दः।

५ र २   ४ १र ४   ५   २ १ २र १र २ १र १
III अग्ने तू ३ वन्नोअन्तमाः। उतत्राताशिवोभुवः।

१   ३र र २   ५   ४
वरा २ ३। औहोहो २ ३ ४ वा। था ऽ ५ यो ६

५
हायि॥ १४॥

५ र   २   ४ ५र ४   ४ ५   २
IV अग्ने। होयि। त्वन्नोअ। तमाः। ऊता२।

२   ऽ २   १   २ २
हारयि। औ३होइ३१यि। त्राता२। शिवो ३४५।

३ ५
भू२३४वाः॥ १५॥ २१६

हे "अग्ने!" "वरूथ्यः" वरणीयः सम्भजनीयः। यद्वा। वरूथैः यज्ञगृहैर्युतः(१) "त्वं" "नः" अस्माकम् "अन्तमः" अन्तिकतमः "भूवः" भव। "उत" अपिच "त्राता" रक्षकः "शिवः" सुखकरश्च भव(२)॥ २॥ २१६

---

III गूर्द्दः। IV अत्यर्द्दः।

(१) वरूथमिति गृहनामसु सप्तदशं पदम् नि० ३, ४।

(२)—"शिवम्"-इति सुख-नामसु द्वादशं नैघण्टुकम् (३,३,) ततो मत्वर्थी याच् प्रत्यये करमिति भावः।

अथ तृतीया।

आग्नेयीयमृक्।

२ ३ १ ३ २ ३ २ १ २ ३ १ २ ३ १ २
भगोनचित्रोअग्निर्महोनान्दधातिरत्नम् ॥ ३ ॥ २१७

४ ५ १ १ २ १
I भागाः। नचित्रः। अग्निर्म्महोर२३नार३म्। दा१२-
२ ५र र २ १ २ १११२
धार२३४औहोवा। तिरत्ना२३४५म् ॥ १६ ॥

४ ५र४ ५ ४ २ १ २ १ २
II भगोनचित्राः। अग्निर्माहोर२३ना३म्। दा१धा-
५र र २ २ १ २ १ १ १ १
२३४औहोवा। ए३। तिरत्ना२३४५म् ॥ १७ ॥ २१७

"महोनां" महताम् मध्ये "भगोन" सूर्य्यइव(१) "चित्रः" चायनीयः(२) पूजनीयः "अग्निः" यज्वनां "रत्न" रमणीयं धनं "दधाति" धारयति। प्रयच्छतीत्यर्थः(३) ॥ ३ ॥ २१७

---

I,II सातनिके द्वे।

(१)—"भगमादित्यः"-इति नै० ३,११। "न-शब्दस्तु उपमार्थीयउपरिष्टात्"-इति नै० १,४।

(२)—चित्रन्देवानामितिमन्त्रव्याख्यानावसरे एवएवार्थीयवहृतो यास्केन (१२,१६)। तदेवात्र व्याख्याने मानम्।

(३)—"दद्धि"-इत्यस्य निघण्टौ (३,१९) याच्ञा-कर्मसु दर्शनमेवैवमर्थे मानम्।

अथ चतुर्थी ।

एषा ऐन्द्री ।

१ २ ३ १ २   ३ १ ३ १२   ३१ ३ २ ३ २
विश्वस्यप्रस्तोभपुरोवासन्यदिवेहनूनम् ॥ ४ ॥ २१८

५ २ १ २ ३ २ १ ३
I विश्वस्या । प्रस्तोभा२ । पुरोवासा३न् । यदिवे-

५ १ १ ३ ५र र २
२३४हा । नू२३ । ना२मा२३४औहोवा । धा२३४-

५
नाम् ॥ १८ ॥

५र २१ १ र र
II औहोयि । विश्वस्या । प्रस्तोभा२ । पुरौहोवा३-

२ १ १ र १ १ ३
हायि । वासा२न् । यद्दिवेहा । नू२३ । ना२मा२३४

५र र ३ ५
औहोवा । धा२३४मा ॥ १९ ॥१२८

"विश्वस्य" सर्व्वस्य मनुजातस्य "प्रस्तोभ" प्रस्तोभति हिन-स्तीत्यर्थः । "यदिवा" "इह" यज्ञे "नूनं" "पुरो(१) वासन्" पूर्व्वस्मिन् देशे वसन्, स्थितः स इह नूनं प्रस्तोभ ऋत्विग्भिः प्रकर्षेण स्तूयते [स्तोभतिस्तु स्तुति-कर्मा(२) ॥ ४ ॥ २१८

I धनसाम ।    II धर्म्मसाम ।

(१)—'नूनमिति वितर्के'-इति वि० ।

(२)—स्तुति-कर्मस्विदं चतुर्थं नैघण्टुकम् (३,१४) ।

अथ पञ्चमी।

सम्वर्त्तऋषिः। उषोदेवता। द्विपदा।

३ २उ ३ १ ३ १ २ ३ १ २ ३ १ २ ३ १ २
उषाअपस्वसुष्टमः*संवर्त्तयतिवर्त्तनिꣳसुजातता॥५॥ २१९

५ २ १ २ ३ ५ ७ १ ७
I उषाअपा। स्वासुष्टा२३४माः। संवा२र्त्तया। तिवा

३ ५ १ ३ ५ २ २ २ १ ३ १ १
२र्त्ता२३४नीम्। सू२जा२३४औहोवा। ए३। तता२३-

१ १
४५॥ २०॥ २१९

इयम् "उषाः" "स्वसुः" भगिन्याः रात्रेः(१) सम्बन्धि "तमः" "अन्धकारम्" "अप संवर्त्तयति" आत्मीयेन तेजसा अपगमयति। "सुजातता" सुजातत्वं आत्मनः सुप्रकाशत्वं च "वर्त्तनिं" वर्त्तयति रथं प्रापयति(२)॥ ५॥ २१९

---

* "स्वसुस्तमः"-इति ऋग्वेदीयपाठः।

---

२१९ ऋग्वेदस्य ८,८,३०,५।

I उषसः साम।

(१)—स्वसा सु-असा, स्वेषु सीदतीति वा इति नि० ११,१२।

(२)—'स्वसुः तमः, स्वसुः स्वसा भगिनीव अपसंवर्त्तयति वर्त्तनिं रात्रिं वरणीया-ज्ञनस्य सुजातता इति विवरणकृद्‌व्याख्यानम्।

अथ षष्ठी।

भौवन आत्य ऋषिः।

३ २उ ३ १ २ ३ १ २ ३ १ २ ३ १
इमानुकम्भुवनासीषधे*मेन्द्रश्चविश्वे चदेवाः ॥ ६ ॥ २२०

५ ४र ५ ४ ४ २र १ ३ २ २
I इमानुकम्भू५५वना। सीषधा२यिमाउवा३। ई३-

५ २ १ ३ २ २ ५ २१ -१
४हा। इन्द्रश्चवा२यिश्वाउवा३। ई३४हा। चदे३। वा

र २ ५रर २ ५
२या२३४औहोवा। वी२३४आः॥ २१ ॥ २२०

"इमाः"(१) इमानि परिदृश्यमानानि "भुवना"(२) भुवनानि "नु" क्षिप्रं(३) "सीषधेम" साधयामः वशीकुर्मः। कमिति पूरकः(४) यद्वा। इमानि सर्व्वाणि भूतजातानि अस्मभ्यं "कं" सुखं(५) सीषधेम साधयतु (पुरुष-व्यत्ययः) "इन्द्रश्च" "विश्वे" सर्वे देवाश्च स्तुत्या प्रीता इममर्थं साधयन्तु ॥ ६ ॥ २२०

---

* "सीषधा"--इति ऋग्वेदस्य, सायणीयोत्तरभाष्य-धृतश्च।

---

२२० उत्तरस्य ४,१,२३,१ = ऋग्वेदस्य, ८,८,१५,१ आरण्यके ३,२१—२२ = ऊहे १,२०।

I भारद्वाजम्।

(१), (२)—सुपांसुलुगित्याले रूपम् (७, १, ३९)।

(३)—"नु"-इति क्षिप्र-नामसु प्रथमं नैघण्टुकम् (२, १५)।

(४)—"मिताक्षरेष्वनर्थकाः कमीमिद्विति"-इति नै० १, ९।

(५)—"कम्"-इति सुख-नामसु चत्विमं नैघण्टुकम् (३, ६)।

अथ सप्तमी।

कवषऐलूषऋषिः।

इयं वैश्वदेवी।

२ ३२३१२३२३उ २१२ ३१२
विस्रुतयोयथापथाव्यइन्द्रत्वन्तुरातयः ॥ ७ ॥ २२१

४ ५ ४ ५ १ १ २र १
I विस्रू विस्रू। ताया २ स्तायाऽ२ः। यथापथाः।

१ १ २१ ५ ४
आयिन्द्रा २ त्वाया २ ३। तुरा २ ३४ वाः। ताऽ५ यो-

५
६ हायि ॥ २२ ॥ २२१

हे "इन्द्र!" "त्वत्" त्वत्तः सकाशात् "रातयः" दानानि "वि यन्तु" विविधं गच्छन्तु। तत्र दृष्टान्तः—"पथः" राजमार्गात् क्षुद्रमार्गा यन्ति तद्वत्(१) ॥ ७ ॥ २२१

---

२२१ उत्तरार्च्चिकस्य ९,१,२,२ = ऊहे २१,८।

I रातिसाम।

(१)—"विस्रुतय," विविधाः स्रुतयः सरण्यः मार्गाः "इन्द्र" "त्वत्" त्वत्समीपं "यन्त"; "रातयः" दानानि हविर्लक्षणानि 'अथवा'-इत्यादि वि०।

अथाष्टमी ।

भरद्वाजऋषिः । द्विपदा ।

३ १र ३ २र ३ १ २ ३
अयावाजन्देवहितꣳसनेम

१ २ ३ १ २ ३ १ १
मदेमशतहिमाःसुवीराः ॥८॥ २२२

I अयावाजाम् । दायिवहि । तꣳसनेमा । मदे-
मशाइताहिमा२ः । शता२३ । हा१यिमा२३४औहोवा ।
सुवीइरा२३४५ः ॥२३ ॥२२

"अया" अनया स्तुत्या "देवहितं" देवेन द्योतमानेनेन्द्रेण दत्तम्(१) "वाजम्" अन्नं "सनेम" वयं सम्भजेम । अपिच "सुवीराः" शोभन-पुत्रोपेता वयं "शतहिमाः" शतं हेमन्तान् "मदेम" हृष्याम ॥ ८ ॥ २२२

---

२२२ ऋग्वेदस्य ४,६,३,५ ।

I भारद्वाजम् ।

(१)—हितमिति "धोञ्क् त्यागे"-इत्यस्य रूपमिति मत्वैव व्याख्यातम् दत्तमिति ।

अथ नवमी।

आत्रेयऋषिः। इयं वैश्वदेवी।

३ २ ३ १र २र ३ २ ३
ऊर्जा मित्रो वरुणः पिन्वतेडाः

१ २ ३ १ २ ३ १ २
पीवरीमिषं कृणुही न इन्द्र॥ ८॥ २२३

४ ५ १ र २ १ २ १र र
I ऊर्ज्जा। मित्रोवरुणःपिन्वता२३यिडाः। पीवरी-

र ऽ २ २ ५
मिषङ्कृणुहीनआयिन्द्रा३उवा३। ऊ३४पा॥ २४॥ २२३

हे "इन्द्र!" "मित्रः", "वरुणः", त्वञ्च सर्वे यूयं "ऊर्जा" रसेन बलेन वा(१) सहिताः "इडा" अन्नानि(२) "पिन्वत" अस्मभ्यं सिञ्चत प्रयच्छतेत्यर्थः। [पिन्व सेचने (भ्वा० प०) धातूनामनेकार्थत्वादत्र प्रयच्छतेत्यर्थः] किञ्च। "पीवरी" प्रवृद्धम्(३) "इषम्" अन्नं (४) "नः" अस्माकं "कृणुहि(५)" कुरु देहीत्यर्थः(६) ॥८॥ २२३

---

I ऐषम्।

(१)—'ऊर्ज्जा अन्नं दृष्टिर्वा'-इति वि०।

(२)—"इरा, इला, इडा वा"-इति पाठभेदेनान्न-नामसु द्वादशतमं नैघण्टुकम् (२, ७।)

(३)—पीवरीं -स्थूलाम्'-इति वि०।

(४)—इषमिति अन्न-नामसु चतुर्दशं नैघण्टुकम् (२, ७) ।

(५)—"वाच्छन्दसि (३, ४, ८८)"-इति हेरपित्व-वैकल्पिकत्वम्।

(६)—"कृणुहि कुरु"-इत्येव वि०।

अथ दशमी।

इयमेकपदाष्टाक्षरा गायत्री। वसिष्ठऋषिः।

२　१ २
इन्द्रोविश्वस्यराजति ॥ १० ॥ २२४

॥ इति द्वितीय-दशति ॥

२ १　　२ ४ ५ र　२ ३
I इन्द्रो३४। विश्वस्यरा। जतिहो२३४५इ। डा ॥२५॥

१　　　　१　　१　　१ २
II इन्द्रा२हो॥१यि। वा२यिश्वा। स्यरा२जति।

ऽ　　१
होवा२३हो२३४५इ। डा ॥ २६ ॥ २२४

यतः कारणात् "इन्द्रः" "विश्वस्य" भुवनस्य "राजति" ईश्वरो भवति, अतः कारणात् इन्द्रं प्राधान्येनाभिमुखीकृत्यो-च्यते-इति पूर्वेणान्वयः(१) ॥१०॥ २२४

इति श्रीसायणाचार्य्यविरचिते सामवेदार्थप्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्यैकादशः खण्डः।

॥ इति द्वैपदमैन्द्रं समाप्तम् ॥

---

I,II वैराज हे।

(१)-"इन्द्रः" परमेश्वरः "विश्वस्य" सर्वस्य "राजति" दीप्यते"-इत्येव वि०।

विकद्रुकेषु मुख्याः स्यादष्टिस्त्वाष्टिरादिमा।
जगत्ययं सहस्रेत्यथैन्द्रयाह्युपनस्तथा॥
अग्निं होतारमित्येषा अस्तु श्रौषडयारुचा।
चतस्रोऽत्यष्टयोऽभित्यं तवत्यन्नर्यमित्यृचौ॥
इमे द्वे अतिशक्वर्यावष्टी इत्येकऊचिरे।
प्रवोमहेऽतिजगती तमिन्द्रमिति तादृशी(क)॥
सौरी ह्ययं सहस्रेति पावमानी त्वयारुचा।
अस्तु श्रौषड्वैश्वदेवी मारुती तु प्रवोमहे॥
अभित्यमिति सावित्री स्यादाग्नेय्यग्निमित्यसौ।
ऐन्द्रोऽवशिष्टाइत्येवं छन्दोदैवतनिर्णयः(ख)॥

---

(क)—'विकद्रुकेषु'-इति मुख्या प्रथमा यासु, तासु ऋक्षु, अत्र—आदिमा ऋक् 'त्रिकद्रुकेषु'-इति अष्टिः अष्टिच्छन्दस्का। 'अयंसहस्र'-इति द्वितीया ऋक् तु जगती। अथ अनन्तरम्; 'एन्द्रयाह्युपनः'-इति तृतीया ऋक् तथा 'अग्निं होतारम्'-इति एषा नवमी ऋक्, 'अस्तु श्रौषट्' इति पञ्चमी ऋक्, 'अयारुचा'-इति सप्तमी ऋक्,-इति चतस्रः ऋचः अत्यष्टयः अत्यष्टिच्छन्दस्काः। 'अभित्यम्'-इति अष्टमी, 'तवत्यं नर्यम्'-इति दशमी च ऋचाविमे द्वे अतिशक्वर्यौ अतिशक्वरीच्छन्दस्के; एके आचार्यास्तु अष्टी अष्टिच्छन्दस्के एव इमे इत्यूचिरे। 'प्रवोमहे'-इति षष्ठी ऋक् अतिजगती अतिजगतीच्छन्दस्का; 'तमिन्द्रम्'-इति चतुर्थी ऋक् इयमपि तादृशी अतिजगत्येवेत्यर्थः।

(ख)—'अयंसहस्र'-इति द्वितीया ऋक्, सौरी सूर्य-देवताका। 'अयारुचा'-इति सप्तमी ऋक्, इयन्तु पावमानी पवमान-देवताका। "अस्तु श्रौषट्"-इति पञ्चमी ऋक्, वैश्वदेवी विश्वेदेवाः अस्याः देवताः। 'प्रवोमहे'-इति तु षष्ठी ऋक्, मारुती मरुतो-
ऽस्याः देवताः। 'अभित्यम्'-इति अष्टमी ऋक्, सावित्री सवितृ-देवताका। 'अग्निम्'-इति नवमी ऋक्, असौ आग्नेयी अग्नि-देवताका। स्यादिति सर्व्वत्र सम्बध्यम्॥

अथ द्वादशखण्डे—

तत्र प्रथमा ।

गृत्समद ऋषिः ।

१ २　२ १र २र　३ २
त्रिकद्रुकेषु महिषो यवाशिरन्तुविशुष्म*
३ १र　२र　३ १ २　२ १　२ ३ २
स्तृम्पत्† सोममपिबद्विष्णुना सुतं यथावशम‡ ।
१ २　३ २ ३ २ ३ १　२ ३ २ ३ १र
सईम्ममाद महि कर्म कर्त्तवे महामुरुᳪ
२र　३ २ ३ १र २र ३ १र　१
सैनᳪ सश्चद्देवो देवᳪ सत्य इन्दः सत्यमिन्द्रम¶ ॥१॥२२५

२　२ ५　१　२ १ २ १　१ २र ३ ५
I औयित्रिक । द्रुकायि । षू३महिषा । यवाशिरम् ।
२ २ ३ ५　२　३　५　१र　१ २
तुविशुष्मः । औयितृम्पा२३४यात् । सोमाम् । अपिबा३

---

* "तुविशुष्म"-इति ऋग्वेदीय-स्वर-पाठः ।

† "तृम्प"--इति ऋग्वेदीयः सायणीयोत्तरभाष्यधृतश्च ।

‡ "यथावशत्"-इति ऋग्वेदीय-च चिह्नित-पाठः ।

¶ "सत्यमिन्द्रं सत्य इन्दुः"--इति ऋग्वेदीयपाठः ।

---

२२५ उत्तरार्च्चिकस्य ६,३,१८,१=ऋग्वेदस्य २,६,२८,१ =ऊह्ये २,२,१२—५,१,५—५,२,५ ।

I वाजजित् ।

१　　१ २र ३१५　　२ २र ३ ५　　२ ३ २　　५
द्दि। ष्णुनासुतम्। यथावशम्। ओयिसा२३४ईम्।
१　　२ १ २ १　　१ २ ३ ५र　　१ २र ३ ५　　२ ३ २
ममा। दा३महिक। मकर्त्तवे। महामुरुम्। ओयिसा
५　　१　　२र१र२र१　　४
२३४यिनाम्। सश्चात्। देवोदेवाम्। सत्यइन्दुःसत्याऽ-
५
धुमिन्द्राउ। वा॥२७॥२२५

"महिषः" महान्(१) पूज्यः "तुविशुष्मः" बहु-बलः(२) "तृम्पत्(३)" तृप्यन्निन्द्रः "त्रिकद्रुकेषु" ज्योतिर्गौरायुरित्येतन्नामकेषु अभिप्लविकेष्वहःसु(४) "सुतम्" अभिषुतं "यवाशिरं" यवमयैः सक्तुभिर्मिश्रितम् [आङ्-पूर्व्वस्य श्रीञ् धातोः क्विपि "अपस्पृधेथामित्यादिना(५) श्रियः शिरइत्यादेशः] तं सोमं "विष्णुना" सह(६) "अपिबत्"। "यथावशं(७)" पूर्व्वं यथा तं सोम मकामयत तथा अपिबत् [वश कान्तौ (अ०, प०)। "बहुलं छन्दसीति (२,४,७३) शपोलुगभावः] "सः" पीतः सोमः "महाम्" महान्तम् "उरुम्"

(१)—"महिषः"-इति महन्नामसु अष्टमं नैघण्टुकम् (३,३)।

(२)—तुवीति बहु-नामसु द्वितीयं नैघण्टुकम्(२,१,)। शुष्ममिति बल-नामसु एकादशतमं नैघण्टुकम् (२,९)।

(३)—विकरण-व्यत्यये रूपम्। 'तृम्पत् तृप्तवान्'-इति वि०।

(४)—अहस्सप्तति पृष्ठास्य-पञ्चमी टीप्पनी द्रष्टव्या (७८पृ० ५टी०)।

(५)—"अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्त्ताः (६,१,३६)"-इति पा०।

(६)—विवरणे तु "विष्णु ना" अध्वर्युणा अभिषुतमित्यन्वयः।

(७)—'यथावशं यथोत्साहम्'-इति वि०।

अथ द्वितीया ।

गौराङ्गिरसऋषिः ।

३२　३२३१२　३१२३२३१उ　२१२
अयꣳसहस्रमानवोदृशःकवीनाम्मतिर्ज्योतिर्विधर्म ।
३१　३१　२१२३१२　३२१　१२　३
ब्रध्नःसमीचीरुषसःसमैरयदरेपसःसचेतसः
१२　३१२३२
स्वसरेमन्युमन्तश्चितागोः ॥ २ ॥ २२६

विस्तीर्णम् "ईम्" एनम् "इन्द्रम्" "ममाद" अमादयत्(८) । किमर्थम्? "महि" महत् वृत्र-हननादि-लक्षणम् "कर्म" "कर्त्तवे" कर्त्तुम्(९) । "सत्यः" "इन्द्रः"(१०) स्रवन् । "देवः" दीप्यमानः "सः" सोमः "सत्यं" यथार्थभूतं "देवं" सोमं कामयमानम् "एनम्" "इन्द्रं" "सश्चत्" [ सश्चतिर्व्याप्ति-कर्मा(११) ] व्याप्नोतु ॥ १ ॥ २२५

---

(८)—"छन्दसि लिट् (३,२,१०५)"-इति भूतसामान्ये लिटि ममादेति भावः ।

(९)—"तुमर्थे सेऽसेन् सेन् क्से (३,४,९)"-इत्यादिना सिद्धम् ।

(१०)—इन्दुः सोमः ।

(११)—'उरुनाम दानवः ; सः इन्द्रः, एनं दानवं सश्चत् । सश्चतिः हिंसार्थः, दानवं हिंसितवान् ।—अथवा सश्चतिः सेवार्थः सेवते'-इति वि० । निघण्टौ तु सश्चतिर्गतिकर्मसु दृश्यते (२,१४) न तु व्याप्ति-कर्मसु परं गतिरेव व्याप्तित्वेन पर्यवसतीत्यभिप्रायेणोक्तमित्यनुमीयते ।

५ ४ ५ ३१ ३ ५ २ १ २
I अय७सद्योद्दायि। समानार३४वाः। इशाःक-
२ १र र २ ३ ५ २१ २१ २र
वीनामतिर्ज्यो। तिर्विधार३४र्म्मा। अध्नाःसमायि। चौ-
१ २ २ २ २ ३२ १ २ ४
हृषसः। समायिराऽ१यार२त्। अरा३। द्दोवा३। पा।
५ ४ ५र ३ २ १ २र २ १ १ ३ २
सःसचे। तसा३ः। स्वासरे। मन्युमार३न्ताः। चिते।
३ ५र र ३ १ १ १
या२३४औह्दोवा। गो२३४५ः॥ २८॥

५ र ५ ११ १र १ र
II अय७सद्यसमानाईवाः। इशाःकवीनाम्मतिर्ज्यो।
२ २१ २१ २र ११ २१ १
तिर्विधार३र्मा। अध्नाःसमायिचीहृषसः। समायिराऽ१-
ऽ २ १र ११ ११र १ २र २
यार३त्। ओ३वा। अरेपसःसचेतसः। स्वासरे। म-
१ २ ऽ २ ३२ १ ३ ५र र
न्युमार३न्ताः। ओ३वा। चिता३। गोरेरा२३४औद्दो-
३ १ १ १ १
वा। वा२३४५॥ २९॥ २२६

---

I,II गोराङ्गिरसस्य सामनी द्वे।

"सहस्रमानवः" सहस्र-सङ्ख्याका मनुष्याः(१) यस्य सः, सहस्र-सङ्ख्याकैर्मनुष्यैरिवावस्थितै रश्मिभिर्युक्तः "दृशः" सर्वेषां दर्शनीयः(२) "कवीनां" मेधाविनां सर्वेषां "मतिः" स्तुत्यः मननीयोवा "विधर्म्म" विधातृ "ज्योतिः" तेजः "अयं" "ब्रध्नः" सूर्य्यः(३) "समीचीः" शुभ्राः निर्म्मलाः(४) "अरेपसः" तमः-पाप-रहिताः । "सचेतसः" समान-चित्ताः इमाः "उषसः" "समैरयत्" सम्यक् प्रेरयति । ततः "स्वसरे" [दिवसनामैतत् (नि, नै० १,९)] दिवसे "मन्युमन्तः" मन्युः प्रकाश(५)स्तद्वन्तः तेजस्विनश्चन्द्रमः-"प्रभृतयः" गोः आदित्यस्य तेजसा "चितः" अपचिताः भवन्त्विति विगत-तेजस्का भवन्तीत्यर्थः । ["आदित्योऽपि गौरुच्यते (२,६)" -इति निरुक्तम् ॥ २॥ २२६

---

(१)—"आमवः" इति मनुष्यनामसु ऊनविंशं नैघण्टुकम् (२,३)।

(२)—'दृशः द्रष्टा'-इति वि०।

(३)—'ब्रध्नः महान् अश्वः सविता'-इति वि०। "ब्रध्नः" इति निघण्टौ अश्वनामसु (१,१४) महन्नामसु च (३,३) दृश्यते। 'ब्रध्नः' अश्वः, सविता वा महान् वा इत्यनेनोपरि-ष्टाद् (६,१,५,९) व्याख्यास्यते। 'ब्रध्नम् इन्द्रम्, आदित्यरूपिणावस्थितम्'-इति चोत्तरा-भाष्येऽनेनैवाचार्येण व्याख्यातम् (६,३,१२,१)।

(४)—'सम्यक् जाता' इति वि०।

(५)—'कान्ति कर्म्मसु इष्टस्य (नि० २,६) "मन्यते"-इत्यस्य रूपं मन्युरित्यभिप्रायः; मन्युमन्तः दीप्तिमन्तः, अथवा क्रोधो मन्युः तद्वन्तः,-इति वि०।

अथ तृतीया।

परुच्छेपऋषिः।

१ २ ३ १ २ ३ २ ३ १ २ २ ३ १ २ ३ १ २ ३
एन्द्रयाह्युपनःपरावतोनायमच्छाविदथानीवसत्पति-

२ ३ १ २ ३ १ २
रस्ता*राजेवसत्पतिः।

३ १ २ ३ १ २ ३ २उ ३ २ ३ २ ३ १ ३ १ २ ३
हवामहेत्वाप्रयस्वन्तःसुतेष्वापुत्रासोनपितरंवाजसातये

१ २ ३ १ २
मꣳहिष्ठंवाजसातये॥ ३ ॥२२७

४र ५र ४ ५ ४ १ ३ ५ १ र
I एन्द्रयाह्युपनाः। पारा२वा२३४ताः। नायमच्छा।

२ र १ र ५ १ २ र १ २
विदथानायि। वासत्पा२३४तीः। अस्तारा३जे३। वास-

३ ५ ४ ५र र र ४ ५ ४ २ १ २ २
त्पा२३४तीः। हवामहेत्वाप्रयस्वन्ताः। सुतायिषू३वा।

२ १र र २ १ १ २ ३ ५ १ २
पुत्रासोनापितरंवा। जासाता२३४यायि। मꣳहायिष्ठा

२ १ ४ २ ५
३०वा३। जा२३सा३। ता३४५योꣳहायि॥ ३० ॥२२७

---

* "रस्तं"—इति ऋग्वेदीयः पाठः।

---

२२७ ऋग्वेदस्य २,१,१८,१।

I प्रयस्वत्।

हे "इन्द्र!" "परावतः" दूरदेशात् स्वर्ग-लक्षणात्(१) "नः" अस्मान् "उपायाहि" अस्मत्समीपं प्रत्यागच्छ। तत्र दृष्टान्तः— "नायम्" अयं न पुरोवर्त्ती अग्निः "अभिषुतः" सोमोवा [प्रस्तुतत्वान्निर्दिश्यते] सइव [यद्यपि पुरस्तादुपचारान्निषेधार्थीयो नकारः सर्व्वत्र, तथाप्यत्रौचित्येनोपमार्थीयो गृह्यते]। यद्वा। "परावतः न" दूरदेशादिव। [यद्यपि यज्ञे सर्व्वदा सन्निहितः, तथापि स्वर्गाख्याद् दूरदेशादिव। अस्मिन् पक्षे अयमिति विभक्तिव्यत्ययः।] "अयम्" इमं देवयजनदेशं "अच्छ" अभि प्राप्तुम्(२) आयाहीति शेषः(३)। तत्र दृष्टान्तः—"सत्पतिं" सतां सर्व्वदा वर्त्तमानानामृत्विजाम्पालको यजमानइव ["पत्यावैश्वर्य्ये(६,२,-१८)"-इति पूर्व्वपदप्रकृतिस्वरत्वम्] त्वमपि यज्ञ-गृहाण्यागच्छ। यद्वा। सतां नक्षत्राणाम्पतिः चन्द्रमाः, स यथा स्व-धाम स्थानमागच्छति तद्वत्। "अस्ता" [अस्तं सुपआकारः (७,१,३९) अतएव बह्वृचा अस्तं राजेत्यामनन्ति] अस्तं गृहं(४) "राजेव" राजा यथा आगच्छति तद्वत्। किञ्च। "प्रयस्वन्तः" हविर्लक्षणान्नवन्तः यजमाना वयं "त्वा" त्वां "सुतेषु" अभिषुतेषु सोमेषु "आह्वामहे" आभिमुख्येनाह्वयामहे। आह्वाने दृष्टान्तः—

---

(१)—'परावतः'-इति दूर-नामस्वन्तिमं नैघण्टुकम् (३,२३)।

(२)—"अच्छाभेराप्तुमिति शाकपूणिः" इति (नि०५,२२)।

(३)—'अच्छ आप्तुं विदथानि व्याप्नोति यज्ञ-कर्म्माणि'-इति वि०।

(४)—'सुपांसुलुगित्यनेति (नै०,७,३९) भावः।

(५—'अस्तम्'-इति गृह नामसु पञ्चमं नैघण्टुकम् (३,४)।

अथ चतुर्थी।

रेभाऋषिः।

१र २र ३१२ ३२
तमिन्द्रञ्जोहवीमिमघवानमुग्रꣳ
३१र २र३१२ ३ १२ ३ १२
सत्रादधानमप्रतिष्कतꣳश्रवाꣳसि भूरि।
१ २ ३ १र २र३ १ १ ३ २
मꣳहिष्ठोगीर्भिराचयज्ञियाववर्त्तराये*
३ १ २३१२ ३ २
नोविश्वासुपथाकृणोतुवज्री॥ ४ ॥ २२८

४ ५ र ४५र४ ३ ५ १
I तमिन्द्रञ्जोहवीमिमघवानाम्। ऊ२३४ग्राम्। स-

"पुत्रासः" पुत्राः "पितरं न" पालकं जनकमिव तं यथा "वाज सातये" सङ्ग्राम-प्राप्तये तज्जयाय हविःस्वीकरणाय वा(१) आह्व-यामः॥ ३ ॥२२७

---

* "ववर्त्तद्राये"-इति ऋग्वेदीयः पाठः।

---

२२८ ऋग्वेदस्य ६,६,२८,२।

I अच्चर्यम्।

(१)—'वाजः'-इति अन्न-नामसु द्वितीयं नैघण्टुकम् (२,७)—'वाजे' इति सङ्ग्राम-नामसु च द्वाचत्वारिंशत्तमं नैघण्टुकम (२,१७)। सातिश्च लाभः। तथाच अन्नस्य लाभाय, सङ्ग्रामस्य वा लाभायेति वा इत्यर्थः फलितः। 'वाजसातिः'—इति समुदितपदमपि सङ्ग्रामार्थो दृश्यते निघण्टौ तत्रैव।

१र १ र ३ ५ १ २
त्राह्वोयि। दधानमप्रतारयिष्कृ२३४ताम्। अवा२३०सायि।
३ ५ १ र र ० ३ ५ १र
भू२३४री। म०ह्विष्ठोगोभिरा। चया२ज्ञा२३४याः। वा
१ २र १र २र र ३ ५ ३ २
वार्त्ती२। रायेह्वोयि। नोविश्वासुपा२३४र्था। कृणो३।
१ ३ ५र र ३ ५
तू२वा२३४औहोवा। ऊ२३४पा॥ ३१ ॥२२८

"तम्" पूर्वोक्तगुणोपेतम् "इन्द्र" "जोहवीमि" यष्टाहं पुनः पुनराह्वयामि [ह्वयतेरभ्यस्तस्य चेति सम्प्रसारणम्] कीदृशं? "मघवानं" मंहनीय-धनवन्तम्(१) "उग्रम्" उद्‌गूर्ण-बलं "सत्रा" सत्यं(२) यथार्थमेव "शवांसि" बलानि(३) "भूरि" भूरीणि "दधानम्" अतएव "अप्रतिष्कुतं" शत्रुभिरप्रतिरोधनीयम् आह्वयामि। किञ्च "मंहिष्ठः" पूज्यतमो दातृतमो वा "यज्ञियः" यज्ञार्हः इन्द्रः "गीर्भिः" अस्मदीयाभिः स्तुतिभिः "आ ववर्त्त" यज्ञेष्वाभिमुख्येन वर्त्तते [वर्त्ततेर्लिटि(४) रूपम्] ततो "वज्री" वज्रवन् इन्द्रः "राये" धनार्थं "विश्वा" सर्वाण्येव "सुपथा" सुमार्गाणि "कृणोतु" करोतु। धनं सर्वदिग्‌जमस्मान् प्राप्नोत्वित्यर्थः ॥४॥२२८

(१)—'मघमिति धन-नामधेयम्, मंहते दानकर्मणः' इति नि० १,७।

(२)—'सत्रा'-इति सत्य-नामसु तृतीयं नैघण्टुकम् (३,१०)।

(३)—'शवांसि शर्मांसि अन्नानि'-इति वि०।

(४)—'छन्दसि लुङ् लङ् लिटः'-इति पा० ३,४,६।

अथ पञ्चमी।

पुरुच्छेप ऋषिः।

२ ३ १ २ ३ २ ३ २ ३ १ २ ३ १र २र ३ १
अस्तुश्रौषट्पुरो अग्निंधियादधआनुत्यच्छर्धो*दिव्यं
२ ३ १ १
वृणीमहइन्द्रवायूवृणीमहे।
१ २ २ २ ३ १ २ ३ १ २ ३ २ ३ १ २
यद्धक्राणाविवस्वते†नाभासंन्दायनव्यसे‡।
२ ३ २ ३१र २र ३ १ २ ३ २उ ३ २ ३ १ २
अधप्रनूनमुपयन्ति¶धीतयोदेवा२ँ अच्छा§यनधीतयः॥५॥२२९

५ र २१र २१र २र १ १
I अस्तुश्रौषाट्। पुरोअग्निंधियादधे। हा। औ२हो
५ १र २र ५ ७ २ ३
२३४वा। आनुत्यच्छर्धोदि। व्याम्। वृणा२३हायि। मा-

* "तच्छर्धो"-इति,
† "विवस्वति"-इति,
‡ "सन्दायिनव्यसी"-इति,
¶ "प्रसूनउपयन्तु"-इति च
} ऋग्वेदीयपाठाः।

§ "अच्छ"-इति जर्मन्मुद्रित-पाठः।

२२९ ऋग्वेदस्य २,२,३,१।

I याज्ञतुरम्।

२३४हे । इन्द्रावा३यू३ । वृणी२मा२३४हायि । यज्ञक्ष्णा-
णाविवा॒१स्वा३तायि । नाभासन्दायना३ । व्यामायि ।
अधप्रनूनमुपया । तिधीतायारे३ः । हा । औ३हो२३४-
वा । दायिवा॒१अच्छा२३ । हा । औ३हो२३४वा ।
नधो२३४वा । ता॒५योइहायि ॥ ३२ ॥२२९

अहं "पुरः" पुरतः उत्तरवेद्याम् "अग्निम्" आहवनीयाख्यं(१) "धिया" प्रणयनादि-कर्मणा(२) दधे" धारितवानस्मि । "त्यत्" तत् "शर्द्धः" तादृशं बलं(३) बलवन्तं वाऽग्निम् । यद्वा ।

---

(१)—अयमत्र विवेकः—ऋत्विक्शालातः पश्चिम-विभागीय-'प्राचीनवंश'-नाम-यज्ञीय-वेद्याः दक्षिणस्यां दिशि धनुराकारो योऽग्निकुण्डः तत्र स्थितोऽग्निर्दक्षिणाग्निरुच्यते, उत्तरस्यां कुण्डो न विद्यते ; पश्चिमस्यां वृत्ताकारः कुण्डो भवति, तत्र योऽग्नि स गार्हपत्य इत्युच्यते ; पूर्व्वस्यां चतुष्कोण-कुण्डः, तत्र योऽग्निः स एव आहवनीय इत्युच्यते । अस्ति चापरा वेदी ऋत्विक्शालातः पूर्व्वस्यां दिशि उत्तरवेदी =परवेदी= द्वितीयवेदीत्यर्थः । तस्या एव मध्य-भूमिर्नाभिरित्युच्यते. तत्राध्वर्यु-प्रतिहारिणोः कार्य्य-कलापाः, न तु होतुर्होम-सम्बन्धोऽग्नि-सम्बन्धो वा । तदेवं 'पुरः' पश्चिमवेदीतः पुरस्तात्, 'उत्तरवेद्यां' अव्यवहित-पर-कुण्डे चतुष्कोणात्मके अग्निम् आहवनीयाख्यमित्यर्थः ।

(२)—'धीः' इति कर्म-नामसु एकविंशतितमं नैघण्टुकम् (२,१) । 'धिया बुध्या' -इति वि० ।

(३)—'शर्द्धः'-इति बल-नामसु सप्तमं नैघण्टुकम् (२,९) ।

तच्छर्द्धः तादृशं मरुतां सङ्घरूपं बलं "दिव्यं" दिविभवं "नु" क्षिप्रम् "आ वृणीमहे" आभिमुख्येन सम्भजामहे किञ्च "इन्द्र-वायू" "वृणीमहे" "प्रार्थयामहे। "यद्ध" [सुपोलुक् (७,१,३९)] यः "विवस्वते" विवो हवीरूपं धनं तद्वते(४)। "नव्यसे" नवतराय यजमानाय "नाभा" नाभौ भूम्यानाभिस्थाने देवयजने। यद्वा। वेदिरूपे(५)। अथवा नाभौ सर्वस्य फलस्य सम्बन्धके यज्ञे ["यज्ञ-माहुर्भुवनस्य नाभिः" इतिश्रुतेः] "सन्दाय" सम्यक् बध्वा मिथः संयुज्य "क्राणा"(६) धनादिकं कुर्वाणौ भवतः। तौ वृणीमहे इति समन्वयः। यस्मादेवं तस्मात् "अस्तु" "श्रौषट्"(७) अस्याः; स्तुतेः श्रवणं भवतु। [श्रोता भवतु वा मरुतां गणोऽग्निर्वा; इन्द्रवायुपक्षे प्रत्येकापेक्षयैकवचनम्] "अध" अनन्तरं "नः" "धीतयः" अस्मदीयानि कर्माणि स्तुत्यादि-रूपाणि(८) "प्रनूनम्" "उपयन्ति" प्रकर्षेण युष्मानुपेत्य गच्छन्ति। किञ्च, "देवानच्छान"

(४)—'विवस्वते विवासनक्षते'-इति वि०। विवस्वन्त इति निघण्टौ मनुष्य-नामसु च दृश्यते (२,३)।

(५)—उत्तरवेदी-नामक-वेद्याः मध्ये भू-भागे इत्यर्थः।

(६)—"क्राणाः कुर्वाणाः"-इति नि ४,१९।

(७)—'आश्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरम्, यजेति द्व्यक्षरम् येयजामहइति पञ्चाक्षरम्, द्व्यक्षरो वषट्कारः, एष वै सप्तदशाक्षरश्छन्दस्यः'-इति सि० कौ० वै० ४, ४, १४०।

(८)—"धीतयः"-इति निघण्टौ अङ्गुलि-नामसु दृश्यते (२,५)। "अङ्गुलयः, कस्मात्? अग्रगामिन्यो भवन्तीति वाग्रकारिण्यो भवन्तीति वाग्रसारिण्यो भवन्तीति वाङ्कना भवन्तीति वाञ्चना भवन्तीति वापि वाभ्यञ्चनादेव स्युः"-इति नि० ३, ८।

अथ षष्ठी ।

एवयामरुदृषिः ।

१२ ३२ ३१२ ३ १ २ ३१२
प्रवोमहेमतयोयन्तुविष्णवेमरुत्वते
३ १ २३१२
गिरिजाएवयामरुत् ।
१र २र ३ १र २र ३ १ २ ३१२ ३ २ ३
प्रशर्द्धायप्रयज्यवे*सुखादयेतवसेभन्ददिष्टये-
१ २ ३ १ २
धुनिव्रतायशवसे ॥ ६ ॥ २३०

१ ४र ५ ४र ५ ४ ५र ४ ५ ४ ४
I प्रा२३४ । वोमहेमतयोयन्तुविष्णवो । हायि ।
२ १ २ ३र २र १
मरुत्वता३यि । गिरिजा३४: । हाहोयि । एवाया२ ।

अग्न्यादि-देवान् आभिमुख्येन पांसुमिव "धीतयः" अस्मदीयानि कर्माणि "उपयन्ति" तेषां समीपं प्रापयन्ति ।

"आनुत्यत्", "आनुतद्"-इति—"नव्यसे", "नवसि"-इति, "प्रनूनं" "प्रसूनम्"-इति च क्रमेण सान्नाम्नचस्य पाठः ॥ ५ ॥ २२९

---

* "प्रयज्यवे"-इति ऋग्वेदीय-स्वर-पाठः ।

---

२३० ऋग्वेदस्य ४,४,३३,१ ।

I एवयामरुतः साम: ।

३ ५ १ ७ १ ७ १ २ २
मा२३४हूत । प्राशर्द्धाया २ । प्रायज्ज्यवा२३यि । सुखादा

५ १ २र १ २र १ २ २ १
२३४याथि । तवसेभन्ददिष्टये । धुनायिव्रा३ता३ । या२-

२ र २र र २ ५
प्रा२३४औहोवा । वा२३४से ॥ २२ ॥२३०

"प्रयन्तु" प्रगच्छन्तु" "गिरिजाः" गिरौ वाचि(१) निष्पन्नाः "मतयः" स्तुतयः। "महे" महते "वः" तुभ्यं [वचन-व्यत्ययः (३,१,८५)] "विष्णवे" व्याप्तायाम्(२) इन्द्राय विष्णवे वा(३) "मरुत्वते" मरुद्भिस्तद्वते। कस्य स्तुतयः? इत्युच्यते—"एवयामरुत्" एतन्नामकस्य ऋषेः [षष्ठ्यालुक् (७,१,३९) अथवाऽयमृषिः गिरिजाः स्तुतेर्जनयिता भवति]। किञ्च, "प्रयन्तु" स्तुतयः। कस्मै? "शर्द्धाय" बलाय मारुताय (इतरत्सर्वं बल-विशेषणम्) "प्रयज्यवे" प्रकर्षेण यष्टव्याय। "सुखादये" शोभनाभरणाय(४)

---

(१)—"गीः"-इति निघण्टौ वाङ्नामसु (१,११) दृश्यते; तस्य सप्तम्यां "गिरि"-इत्येव मन्तव्यम् न तु गिराविति, तदन्यत्पाठो लिपिकरप्रमादइव लक्ष्यते। विवरणकृता तु 'गिरिजा—हृदये जाता, यज्ञजाता वा'-इत्युक्तम्।

(२)—"अथ यद् विषितो भवति तद् विष्णुर्भवति। विष्णुर्विशते र्वा व्यश्नोते र्वा"-इत्यादि नि० १२,१८। विष्लृ व्याप्तावित्यस्येदं पदं विष्णुरिति, अत उच्यते—विष्णवे व्याप्तायेति।

(३)—विष्णु-नामकेन्द्राय-इति वेत्यर्थः; इन्द्रः विष्णुरिति पर्यायेति भावः। इह च मानं निघण्टौ विष्णुपुराणादौ च द्वादशादित्येषु उभयोरेव परिगणनम्।

(४)—'सुखादये सुखदाय सुखप्रदाय'-इति वि०।

अथ सप्तमी।

आनानतः पारुच्छेपिर्ऋषिः।

२ २ ३ १र २र १ २उ ३ २ २
अयारुचाहरिण्यापुनानोविश्वाद्वेषाꣳसि

३ १ २ ३ २ ३ २ ३ १ २
तरतिसयुग्वभिः*सूरोनसयुग्वभिः।

१ २ ३ १ २ ३ १ २ ३ १र २र
धारापृष्ठस्यारोचतेपुनानोअरुषोहरिः।

३ २ ३ १ २ ३ १र २र ३ १ २ ३ १ २
विश्वायद्रूपापरियास्यृक्व†भिःसप्तास्येभिर्ऋक्वभिः ॥७॥२३१

[खादिराभरण-विशेषः। "हस्तेषु खादिश्च कृतश्च सन्दधे"-इति, "अंसेषु च ऋषयः पत्सु खादयः"-इति च श्रुतेः]। "तवसे" बलवते। "मन्ददिष्टये" स्तुतिरूपा(५) इष्टिर्यस्य तत् मन्ददिष्टिः, तस्मै। "धुनिव्रताय" मेघानां चालनं कर्म यस्य, तादृशाय(६) "शवसे" गमनवते ॥ ६ ॥ २३०

* "स्वयुग्वभिः"-इति,
† "सुतस्य"-इति,
‡ "यात्यृक्व"-इति च,
} ऋग्वेदीय-पाठाः।

२३१ उत्तरार्चिकस्य ७,३,१०,१ = ऋग्वेदस्य ७,५,२४,१ आरण्यके २,२०—६,२ = ऊहे १०,२,३ = ऊह्ये ३,१२।

(५)—"मन्दते"-इत्यस्य निघण्टौ स्तुतिकर्मसु (३,१४) दर्शनादित्यभिप्रायः।
(६)—'कल्पितकर्मायम्' इति वि०। "धुनि * * मेघम्"-इति नि० दै० ४,३२

४ ५ १ १ २ २ ४ ५ १ र र
I आया। हृचा। हरि। एयापुनानाः। विश्वाद्वे

र ४ २ ३ ५ २र १ २ १ ३
षाᳬसितरतीर्३सा३युग्वभिः। ह्वरो२३ना३। सा२यू२३

५र र ३ ५
४औहोवा। ग्वा२३४भोः॥ ३४॥

५ र ३ २र ३ ४ ५र २ र १ १ र २
II अयाहृचाहरिण्या। पुनानः। विश्वाद्वा२३यिषा।

१ २र र २ २ १ ३ ५
सायितर। सौहो। वा३हा३यि। सायू२ग्वा२३४भोः।

२र १ २ ३ २ ४
सूरो२३ना। सयू३ग्वा५पूभा६पु६यिः॥ ३५॥

४ ३र ४ ३र ४ ५र १ ४र र ५ र ४ ५
III अयाहृचाहरिण्या। पू३३४। नानोविश्वाद्वेषा।

१ २ १ ७ १ २ १
सायितरति। सायुग्वाभोरः। ह्वरोना३। सायू२-

३ ५ ४र ५र ४ १ १ २ १
ग्वा२३४भोः। धारापृष्ठा। स्यारो२चतायि। पुना-

२ १ २ ३ ५ ४ ५र ४ १ २ र
नोआ३। हृषोहा२३४रीः। विश्वायद्रू। पापरिया।

---

I,II,III विषमाणानि त्रीणि।

१ ७　　　　१ २ ३ १ ४ २
साच्चक्काभी२ः । सप्तासी३ये । भा२३यिरा३ । क्का ३४५

५
भो६हायि ॥ ३६ ॥ २३१

"पुनानः" पूयमानः सोमः "हरिण्या" हरितवर्णया "अया" अनया "रुचा" रोचमानया धारया "विश्वा" सर्वाणि" "द्वेषांसि" द्वेष्टॄणि रचांसि "तरति" विनाशयति । तत्र दृष्टान्तः— "सूरीन" यथा सूर्य्यः "सयुग्वभिः" सह युक्तैरश्मिभिः तमांसि हिनस्ति तद्वत् (सयुग्वभिरिति द्विरुक्तिरादरार्थाः) । यद्वा । धारया युक्तः सोमो युक्तैस्तेजोभिः सह रचांसि तरति । तस्य "पृष्ठस्य" (पृष्ठ इति धारक उच्यते) जगतो धारकस्य सोमस्य पतन्ती धारा "रोचते" दीप्यते । "पुनानः" पूयमानः "हरिः" हरितवर्णः सोमः "अरुषः" आरोचमानो भवति(१) । "यद्" यः सोमः "सप्तास्येभिः" रसाहरणशीलास्यैः(२) "ऋक्कभिः"

(१)—"अरुषम्"-इति रूप-नामसु पञ्चदशं नैघण्टुकम् (३,७) । "अरुषः"-इति अश्व-नामसु च दृश्यते (नि० १,१४,१७) ।

(२)—"सप्तैतानादित्यरश्मीनयमादित्योगिरति"-इत्यादि नि० २,२१ । 'सप्त-च्छन्दांसि आस्यभूतानि येषामृत्विजां ते सप्तास्याः तैः सप्तास्येभिः । अथवा सप्त वषट्-कारिणो होतारः सप्तास्यानि सप्त सोमसंस्थाः सप्तास्यानि ताभिः'-इति वि० ।

अथाष्टमी।

नकुलऋषिः।

१ २उ ३ २ ३ १ २३क २र ३ १ २ ३
अभित्यन्देवꣳसवितारमोण्योःकविक्रतु
१ २ ३ १ २ ३ २ २ ३२ ३ २
मर्चामिसत्यसवꣳरत्नधामभिप्रियम्मतिम्*।
३ २उ ३ २ ३ १र २र ३ १ २ ३
उर्द्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनि
१ २ ३ १ २ ३ १ २
हिरण्यपाणिरमिमीतसुक्रतुःकृपास्वः॥ ८ ॥२३२

५ ४ र५र ४ ५ ४८ ५ ५र ४र ५ १र
I अभित्यन्देवꣳसवितारम्। औहोहोवाहायि। ओणा
५ २ १ ५ २ १ ३ ५
२३४योः। कविक्रा२३४तूम्। आर्चामौ२३४सा। त्वा-

स्तुतिमद्भिः, ऋक्भिस्तेजोभिः(३) "विश्वा" विश्वानि सर्वाणि "रूपाणि" "परियाति" परितोव्याप्नोति(४)।

"पृष्ठस्य"—"सुतस्य"-इति साम्न ऋचः पाठौ॥ ७ ॥२३१

---

* "मतिंकविम्"-इति यजुः-प्रातिशाख्य-पाठः।

---

२३२ यजुर्वेदस्य ४,२५=अथर्ववेदस्य ११,४,२।

I सवितुः साम।

(३)—'ऋक्भिः ऋलिग्भिः'-इति वि०। "ऋचा"-इति स्तोम-नामसु च दृश्यते (नि० ३, २४, ५)।

(४)—यद्यपि यातिः प्रकृतितोगत्यर्थः, परं परिसाहचर्य्यात् परितो गमनं कथयति सुतरामिह व्याप्त्यर्थः।

सावा२३४ऽरा। त्नधामा२३४मी। प्रियम्मा२३४तीम्।
औहोऔहोवा२३४हाउ। ऊर्ध्वाया२३४स्य। आमातीर-
३४र्भाः। अदिद्यू४तात्। सवीमा२३४नी। औहोऔहो
वा२३४५हाउ। हाइरण्या२३४या। णीरामी२३४मी।
तसुक्रा२३४तूः। औहोऔहोवा२३४५हाउ। वा। एत।
कृपास्वा२३४५ः॥ ३७ ॥ २३२

"सवितारं" प्रेरकं(१) "देवं" वाग्व्यापारेण "अभि अर्चामि"

---

(१)—"सविता सर्वस्य प्रसविता" इति नि० १०, ३१। "तस्य कालो यदा धौर-पहततमस्काकीर्णरश्मिर्भवति"-इति नि० दै० ६, ११।

"सविता यन्त्रैः पृथिवीमरम्णा
दस्कम्भने सविता द्यामदृंहत्।
अश्वमिवाधुक्षद्धुनिमन्तरिक्ष
मतूर्ते बद्धं सविता समुद्रम्॥"

-इति ऋग्वेदीयदशममण्डलैकादशस्य कविंशे प्रथमा। अस्येदं यास्क-कृतं व्याख्यानम्—"सविता यन्त्रैः पृथिवीमरमयदनारम्भणेऽन्तरिक्षे, सविता द्यां मदृंहदस्व-

सर्वतः पूजयामि। कीदृशं? "कविक्रतुं" क्रान्त-प्रज्ञं(२) "सत्यसवं" अवितथ-प्रेरणम्। "रत्नधां" रमणीयानां धनानां दातारम्(३)। "अभिप्रियं" सर्वतः प्रीति-युक्तम्। "मतिं" मननीयं स्तुत्यम् "यस्य" सवितुः "भा" दीप्तिः "ऊर्ध्वा" उन्नता सती "ओण्योः" द्यावापृथिव्योः(४)। "अदिद्युतत्" अतिशयेन दीप्यते। यस्य सवितुः "सवीमनि" प्रसवे सति(५) "अमतिः" सर्वेषां कान्तिः(६) अदिद्युतत् भृशं प्रकाशते। सः "सुक्रतुः" शोभनकर्मा "हिरण्यपाणिः" हिरण्य-हस्तः सविता देवः "कृपा(७)" कृपया "स्वः" स्वर्गे निमित्तभूते सति "अमिमीत" "इमं" सोमम् इयत्तया मितवान्। यद्वा। स्वः सर्वस्या कृपया सङ्कल्पेन निरमिमीत॥ ८ ॥९३२

---

मिवाधुच्चइनिमन्तरिचे मेघं बद्धमतूर्त्तं बद्धमतूर्णं इति वा त्वरमाणइति वा सविता समुदितारमिति। कमन्य मध्यमादेवमवच्चत। आदित्योऽपि सवितोच्यते"-इत्यादि।

(२)—"कविः क्रान्तदर्शनोभवति कवते वा"-इति नि० १२,१३। कविरिति निघण्टौ मेधाविनामसु च दशमं पदम् (३,१५) क्रतुरिति कर्मनाम (नै०२,१) प्रज्ञानाम च (नै०३,९)। अतएव 'मेधावि-कर्माणम्'-इति वि०।

(३)—"रत्नधातमं रमणीयानां धनानां दातृतमम्"-इति ऋग्वेदीय-प्रथमर्ग्व्याख्याने यास्कः दै०१,१५।

(४)—"ओण्यौ"-इति द्यावापृथिवीनामसु पञ्चदशं नैघण्टुकम् ३,३०।

(५)—"सवीमनि प्रसवे"-इति नि०६,७।

(६)—"अमतिरमामयी मतिरात्ममयी"-इत्यादि नि० ६,१२। विवरणेऽप्येवमेव।

(७)—तृतीयाविभक्तेर्लुकि (७,१,३९) रूपमिदं कृपेति।

अथ नवमी ।

परुच्छेपऋषिः ।

३ १र   २र   ३ १ २ ३ १ २   ११र
अग्निꣳ होतारं मन्ये दास्वन्तं वसोः* सूनुꣳ

२र  ३ १२  ३ २३ २३ १२
सहसो जातवेदसं विप्रं न जातवेदसम् ।

३ १ १   २ २ ३ २ ३ १ १ २ ३ १
य ऊर्द्ध्वया स्वध्वरो देवो देवाच्या कृपा ।

२ २ ३ १ २ ३ १ २ ३ १ १   ३ १ २   ३ १ २
घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य† सर्पिषः ॥ ९ ॥ २३३

५   र   २ ऽर १ २   २ २
I अग्निꣳ होता । रम्मन्येरदास्वन्तम् । औ३वा३ ।

१ २ १ ५   २ र ऽ १ २   १
वासोः सू२३४नूम् । सहसोजा३तावेऽ१दासा२म् । विप्र-

र  २   १ ३ ५   २ १ २
न्नजा । औ३वा । तवे२दा२३४साम् । यऊर्द्धाऽ१या२ ।

२ १ २   २ररर र  २ १   १ ३ ५
सुवाध्वाऽ१राऽ२ः । देवोदेवा । ऊ२वा३ । चिया२कापा ।

---

* "वसु"-इति, † "मनुवष्टिशोचिषाजुह्वानस्य"-इति च ऋग्वेदीय-पाठः ।

---

२३३ उत्तरार्चिकस्य ८,१,१८,१ = ऋग्वेदस्य २,१,१२,१ = यजुर्वेदस्य १५,४७ = जम्रो ६,२,४ ।

५ ४ २ १ ३र १ २ २ २
घृतोवा। स्यविभ्रा२ष्टिम्। अनुभ्रुक्रशा। औ३वाचियः।

१र २ ३ २ १ १ ३ ५र र
आजू२३ह्वाना। स्यसा। औ२वा३। पा२यिषा२३४औहो-

३ ५
वा। ऊ२३४पा॥ ३८॥

४ ३ र ४र ५ र १ ४ ५ ४ ५र र ४
II अग्निं होतारम्मन्ये। दा२३४। स्वन्तंवसोःसूनुम्।

२ र ३र १ २ २ ३ र २
सहसोजा३ताविऽ१दासा२म्। विप्रन्नजा३ताविऽ१दासा२

२ र ३र १ ७ २र र र ३र १ २
म्। यऊर्ध्वयाऽस्वध्वरा२ः। देवोदेवा३चायाऽ१क्रपा२।

२ १ २ १ रर १ २ १ २ १र २
घृतास्यविभ्राष्टिमनुभ्रु। क्रशोऽ१चिषा२ः। आजूह्वा३

२ १ ४ ६ ५
ना३। स्या२३सा३। पा३४५यिषोऽ६हायि॥ ३९॥

३ २ १ ५ २ १ ३ २ ३ ४ ५
III अहावोहा२३४वाः। ३। अग्निष्टपती। प्रतिदहती।

२ १ २र ४ २र ३ ५ २ १ २र
अग्निंहो। तार म्मा३न्य३दास्वन्तम्। वसोः। सूनुं

३ र ४ २र ३ ५ २ १ ३ ४ २र ३ ५
सह सो जा३ता३ वेदसम्। विप्राम्। नजा३ता३ वेदसम्।

---

I,II भारद्वाजे द्वे। III अवभृथं साम।

२ १ २ ४ ० ३ ५ २२१ २२ ४ २२ ३५२
य ऊर्ध्वयाइह्ह३वध्वरः। देवो। देवा३चीइया कृपा।
२१ २ २ ४ २२ ३ ५ २२ १ २२
घृता। स्वविभ्राष्टि मनुशू३क्का२शोचिषः। आजू। क्काना३
४ २ ३ ५ ३ २ ९ ५ १ १
स्या३सर्पिषः। अहावोहा२३४ वाः। इ। अग्निष्टपती।
१ १ ५ ४ २ १ २ १ १
प्रतिदहाऽ५ता६५६यि। ए३। विश्वꣳसमत्रिणं दह। २।
२ १ २ १ १ ३ १११
ए३। विश्वꣳसमत्रिणं दहा२३४५ ॥४०॥

२ ३ २ ३ ४ ५ २ ३ १ १
IV त्यग्नायि। प्रतिदहती। हाउहो२५हाउ। अग्निꣳ
२२ ४ २२ ३ ५ २१ २२ २
हो। तारम्मा३न्ये३दास्वन्तम्। वसोः। हनुꣳसहसोजा३
४ २२ ३ २ १ २ ४ २२ ३ ५ २ १ १
ता३वेदसम्। विप्राम्। नजा३ता३वेदसम्। यऊ। ध्वया
४ २ ४ ५ २२१ २२ ४ २२ ३ ५ ११ २
३ह्ह३वध्वरः। देवो। देवा३ची३याकृपा। घृता। स्ववि-
२ ४ २२ ४ ५ २२ १ २२ ४ २ ३ ५
भ्राष्टिमनुशू३क्का२शोचिषः। आजू। क्काना३स्या३सर्पिषः।
२ २ १ २ ३ ४ ५ २ ५ २
त्यग्नायिः। प्रतिदहती। हाउहोऽ५हाउ। वा। ए३।

---

IV प्रवर्ग्यं साम।

१ २   १   २   २   १ २   १   २   १
विश्वꣳ समचिणान्दह। ए३। विश्वꣳव्यचिणान्दह। ए३।

१   २ १   २ ३   १ १ १ १
विश्वं न्यचिन्दहा २३४५॥ ४१॥ २३३

"अग्नि" सर्वासां देवसेनानामग्रण्यम् यज्ञेष्वग्रं नीयमानं वा(१)। "होतारं"(२) अस्मद्यागं प्रति देवानामाह्वातारम्। यद्वा। होम-निष्पादकं(३) होतारं ["जुहोतेर्होतेत्यौर्णवाभः (७,१५)-इति यास्क-वचनात्। "अग्निमद्य होतारमवृणीतेति श्रुतेः। "अग्निमग्नआवहेति च अग्ने राह्वातृत्वं प्रसिद्धम्। अग्निं होतारं मन्ये इत्येवं प्रतिविशेषणं मन्ये इति सम्बन्धः। यद्वा याग-निष्पत्तेरेवोपलक्षितत्वादेतदेव विधेय-विशेषणम्। इतराणि वक्ष्यमाण-विशेषणानि स्तुति-पराणि] "दासन्तम्" अतिशयेन दानवन्तं(४) "वसोः" प्रशस्यस्य(५) सर्वेषां "सहसः सूनुम्" बलस्य

---

(१)—"अग्निः कस्मात्? अग्रणीर्भवति अग्रं यज्ञेषु प्रणीयते"-इति नि०६,१४।

(२)—सम्प्रसारणं बाहुलकात् (६,१,३४)।

(३)—होमनिष्पादकत्वरूपकर्तृत्वमस्त्येवाग्नेरपि अन्यथानुपपत्तेः अतएव महाभाष्ये 'काष्ठः पचति'-इत्याद्युदाहृतमिति दिक्।

(४)—दानकर्मसु दासतेर्दर्शनात् (नै०३,२०,३)।

(५)—'वसोः धनस्य दासन्तम्'-इति वि०।

पुत्रमग्निं(६) [मन्थन-काले बलेन मथ्यमान उत्पद्यत इति तत्-पुत्रत्वमुपचर्य्यते "जातवेदसं" जातानां वेदितारं जातप्रज्ञं जात-धनं वा [जातवेदः शब्दो यास्केन बहुधा निरुक्तः(७)] अग्नेर्जात-वेदस्त्वे दृष्टान्तः—"विप्रं न" जातवेदसञ्जातविद्यं मेधाविनं ब्राह्मणमिव, तं यथा बहु मन्यते तथा त्वामपि स्तौमीत्यर्थः। उक्त-गुण-विशिष्टो यो देवः "स्वध्वरः" शोभन-यज्ञवान् यज्ञं सम्यक् निर्वहन्। "ऊर्ध्वया" उन्नतया उत्कृष्टया "देवाच्या" देवान् पूजयन्त्या देवान् प्रत्युक्तया वा "कृपा"(८) कृपया सामर्थ्य-लक्षणया ["देवान् प्रत्युक्तया कृपेति(६,८) यास्कः] तेभ्यो हविर्वहन-बुध्या युक्तः सन् "शुक्रशोचिषः" दीप्त-तेजस्कस्य "आजुह्वानस्य" आ समन्ताद् हूयमानस्य "सर्पिषः" सरण-शीलस्य घृतस्य(९)

(६)—"सहः"-इति बलनामसु सप्तदशं नैघण्टुकम् (२,९)। "सूनुः"-इति तु अपत्यनामसु द्वादशं नैघण्टुकम् (२,२)।

(७)—"जातवेदाः कस्मात्? जातानि वेद, जातानि वैनं विदुः, जाते जाते विद्यत इति वा, जातवित्तो वा, जातधनो, जातविद्यो वा, जातप्रज्ञानो यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणम् तस्मात् सर्वानृतून् पशवो-ऽग्निमभि सर्पन्तीति च"-इत्यादि नि०७,९। "यस्तु सूक्तं भजते यस्मै हविर्निरूप्यतेऽयमेव सोऽग्निर्जातवेदा निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते"-इत्यादि च नि७,२०। "जातवेदसम् *** कमन्यमादित्यादेवमवक्ष्यत्"-इत्यादि च नि०१२,१५।

(८)—कृपेति पान्तस्य कृबित्यस्य तृतीयैके आकारान्त-रूपम्, कृप्शब्दोऽपि कृपार्थः। अतएवोक्तं यास्केन—"कृप् कृपतेर्वा कल्पतेर्वा"-इति (६,८)।

(९)—"सृप्रः सर्पणादिदमपीतरत् सृप्रम्, एतस्मादेव सर्पिर्वा तैलं वा"-इति नि०६,१७।

अथ दशमी ।

गृत्समदऋषिः ।

२ ३१र २र३ १ २ ३ २ ३ १ २ २ ३१ १ ३ १
तवत्यन्नर्यन्नृपो तइन्द्रप्रथमम्पूर्व्यन्दिविप्रवाच्यङ्कृतम् ।
३ ३ २ ३ १ २ ३ २ २ ३ १ २ ३ १ ३ २
योदेवस्यशवसाप्रारिणाअसुरिणन्नपः* ।
२ ३ १ २ ३ १ २ ३ १ २ ३ १र २र
भुवो† विश्वमभ्यदेवमोजसाविदेदूर्जं
३ १ २ ३ १ १र
शतक्रतुर्विदेदिषम्‡ ॥ १० ॥ २३४

॥ इति तृतीय-दशति ॥

विलापनेन दीप्तस्याज्यस्य "विभ्राष्टिं" विशेषेण भ्राजमनु स्वयमपि तदाज्यं "वष्टि"(१०) कामयते स्वीकरोतीत्यर्थः ।

"वसोः"-"वसुम्"-इति साम्न ऋचः पाठौ ॥ ८ ॥ २३३

---

| | |
|---|---|
| * "असुरिणन्नपः"-इति,<br>† "भुवद्"--इति,<br>‡ "विदादिषम्"-इति च | ऋग्वेदीय-पाठाः । |

---

२३४ ऋग्वेदस्य २,६,२८,४ ।

(१०)—"वष्टि"-इति कान्ति-कर्मसु प्रथमं नैघण्टुकम् (२,६) तस्येदं रूपमन्यद् वष्टीति ।

१ ४ २१ १
1 तार३४वत्यन्नाऽ५परियं नृताउ। अप इन्द्रा२। प्रथमं
१२३५ ३२र १२३५ २र १र
पूर२। विंयन्दिवि। प्रवा। चियं कृतम्। यो देवास्या२।
१ ३२र ३५ ३२३५ २१र
अवसाप्रा२। रिणा असु। रिणन्नपः। भुवो विश्वा२म्।
१ १र२र ४र ३२र३५ ३२४ ५
अभ्यदा२यि। वमोजसा विदेदूर्जम्। शतक्रा२३४तूः।
४
विदाऽ५यिदिषाउ। वा॥ ४२ ॥* २३४

"नृतः" सर्वेषां नर्तयितः प्रवर्त्तयितः हे "इन्द्र!" "नर्यं" नराणां हितकरम्। "प्रथमं" प्रतमं ("प्रथमं प्रतमम्"-इति(१) यास्कः) "पूर्व्यं" पूर्व्व-काल-भवं त्वया कृतं "तव" "त्यद्" तदपः-कर्म "दिवि" स्वर्गलोके "प्रवाच्यं" देवैः प्रकर्षेण वक्तव्यं श्लाघनीय-मित्यर्थः। किन्तत्? "देवस्य" विजिगीषोः "असुरस्य" "असु" असुं प्राणं "रिणन्" हिंसन् त्वम् "अपः" उदकानि तेन निरु-द्धानि "अरिणः" प्रैरय। —इति यदेतत् कर्म्म तत्प्रवाच्यमिति-

---

I ऐषं साम।

(१)—"प्रथम इति मुख्य-नाम, प्रतमो भवति"-इति च यास्कः (२,२२)।

---

* ॥ इति ग्रामे गेयगाने द्वादशार्द्धः प्रपाठकः ॥

समन्वयः। परोक्ष-निर्देश-विशिष्टः "सः" इन्द्रः "विश्वं" व्याप्तम् "अदेवं" तमोरूपम् "असुरम्" "ओजसा" बलेन "अभि भुवत्(२)" अभिभवतु। किञ्च "शतक्रतुः" इन्द्रः "ऊर्जम्" बलं "विदेत्" लम्भयेत्। "इषं" हविर्लक्षणमन्नं च विदेत् [विद्लृ लाभे (तु० उ०)]॥

"यो"—"यद्"-इति, "विदेद्"—"विदा"-इति च साम्न ऋचः पाठौ॥ १०॥ २३४+११८=३५२

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्या-तीर्थ-महेश्वरः॥ ४॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-श्रीवीरबुक्क-भूपाल-
साम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये
सामवेदार्थप्रकाशे छन्दोव्याख्याने
द्वादशः खण्डः॥ १२॥

॥ समाप्तश्चतुर्थोऽध्यायः॥ ४॥

॥ ऐन्द्रम् पर्व ऐन्द्रकाण्डं वा॥

॥ इति द्वितीयं पर्व॥

---

(२)—भुवदिति लेटो रूपम् (सि० कौ० वै० ३)।